This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

GIFT OF
HORACE W. CARPENTIER

SIGILLVM · VNIVERSITATIS · CALIFORNIENSIS
FIAT LVX
MDCCCLXVIII

EX LIBRIS

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 1. JUNE 1st 1876. Vol. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

Digitized by Google

UNIV. OF CALIFORNIA

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 1. JUNE 1st 1876. Vol. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

UNIV. OF CALIFORNIA

PK3591
P33
ser. 2.
v. 1
MAIN

NOTE.

It has been thought advisable that in future the *Pandit* should appear in octavo instead of folio size. In this the aim is to facilitate its transmission in India and Europe, to present it as a series of monthly volumes, and to adapt it better to the shelves of its purchasers.

Its less journalistic appearance points to no alteration in its character or management. Its contents will be of the same extent as hitherto, and its scope will still be that exhibited at the outset (*Pandit,* July 1st 1866), viz. "to publish rare Sanskrit works which appear worthy of careful editing hereafter; to offer a field for the discussion of controverted points in old Indian philosophy, philology, history, and literature; to communicate ideas between the Aryan scholars of the East and the West; between the Pandits of Benares and Calcutta and the Sanskritists of the Universities of Europe."

521602

Digitized by Google

UNIV. OF
CALIFORNIA

Digitized by Google

॥ काशिकायाः ॥

पञ्चमाध्यायस्य तृतीयः पादः ।

प्रशस्यस्य श्रः ॥ ६० ॥

प्रशस्यशब्दस्य श्र इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः । अजादी इति प्रकृतस्य सप्तमी विभक्तिर्विपरिणम्यते । ननु च प्रशस्यशब्दस्यागुणवचनत्वादजादी न संभवतः, एवं तर्हि आदेशविधानसामर्थ्यात्तद्विषयो नियमो न प्रवर्तते ऽजादी गुणवचनादेवेति । एवमुत्तरेष्वपि योगेषु विज्ञेयम् । सर्व इमे प्रशस्या अयमेषामतिशयेन प्रशस्यः, श्रेष्ठः । उभाविमौ प्रशस्यौ अयमनयोरतिशयेन प्रशस्यः, श्रेयान् । प्रकृत्यैकाजिति प्रकृतिभावाच्छ्रशब्दस्य टिलोपयस्येतिलोपौ न भवतः ॥

ज्य च ॥ ६१ ॥

प्रशस्यशब्दस्य ज्य इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः । सर्व इमे प्रशस्या अयमतिशयेन प्रशस्यः, ज्येष्ठः । उभाविमौ प्रशस्यावयमनयोरतिशयेन प्रशस्यः, अयमस्मात् ज्यायान् । ज्यादादीयस इत्याकारः ॥

वृद्धस्य च ॥ ६२ ॥

वृद्धशब्दस्य च ज्य इत्ययमादेशो भवत्यजाद्योः प्रत्यययोः परतः । तयोश्च सत्त्वं नियमाभावेन पूर्ववत् ज्ञाप्यते । सर्व इमे वृद्धा अयमेषामतिशयेन वृद्धः, ज्येष्ठः । उभाविमौ वृद्धौ अयमनयोरतिशयेन वृद्धः, ज्यायान् । अयमस्मात् ज्यायान् । प्रियस्थिरेत्यादिना वृद्धशब्दस्य वर्षादेशो विधीयते । वचनसामर्थ्यात्पक्षे सोपि भवति । वर्षिष्ठः । वर्षीयानिति ॥

अन्तिकबाढयोर्नेदसाधौ ॥ ६३ ॥

अन्तिकबाढयोर्यथासंख्यं नेद साध इत्येतावादेशौ भवतो ऽजाद्योः परतः । तयोश्च सत्त्वं पूर्ववद्विज्ञेयम् ॥ निमित्तभूतयोर्यथासंख्यमत्र

नेष्यते ॥ सर्वाणीमान्यन्तिकानि इदमेषामतिशयेन, नेदिष्ठम् । उभे इमे अन्तिके इदमनयोरतिशयेन नेदीय: । इदमस्मान्नेदीय: । सर्व इमे बाढम-धीयते । अयमस्मात्साधीयोधीते ॥

युवाल्पयो: कनन्यतरस्याम् ॥ ६४ ॥

युवाल्पशब्दयो: कनित्ययमादेशो भवत्यन्यतरस्यामजाद्यो: परत: । तयोश्च सत्त्वं पूर्ववत् ज्ञेयम् । सर्व इमे युवान: अयमेषामतिशयेन, कनिष्ठ: । द्वाविमौ युवानौ अयमनयोरतिशयेन, कनीयान् । यविष्ठ: । यवीयान् । सर्व इमेल्पा: । अयमेषामतिशयेन, कनिष्ठ: । उभाविमावल्पा-वयमनयोरतिशयेन कनीयान् । अयमस्मात्कनीयान् । अल्पिष्ठ:, अल्पीया-निति वा ॥

विन्मतोर्लुक् ॥ ६५ ॥

विनो मतुपश्च लुग् भवति अजाद्यो: प्रत्यययो: परत: । इदमेव वचनं ज्ञापकमजादिसद्भावस्य । सर्व इमे स्रग्विण: अयमेषामतिशयेन, स्रजिष्ठ: । उभाविमौ स्रग्विणौ अयमनयोरतिशयेन, स्रजीयान् । अयम-स्मात् स्रजीयान् । सर्व इमे त्वग्वन्त: अयमेषामतिशयेन, त्वचिष्ठ: । उभाविमौ त्वग्वन्तौ, अयमनयोरतिशयेन, त्वचीयान् । अयमस्मात्त्वची-यान् ॥

प्रशंसायां रूपप् ॥ ६६ ॥

प्रशंसा स्तुति: । प्रकृत्यर्थस्य विशेषणं चैतत् । प्रशंसाविशिष्टे ऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे रूपप् प्रत्ययो भवति । स्वार्थिका: प्रत्यया: प्रकृत्यर्थविशेषस्य द्योतका भवन्ति । प्रशस्तो वैयाकरणो वैयाकरणरूप: । याज्ञिकरूप: । प्रकृत्यर्थस्य वैशिष्ट्ये प्रशंसा भवति । वृषलरूपो ऽयं, य: पलाण्डुना सुरां पिबति । चोररूप: । दस्युरूप: । यो ऽक्ष्णोरप्यञ्जनमपहरेत् । तिङश्चेत्यनुवर्त्तते । पचतिरूपम् । पचतोरूपम् । क्रियाप्रधानमाख्यातम् । एका च क्रियेति रूपप्प्रत्ययान्तात् द्विवचनबहुवचने न भवत: । नपुंसक-लिङ्गन्तु भवति लोकाश्रयत्वाल्लिङ्गस्य ॥

Digitized by Google

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥ ६७ ॥

संपूर्णता, पदार्थानां समाप्तिः । स्तोकेनासंपूर्णता, ईषदसमाप्तिः । प्रकृत्यर्थविशेषणं चैतत् । ईषदसमाप्तिविशिष्टे ऽर्थे वर्तमानात् प्रातिपदिकात् कल्पबदेश्यदेशीयर इत्येते प्रत्यया भवन्ति । ईषदसमाप्तः पटुः, पटुकल्पः । पटुदेश्यः । पटुदेशीयः । मृदुकल्पः । मृदुदेश्यः । मृदुदेशीयः । तिङश्चेत्येव । पचतिकल्पम् । जल्पतिकल्पम् ॥

विभाषा सुपो बहुच् पुरस्तात्तु ॥ ६८ ॥

ईषदसमाप्तिविशिष्टे ऽर्थे वर्तमानात् सुबन्ताद्विभाषा बहुच् प्रत्ययो भवति स च पुरस्तादेव भवति, न परतः । विस्पष्टमन्तोदात्तार्थम् । ईषदसमाप्तः पटुः, बहुपटुः । बहुमृदुः । बहुगुडा द्राक्षा । विभाषावचनात् कल्पबादयो ऽपि भवन्ति । सुब्ग्रहणं तिङन्तान्मा भूदिति ॥

प्रकारवचने जातीयर् ॥ ६९ ॥

सामान्यस्य भेदको विशेषः प्रकारः, तस्य वचने, प्रकृत्यर्थविशेषणं चैतत् । सुबन्तात्प्रकारविशिष्टे ऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे जातीयर् प्रत्ययो भवति । प्रकारवति चायं प्रत्ययः । थाल्पुनः प्रकारमात्रएव भवति । पटुप्रकारः, पटुजातीयः । मृदुजातीयः । दर्शनीयजातीयः ॥

प्रागिवात्कः ॥ ७० ॥

इवे प्रतिकृताविति वक्ष्यति । प्रागेतस्मादिवसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः, कप्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति अज्ञात इति । अश्वकः । गर्दभकः । तिङन्तादयं प्रत्ययो नेष्यते । पचजिष्यते । तिङश्चेत्यनुवृत्तमुत्तरसूत्रेणैव संबन्धनीयम् ॥

अव्ययसर्वनाम्नामकच्प्राक् टेः ॥ ७१ ॥

तिङश्चेत्येव । अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेष्वकच्प्रत्ययो भवति, स च प्राक् टेः, न परतः । कस्यापवादः । उच्चकैः । नीचकैः । शनकैः । सर्वनाम्नः खल्वपि । सर्वके । विश्वके । उभयके । प्रातिपदिकात्सुप इति द्वयमिहानुवर्तते । तत्राभिधानतो व्यवस्था भवति । क्व चित्प्रातिपदिकस्य प्राक् टेः प्रत्ययो भवति । क्व चित्सुबन्तस्य । युष्मकाभिः ।

अस्मकाभिः । युष्मकासु । अस्मकासु । युवकयोः । आवकयोः । इत्यत्र प्रातिपदिकस्य । त्वयका । मयका । त्वयकि मयकीत्यत्र सुबन्तस्य ॥ अकच्प्रकरणे तूष्णीमः काम् प्रत्ययो वक्तव्यः ॥ * ॥ स च मित्त्वादन्त्यादचः परो भवति । तूष्णीकामास्ते । तूष्णीकां तिष्ठति ॥ शीले को मलोपश्च वक्तव्यः ॥ * ॥ तूष्णीं शीलः, तूष्णीकः । तिङश्चेति प्रकृतमत्र संबध्यते । पचतकि । जल्पतकि ॥

कस्य च दः ॥ ७२ ॥

ककारान्तस्य प्रातिपदिकस्याकच्सन्नियोगेन दकारादेशो भवति । चकारः सन्नियोगार्थः । सामर्थ्याच्चाव्ययग्रहणमनुवर्त्तते, न सर्वनामग्रहणम् । ककारान्तस्य सर्वनाम्नो ऽसंभवात् । धिक् । धकित् । हिरुक् । हिरकुत् । पृथक् । पृथकक् ॥

अज्ञाते ॥ ७३ ॥

अज्ञातविशेषो ऽज्ञातः । अज्ञातत्वोपाधिके ऽर्थे वर्त्तमानात्प्रातिपदिकात्तिङन्ताच्च स्वार्थे यथाविहितं प्रत्ययो भवति । स्वेन रूपेण ज्ञाते पदार्थे विशेषरूपेणाज्ञाते प्रत्ययविधानमेतत् । कस्यायमश्व इति स्वस्वामिसंबन्धेनाज्ञाते ऽश्वे प्रत्ययः । अश्वकः । गर्द्दभकः । उष्ट्रकः । एवमन्यत्रापि यथायोगमज्ञातता विज्ञेया । उच्चकैः । नीचकैः । सर्वके । विश्वके । पचतकि । जल्पतकि ॥

कुत्सिते ॥ ७४ ॥

कुत्सितो गर्हितो निन्दितः । प्रकृत्यर्थविशेषणं चैतत् । कुत्सितत्वोपाधिके ऽर्थे वर्त्तमानात्प्रातिपदिकात्स्वार्थे यथाविहितं प्रत्ययो भवति । कुत्सितो ऽश्वः, अश्वकः । उष्ट्रकः । गर्द्दभकः । उच्चकैः । नीचकैः । सर्वके । विश्वके । पचतकि । जल्पतकि ॥

संज्ञायां कन् ॥ ७५ ॥

कुत्सितइत्येव । कुत्सितत्वोपाधिके ऽर्थे वर्त्तमानात् प्रातिपदिकात् कन् प्रत्ययो भवति । कस्यापवादः । प्रत्ययान्तेन चेत्संज्ञा गम्यते । शूद्रकः । धारकः । पूर्णकः ॥

अनुकम्पायाम् ॥ ७६ ॥

कारुण्येनाभ्युपपत्तिः परस्यानुकम्पा । तस्यां गम्यमानायां सुबन्तात्तिङन्ताच्च यथाविहितं प्रत्ययो भवति । पुत्रकः । वत्सकः । दुर्बलकः । बुभुक्षितकः * । विश्वसितकि । स्वपितकि ॥

नीतौ च तद्युक्तात् ॥ ७७ ॥

सामदानादिरुपायो नीतिः । नीतौ च गम्यमानायां तद्युक्तादनुकम्पायुक्ताद्यथाविहितं प्रत्ययो भवति । हन्त ते धानकाः । हन्त ते तिलकाः । एहकि । अद्धकि । अनुकम्पमानो दानेनाराधयति । पूर्वेणा-प्रत्यासत्त्यानुकम्पासंबन्धादनुकम्प्यमानादेव प्रत्ययो विहितः । संप्रति व्यवहितादपि यथा स्यादिति वचनम् ॥

बह्वचो मनुष्यनाम्नष्ठज्वा ॥ ७८ ॥

अनुकम्पायां नीतौ च तद्युक्तादिति वर्त्तते । बह्वचः प्रातिपदिकान्मनुष्यनामधेयाद्वा ठच्प्रत्ययो भवति अनुकम्पायां गम्यमानायां नीतौ च । देविकः । देवदत्तकः । यज्ञिकः । यज्ञदत्तकः । बह्वच इति किम् । दत्तकः । गुप्तकः । मनुष्यनाम्न इति किम् । मद्रबाहुकः । भद्रबाहुकः ॥

घनिलचौ च ॥ ७९ ॥

अनुकम्पायामित्यादि सर्वमनुवर्त्तते । पूर्वेण ठचि विकल्पेन प्राप्ते वचनम् । बह्वचो मनुष्यनाम्नो घन् इलच् इत्येतौ प्रत्ययौ भवतः । चकाराद्यथाप्राप्तम् । देवियः । देविलः । देविकः । देवदत्तकः । यज्ञियः । यज्ञिलः । यज्ञिकः । यज्ञदत्तकः ॥

प्राचामुपादेरडज्वुचौ च ॥ ८० ॥

पूर्ववत् सर्वमनुवर्त्तते । उपशब्द आदिर्यस्य तस्मादुपादेः प्रातिपदिकाद् बह्वचो मनुष्यनाम्नो ऽडच् वुच् प्रत्ययौ भवतः । चकाराद् घनिलचौ प्रत्ययौ भवतः । ठच्च वा । उपडः । उपकः । उपियः । उपिलः । उपिकः । उपेन्द्रदत्तकः । प्राचां ग्रहणं पूजार्थम् । वेत्येव हि वर्त्तते ॥

* बर्बरितकः इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

जातिनाम्नः कन् ॥ ८१ ॥

बह्वच इति नानुवर्त्तते । सामान्येन विधानं, जातिशब्दो यो मनुष्यनामधेयो व्याघ्र सिंह इत्येवमादिः तस्मादनुकम्पायां नीतौ च कन्प्रत्ययो भवति । व्याघ्रकः । सिंहकः । शरभकः । वावचनानुवृत्तेर्यथादर्शनं * मन्यो ऽपि भवति । व्याघ्रिलः । सिंहिलः । नामग्रहणं स्वरूपनिवृत्त्यर्थम् ॥

अजिनान्तस्योत्तरपदलोपश्च ॥ ८२ ॥

कनित्यनुवर्त्तते, मनुष्यनाम्न इति च । अजिनशब्दान्तात्प्रातिपदिकान्मनुष्यनाम्नो ऽनुकम्पायां कन्प्रत्ययो भवति तस्य चोत्तरपदलोपः । व्याघ्राजिनो नाम कश्चिन्मनुष्यः । सो ऽनुकम्पितः । व्याघ्रकः । सिंहकः ॥

ठाजादावूर्ध्वं द्वितीयादचः ॥ ८३ ॥

लोप इत्यनुवर्त्तते । अस्मिन्प्रकरणे यष्ठो ऽजादिश्च प्रत्ययः तस्मिन्परतः प्रकृतेर्द्वितीयादच ऊर्ध्वं यच्छब्दरूपं तस्य लोपो भवति । ऊर्ध्वग्रहणं सर्वलोपार्थम् । अनुकम्पितो देवदत्तः, देविकः । देवियः । देविलः । यज्ञिकः । यज्ञियः । यज्ञिलः । उपडः । उपकः । उपेन्द्रदत्तकः । ठग्रहणमुको द्वितीयत्वे कविधानार्थम् । अजादिलक्षणे हि मायितिकादित्वप्रसङ्गः । वायुदत्तः । वायुकः । पितृदत्तः । पितृकः ॥ चतुर्थादच ऊर्ध्वस्य लोपो वक्तव्यः ॥ * ॥ अनुकम्पितो बृहस्पतिदत्तः, बृहस्पतिकः । बृहस्पतियः । बृहस्पतिलः ॥ अनजादौ विभाषा लोपो वक्तव्यः ॥ * ॥ देवदत्तकः । देवकः । यज्ञदत्तकः । यज्ञकः ॥ लोपः पूर्वपदस्य च ठाजादावनजादौ च वक्तव्यः ॥ * ॥ दत्तिकः । दत्तिलः । दत्तियः । दत्तकः ॥ विना ऽपि प्रत्ययेन पूर्वोत्तरपदयोर्विभाषा लोपो वक्तव्यः ॥ * ॥ देवदत्तो, दत्तः । देव इति वा ॥ उवर्णाल्ल इलस्य च ॥ * ॥ भानुदत्तो, भानुलः । वसुदत्तो, वसुलः ॥

चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ॥

---

* यथासंभवमिति पा० २

द्वितीयादचो लोपे सन्ध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम् ॥ * ॥ लहोडः । लहिकः । कहोडः । कहिकः ॥ एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः ॥ * ॥ वागाशीः, वाचिकः । सुचिकः । त्वचिकः । कथं षडङ्गुलिदत्तः, षडिक इति । षष्ठाजादिवचनात्सिद्धम् ॥

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥ ८४ ॥

शेवलादीनां मनुष्यनाम्नां ठाजादौ प्रत्यये परतः तृतीयादच ऊर्ध्वस्य लोपो भवति । पूर्वस्यायमपवादः । अनुकम्पितः शेवलदत्तः, शेवलिकः । शेवलियः । शेवलिलः । सुपरिकः । सुपरियः । सुपरिलः । विशालिकः । विशालियः । विशालिलः । वरुणिकः । वरुणियः । वरुणिलः । अर्यमिकः । अर्यमियः । अर्यमिलः ॥ शेवलादीनां तृतीयादचो लोपः स चाकृतसन्धी-नामिति वक्तव्यम् ॥ * ॥ शेवलेन्द्रदत्तः । सुपर्याशीर्दत्तः । शेवलिकः । सुपरिक इति यथा स्यात् । शेवलयिकः । सुपर्यिक इति मा भूत् ॥

अल्पे ॥ ८५ ॥

परिमाणापचये अल्पशब्दः, प्रकृतिविशेषणं चैतत् । अल्पत्वविशिष्टे ऽर्थे वर्तमानात्प्रातिपदिकाद्यथाविहितं प्रत्ययो भवति । अल्पं तैलं, तैलकम् । घृतकम् । सर्वकम् । विश्वकम् । उच्चकैः । नीचकैः । पचतकि । जल्पतकि ॥

ह्रस्वे ॥ ८६ ॥

ह्रस्वत्वविशिष्टे ऽर्थे वर्तमानात् प्रातिपदिकाद् यथाविहितं प्रत्ययो भवति । दीर्घप्रतियोगी ह्रस्वः । ह्रस्वो वृक्षो, वृक्षकः । प्लक्षकः । स्तम्भकः ॥

संज्ञायां कन् ॥ ८७ ॥

ह्रस्व इत्येव । ह्रस्वत्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् प्रत्ययो भवति । पूर्वस्यायमपवादः । वंशकः । वेणुकः । दण्डकः ॥

कुटीशमीशुण्डाभ्यो रः ॥ ८८ ॥

ह्रस्व इत्येव । संज्ञाग्रहणं नानुवर्त्तते सामान्येन विधानम् । कुटीश-मीशुण्डाभ्यो ह्रस्वार्थे द्योत्ये रः प्रत्ययो भवति । कस्यापवादः । ह्रस्वा

कुटी, कुटीरः । शमीरः । शुण्डारः । स्वार्थिकत्वे ऽपि पुल्लिङ्गता लोकाश्रयत्वाल्लिङ्गस्य ॥

कुत्वा डुपच् ॥ ८९ ॥

ह्रस्व इत्येव । कुतूशब्दाद्ध्रस्वत्वे द्योत्ये डुपच्प्रत्ययो भवति । कस्यापवादः । ह्रस्वा कुतूः कुतुपश्चर्म्ममयं स्नेहभाजनमुच्यते । कुतूरित्यावपनस्याख्या ॥

कासूगोणीभ्यां ष्टरच् ॥ ९० ॥

ह्रस्वइत्येव । कासूगोणीशब्दाभ्यां ह्रस्वत्वे द्योत्ये ष्टरच्प्रत्ययो भवति । कस्यापवादः । षकारो ङीषर्थः । ह्रस्वा कासूः, कासूतरी । गोणीतरी । कासूरिति शक्तिरायुधविशेष उच्यते ॥

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥ ९१ ॥

ह्रस्वइति निवृत्तम् । वत्स उक्षन् अश्व ऋषभ इत्येतेभ्यस्तनुत्वे द्योत्ये ष्टरच्प्रत्ययो भवति । यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशः तस्य तनुत्वे प्रत्ययः । वत्सतरः । उक्षतरः । अश्वतरः । ऋषभतरः । प्रथमवया वत्सः तस्य तनुत्वं द्वितीयवयःप्राप्तिः । तरुण उक्षा । तस्य तनुत्वं तृतीयवयःप्राप्तिः । अश्वेनाश्वायामुत्पन्नो ऽश्वस्तस्य तनुत्वमन्यपितृकता । अनड्वानृषभः । तस्य तनुत्वं भारवहने मन्दशक्तिता ॥

किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ॥ ९२ ॥

किं यत् तत् इत्येतेभ्यः प्रातिपदिकेभ्यो द्वयोरेकस्य निर्द्धारणे डतरच् प्रत्ययो भवति । निर्द्धार्यमाणवाचिभ्यः स्वार्थे प्रत्ययः । जात्या * क्रियया गुणेन वा संज्ञया वा समुदायादेकदेशस्य पृथक्करणं निर्धारणम् । कतरो भवतोः कठः । कतरो भवतोः कारकः । कतरो भवतोः पटुः । कतरो भवतोर्द्देवदत्तः । यतरो भवतोः कारकः । यतरो भवतोः पटुः । यतरो भवतोर्द्देवदत्तः । ततर आगच्छतु । महाविभाषया ऽत्र प्रत्ययो विकल्प्यते ।

---

* जात्येत्येकस्मिन् पुस्तके नास्ति, कतरो भवतोः कठ इति तदुदाहरणं च । तथैव युक्तम्, पदमञ्जर्यां जात्या वेत्यपि द्रष्टव्यं, कतरो भवतोः कठ इत्यादेरपि संभवादिति दर्शनात् ।

को भवतोर्देवदत्तः स आगच्छतु । निर्धारण इति विषयसप्तमीनिर्देशः । द्वयोरिति समुदायाच्चिर्धारणविभक्तिः । एकस्येति निर्देशः निधार्यमाणनिर्देशः ॥

वा बहूनां जातिपरिप्रश्ने डतमच् ॥ ९३ ॥

किं यत्तद इति वर्त्तते, निर्धारणे एकस्येति च । बहूनामिति निर्धारणे षष्ठी । बहूनां मध्ये एकस्य निर्धारणे गम्यमाने जातिपरिप्रश्नविषयेभ्यः किमादिभ्यः वा डतमच् प्रत्ययो भवति । कतमो भवतां कठः । यतमो भवतां कठः । ततम आगच्छतु । वावचनमकजर्थम्, यको भवतां कठः । सक आगच्छतु । महाविभाषा च प्रत्ययविकल्पार्थानुवर्त्ततएव । को भवतां कठः । योभवतां कठः । स आगच्छतु । जातिपरिप्रश्नइति किम् । को भवतां देवदत्तः । परिप्रश्नग्रहणं च किम एव विशेषणं,न यत्तदोरसंभवात् । जातिग्रहणं तु सर्वैरेव संबध्यते । किमो ऽस्मिन्विषये डतरमपीच्छन्ति के चित् । कतरो भवतां कठः । कतरो भवतां कालाप इति । तत्र कतरकतमौ जातिपरिप्रश्नइति वचनात्सिद्धम् ॥

एकाच्च प्राचाम् ॥ ९४ ॥

एकशब्दात्प्राचामाचार्याणां मतेन डतरच् डतमच् इत्येतौ प्रत्ययौ भवतः स्वस्मिन्विषये । चकारो डतरचो ऽनुकर्षणार्थः । द्वयोर्निर्द्धारणे डतरच् । बहूनां निर्द्धारणे डतमच् । जातिपरिप्रश्नइति नानुवर्त्तते । सामान्येन विधानम् । एकतरो भवतोर्देवदत्तः । एकतमो भवतां देवदत्तः । प्राचांग्रहणं पूजार्थं, विकल्पोनुवर्त्तते ॥

अवक्षेपणे कन् ॥ ९५ ॥

अवक्षिप्यते येन तदवक्षेपणम् । तस्मिन्वर्त्तमानात्प्रातिपदिकात्कन्प्रत्ययो भवति । व्याकरणकेन नाम त्वं गर्वितः । याज्ञिक्यकेन नाम त्वं गर्वितः । परस्य कुत्सार्थं यदुपादीयते तदिहोदाहरणम् । यत्पुनः स्वयमेव कुत्सितं तत्र कुत्सितइत्यनेन कप्रत्ययो भवति । देवदत्तको, यज्ञदत्तक इति । प्रागिवीयस्य पूर्णो ऽवधिः ॥

इवे प्रतिकृतौ ॥ ९६ ॥

कनित्यनुवर्त्तते । इवार्थे यत्प्रातिपदिकं वर्त्तते तस्मात्कन् प्रत्ययो भवति । इवार्थः सादृश्यं तस्य विशेषणं प्रतिकृतिग्रहणम् । प्रतिकृतिः प्रतिरूपकं प्रतिच्छन्दकम् । अश्व इवायमश्वप्रतिकृतिः, अश्वकः । उष्ट्रकः । गर्दभकः । प्रतिकृताविति किम् । गौरिव गवयः ॥

संज्ञायां च ॥ ९७ ॥

इवेत्यनुवर्त्तते, कनिति च । इवार्थे गम्यमाने कन्प्रत्ययो भवति समुदायेन चेत् संज्ञा गम्यते । अप्रतिकृत्यर्थ आरम्भः । अश्वसदृशस्य संज्ञा, अश्वकः । उष्ट्रकः । गर्दभकः ॥

लुम्मनुष्ये ॥ ९८ ॥

संज्ञायामित्येव । संज्ञायां विहितस्य कनो मनुष्ये ऽभिधेये लुब् भवति । चञ्चेव मनुष्यः, चञ्चा । दासी । खरकुटी । मनुष्य इति किम् । अश्वकः । उष्ट्रकः । गर्दभकः । देवपथादेराकृतिगणत्वात्तस्यैवायं प्रपञ्चो वेदितव्यः ॥

जीविकार्थे चापण्ये ॥ ९९ ॥

जीविकार्थं यदपण्यं तस्मिन्नभिधेये कनो लुब् भवति । विक्रीयते यत्तत्पण्यम् । वासुदेवः । शिवः । स्कन्दः । विष्णुः । आदित्यः । देवल-कादीनां जीविकार्था देवप्रतिकृतय उच्यन्ते । अपण्य इति किम् । हस्ति-कान्विक्रीणीते । अश्वकान् । रथकान् । देवपथादेरेवायं प्रपञ्चः ॥

देवपथादिभ्यश्च ॥ १०० ॥

इवे प्रतिकृतौ संज्ञायां च विहितस्य कनो देवपथादिभ्य उत्तरस्य लुब्भवति । आदिशब्दः प्रकारे । आकृतिगणश्चायम् । देवपथः । हंसपथः ।

अर्च्चासु पूजनार्थासु चित्रकर्म्मध्वजेषु च ।
इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥

अर्च्चासु तावत् । शिवः । विष्णुः । चित्रकर्म्मणि । अर्जुनः । दु-र्योधनः । ध्वजेषु । कपिः । गरुडः । सिंहः । देवपथ । हंसपथ । वारि-

पथ। जलपथ। राजपथ। शतपथ। सिंहगति। उष्ट्रग्रीवा। वामरज्जुः। रज्जुः। हस्त। इन्द्र। दण्ड। पुष्प। मत्स्य*॥

वस्तेर्ढञ्॥ १०१॥

इवेत्यनुवर्तते, इतः प्रभृति प्रत्ययाः सामान्येन भवन्ति प्रतिकृतावप्रतिकृतौ च। वस्तिशब्दादिवार्थे ढञ्प्रत्ययो भवति। वस्तिरिव वास्तेयः। वास्तेयी॥

शिलाया ढः॥ १०२॥

शिलाशब्दादिवार्थे ढः प्रत्ययो भवति। शिलेव, शिलेयं दधि। केचिदत्र ढञमपीच्छन्ति, तदर्थं योगविभागः कर्तव्यः। शिलाया ढञ्प्रत्ययो भवति। शैलेयम्। ततो ढः। शिलेयम्॥

शाखादिभ्यो यत्॥ १०३॥

शाखा इत्येवमादिभ्यः प्रातिपदिकेभ्यो यत्प्रत्ययो भवति इवार्थे। शाखेव, शाख्यः। मुख्यः। जघन्यः। शाखा। मुख। जघन। शृङ्ग। मेघ। चरण। स्कन्ध। शिरस्। उरस्। अग्र। शरण। शाखादिः॥

द्रव्यं च भव्ये॥ १०४॥

द्रव्यशब्दो निपात्यते भव्ये ऽभिधेये। द्रुशब्दादिवार्थे यत्प्रत्ययो निपात्यते। द्रव्यम्। भव्य आत्मवान्। अभिप्रेतानामर्थानां पात्रभूत उच्यते। द्रव्योऽयं राजपुत्रः। द्रव्योऽयं माणवकः॥

कुशाग्राच्छः॥ १०५॥

कुशाग्रशब्दादिवार्थे छः प्रत्ययो भवति। कुशाग्रमिव सूक्ष्मत्वात्, कुशाग्रीया बुद्धिः। कुशाग्रीयं वस्त्रम्॥

समासाच्च तद्विषयात्॥ १०६॥

तदित्यनेन प्रकृत इवार्थो निर्दिश्यते। इवार्थविषयात्समासादपरस्मिन्निवार्थ एव छः प्रत्ययो भवति। काकतालीयम्। अजाकृपाणीयम्। अन्धकवर्तकीयम्। अतर्कितोपनतं चित्रीकरणमुच्यते। तत्कथम्। काकस्यागमनं यादृच्छिकम्। तालस्य पतनं च, तेन तालेन पतता काकस्य

* रथपथ। मधुपथ। सिंहपथ। इत्येते शब्दा अत्र मध्ये ऽधिकाः पुस्तकान्तरे।

वधः कृतः । एवमेव देवदत्तस्य तत्रागमनं, दस्यूनां चोपनिपातः । तैश्च तस्य वधः कृतः तत्र यो देवदत्तस्य दस्यूनां च समागमः स काकतालसमागमसदृश इत्येक उपमार्थः । अतश्च देवदत्तस्य वधः, स काकतालवधसदृश इति द्वितीय उपमार्थः । तत्र प्रथमे समासः, द्वितीये प्रत्ययः । समासश्चायमस्मादेव ज्ञापकात् । नह्यस्यापरं लक्षणमस्ति । सुप्सुपेति वा समासः । स चैवंविषय एव ॥

शर्कराद्भ्यो ऽण् ॥ १०७ ॥

शर्करा इत्येवमादिभ्यः प्रातिपदिकेभ्य इवार्थे ऽण् प्रत्ययो भवति । शर्करेव शार्करम् । कापालिकम् । शर्करा । कपालिका । पिष्टिका* । पुण्डरीक । शतपत्र । गोलोमन् । गोपुच्छ । नराचि । नकुला । सिकता । शर्करादिः ॥

अङ्गुल्यादिभ्यष्ठक् ॥ १०८ ॥

अङ्गुल्यादिभ्य इवार्थे ठक् प्रत्ययो भवति । अङ्गुलीवाङ्गुलिकः । भारुजिकः । अङ्गुलि । भरुज । बभ्रु । वल्गु । मण्डर । मण्डल । शष्कुल । कपि । उदश्वित् । गोणी । उरस् । शिखा । कुलिश । अङ्गुल्यादिः ॥

एकशालायाष्ठजन्यतरस्याम् ॥ १०९ ॥

एकशालाशब्दादिवार्थे ऽन्यतरस्यां ठच् प्रत्ययो भवति । अन्यतरस्यांग्रहणेनानन्तरष्ठक् प्राप्यते । एकशालेव, एकशालिकः । ऐकशालिकः ॥

कर्कलोहितादीकक् ॥ ११० ॥

कर्कलोहितशब्दाभ्यामिवार्थे ईकक् प्रत्ययो भवति । कर्कः शुक्लो ऽश्वः, तेन सदृशः, कार्कीकः । लौहितीकः स्फटिकः । स्वयमलोहितोऽप्युपाश्रयवशात्तथा प्रतीयते ॥

प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ॥ १११ ॥

प्रत्न पूर्व विश्व इम इत्येतेभ्य इवार्थे थाल् प्रत्ययो भवति छन्दसि विषये । तं प्रत्नथा पूर्वथा विश्वथेमथा ॥

* कनिष्ठिक इति पा॰ २ । अपरस्मिन्पुस्तके कपिष्ठिका । पा॰ २ ।

पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥ ११२ ॥

स्वार्थे इति निवृत्तम् । नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगाः । पूगवाचिनः प्रातिपदिकादग्रामणीपूर्वात्स्वार्थे ञ्यः प्रत्ययो भवति । लौहध्वज्यः । लौहध्वज्यौ । लोहध्वजाः । शैब्यः । शैब्यौ । शिबयः । चातक्यः । चातक्यौ । चातकाः । अग्रामणीपूर्वादिति किम् । देवदत्तो ग्रामणीरेषां त इमे देवदत्तकाः । यज्ञदत्तकाः ॥

व्रातच्फञोरस्त्रियाम् ॥ ११३ ॥

नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः । व्रातवाचिभ्यः प्रातिपदिकेभ्यश्च स्वार्थे ञ्यः प्रत्ययो भवत्यस्त्रियाम् । कापोतपाक्यः । कापोतपाक्यौ । कपोतपाकाः । व्रैहिमत्यः । व्रैहिमत्यौ । व्रीहिमताः । च्फञः खल्वपि । कौञ्जायन्यः । कौञ्जायन्यौ । कौञ्जायनाः । ब्राध्नायन्यः । ब्राध्नायन्यौ । ब्राध्नायनाः । अस्त्रियामिति किम् । कपोतपाकी । व्रीहिमती । कौञ्जायनी । ब्राध्नायनी ॥

आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् ॥ ११४ ॥

आयुधजीविनां संघः आयुधजीविसंघः । स वाहीकैर्विशेष्यते । वाहीकेषु य आयुधजीविसंघस्तद्वाचिनः प्रातिपदिकाद्ब्राह्मणराजन्यवर्जितात्स्वार्थे ञ्यट् प्रत्ययो भवति । ब्राह्मणे तद्विशेषग्रहणम् । राजन्ये तु स्वरूपग्रहणमेव । टकारो ङीबर्थः । तेनास्त्रियामिति नानुवर्त्तते । कौण्डीवृस्यः । कौण्डीवृस्यौ । कौण्डीवृसाः । क्षौद्रक्यः । क्षौद्रक्यौ । क्षुद्रकाः । मालव्यः । मालव्यौ । मालवाः । स्त्रियां कौण्डीवृसी । क्षौद्रकी । मालवी । आयुधजीविग्रहणं किम् । मल्लाः । शयण्डाः । संघग्रहणं किम् । सम्राट् । वाहीकेष्विति किम् । शबराः । पुलिन्दाः । अब्राह्मणराजन्यादिति किम् । गोपालवा ब्राह्मणाः । शालङ्कायना राजन्याः ॥

वृकाट्टेण्यण् ॥ ११५ ॥

आयुधजीविसंघादिति वर्त्तते । वृकशब्दादायुधजीविनः स्वार्थे

Digitized by Google

टेण्यण् प्रत्ययो भवति । टकारो ङीबर्थो, णकारो वृद्ध्यर्थः । वार्केण्यः । वार्केण्यौ । वृकाः । आयुधजीविसंघविशेषणं जातिशब्दान्मा भूत् ।

कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ॥

दामन्यादित्रिगर्त्तषष्ठाच्छः ॥ ११६ ॥

आयुधजीविसंघादिति वर्त्तते । दामन्यादिभ्यः प्रातिपदिकेभ्यस्त्रिगर्त्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः प्रत्ययो भवति । येषामायुधजीविनां संघानां षडन्तर्वर्गास्तत्र च त्रिगर्त्तः षष्ठः । त्रिगर्त्तः षष्ठो येषां, ते त्रिगर्त्तषष्ठा इत्युच्यन्ते । तेषु चेयं स्मृतिः ।

आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
कौष्टकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिः ॥

इति । दामन्यादिभ्यस्तावत् । दामनीयः । दामनीयौ । दामनयः । औलपीयः । औलपीयौ । उलपयः । त्रिगर्त्तषष्ठेभ्यः खल्वपि । कौण्डोपरथीयः । कौण्डोपरथीयौ । कौण्डोपरथाः । दाण्डकीयः । दाण्डकीयौ । दाण्डकयः । क्रौष्टुकीयः । जालमानीयः । ब्रह्मगुप्तीयः । जानकीयः । दामनी । औलपि । आकिदन्ती । काकरन्ति । काकदन्ति । शत्रुन्तपि । सार्वसेनि । बिन्दु । मौञ्जायन । उलभ । सावित्रीपुत्र * ॥

पर्श्वादियौधेयादिभ्यामणञौ ॥ ११७ ॥

आयुधजीविसंघादित्येव । पर्श्वादिभ्यो यौधेयादिभ्यश्च प्रातिपदिकेभ्य आयुधजीविसंघवाचिभ्यः स्वार्थे ऽणञौ प्रत्ययौ भवतः । पार्शवः । पार्शवौ । पर्शवः । आसुरः । आसुरौ । असुराः । यौधेयः । यौधेयौ । शौभ्रेयः । पर्शु । असुर । रक्षस् । बाल्हीक । वयस् । मरुत् । दशार्ह । पिशाच । विशाल । अशनि । कार्षापण । सत्वत् । वसु । पर्श्वादिः ॥ यौधेय । कौशेय । क्राशेय । शौभ्रेय । शौभ्रेय । धार्त्तेय । वार्त्तेय । जाबालेय । त्रिगर्त्त । भरत । उशीनर । यौधेयादिः ॥

---

* अच्युतन्ति । कोकतन्ती । तुलभ । देववापि । औतकी । अपच्यु तकी कर्की । पिपक्ष । एते ऽत्र गणे ऽधिकाः पुस्तकान्तरे ।

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ॥ ११८ ॥

आयुधजीविसंघादिति निवृत्तम् । अभिजिदादिभ्योऽणन्तेभ्यः प्रातिपदिकेभ्यः स्वार्थे यञ् प्रत्ययो भवति । अभिजितोऽपत्यमित्यण् । तदन्तात्यञ् । आभिजित्यः । आभिजित्यौ । आभिजिताः । वैदभृत्यः । वैदभृत्यौ । वैदभृताः । शालावत्यः । शालावत्यौ । शालावताः । शैखावत्यः । शामीवत्यः । और्णावत्यः । श्रौमत्यः ॥ गोत्रप्रत्ययस्यात्र ग्रहणमिष्यते ॥ आभिजितो मुहूर्तः । आभिजितः स्थालीपाक इत्यत्र न भवति ॥

ञ्यादयस्तद्राजाः ॥ ११९ ॥

पूगाञ्ञ्योऽग्रामणीपूर्वादित्यतः प्रभृति ये प्रत्ययास्ते तद्राजसंज्ञा भवन्ति । तथा चैवोदाहृतम् । तद्राजप्रदेशाः तद्राजस्य बहुष्वित्येवमादयः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ पञ्चमस्याध्यायस्य तृतीयः पादः ॥

॥ काशिकायाः ॥

पञ्चमस्याध्यायस्य चतुर्थः पादः ॥

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ॥ १ ॥

पादशतान्तस्य संख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन् प्रत्ययो भवति । तत्संनियोगेन चान्तस्य लोपो भवति । यस्येति लोपेनैव सिद्धे पुनर्वचनमनैमित्तिकार्थम् । यस्येति लोपः परनिमित्तकः । तस्य स्थानिवद्भावात्पादः पदिति पद्भावो न स्यात् । अस्य त्वनैमित्तिकत्वाच्च स्थानिवत्त्वम् । द्वौ द्वौ पादौ ददाति, द्विपदिकां ददाति । द्वे द्वे शते ददाति, द्विशतिकां ददाति । तद्धितार्थ इति समासः । ततः प्रत्ययः । स्वभावाच्च वुन्प्रत्ययान्तं स्त्रियामेव वर्तते । पादशतस्येति किम् । द्वौ द्वौ माषौ ददाति । संख्यादेरिति किम् । पादंपादं ददाति । वीप्सायामिति किम् ।

द्वौ पादौ ददाति । द्वे शते ददाति । पादशतग्रहणमनर्थकमन्यत्रापि द-र्शनात् । द्विमोदकिकां ददाति, त्रिमोदकिकां ददाति ॥

दण्डव्यवसर्गयोश्च ॥ २ ॥

दमनं दण्डः । दानं व्यवसर्गः । दण्डव्यवसर्गयोर्गम्यमानयोः पा-दशतान्तस्य प्रातिपदिकस्य संख्यादेर्वुन् प्रत्ययो भवति, अन्तलोपश्च । अ-वीप्सार्थोयमारम्भः । द्वौ पादौ दण्डितः । द्विपदिकां दण्डितः । द्वौ पादौ व्यवसृजति । द्विपदिकां व्यवसृजति । द्विशतिकां दण्डितः । त्रिशति-काम् । द्विशतिकां व्यवसृजति । त्रिशतिकाम् ॥

स्थूलादिभ्यः प्रकारवचने कन् ॥ ३ ॥

स्थूलादिभ्यः प्रकारवचने ऽर्थे कन् प्रत्ययो भवति । जाती-यरोपवादः । प्रकारो विशेषः । स्थूलप्रकारः, स्थूलकः । अणुकः । माषकः ॥ कन्प्रकरणे चञ्चद्बृहतोरुपसंख्यानम् ॥ * ॥ चञ्चत्प्रकार,: चञ्चत्कः । बृ-हत्कः । चञ्चद्बृहतोरिति के चित्पठन्ति । तेषां चञ्चकः, बृहक इति उदाहरणं द्रष्टव्यम् । केण इति ह्रस्वः * । स्थूल । अणु । माष । इषु । कृष्ण तिलेषु । यव व्रीहिषु ॥ इक्षुतिलपाद्यकालावदाताः सुरायाम् ॥ गो-मूत्र आच्छादने ॥ सुराया अहौ ॥ जीर्ण शालिषु । पत्रमूले समस्तव्यस्ते । कुमारीपुत्र । कुमार । श्वशुर । मणि । स्थूलादिः ॥

अनत्यन्तगतौ क्तात् ॥ ४ ॥

अत्यन्तगतिरशेषेण संबन्धः । तदभावो ऽनत्यन्तगतिः । अनत्यन्त-गतौ गम्यमानायां क्तान्तात्कन्प्रत्ययो भवति । भिन्नकः । छिन्नकः । अ-नत्यन्तगताविति किम् । भिन्नम् । छिन्नम् ॥

न सामिवचने ॥ ५ ॥

सामिवचने उपपदे क्तान्तात्कन्प्रत्ययो न भवति । सामिकृतम् । सामिभुक्तम् । वचनग्रहणं पर्यायार्थम् । अर्द्धकृतम् । नेमकृतम् । सामिवचने प्रतिषेधानर्थक्यं प्रकृत्याभिहितत्वात् । एवं तर्हि नेवायमनत्यन्तगतौ

* केण इति ह्रस्व इत्यपपाठः, पदमञ्जर्यां दर्शनात् ।

विहितस्य कनः प्रतिषेधः, किं तर्हि स्वार्थिकस्य । केन पुनः स्वार्थिकः कन्विहितः । एतदेव ज्ञापकं भवति स्वार्थे कनिति । तत्र यदेतदुच्यते । एवं हि सूत्रमभिन्नतरकं भवति । एतैर्हि बहुतरकं व्याप्यतरस्येवमादि तदुपपन्नं भवति * ॥

बृहत्या आच्छादने ॥ ६ ॥

कननुवर्त्तते, न प्रतिषेधः । बृहतीशब्दादाच्छादने वर्त्तमानात्स्वार्थे कन्प्रत्ययो भवति । बृहतिका । आच्छादने इति किम् । बृहती छन्दः ॥

अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः ॥ ७ ॥

अषडक्ष आशितङ्गु अलंकर्म अलंपुरुष इत्येतेभ्यो ऽध्युत्तरपदाच्च स्वार्थे खः प्रत्ययो भवति । अविद्यमानानि षडक्षीण्यस्येति बहुव्रीहिः । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् । ततः खप्रत्ययः । अषडक्षीणो मन्त्रः । यो द्वाभ्यामेव क्रियते न बहुभिः । आशिता गावो ऽस्मिन्नरण्ये आशितंगवीनमरण्यम् । निपातनात्पूर्वपदस्य मुमागमः । अलंकर्मन् । अलंपुरुष इति । पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्येति समासः । अलंकर्म्मणे,ऽलंकर्मीणः । अलंपुरुषाय, अलंपुरुषीणः । अध्युत्तरपदस्तत्पुरुषः । अधिशब्दः शौण्डादिषु पठ्यते । राजाधीनः । नित्यश्चायं प्रत्ययः । उत्तरत्र विभाषाग्रहणात् । अन्येपि स्वार्थिका नित्याः प्रत्ययाः स्मर्य्यन्ते । तमबादयः प्राक्कनः । ञ्यादयः प्राग्वुनः । आमादयः प्राङ् मयटः । बृहतीजात्यन्ताः समासान्ताश्चेति ॥

विभाषाञ्चेरदिक्स्त्रियाम् ॥ ८ ॥

अञ्चत्यन्तात्प्रातिपदिकाददिक्स्त्रियां वर्त्तमानात्स्वार्थे विभाषा खः प्रत्ययो भवति । प्राक् । प्राचीनम् । अर्वाक् । अर्वाचीनम् । अदिक्स्त्रियामिति किम् । प्राची दिक् । प्रतीची दिक् । दिग्ग्रहणं किम् । प्राचीना ब्राह्मणी । अवाचीना शिखा । स्त्रीग्रहणं किम् । प्राचीनं दिग्रमणीयम् । उदीचीनं दिग्रमणीयम् ॥

* एतैर्हि बहुतरकं व्याकरणमधीतमित्येवमाद्युपपन्नं भवति। पा० २।

जात्यन्ताच्छ बन्धुनि ॥ ९ ॥

जात्यन्तात्प्रातिपदिकाद्बन्धुनि वर्त्तमानात्स्वार्थे छः प्रत्ययो भवति। बध्यते ऽस्मिञ्जातिरिति बन्धुशब्देन द्रव्यमुच्यते। येन ब्राह्मणत्वादिजातिर्व्यज्यते तद्बन्धु द्रव्यम्। ब्राह्मणजातीयः। क्षत्रियजातीयः। वैश्यजातीयः। इति। ब्राह्मणादिरेवोच्यते। बन्धुनीति किम्। ब्राह्मणजातिः शोभना॥

स्थानान्ताद्विभाषा सस्थानेनेति चेत् ॥ १० ॥

स्थानान्तात्प्रातिपदिकाद्विभाषा छः प्रत्ययो भवति सस्थानेन चेत् स्थानान्तमर्थवद्भवति। सस्थान इति तुल्य उच्यते. समानं स्थानमस्येति कृत्वा। पित्रा तुल्यः, पितृस्थानीयः। पितृस्थानः। मातृस्थानीयो, मातृस्थानः। राजस्थानीयो, राजस्थानः। सस्थानेनेति किम्। गोस्थानमश्वस्थानम्। इतिकरणो विवक्षार्थः। तेन बहुव्रीहिः सस्थानशब्दोर्थमुपस्थापयति, न तत्पुरुषः। चेच्छब्दः संबन्धार्थः। द्वयोर्विभाषयोर्नित्या विधय इति पूर्वत्र नित्यविधयः॥

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥ ११ ॥

किम एकारान्तात्तिङन्तादव्ययेभ्यश्च यो विहितो घः स किमेत्तिङव्ययघः तदन्तात्प्रातिपदिकादद्रव्यप्रकर्षे आमु प्रत्ययो भवति। यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति तथापि गुणक्रियाश्रयः प्रकर्षो यदा द्रव्यउपचर्यते तदा ऽयं प्रतिषेधः। क्रियागुणयोरेवायं प्रकर्षे प्रत्ययः। किंतराम्। किंतमाम्। पूर्वाह्णेतराम्। पूर्वाह्णेतमाम्। पचतितराम्। पचतितमाम्। उच्चैस्तराम्। उच्चैस्तमाम्। अद्रव्यप्रकर्षइति किम्। उच्चैस्तरः। उच्चैस्तमः॥

अमु च च्छन्दसि ॥ १२ ॥

किमेत्तिङव्ययघादद्रव्यप्रकर्षे अमु, प्रत्ययो भवति छन्दसिविषये। चकारादामु च। प्रतरं नयामः। प्रतरां वस्यः। स्वरादिषु अम् आम् इति पठ्यते। तस्मात्तदन्तस्याव्ययत्वम्॥

अनुगादिनष्ठक् ॥ १३ ॥

अनुगदतीत्यनुगादी। अनुगादिन्शब्दात्स्वार्थे ठक् प्रत्ययो भवति। आनुगादिकः॥

णचः स्त्रियामञ् ॥ १४ ॥

कर्मव्यतिहारे णच् स्त्रियामिति णज्विहितः, तदन्तात्स्वार्थे ऽञ् प्रत्ययो भवति स्त्रियां विषये। व्यावक्रोशी। व्यावहासी वर्तते। स्त्रीग्रहणं किमर्थं यावता णच् स्त्रियामेव विहितः। ततः स्वार्थिकस्तत्रैव भविष्यति। एवं तर्ह्येतज्ज्ञापयति स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ऽपीति। तेन गुडकल्पा द्राक्षा। तैलकल्पा प्रसन्ना। देव एव देवतेत्येवमादिरुपपन्नं भवति॥

अणिनुणः ॥ १५ ॥

अभिविधौ भाव इनुण् विहितस्तदन्तात्स्वार्थे ऽण् प्रत्ययो भवति। सांराविणं वर्तते। सांकूटिनम्॥

विसारिणो मत्स्ये ॥ १६ ॥

विसरतीति विसारी। विसारिन्शब्दात्स्वार्थे ऽण् प्रत्ययो भवति मत्स्ये ऽभिधेये। वैसारिणो मत्स्यः। मत्स्य इति किम्। विसारी देवदत्तः॥

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ १७ ॥

संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः स्वार्थे कृत्वसुच् प्रत्ययो भवति। पौनःपुन्यमभ्यावृत्तिः। एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनं तत्र प्रत्ययः। पञ्च वारान्भुङ्क्ते पञ्चकृत्वः। सप्तकृत्वः। संख्याया इति किम्। भूरीन्वारान्भुङ्क्ते। क्रियाग्रहणं किमर्थम्। यावताभ्यावृत्तिः क्रियाया एव संभवति न द्रव्यगुणयोः। उत्तरार्थं क्रियाग्रहणम्। एकस्य सकृच्चेत्यत्र क्रियैव गण्यते नाभ्यावृत्तिः, असंभवात्। अभ्यावृत्तिग्रहणं किम्। क्रियामात्रगणने मा भूत्। पञ्चपाकाः। दशपाकाः। गणनग्रहणं किमर्थम्। यावता गणनात्मिकैव संख्या। अ-

Digitized by Google

क्रियमाणे गणनग्रहणे क्रियाभ्यावृत्तौ वर्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात् । शतवारान्भुङ्क्ते, शतकृत्व इति । इह न स्यात् । शतं वाराणां भुङ्क्त इति । नह्यत्राभ्यावृत्तौ शतशब्दः । संख्यानमात्रवृत्तित्वात् । गणनग्रहणात्तु सर्वत्र सिद्धं भवति ॥

द्वित्रिचतुर्भ्यः सुच् ॥ १८ ॥

द्वि त्रि चतुर् इत्येतेभ्यः संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः सुच् प्रत्ययो भवति । कृत्वसुचो ऽपवादः । द्विर्भुङ्क्ते । त्रिर्भुङ्क्ते । चतुर्भुङ्क्ते । चकारः स्वरार्थः ॥

एकस्य सकृच्च ॥ १९ ॥

एकशब्दस्य सकृदित्ययमादेशो भवति सुच्च प्रत्ययः क्रियागणने । कृत्वसुचो ऽपवादः । अभ्यावृत्तिस्त्विह न संभवति । सकृद्भुङ्क्ते । सकृदधीते । एकः पाक इत्यत्र न भवति, अनभिधानात् ॥

विभाषा बहोर्धा ऽविप्रकृष्टकाले ॥ २० ॥

बहुशब्दात् क्रियाभ्यावृत्तिगणने वर्तमानात् विभाषा धा प्रत्ययो भवति । कृत्वसुचो ऽपवादः । पक्षे सो ऽपि भवति । अविप्रकृष्टग्रहणं क्रियाभ्यावृत्तिविशेषणम् । क्रियाणामुत्पत्तयश्चेदासन्नकालाः भवन्ति, न विप्रकृष्टकालाः । बहुधा दिवसस्य भुङ्क्ते । बहुकृत्वो दिवसस्य भुङ्क्ते । अविप्रकृष्टकाल इति किम् । बहुकृत्वो मासस्य भुङ्क्ते ॥

तत्प्रकृतवचने मयट् ॥ २१ ॥

तदिति प्रथमा समर्थविभक्तिः, प्राचुर्येण प्रस्तुतं प्रकृतम् । प्रथमासमर्थात् प्रकृतोपाधिकेऽर्थे वर्तमानात्स्वार्थे मयट् प्रत्ययो भवति । टकारो ङीबर्थः । अन्नं प्रकृतम्, अन्नमयम् । अपूपमयम् । अपरे पुनरेवं सूत्रार्थमाहुः । प्रकृतमित्युच्यते ऽस्मिन्निति प्रकृतवचनं, तदिति प्रथमासमर्थात्प्रकृतवचने ऽभिधेये मयट् प्रत्ययो भवति । अन्नं प्रकृतमस्मिन्नन्नमयो यज्ञः । अपूपमयं पर्व । वटकमयी यात्रा । द्वयमपि प्रमाणमुभयथा सूत्रप्रणयनात् ॥

Digitized by Google

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ एकादशस्तबकारम्भः ॥

एवं पुनरन्येद्युरन्ये द्युमणिप्रतीकाशयोस्तयोः सहोदरयोः सहोदरयोर्वनविनोदे सह सहचरयोर्निदाघसमयसमयमानभाण्डीरं भाण्डीरं वटमासेदुषोर्निदाघसमयोचिता यर्हि विलासाः प्रादुरासन् ॥ १ ॥

श्रीष्मप्रलम्बवधदावविमोचनानि
सायाह्नयानसुखदोहघनोदितानि ।
श्रीराधिकारतशरच्चववेणुगीता-
न्येकादशे स्तवक एव हि वर्णितानि ॥

अथ घनरसमयसमय एव योग्ये श्रीराधानवसङ्गसुधारसाप्लवनं श्रीकृष्णस्य वक्तुं प्रथमं तदसङ्गसंगतस्योत्कण्ठस्येव तदागमनसमयस्यापि संतापकत्वं युक्तमेवेति व्यञ्जयंस्तमेव निदाघर्तुं तदुचिताश्च सरामस्य तस्य लीला वर्णयितुमारभते· एवमिति । अन्येद्युरन्यस्मिन् दिवसे तयोः कृष्णरामयोः· अन्ये विलासा यर्हि प्रादुरासंस्तर्हि तरणिकिरणेत्यादिस्थे· निर्वाप्यन्त इत्यादिक्रियापदैः संबन्धः । द्युमणिप्रतीकाशयोः सूर्यतुल्ययोः, सहोदरयोर्भ्रात्रोः, सहोदरयोः· उत्पूर्वस्य "ऋ गतौ"वित्यस्य पचाद्यचि सहोद्गमवतोरित्यर्थः, यद्वा सहसा बलेन·अदरयोरनल्पयोरिति भाविप्रलम्बवधार्थं रामपराक्रमः सूचितः । निदाघसमये सम्यक्· अयमाना संगता भा कान्तिस्तस्या भाण्डीरं प्रकृष्टपुंस्त्वयुक्तम्, उपार्जकपुण्यायितमित्यर्थः, "काण्डाण्डाण्डीरचीरचा"वितीरन्, "भाण्डीरः पुरुषे शक्ते" इति विश्वः ॥ १ ॥

तर्हि तरणिकिरणनिकरकरालतया पथि पथि नखंपचा धरणिधूलयो विहारमणिगिरिगुहाकुहरनिःसरन्निर्झरझराभिरेव निर्वाप्यन्ते ॥ २ ॥

नखान् पचन्ति तापयन्ति नखंपचाः, "मितनखे चे"ति खच् । निर्झरझरयोर्बृहत्त्वाल्पत्वाभ्यां भेदः कल्प्यः, "वारिप्रवाहे निर्झरो झर" इत्यमरः, "स्त्रियां च झरेत्यपि, झरी"त्यपीति तट्टीका ॥ २ ॥

वाप्यन्तेवासिभिस्तरलतरलहरिकाकणभरभरमन्थरैरनेकपीतकपीतनकुसुममकरन्दतुन्दिलैर्निदाघदाहप्रभञ्जनैः प्रभञ्जनैरेव पीयन्ते घर्मसलिलानि ॥ ३ ॥

वापीनामन्तेवासिभिः शिष्यैः, ताभ्योऽधीत्येव लब्धतदीयशैत्यविशेषैरित्यर्थः, "छात्रान्तेवासिनौ शिष्ये" इत्यमरः। तदेव स्पष्टयति, तासां वापीनां तरलतरलहरिकाणामतिचंचलोर्मीणां कणभरस्य कणातिशयस्य भरेण भारेण मन्थरैरिति शैत्यमान्द्ये व्यज्यते, "भरोऽतिशयभारयोः" इति मेदिनी। अनेकानां बहूनां पीतवर्णानां कपीतनकुसुमानां शिरीषपुष्पाणां मकरन्देन तुन्दिलैः पुष्टैरिति मान्द्यसौरभ्ये, "शिरीषस्तु कपीतन" इत्यमरः। निदाघदाहस्य प्रभञ्जनैः प्रशमकर्तृभिः, प्रभञ्जनैः पवनैः ॥ ३ ॥

निविडतरविटपवितानपटलैर्विटपिभिरेव निर्वाप्यन्ते तरणिकिरणाः ॥ ४ ॥

वितानश्चादोंशा इति ख्यातः ॥ ४ ॥

तत इतश्च कुसुमितकुञ्जकुटीरद्वारि मलयजरसवारिपूरपूरितजलयन्त्राः सुरभिशीतलसलिलकलसलसत्परिसरा वसुधासुधायमानसुरसरसालप्रपानकरसादिप्रपाः प्रपालयन्तीभिर्वनदेवताभिरेव निरस्यन्ते पिपासावसादाः कृष्णसहचराणाम् ॥ ५ ॥

वसुधायां पृथिव्यां सुधायमानस्यामृततुल्यस्य सुरसरसालस्य सुस्वादुपक्वाम्रफलस्य प्रकृष्टः पानकरस एव आदिर्येषां तेषां प्रपाः, आदिशब्दात् सितोपलापानकरसश्च। "प्रपा पानीयशालिके" त्यमरः ॥ ५ ॥

नवविकचविचिकिलमालिकाकलितकण्ठाभरणाः शिरीषकुसुमसुमञ्जुलकर्णावतंसाः स्फुटकुटजस्रजा मृष्टकचरचनाः सकला एव वल्लवकिशोरा घनतरविटपिकुलतलच्छायामध्यमध्यास्य गिरिवरद्रोणिषु निर्झरजलप्रपातमेदुरतरयवसमास्वादतृप्ततया सुखसुप्तासु धेनुषु सहोदराभ्यां रामदामोदराभ्यां खेलामारेभिरे ॥ ६ ॥

विकचविचकिलानि प्रफुल्लमल्लिकापुष्पाणि । यवसं तृणम् ॥ ६ ॥

केचन मधुरकलं गायन्ति केचन वादयन्ते केचन नृत्यन्ति, कदाचन रामो नृत्यति कृष्णो मुरलीं वादयते गायति च, कदाचन कृष्णो नृत्यति रामो गायति, सहचराश्च, एवं खेलत्सु बालकेषु कलमधुरं मधुरञ्जिवचाः कृष्णस्तानथ निजगाद ॥ ७ ॥

कलमधुरमिति पौनरुक्त्यं नाशङ्क्यं धनुर्ज्यादिवदत्राधिक्यप्रतिपत्त्यर्थमिति । मधुनोपरञ्जि रञ्जकं वचो यस्य सः ॥ ७ ॥

हंहो भ्रातरः, विरमत भो नृत्यगीतवादित्रतः, खेलान्तरमधुना कल्पयामः, तेऽप्यूचुरमी वयमुपसीदामो दामोदर किं तदिति, स ऊचे, भो भो द्विधा भवन्तो भवन्तो बलमानबलं बलं केचनानुगच्छन्तु केचन मामिति निर्णीय बलबलमथ निजबलं निजबलं च जयपराजयपराणां स्कन्धारोहपूर्वकं निर्वाह्य बाह्यवाहकतापणपणानं हाटकपटेन कपटेन पराजित्य श्रीदामोदरेण श्रीदामोदरेण जगदुद्वहतापि स्कन्धेनोहे ॥ ८ ॥

बलस्य बलदेवस्य बलं तदनुगामिसेनात्वेन कल्पितं सखिवृन्दं, निजस्य बलं च, कीदृशं, नितरां जवं वेगवत्तरत्वं लातीति तत् । जयपराजयपराणां क्रमेण वाह्यवाहकताकपस्य पणस्य पणनं व्यवहृतिं निर्वाह्य निष्पाद्य, स्कन्धारोहेति, जयपक्षे केवलादारोहतेः, पराजयपक्षे तु ण्यन्ताद् घञ्रूपं ज्ञेयं, ततश्चायं वाक्यार्थः, जयपराः स्कन्धमारोहन्तो वाह्याः स्युः पराजयपरैः, पराजयपरास्तु स्कन्धमारोहयमाणा वाहकाः स्युरिति । हाटकपटेन पीताम्बरेण, श्रीदामा· ऊहे· उह्यते स्म, उदरेण जगद् ब्रह्माण्डम्· उद्वहतापि स्कन्धेन· ऊहे· इति श्रीदाम्नो महिमातिशयो व्यञ्जितः ॥ ८ ॥

नोहेन तस्य चरितमवगम्यते ॥ ९ ॥

ननु जगदीश्वरस्य कथं विपर्ययचर्या तचाह नोहेनेति । न तर्कैवं किंतु प्रेमपरिपाटीविततयैवेत्यर्थः ॥ ९ ॥

अस्मिन्नेव काले कालेन ग्रस्तोऽयस्तोपः सकलदैत्यानामात्मसंगोपालो गोपालोचितवेषं विधाय स्वयमेव पराजित्य राजित्यमनःसंकर्षणं संकर्षणं कपटी पटीरधवलं स्कन्धे निधाय धावन् निधिमिव चोरश्चोरयन्नमर्यादी मर्यादीकृततरुतलमुल्लङ्घ्य मुल्लङ्घ्यमानमनास्तमपोवाह ॥ १० ॥

काले समये, कालेन मृत्युना ग्रस्तः, अतिशैघ्र्यद्योतनाय भूतनिर्देश उपचारात्, कोऽसौ, सकलदैत्यानामध्ये स्तोत्रं बलिष्ठत्वेन यस्य सः, प्रलम्ब इत्यर्थे तन्नामनिरुक्तेः, तथापि कृष्णभीत्या· आत्मनः संगोपं संगोपनम्· आलाति गृह्णातीति सः, तथापि कृष्णस्य महासत्त्वतामनुमाय तं त्यक्त्वा पराजयेन राममाक्रष्टुकामः कृष्णपक्षीयोऽभूदिति ज्ञेयं, पराजित्य स्वयमेव पराजितो भूत्वेत्यर्थः, राजितो दीप्तस्तस्य भावो राजित्यं दीप्तिः शोभा तया मनः संकर्षतीति तं, तदानीमत्यधिका रामस्य शोभाभूदिति भावः, पटीरधवलं चन्दनगौरं, मुदा मत्कार्यं सिद्धमिति हर्षेण लङ्घमानं मनो यस्य सः, अपोवाह वहन्नपससार ॥ १० ॥

बाहुकमर्यादातिक्रमविक्रमविस्मितः* स्मितपूर्वं स च सचमत्कारं कपटमनुजमनुजमाजुहाव ॥ ११ ॥

स च संकर्षणः कपटेनैव मनुजं जीवरूपम्, "इति नृगतिं विविच्य कवय" इति वेदस्तुतौ नृपर्यायस्य जीववाचित्वेन व्याख्यानात्, मनुजं श्रीकृष्णम् ॥ ११ ॥

भो दामोदर मोदरयेण मामयमामय उन्मादक इव मनो मनोरम रममाण हरति ॥ १२ ॥

मोदरयेण निजहर्षवेगेन मां हरति, उन्मादक आमयो व्याधिर्मन

* र्विस्मितं, इति पाठान्तरम् ।

इव-इति व्यापादनार्थेहरणे दृष्टान्तः, हे रममाणेति, अधुनापि किं क्रीडसीति भावः ॥ १२ ॥

तदितः परं किं करवामहे महेच्छ हे कपिल विलम्बं मा कुरु कुरु समुचितमुपदेशमिति तद्वचनोपरमे परमेण कौतुकेन भगवानवादीत् ॥ १३ ॥

महेच्छ हे· अमोघेच्छाशक्तिक, कौतुकेनेति· अंशकलयैव सर्वजगत्संहारकर्तुरप्यस्य भयं लीलावेशादिति ॥ १३ ॥

किमप्रतिभया प्रतिभयाक्रान्तोऽसि निजविक्रममाहर हर चास्य जीवितमिति समुक्तोऽसमुक्तोयतोयदस्वरम् ॥ १४ ॥

इति समुक्तः सम्यगुक्तः, मोचनं मुक् तया सह वर्तमानं समुक्· न समुक् तोयं यस्य तस्य तोयदस्य मेघस्य स्वर इव स्वरो यत्र तद्यथा भवति तथा, सजलजलदस्वरमित्यर्थः ॥ १४ ॥

स्वरंहसा गिरिवरपक्षभिदुरभिदुरसोदरादराघातघुष्टिमुष्टिमुद्गरेण मुण्डपिण्डखण्डखण्डीकरणचण्डेन यमसदनं प्रहीयमानं हीयमानं जीवितेन तमथ मधुमथनाग्रजः संपादयामास दयामास मागवपि यदि ॥ १५ ॥

अथ मधुमथनाग्रजः श्रीबलदेवस्तं जीवितेन हीयमानं त्यज्यमानम्·अत एव यमसदनं प्रति प्रहीयमानं प्रस्थाप्यमानं संपादयामास चकार, केन,गिरिवरपक्षाणां भिदुरस्य भेदकस्य भिदुरस्य वज्रस्य सोदरा चासो· अदरा· अनल्पा· आघातघुष्टिराघातशब्दो यस्य तथाभूतो मुष्टिमुद्गरश्चेति तेन, अत्र "गुरुमत्सरच्छिदुरये"ति माघदर्शनात् "करीन्द्रदर्पच्छिदुरं मृगेन्द्र"मिति पाणिनिकृतजाम्बवतीविजयदर्शनात् "संसारबन्धच्छिदुरान् द्विजातीन्·" इति व्योषदर्शनाच्च "भिदिच्छिदोः कर्मकर्तर्यभिधान"मित्यस्य प्रायिकत्वव्याख्यानात् कर्तर्यैव कुरच् प्रत्ययः, "कुलिशं भिदुरं पवि"रित्यमरः ।

किंच, अणवपि अल्पमपि मा दयामास न दयते स्म ॥ १५ ॥

तदा प्राणप्रयाणतः प्रागेव स तथात्मशरीरं प्रथयामास यथा तदंसावस्थानकुतूली हली कर्पूरधवलोऽवलोक्यते स्म जनैर्धरणिमध्यमध्यवस्थितं चन्द्रमण्डलमण्डलमिव जायमानम् ॥ १६ ॥

धरणिमध्यमधि धरणिमध्य एव अवस्थितं चन्द्रमण्डलं, तदानीम् अण्डे ब्रह्माण्डकटाहस्योपरितनभित्तौ लग्नं, तद्भागस्यैवाण्डत्वाभिव्यञ्जकलवणत्वदर्शनात् तत्रैवाण्डशब्दप्रयोगः ॥ १६ ॥

अथ तस्य निरुपमोपदेहो देहो निरर्गलगलगलायमानगलच्छोणितशोणितः सहजधूमधूमलो रक्तसंध्याघनसंध्याघनश्चरमाचल इवामूलमौलिमिलितकुसुमाशोकाशोकाकुलो विन्ध्य इव भूमौ निपपात ॥ १७ ॥

निरुपम उपदेहो वृद्धिर्यस्य सः, "दिह उपचये" इति धातोः । निरर्गलं निरोधरहितं यथा भवत्येवं गलगलायमानं च यथा स्यात्तेवं गलता शोणितेन रुधिरेण शोणितः शोणीकृतः, स्वरूपतस्तु धूमवद्धूमलवर्णः, ततश्च रक्तवर्णस्य संध्याकालघनस्य संधिना मेलनेन आघनः सम्यङ्निबिडश्चरमाचलोऽस्तशैलः, अस्य शिलामयत्वेन स्वरूपतो धूमलतया उच्चतया आगन्तुकेनारुणिम्ना च सत्यपि सारूप्ये क्वापि पतनाश्रवणाद्दन्यथा उपमिमीते आमूलेति, आमूलमौलि मूलमारभ्य अग्रपर्यन्तं मिलितानि कुसुमानि येषां तथाभूता अशोका यत्र स चासौ आ सम्यक् शोकाकुलश्चेति सः । स्वगुरोरगस्त्यस्याज्ञानुरोधेन मेरुजयोद्यमभङ्गाच्छोकः, ततः पातश्च पुराणप्रसिद्धः ॥ १७ ॥

पपात च गगनतो नतोत्तमाङ्गानामुत्तमाङ्गानामुत्सवामोदेन स्तुतिवृन्दारकाणां वृन्दारकाणां करकुड्मलगलिता प्रसूनवृष्टिः ॥ १८ ॥

नतोत्तमाङ्गानां भक्त्या नतशिरसाम्, उत्सवामोदेन उत्सवानन्देन हेतुना उत्तमाङ्गानां कुङ्कुमादिलिप्तत्वेन सुन्दरगात्राणां, स्तुतौ स्तुतिनिमित्ते वृन्दं समूहम् इयति प्राप्नुवन्तीति तेषां, मिलितीभूय स्तोत्रपरा-

णामित्यर्थः, यद्वा, स्तुतिवृन्दस्य चारकाणाम्, अर्तेर्ज्ञानार्थत्वेन कर्तुं विज्ञानामित्यर्थः, यद्वा स्तुतिवृन्दे वृन्दारकाणां श्रेष्ठानां, "वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिष्व"ति मेदिनी ॥ १८ ॥

एवमुत्तालतालाङ्के तालाङ्केन निहते परममायाबलावलम्बे प्रलम्बे प्रसिद्धासुरे सुरेशादिनुत्यभिरामो रामोऽसौ नामान्तरं नामान्तरंहःसंघसंहननकरं प्रलम्बघ्न इति तदङ्गीचकार ॥ १६ ॥

उत्तालताम् उत्कटत्वम् आलाति गृह्णातीति उत्तालतालोऽङ्कश्चिह्नं यस्य तस्मिन् प्रलम्बे तालाङ्केन रामेण निहते सति, "उत्तालो हेमकुण्डे स्याद्भूमे चोत्ताल उत्कटे" इति विश्वः । प्रलम्बघ्न इति नामान्तरं नाम प्राकाश्ये अङ्गीचकार, कीदृशम्, अन्तरंहःसंघस्य अन्तःकरणपापसमूहस्य संहननकरम्, अत्रांहसो वर्णदेशनादौ दृष्टेन उष्मत्वेन संघस्य तु कवर्गचतुर्थत्वेन पुनः संहननेत्यस्योष्मत्वेनाप्यनुप्रासो नानुपपन्नः । हकारघकारयोस्तुल्यस्थानत्वा"देकत्वबुद्धेः । शीघ्रमंहोविघातं" "अलिवस्त्वनघोरांहोरंहःसंघं निहन्तु व"इत्यादिसूर्यशतकादिदर्शनात् ॥ १९ ॥

अथैवमखिलबालबान्धवैः सदामोदरेण दामोदरेण चाभिनन्दितोऽदितोल्लासो हासोहासोष्यमाणमानसस्मयः खेलातो विरम्य रम्यचरितेन श्रीकृष्णेन सह सहचरैश्च निविडशोभाभाण्डो भाण्डीरमूलमासाद्य विशश्राम ॥ २० ॥

अथासौ रामो विशश्राम, सदा सततं मोदरेण आनन्ददायिना अभिनन्दितः, साधु कृतं साधु कृतमिति सत्कृतः, अदितोल्लासः, अखण्डितोल्लासः, हासो हर्षजन्यः स्वनिष्ठः ऊहा विस्मयजन्या अन्यदीया ताभ्यां सोष्यमाणः दुनः पुनरद्भुवन् मानसस्मयो मदो यस्य सः, शोभाभाण्डमस्यास्तीति शोभाभाण्डी ॥ २० ॥

विश्राम्यत्सु श्रीरामदामोदरादिषु श्रीदामसुदामसुबलादिसकलगोपालबालकेषु च धेनवो नवोन्मिषितयवसमानयवसमानराहित्य-

सौहित्यसौरस्येन तदनुकूलयमुनाकूलनिकटकटनलालसतयाऽविभी-षिकाटविभीषिकाटवीं दैववशात आसेदुः ॥ २१ ॥

नवोन्मिषितैर्यवैः समानानां सदृशानां यवसानां तृणानां मानरा-हित्यसौहित्यसौरस्येन हेतुना, मानस्य परिमाणस्योपमाया वा राहित्यं रहितता यत्र तत्, अपरिमितं निरुपमं वेत्यर्थः, तथाभूतं सौहित्यं तृ-प्तिर्यस्मात् तथाभूतेन सौरस्येन सुरसतया, "सौहित्यं तर्पणं तृप्ति"रित्य-मरः । तदनुकूलस्य तादृशतृणास्वादानुकूलस्य यमुनाकूलस्य निकटे कट-नलालसतया गमनाभिलाषेण दैववशात इषीकाटवीमासेदुः प्रापुः । कीदृशं यथा भवति । अविभीषिका· अभयप्रदानम्, अर्थात् कृष्णेन सह, तस्याः· आटः· अटनं संचारस्तेन विभि विगतभयं यथा स्यात् तथा । यद्वा, वि-भीषिकायां भयप्रदाने· अटाः सहसोत्पतन्तो ये वयः पक्षिणस्तेभ्य एव भीर्यच न त्वन्यतस्तद्यथा स्यात् तथा । किंवा· अटव्या एव विशेषणम् ॥ २१ ॥

ततश्च धेनूनामनूनामदृष्टिमवगत्य साशङ्कमनसः कमनसहचरा-श्चराचरगुरुणारुणाब्जनयनेन तेन नतेन करुणामृतस्रोतसास्रोतसात-ङ्काणाः समूचिरेऽचिरेणान्योन्यम् ॥ २२ ॥

न· ऊनामनूनां, संपूर्णामित्यर्थः । अदृष्टिमदर्शनम् । कमना अभि-रूपाश्च ते सहचराश्चेति ते, "कमनः कामुके कामेऽभिरूपेऽशोकपादपे"-इति मेदिनी । तेन कृष्णेन सह, करुणामृतस्रोतसा नतेन नम्रीकृतेन । अस्रेण· अश्रुणा· ऊते ग्रथिते सातङ्के सभये अक्षिणी येषां ते ॥ २२ ॥

भो भोः सवयसः सवयसः समृगस्य वनस्यास्य मध्ये केवलं केवलम् ॥ २३ ॥

सवयसः· हे वयस्याः । सवयसः पक्षिगणसहितस्य समृगस्य हरि-णादिसहितस्य वनस्यास्य मध्ये केवलं के सुखे· एव बलम् ॥ २३ ॥

न खलु भीतिर्नैचिकी नैचिकीनाम् ॥ २४ ॥

अत एव नैचिकीनां मुख्यगवीनां तासां नैचिकी·अल्पापि भीति-र्न, विनयादित्वात् स्वार्थे ठक्, "अल्पे नीचैर्महत्युच्चै"रित्यमरः ॥ २४ ॥

तत् कथमासां मा सांप्रतं काचिदपि दृश्यते तदवकलयध्वं कलयध्वंसो यावन्न भवतीति च कृष्णभारत्या भारत्यालुलितया सर्वे एव बालका बालकान्तघासघासलक्ष्मानुसारेण खुरखुरप्रखुरणक्ष्मातलतलनेन तदनुसंधानधुरंधरा धरामातस्तरुस्तरुगुल्मवीरुन्निकरकरम्बितगहनगहनस्थलीषु विचिन्वन्तोऽन्वन्तोदित्वरशङ्काः शङ्कातरा* इव यदा भेजुः ॥ २५ ॥

आसां मध्ये काचिदपि मा दृश्यते, तत् तस्मात् अवकलयध्वं सर्वत्र विचारयत, कस्य सुखस्य लयः संश्लेषः तस्य ध्वंसो विश्लेषः, सुखविगमो यावन्न भवतीत्यर्थः, "लयो विनाशे संश्लेषे साम्ये तौर्यत्रिकस्य च"ेति मेदिनी। कृष्णभारत्या चेति, भो भो इत्यारभ्य सर्वेषां, तत् कथमारभ्य कृष्णस्यैव भारतीति। कीदृश्या, भा शोभा तया सहिता रतिः प्रीतिस्तया अलुलितया अखण्डितया। बालानां नवानां कान्तानां कमनीयानां घासानां तृणानां घासलक्ष्म अदनचिह्नं तदनुसारेण। खुरा एव खुरप्रा बाणास्तैः तुण्णस्य क्ष्मातलस्य तलनेन प्रतिष्ठया। धरां पृथ्वीम् आतस्तरुर्व्याप्नुवन्ति स्म,"स्तृञ् आच्छादने"। गहनस्य वनस्य गहनस्थलीषु दुर्गस्थानेषु, "गहनं दुर्गकाननयोरपी"ति मेदिनी। अनु अनन्तरम् अन्ते अन्वेषणसमाप्तौ उदित्वरशङ्का जातभयाः सन्तो यदा शं सुखं न भेजुः ॥ २५ ॥

तदा त्वीषिकाटव्यं काटव्यं दवदवथुकृतं वीक्ष्य कृष्णनाथा अप्यनाथा अप्ययमासेदुष्य इवापस्तृतिस्तृतिमपश्यन्त्यः श्यन्त्यश्च जीवितार्थां साश्रुमुख्योऽभिमुख्योऽभित एव कृष्णावलोकनमर्थमर्थयमाना मानापहारहृता इव धेनवो यथावतिष्ठन्ते स्म ॥ २६ ॥

तदा यत्र धेनवोऽवतिष्ठन्ते तदनुसंधानमजानन्तस्तं श्रीकृष्णं पुनरासाद्य दुःखिताः सन्तः सर्वे न काचिदपि दृष्टा धेनुरिति यदूचिरे

* शं कातरा इत्येवं मुद्रणीये वर्णवर्णो लिपितोऽपि यमकसौष्ठवाय।

तदैव स कृष्णस्ता धेनूः प्रत्येकं नामग्राहमाजुहाव· इत्यन्वयः । धेनवः कीदृश्यः, ईषिकाटव्यम्· ईषिकाटवीभवं दवदवथुरूतं दावानलतापजनितं काटव्यं कटुत्वं वीक्ष्य कृष्णनाथा अपि· अनाथा अप्ययं नाशम्·आप्तदुष्यः प्राप्तवत्य इव· अपसृतिसृतिं पलायनमार्गम्·अपश्यन्त्यः । अत्र काटव्यमिति पदस्य·अश्लीलतादोष ईषिकाटव्यमिति यमकोपयोगिपदद्रष्टा सोढव्यः । एवं पूर्वत्रापि । किंच अत्र वर्णनीयत्वेन· ईषिकाटव्यांच रतस्यैव प्रस्तुतत्वात्· अश्लीलमयस्यापि तत्पदस्य तु सर्वथैव त्वदूषयितुमशक्यत्वात् प्रत्युत यमकभङ्ग्या समाधानमेव । ततश्च जीविते· आशामपि श्यन्त्यः· अल्पयन्त्यः,अभिमुख्यः· युगश एव शोकानुमोदनार्थं समानमुख्य इत्यर्थः, ततश्च मानापहारो बुद्धिनाशः· तेन हता इव । मान इति "मन ज्ञाने" घञन्तः ॥ २६ ॥

तदनुसंधानमजानन्तोऽनन्तोद्भूतचिन्ताश्चिन्तामणिमिवाश्रितमनोरथसिद्धेरनुगतसंकल्पकल्पद्रुममिव स्वजनकामकामधेनुमिव तं पुनराशाद्य नराशाद्यदर्शनं नराकृतिपरं परं ब्रह्म दुःखिताः सन्तो न काचिदपि दृष्टा धेनुरिति यद्भूचिरेऽचिरेण ॥ २७ ॥

न विद्यते·अन्तो नाशो यस्य तथाभूतं यथा स्यात् तया· उद्भूताश्चिन्ता येषां ते । नरैरपि· आसाद्यं प्राप्यं दर्शनं यस्येति । चिन्तामण्यादितोऽपि कृपालुत्वगुणेनोत्कर्षः । ऊचिरे सत्वरीत्या वार्ता ज्ञापयामासुरित्यर्थः। न तु चिन्तामणिष्विव प्रस्तुतधेनुप्राप्तिं प्रार्थयामासुरिति भावः ॥ २७ ॥

तदैव दैवतकुलमुकुटमहामारकतो महामारकतो भयात्ता निविवर्तयिषुः स स्वयमुपसृत्य सृत्यनुसारेण घनघटागभीरस्वरं स्वरंहसा द्राघीयः प्लुतं कृत्वा सुधयेव नामग्राहं प्रत्येकमाजुहाव ॥ २८ ॥

ता धेनूर्भयान्निवर्तयितुमिच्छुः । कीदृशात्, महामारकतः· महामृत्युकरात् । सृत्यनुसारेण वर्त्मानुसृत्या । द्राघीयः प्लुतम्· अत्युच्चं कृत्वा । सुधया· अमृतेन· आप्लुतं व्याप्तमिव कृत्वा । नामग्राहं नाम गृहीत्वा, "नाम्न्यादिशिग्रहो"रिति णमुल् ॥ २८ ॥

यथा ।

मुक्ते नन्दिनि चन्दनेन्दुतिलके कस्तूरि कर्पूरिके
पिङ्गे रङ्गिणि धूमले धवलिके किञ्जल्किके रङ्गिणि ।
श्यावे केतकि चन्द्रिके शवलिके काश्मीरिके चम्पिके
हीत्येहीति ततान तानमधुरं गानं मुरल्या हरिः ॥ २६ ॥

मुक्ते· इत्यादि वर्णाकृतिगन्धादिसाम्येन संज्ञा । रङ्गिणीति· अर्थभेदात् संज्ञाभेदः । एकत्र मुरल्यादिनाऽश्रवणाद् रङ्ग आनन्दस्तद्युक्ता, अपरत्र सुन्दरवर्णयुक्तेति ॥ २९ ॥

तमथ बिम्बाधरमधुमधुरं मुरलीकलमाकर्ण्य कर्ण्यममृतमिव चिरचिन्त्यमानकृष्णवर्त्मा कृष्णवर्त्मानुपाततो जीवनावनाशयाशयारूढविश्वासाश्वासादितमोदापि दवदवथुना पृथुनापृता समुपसर्पितुमसमर्था समर्थामिव प्रत्युत्तरतरलतया गद्गदगहनगभीरभीरस्वरां हंवाहंवावाचं वाचं वाचं वाचंयमिनां दशमिनां शमिनां च मनोवचोऽगोचरं गोचरं गोकुलवासिनं तं प्रीणयामास गोवृन्दारिकाविततिः ॥ ३० ॥

गोवृन्दारिकाविततिः श्रेष्ठगोसमूहः, तं मुरलीकलमाकर्ण्य प्रत्युत्तरतरलतया समर्थामिव हंवाहंवावाचं जात्यनुरूपताद्दृशस्वस्ववाक्यं,वाचं वाचम्· उक्त्वा· उक्त्वा तं श्रीकृष्णं प्रीणयामास । कीदृशी, चिरं चिन्त्यमानं कृष्णस्य वर्त्म यया सा । कृष्णवर्त्मा वह्निस्तस्यानुपाततस्तत्कर्तृकानुगमाज्जीवनस्य· अवनं रक्षणं तस्याशया· आशये· अन्तःकरणे· आरूढो विश्वासो यस्याः सा । आशु शीघ्रम्· आसादितः प्राप्तो मोदो यया तथाभूतापि समुपसर्पितुमसमर्था । कुतः । पृथुना दवदवथुना दवतापेन· आपृता व्याप्ता । हंवाहंवावाचं कीदृशीं, गद्गदगहनेन गभीरां भियम्· ईरयति स्वरो यस्यां ताम् । तं कीदृशं, वाचंयमिनां मौनव्रताम्·, किम्· अज्ञतया, नहि नहि, दशमिनां ज्यायसां, पुरातनत्वेन परमविज्ञानामित्यर्थः, "वर्षीयान् दशमी ज्याया"नित्यमरः, कुतः, शमिनां शान्तिमतां, मनसो वचसश्च· अगोचरम्· अविषयम् ॥ ३० ॥

समाकलितेऽथ तस्मिन् धेनुघोषे घोषेश्वरनन्दनो ननन्द नोनसंमदा मदाविलविलसदन्तरा दन्तरामणीयकझकझकायमानसितहसितहृतान्धकारा इव हर्षोत्कर्षोत्कमनसो न सोसूच्यन्ते स्म कं वानन्दं कुतूहलिना हलिना सह सहचराश्च ॥ ३१ ॥

धेनूनां घोषे शब्दे ननन्द· इत्यस्य वचनविपरिणामेन सहचराश्च ननन्दुरिति । कीदृशाः, न· ऊनः संपूर्ण एव संमदो हर्षो येषां ते, निषेधार्थकनकारेण समासः । अत एव मदाविलं मदव्याप्तं विलसत्· अन्तरं मनो येषां ते । अत एव दन्तानां रामणीयकेन रमणीयत्वेन झकझकायमानं यत् सितहसितं तेन हृतोऽन्धकारो वनगह्वरगतोऽपि यैस्ते । कंवा· आनन्दं न सोसूच्यन्ते स्म· अतिशयेन नासूचयन् । अत्रानन्दमित्यनेन नोनसंमदा इति ननन्दुरित्याभ्यां चार्थपौनरुक्त्यमानन्दातिशयविवक्षया न दोषायेति ॥ ३१ ॥

अथ तेनैव ध्वनिनाध्वनिर्णायकेन कृष्णे चरणसंचरणसंजातत्वरे तत्वरे सर्व एव यदि ॥ ३२ ॥

तेनैव हंवाहंवामयेन ध्वनिना शब्देन· अध्वनिर्णायकेन वर्त्मनिश्चायकेन चरणयोः संचरणस्य संजाता त्वरा यस्य तथाभूते कृष्णे सति सर्व एव प्रकरणात् सहचरगणास्तत्वरे त्वरां चकार यदि ॥ ३२ ॥

तदेव दैववशादवशादशीर्णोत्साहा इव दावदावतापेनैषिकावनगता गतावना इव धेनूः सबलोऽवलोक्य ॥ ३३ ॥

तदैव स श्रीकृष्णो दावदावतापेन वनवह्निज्वालया गतावना गतरक्षाका धेनूरवलोक्य तमनलं पिपासयिषुरनुचरानवादीदित्यन्वयः । "दवौ दावौ वनारण्यवह्नी" इत्यमरः । धेनूः कीदृशीः, दैववशात्· अवशादेन दुःखेन शीर्ण उत्साहो यासां ताः । "शद्लृ शातन" इत्यस्य घञा· अवशादस्तालव्यमध्योऽपि दृष्टः । सबलः· बलदेवसहितः ॥ ३३ ॥

हा कष्टं कष्टङ्कितवानीदृशीं विपत्तिमाशामासाद्यमानमृत्युपथानामिति स चिन्तयन् ॥ ३४ ॥

Digitized by Google

टङ्कितवान्· विङ्कितवान्, "टकि लक्षणे" इति धातोः ॥ ३४ ॥

कातरतरचकितचकितरहितविलोचनविलोचनप्रान्तेन प्रचदप्रचद-
नाभिस्ताभिरभितो नुद्यमानमानसाभिरवलोक्यमानो मानोज्झितकरुणो-
ग्राहगाहमानमानसो द्विगुणिते दुःखे दुःखे चरन्त्यो दाहं यदि दवद-
वकीलाः कीलालदकीलालैरपि शमयितुमशक्यास्तदा पूर्ववदपूर्ववद-
नबिम्बस्तत्कालोपनतया स्वभावैश्वर्यशक्त्या तमनलं न लङ्घनीयमपि
पिपासयिषुरनुचरानवादीत् ॥ ३५ ॥

कातरतरमतिकातरं चकितं त्रस्तं चकितरहितम्·अत्रस्तं "चक तृप्तौ"विति धातोः, हितमनुकूलं विलोचनं दर्शनं यस्य तथाभूतस्य विलोचनस्य नेत्रस्य प्रान्तेन ताभिरवलोक्यमानः । प्रान्तेनेति, अन्यभागानाम्· अम्बुदाबधूमादिभिर्व्याकुलत्वादिति भावः, नुद्यमानं कृष्णसंनिधौ प्रेर्यमाणं मानसमेव याभिस्ताभिः । ततश्च मानोज्झितं परिमाणातीतं करुणोग्राहं कृपाविस्तारं गाहमानम्· अवगाहमानं मानसं मनो यस्य सः । ततश्च दुःखे द्विगुणिते सति खेऽपि· आकाशेऽपि चरन्त्य उत्पतन्त्यः· दवदवकीला वनाग्निज्वाला यदि दाहम्· अदुः· दत्तवत्यः । कीदृश्यः, कीलालदा जलदास्तेषामपि कीलालैर्जलैर्निर्वापयितुमशक्याः । न लङ्घनीयं दुर्वार्यमपि· ऐश्वर्यशक्त्या प्रयोज्यकर्त्र्या पिपासयिषुः पानं कारयितुमिच्छुः । अत्र "कुवलययुवतीनां लेहयच्चिभृङ्गैः", "कुवलयदललक्ष्मीलङ्घिमाः स्वाङ्गभासः" इत्यादिदानकेलिकौमुद्यादिदर्शनात् पानलेहनभक्षणानां तुल्यपर्यायस्याभावाच्च "गतिबुद्धिप्रत्यवसानार्थे"त्यादिना पिबत्यादीनां प्रयोज्यकर्तुर्न नित्यकर्मत्वमिच्छन्तीति ॥ ३५ ॥

भो भो नयनानि पिदद्धं मोदध्वं मोचयध्वं च मोहं चेति तथा नयनानि पिदधानेषु दधानेषु च विस्मयं लम्बालकेषु बालकेषु कोमलकमलकलिकाकारेण करतलेन गण्डूषीकृत्य कृत्यविशारदे शारदेन्दुवदने सुधासुधारावन्तमिवानलं पिपासति सति व्रजराजतनये न येन

तस्यैवैश्वर्यशक्त्या प्रकटीभूय स्वयमेवासौ पपेऽपपेशलता न कुत्रापि तस्याः ॥ ३६ ॥

सुधासुधाराववर्त्तामिति, तस्याविपतनसमये· अनलस्यापि सुधासं-बन्धिशोभनधारायुक्तत्वम्· अश्लीलतादोषनिवृत्त्यर्थं युक्तमेव, प्रकटीभूय पृथक् प्रचण्डमूर्तिं धृत्वा· असौ·अनलः पपे पीतः, अपपेशलता· अदक्षता, "दक्षे तु चतुरपेशलेत्यमरः। अत्रानलस्यामृतत्वे सति तत्पानेऽप्यनौचि-त्याभावेऽपि· अनुरागार्द्रचित्तभक्तानां तद्दुःखद्दुःखदमेवेति न साक्षा-च्छ्रीमुखाब्जेन पानमिति,अत एव "पीत्वा मुखेन तं कृच्छ्राद्योगाधीशो व्यमोचय"दिति मूलपद्येऽपि मुखेनेत्यस्य· उपायेनेत्ययमर्थो ज्ञेयः, "मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपी"ति मेदिनीतः ॥ ३६ ॥

अन्यो हि घनरसदो रसदोहेनैव सदा वत दावतनूनपान्तमन्तं नयति ॥ ३७ ॥

अन्यो हि घनरसदो मेघः, रसदोहेन जलपूरेण, दावस्य वनस्य तनूनपात् वह्निस्तमन्तं नाशं नयति, तनूनपान्तमिति शचन्तम्, "ज्वलनो जातवेदास्तनूनपा"दित्यमरः ॥ ३७ ॥

एष हि घनरसदो नरसदोत्थभवदवदवथुं करुणोत्कटाक्षः कटा-क्षमात्रेणैव यो हरति तस्य किमिदं चित्रं यदिमं तुद्रवं दवं सक-लसौभगवत्या भवगत्या निजशक्तिदेव्या शमयांचक्रे ॥ ३८ ॥

नराणां सदोत्थस्य सर्वदोद्भवतः· भवदवस्य संसाराग्नेर्दवथुं तापं हरति नाशयति, तुद्रो दव उपतापो यस्मात् तं दवं वनवह्निं शमयांचक्रे नाशयामास ॥ ३८ ॥

शमयांचक्रे च तस्य निजगोकुलगोकुलमिति ॥ ३९ ॥

ततश्च तस्य श्रीकृष्णस्य निजगोकुलस्य स्वव्रजस्य गोकुलं गोस-मूहः शं कल्याणम्, अयांचक्रे प्राप, "अय गतौ""दयायासश्चे"त्याम् ॥ ३९ ॥

नापीदं चित्रं यदखण्डे महसि महसिद्धिकारिणि सकारिणि सकु-

Digitized by Google

लप्रभावे प्रभावेश्मनि खण्डमहो महो दवदहनापदेशमपदेशमावमिह विहितमित्यच न को विदः कोविदः सारस्यमभिनयति ॥ ४० ॥

ऐश्वर्यशक्तिप्राकट्यमपि लोकदृष्ट्यैव लीलासौन्दर्यार्थमेव तत्त्वदृष्ट्या तु तदपि पिष्टपेषायितमेव· इत्याह नापीति । इदमपि न चित्रं, किं तत्रास्मात्· अखण्डे परिपूर्णे महसि तेजसीति परिपूर्णब्रह्मत्वं, महसिद्धिकारिणि चकारिणीति, तत्रापि सविशेषत्वेन मधुरलीलामयत्वं, बहुलप्रभात्र इति, तथाप्यनाच्छादितमेव भगवत्त्वं व्यञ्जितम् । तदेवंप्रभायां वैष्णवमते· उक्तानां ब्रह्मत्वादीनां तेजसामपि वेश्मनि· अधिकरणरूपे तस्मिन्· अहो आश्चर्यं दवदहनच्छलं खण्डं महः प्राकृतमेव तेजो विहतं नष्टम् । तत् कीदृशम्· अपदे स्वाश्रयभिन्ने· एव विषये ईशभाव ऐश्वर्यं यस्य न तु साक्षात् तस्मिन्नेव· इति, सामान्यतेजःकणस्यान्यदाहकस्यापि महाग्निपुञ्जे लयदर्शनात् । "यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामक"मिति प्राकृततेजसामप्याश्रयत्वमुक्तमेव। इति हेतोः· अत्र श्रीकृष्णे कः कोविदः कः पण्डितः· विदो वुद्धः सारस्यं सरसतां न· अभिनयति, अपितु सर्व एव ॥ ४० ॥

अतो यैः कृतं नमोऽघारये न मोघा रयेण कालस्य तेषां जनिर्भवतीति ॥ ४१ ॥

अतोऽघारये श्रीकृष्णाय यैर्नमस्कारमात्रं कृतं तेषां कालस्य रयेण वेगेन मोघा व्यर्था जनिर्जन्म न भवति किंतु भगवदिच्छयैव भक्त्युपयोगि सार्थकं जन्मैव भवतीत्यर्थः ॥ ४१ ॥

तदा स्वःसदां सदान्दोलदानन्दनन्ददात्मनामभितोऽभितः प्रणामाञ्जलयो जलयोनियोनिप्रभृतीनां नन्दनकुसुमाञ्जलिभिरलिभिरवलम्ब्यमानैर्दिवः कज्जलाम्बुजलाम्बुतिपटलैरिव निपतन्ति स्म ॥ ४२ ॥

प्रासङ्गिकं समाप्य प्रस्तुतमाह स्वःसदां देवानां सदैव आन्दोलत समुल्लसता· आनन्देन नन्दन्तः समृद्धिमन्त आत्मानो येषां तेषां नन्दनकुसुमाञ्जलिभिः सह प्रणामाञ्जलयो निपतन्ति स्म, श्रीकृष्णं प्रतीत्यर्थः ।

कौतूहलैः, सौरभवशादलिभिरवलम्ब्यमानैरालम्ब्यमानैः । अलिभिरपि कैरिव, दिवः स्वर्गात् कज्जलसहितानामामन्द्राम्बुजलानामाखुतिः सम्यक् चरणं तस्य: पटलैः समूहैरिव ॥ ४२ ॥

तदैव देवतावृन्दवन्दनमनुमोदयता मोदयता च तेन सगोपगोपरःशतवर्गे सुच्छायाच्छायातशैत्यगुणे भाण्डीरतलतलेऽलक्षितमात्मयोगेन संगमय्य मय्यतो वयस्या विक्रिरन्त संप्रति प्रतिपन्नार्था दृष्टीरिति निगदिता दिनाचिमुद्रा मुद्रामणीयकेनाहो किमयमस्माकमुन्मादः स्वप्नो वा क्व गतो दावानलो न लोक्यते लवणमप्यस्य किमपि क्व वा साटवी गावो वयमपि भाण्डीरमूल एवास्मेत्यतिविस्मितास्ते विदधिरे ॥ ४३ ॥

सगोपानां गोपसहितानां गवां परःशतं शतादधिकसंख्यं वर्गं समूहं मोदयता-आनन्दयता, "परःशताद्यास्ते येषां परा संख्या शतादिका"-वित्यमरः । क्व. सुच्छायम्- अच्छं निर्मलं च- आगतशैत्यगुणं च तस्मिन् । अलक्षिते तेषां करचरणादिव्यापारं विनैव संगमय्य प्रापय्य मुद्रामणीयकेन आनन्दस्य विस्मयमयतया रमणीयत्वेन ॥ ४३ ॥ •

अथ सा नैचिकीविततिः प्रमदविलसत्कानना काननानले प्रशान्ते शान्तेन मनसा संमदमदसंपद्यमानास्तिमितविलोचनैर्लोचनैः पिबन्तीव सुप्रणीतप्रणयरसनाभिरपि रसनाभिरपि लिहन्तीव प्रमोदभरविकसनासिकाभिर्नासिकाभिर्जिघ्रन्तीव परमप्रेमास्पदं पदं गोपेन्द्रतनयं कृतनयं कृपामयमभितोऽभिसर्पति स्म ॥ ४४ ॥

प्रमदेन विलसत् कं शिर आननं च यस्याः सा । संमदमदेन-आनन्दमत्ततया संपद्यमानैस्तैस्तिमितम्- आर्द्रीभूतं विलोचनं दृष्टिर्येषां तैः । सुष्ठु प्रणीतः प्रणयरसस्य नाभिर्मध्यो यया सापि, "नाभिर्मुख्ये नृपे चक्रमध्यक्षत्रिययोः पुमान्"निति मेदिनी । प्रमोदभराणां विकसनस्य प्रकाशस्य- आसिका स्थितिर्यासु ताभिः ॥ ४४ ॥

तदनु करुणाकोमलेनामलेनारुणेन करतलेनाङ्गमभिपरामृशन्नेकैकमेव वलति प्रणयसौरभे सौरभेयीरभिप्रीणयामास ॥ ४५ ॥

एकैकमङ्गमभिमृशन् मृजन्, वलति प्रवृत्ते प्रणयसौरभे प्रेमविकाशे ॥ ४५ ॥

अथ निदाघधामनि धामनिवहो निखिलजनतापदो जनतापदोघ इव य आसीत् तमवहार्य हार्यनुष्णभावं गते भावङ्गतेरितदर्शनीयत्वे खचरमचरमगिरिकन्दरादरावरोहरोहदाकाङ्क्षति ॥ ४६ ॥

निदाघधामनि सूर्ये खे चरतीति खचरी भा शोभा यस्य स चासौ चरमगिरिश्चेति तस्य कन्दरायां दरावरोहे ईषदुत्तरणे रोहन्ती उद्गच्छन्ती आकाङ्क्षा यस्य तथाभूते सति उल्लासितेन मनसा श्रीकमलनयनो यदि विपिनतो बहिराजगाम तदा भ्रमरावलिः कियद्दूरमनुवव्राजेत्यन्वयः । निदाघधामनि कीदृशे, धामनिवहो घर्मसमूहो निखिलजनानां तापप्रदो जनताया जनसमूहस्य आपदोघः विपद्गण इव य आसीत् मध्याह्नादावभवत् तम् अवहार्य त्यक्त्वा हारि शोभनम् अनुष्णभावम् अनुष्णत्वं गते । अत एव भा दीप्तिस्तीव्रतेज इति यावत्, तस्या अङ्गनागमनं गत्यर्थाद्गमेः कर्तरि पचाद्यजन्ताद्भावप्रत्यये रूपं, तया ईरितं दर्शनीयत्वं दर्शनार्हत्वं यस्य तस्मिन् ॥ ४६ ॥

शीतलीभूतभूतले प्रबलदाहज्वरसंज्वरसंत्यागसुस्पर्शे जनशरीर इव विगतमहोष्मणि ॥ ४७ ॥

अशीतलं शीतलं संपन्नमिति शीतलीभूतं तस्मिन् भूतले विगतमहोष्मणि सति । कस्मिन्निव, प्रबलदाहज्वरस्य संज्वरः संतापस्तस्य सम्यक् त्यागे सति सुस्पर्शे सुखस्पर्शे जनशरीरे इव ॥ ४७ ॥

विमलकमलेषु कमलेषु कमलाकराणाम् ॥ ४८ ॥

कमलाकराणां सरसां कमलेषु जलेषु विमलकमलेषु निर्मलाम्बुषु

सत्सु, अतितीव्रसूर्यतेजोभिः पद्मानामपि दलम्लानताऽरूपस्य जातस्य मल-स्यापगमात्। "सलिलं कमलं जलं," "सहस्रपत्रं कमल"मिति चामरः॥ ४८॥

कमलाकराणां सततावगाहसरसैहंसरसैकनिपुणशिरीषनिविरीषवि-च्योतन्मकरन्दधूर्वहैर्गन्धवहैर्गन्धसमन्धितपुष्पंधयैरभितः सेव्यमाने दिवसावसाने॥ ४९॥

ततश्च दिवसावसाने गन्धवहैः पवनैः सेव्यमाने सति। कथंभूतैः सद्भिः, कमलाकराणां सरसां सततावगाहेन सरसैरिति शेन्यमुक्तं, अत्र कमलाकराणां कमलाकराणामित्यन्वयभेदाच्च पौनरुक्त्यम्, अतः कथंचि-ल्लाटानुप्रास एव न तु यमकमैकार्थ्यादेव। हंसरसो हास्यरसः प्रफुल्ल-ता तदेकनिपुणानां शिरीषाणां निविरीषं निबिडं यथा स्यात् तथा च्यो-ततां मकरन्दानां धूर्वहैर्भारवाहिभिरिति सौगन्ध्यं, भारवहनश्रमादेव गतिशैघ्र्यासंभवान्मान्द्यमपि गम्यमेव। पुष्पंधया भ्रमराः॥ ४९॥

कलितकलमुरलीध्वनिरध्वनिरतदृष्टीर्गृष्टीर्गृहाभिमुखीः कारयिष्य-न् सवलोऽवलोक्य निदाघदिवसपरिणामरामणीयकतां सह सहचरैः सलीलसलिलावगाहदुरवगाहसुश्रीकः श्रीकमलनयनो नयनोत्सवी भ-विष्यन् व्रजभुवाम्॥ ५०॥

गृष्टीर्धेनूः, सलीलं यथा स्यात् तथा सलिलावगाहनेन हेतुना दुरवगाहा सम्यग्ग्रहणाशक्या शोभना श्रीः शोभा यस्य सः, व्रजभुवां व्र-जवासिनाम्॥ ५०॥

अनुकूलेनानुकूलेनामलजलाशयानां पवमानेन पवमानेन तदङ्गस-ङ्गतः पुरः पुरः सारितैर्गोखुररेणुभिररेणुभिरभिमृश्यमानांशुकान्तकान्त-कुन्तलचूर्णकुन्तलचूर्णधवलोष्णीषो वनतरुवीरुधामनिशनववयसां व-यसां तदवलोकमृगाणां मृगाणां च भवद्भिरहदुःखनदुःखनमितहृदां काकुकलकलकुलाकुलायमानमानसस्तदाश्वासनादेन नादेन मुरल्याः

सरसयन्नमूनमूढमनसो मनसोल्लसितेन यदि विपिनतो बहिराजगाम ॥ ५१ ॥

गवां खुररेणुभिरणुभिरल्पमात्रैरेव अभिमृश्यमानानि स्पृश्यमानानि अंशुकान्तादीनि यस्य सः। अंशुकान्तः वस्त्रान्तः, कान्तकुन्तला शोवासीन्नि दृश्यमाना उष्णीषच्युताः कमनीयकेशाः, चूर्णकुन्तला अलकाः,चूर्णवत् श्वेतमुष्णीषं शिरोवेष्टनं वस्त्रम्। यतः पवमानेन वायुना, पुरः पुरः अग्रेऽग्रे सारितैर्निःसारितैर्दूरीकृतैः, पृष्ठं प्रत्येव संपूर्णं नीतैरिति यावत्। पवमानेनापि कथंभूतेन, अनुकूलेनाभिमुखेन, निर्मलानां जलाशयानामनुकूलेन, अनुगतं कूलं येन तेन, शीतलेनेत्यर्थः, तस्य श्रीकृष्णस्य अङ्गसङ्गतो हेतोः पवमानेन देशान्तरमपि स्वस्य स्पर्शेन पवित्रीकुर्वतेत्यर्थः। यद्वा, पवः पवित्रीकरणं तत्र मानो यस्य तेन। अनिशनववयसां नित्यनवयौवनानां वयसां पक्षिणाम्। तस्य अवलोकं मृग्यन्ति अन्वेषयन्तीति तेषाम्, इगुपधत्वात् कप्रत्ययः। सर्वेषामपि कीदृशानां, भवतस्तदैव जायमानाद् विरहाद्धेतोर्यद् दुःखनं दुर्भिदं दुःखं तेन नमितहृदां शीर्णमनसां तेषां काक्वा शोकविकारेण कलकलः कोलाहलस्तस्य कुलेन समूहेन आकुलायमानं कृपाविह्वलं मानसं यस्य सः। ततः, तेषाम् आश्वासनं ददातीति तेन मुरल्या नादेन अमून् सरसयन् आनन्दयन्।

ननु तिरश्चां मूढयोनीनां तेषां तद्विरहसंयोगजन्यदुःखसुखविवेकः कथं संभवेत् तत्राह, अमूढमनसः, वृन्दावनीयत्वादिति भावः ॥ ५१ ॥

तदा विपिनपिनद्धनीलमणिमालामालाभ्रमरा भ्रमरावलिरानुकूल्यसमीरणेन समीरणेन धूयमानेव पुष्करे पुष्करेक्षणसौरभे रभसेनान्धेव कियद्दूरमनुवव्राज ॥ ५२ ॥

विपिनेन पिनद्धा मण्डलत्वेन धृता नीलमणीनां मालाभिः समूहैर्या माला तस्या भ्रमं सैवेयमिति बुद्धिं राति ददातीति सा। आनुकूल्यस्य अनुकूलतायाः समीरणेन सम्यक् प्रेरकेण समीरणेन वायुना धूयमानेव कम्प्यमानेव।

नन्वेवं चेत् कथमत्याग्रहेण तमनुबध्नाति तत्राह । पुष्करेषु(?)णस्य भो- क्ष्णस्य सौरभे· अङ्गगन्धे पुष्करे पुष्कले महति विषये रभसेन हर्षेण- मन्धा· इव ॥ ५२ ॥

अथ पुरः पुरः पद्वी दवीयसीति द्रुततरं ततरंहसा चलति भवनदिषयकुतूहलिनि हलिनि सहजप्रमदमद्मन्थरगामितयामितया पद्विहारलीलयाभिसरणमारभमाणो रभमाणो विविधसौभगभियमु- द्दारमाधुर्यो रमाधुर्यो मदकलकलभ इव व्रजराजकुमारः कुमारयन्नेव कियद्न्तरितोऽन्तरितोऽनुरागं प्रियसहचरैर्दृश्यमानाः पुरवलभीवल- भीक्ष्णानि:संकोचं विलोकयामास ॥ ५३ ॥

पुरोऽग्रे पुरः पदवी पुर्यामार्गः· दवीयसी दूरतरा· इति हेतोः· द्रुततरं यथा स्यात् तथा ततरंहसा विस्तृतवेगेन चलति, कुतः, भवनवि- षय इव कुतूहलयुक्ते हलिनि सति । विविधसौभगसंसर्गस्तं रभमाणो ल- भमानः, रलयोरैक्यात्, मदकलो मत्तः कलभः करिशावक इव माधुर्यैः संपत्तिभारवान् कुमारयन्नेव खेलयन्नेव कियदन्तरितः कियन्मात्रं व्यव- हितः सन्, अनुरागं प्रेमाणमन्तरितः· अन्तः करणे प्राप्तः, "इण् गतौ"· इत्यस्य निष्ठान्तस्य रूपं, पुराणां वलभीश्चन्द्रशालिकाः, "चन्द्रशाला च वलभी स्यातां प्रासादमूर्धनी" ति श्रीधरः, वलाविज्ञायज्ञाद् भियो ह्रासेन हेतुना निःसंकोचं यथा स्यात् तथा । एतदभिप्रेत्यैव तेन प्रथमत एव तत्सङ्कुता विच्युतमिति ॥ ५३ ॥

तासु समारूढानां समारूढानां प्रणयधुर्या मधुर्या मदिराक्षीणां वदनमण्डलैः पूर्णचन्द्रपरंपरापराचितेव समजनि गगनवीथी ॥ ५४ ॥

तासु वलभीषु प्रणयधुर्या प्रेमभारेणैव रूढाणां प्रसिद्धानां "रूढं जाते प्रसिद्धे चे"ति मेदिनी । पूर्णचन्द्राणां परंपराभिः पराचिता सर्वतो व्याप्ता ॥ ५४ ॥

नयनैरपि नीलराजीवराजीवहुलेव दिक्सरसी ॥ ५५ ॥

राजीवराजी कमलश्रेणी ॥ ५५ ॥

वपुष्कलाभिः पुष्कलाभिर्वितडित्वत् तडित्वदिव नभोमण्डलम् ॥ ५६ ॥

वपुषां कलाभिरंशैः,अवयवैरित्यर्थः, पुष्कलाभिः श्रेष्ठाभिः, विगतस्तडित्वान् मेघो यत्र तत्, निर्मेघमित्यर्थः, तथापि तडित्वद् विद्युद्युतम् ॥ ५६ ॥

मणिभूषणमरीचिवीचिवीथिभिरपि निरभ्राखण्डलाखण्डलालित्यधनूराजिराजितमिव व्योम ॥ ५७ ॥

निरभ्राणि निर्मेघाणि यानि आखण्डलस्य इन्द्रस्य अखण्डलालित्यानि पूर्णमाधुर्याणि धनूंषि तेषां राजिभिः श्रेणिभी राजितं दीप्तम् ॥ ५७ ॥

भूतरङ्गैरपि नभःस्मितकुसुमवीरुधारुधामलिनामाभया मलिनामाभयानामपि दिगबलानाम् ॥ ५८ ॥

नभसि निःसृतं तासां स्मितम् एव कुसुमवीरुधा "हलन्ताद् भागुरिमते टाप्" तां रुन्धन्तीति तथा तेषाममलिनाम् आभया कान्त्या दिगबलानां दिक्सुन्दरीणामपि मा शोभा मलिना समजनीति पूर्वेणैव संबन्धः । अलिनां कीदृशानाम्, अभयानां भ्रमणे निःसंकोचानाम् ॥ ५८ ॥

किं बहुना, लावण्यामृतरसवाहिन्यो वाहिन्योऽभवन् प्रणाल्यश्च ॥ ५९ ॥

वाहिन्यो नद्यः ॥ ५९ ॥

एवं समुत्कण्ठासमुत्कण्ठास्ता अपि सुकण्ठ्यः कण्ठमपि न कुर्वन्ति यं तमनुरागरसं गरसंनिभमिव हृदि वहन्त्यो दिवसमतिवाह्य वाह्यवृत्तिरहिताः स्थिताः ॥ ६० ॥

तदानीन्तनस्य तासां तादृशभावस्य औचित्यमेव वक्तुं तत्पूर्वेद्याःप्रवर्तिनीं दुःखदशां तासामाह । सम्यगुत्कण्ठयैव समुत् आयामात्रहेतुआनन्दजवाष्परोधात् सहर्षः कण्ठो यासां ताः । तं अविहृदमनुरागरसं

गरसंनिभं विषतुल्यं हृदि हृदयेऽपि वहन्त्यः । यं गरं कण्ठ्यं कण्ठाहमपि न कुर्वन्ति, सामान्यतो जना इत्यर्थः । केवलं रुद्र एव योगीश्वरः कण्ठ्यं करोतीति भावः ॥ ६० ॥

दिवसावसानमालोक्य कृष्णादिदृक्षयाऽवयाशापाशापादितजीवनबन्धा नवं धाम मेघमेचकं मेचकं च कंचनोष्णीषपार्श्वे दधानस्य तस्यैव दूराद्यदि ददृशुः ॥ ६१ ॥

तस्यैव कृष्णस्यैव नवं धाम स्वरूपं दूरादपि ददृशुः । कीदृशं, मेघादपि मेचकं श्यामलम् । तस्य कीदृशस्य, कंचन॰ अपूर्वं मेचकं चन्द्रकम्॰उष्णीषपार्श्वे दधानस्य, उष्णीषस्य वामतो वक्रिमा मस्तकोर्ध्वं एव पार्श्वे तिष्ठति तत्रैव चन्द्रकार्पणम् । यद्वा, उपरिभागोऽपि पार्श्वशब्देन क्वचिदुच्यत एव ॥ ६१ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमह्लाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य तृतीयः परिच्छेदः ॥

॥ जातिवाचकपदान्यधिकृत्य ॥

१३ ॥ तेषां बुद्ध्या परिकल्पितत्वेपि वस्तुसादृश्यमूलकत्वम् ॥ —वस्तूनि सृजन्ती प्रकृतिर्बहूनि तानि समानानि सृजतीत्यस्य विस्मरणमप्यकल्प्यं प्रतिषेधस्तु दूरतराम् । स्फुटतरं चैतद्विशेषतः प्राणिजातिषु जीवसमुद्भवेषु च । एवं सत्यपि जातिवाचकपदद्वारा तेषामेकजातीयकरणमवच्छेदकविज्ञानरचनाय तेषां स्वबोधकपदद्वारा स्वात्मनि संकलनाय च यासु यास्वाकृतिषु (जातिषु) या याः सन्त्यो व्यक्तयो ऽन्तर्भवितुमर्हा उपलभ्यन्ते तासां तासां प्रतिमूर्तित्वेन बुद्ध्या परिकल्पनमात्रमेव, येन ता व्यक्तयस्तत्तद्विशेषजातीया भवन्ति, तत्तन्नाम लभन्ते, तस्मिंस्तस्मिन् वर्गे

वा व्यवस्थाप्यन्ते । यतो यदा ऽयं मनुष्यो, ऽयमश्वो, ऽयं न्याय, इदं क्रोयमयं यान्त्रिको रत्नको, ऽयं वृक्ष इत्याद्यभिधीयते तदा केवलं तास्ता व्यक्तयो यादृशावच्छेदकविज्ञानानां बोधकतया पदान्यवधार्यन्ते तादृशावच्छेदकविज्ञानशक्तपदविशेषप्रतिपाद्यवस्तुगणे ऽन्तर्भाव्यन्ते नेतोऽन्यत्किमपि । किं च पदविशेषप्रतिपाद्यानां तत्तद्विशेषजातीनामसाधारणस्वरूपाण्यपि केवलं विद्यमानवस्तुविशेषाणां तद्बोधकपदानां च परस्परसंबन्धरूपाण्यात्मगतान्यवच्छेदकविज्ञानान्येव सन्ति । जातिपदानि यदा वस्तुविशेषैः सह संबध्यन्ते तदा तान्यवच्छेदकविज्ञानानि पदपदार्थयोः संयोजकानि मध्यस्थानि भवन्ति । तथाच विशेषजातीनां पूर्वोक्तान्यसाधारणस्वरूपाणि न कथमपि स्वात्मगतावच्छेदकविज्ञानानात्मकानि भवितुमर्हन्ति । अतश्च तानि वास्तविकानीव कल्पितानि द्रव्याणामसाधारणस्वरूपाणि यद्यवच्छेदकविज्ञानेभ्यो भिद्येरंस्तर्हि तानि वस्त्वन्तर्भावकापरजातीनामसाधारणस्वरूपाणि कथमपि न भवेयुः । भिन्नयोर्द्वयोरसाधारणस्वरूपयोरेकजातिस्वरूपैक्यमिव द्वयोर्विशेषजात्योरप्यैक्यं स्यात् । अश्वसादिनोरन्यतरस्य विभिन्नापरजातीयत्वादृते कोभेद इति चेदात्मगतावच्छेदकविज्ञानैर्वस्तुजातिविशेषाणां भेदनिश्चये ऽयमपि भेदः सुग्रहः, परं तु यदि कश्चन कल्पितैर्वस्तुवृत्तिधर्मैरेव तत्तज्जातीनां भेदस्य ज्ञानाय प्रयतेत तर्हि मन्ये वितथप्रयत्नो भवेत् । किं च यदा यः कोपि पदार्थो ऽश्वसादिनोरन्यतरविशेषजातीयो वस्तुतो न स्यात्तदा तद्भेदं स ज्ञातुं न शक्नुयात् ॥

१४ ॥ प्रत्येकमवच्छेदकविज्ञानमस्ति विभिन्नमसाधारणस्वरूपम् ॥ —यो हि मिश्रविज्ञानानि प्रायशस्तत्तन्मनुष्यात्मसु शुद्धविज्ञानानां भिन्नभिन्नसमुदायरूपाणि सन्ति, अतो य एकस्य लोभः स एव नास्त्यपरस्येति विचारयति, स नाम्नो विशेषजातीनां च परिच्छेदकान्यसाधारणस्वरूपाण्यवच्छेदकविज्ञानानि वा सन्ति बुद्धिपरिकल्पितानीति मदुक्ते ऽर्थे विस्मयं न कुर्यात् । प्रत्युत येषां द्रव्याणामवच्छेदकविज्ञानानि स्वतो वस्तुभ्य एवावधारितानि प्रतीयन्ते, तेष्वपि तानि न सन्ति सदैकरूपाणि । निर-

न्तरसुदृढपरिचितास्वपि विशेषजातिष्वेते न सन्ति तथेति यावत् । यदि मनुष्यपदबोध्यासाधारणं स्वरूपं मानुषीगर्भजातत्वरूपं नैसर्गिकमेवाभिप्रेयत पुनर्बुद्ध्या संगृहीतानां शुद्धवैज्ञानानामनेकविधानियतसमूहरूपं धर्मान्तरेभ्यो व्यवच्छिन्नस्य यस्य बोधाय नाम प्रयुज्यते, तद्दीयं व्यक्तिः पोषणीया उपनेतव्या नवेत्यस्य बाढं विवादपदस्त्वे ऽपि तस्यां व्यक्तौ मानुषीगर्भजत्वमात्रेण मनुष्यत्वं सुपदमर्भाविष्यदिति भूय आशङ्का उदियात् । इत्थं च परमार्थतो भिन्नं भिन्नमवच्छेदकविज्ञानं हि भिन्नं भिन्नमसाधारणस्वरूपम् । अत एव वृत्तमसाधारणस्वरूपभेदेनैवाऽवद्याकारकत्तुलाद्भिद्यते, यथा हि छागादश्वः । एवं पृथिव्या उदकमिव हिमादृष्टिरपि भिन्नस्वरूपवत्त्वयैव भिद्यते येनैकस्यासाधारणस्वरूप.भिन्नमवच्छेदकविज्ञानमन्येन सह संबद्धं भवितुं नाऽर्हति । इत्थं च येन केनाप्यंशेन भिद्यमानं किमप्यवच्छेदकविज्ञानद्वयं भिन्ननामभ्यां बोधितं सत् पृथग् जातिद्वयं रचति । अयं भावः । असाधारणस्वरूपभेदादेव तद्विशेषजातिद्वयं परस्परमत्यन्तं भिन्नं भवतीति ॥

१५ ॥ तच्च स्वरूपं द्वेधा शाब्दमार्थं चेति ॥ –परं तु वस्तूनां स्वरूपाणि न कथमपि ज्ञातुं शक्यन्ते इति सतर्कं केषां चित्कथनमनुष्यासाधारणस्वरूपशब्दो नानार्थ इति तु न भ्रमितव्यम् । यस्य सद्भावादेव तत्तद्वस्तु स्वस्वस्वभावकमस्ति तादृशं स्वरूपं प्रथमं तावद्वस्तूनां सत्त्वावगमाय परिग्राह्यम् । तथा च तत्स्वरूपं सर्वत्र वास्तविकं, परं तु द्रव्येषु प्रायो वस्तूनामज्ञातरचनाविशेष एव तदसाधारणस्वरूपमिति कथ्यते, यदाश्रित्य तदाविष्कारका गुणा वर्तन्ते । एतावदेवैतच्छब्दस्यावयवार्थतः सिद्ध्यति ॥

१६ ॥ शब्दशाब्दस्वरूपयोः संबन्धो ऽस्ति नित्यः ॥ –शब्दशाब्दस्वरूपयोः संबधो ऽस्ति तथा दृढो येन जातिपदं स्वबोध्यावच्छेदकविज्ञानात्मकशाब्दस्वरूपवद्वस्तुभिन्ने न कुत्रापि प्रयोक्तुं शक्यते ।

१७ ॥ विशेषजातय आर्थस्वरूपेण भिद्यन्त इति कल्पना न कमप्यर्थं साधयति ॥ –भौतिकद्रव्याणामार्थं स्वरूपमधिकृत्य मन्ये मतद्वय-

मस्ति । तत्र स्वेनाज्ञाते वस्तुनि स्वरूपपदं प्रयुज्य तादृशानि कानि चि-
त्स्वरूपाणि कल्पयन्ति, यदनुसारेणैव सर्वाणि प्राकृतानि वस्तून्युत्पद्यन्ते
तत्स्वरूपाविनाभावाच्च तत्तज्जातीयानि भवन्तीत्येके । अपरे च सुपरि-
ष्कृतबुद्धयः सर्वेषां प्राकृतवस्तूनामज्ञाततत्तदवयवानामज्ञातः संस्थि-
तिविशेष एवार्थस्वरूपं तस्माच्च तत्तत्सामान्यपदोपस्थाप्यतत्तदपरजात्य-
नुसारेण परस्परभेदका दृश्या गुणा उद्भवन्तीति मन्यते । अनयोराद्ये मते
प्राकृतवस्तूनां ज्ञानमतीव विसंकुलं स्यादिति तर्कयामि । सर्वेषु प्राणि-
वर्गविशेषेषु विरूपसत्त्वानां समुद्भवस्य, मनुष्येष्वपि भूतादिपरिवर्तिताकृ-
तीनां बालानां विचित्राकृतिमतां सत्त्वविशेषाणां चोद्भवस्योपलम्भेनैत-
त्कल्पनाविरोधिबहुतरदूषणगणसत्त्वादस्य मतस्यान्यूनानतिप्रसक्ताभिन्न-
स्वरूपवत्त्वेपि विभिन्नधर्मवत्त्वमिव कयोश्चिद्द्वयोः क्षेत्रयोरेकवर्तुलस्वरूपव-
त्त्वे ऽपि भिन्नभिन्नधर्मवत्त्वमिव चाऽसंभाव्यत्वात् । एतद्विरुद्धकल्पनायां
कारणान्तराभावे ऽप्यज्ञेयस्वरूपाणां प्रकल्पनं तेषामपरजातीनां परस्पर-
भेदेन ज्ञापनाय न कथमप्युपयुज्यते । परस्परभेदेनापरजातीनां ज्ञापनाय
तान्येव स्वरूपाणि समर्थानि भवेयुर्यानि स्वयं ज्ञातुं शक्यन्ते । गाढं वि-
चार्यमाणेषु तेषु मदुक्तरीत्या तत्तत्साधारणपदाभिधेयावच्छेदकविज्ञानेभ्यो
ऽभिन्नान्येव तान्युपलप्स्यन्ते ॥

१८ ॥ शाब्दमार्थं च स्वरूपं शुद्धविज्ञानेष्वेकरूपं द्रव्येषु तु भिन्नं
भिन्नमेवास्ति ॥ —शाब्दमार्थमिति, द्विधा विभक्तं स्वरूपं निरूप्येदमिदानीं
विचार्यते, यत्साधारणविज्ञानजातिषु तान्यभिन्नानि द्रव्येषु परं पृथक्
पृथक् सन्ति । यथा रेखात्रयान्तरालीयदेशव्यापकत्वे त्र्यस्रमित्येकमेव शा-
ब्दार्थोभयविधं त्रिकोणस्य स्वरूपम् । इदं न केवलं त्रिकोणपदोपस्थाप्याव-
च्छेदकविज्ञानरूपमपितु वस्तुसद्भावरूपो ऽसाधारणधर्मो ऽपि यस्मात्तत्रै
गुणा उद्भवन्ति, येन च ते सर्वे ऽपृथग्भूताः सन्ति तदिति पर्यवसितो
ऽर्थः । परं तु मदङ्गुलीयकोपादानद्रव्यगणेषु यत्र द्वे स्वरूपे स्फुटं पृथक्
प्रतीयेते तयोरेतद्विरूपणमत्यन्तं विपरीतमेव प्रतीयते । यतः स्वस्मिन्नु-
पलभ्यमाना रूपगुरुत्वद्रवत्वादयो गुणा यदधीनाः सन्ति तादृशस्वघटक-

चेतनावयवानां वास्तविकसंस्थितिविशेषरूपमेवेदमस्ति, यं चावयवसंस्थितिविशेषं वयं न जानीम इति तद्विज्ञानविशेषस्यानुपलब्धेस्तल्लिङ्गभूतं नामापि नास्ति । परं त्वेवमपि रूपगुरुत्वद्रवत्वस्थिरत्वादयो गुणा एव सुवर्णमर्यादिमे (स्वाधिकरणस्य) कस्य चिद्वस्तुनः सुवर्णपदवाच्यतायाः प्रयोजका इति तस्य शाब्दानि स्वरूपाणि भवन्ति । यत्र सुवर्णपदोपस्थाप्यमिथ्यावच्छेदकविज्ञानेन सहैषां धर्माणां नियतं साहचर्यं ततोऽन्यस्य सुवर्णपदबोध्यताया वक्तुमशक्यत्वात् । परं तु विशेषतो द्रव्यस्वरूपाणामिमं भेदं तेषां नामविचारावसरेऽवसरान्तरे च विस्तरेण निरूपयिष्यामः ॥

१९ ॥ स्वरूपाण्यसाधारणान्यपरिणमनीयानि च सन्ति ॥ —उक्तदिशा स्वबोधकपदसंबद्धानीदृशान्यवच्छेदकविज्ञानानि सन्ति स्वरूपाणीति कथनं स्वरूपाण्यधिकृत्य पूर्वोक्तनिरूपणात्किंचिदधिकं प्रतीयते । तानि सन्त्यसाधारणान्यपरिणमनीयानि चेति फलितम् । अतस्तैर्नित्यसहचरितानां वस्तूनां यथार्थसंस्थितिरूपाणि वस्तुतो न भवितुमर्हन्ति । सर्वेषां विद्यमानवस्तूनां तज्जनकानां च परिणामशीलत्वात् । विशेषतश्च तत्तन्नामसंबद्धानां सुपरिचितानां तथात्वात् । तथाहि । यदद्य हरितहृणं तच्छ्रोभूते ऽहन्यजामांसं भविता । कतिपयदिनोत्तरं च तदेव मनुष्यावयवत्वेन परिणंस्यति । एवंविधेषु सर्वेषु परिणामेषु तेषां वास्तविकानि स्वरूपाणि यान्याश्रित्य च ते ते नानाविधा गुणा वर्तन्ते तैः सह स्वत एव विनश्यति परंतु आत्मनि व्यवस्थापितानां विज्ञानस्वरूपाणां तदर्थे प्रयुज्यमानपदपरिगृहीतत्वात् तत्तत्पदार्थानां विनश्वरत्वेऽपि तानि स्थिराण्येव परिकल्प्यन्ते । रावणजटायुप्रभृतीनां संप्रत्यवस्थाविपर्यये सत्यपि तत्तद्विज्ञानानां पुरेवाद्यापि वर्तमानत्वात् । एवं तत्तज्जातीयानां कतिपयव्यक्तीनामखिलानां वा परिवर्तनेऽपि तत्तज्जातिस्वरूपाणामविनष्टानामविकलानामेव सत्त्वात् । इत्थं च विशेषजातिस्वरूपाणि तज्जातीयपत्किंचिद्व्यक्त्यभाव इव सर्वासां व्यक्तीनामसत्त्वेऽपि निर्बाधमवतिष्ठन्त्येव । संप्रति जगति वर्तुलसामान्यस्यासत्तायामपि वर्तु-

लपदवाच्यं विज्ञानं किंरूपमस्ती नाशङ्क्यते। नापि परिदृश्यमानो वर्तुलव्यक्तिविशेषो वर्तुलपदाभिलापमर्हति न वेति, का च व्यक्तिस्तादृशस्वरूपवत्तया वर्तुलजातीया भवतीति निर्णयाय तादृशं विज्ञानं प्रतिमूर्तिर्न भवतीति शक्यते वक्तुम्। मा भूवृसिंहाकारकः देवविशेषो मा च भूद्राघवइव स्थविष्ठो मत्स्यविशेषस्तथापि तत्तदाकारकमिथ्यावच्छेदकविज्ञानबोधाय तत्तन्नामविशेषस्य परिकल्पनेन नृसिंहादीनां स्वरूपाणि तथैव सुबोध्यानि सन्ति यथा मनुष्यादीनाम्। नृसिंहादिविज्ञानं चाश्वादिविज्ञानमिव स्थिरं नियतमविनाशि चास्ति। तस्मात्स्वरूपाणामविनाशित्वसिद्धान्तस्तेषामवच्छेदकविज्ञानरूपतां साधयतीति सिद्धम्। किं च तत्स्वरूपं विज्ञानतल्लिङ्गभूतशब्दविशेषयोर्नियतसंबन्धाधीनं सत् तावदेव चिरं स्थिरं यथार्थं च स्थास्यति यावत्तत्पदं तदर्थबोधनसमर्थं स्यात्॥

२० ॥ उपसंहारः ॥ —तदयं निर्गलितोऽर्थः। परापजातीनां तत्स्वरूपाणां चैतादेव कार्यं यद् मनुष्याः स्वस्वज्ञानस्य शीघ्रं सौकर्येण च परिष्कारार्थ परान् प्रति संप्रदानाय चावच्छेदकविज्ञानानि विरच्य स्वस्वात्मसु तानि स्थिरीकृत्य च वस्तूनि विचारयितुं येष्वां संगृहीतानीवानायासेन कथयितुं च समर्था भवन्ति। यदि पदानि विमर्शाश्चैकैकव्यक्तिमात्रपरायणभविष्यंस्तर्हि ज्ञानपरिष्कारादिकार्यं मन्दमेव विततमभविष्यत्॥

॥ इति तृतीयः परिच्छेदः॥

श्रीविश्वेश्वरो जयति।

अथ माघशुक्लप्रतिपदि संवृत्तायाः संस्कृतसमाजनाम्न्याः सभायाः प्रथमोपस्तरणस्य वर्णनम्।

तत्र तावत् प्रथमं संपादको रामकृष्णशास्त्र्युपोद्घातसभाया वृत्तान्तसारं संक्षेपतो लिखितं सर्वेभ्यः सभ्यवरेभ्यो वाचयित्वा निवेदयति स्म॥

तदनन्तरं तु बठराजशास्त्री श्रीहर्षकालिदासकवितयोः कतरा ऽधिकगुणशालिनीत्यत्र विषये स्वनिर्मितं संदर्भमेकं वाचयति स्म । तद्यथा प्रथमं तावद्बहवो गाढतरमनोयोगेनापि कष्टतरामिवा ऽनायासेन स्वीयार्थसंप्रदानविमुखीं सकलभुवनभारतीभूषणायमानां श्रीहर्षकवितां काव्यगुणदोषविचारचातुरीपटीयसा काव्यप्रकाशकारेण काव्येषु हेयतया प्रदर्शितेन काठिन्यदोषेण दूषयन्ति । स्तुवन्ति च श्रीकालिदासकवितामुदारामिवा ऽनायासेन स्वीयार्थवितरणशालिनीं द्राक्षामधुरां प्रसादादिगुणैः । तच्च प्रतिवदामि । नायं काठिन्यदोष आख्यायां सर्वत्रानुस्यूतो नाप्यपरस्यां प्रसादादिगुणाः प्रतिपक्षं येनैका निन्दनीया ऽपरा वन्दनीया वा भवेत् । हृदय सदा यःद्वत इत्यादिनलोदयकाव्ये ऽपरस्याः काठिन्यदोषस्य प्रतिपक्षमुपलम्भात् । तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः । अयि साधय साधयेप्सितं स्मरणीयाः समये वयं वयः ॥ तथा । पश्यावृतौ ऽप्येष निमेषमद्रेरधित्यकाभूमितिरस्कारिण्या । प्रवर्षति प्रेयसि चन्द्रिकाभिश्चकोरचञ्चूचुलुकान्मतीन्दुः ॥ तथा । ध्वान्ते द्रुमान्तानभिसारिकास्त्वं शङ्कस्व सङ्केतनिकेतमाप्ताः । छायाच्छलादुज्झितनीलचेला ज्योत्स्नानुकूलैश्चलिता दुकूलैः ॥ एवमादिषु भूयिष्ठेषु पद्येषु श्रीहर्षकवितायाः प्रसादमाधुर्यादिगुणानां सुस्पष्टमुपलम्भाच्चेति ॥

ततो गङ्गाधरशास्त्री तत्र प्रथमवादमकरोत् । तद्यथा । स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः । वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ॥ अत्र तपस्यन्त्या देव्या देहोपरि निपतितानां प्रथमवृष्टिबिन्दूनां क्रियास्वभाववर्णने देव्याः समाध्युचितावस्थाभिव्यक्तिद्वारा चिरनिदाघतप्तदेहोपरिपतनेन सुखपारवश्यसंभ्रमहेतौ प्रथमवृष्टावप्यविह्वलता समाध्यवस्था व्यज्यते । तथाहि । नासाग्रन्यस्तनयनः संवृतास्यः सुनिश्चलः ॥ ध्यायेच्च मनसा देवमुरो विष्टभ्य वाग्यत इति समाधिमतोऽवस्थानमाहुः ॥ तत्र पक्ष्मसु स्थिता इत्यनेन नासाग्रन्यस्तनयनतारूपमर्धनिमीलनं व्यज्यते ॥ सर्वथोन्मीलने पक्ष्मणामू-

Digitized by Google

र्ध्वाग्रत्वेन सर्वथा मीलने तेषामधोऽग्रत्वेन च तेषु जलबिन्दूनां स्थित्य-संभवात् । पक्ष्मभ्यश्च्युतानां तेषामास्ये ऽप्रवेशेना ऽधरोष्ठे निपतनकथनेन संवृतास्यत्वं व्यज्यते ॥ ततश्च्युतानां स्तनोत्सेधनिपतनादिवर्णनेनोरोवि-ष्टम्भः । अलसवद्घनतावस्थाने हि स्तनयोरन्तःसंकुचिताकारतया तदु-त्सेधयोस्तेषां पतनं न स्यात् । कथं चित्तयोः पतित्वा वलित्रयं प्राप्ता-नामपि वलिषु तिर्यगेव गमनं स्यान्न नाभिदेशप्राप्तिः । नाभौ च संवृ-तायां प्रवेशो न स्यात् ॥ पक्ष्माधरादिपतनक्रमवर्णनेन निश्चलत्वं व्यज्य-ते ॥ मुखादिचलने सति पक्ष्मपतितानां तेषामधरपयोधरादिक्रमेण पत-नासम्भवात् । किंचैभिरेव विशेषणैर्देव्या लोकोत्तरं सौन्दर्यमपि व्यज्यते ॥ स्थिता इत्यनेन पक्ष्मणामविरलतायाः क्षणमित्यनेन तेषां मसृणतायाः पक्ष्मपतनशिथिलवेगैरुदबिन्दुभिस्ताडनोक्त्या ऽधरस्यातिसुकुमारतायाः पक्ष्माधरपतनातिशिथिलवेगानां तेषां स्तनोत्सेधे चूर्णतावर्णनेन तयोरति-काठिन्यस्योरोविष्टम्भे ऽपि वलीषु तेषां स्खलनोक्त्या वलीनां विस्पष्टता-याः सर्वबिन्दूनां नाभावेव प्रवेशकथनेन शरीरस्य मसृणताया नाभेरति-गह्वरतायाश्च वर्णनात् । एवंविधस्वभावानुगुणविविधार्थवर्णनपरं लोको-त्तरमेतत्काव्यमनुभवन्तो वयमीदृशं चेत्पश्येम श्रीहर्षकाव्यं ततो विचार-येम तत्कवितयोस्तारतम्यमिति ॥

ततो रामकृष्णशास्त्री सर्ग ११ “ देवः पतिर्विदुषि नैषधराजग-त्या” इत्यादीनि किल बहूनि पद्यानि सकलकाव्यप्रद्योतनायमानानि निरुपमानान्यनुभूय न भवान् खद्योतमिवैतदेकमेव पद्यं प्रस्तोतुमर्हतीति ॥ यदनेनैकेन पद्यवर्णेन पञ्चापि नलरूपधारिणः स्फुटतरं वर्ण्यन्ते ॥ प्रायः श्रीहर्षकवितायां भवदभिनन्दितकाव्यादतीव सुमनोहराणि बहून्यनेका-र्थकानि सन्ति पद्यानि । तदेतत्सर्वमननुसंधायैतत्सदृशमेकमेव पद्यं सकलकालीदासकवितासारं संमार्य वाक्तरनैषधीयकवितां नाधिक्षेप्तुं प्रभवतीत्यवादीत् ॥ ततः श्रीमान् सभाप्रोत्साहकमहाशयो गङ्गाधरशास्त्र्यु-दितमेव पद्यं सकलकवितासारं संमन्यमानस्तमेवान्वमोदत । किं च काव्यं

मामभिव्यक्तरसादिभिर्युतमेवानन्दं जनयति । रसश्च कान्तकामिन्यादिभिरालम्बनविभावैरुद्यानादिभिरुद्दीपनविभावैश्चोत्पादितः, कटाक्षाद्यनुभावैश्च गमित, उन्मादादिभिर्व्यभिचारिभावैश्च पोषितः, शृङ्गारादिनामधेयो रत्यादिस्थायिभावात्मा । नैषधीयकविताश्चानेकार्थका विविधकल्पनाभियुता अपि असंभवदुक्तिकातिशयोक्तिबाहुल्येन नानन्दयितुमलं भवन्ति । किं च मन्ये ऽहं काव्यं नाम तदेवोत्तमं यच्छ्रुतमात्रेणार्थं प्रकाशयत्सुखमुत्पादयेत् । श्रीहर्षश्च महापण्डितः परं तदीयकाव्यमतिक्लिष्टतया नीरसमिव न सहृदयेष्वानन्दाङ्कुरमासादयति । कालिदासीयं तु सालंकाररसपुष्टं सरलं काव्यमवश्यं सहृदयहृदयेषु आह्लादं जनयेदिति तमेवं श्लोकं पुनः पुनः संश्लोक्य कालिदासीयकवितां सर्वोत्तमां सममन्यत । ततो गोविन्दशास्त्री नैषधचरिते षोडशतमे सर्गे प्राधान्येन रतिवर्णनेनातीव रसादिसंभरितं सकलकाव्यगुणसंयुतं सकलतत्त्वरसपरिशीलनशालिनां हृदि आह्लादमुत्पादयत्येव नैषधचरितम् । अभिनन्दयन्ति च महापण्डिता एतस्य महाकवेः कविताचातुरीं पाण्डित्यसौष्ठवं चेति, मन्येऽहं सर्वथा श्रीहर्षकवितैव कालिदासादिसकलकविकाव्यचूडामणिरिति वदति स्म ॥

ढुण्ढिराजशास्त्र्यपि पुनर्न केवलं काव्यं श्रुतं सदेव यदानन्दजनकं तदुत्तममिति मह्यं रोचते । किं तु तदीयार्थावगमे सत्यानन्दजनकं यत्तदेवोत्तमं काव्यम् । किं च पार्वत्यास्तपोवर्णनप्रस्तावे सौन्दर्यसौकुमार्यादिशृङ्गारालम्बनविभाववर्णनमपि तत्र दोषमेवावहतीत्यवादीत् । केशवशास्त्र्यपि 'तं पातयां प्रथममास पपात पश्चात्' इत्यादिव्याकरणाशुद्धिरपि कालिदासकवितायां दृश्यते श्रीहर्षीयं तु सकलदोषलेशशून्यं सर्वतः श्रेष्ठतमं मन्ये इति प्रत्यवादीत् । बालकृष्णाचार्यस्तु हिन्दीभाषया निवेदितवान् । तस्यायमर्थः । एतद्देशीयानां संस्कृतभाषाव्यवहारो ऽतीव चिरंतनो व्याकरणनिर्माणादपि प्राक्प्रवर्तमानः सांप्रतमेव परं मृतकल्पो ऽभूत् । कवयस्तु काव्यं कुर्वाणा व्याकरणाशुद्धानपि चिरंतनव्यवहारवि-

चयतया ऽर्थपोषकान् तांस्तानेव शब्दान् प्रयुञ्जते इति व्याकरणाशुद्धिर्न काव्ये ऽर्थपोषकतायां दोषमावहतीत्यवादीत् ॥ अथ च पुनः सभाप्रोत्सा-हकमहाशयो न संस्कृतभाषा मृता सांप्रतमस्माकमेतद्देशीयानां सर्वे व्यव-हाराः शास्त्रीयाः पठनपाठनग्रन्थनिर्माणप्रमुखा, अद्यापि संस्कृतभाषयैव भवन्ति कथं पुनर्मृतेति । सततमस्माकं देशभाषाः पुष्णन्त्येषा संस्कृत-भाषाद्यापि जीवत्येव । यत्पुनर्गोविन्दशास्त्रिणोक्तं तत्प्रत्युच्यते । अस्तु नाम षोडशतमः सर्गो नैषधचरितस्य रतिवर्णनेन रससंवलितः, अस्ति च महापण्डितः खण्डनखण्डखाद्यप्रमुखसकलपण्डितवराभिनन्द्यमानग्रन्थसं-दर्भावलोकनश्रवणैरविवादितपाण्डित्यः श्रीमान् श्रीहर्षकविः, परं कालि-दासकविताद्राक्षामाधुरी नैषधीयकवितायां न कुत्राप्यनुभूयते सहृदयैः ॥ वर्णयन्तु वा तत्पक्षपातिनस्तदीयकवितामाधुरीं मात्सर्यहीनानां रसज्ञानां परं सैव कालिदासकविता आनन्दं जनयेदिति मन्ये । यत्पुनर्ढुण्ढिराज-शास्त्रिणोक्तं तदपि प्रत्युच्यते । न तपोवर्णनप्रस्तावे पार्वत्याः शृङ्गारा-तिशयो वर्णितः किन्तु श्रीहर्षकाव्याधिकं व्यञ्जनया ऽर्थमभिदधाति कालिदासकाव्यमित्येव ॥ न हि शृङ्गारशान्तयोरेकाश्रयतया वर्णनं का-लिदासेन कृतं येन भवद्भिर्दोष उत्प्रेक्षितो भवेत् ॥ किंच निखिलस्यापि तपो-वर्णनपरायणस्यास्य सर्गस्य विप्रलम्भशृङ्गारप्रधानतया पार्वत्याः सौकुमार्य-सौन्दर्यातिशयवर्णनमप्यविरुद्धमेव । श्रीहर्षकवितायामर्थबाहुल्ये ऽपि व्य-ञ्जनया तादृशी न कुत्राप्यर्थप्रतीतिः । व्याकरणाशुद्धिरपि पर्यालोचने श्रीहर्षकवितायामपि स्यादेव मास्तु वा परं व्याकरणाशुद्धमपि किंचित् पद्यं रसादियुतं यदि तदा चमत्कृतिजननरूपं काव्यगुणं संपादयेदेवेति वादं समापयत् । ततश्चोत्तरसभायां श्रीकेशवशास्त्री नैयायिकाभिमतेश्व-रसर्वज्ञताविषये संदर्भलेखं पठिष्यति श्रीराममिश्रशास्त्री च तत्र प्रथम-वादं करिष्यति ततः सभ्येषु विचारो भवेदित्यागामिसभाविचारविषये नि-योगो ऽभूत् । अनन्तरं सर्वे सभासदस्तत्पक्षीयतिथ्यादिनिर्णयं कृत्वा सभा-जनितसुखं सततमनुभवन्तः सभां विससृजुः ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER VII.

The Śaiva Darśana.

[The seventh system in Mádhava's *Sarva-darśana-sangraha* is the *Śaiva-darśana.* This school is very prevalent in the south of India, especially in the Tamil country. Several valuable contributions have been lately made to our knowledge of its tenets, in the publications of the Rev. H. R. Hoisington and the Rev. T. Foulkes. The former especially by his excellent articles in the American Oriental Society's Journal has performed a great service to the students of Hindu philosophy. He has there translated, the *Tattuva kaṭṭalei,* or law of the Tattwas, the *Śiva-gudnapotham,* or instruction in the knowledge of God, and the *Śiva-pirakdśam* or light of Śiva, and the three works shed immense light on the outline as given by Mádhava. One great use of the latter is to enable us to recognise the original Sanskrit names in their Tamil disguise, no easy matter occasionally, as *aṛul* for *anugraha* and *tiḍchei* for *díkshá* may testify.

The Śaivas have considerable resemblance to the Theistic Sánkhya, they hold that God, souls, and matter are from eternity distinct entities, and the object of philosophy is to disunite the soul from matter and gradually to unite it to God. Śiva is the chief deity of the system, and the relation between the three is quaintly expressed by the allegory of a beast, its fetters, and its owner. Paśupati is a well known name of Śiva, as the master or creator of all things.

॥ सर्वदर्शनसङ्ग्रहः ॥

तमिमं परमेश्वरः कर्म्मादिनिरपेक्षः कारणमिति पक्षं वैषम्यनैर्घृ-ण्यदोषदूषितत्वात् प्रतिक्षिपन्तः केचन माहेश्वराः शैवागमसिद्धान्ततत्त्वं यथावदीक्षमाणाः कर्म्मादिसापेक्षः परमेश्वरः कारणमिति पक्षं कक्षीकुर्व्वाणाः पक्षान्तरमुपक्षिपन्ति पतिपशुपाशभेदात् त्रयः पदार्था इति । तदुक्तं तन्त्रतत्त्वज्ञैः,

There seem to be three different sets of so-called Śaiva sútras. One is in five books, called by Colebrooke the Páśupata-śástra, which is probably the work quoted by Mádhava in his account of the Nakulíśa Páśupatas; another is in three books, with a commentary by Kshemarája, with its first sútra *chaitanyam átmá.* The third, was commented on by Abhinava-gupta and opens with the śloka given in the Sarva-darśana-sangraha p. 91. ll. 1—4 The MS. which I consulted in Calcutta, read the first line :

Kathañchid āsādya Maheśwarasya dāsyam.

None of these works, however, appears to be the authority of the present sect. They seem chiefly to have relied on the twenty-eight Ágamas, and some of the Puráṇas. A list of the Ágamas is given in MrFoulkes' 'Catechism of the Śaiva religion;' and of the these Kiraṇa is quoted in the following treatise].

THE ŚAIVA DARŚANA.

Certain, however, of the Máheśwara sect, receiving the system of truth authoritatively laid down in the Śaiva Ágama* reject the foregoing opinion, that the "Supreme Being is a cause as independent of our actions, &c., on the ground of its being liable to the imputation of partiality and cruelty. They on the contrary hold the opinion that the Supreme Being is a cause in dependence on our actions, &c.;" and they maintain that there are three cate-

* Colebrooke speak of the *Pasupati-sástra (Maheswara-siddhánta* or *sivágama),* as the text-book of the Pāsupata sect.—The Ágamas are said to be twenty-eight (see their names in the Rev. T. Foulke's 'catechism of the Śaiva Religion')

त्रिपदार्थं चतुष्पादं महातन्त्रं जगद्गुरुः ।
सूत्रेणैकेन संक्षिप्य प्राह विस्तरतः पुनरिति ॥

अस्यार्थः उक्तास्त्रयः पदार्था यस्मिन् सन्ति तत्त्रिपदार्थं विद्याक्रियायोगचर्य्याख्याश्चत्वारः पादा यस्मिन् तच्चतुष्चरणंमहातन्त्रमिति । तत्र पशूनामस्वतन्त्रत्वात् पाशानामचैतन्यात् तद्विलक्षणस्य पत्युः प्रथममुद्देशः । चेतनत्वसाधर्म्यात् पशूनां तदानन्तर्य्यम् । अवशिष्टानां पाशानामन्ते विनिवेश इति क्रमनियमः दीक्षायाः परमपुरुषार्थहेतुत्वात्तस्याश्च

gories distinguished as the Lord the soul and the world (or literally 'the master,' 'the cattle' and 'the fetter'.) As has been said by those well versed in the Tantra doctrines:

"The Guru of the world, having first condensed in one sútra the great tantra, possessed of three categories and four feet, has again declared the same at full length."

The meaning of this is as follows,—its three categories are the three aforementioned; its four feet are learning, ceremonial action, meditation, and morality, hence it is called the great Tantra possessed of three categories and four feet.' Now the 'souls' are not independent, and the 'fetters' are unintelligent, hence the Lord as being different from these, is first declared;—next follows the account of the souls as they agree with him in possessing intelligence;—lastly follow the 'fetters' or matter, such is the order of the arrangement.* Since the ceremony of initiation is the mean to the highest human end and this cannot be accomplished without knowledge which establishes the undoubted greatness of the hymns, the Lords of the hymns, &c., and is a means for the ascertainment of the real nature of the 'cattle,' the 'fetter' and the 'master,' we place as first the 'foot' of *knowledge (jnána)* which

* "There must be three eternal entities, Deity, soul, matter," "as the water is co-eternal with the sea and the salt with the water, so soul is co-eternal with the Deity, and *páśá* is eternally coexistent with soul." J. A. O. Soc. iv. pp. 67, 85. In p. 58 we find the *adwaita* of the Vedánta attacked. In p. 62 it is said that the soul is eternally entangled in matter, and God carries on his five operations (see *infra* to remove it by bringing out all that is required for previous desert.

पशुपाशेश्वरस्वरूपनिर्णयोपायभूतेन मन्त्रमन्त्रेश्वरादिमाहात्म्यनिश्चायकेन ज्ञानेन विना निष्पादयितुमशक्यत्वात् तदेव बोधकस्य विद्यापादस्य प्राथम्यम्। अनेकविधसाङ्गदीक्षाविधिप्रदर्शकस्य क्रियापादस्य तदानन्तर्य्यम्। योगेन विना नाभिमतप्राप्तिरिति साङ्गयोगज्ञापकस्य योगपादस्य तदुत्तरत्वम्। विहिताचरणनिषिद्धवर्जनरूपां चर्य्यां विना योगोऽपि न निर्वहतीति तत्प्रतिपादकस्य चर्य्यापादस्य चरमत्वमिति विवेकः। तत्र पतिपदार्थः शिवो ऽभिमतः। मुक्तात्मनां विद्येश्वरादीनाञ्च यद्यपि शिवत्वमस्ति

makes known all this unto us.* Next follows the 'foot' of *ceremonial action (kriyá)* which declares the various rules of initiation with the divers component parts thereof. Without meditation the end cannot be attained, hence the 'food' of *meditation (yoga)* follows next, which declares the various kinds (of *yoga)* with their several parts. And as meditation is worthless without practice as fulfilling what is enjoined and abstaining from what is forbidden, lastly follows the fourth 'foot' of practical duty *(charyá)* which includes all this.

Now Śiva is held to be the Lord (or master.) Although participation in the divine nature of Śiva belongs to liberated souls and to such beings as Vidyeśwara, &c., yet these are not independent since they depend on the Supreme Being; and the nature of an effect is recognised to belong to the worlds, &c., which resemble him from the very fact of the orderly arrangement of their parts. And from their thus being effects we infer that they must have been caused by an intelligent being. By the strength of this inference is the universal acknowledgment of a Supreme Being confirmed.

"But may we not object that it is not proved that the body, is thus an effect? for certainly none has ever at any time or place seen a body being made by any one." We grant it: yet it is not

* Those four feet are the four stage of religious life (see J. A. O. S. iv. pp. 135,—(180.) called in Tamil *sarithei, kirikei, yokam,* and *gnanam.* The first is the stage of practical piety and performance of the prescribed duties and rites, the second is that of the 'confirmatory sacrament' and the five purifications involved in true *pújá*; the third is that of the eight observances of the yogin; the fourth is that of knowledge which prepares the soul for intimate union with God.

तथापि परमेश्वरपारतन्त्र्यात् स्वातन्त्र्यं नास्ति । ततश्च तदनुकरणभुवनादीनां भावानां सन्निवेशविशिष्टत्वेन कार्य्यत्वमवगम्यते । तेन च कार्य्यत्वेनैषां बुद्धिमत्पूर्व्वकत्वमनुमीयत इत्यनुमानवशात् परमेश्वरप्रसिद्धिरुपपद्यते ॥

ननु देहस्यैव तावत्कार्य्यत्वमसिद्धं न हि क्व चित् केन चित् कदाचित् देहः क्रियमाणो दृष्टचरः । सत्यं तथापि न केन चित् क्रियमाणत्वं देहस्य दृष्टमिति कर्तृदर्शनापह्नवो न युज्यते तस्यानुमेयत्वेनाप्युपपत्तेः ।

proper to deny that a body is an effect on the grouud that its being made has not been seen by any one, since this can be established from inference [if not from actual perception.] Bodies, &c., must be effects, because they possess an orderly arrangement of parts, or because they are destructible, as jars, &c., and from their being effect it is easy to infer that they must have been caused by an intelligent being. Thus the subject in the argument [sc. Bodies, &c.] must have had a maker from the fact that it is an effect, as jars, &c.; that which has the aforementioned middle term must have the aforementioned major;—and that which has not the former will not have the latter, as the soul, &c. The argument which establishes the authority of the original inference to prove a Supreme Being has been given elsewhere,—so we refrain from giving it at length here. In fact that God is the universal agent but not irrespective of the actions done by living beings, is proved by the current verse: *

"This ignorant *jívátman*, incapable of its own true pleasures or pains, if it were only under God's direction, [and its own merits not taken into account,] would always go to heaven or always to hell." †

* Or perhaps *Nyáyena* may he mean argument.'

† *Scil.* if there were only one cause, there would be only one invariable effect. The very existence of various effects proves that there must be other concurrent causes (as human actions) necessary. The argumeut seems to me require here this unnatural stress to be laid on *eva*, but this is certainly not the original meaning of the passage; it occurs Mahábhárata. iii. 1144.

देहादिकं कार्य्यं भवितुमर्हति सन्निवेशविशिष्टत्वात् विनश्वरत्वाद्वा घटादिवत्, तेन च कार्य्यत्वेन बुद्धिमत्पूर्व्वकत्वमनुमातुं सुकरमेव । विमतं सकर्तृकं कार्य्यत्वात् घटवद्, यदुक्तसाधनं तदुक्तसाध्यं न यदेवं न तदेवं यथात्मादि । परमेश्वरानुमानप्रामाण्यसाधनानुमानमन्यत्राकारीत्युपरम्यते ।

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥

इति न्यायेन प्राणिकृतकर्म्मानुपेक्षया परमेश्वरस्य कर्तृत्वोपपत्तेः ।

Nor can you object that this opinion violates God's independence, since it does not really violate an agent's independence, to allow that he does not act irrespectively of means; just a we say that the king's bounty shews itself in gifts; but these are not irrespective of his treasurer. As has been said by the Siddha Guru:

> "It belongs to independence to be uncontrolled and itself to employ means, &c.;
> This is an agent's true independence, and not the acting irrespectively of works, &c."

And thus we conclude that inference (as well as Śruti) establishes the existence of an agent who knows the various fruits [of action], their means, material causes, &c. according to the laws of the various individual merits. This has been thus declared by the venerable Bṛihaspati:

> "He who knows the fruits to be enjoyed, their means and material causes,—
> With His power this world knows not how the desert that resides in man's actions should ripen."

> "The universe is the subject of our argument and it must have had an intelligent maker,
> This we maintain from its being an effect, just as we see in any other effect, as jars, &c."

God's omniscience also is found from His being identical with everything, and also from the fact that an ignorant being cannot

---

न च स्वातन्त्र्यविहतिरिति वाच्यं, करणापेक्षया कर्तुः स्वातन्त्र्यविहतेरनुपलम्भात् कोषाध्यक्षापेक्षस्य राज्ञः प्रसादादिना दानवत्। यथोक्तं सिद्धगुरुभिः,

> स्वतन्त्रस्याप्रयोज्यत्वं करणादिप्रयोक्तृता ।
> कर्तुः स्वातन्त्र्यमेतद्धि न कर्म्माद्यनपेक्षतेति ॥

तथा च तत्तत्कर्म्माशयवशाद्भोगतत्साधनतदुपादानादिविशेषज्ञः कर्त्ता अनुमानादिसिद्ध इति सिद्धम्। तदिदमुक्तं तत्र भवद्भिर्बृहस्पतिभिः,

produce a thing.* This has been said by the illustrious Mṛigendra: †

> "He is omniscient from his being the maker of all things: for it is an established principle
> That he only can make a thing who knows it with its means, parts, and end."

"Well" our opponents may say, "we concede that God is an independent maker, but then he must have a body,‡ since experience shews that all effects, as jars, &c., are produced by beings possessed of bodies, as potters, &c. But if God be possessed of a body then he will be like us subject to trouble, and no longer be omniscient or omnipotent." We however deny this; for we see that the incorporeal soul does still produce motion, &c. in its associated body; however, even though we conceded that God *did* possess a body, we should still maintain that the alleged defects would not necessarily ensue. The Supreme Being, as He has no possible connection with the fetters of matter, such as *mala*,§ action, &c cannot have a material body but only a body of pure energy (Sákta||), since we know that his body is composed of the five hymns which are forms of Śakti, according to the well known text: "The Supreme

* In p. 82. l. 3. infra, I read *Karanásambhavàchcha.*

† I suppose this is the same name with the Meykáṇḍa of the Tamil work in J. A. O. S.

‡ I read सावयवशरीर: in p. 83. l. 2.

§ I retain this word, see *infra.*

|| Māyā (or Prakriti) is the material, Śakti the instrumental, and Deity the efficient cause." Amer. Or. Soc Journ. iv. p., 55.

इह भोग्यभोगसाधनतदुपादानादि यो विजानाति ।
तमृते भूतवहीदं पुंस्कर्म्माशयविपाकज्ञमिति ।
अन्यत्रापि ।
विवादाध्यासितं सर्व्वं बुद्धिमत्कर्तृपूर्व्वकम् ।
कार्य्यत्वादावयोः सिद्धं कार्य्यं कुम्भादिकं यथेति ॥
सर्व्वात्मकत्वादेवास्य सर्व्वज्ञत्वं सिद्धम् अज्ञस्य करणासम्भवात् ।
उक्तञ्च श्रीमन्मृगेन्द्रैः,

has the *I'śána* as his head, the Tatpurusha as his mouth, the *Aghora* as his heart, the *Vámedeva* as his secret parts and the Sadyojáta as his feet*." And this body, created according to his own will, is not like our bodies, but is the cause of the five operations of the Supreme, which are respectively grace, obscuration, destruction, preservation, and production.† This has been said in the Srímat Mṛigendra :

"From the impossibility of its possessing *mala*, &c., the body of the Supreme is of pure energy and not like ours."

And it has also been said elsewhere :

"His body is composed of the five mantras which are subservient to the five operations,

And his head, &c. are formed out of the Isa, Tatpurusha Aghora, Váma and other hymns.'

If you object to this view that "such passages in the Ágamas as 'He is five-faced and fifteen-eyed,' assert prominently the fact that the Supreme Being is endowed with bodily organs," we concede what you say, but we maintain that there is no contradiction in his

* These are the five first names of the eleven mantras which are included in the five kalás, (Journ. A. Or. Soc iv. p. 238—43.)— In vol. ii. p. 149, we read "the Siva-linga (the visible object of worship for the enlightened) is composed of mantras and s to be regarded as the body of Śiva."—These five mantras are given in the inverse order in Taitt. Áraṇyaka X, 43—47.

† These are the operations of the five manifestations of Śiva (See J. A O. S. iv. 8—18.) which in their descending order are, *Sáthákkiyam* (i. e. *Sadákshaya ?*) or *Sadá-Śiva*, who is Śiva and Śakti combined and the source of grace to all souls ; *Isura* or *Mayesuran*, the obscure ; *Suttavittei* (*Suddhavidya*) which is properly the Hindu triad, *Rudra*, *Vishnu* and *Brahma*. They are respectively symbolished by the *náda*, *vindu*, *m*, *u*, and *a* of om.

सर्व्वज्ञः सर्व्वकर्तृत्वात् साधनाङ्गफलैः सह ।
यो यज्जानाति कुरुते स तद्वेत्ति सुस्थितमिति ॥

अस्तु तर्हि स्वतन्त्र ईश्वरः कर्ता स तु तावदशरीरो, घटादिकार्यस्य शरीरवता कुलालादिना क्रियमाणत्वदर्शनात् शरीरवत्त्वे चास्मदादिवदीश्वरः क्लेशयुक्तो ऽसर्व्वज्ञः परिमितशक्तिः प्राप्नुयादिति चेन्मैवं मंस्थाः। अशरीरस्याप्यात्मनः स्वशरीरस्पन्दादौ कर्तृत्वदर्शनादभ्युपगम्यापि ब्रूमहे शरीरवत्त्वेऽपि भगवतो न प्रागुक्तदोषानुषङ्गः । परमेश्वरस्य हि मलकर्म्मा-

assuming such forms to shew his mercy to his devoted servants, since meditation, worship, &c. are impossible towards a Being entirely destitute of form. This has been said in the Paushkara:

"This form of His is mentioned for the preservation of the devotee."

And similarly elsewhere:

"Thou art to be worshipped according to rule as possessed of form;
For this understanding cannot reach to a formless object."

Bhojarája * has thus detailed the five operations,

'Five-fold are his operations, creation, preservation, destruction and obscuration,
And to these must be added the active grace of Him who is eternally exalted.'

Now these five operations, in the view of the pure Path, are held to be performed directly by Śiva, but in that of the toilsome Path they are ascribed to Ananta, † &c., as is declared in the Śrímat Karaṇa. ‡

* In Wilson's Mackenzie Cat. i. p. 138 we find a Tántrik work, the *Narapati Jaya charyá,* ascribed to Bhoja the King of Dhár.

† Ananta is a name of Śiva in the Atharva-śiras Upanishad, see Indische Stud i. 385.

‡ This is the fourth of the twenty-eight Ágamas, see Foulkes' Catechism.

द्विपाशजालासम्भवेन प्राकृतं शरीरं न भवति किन्तु शाक्तं शक्तिरूपैरीशानादिभिः पञ्चभिर्मन्त्रैर्मस्तकादिकल्पनायामीशानमस्तकस्तत्पुरुषवक्त्रोऽघोरहृदयो वामदेवगुह्यः सद्योजातपाद ईश्वर इति प्रसिद्धा यथाक्रमानुग्रहतिरोभावादानलक्षणस्थितिलक्षणोद्भवलक्षणकृत्यपञ्चककारणं स्वेच्छानिर्म्मितं तच्छरीरं न चास्मच्छरीरसदृशम्। तदुक्तं श्रीमन्मृगेन्द्रैः,

मलाद्यसम्भवाच्छाक्तं वपुर्नैतादृशं प्रभोरिति ।

अन्यत्रापि,

तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः ।
ईशतत्पुरुषाघोरवामाद्यैर्मस्तकादिमदिति ॥

"In the Pure Path Śiva is declared to be the only Agent,
but Ananta in that which is opposed to the One Supreme."

It must here be understood that the word Śiva includes in its proper meaning 'the Lord,' all those who have attained to the state of Siva as the Lords of the Mantras, Maheśwara, the emancipated souls who have become Śivas and the inspired teachers *(váchakas)* together with all the various means as initiation, &c., for obtaining the state of Śiva. Thus has been explained the first category the Lord *(pati.)*

We now proceed to explain the second category, the soul *(paśu.)* The individual soul, which is also known by such synonyms as the non-atomic * the *Kshetrajna* or knower of the body, † &c., is the *Paśu*. For we must not say with the Chárvákas that it is the same as the body, since on this view we could not account for memory, as there is a proverb that, one man cannot remember what another has seen. Nor may we say with the Naiyáyikas that it is cognisable by perception ‡ as this would involve an *ad infinitum* regressus. As has been said,

* "The Soul when clothed with these primary things, (desire, knoweldge, action, &c.,) is an exceedingly small body" (Foulkes). Anaṇu is used as an epithet of Brahma n Bṛihad Ar. Up. iii. 8.—8.

† See Ind. Studien. i. 301.

‡ The mind or internal sense perceives Soul, see Bháshá Parichchheda, śl. 49.

ननु पञ्चवक्त्रस्त्रिपञ्चदृगित्यादिना आगमेषु परमेश्वरस्य मुख्यत एव शरीरेन्द्रियादियोगः श्रूयत इति चेत्सत्यम्। निराकारे ध्यानपूजाद्यसम्भवेन भक्तानुग्रहकरणाय तत्तदाकारग्रहणाविरोधात्। तदुक्तं श्रीमत्पौष्करे,

साधकस्य तु रक्षार्थं तस्य रूपमिदं स्मृतमिति ।

अन्यत्रापि

आकारवांस्त्वं नियमादुपास्यो
न वस्त्वनाकारमुपैति बुद्धिरिति ।

कृत्यपञ्चकं च प्रपञ्चितं भोजराजेन,

पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहारतिरोभावाः ।
तद्वदनुग्रहकरणं प्रोक्तं सततोदितस्यास्येति ॥

"It the soul were cognisable, there would need to be again a second knower; *
And this would require another still, if the second were itself to be known."

Nor must we hold it non-pervading with the Jainas, nor momentary with the Bauddhas, since it is not limited by space or time. As has been said:

That object which is unlimited in its nature by space or time,
They hold to be eternal and pervading,—hence the soul's all-pervadingness and eternity,'

Nor may we say with the Vedántin that it is only one, since the apportionment of different fruits proves that there are many individual souls; nor with the Sánkhyas that it is devoid of action, since, when all the various 'fetters' are removed, Śruti

* Dele the *iti* in p. 84, l. 5 infra.

एतच्च कृत्यपञ्चकं शुद्धाध्वविषये साक्षाच्छिवकर्तृकं अशुद्धाध्ववि-षये त्वनन्तादिद्वारेणेति विवेकः । तदुक्तं श्रीमत्किरणे, शुद्धे ऽध्वनि शिवः कर्ता प्रोक्तो ऽनन्तो ऽसिते प्रभोरिति ।

एवञ्च शिवशब्देन शिवत्वयोगिनां मन्त्रेश्वरमहेश्वरमुक्तात्मशि-वानां सवाचकानां शिवत्वप्राप्तिसाधनेन दीक्षादिनोपायकलापेन सह पति-पदार्थे संग्रहः कृत इति बोद्धव्यम् ।

तदित्थं पतिपदार्थो निरूपितः ।

सम्प्रति पशुपदार्थो निरूप्यते । अनणुक्षेत्रज्ञादिपदवेदनीयो जीवा-त्मा पशुः न तु चार्वाकादिवद्देहादिरूपः "नान्यदृष्टं स्मरत्यन्य" इति न्यायेन प्रतिसन्धानानुपपत्तेः । नापि नैयायिकादिवत् प्रकाश्यः अनव-स्थाप्रसङ्गात् । तदुक्तम्,

आत्मा यदि भवेन्मेयस्तस्य माता भवेत् पर इति ।
पर आत्मा तदानीं स्यात् स परो यदि दृश्यत इति ।

informs us of a state of identity with Śiva, which consists in intelligence in the form of an eternal and infinite vision and action.* This has been declared in the Śrímat Mṛigendra,

"It is revealed that identity with Śiva results when all fetters are removed."

And again,

"Intelligence consists in vision and action, and since in his soul,
This exists always and on every side, therefore, after liberation, Śruti calls it that which faces every way."

It is also said in the Tattwa-prakáśa,

"The liberated souls are themselves Śivas, but these are liberated by His favour;
He is to be known as the One eternally liberated, whose body is the five Mantras." E. B. C.

* Of the Nakulíśa Páśupatas, p 76. 4.

न च जैनवदव्यापको नापि बौद्धवत् क्षणिको देशकालाभ्यामनवच्छिन्नत्वात्। तदप्युक्तम्,

अनवच्छिन्नसद्भावं वस्तु यद्देशकालतः।
तन्नित्यं विभु चेच्छन्तीत्यात्मनो विभुनित्यतेति॥

नाप्यद्वैतवादिनामिवैकः, भोगप्रतिनियमस्य पुरुषबहुत्वज्ञापकस्य सम्भवात् नापि साङ्ख्यानामिवाकर्त्ता पाशजालापोहने नित्यनिरतिशयदृक्क्रियारूपचैतन्यात्मकशिवत्वश्रवणात्। तदुक्तं श्रीमन्मृगेन्द्रैः,

पाशान्ते शिवताश्रुतेरिति।
चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा।
सर्वतश्च यतो मुक्तौ श्रूयते सर्वतोमुखमिति॥

तत्त्वप्रकाशे ऽपि,

मुक्तात्मानो ऽपि शिवाः किन्त्वेते तत्प्रसादतो मुक्ताः।
सो ऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुरिति॥

NIRIS'VARA-VA'DA.

The unconscious is seen operating relatively to an end: the unconscious milk of the cow, for example, energises towards the growth of the calf. It is in this manner that the emanative first cause acts with a view to the liberation of the transcendent spirits. Let not any one urge that this argument is irrelevant, the activity of the milk being determined by the superintendence of a supreme constructive intelligence, *Is'vara.* For, as we see in our every-day life, the activities of intelligent beings are marks either of self-interest or of beneficence. But as we must deny both self interest and beneficence in regard to the origin of the universe, we must deny that creation had for its antecedent the activity of an intelligence. A creator who already has all that he can desire, can have no interest or purpose in creating. Nor could his creative energy proceed from beneficence. Before creation there could be no misery, there being no experience of senses, bodies, and objects, by living creatures. What is there, then, that the divine compassion could desire to extricate them from? It may be said, perhaps, that a divine providence may be supposed, if we suppose the creator to look upon the sufferings of souls subsequent to the creation. This hypothesis implies a logical circle which it would be difficult to explain away; the creation proceeding from the divine tenderness, and that from creation. Again, a Demiurgus actuated by beneficence would not create sentient beings under disparate conditions, but in a state of co-equal happiness. But disparity of conditions, we hear some one say, proceeds, from disparity of foregone merits? Why then, away, say we, with this superintendence of merits and their fruits by a supreme intelligence. The blind and fatal operation of the efficacy of works, apart from any such imaginary superintendence, is a better hypothesis; it being readily supposable that there would be no misery at all, did not bodies, the senses, and their objects, come into being as the products of that efficacy. A. E. G.

Sānkhya-tattva-kaumudī, ch. 57.

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 2. JULY 1ST 1876. VOL. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

॥ काशिकायाः ॥

पञ्चमस्याध्यायस्य चतुर्थः पादः ।

समूहवच्च बहुषु ॥ २२ ॥

तत्प्रकृतवचनइत्येव । बहुषु प्रकृतेषूच्यमानेषु समूहवत्प्रत्यया भवन्ति । चकारान्मयट् च । मोदकाः प्रकृताः प्राचुर्येण प्रस्तुताः, मौदकिकम् । मोदकमयम् । शाष्कुलिकम् । शष्कुलीमयम् । अतिवर्तन्तेऽपि स्वार्थिकाः प्रकृतितो लिङ्गवचनानि । द्वितीये सूत्रार्थे मोदकाः प्रकृता अस्मिन्यज्ञे, मौदकिको यज्ञः । मोदकमयः । शाष्कुलिकः । शष्कुलीमयः ॥

अनन्तावसथेतिहभेषजाञ्ञ्यः ॥ २३ ॥

अनन्तादिभ्यः स्वार्थे ञ्यः प्रत्ययो भवति । अनन्त एव, आनन्त्यम् । आवसथ एवावसथ्यम् । इति ह, ऐतिह्यम् । निपातसमुदायोऽयमुपदेशपारम्पर्ये वर्तते । भेषजमेव, भैषज्यम् । महाविभाषया विकल्पते प्रत्ययः ॥

देवतान्तात्तादर्थ्ये यत् ॥ २४ ॥

देवताशब्दान्तात्प्रातिपदिकाच्चतुर्थीसमर्थात्तादर्थ्ये यत् प्रत्ययो भवति । तदर्थ एव तादर्थ्यम् । चातुर्वर्ण्यादित्वात्ष्यञ् । तदिति प्रकृत्यर्थो निर्दिश्यते । अग्निदेवतायै इदम्, अग्निदेवत्यम् । पितृदेवत्यम् । वायुदेवत्यम् ॥

पादार्घाभ्यां च ॥ २५ ॥

तादर्थ्यइत्येव । पादार्घशब्दाभ्यां चतुर्थीसमर्थाभ्यां तादर्थ्येऽभिधेये यत्प्रत्ययो भवति । पादार्थमुदकं पाद्यम् । अर्घ्यम् । अनुक्तसमुच्चयार्थश्चकारः । यथादर्शनमन्यत्रापि प्रत्ययो भवति । एष वै सप्तदशाक्षरश्छन्दस्यः प्रजापतिः । वसु । वयस् । ओक । कवि । क्षेम । उदक । वर्चस् । निष्केवल । उक्थ । जन । पूर्व । नव । सूर । मर्त । यविष्ठ । इत्येतेभ्यः छन्दसि स्वार्थे

Digitized by Google

यत्प्रत्ययो भवति। अग्निरीशेवसव्यस्य। अयस्यो वसानाः। द्वितीयाबहुवचनस्यालुक्। अपो वसाना इत्यर्थः। स्वभोक्ये। कव्योसि। हेम्यस्य वस्यति। वायुर्वर्चस्यः। निष्कवल्यं शंसति। उक्थ्यं शंसति। जन्यं ताभिः। पूर्व्या विशः। स्तोमैर्जनयामि नव्यम्। सूर्यः। मर्त्यः। यविष्ठ्यः॥ आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानम्॥ * ॥ समशब्दादावतुप्रत्ययो वक्तव्यः॥ * ॥ समावद्वसतु॥ नवस्य नू आदेशस्त्नप्तनप्खाश्च प्रत्ययाः॥ * ॥ नूत्नम्। नूतनम् नवीनम्॥ न श्च पुराणे प्रात्॥ * ॥ पुराणे वर्त्तमानात्प्रशब्दान्नः प्रत्ययो भवति। चकारात्त्नप्तनप्खाश्च। प्रणम्। प्रत्नम्। प्रतनम्। प्रीणम्॥ भागरूपनामभ्यो धेयः प्रत्ययो वक्तव्यः॥ * ॥ भागधेयम्। रूपधेयम्। नामधेयम्॥ मित्राच्छन्दसि॥ * ॥ मित्रधेयं यतस्व॥ आग्नीध्रसाधारणादञ्॥ * ॥ आग्नीध्रम्। साधारणम्। स्त्रियां ङीप्। आग्नीध्री। साधारणी। वाप्रकरणाच्च विकल्पन्तएतान्युपसंख्यानानि। तेन यथाप्राप्तमपि भवति। आग्नीध्रा शाला। साधारणा भूरिति॥ अयवसमरुद्भ्यां छन्दस्यञ्वक्तव्यः॥ * ॥ आयवसे रमन्ते। मारुतं शर्द्धः*॥

अतिथेर्ञ्यः॥ २६॥

तादर्थ्यइत्येव। अतिथिशब्दाच्चतुर्थीसमर्थात्तादर्थ्येऽभिधेये ञ्यः प्रत्ययो भवति। अतिथये इदम्। आतिथ्यम्॥

देवात्तल्॥ २७॥

तादर्थ्यइति निवृत्तम्। देवशब्दात् स्वार्थे तल् प्रत्ययो भवति। देव एव देवता॥

अवेः कः॥ २८॥

अविशब्दात् स्वार्थे कः प्रत्ययो भवति। अविरेवाविकः॥

यावादिभ्यः कन्॥ २९॥

याव इत्येवमादिभ्यः स्वार्थे कन् प्रत्ययो भवति। याव एव, यावकः। मणिकः। याव। मणि। अस्थि। चण्ड। पीतस्तम्ब॥ ऋतावुष्णशीते॥

* आयवसः सोमः। मारुतः पर्वतः। पा॰ २।

पशौ लूनवियाते ॥ अणु निपुणे ॥ पुत्र कृत्रिमे ॥ स्नात वेदसमाप्तौ ॥ शून्य रिक्ते ॥ दान कुत्सिते ॥ तनु सूत्रे ॥ ईयसश्च ॥ श्रेयस्कः । ज्ञात ॥ कुमारीक्रीडनकानि च ॥

लोहितान्मणौ ॥ ३० ॥

लोहितशब्दान्मणौ वर्त्तमानात्स्वार्थे कन् प्रत्ययो भवति । लोहितो मणिः । लोहितकः । मणाविति किम् । लोहितः ॥

वर्णे चानित्ये ॥ ३१ ॥

अनित्ये वर्णे वर्त्तमानाल्लोहितशब्दात्स्वार्थे कन्प्रत्ययो भवति । लोहितकः कोपेन । लोहितकः पीडनेन । अनित्य इति किम् । लोहितो गौः । लोहितं रुधिरम् ॥ लोहिताल्लिङ्गबाधनं वा वक्तव्यम् ॥ * ॥ लोहितिका कोपेन । लोहिनिका कोपेन ॥

रक्ते ॥ ३२ ॥

लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन्प्रत्ययो भवति । लोहितकः कम्बलः । लोहितकः पटः । लिङ्गबाधनं वेत्येव । लोहितिका । लोहिनिका शाटी ॥

कालाच्च ॥ ३३ ॥

वर्णे चानित्ये रक्तइति द्वयमप्यनुवर्त्तते । कालशब्दादनित्ये वर्त्तमानाद्रक्ते च कन् प्रत्ययो भवति । कालकं मुखं वैलक्ष्येण । रक्ते । कालकः पटः । कालिका शाटी ॥

विनयादिभ्यष्ठक् ॥ ३४ ॥

विनय इत्येवमादिभ्यः स्वार्थे कन् प्रत्ययो भवति । विनय एव, वैनयिकः । सामयिकः । औपयिकः । विभाषाग्रहणेन विकल्प्यते प्रत्ययः । विनय । समय ॥ उपायाद्ध्रस्वत्वं च ॥ संगति । कथंचित् । अकस्मात् । समयाचार । उपचार । समाचार । व्यवहार । संप्रदान । समुत्कर्ष । समूह । विशेष । अत्यय * । विनयादिः ॥

* अस्थि । कपट । एतौ शब्दावत्र गणे ऽधिकौ क्वचित् ।

वाचो व्याहृतार्थायाम् ॥ ३५ ॥

व्याहृतः प्रकाशितो ऽर्थो यस्यास्तस्यां वाचि वर्त्तमानाद्वाक्शब्दात्स्वार्थे ठक् प्रत्ययो भवति । पूर्वमन्येनोक्तार्थत्वात् संदेशवाग् व्याहृतार्थेत्युच्यते । वाचिकं कथयति । वाचिकं श्रद्दधे । व्याहृतार्थायामिति किम् । मधुरा वाक् देवदत्तस्य ॥

तद्युक्तात्कर्मणो ऽण् ॥ ३६ ॥

व्याहृतार्थया वाचा यत्कर्म युक्तं तदभिधायिनः कर्मशब्दात्स्वार्थे ऽण् प्रत्ययो भवति । कर्मैव, कार्मणम् । वाचिकं श्रुत्वा तथैव यत्कर्म क्रियते तत्कार्मणमित्युच्यते । अण्प्रकरणे कुलालवरुडनिषादकर्मार * चण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानम् ॥ * ॥ कुलाल एव, कौलालः । वारुडः । नैषादः । कार्मारः । चाण्डालः । मैत्रः । आमित्रः । सान्नाय्यानुजावरानुषूकानुष्टुभचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसान्तपनाः । एते ऽणन्ताः स्वार्थिकाश्छन्दसि भाषायां चेष्यन्ते ॥

ओषधेरजातौ ॥ ३७ ॥

ओषधिशब्दादजातौ वर्त्तमानात्स्वार्थे ऽण् प्रत्ययो भवति । औषधं पिबति । औषधं ददाति । अजाताविति किम् । ओषधयः क्षेत्रे रूढा भवन्ति ॥

प्रज्ञादिभ्यश्च ॥ ३८ ॥

प्रजानातीति प्रज्ञः । प्रज्ञ इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्वार्थे ऽण् प्रत्ययो भवति । प्रज्ञ एव, प्राज्ञः । प्राज्ञी स्त्री । यस्यास्तु प्रज्ञा विद्यते सा प्राज्ञा भवति । प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः इति विदधित्यत्र पठ्यते । शत्रन्तस्य विदेर्ग्रहणं, विदेः शतुर्वसुरित्यत एव ज्ञापकात् पाक्षिको वस्वादेशः । अन्यतरस्यांग्रहणं वा तत्रानुवर्त्तते । तुह्योस्तातङाशिष्यन्यतरस्यामिति । प्रज्ञ । वणिक् । उशिक् । उष्णिक् । प्रत्यक्ष । विद्वस् । विदन् । षोडन् । षोडश । विद्या । मनस् ॥ श्रोत्र शरीरे ॥ श्रोत्रम् ।

---

* बहुषु पुस्तकेषु वार्त्तिके कर्मार इति तदुदाहरणे च कार्मार इति नास्ति ।

जुहूत ॥ कृष्ण मृगे ॥ विकीर्षत् । चोर । शक । योध । वक्षस् * । धूर्त्त । वस् । एत् । मरुत् । क्रुङ् । राजा । सत्वन्तु । दशार्ह । वयस् । आतुर † । रक्षस् । पिशाच । अशनि । कार्षापण । देवता । बन्धु ॥

मृदस्तिकन् ॥ ३९ ॥

मृच्छब्दात्स्वार्थे तिकन् प्रत्ययो भवति । विकल्पः सर्वत्रानुवर्त्तते । मृदेव, मृत्तिका ॥

सस्नौ प्रशंसायाम् ॥ ४० ॥

प्रशंसोपाधिकेर्थे वर्त्तमानाद् मृच्छब्दात्स स्न इत्येतौ प्रत्ययौ भवतः । रूपपोपवादः । प्रशस्ता मृद्, मृत्सा । मृत्स्ना । नित्यश्चायं प्रत्ययः । उत्तरसूत्रे ऽन्यतरस्यांग्रहणात् ॥

वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि ॥ ४१ ॥

प्रशंसायामित्येव । वृकज्येष्ठाभ्यां प्रशंसोपाधिकेर्थे वर्त्तमानाभ्यां यथासंख्यं तिल्तातिलौ प्रत्ययौ भवतश्छन्दसि विषये । रूपपोपवादौ । वृकतिः । ज्येष्ठतातिः ॥

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥ ४२ ॥

बह्वर्थादल्पार्थाच्च कारकाभिधायिनः शब्दात् शस् प्रत्ययो भवति अन्यतरस्याम् । विशेषानभिधानाच्च सर्वं कर्मादिकारकं गृह्यते । बहूनि ददाति, बहुशो ददाति । अल्पं ददाति । अल्पशो ददाति ॥ बहुभिर्ददाति बहुशो ददाति । अल्पेन, अल्पशः । बहुभ्यः, बहुशः । अल्पशः । इत्येवमाद्युदाहार्यम् । बह्वल्पार्थादिति किम् । गां ददाति । अश्वं ददाति । कारकादिति किम् । बहूनां स्वामी । अल्पानां स्वामी । अर्थग्रहणात्पर्यायेभ्योपि भवति । भूरिशो ददाति । स्तोकशो ददाति । बह्वल्पार्थान्मङ्गलवचनम् ॥ यत्र मङ्गलं गम्यते तत्रायं प्रत्यय इष्यते । बहुशो ददातीत्याभ्युदयिकेषु कर्मसु । अल्पशो ददातीत्यनिष्टेषु कर्मसु ॥

---

* वक्षुष । पा॰ २ ।

† अक्षुर पा॰ २ ।

Digitized by Google

संख्यैकवचनाच्च वीप्सायाम् ॥ ४३ ॥

संख्यावाचिभ्यः प्रातिपदिकेभ्य एकवचनाच्च वीप्सायां द्योत्यायां शस् प्रत्ययो भवति अन्यतरस्याम् । द्वौद्वौ मोदकौ ददाति, द्विशः । त्रिशः । एकवचनात्खल्वपि । कार्षापणं ददाति, कार्षापणशः । माषशः । पादशो ददाति । एकोर्थ उच्यते येन तदेकवचनम् । कार्षापणादयश्च परिमाणशब्दा इत्यत्रैकार्था एव भवन्ति । संख्यैकवचनादिति किम् । घटंघटं ददाति । वीप्सायामिति किम् । द्वौ ददाति । कार्षापणं ददाति । कारकादित्येव । द्वयोर्द्वयोः स्वामी । कार्षापणस्यकार्षापणस्य स्वामी ॥

प्रतियोगे पञ्चम्यास्तसिः ॥ ४४ ॥

प्रतिना कर्म्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः प्रत्ययो भवति । प्रद्युम्नो वासुदेवतः प्रति । अभिमन्युरर्जुनतः प्रति । वाग्रहणानुवृत्तेर्विकल्पेन भवति । वासुदेवादर्जुनादित्यपि भवति । तसिप्रकरण आद्यादिभ्य उपसंख्यानम् ॥ * ॥ आदौ आदितः । मध्यतः । पार्श्वतः । पृष्टतः । आकृतिगणश्चायम् ॥

अपादाने चाहीयरुहोः ॥ ४५ ॥

अपादाने या पञ्चमी तस्याः पञ्चम्या वा तसिः प्रत्ययो भवति । तच्चेदपादानं हीयरुहोः संबन्धि न भवति । ग्रामत आगच्छति । ग्रामात् । चोरतो बिभेति । चोरात् । अध्ययनतः पराजयते । अध्ययनात् । अहीयरुहोरिति किम् । सार्थाद्धीयते । पर्वतादवरोहति । हीयते इति विकारनिर्द्देशो जहातेः प्रतिपत्त्यर्थः । जिहीतेर्मा भूत् । भूमित उज्जिहीते । भूमेरुज्जिहीते । कथं मन्त्रो हीनः स्वरतो वर्णतो वेति । नैषा पञ्चमी । किं तर्हि, तृतीया । स्वरेण वर्णेन वा हीन इत्यर्थः ॥

अतिग्रहाव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः ॥ ४६ ॥

अतिक्रम्य ग्रहो ऽतिग्रहः । अचलनमव्यथनम् । क्षेपो निन्दा । अतिग्रहादिविषये या तृतीया तदन्ताद्वा तसिः प्रत्ययो भवति सा चेत्कर्त्तरि न भवति । वृत्तेनातिगृह्यते, वृत्ततो ऽतिगृह्यते । चारित्रेणातिगृह्यते,

चारित्रतो ऽतिशय्यते । सुष्ठुवृत्तवानन्यानतिक्रम्य वृत्तेन गृह्यतइत्यर्थः । अव्यथने । वृत्तेन न व्यथते वृत्ततो न व्यथते । चारित्रेण न व्यथते चारित्रतो न व्यथते । वृत्तेन न चलतीत्यर्थः । क्षेपे । वृत्तेन क्षिप्तो वृत्ततः क्षिप्तः । चारित्रेण क्षिप्तः, चारित्रतः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः । अकर्त्तरीति किम् । देवदत्तेन क्षिप्तः ॥

हीयमानपापयोगाच्च ॥ ४७ ॥

अकर्त्तरि तृतीयाया इत्येव । हीयमानेन पापेन च योगो यस्य तद्वाचिनः शब्दात्परा या तृतीया विभक्तिरकर्त्तरि तदन्ताद्वा तसिः प्रत्ययो भवति । वृत्तेन हीयते, वृत्ततो हीयते । चारित्रेण हीयते, चारित्रतो हीयते । पापयोगात् । वृत्तेन पापः, वृत्ततः पापः । चारित्रेण पापः । चारित्रतः पापः । क्षेपस्याविवक्षायां तस्याख्यायामिदमुदाहरणम् । क्षेपे हि पूर्वेणैव सिद्धम् । अकर्त्तरीत्येव । देवदत्तेन हीयते ॥

षष्ठ्या व्याश्रये ॥ ४८ ॥

नानापक्षसमाश्रयो व्याश्रयः । व्याश्रये गम्यमाने षष्ठ्यन्ताद् वा तसिः प्रत्ययो भवति । देवा अर्जुनतो ऽभवन् । आदित्याः कर्णतो ऽभवन् । षष्ठी चात्र पक्षापेक्षैव । अर्जुनस्य पक्षे कर्णस्य पक्षइत्यर्थः । व्याश्रयइति किम् । वृक्षस्य शाखा ॥

रोगाच्चापनयने ॥ ४९ ॥

रोगो व्याधिः । तद्वाचिनः शब्दाद्या षष्ठी विभक्तिः तदन्ताद्वा तसिः प्रत्ययो भवति अपनयने गम्यमाने । अपनयनं प्रतीकारः, चिकित्सेत्यर्थः । प्रवाहिकातः कुरु । कासतः कुरु । छर्दिकातः कुरु । प्रतीकारमस्याः कुर्वित्यर्थः । अपनयनइति किम् । प्रवाहिकायाः प्रकोपनं कुरु ॥

अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः ॥ ५० ॥

कारणस्य विकाररूपेण भूतस्य तदात्मना भावो ऽभूततद्भावः । संपद्यतेः कर्त्ता संपद्यकर्त्ता । संपद्यकर्त्तरि वर्त्तमानात्प्रातिपदिकादभूततद्भावे गम्यमाने कृभ्वस्तिभिर्धातुभिर्योगे च्विः प्रत्ययो भवति । अशुक्लः

शुक्लः संपद्यते, तं करोति शुक्ली करोति । मलिनं शुक्ली भवति । शुक्ली स्यात् । घटी करोति मृदम् । घटी भवति । घटी स्यात् । अभूततद्भाव इति किम् । शुक्लं करोति । नात्र प्रकृतिर्विवक्षिता । कृभ्वस्तियोग इति किम् । अशुक्लः शुक्लो जायते । संपद्यकर्त्तरीति किम् । यावता अभूततद्भावसामर्थ्याल्लभ्यतएव संपद्यकर्तृत्वम् । कारकान्तरसंपत्तौ मा भूत् । अदेवगृहे देवगृहे संपद्यते । देवगृहस्याधेयविशेषसंबन्धेनाभूततद्भावः सत्त्वाधिकरणस्य न कर्त्तुरिति ॥

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥ ५१ ॥

अरुः प्रभृतीनामन्तस्य लोपो भवति च्विश्च प्रत्ययः । सर्वविशेषणसंबन्धात्पूर्वेणैव प्रत्ययः सिद्धो लोपमात्रार्थ आरम्भः । अनरुररुः संपद्यते तं करोति, अरु करोति । अरु भवति । अरु स्यात् । मनस् । उन्मनी करोति । उन्मनी भवति । उन्मनी स्यात् । चक्षुस् । उच्चक्षू करोति । उच्चक्षू भवति । उच्चक्षू स्यात् । चेतस् । विचेती करोति । विचेती भवति । विचेती स्यात् । रहस् । विरही करोति । विरही भवति । विरही स्यात् । रजस् । विरजी करोति । विरजी भवति । विरजी स्यात् ॥

विभाषा साति कार्त्स्न्ये ॥ ५२ ॥

अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरीति सर्वमनुवर्त्तते । अस्मिन्विषये विभाषा सातिः प्रत्ययो भवति कार्त्स्न्ये गम्यमाने । यदि प्रकृतिः कृत्स्नां विकारात्मतामापद्यतइत्यर्थः । अग्निसाद्भवति शस्त्रम् । अग्नीभवति शस्त्रम् । उदकसाद्भवति लवणम् । उदकीभवति लवणम् । कार्त्स्न्य इति किम् । एकदेशेन पटः शुक्ली भवति । विभाषाग्रहणं च्वेः प्रापकम् । प्रत्ययविकल्पस्तु महाविभाषयैव सिद्धः ॥

अभिविधौ संपदा च ॥ ५३ ॥

अभिविधिरभिव्याप्तिः । अभिविधौ गम्यमाने च्विविषये सातिः प्रत्ययो भवति संपदा योगे, चकारात्कृभ्वस्तिभिश्च । विभाषाग्रहणानुवृत्तेश्च्विरप्यभ्यनुज्ञायते । स च कृभ्वस्तियोगएव भवति न संपदा

अग्निसात्संपद्यते । अग्निसाद्भवति । उदकसात्संपद्यते । उदकसाद्भवति लवणम् । अग्नीभवति । उदकीभवति । अथाभिविधेः कार्त्स्न्यस्य च को विशेषः । यत्रैकदेशेनापि सर्वा प्रकृतिर्विकारमापद्यते सोऽभिविधिः । यथा ऽस्यां सेनायामुत्पातेन सर्वं शस्त्रमग्निसात्संपद्यते । वर्षासु सर्वं लवणमुदकसात्संपद्यत इति । कार्त्स्न्यं तु सर्वात्मना द्रव्यस्य विकाररूपापत्तौ भवति ॥

तदधीनवचने ॥ ५४ ॥

अभूततद्भाव इति निवृत्तम् अर्थान्तरोपादानात् । कृभ्वस्तियोगे संपदा चेति वर्तते । तदधीनं तदायत्तं तत्स्वामिकमित्यर्थः । स्वामिसामान्यमीशितव्यसामान्यं च तदधीनशब्देन निर्दिश्यते । स्वामिविशेषवाचिनः प्रातिपदिकादीशितव्ये ऽभिधेये सातिः प्रत्ययो भवति कृभ्वस्तिभिः संपदा च योगे । राजाधीनं करोति, राजसात्करोति । राजसाद्भवति । राजसात्स्यात् । राजसात्संपद्यते । ब्राह्मणसात्करोति । ब्राह्मणसाद्भवति । ब्राह्मणसात्स्यात् । ब्राह्मणसात्संपद्यते ॥

देये त्रा च ॥ ५५ ॥

तदधीनवचनइत्यनुवर्त्तते । तस्य विशेषणं देयग्रहणम् । दातव्यं देयं, तदधीने देये त्रा प्रत्ययो भवति चकारात्सातिश्च कृभ्वस्तिभिः संपदा च योगे । ब्राह्मणेभ्यो देयमिति यद्विज्ञातं तद्यदा तेषां समर्पणेन तदधीनं क्रियते तदा त्रा प्रत्ययः । ब्राह्मणाधीनं देयं करोति, ब्राह्मणसात्करोति । ब्राह्मणत्रा करोति । ब्राह्मणत्रा भवति । ब्राह्मणत्रा स्यात् । ब्राह्मणत्रा संपद्यते । देयइति किम् । राजसाद्भवति राष्ट्रम् ॥

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥ ५६ ॥

सातिर्निवृत्तः । त्राप्रत्ययो ऽनुवर्त्तते । देवादिभ्यः प्रातिपदिकेभ्यो द्वितीयासप्तम्यन्तेभ्यः त्रा प्रत्ययो भवति बहुलम् । कृभ्वस्तिभिरिति नात्र संबध्यते । सामान्येन विधानम् । देवान् गच्छति, देवत्रा गच्छति । देवेषु वसति, देवत्रा वसति । मनुष्यान् गच्छति, मनुष्यत्रा गच्छति । मनुष्येषु वसति, मनुष्यत्रा वसति । एवमन्येप्युदाहार्याः । पुरुषान्गच्छति,

पुरुषत्रा गच्छति । पुरुषेषु वसति, पुरुषत्रा वसति । पुरुषान्गच्छति, पुरुत्रा गच्छति । पुरुषु वसति, पुरुत्रा वसति । मर्त्यान्वसति, मर्त्यत्रा वसति । मर्त्येषु वसति, मर्त्यत्रा वसति । बहुलवचनादन्यत्रापि भवति । बहुत्रा जीवतो मन इति ॥

अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच् ॥ ५७ ॥

यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सो ऽव्यक्तः । तस्यानुकरणमव्यक्तानुकरणम् । द्व्यच् अवरार्धं यस्य तद् द्व्यजवरार्धम् । अवरशब्दोपकर्षे । यस्यापकर्षे क्रियमाणे सुष्ठु न्यूनमर्धं द्व्यच्कं संपद्यते तस्मादव्यक्तानुकरणादनितिपराड्डाच्प्रत्ययो भवति । कृभ्वस्तियोग इत्यनुवर्तते । यस्य च द्विर्वचने कृते द्व्यजवरार्धं ततः प्रत्ययः । डाचि बहुलं द्वे भवत इति विषयसप्तमी । डाचि विवक्षिते द्विर्वचनमेव पूर्वं क्रियते पश्चात्प्रत्ययः । पटपटा करोति । पटपटा भवति । पटपटा स्यात् । दमदमा करोति । दमदमा भवति । दमदमा स्यात् । अव्यक्तानुकरणादिति किम् । दृषत्करोति । द्व्यजवरार्धादिति किम् । श्रत्करोति । अवरग्रहणं किम् । खरटखरटा करोति । त्रपटत्रपटा करोति । अनिताविति किम् । पटिति करोति । चकारः स्वरार्थः स्वरितबाधनार्थः । पटपटासि । अत्र स्वरितो वा ऽनुदात्ते पदादाविति स्वरितो न भवति । के चिद्द्व्यजवरार्ध्यादिति यकारं पठन्ति । स स्वार्थिको विज्ञेयः ॥

कृञो द्वितीयतृतीयशम्बबीजात्कृषौ ॥ ५८ ॥

द्वितीयतृतीयादिभ्यः शब्देभ्यः । कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे नान्यत्र । पुनः कृञ्ग्रहणं भ्वस्त्योर्निवृत्त्यर्थम् । द्वितीया करोति । द्वितीयं कर्षणं विलेखनं करोतीत्यर्थः । तृतीया करोति । शम्बा करोति । अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं कृषतीत्यर्थः । बीजा करोति । सह बीजेन विलेखनं करोतीत्यर्थः । कृषाविति किम् । द्वितीयं करोति पदम् ॥

संख्यायाश्च गुणान्तायाः ॥ ५९ ॥

कृञ इत्यनुवर्त्तते, । कृषाविति च । संख्यावाचिनः शब्दस्य गुण-शब्दो ऽन्ते समीपे यत्र संभवति सा संख्या गुणान्तेत्युच्यते । तादृशा-त्प्रातिपदिकात्कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे । द्विगुणं विलेखनं करोति क्षेत्रस्य, द्विगुणा करोति क्षेत्रम् । त्रिगुणा करोति । कृषाविति किम् । द्विगुणां करोति रज्जुम् ॥

समयाच्च यापनायाम् ॥ ६० ॥

कृञ इत्येव । कृषाविति निवृत्तम् । कर्त्तव्यस्यावसरप्राप्तिः समय-स्तस्यातिक्रमणं यापना । समयशब्दाद्यापनायां गम्यमानायां डाच् प्रत्ययो भवति कृञो योगे । समया करोति । यापयति, कालक्षेपं करोतीत्यर्थः । यापनायामिति किम् । समयं करोति ॥

सपत्त्रनिष्पत्त्रादतिव्यथने ॥ ६१ ॥

कृञ इत्येव । सपत्त्रनिष्पत्त्रशब्दाभ्यामतिव्यथने डाच् प्रत्ययो भ-वति कृञो योगे सति । अतिव्यथनमतिपीडनम् । सपत्त्रा करोति मृगं व्याधः । सपत्त्रं शरमस्य शरीरे प्रवेशयतीत्यर्थः । निष्पत्त्रा करोति । शरीराच्छरमपरपार्श्वे निष्क्रामयतीत्यर्थः । अतिव्यथनइति किम् । सपत्त्रं वृक्षं करोति जलसेचकः । निष्पत्त्रं वृक्षतलं करोति भूमिशोधकः ॥

निष्कुलान्निष्कोषणे ॥ ६२ ॥

कृञ इत्येव । निष्कुलशब्दान्निष्कोषणे वर्त्तमानात्कृञो योगे डाच् प्रत्ययो भवति । निष्कोषणमन्तरवयवानां बहिर्निष्कासनम् । निष्कुला करोति पशून् । निष्कुष्णातीत्यर्थः । निष्कोषणइति किम् । निष्कुलान्क-रोति शत्रून् ॥

सुखप्रियादानुलोम्ये ॥ ६३ ॥

सुखप्रियशब्दाभ्यामानुलोम्ये वर्त्तमानाभ्यां कृञो योगे डाच् प्रत्ययो भवति । आनुलोम्यमनुकूलता, आराध्यचित्तानुवर्त्तनम् । सुखा करोति । प्रिया करोति । स्वाम्यादेश्चित्तमाराधयतीत्यर्थः । सुखं प्रियं वा कुर्वच्च-प्यानुलोम्ये ऽवस्थित एवमुच्यते । आनुलोम्यइति किम् । सुखं करोति, प्रियं करोत्यौषधपानम् ॥

Digitized by Google

दुःखात्प्रातिलोम्ये ॥ ६४ ॥

कृञ इत्येव । दुःखशब्दात्प्रातिपदिकात्प्रातिलोम्ये गम्यमाने डाच् प्रत्ययो भवति कृञो योगे । प्रातिलोम्यं प्रतिकूलता । स्वाम्यादेश्चित्तपीडनम् । दुःखा करोति भृत्यः । प्रातिलोम्यइति किम् । दुःखं करोति कदन्नम् ॥

शूलात्पाके ॥ ६५ ॥

कृञ इत्येव । शूलशब्दात्पाकविषये डाच् प्रत्ययो भवति कृञो योगे । शूले पचति शूला करोति मांसम् । पाकइति किम् । शूलं करोति कदन्नम् ॥

सत्यादशपथे ॥ ६६ ॥

कृञ इत्येव । सत्यशब्दादशपथे डाच् प्रत्ययो भवति कृञो योगे । सत्यशब्दो ऽनृतप्रतिपक्षवचनः क्वचित्तु शपथे च वर्त्तते सत्येन शापयेद्विप्रमिति, तस्यायं प्रतिषेधः । सत्या करोति वणिक् भाण्डम् । मयैतत्क्रेतव्यमिति तथ्यं करोति । अशपथइति किम् । सत्यं करोति ब्राह्मणः ॥

मद्रात्परिवापणे ॥ ६७ ॥

कृञ इत्येव । मद्रशब्दात्परिवापणे डाच् प्रत्ययो भवति कृञो योगे । परिवापणं मुण्डनम् । मद्रशब्दो मङ्गलार्थः । मङ्गलं मुण्डनं करोति, मद्रा करोति ॥ भद्राच्चेति वक्तव्यम् ॥ * ॥ भद्रा करोति नापितः कुमारम् । परिवापणइति किम् । भद्रं करोति ॥

समासान्ताः ॥ ६८ ॥

अधिकारोयमापादपरिसमाप्ते,र्ये प्रत्यया विहितास्ते समासस्यान्तावयवा एकदेशा भवन्ति, । तद्ग्रहणेन गृह्यन्तइति वेदितव्यम् । प्रयोजनमव्ययीभावद्विगुद्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञाः । उपराज,मधिराजम् । नाव्ययीभावादित्येष विधिर्भवति । अनश्चेति टच् । द्विपुरी, त्रिपुरीति । द्विगोरिति ङीब्भवति । कटकवलयिनी । शङ्खनूपुरिणी * । द्वन्द्वोपता-

* कोशनिषदिनी । सकृत्त्वचिनी । पा० २ ।

धगर्थादिति निर्भवति । विधुरः । प्रधुरः । तत्पुरुषे तुल्येत्येष स्वरो भवति। उच्चैर्धुरः । नीचैर्धुरः । बहुव्रीहौ प्रकृत्या पूर्वपदमित्येतद्भवति ॥

न पूजनात् ॥ ६९ ॥

यान् शब्दानुपादाय समासान्ता विधीयन्ते राजाहःसखिभ्यष्टजित्येवमादीन् यदा ते पूजनात् पूजनवचनात्परे भवन्ति तदा समासान्तो न भवति । सुराजा । अतिराजा । सुगौः । अतिगौः ॥ पूजायां स्वतिग्रहणं कर्तव्यम् ॥ * ॥ इह मा भूत् । परमराजः । परमगव इति ॥ प्राग्बहुव्रीहिग्रहणं च कर्तव्यम् ॥ * ॥ बहुव्रीहौ सक्थ्यक्ष्णोरित्येवमादौ प्रतिषेधो न भवति । सुसक्थः । अतिसक्थः । स्वक्षः । अत्यक्षः ॥

किमः क्षेपे ॥ ७० ॥

क्षेपे यः किंशब्दस्ततः परस्य समासान्तो न भवति । किंराजा यो न रक्षति । किंसखा योऽभिद्रुह्यति । किंगौर्यो न वहति । किं क्षेप इति समासः * । क्षेप इति किम् । कस्य राजा, किंराजः । किंसखः । किंगवः ॥

नञस्तत्पुरुषात् ॥ ७१ ॥

नञः परे वक्ष्यमाणा ये राजादयस्तदन्तात्तत्पुरुषात्समासान्तो न भवति । अराजा । असखा । अगौः । तत्पुरुषादिति किम् । अनृचो माणवकः । अधुरं शकटम् ॥

पथो विभाषा ॥ ७२ ॥

नञस्तत्पुरुषादिति वर्तते । नञः परो यः पथिन्शब्दस्तदन्तात्तत्पुरुषात्समासान्तो विभाषा न भवति । पूर्वेण नित्यः प्रतिषेधः प्राप्तो विकल्प्यते । अपथम् । अपन्थाः ॥

बहुव्रीहौ संख्येये डजबहुगणात् ॥ ७३ ॥

संख्येये यो बहुव्रीहिर्वर्तते तस्मादबहुगणान्ताड्डच् प्रत्ययो भवति । संख्ययाव्ययासन्नेति यो बहुव्रीहिस्तस्येदं ग्रहणम् । उपदशाः । उपविंशाः ।

---

* किं क्षेप इति समास इत्यधिकमत्र, परं त्वयमपपाठः पदमञ्जर्यां दर्शनात् ।

उपत्रिंशाः । आसन्नदशाः । अदूरदशाः । अधिकदशाः । द्विचाः । पञ्चषाः । पञ्चदशाः । संख्येयइति किम् । चित्रगुः । शबलगुः । अबहुगणादिति किम् । उपबहवः । उपगणाः । अत्र स्वरे विशेषः ॥ डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं कर्तव्यं निस्त्रिंशाद्यर्थम् ॥ * ॥ निर्गतानि त्रिंशतः, निस्त्रिंशानि वर्षाणि देवदत्तस्य । निश्चत्वारिंशानि यज्ञदत्तस्य । निर्गतस्त्रिंशताङ्गुलिभ्यो, निस्त्रिंशः खड्गः ॥

ऋक्पूरब्धूःपथामानक्षे ॥ ७४ ॥

बहुव्रीहाविति न स्वर्य्यते । सामान्येन विधानम् । ऋक् पुर् अप् धुर् पथिन् इत्येवमन्तानां समासानामकारः प्रत्ययो भवति समासान्तोऽनक्षे । सामर्थ्याद्धुर एतद्विशेषणमृगादीनाञ्च भवति । अक्षसंबन्धिनी या धूः तदन्तस्य न भवति । अनृचः । बह्वृचः । अर्द्धर्च्चः । पुर् । ललाटपुरम् । नान्दीपुरम् । अप् । द्वीपम् । अन्तरीपम् । समीपम् । धुर् । राजधुरा । महाधुरा । पथिन् । जलपथः । अनक्षइति किम् । अक्षस्य धूः, अक्षधूः । दृढधूरक्षः ॥ अनृचो माणवके ज्ञेयो, बह्वृचश्चरणाख्यायाम् ॥ अनृचो माणवकः । बह्वृचो ब्राह्मणः । अनृक् साम । बह्वृक् सूक्तमित्यत्र न भवति ॥

अच् प्रत्यन्ववपूर्वात्सामलोम्नः ॥ ७५ ॥

प्रति अनु अव इत्येवंपूर्वात्सामान्ताल्लोमान्ताच्च समासादच् प्रत्ययो भवति । प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमम् । अनुलोमम् । अवलोमम् ॥

कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः ।
गोदावर्य्याश्च नद्याश्च संख्याया उत्तरे यदि ॥

कृष्णभूमः । पाण्डुभूमः । उदग्भूमः । पञ्चनदम् । सप्तगोदावरम् । नदीभिश्चेत्यव्ययीभावः ॥ भूमेरपि संख्यापूर्वाया अच् प्रत्यय इष्यते ॥ द्विभूमः प्रासादः । त्रिभूमः । दशभूमकं सूत्रम् ॥ अन्यत्रापि च दृश्यते ॥ पद्मनाभः । ऊर्णनाभः । दीर्घरात्रः । समरात्रः । अरात्रः । तदेतत्सर्व्वमिह योगविभागं कृत्वा साधयन्ति ॥

Digitized by Google

अक्ष्णोऽदर्शनात् ॥ ७६ ॥

अजित्यनुवर्त्तते । दर्शनादन्यत्र यो ऽक्षिशब्दस्तदन्तादच् प्रत्ययो भवति । लवणाक्षम् । पुष्कराक्षम् । उपमितं व्याघ्रादिभिरिति समासः* । अदर्शनादिति किम् । ब्राह्मणाक्षि । कथं कबराक्षं गवाक्षमिति । अश्वादीनां मुखप्रच्छादनार्थं बहुच्छिद्रं कबराक्षं तेनापि हि दृश्यते गवाक्षेण च । नैष दोषः । चक्षुःपर्यायवचनो दर्शनशब्दः, प्रायद्भवचन इहाश्रीयते ॥

अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥ ७७ ॥

अच्प्रत्ययान्ता एते शब्दा निपात्यन्ते । समासे व्यवस्थापि निपातनादेव प्रतिपत्तव्या । आद्यास्त्रयो बहुव्रीहयः । अदृश्यान्यविद्यमानानि वा चत्वारि यस्य सोऽचतुरः । विगतानि चत्वारि यस्य स विचतुरः । शोभनानि चत्वारि यस्य स सुचतुरः । ततः परे एकादश द्वन्द्वाः । स्त्री च पुमांश्च, स्त्रीपुंसौ । इह न भवति स्त्रियाः पुमान् स्त्रीपुमानिति । धेनुश्च अनड्वांश्च, धेन्वनडुहौ । ऋक्च साम च ऋक्सामे । वाक्च मनश्च, वाङ्मनसे । अक्षि च भ्रुवौ च, अक्षिभ्रुवम् । दाराश्च गावश्च, दारगवम् । ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम् । टिलोपो निपात्यते । पादौ च अष्ठीवन्तौ च पदष्ठीवम् । पादस्य पद्भावो निपात्यते । नक्तं च दिवा च, नक्तंदिवम् । सप्तम्यर्थवृत्तयोरव्यययोः समासोपि निपातनादेव । रात्रौ च दिवा च रात्रिंदिवम् । पूर्वपदस्य मान्तत्वं निपात्यते । अहनि च दिवा च, अहर्दिवम् । ननु च पर्यायावेतौ कथमनयोर्द्वन्द्वः, वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः । एको ऽव्ययीभावः साकल्ये । सरजसमभ्यवहरति । बहुव्रीहौ न भवति । सह रजसा, सरजः पङ्कजमिति । ततस्तत्पुरुषः । निश्चितं श्रेयो, निःश्रेयसम् । निःश्रेयस्कः पुरुष इत्यत्र न

* उपमितमित्यारभ्य समास इत्यन्तोयमपपाठः पदमञ्जर्यां दर्शनात् ।

Digitized by Google

भवति । ततः षष्ठीसमासः । पुरुषस्यायुः, पुरुषायुषम् । द्वन्द्वे न भवति । पुरुषश्च आयुश्च पुरुषायुषी । ततो द्विगुः । द्वे आयुषी समाहृते द्व्यायुषम् । त्र्यायुषम् । इह न भवति । द्वयोरायुः, द्व्यायुः, त्र्यायुरिति । ततो द्वन्द्वः । ऋक्च यजुश्च ऋग्यजुषम् । इह न भवति । ऋग्यजुरस्योन्मुग्धस्य ऋग्यजुरुन्मुग्धः । जातादिपूर्वपदा उक्षशब्दान्तास्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः । बहुव्रीहौ न भवति । जातोक्षा ब्राह्मणः । महोक्षा, वृद्धोक्षेति । ततोऽव्ययीभावः । शुनः समीपमुपशुनम् । टिलोपाभावः संप्रसारणं निपातनादेव । ततः सप्तमीसमासः । गोष्ठे श्वा गोष्ठश्वः ॥ चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानम् ॥ * ॥ त्रिचतुराः । उपचतुराः ॥

ब्रह्महस्तिभ्यां वर्च्चसः ॥ ७८ ॥

ब्रह्महस्तिभ्यां परो यो वर्च्चःशब्दः तदन्तात्समासादच्प्रत्ययो भवति । ब्रह्मवर्च्चसम् । हस्तिवर्च्चसम् ॥ पल्ल्यराजभ्यां चेति वक्तव्यम् ॥ * ॥ पल्ल्यवर्च्चसम् । राजवर्च्चसम् ॥

अवसमन्धेभ्यस्तमसः ॥ ७९ ॥

अव सम् अन्ध इत्येतेभ्यो यः परस्तमःशब्दस्तदन्तात्समासादच् प्रत्ययो भवति । अवतमसम् । सन्तमसम् । अन्धतमसम् ॥

श्वसो वसीयःश्रेयसः ॥ ८० ॥

श्वसः परो यो वसीयःश्रेयःशब्दो तदन्तात्समासादच् प्रत्ययो भवति । श्वोवसीयसम् । श्वःश्रेयसम् । मयूरव्यंसकादित्वात्समासः । स्वभावाच्चेह श्वःशब्द उत्तरपदार्थस्य प्रशंसामाशीर्विषयामाचष्टे । श्वःश्रेयसं ते भूयात् । शोभनं श्रेयस्ते भूयादित्यर्थः । श्वोवसीयसमित्यस्यैव पर्यायः ॥

अन्ववतप्ताद्रहसः ॥ ८१ ॥

अनु अव तप्त इत्येतेभ्यः परो यो रहश्शब्दस्तदन्तात्समासादच् प्रत्ययो भवति । अनुरहसम् । अवरहसम् । तप्तरहसम् ॥

Digitized by Google

प्रतेरुरसः सप्तमीस्थात् ॥ ८२ ॥

प्रतेः परो य उरःशब्दस्तदन्तात्समासादच् प्रत्ययो भवति स चेदुरःशब्दः सप्तमीस्थो भवति । सप्तम्यर्थे वर्त्तत इत्यर्थः । उरसि वर्त्तते । विभक्त्यर्थे यदव्ययमिति समासः, प्रत्युरसम् । सप्तमीस्थादिति किम् । प्रतिगतमुरः, प्रत्युरः ॥

अनुगवमायामे ॥ ८३ ॥

अनुगवमित्यच्प्रत्ययान्तं निपात्यते आयामेऽभिधेये । अनुगवं यानम् । यस्य चायाम इति समासः । आयाम इति किम् । गवां पश्चादनुगु ॥

द्विस्तावा त्रिस्तावा वेदिः ॥ ८४ ॥

द्विस्तावा त्रिस्तावेति निपात्यते वेदिश्चेदभिधेया भवति । अच्प्रत्ययष्टिलोपः समासश्च निपात्यते । यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगुणा वा कस्याञ्चिद्विकृतौ तत्रेदं निपातनम् । द्विस्तावा वेदिः । त्रिस्तावा वेदिः । वेदिरिति किम् । द्विस्तावती त्रिस्तावती रज्जुः ॥

उपसर्गादध्वनः ॥ ८५ ॥

उपसर्गात्परो योऽध्वन्शब्दस्तदन्तात्समासाद् अच् प्रत्ययो भवति । प्रगतोऽध्वानं, प्राध्वो रथः । प्राध्वं शकटम् । निरध्वम् । प्रत्यध्वम् । उपसर्गादिति किम् । परमाध्वा । उत्तमाध्वा ॥

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥ ८६ ॥

अङ्गुलिशब्दान्तस्य तत्पुरुषस्य संख्यादेरव्ययादेश्चाच् प्रत्ययो भवति । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम् । त्र्यङ्गुलम् । तद्धितार्थ इति समासः । प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लोपः । अव्ययादेः । निर्गतमङ्गुलिभ्यो, निरङ्गुलम् । अत्यङ्गुलम् । तत्पुरुषस्येति किम् । पञ्चाङ्गुलिः । अत्यङ्गुलिः पुरुषः । तत्पुरुषाधिकारश्च द्वन्द्वाच्चुदषहान्तादिति यावत् ॥

अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ ८७ ॥

Digitized by Google

अहरादिभ्यः परो यो रात्रिशब्दस्तदन्तस्य तत्पुरुषस्याच् प्रत्ययो भवति । चकारात्संख्यादेरव्ययादेश्च । अहर्ग्रहणं द्वन्द्वार्थम् । अहश्च रात्रिश्च, अहोरात्रः । सर्वरात्रः । एकदेशे । पूर्वं रात्रेः, पूर्वरात्रः । अपररात्रः । पूर्वापराधरेति समासः । संख्याता रात्रिः, संख्यातरात्रः । विशेषणं विशेष्येणेति समासः । एवं पुण्या रात्रिः, पुण्यरात्रः । संख्याव्ययादेः खल्वपि । द्वे रात्री समाहृते, द्विरात्रः । त्रिरात्रः । अतिक्रान्तो रात्रिमतिरात्रः । नीरात्रः ॥

अह्नोऽह्न एतेभ्यः ॥ ८८ ॥

राजाहःसखिभ्यष्टजिति वक्ष्यति । तस्मिन् परभूते अहन्नित्येतस्याह्न इत्ययमादेशो भवति एतेभ्य उत्तरस्य । संख्याव्ययादयः प्रक्रान्ताः सर्वनाम्ना प्रत्यवमृश्यन्ते । सामर्थ्याच्चाहःशब्दः पूर्वत्वेन नाश्रीयते । परिशिष्टानां ग्रहणम् । नह्यहःशब्दात्परोऽहःशब्दः संभवति । संख्यायास्तावत् । द्वयोरह्नोर्भवः, द्व्यह्नः । त्र्यह्नः । अव्ययात् । अहरतिक्रान्तः, अत्यह्नः । निरह्नः । सर्वाह्णः । पूर्वाह्णः । अपराह्णः । संख्याताह्नः । पुण्यशब्दात्प्रतिषेधं वक्ष्यति ॥

न संख्यादेः समाहारे ॥ ८९ ॥

संख्यादेस्तत्पुरुषस्य समाहारे वर्त्तमानस्याहःशब्दस्याह्नादेशो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । द्वे अहनी समाहृते, द्व्यहः । त्र्यहः । समाहार इति किम् । द्वयोरह्नोर्भवो, द्व्यह्नः । त्र्यह्नः । तद्धितार्थ इति समासे कृतेऽस्य आगतस्य द्विगोरिति लुक् ॥

उत्तमैकाभ्यां च ॥ ९० ॥

उत्तमैकशब्दाभ्यां च परस्याह्न इत्ययमादेशो न भवति । उत्तमशब्दोऽन्त्यवचनः पुण्यशब्दमाचष्टे, पुण्यग्रहणमेव न कृतं वैचित्र्यार्थम् । पुण्याहः । एकाहः । केचित्तु उपोत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति । तेन संख्यातशब्दादपि परस्य न भवति । संख्याताह इति ॥

राजाहस्सखिभ्यष्टच् ॥ ९१ ॥

राजन् अहन् सखि इत्येवमन्तात्प्रातिपदिकात् टच् प्रत्ययो भवति । महाराजः । मद्रराजः । परमाहः । उत्तमाहः । राज्ञः सखा, राजसखः । ब्राह्मणसखः । इह कस्मान्न भवति मद्राणां राज्ञी, मद्रराज्ञी, लिङ्गविशिष्टपरिभाषया प्राप्नोति । लघ्वक्षरस्य पूर्वनिपाते प्राप्ते राजशब्दस्य सवर्णदीर्घार्थं प्रथमं प्रयोगं कुर्वन्नेतद् ज्ञापयति यस्याकारेण सवर्णदीर्घत्वं संभवति तस्येदं ग्रहणमिति ॥

गोरतद्धितलुकि ॥ ९२ ॥

गोशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति स चेत्तत्पुरुषस्तद्धितलुग्विषयो न भवति । परमगवः । उत्तमगवः । पञ्चगवम् । दशगवम् । अतद्धितलुकीति किम् । पञ्चभिर्गोभिः क्रीतः, पञ्चगुः । दशगुः । तेन क्रीतमित्यागतस्याहीयस्य ठकोऽध्यर्द्धपूर्वद्विगोरिति लुक् । तद्धितग्रहणं किम् । सुब्लुकि प्रतिषेधो मा भूत् । राजगवमिच्छति, राजगवीयति । लुग्ग्रहणं किम् । तद्धित एव मा भूत् । पञ्चभ्यो गोभ्य आगतं पञ्चगवरूप्यम् । पञ्चगवमयम् । दशगवरूप्यम् । दशगवमयम् ॥

अग्राख्यायामुरसः ॥ ९३ ॥

उरःशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति स चेदुरःशब्दोऽग्राख्यायां भवति । अग्रं प्रधानमुच्यते । यथा शरीरावयवानामुच्यते उरः प्रधानम् । एवमन्योऽपि प्रधानभूत उरश्शब्देनोच्यते । अश्वानामुरः, अश्वोरसम् । हस्त्युरसम् । अग्राख्यायामिति किम् । देवदत्तस्योरः, देवदत्तोरः ॥

अनोऽश्मायस्सरसां जातिसंज्ञयोः ॥ ९४ ॥

अनस् अश्मन् अयस् सरस् इत्येवमन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति जातौ संज्ञायां च विषये । उपानसमिति जातिः । महानसमिति संज्ञा । अमृताश्म इति जातिः । पिण्डाश्म इति संज्ञा । कालायसमिति जातिः । लोहितायसमिति संज्ञा । मण्डूकसरसमिति जातिः । जलसरसमिति संज्ञा । जातिसंज्ञयोरिति किम् । सदनः । सदश्मा । सत्सरः ॥

ग्रामकौटाभ्यां च तक्ष्णः ॥ ९५ ॥

जातिसंज्ञयोरिति नानुवर्त्तते । ग्रामकौटाभ्यां परो यस्तक्षन्शब्द-स्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । ग्रामस्य तक्षा, ग्रामतक्षः । बहूनां साधारण इत्यर्थः । कुट्यां भवः कौटः, तस्य तक्षा, कौटतक्षः । स्वतन्त्रः कर्मजीवी । न कस्यचित्प्रतिबद्ध इत्यर्थः । ग्रामकौटाभ्यामिति किम् । राज्ञस्तक्षा ॥

अतेः शुनः ॥ ९६ ॥

अतिशब्दात्परो यः श्वन्शब्दस्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । अतिक्रान्तः श्वान,मतिश्वो वराहः । जववानित्यर्थः । अतिश्वः सेवकः । सुष्ठु स्वामिभक्त इत्यर्थः । अतिश्वी सेवा । अतिनीचेत्यर्थः ॥

उपमानादप्राणिषु ॥ ९७ ॥

उपमानवाची यः श्वशब्दोऽप्राणिषु वर्त्तते तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । आकर्षः श्वेव, आकर्षश्वः । फलकश्वः । उपमितं व्याघ्रादिभिरिति समासः । उपमानादिति किम् । न श्वा, अश्वा लोष्ठः । अप्राणिष्विति किम् । वानरः श्वेव, वानरश्वा ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ एकादशस्तबकावशेषः ॥

तदा नेत्राञ्जलिभिः पपुरिव पुरि बहुदृशस्तस्य शस्तस्यन्दि तद्धाम दोर्भ्यां परिरेभिरेऽभित इव रसनाभिरिव लेलिह्यन्ते स्म ह्यन्ते स्म निष्यन्दा गगनभित्तिचित्रलेखा लेखा इव बभूवुः ॥ ६२ ॥

तस्य तद्धाम पपुरिव । तस्य कीदृशस्य, पुरि तत्तच्चन्द्रशालिकावति निवासे बहुदृशः प्रविष्टदृष्टेः । धाम कीदृशं, शस्तं यथा स्यात् तथा स्यन्दते स्रवतीति धाम्नोऽमृतत्वं व्यञ्जितम् । लेलिह्यन्ते स्म· अतिशयेन लीढवत्यः । हि निश्चये अन्ते· अवसाने तु निष्यन्दा जाड्यभावोदयात् । स्मेति त्वर्थे, यमकपूरणार्थे वा ॥ ६२ ॥

ततश्च कज्जलमिव नयनयोरिन्दीवरमिव श्रवसोरिन्द्रनीलमणिहार इव वक्षसः कस्तूरिकानुलेपनमिव सर्वाङ्गस्य स तासामभवत्, अस्मिन्नेव समये प्रियनर्मसहचरः सहचरमपाकप्रणयः सपरिहासहासकलया किञ्चिदवादीत् ॥ ६३ ॥

चरमः पाकः परिणामो यस्य स चासौ प्रणयश्चेति तथा तेन सह वर्तमानः । परिहासेन सह वर्तमाना या हासकला तया ॥ ६३ ॥

प्रियवयस्य ! वयस्यधिकायमाने मानेन नयनेनाद्भुतं किमवलोक्यते ? ॥ ६४ ॥

अधिकायमाने वयसि सति·अनेन नयनेन किम्·अद्भुतं मा·अवलोक्यते, अपितु सर्वमेवावलोक्यत इति ॥ ६४ ॥

यद्दयं भवानंशुमाली वनपरिसरे पुरतोऽमूः प्रणयप्रसराजीविन्यो राजीविन्यो वडभीस्थलगततया गगनमध्यस्था इव ॥ ६५ ॥

अंशुमाली सूर्यः कान्तिसमूहवांश्च, वनस्य जलस्य काननस्य च परिसरे, प्रणयस्य च प्रसरं समूहम्·आ सम्यग्जीवयितुं शीलं यासां ताः । यद्वा, तम्· आजीवन्ति जीविकात्वेन तमेव·आश्रयन्तीति ताः· राजीविन्यः कमलिन्यः, सूर्यो जले पद्मानि गगने· इत्याश्चर्यम् ॥ ६५ ॥

भवानखिलगुणनिधिः कलानिधिः कलामावहत्यधस्तात् पुरत इयं च कुमुद्वती मुद्वती भवत्यूर्ध्वमिति महत् कौतुकं को तु कं न रञ्जयति चेदं चमत्कारकारकं किमपि, विधिकृतेऽधिकृते किमाश्चर्यमिति छलेन गोकुलकुलललनामुख्यां वार्षभानवीं परिचाययामास ॥ ६६ ॥

मुद्वती· आनन्दविकाशवती, विधिकृते विधातृरचिते, अधिकृते· अधिकारे किम्· आश्चर्यं, तत्कृतनियमवैपरीत्यदर्शनात् ॥ ६६ ॥

तदनु तासु तस्यां चाहितनयनो नयनोत्सवकरोऽवकरोज्झितप्रणयकुसुमसुमहासौरभरभसरागपरभागभागन्तराणां तासामपि हृदयं

सुहृदयं सुष्ठुनिजहृदयेन सदयेन सद्यो विनिमयन्निव निवहदनुराग-सुधाप्रवाहया वाहयामास दिनकृतविच्छेदच्छेदकृदपाङ्गलक्ष्मीतरङ्ग-परम्परया ॥ ६७ ॥

तासु सर्वासु गोपीषु तस्यां श्रीराधायां च· आहितनयनोऽर्पितनेत्रः· अयं श्रीकृष्णः· तासां हृदयं निजहृदयेन सह सदयेन शोभनशुभावहविधिना विनिमयन्निव परिवर्तयितुमिव "अयः शुभावहो विधि"रित्यमरः, दिनकृतस्य विच्छेदस्य छेदकृतोऽपाङ्गलक्ष्म्यास्तरङ्गपरम्परया। प्रथमं ताभिः कृतया स्वं प्रति तासां हृदयं, पश्चात् स्वेनापि कृतया ताः प्रति स्वस्यापि हृदयं युगपदेव· उभयतो धारया, वाहयामास,। तासामपीत्यपिशब्दाद् विनिमयन्नित्यतश्चायमाक्षेपलब्ध एवार्थः। कीदृश्या, नितरां वहन्ननुराग-सुधायाः प्रवाहो यस्यां तया। तासां कीदृशीनाम्, अवक्रोऽजिह्मः प्रणय उपाधिरहितं सख्यं तदेव कुसुमं तस्य सुमहासौरभस्य रभसो वेगश्च राग-परभागोऽनुरागपरमोत्कर्षश्च तौ भजते अन्तरं यासां तासां। यतोऽयं सुहृद्बन्धुः। बन्धुत्वोचितमेव हृदयपरिवर्तनमिति भावः ॥ ६७ ॥

अथ।

अग्रे धूलिभरो गवां खरखुरक्षुण्णाः क्षमायास्ततो
हम्बेत्युच्चगभीरचारुनिनदस्तासामथो मण्डलम्।
तस्यान्ते मुरलीरवस्तदनु च प्रेङ्खोलि नीलं महः
पश्चात् कृष्ण इति क्रमाद्व्रजपुरीपत्योरभूद् गोचरः ॥ ६८ ॥

अथ शब्दो रसान्तरवर्णनारम्भार्थः। क्षमायाः पृथिव्या धूलिभरः। व्रजपुरीपत्यो.र्नन्दयशोदयोः ॥ ६८ ॥

अपिच।

धेनूनामथ वत्सवत्सलतया जातत्वरामूधसा-
माहारस्य च गौरवाल्लघुतरामाबिभ्रतीनां गतिम्।
श्रीकृष्णस्य विलासवेणुनिनदैरामोदघूर्णद्दृशां
हम्बेति श्रुतिरम्यगद्गदगिरां श्रेणी व्रजं प्राविशत् ॥ ६९ ॥

जातत्वरां लघुतरामिति गतिस्त्वरालाघवाभ्यां समामेव गतिं बिभ्रतीनामित्यर्थः । हम्भेति ध्वनिरम्या गद्गदगिरो यासां तासाम् ॥ ६९ ॥

एवं श्रीवनमालिनो गोषु, गोषु च किरणमालिनोऽपि चरणसंचरणसंपादितधरणिपवनासु निजनिलयं गतासु ॥ ७० ॥

किरणमालिनः सूर्यस्यापि गोषु रश्मिषु, चरणानां खुरमूपपदानां संचारेण संपादितं कृतं धरण्याः पवनं पावित्र्यं याभिस्तासु, पक्षे चरणं श्रौतस्मार्तधर्माचरणं तस्य संचारेण संपादितं धरणेर्धरणिस्थसर्वजनस्य पवनं पावित्र्यं याभिस्तासु, सूर्यकिरणोद्गमे सत्येव सर्वधर्मप्रवृत्तेः । निजनिलयं स्वस्वगृहं, पक्षे नितरां जनेरुद्भवस्य लयं नाशम् ॥ ७० ॥

श्रीकृष्णेक्षणक्षणजनितकौतुकेन केनचिदथो कृष्णसहचरजननीजननीराज्यमानसङ्गा व्रजराजवनिता जवनितान्तसत्वरचरणविहारा गोऽवनवनविहारागोचरं गोचरीकृत्य कृत्यनभिज्ञेव तमात्मजमात्मजनवत्सलमालिङ्ग्य ललितगोपुरं पुरं प्रवेशयामास ॥ ७१ ॥

श्रीकृष्णस्य· ईक्षणं दर्शनमेव क्षण उत्सवस्तस्माज्जनितेन, कृष्णसहचराणां जननीजनैर्नीराज्यमानः सङ्गो यस्याः सा, जवेन वेगेन नितान्तसत्वरः· अतिशयत्वरायुक्तश्चरणविहारः पादन्यासो यस्याः सा, तम्· आत्मजं गवाम्· अवने पालने यो वनविहारः· वने क्रीडनं तेन हेतुना· अगोचरं परोक्षीभूतं गोचरीकृत्य साक्षात्कृत्य· आनन्दविह्वलतया कृत्यनभिज्ञेव, ललितं गोपुरं सिंहद्वारं यस्य तत् ॥ ७१ ॥

ततश्च सहैवागता वागतारल्येन मन्दमधुरं मधुरञ्जि गदन्तो दन्तोज्ज्वलकिरणधौताधराः स्वस्वजननीजननीयमाना अपि बालका बालकान्तसाहचर्यचर्ययार्यया नितान्तसौहृदा हृदातिसरसेन व्रजेश्वरीं श्रावयामासुः ॥ ७२ ॥

वाचाम्· अतारल्येन, गाम्भीर्येणेत्यर्थः । मधुरञ्जि मधुनोऽपि रञ्जकं यथा भवत्येवं, । बाला कोमला कान्ता कमनीया सहचरस्य

भावः साहचर्यं सख्यं तस्य या चर्या· आचरणं तया । आर्यया श्रेष्ठया, तादृशसख्यभावाचरणे हेतुनेत्यर्थः । नितान्तं सौहृदं सौहार्दं येषां ते । हृदा मनसा ॥ ७२ ॥

अम्ब ! किं कथनीयमद्यतनमाश्चर्यमाश्चर्यतां केन तत् ॥ ७३ ॥

आः केन तत् कर्म चर्यताम्· आचर्यतां, क्रियतामिति यावत् । आ इति दावानलपानादिकष्टमनुस्मृत्य पीडार्थे प्रयुक्तम् ।

यद्वा, ननु रामकृष्णयोर्यत् किंचिदपि कर्म नित्यमेव यूयं बाल्यादेवाश्चर्यमाश्चर्यमिति वदथैव, तत्र· आ· इति पदेन कोपमभिव्यज्याहुरिति । "आस्तु स्यात् कोपपीडयो"रित्यमरः ॥ ७३ ॥

यदेष बलभद्रो भद्रोज्ज्वलविक्रमोऽक्रमोढखेलारसमात्मसंगोपगोपतनयाकारमसुरमसुरहितं चकार ॥ ७४ ॥

न क्रमेण· ऊढः खेलारसो येन तं, बालकमर्यादातिक्रमात्, न चात्र शैशवचापल्यमेव हेतुर्मन्तव्यः, यतः, आत्मनः संगोपः सम्यग् गोपनं यस्मात् तथाभूतो गोपतनयस्याकारो यस्य तम्, असुरं दैत्यम्, असुभिः प्राणै रहितं त्यक्तम् ॥ ७४ ॥

एष च तव सुतो वसुतोऽसुतोऽपि सुतोषकरोऽस्माकं सकलारिष्टहन्ता हन्तातिकरालं दावदावमखिलगोधननिधननियतं किमापपौ किमाप पौष्कल्यं वाक्सिद्धिरेवास्य यया नाशं गतोऽसौ शंगतोऽसौ च सौरभेयीगणः ॥ ७५ ॥

वसुतो धनैः· असुतः प्राणैश्च सुष्ठु तोषं करोतीति सः । हन्त विस्मये, अतिकरालं दावदावं वनाग्निं । किम्· आपपौ सम्यक् पीतवान्, किं वा वाक्सिद्धिरेवास्य पौष्कल्यं पुष्टिम्· आप प्राप्ता । शं कल्याणम् ॥ ७५ ॥

इति गतेषु तेषु निशान्तं निशान्तं मूर्तिमदिव सकलसुखानां समनन्तरमनन्तरभसं स्वतनयं मणिमङ्गलदीपेन नीराज्य राज्यमान-

Digitized by Google

वपुषं स्वमहसा स्वमहसाधुकारिणी स्वसदने सदनेकलक्ष्मिणि वात्सल्यस्नुतपयोधरा पयोधराङ्कुरमिव करकमलेन करकमलमाधृत्य धृत्यनवस्थिता प्रवेशयामास ॥ ७६ ॥

तेषु निशान्तं गृहं गतेषु सत्सु स्वतनयं नीराज्य । कीदृशं, सकलसुखानां मूर्तिमदिव निशान्तं सदनरूपम् । स्वमहसा स्वकान्त्या राज्यमानवपुषं दीप्यमानशरीरम् । धृतौ धैर्येऽनवस्थिता निष्ठारहिता, स्नेहतरलेत्यर्थः ॥ ७६ ॥

ततश्च सायन्तनो यदि तनोहन्माजेनादिक्रियाकलापः कलापशिखण्डतेर्वालपरिचारकैरकैतवप्रणयश्रद्धावद्धावदातहृदयैर्निर्वाहितः ॥ ७७ ॥

ततश्च सायन्तन उन्मार्जनादिक्रियाकलापो यदि वालपरिचारकैर्निर्वाहितः, तदा कृताहारादिः सन् वहिरेत्य सुखशयितेन गवां निकुरम्बकेण रमणीयासु विशिखासु पदकमलमादधानः सायं दोहदोहदपरे सकलाभीरे सति रेवतीरमणानुजः केनचन कैातुकेन यदि दोग्धुमारेभे तदा तत् आकर्ण्य गोकुलललनाततिनिर्नयनविभ्रमैरिन्दीवरविपिनमयीचकार नभ इत्यन्वयः । अकैतवप्रणयश्च तदुदिता श्रद्धा च दासभावोचिता ताभ्यां वद्धमवदातं शुद्धं हृदयं येषां तैः ॥ ७७ ॥

तदा कृताहारो हारोल्लसद्वक्षाः पटकपटकमनीयस्थिरतडिल्लेखः श्रीखण्डखण्डालेपव्यपदेशदेशकालातीतहिमानीमानीयमानपरभागः कैास्तुभमणिराजव्याजव्यासज्यमानद्युमणिमण्डलः ॥ ७८ ॥

हारोल्लसद्वक्षा इति हाराणां नक्षत्रपङ्क्तित्वं वकपङ्क्तित्वं वा व्यञ्जनागम्यं, तस्य धाराधरत्वेनोपमास्यमानत्वात् । श्रीखण्डखण्डालेपस्य व्यपदेशेन छलेन देशकालातीता तद्देशसमयदुर्लभा हिमानी हिमसंहतिरेव तस्या मा शोभा तया नीयमानः प्राप्यमाणः परभागः शोभा यस्य सः । वर्तमाननिर्देशेन प्राप्तेरविच्छेदाच्छोभायाः प्रतिक्षणनवनवत्वं द्योतितम् । व्यासज्यमानेति ताच्छील्यचानशन्तं, वर्तमानत्वं पूर्ववत् ॥ ७८ ॥

कुण्डलयुगलच्छद्मच्छविगुरुगुरुभार्गवो वदनमण्डलमिषशरन्निशा-निशातनिशाकरः सितोष्णीषकेतवमदमदकलहंसो धाराधर इव निखिलजननिदाघसमयसमयमानोष्णतापहारी ॥ ७६ ॥

कुण्डलयुगलस्य छद्मना छविगुरू कान्त्यधिकौ गुरुभार्गवौ बृहस्पति-शुक्रौ यत्र सः । वदनमण्डलमिषेण शरन्निशायां नितरां शातं सुखं यस्मात् तादृशो निशाकरो यत्र सः । निदाघसमये सम्यक् अयमानाम् आगच्छ-न्तीम् उष्णताम् अपहर्तुं शीलमस्य सः ॥ ७९ ॥

हारीहितो हितोदितेन प्रियनर्मसुहृदा हृदा मूर्तिमतेव समर्प्य-माणं घनसारसारताम्बूलमभ्यवहरन् हरन् सकलजनमनो मनोऽनती-तमधुरिमा धुरि मानभृतामग्रणीर्मणिपादूपादूरीकृतधरणितलास्पर्शो मन्दतरस्पन्दमानपवमानस्यन्दानुमेयपरिपीतवसनो बहिरेत्य ॥ ८० ॥

हारीहितो मधुरचरितः । हितोदितेन अभीष्टरूपहितवादिना । तच्च सुन्दरीजनमोहनादिकमेव ज्ञेयम् । हृदा मनसा मूर्तिमतेति देहेनैव भेदो मनसात्वैक्यमेवेति विवक्षितम् । मानभृतां संमानधारिणां धुरि गणने अग्रणीः । मणिपादू मणिमयपादुका पादे यस्य सः ॥ ८० ॥

पुरतोरणे तोरणेन सुललिते निदाघनिशानिशाभिलषणीय-निशाकरकरनिकरनिरवकरकर्पूरधूलिधूलिधवलितं वलितं नयनसुख-प्रदेशं प्रदेशं परितः ॥ ८१ ॥

पुरतोरणे सिंहद्वारे, तोरणेन वन्दनमालया सुललिते । निदाघ-निशायाम् अनिशं निरन्तरमभिलषणीयो यो निशाकरस्य करनिकरः किरणसमूहः स च कर्पूरस्य धूलिरिव या धूलिः सा च ताभ्यां धवलितं, नयनं सुखं प्रदिशतीति तथा तं प्रदेशं स्थलविशेषं परितः तस्य सम-न्ततः, परितः शब्दयोगे द्वितीया ॥ ८१ ॥

शशधरकान्तकान्तशिलास्यन्दसलिलशीकरनिकरनिर्भरपुरोपवनप-वनवीजनोत्सवपुषा वपुषा विजितगौरीगुरुपोगण्डगण्डशैलसमूहेन

चन्द्रिकारुचिरुचिरतया केवलवलदनुपमालिमालिन्यविषा विषाणनि-करेणेव लक्ष्यमाणेनोक्ष्यमाणेनोत्तमसुखरसैः सुखशयितेन तेन गवां निकुरम्बेण रमणीयासूल्लसत्पुरगोपुरगोचरमणिच्छविशिखासु विशि-खासु ॥ ८२ ॥

सुखशयितेन गवां निकुरम्बकेण रमणीयासु विशिखासु वर्त्मसु पदकमलम् आदधानोऽपश्यत्। गवां निकुरम्बकेण कथंभूतेन, शशधरका-न्तश्चन्द्रकान्तस्तन्नाम्नी या कान्तशिला कान्तियुक्तः प्रस्तरः ततः स्यन्दन्ते स्रवन्ति यानि सलिलानि तेषां शीकरनिकरस्य कणसमूहस्य निर्भरोऽति-शयो यत्र स चासौ पुरोपवनसंबन्धिपवनश्चेति तेन यद्वीजनं तत्कर्तृकं वीजनमित्यर्थः तत एव उत्सवपुषा उत्सवपोषकेण वपुषा विशेषेण जिता गौरीगुरोर्हिमालयस्यापि पौगण्डयुक्ता गण्डशैलसमूहा येन तेन, पौगण्डं कैशोरात् प्रागवस्था तद्युक्ता गण्डशैला इति मध्यमपदलोपी-समासः, केवलं वलतामनुपमानामलीनां भ्रमराणामपि मालिन्यं स्वसौ-न्दर्येण तिरस्कारं वेवेष्टीति तथा तेन, "विष्लृ व्याप्तौ" क्विबन्तः, एवंभूतेन विषाणनिकरेण शृङ्गसमूहेन एव लक्ष्यमाणेन। गाव एवैता न तु चन्द्रिका इति ज्ञायमानेन, उक्ष्यमाणेन सिच्यमानेन, उल्लसन्त्यः पुरगोपुरे पुरद्वारे गोचरा विषयीभूता या मणयस्तासां छविशिखाः कान्त्यग्राणि यासु तासु ॥ ८२ ॥

पटकमलमादधानो दधानोऽभितश्च नयनकमलं कमलं न कुर्वन् क्वचन? ॥ ८३ ॥

क्वचन विषये कं सुखम् अलम् अतिशयेन न कुर्वन् अपि तु सर्वत्रेति वलभ्यारूढायां युवतीश्रेण्यां दृष्टिक्षेपः सूचितः ॥ ८३ ॥

सायं दोहदोहदपरे सकलाभीरे सकलाभीरेक्ष्यमाणो रसकला-भिरेव रेवतीरमणानुजोऽनुजोषमतिकौतुकेन यदि दोग्धुमारेभे ॥ ८४ ॥

दोहदमिच्छा। सकलाभिः सर्वाभी रसकलाभी रसवैदग्धीभी

रेव्यमाणो व्याप्यमानः "रेवृङ् प्लुतौ," प्लुतिर्व्याप्तिः, अनुजोषम्· अनुप्रीति ॥ ८४ ॥

मारेभेन मृद्यमाना राजीवराजीव तदा तदाकर्ण्य गोकुलकुललननातनिरवधीरितगुरुवलभिका वलभिकारोहरोहदुत्साहा साहाय्याय मनोमदनेन मदनेन दत्तकरावलम्बा * लम्बालहरिणनयनविभ्रमैर्नयनविभ्रमैरिन्दीवरवरविपिनमयीचकार नभः ॥ ८५ ॥

मारः काम एव· इभस्तेन मृद्यमाना पीड्यमाना राजीवराजी कमलश्रेणी, वलं च भीश्च तद्वलभि· अवधीरितं तिरस्कृतं गुरुसंबन्धि वलभि यया सा अत एव वलभिकायाश्चन्द्रशालिकाया आरोहे रोहन् प्रादुर्भवन्नुत्साहो यस्याः सा, मनो मदयति मत्तं करोतीति तथा तेन दत्तः करावलम्ब इव यस्याः सा, बालहरिणो हरिणशावकस्तस्य नयनयोर्विभ्रम इव विभ्रमो येषु तैः, विभ्रमो विलासः, नयनविभ्रमैर्लोचनविशिष्टभ्रमणैः ॥ ८५ ॥

एवममूस्तद्वदनसुधाकरसुधाकरतोयां नयनशफरवधूरवधूय स्वयमभितोऽभितोषेण निपतन्तीर्निवारयितुं यदि न शेकुस्तदा नयनसुखदुहं तं दुहन्तं गामवलोकयाञ्चक्रुः ॥ ८६ ॥

अमूर्ललनास्तस्य श्रीकृष्णस्य वदनसुधाकरस्य सुधैव करतोया नदीविशेषस्तां प्रति निपतन्तीरवधूय· अवधूता भूत्वा स्वयमेव ननु ताभिः प्रेरिताः,तं श्रीकृष्णं कीदृशं, नयनसुखं दोग्धि पूरयतीति तथा तम् ॥ ८६ ॥

तद्गोदोहनस्य निराविलसितं विलसितं किमरेऽमरेशा अपि वक्तुं शक्नुवन्ति ? लघीयांसो हि नभसंगमा न भसंगमाय प्रभवन्ति तथापि कविर्वराको वराकोपेन रसनालोभेन वर्णयति ॥ ८७ ॥

---

* अत्रापि परसवर्णो लिपितोऽपि सौष्ठवप्रतिपत्तयेऽवसेयः ।

निराविलं निर्मलं सितं व्यवसितं यत्र तद् विलसितं विलासम् । अमरेशा ब्रह्मादयोऽपि । नभसंगमाः पक्षिणः भं· नक्षत्रं तस्य संगमाय न प्रभवन्ति । वरः श्रेष्ठ आक्रोपो दुर्दमत्वं यस्य तादृशेन रसनालोभेन· इति स्वदैन्यं व्यञ्जयन्नमपि तमेव स्तावयति । तस्य सरस्वती यथा वरं श्रेष्ठमेव· आ सम्यक् कायति शब्दायते· इति तथा रसना आस्वादस्तल्लोभेन ॥ ८७ ॥

तथाहि

पादाग्रे कृतपादुकं त्रिकसमुल्लासोल्लसत्पार्ष्णिकं
मध्ये न्यस्य घटीं पटोन्नमनतः प्रोद्यत्त्विषोर्जानुनोः ।
गोतुन्दव्यतिषङ्गसुन्दरदरक्षोभश्लथोष्णीषकं
पाणिभ्यां क्रमकुड्मलाङ्गुलिपुटं गां दोग्धि दुग्धं हरिः ८८ ॥

त्रिकस्य पृष्ठदण्डाधोभागस्य समुल्लासेन सम्यगुच्चीकरणेन· उल्लसन्तौ· उत्तिष्ठन्तौ पार्ष्णी यत्र तद्यथा स्यात् तथा । जानुनोर्मध्ये घटीं न्यस्य । कीदृशयोः, पटस्य पीताम्बरस्य· उन्नमनतः· उत्कर्षाद्धेतोः प्रोद्यन्ती त्विट् कान्तिर्ययोः । गोतुन्दस्य गोकुक्षेर्व्यतिषङ्गेण परस्परमिलनेन सुन्दरं दरक्षोभमीषदुच्चलितं दरश्लथम्· ईषच्छिथिलबन्धं च· उष्णीषं यत्र तद्यथा स्यात् तथा ॥ ८८ ॥

अपिच

अग्रमङ्गुष्ठतर्जन्योरुन्दयित्वा पयःकणैः ।
क्रमेण गोस्तनं क्षीरमपि क्षरदचक्षरत् ॥ ८९ ॥

उन्दयित्वा· आर्द्रयित्वा । क्षरदपि दुग्धं गोस्तनं क्षारयामास ॥८९॥

तथाहि ।

वत्साद्प्यधिकप्रियो भगवतः पाण्यम्बुजस्पर्शन-
स्नेहस्राविपयःपयोधरपुटा गोर्दुह्यमाना स्वयम् ।

धाराभिः सुगभीरघोषगहनामापूर्य सा दोहनीं
दोहन्यन्तरमेति यावदवनीं तावत् समापुप्लवत् ॥ ६० ॥

अधिकं प्रीणातीत्यधिकप्रीस्तस्य, पाण्यम्बुजस्पर्शनेन यः स्नेहस्तेनैव स्रावि पयो यस्मिंस्तथाभूतं पयोधरपुटं यस्याः सा। दोहन्यन्तरं कर्मभूतं यावत्· एति स्वपयसा पूरयितव्यत्वेन प्राप्नोति ॥ ९० ॥

एवं तदवेक्षणक्षणपरवशानां तासां वल्लभीगतानां भीगतानान्दोलेनापि समुत्कलिकया समुत्कलिकया चञ्चलेनाञ्चलेनाह्वयमीक्षमाणानां मनोरथमनोरथसहस्रेणापि दुर्वहं जनयामास ॥ ६१ ॥

तद्वीक्षणे यः क्षण उत्सवस्तत्परवशानां तदधीनानाम्। आन्दोलः कम्पः· अनान्दोलो निष्कम्पत्वं भिया गुरुभयेन गतो नष्टो योऽनान्दोलस्तेनापि, गुरुभयजनितमकम्पत्वेनापीत्यर्थः, समुत्कलिकया समुत्कण्ठया मुदां कलया सह वर्तमानया, अञ्चलमास्फालेन· ईक्षमाणानां मनोरथम्। अनसां शकटानां रथानां च सहस्रेणापि दुर्वहं जनयामास चकारेति, तदानीं तस्यापि वृद्ध्या परिमाणाधिक्यं द्योतितम् ॥ ९१ ॥

तत्र काञ्चन काञ्चनकान्तलताकाराणां निजसहचरीजनैः सह सहजसौहार्दोदसंभ्रमेण भ्रमेण चास्खलतः स्खलतश्च न भेद्यादात्महृदयं सदयं सरसं च प्रकाशयन्तीनां संलाप आसीत् ॥ ६२ ॥

सहजसौहार्दात् कथंभूतात्, भ्रमेण च भ्रान्त्यापि· अस्खलतः स्खलनशून्यात्। स्खलतश्च खलैरपि न भेद्यात्· न भेत्तुं शक्यात्। अप्यर्थे चकारद्वयं यमकरक्षार्थम्। "संलापो भाषणं मिथः" इत्यमरः ॥ ९२ ॥

अयि सहचरि! चरितमिव मे नयननिर्माणेन यदम्बुधररुचिरस्य रुचिरस्य चिरस्य रस्यतमा पीयते ॥ ६३ ॥

चरितमिव चरितार्थीभूतमिव, यद्यस्मादम्बुधरादपि रुचिरस्य सुन्दरस्यास्य रुचिः कान्तिः· चिरस्य चिरं व्याप्य, रस्यतमा· अतिशयास्वाद्या पीयते ॥ ९३ ॥

किंतु करिष्यामो वपुरिदं पुरि दंदह्यमानमवश्यमेतेन वश्यमेतेन नानाकलाकलापवत्तया ॥ ६४ ॥

वपुरिदमिति वामतर्जन्या स्वं दर्शयन्त्येवाह । पुरि पुरमध्ये दंदह्यमानं गुरुजनसंघर्षणवशाद्गर्हितदाहयुक्तं, भावगर्हायां यङ् । अवश्यम्· एतेन श्रीकृष्णेन वश्यं वशीकर्तुं योग्यं करिष्यामः । एतेन कथंभूतेन नानाकलाकलापवत्तया· एतेन· आ सम्यक्प्रकारेण· इतेन प्राप्तेन ॥ ९४ ॥

तवेयं मे युक्तियुक्तिग्मा मतिरुन्मीलति केलिलतिकेऽलिमन्तरेण कमलिनी मलिनीभावमायाति ॥ ६५ ॥

इयं तिग्मा तीक्ष्णा मतिर्बुद्धिः, युक्तिं युनक्तीति युक्तियुक् ।

नन्वत्र कथमत्याग्रहस्तत्राह हे केलिलतिके· इति, सखीनाम्ना संबोधनम् । अलिं भ्रमरम्· अन्तरेण विना ॥ ९५ ॥

तदपि परमाङ्गने परमाङ्गनेऽस्मदीये समाने समानेतव्योऽयं, पश्य मम मन्त्रकौशलमिति,

साह, कथमिव,

पुनरेषाह, सहचरि ! श्रूयताम् ॥ ६६ ॥

हे परमाङ्गने श्रेष्ठसुन्दरि । परमाङ्गने श्रेष्ठप्राङ्गणे ॥ ९६ ॥

पुरे प्रायोऽस्माकं प्रथमवयसो दुर्दमतया
न दुह्यन्ते गावः प्रसभमभयैः कैरपि जनैः ।
अतो दोहाभावाद्भवति विहते गव्यविभवे
गुरूणां हृद्व्योम्नि ज्वलति नितरां तापतपनः ॥ ६७ ॥

गव्यविभवे दोहाभावाद् विहते भवति सति ॥ ९७ ॥

साह, ततः किम् ।

एषाह,

त्वयैते वक्तव्याः कमलमुखि ! मुग्धाह गुरवः
कथं गा व्यर्थत्वं गमयथ वृथा दोहनमृते ।

यदालोके सद्यो दधति सुखदोह्यत्वमपि ताः
सुदुर्दान्ता यस्मादुपनयत तं दोग्धु स इमाः ॥ ६८ ॥

गा धेनूर्व्यर्थत्वं निष्फलत्वं यदालोके यस्य दर्शने तं जनमुपनयत निकटमानयत ॥ ९८ ॥

तदा तेराख्येयं क्व स कथय कोऽसाविति ततो
भवत्याख्यातव्यं सुमुखि! यदिदं दृश्यत इह ।
ततस्तत्रोद्योगं सखि! रचयितासौ गुरुजनः
स्वकार्येषु प्राज्ञो भवति न कदाप्येव विमुखः ॥ ६६ ॥

इदं यद्दृश्यते कृष्णाकर्तृकं सुखगोदोहनकर्मेत्यर्थः ॥ ९९ ॥

अथ चतुरा साह, तुरासाहमधिव्रजपुटभेदनमधिव्रजपुटभेदनमानन्दकारणं कारणं न करोति? तदुचितमेवैतत् ॥ १०० ॥

अधिव्रजपुटभेदनं व्रजपत्तने तुरासाहम्· इन्द्रं कृष्णं· का· शरणं शरणं न करोति किंतु सर्वा· एव· इत्यासां तद्वैराग्यत्वव्यञ्जनया· अप्सरस्त्वं द्योतितम्, "पत्तनं पुटभेदन"मित्यमरः । कथंभूतम्· अधिव्रजस्य मनोव्यथासमूहस्य पुटभेदनकरम् ॥ १०० ॥

किंत्वयं पित्रोरत्रोररीकृताधीनतया धीनतयापि वर्तमानो न स्वातन्त्र्यमाविष्करोति ।

इयमाह, अलमनयानयानुकूलवार्तया वार्तया तु युक्त्या भूयते ॥ १०१ ॥

उररीकृता· अङ्गीकृता या पित्रोरधीनता तया । धीनतयापि धिया बुद्ध्या· इनतया प्रभुत्वेनापि वर्तमानः । अनयोऽनीतिस्तदनुकूलया वार्तया· अनया· अलम् युक्त्या तु भूयते युक्तिस्तु सर्वतः एवेत्यर्थः । कीदृश्या वार्तया' अल्पया, प्रबलयेत्यर्थः । "वार्ते फल्गुन्यरोगे च त्रिष्वि"त्यमरः ॥ १०१ ॥

श्रूयताम् ।

Digitized by Google

व्रजस्य दुःखे च सुखे च तत्फल-
प्रभोगभाजाविव वत्सलत्वतः ।
श्रुत्वोदितं मद्गुरुभिर्व्रजेश्वरौ
तत्कालमेनं विनियोजयिष्यतः ॥ १०२ ॥

तत्फलस्य दुःखसुखफलस्य प्रभोगं प्रकृष्टं भोगं भजेते आत्मन्यभिमन्येते इति तथा तौ । कुतः । वत्सलत्वतः· व्रजजनं प्रति वात्सल्यात्, कारुण्योत्पादकादित्यर्थः । अतो मद्गुरुभिरुक्तं वचः श्रुत्वा परकीयमुपकारमपि स्वीयमिव मत्वेत्यर्थः ॥ १०२ ॥

अथैवमन्योन्यकौतुककथाप्रसङ्गरङ्गेण रसमयं समयं गमयन्तीषु तासु कृतलीलादोहोऽलीलादोहोचितयाचितो वनमालयालयाय चलितः ॥ १०३ ॥

वनमालया·आचितो वृतः । कीदृश्या, अलीनां भ्रमराणाम्·इला· गिरस्तासां दोहः प्रपूरणं तदुचितया तत्समवेतया, "उच समवाय" इति धातोः "भूगोवाग्वस्त्विडा इला" इत्यमरः ॥ १०३ ॥

चलता चलतारानुकारहारेण हारेण विलसदुरा दुराक्रमश्रीः परितो नयनकमलव्यापारेणानन्दाकूपारेण प्लावयन्निव व्रजनगरनागरीगरीयोगुरुगौरवग्राहग्राहतुडितहृत्तडागानवहेलयालयान्तिकमाससाद ॥ १०४ ॥

हारेण विलसत्· शोभमानम्· उरो वक्षो यस्य सः । हारेण कीदृशेन, चलता चञ्चलेन । चलानां ताराणां नक्षत्राणामनुकारं सादृश्यं हरतीति कर्मण्यण्· तेन·आनन्दाकूपारेण हर्षसमुद्रेण प्लावयन्निव· अतिपरिपूर्णान् कुर्वन्निव । कान् । व्रजनगरनागरीणां गरीयो गुरुतरं यद्गुरुगौरवं तदेव ग्राहो हिंस्रजलजन्तुभेदस्तस्य ग्राहेण ग्रहणेन तुडिताः खण्डिताश्च ते हृत्तडागाश्चेति तान् । "तुड भेदने" इति धातुः । आलयान्तिकं स्वगृहसमीपम् ॥ १०४ ॥

तासां च नयनकमलानि यावदालोकं लोकं विलङ्घ्य तन्मुखाभिमुखाभिसारसारस्येन निर्निमेषाणि जातानि ॥ १०५ ॥

तन्मुखं प्रत्यभिमुखेन· अभिसारो गमनं तत्र सारस्येन सरसतया निर्निमेषाणि हर्षोद्रेकेण विस्मृतनिमेषाणि ॥ १०५ ॥

अनालोकं प्राप्य प्राप्यकारित्वनियमेन पुनर्निवृत्तानीव मनांसि तु ललितविलसितेन तेन सहैव सुखशयने तस्यैव सुषुपुः ॥ १०६ ॥

अनालोकं प्राप्येति, तस्यातिदूरगतत्वादिति भावः । प्राप्यकारित्वेति सर्वेषामेवेन्द्रियाणां नियमः प्राप्यकारित्वमेव तच्च प्राप्त एव स्वस्वविषये स्वस्वकृतिसामर्थ्यं न त्वप्राप्तेऽपीत्यर्थकं, तेन निवृत्तानीवेति स्वाभीष्टविषयालाभेन ततोऽन्यत्र स्वरोचकत्वेनैवावृत्त्या निमीलितानीव जातानीत्यर्थः । मनांसि त्विति, मनसां तु दर्शनश्रवणप्रतियोगिमात्र एव विषये स्वकृतिसामर्थ्यनियमो न त्वप्राप्तप्राप्तताविचार इति तुकारव्यञ्जितोऽर्थः ॥ १०६ ॥

एवमहनि हनिष्यद्द्रावकरालभावकरालवियोगवेदनावेदनास्थानाभावादात्मनो मर्मणि मर्मणि संचारिणी विषविसर्पज्वालेव यातना या तनावुन्मीलति ॥ १०७ ॥

नैदाघिकलीलामुपसंहरति, अहनि दिवसे हनिष्यद्द्रावो हनिष्यन्ता तया याः कराला भास्तीक्ष्णकिरणास्ताभिरवकरं दोषम्· आलाति गृह्णातीत्यवकरालो यो वियोगस्ततो या वेदना पीडा तस्या वेदना ज्ञापनं तच्च स्थानाभावात्, परमप्रेष्ठसखीनां तत्स्थानत्वयोग्यतायां सत्यामपि धीरा भव· एष मिलितप्राय एव ते प्रेयानिति वृथाश्वासस्य तत्क्रियमाणतामाशङ्क्य मद्दुःखमेता अपि याथातथ्येन न प्रत्यभिजानन्तीति मननेन तास्वपि तत्रासंभावनात इति या यातना पीडा, तनौ देहे· उन्मीलति ॥ १०७ ॥

तां खलु दिवसावसानतत्समागमागन्तुकदर्शनेन निदाघप्रदोषदोषराहित्यैधितशोभशोभमानतद्वहिर्विहारदर्शनेन च निर्वापयन्ति तदनुरागिण्यः ॥ १०८ ॥

दिवसावसाने तस्य श्रीकृष्णस्य समागमाद्धेतोरागन्तुकं दर्शनं तेन । निदाघप्रदोषस्य दोषराहित्येन एधिता वर्धिता शोभा यस्य तथाभूतशोभमानस्य तद्बहिर्विहारस्य यद्दर्शनं तेन च इति द्विविधदर्शनस्य सुधासेकत्वं व्यञ्जितम् ॥ १०८ ॥

एवं पुनरहरहरहतपराक्रमः क्रमविवर्धमानकौतुको धेनुगणावने वने विहरन् निदाघसमयं व्यतीयाय ॥ १०६ ॥

व्यतीयाय व्यतिक्रान्तवान् ॥ १०९ ॥

ततश्च ततश्चरितमाधुर्यमहिम्ना मधुरितभुवमतलोऽवनतलोकरसदालोकः सह सहचरैः कुतूहलिना हलिना च धेनुगणावनाय वनाय गच्छन्निच्छन् निजकौतुकखेलां खे लाञ्छितजलदाङ्कुराम् ॥ ११० ॥

अथ क्रमप्राप्तां प्रावृषिकीं लीलां वर्णयितुं प्रथमं तामेव वर्णयति । ततश्च निदाघसमयानन्तरं, चरितस्य माधुर्यमहिम्ना ततो विस्तृतः, खे आकाशदर्पणे लाञ्छितश्चिह्नितो देहवर्ण एव जलदाङ्कुरो यस्यास्तामिति समासे उपमेयलोपः । तां प्रावृषेण्यां लक्ष्मीमालोकयामासेत्यन्वयः ॥ ११० ॥

कुराञ्जन्यकारिणीं चरणपरिचरणपरिभावनया भावनयाभ्यामुपचितां दासीवद्दासीवनपरां परिचर्यायाश्चकितचकितदरोन्मीलच्चपलाचपलाक्षीम् ॥ १११ ॥

कीदृशीं, कोः पृथिव्या राञ्जन्यं कर्तुं शीलं यस्यास्ताम् । रञ्जेः कर्तृसाधनल्युप्रत्ययान्ताद्भावे ष्यञि रूपम् । चरणयोः परिचरणं सेवा तस्य परि सर्वतोभावेन भावनया । भावः प्रेम नयो नीतिस्ताभ्यामुपचिताम् । दासीवद् दासीमिव परिचर्याया आसीवनं सम्यग् यन्यनं तत्पराम् । चकितचकितं यथा स्यात् तथा संभ्रमादिव दर ईषदुन्मीलन्त्यौ चपले विदिग्द्वयाविर्भवद्विद्युताविव चपले चञ्चले अक्षिणी यस्यास्ताम् । “विद्युच्चञ्चला चपलापि चे”त्यमरः ॥ १११ ॥

द्रवद्दलितललितमालतिकालतिकाकुसुमसुमधुरसाजभारिणीं मेदु-

रदुरवापशोभकदम्बकदम्बकविपुलपुलकधारिणीं लघुलघुविगलज्जलदजलदरविन्दुनिकरानन्दभराश्रुस्निग्धमुग्धदिङ्मुखां कुसुमभरभरितककुभावलिवलितगन्धवहललितनिःश्वासाम् ॥ ११२ ॥

मालभारिणीमिति,"इष्टकेषिके"त्यादिना ह्रस्वः । मेदुरं स्निग्धं दुरवापशोभं दुर्लभशोभायुक्तं यत् कदम्बकदम्बकं कदम्बकुसुमवृन्दं तदेव विपुलानि पुलकानि तानि हर्षादिव धर्तुं शीलं यस्यास्ताम् । लघुलघु विगलन्तो जलदसंबन्धिजलानां दरविन्दुनिकरा एवानन्दभराद् अश्रूणि तैः स्निग्धं मुग्धं मनोहरं च दिग्रूपं मुखं यस्यास्ताम् । कुसुमभरभरितायाः ककुभावलेरर्जुनवृक्षसमूहाद् वलितो गन्धवहः सुगन्धपवन एव ललितो निःश्वासो यस्यास्ताम् । "ककुभोऽर्जुन इत्यमरः ॥ ११२ ॥

सरसतरतरङ्गितमदमयूरविकचकलापकचकलापशोभितां तरलतरललितविसकण्ठिकामुक्ताकण्ठिकामुक्तामभितः संचरदिन्द्रगोपगोपदयावकचिह्नां मरकतमणिमञ्जरीजरीजृम्भ्यमाणताहारिहारितनवयवसयवसरसरसातलतल्पाम् ॥ ११३ ॥

सरसतरंतरङ्गितं नाट्यजन्यं येषां तेषां मत्तमयूराणां विकचाः प्रफुल्लाः कलापाः शिखण्डा एव कचकलापः केशसमूहस्तेन शोभिताम् । तरलतरा अतिचपला ललिता विसकण्ठिका बकपङ्क्तय एव मुक्ताकण्ठिकाः प्रोतमुक्तामयकण्ठिकास्ताभिरामुक्तां पिनद्धाम् "आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापि नद्धव"दित्यमरः । कण्ठिका कांठीति ख्याता । अभितः संचरताम् इन्द्रगोपानां बुढन इति ख्यातारुणवर्णसूक्ष्मकीटानां गावो रश्मय एव पदयोर्यावकचिह्नं यस्यास्ताम् । मरकतमणिमञ्जर्या जरीजृम्भ्यमाणताम् अतिप्रकाशं हर्तुं शीलं येषां तथाभूता हारिता हरिद्वर्णा नवा नवीना यवसा घासा एव रूपसादृश्याद्यवास्तैः सरसं रसातलं भूतलं तल्पं यस्यास्ताम् ॥ ११३ ॥

रसद्रसदब्धशब्दमधुरतरकण्ठनादामतिघनायमानवनराजिराजिनं नीलिमानमेव नीलमंशुकमंशुकमनीयं वसानामवसानामलसरसां

तरोलम्बरोलम्बघटाकटाक्षपातामवनीपनीपपरागपरागताधिवासां प्रावृषेण्यां लक्ष्मीमालोकयामास ॥ ११४ ॥

रसदस्य रसवर्षिणो रसदब्दस्य लसन्मेघस्य शब्द एव मधुरतरः कण्ठनादो यस्यास्ताम्। रसदिति रलयोरैक्यात्। रस शब्द इत्यस्य शत्रन्तत्वेन व्याख्यायामर्थे पौनरुक्त्यं स्यात्। अतिघनायमानासु· अतिमेघतुल्यासु वनराजिषु राजिनं दीप्तिशीलं नीलिमानं गुणमेव नीलमंशुकं वस्त्रं वसानां परिदधानाम्। अवसाने परिणामेऽपि· अमलां सरसां चेति वनितान्तरवैलक्षण्यमपि ध्वनितम्। तरसा लम्बन्त इति तरोलम्बा ये रोलम्बा भ्रमरास्तेषां घटेव कटाक्षपातो यस्यास्ताम्। अवनीं पिबति ग्रसति व्याप्नोतीति यावत्· पाति· आच्छाद्य रक्षतीति वा· अवनीपो यो नीपपरागस्तेनैव परागतः प्राप्तः· अधिवासः सुगन्धीकरणं यस्यास्तां प्रावृषेण्यां वर्षाभवां लक्ष्मीं शोभाम् ॥ ११४ ॥

ततश्च समुचितमौषधमिव निदाघतपनतपनतप्तजीवजीवनिकरस्य रस्यतमेन कालभिषजा चिकित्सितं विचिकित्सितं विहाय हायनमध्ये स एव समयो रसमयो रम्यश्चेति सकलैरेव निरणायि ॥ ११५ ॥

निदाघतपनो ग्रीष्मकालिकसूर्यस्तस्य तपनं तापस्तेन तप्तो जीवो जीवनं यस्य तथाभूतस्य जीवनिकरस्य जन्तुसमूहस्य समुचितमौषधमिव रस्यतमेन रसेऽतिनिपुणेन "तत्र साधु"रिति यत्·काल एव भिषग्· वैद्यस्तेन चिकित्सितम्। अतो विचिकित्सितं संदेहं त्यक्त्वा। "विचिकित्सा तु संशय" इत्यमरः ॥ ११५ ॥

ततश्च· उच्छ्वसितमिव धरण्या· उल्लसितमिव धरणीरुहैः· मेदुरितमिव गगनतलेन· आकृष्ट इव दिग्व्रततिव्रातः· निद्रित इव वासरमणिः· प्रोषित इव संतापः· गर्वितमिवमयूरैः· आनन्दितमिव दात्यूहैः· सरसितमिव चातकैः· हसितमिव कदम्बैः·आलिप्तमिव मृगमदैर्जगदण्डभाण्डविवरं· स्नाता इव गिरयः· धौता इव वनवी·

ध्यः· मांसलतया लुप्तानीव पुलिनास्थीनि तरङ्गिणीनां· निस्तरङ्गर-ङ्गाणि कुरङ्गयूथानि तानि नातिदूरचारीणि गोधनानि ॥ ११६ ॥

वासरमणिः सूर्यः । तरङ्गिणीनां नदीनां पुलिनान्येवास्थीनि तानि जलावृतानि शीघ्रोत्प्लुतानि मांसलतयेति । निस्तरङ्गरङ्गाणीति· हरितकशी-रणाच्छादितप्रदेशेषु निश्चल्य हकूर्दनावकाशस्यालभ्यमानत्वात् । यद्वा, वन-दावज्वालादिशान्तेर्निःशेषतरङ्गत्वं रङ्गाणाम् । नातिदूरेति; यत्र कुत्रापि घासबाहुल्यात् । ॥ ११६ ॥

किं बहुना । व्रजपुरपुरन्दरकिशोरस्य च रस्यचरितासीदसौ वर्षा-समयलक्ष्मीः ॥ ११७ ॥

चकारोऽप्यर्थे ॥ ११७ ॥

यच तेषु तेषु दिवसेषु· अतिसौलभ्यलभ्यमानशुभगन्धगन्धतृण-लवलवनमसमसायमानरवरवणद्दशनैः शनैः शनैश्चरणसंचरणसंची-यमानमान्द्यैः सहजमशकदंशदंशविरहेण केवलवलमानरुचिरता-चिरतायै विलसदच्छपुच्छपुटान्दोलदोलद्वालधिललितैः ॥ ११८ ॥

नैचिकीयूथैर्यदि सुखं शयितुमारेभे तदा तरुणतरुमूलमलङ्कुर्वन् स कृष्णो मल्लारं रागमालपन् श्रुतिं निदधे· इत्यन्वयः । नैचिकीयूथैः कीदृशैः । प्रथमं तावदतिसौलभ्येन हेतुना लभ्यमानानां शुभगन्धानां गन्धतृणानां गान्धेल इति पाश्चात्यख्यातघासविशेषाणां लवेन लीलया लवनं छेदनं तत्र यो मसमसायमानो रवस्तेनैव रवणा ध्वनिमन्तो दशना दन्ता येषां तैः । "लवो लेशे विलासे, इति च विश्वः । तृणच्छेदध्वनि-रेव दशनेष्वप्युपचार्यते । ततश्च· एकत्रैव बहुतृणप्राप्त्या शनैः शनैश्च-रणानां संचरणं संचारस्तेन संचीयमानं मान्द्यं येषां तैः । तत्र च श्रीवृ-न्दावनसनुरण्यात् सहजेनैव मसकानां दंशानां च दंशनस्य विरहेण केवलं वलमाना या रुचिरता प्रचुरं सौन्दर्यं तस्य चिरतायै चिरसमयस्थित्यै विलसतोऽच्छस्य निर्मलस्य पुच्छपुटस्य· आन्दोलादेव दोलता चञ्चलेन वालधिना ललितैः ॥ ११८ ॥

चणमात्रसंचारजनितोदरम्भरितया तृणादनालंधियाधियापितवि-श्रामाभिलाषैर्नैचिकीनिचयैर्मेदुरदुरवशाद्दुरवशादशादहरितप्रदेशम-ध्यमध्यवस्थाय भगवदभिमुखं मुखं विधाय रोमन्थमन्थरमलसलस-दादरदरघूर्णमानचटुलेचणचणदैः चणदैर्घ्येण यदि सुखं शयितुमा-रेभे ॥ ११८ ॥

ततश्च चणमात्रसंचारेणैव जनिता या॰ उदरम्भरिता॰ उदरपूर्ति-स्तया हेतुना तृणादने तृणभक्षणे॰ अलंधीः स्पृहाशून्यता तया हेतुना॰ अधियापितः प्रापितो विश्रामाभिलाषो यैस्तैः। ततश्च मेदुरः स्निग्धश्च॰ अथ च दुर्गतोऽव समन्तात्॰ शादः पङ्को यत्र स च॰ अत एव निर्गतो निरस्तः॰ अवशादः खेदो यस्मात् स च शादा नवतृणानि तैर्हरितश्च यः प्रकृष्टो देशस्तस्य मध्यम्॰ अध्यवस्थाय, "शादो जम्बालशष्पयो"रित्य-मरः। अलसं च तत्॰ लसत्॰ आदरो व्यज्यमानो यत्र तच्च दर ईषद् घूर्णमानं च यत्॰ चटुलं सुन्दरम्॰ ईचणमवलोकनं तेन चणदैः श्रीकृष्णो-त्सवदायिभिः ॥ ११९ ॥

तदा सह सहचरबालकैर्बालकैरवसितहसितहततमाः कन्दुकी-कृतनवकदम्बकोरको रचितकन्दुकखेलालसः खे लालसलसदमरनग-रनागरीगरीयोदिदृचावैकल्पकल्पतायामनुग्रहाग्रहात्तसरसतया ततया तत इतो मेघैरेवान्तरान्तरायतामपहाय स्ववशकलितशकलितभावेन यदि तस्थे ॥ १२० ॥

रचितायां कन्दुकखेलायां लसो रसो यस्य सः, रलयोरैक्यात्। खे स्वर्गे लालसा अतिशयस्पृहावत्यो लसन्त्यो या अमरनगरनागर्यस्तासां गरीयसी या दिदृचा तद्धेतुकस्य वैकल्पस्य कल्पतायां प्रबलतायां सत्यां, "कल्पो सज्जनिरामया"वित्यमरः, लालस इति स्पृहार्थकलसेर्यङन्तात् पचा-द्यचि रूपम्, "छायां निजस्त्रीचटुलालसानां मदेन किञ्चिच्चटुलालसाना"-मिति माघप्रमकर्तुरुक्तेस्तस्य दन्त्यान्तत्वमपीष्टम्, अनुग्रहस्याग्रहेण॰ आत्त

गृहीता या सरसता तया॰ आततया विस्तृतया हेतुना मेघैरेव कर्तृभिः॰ अन्तरा मध्ये॰ अन्तरायतां तद्दर्शनव्यवधानताम्॰ अपहाय त्यक्त्वा यदि तस्थे। केन प्रकारेण। स्ववशं स्वाधीनमेव कलितं व्यापारो यत्र तेन आकलितभावेन खण्डखण्डत्वरूपेण ॥ १२० ॥

तदान्तरा विसृमरभानुभानुजालजालस्यलस्यमानः श्रमजलशीकरकरम्बितवदनबिम्बो बिम्बोज्ज्वलमधुराधरो धरोरसि कन्दुकखेलातो विरम्य रम्यतरुतरुणमूलमलङ्कुर्वन् ॥ १२१ ॥

तदा॰ अन्तरा मध्य एव विसृमरं प्रसरणशीलं भानोः सूर्यस्य भानुजालं किरणसमूहस्तज्जेन तस्यासह्यत्वात् तस्माज्जातेन॰आलस्येन लस्यमानः श्लिष्यमाणः। धरोरसि भूतलमध्ये कन्दुकखेलातो विरतो भूत्वा रम्यं स्निग्धच्छायं तरुतरुणस्य वृक्षवर्यस्य मूलम्॰ अलङ्कुर्वन् प्रावृट्काचन सूर्यकिरणा मेघैरमरनागरीपक्षपातिभिर्यदि न व्यवधीयन्ते स्म तदा श्रमजलेत्यादिलक्षणं तात्कालिकं स्ववदनसौन्दर्यतालक्षणमात्रमेव दर्शयित्वा तरुतलमागम्य तद्दृष्टितः स्वयमेव व्यवहितोऽभूदिवेति भावः। अत एव तासां तत्साहाय्यं सम्यक् फलितमिति पुनरपि मेघानामागमनं स्वापराधखण्डनार्थमिवेति भावः ॥ १२१ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलाकाभिधमहाशयविरचित- ॥
॥ मानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य

॥ चतुर्थः परिच्छेदः ॥

॥ शुद्धविज्ञानवाचकनामविषये ॥

१ ॥ शुद्धविज्ञानानां गुणानां * द्रव्याणां च वाचकानि नामानि प्रत्येकं परस्परव्यावृत्तयत्किंचिद्धर्मवन्ति सन्ति ॥—पूर्वप्रदर्शितदिशा सर्वेषां

पदानां साक्षाद्वक्त्रात्मगतविज्ञानमात्रार्थबोधकत्वे ऽपि सूक्ष्मं विचार्यमाणे, शुद्धविज्ञानानां मिश्रितगुणानां प्राकृतद्रव्याणां च वाचकेषु सर्वेषु नामसु परस्परव्यावर्तकः कश्चन विशेषो ऽस्ति । यथा ।

२ ॥ प्रथमं तावच्छुद्धविज्ञानानां द्रव्याणां च वाचकैः पदैर्वास्तविकी सत्तोह्यते ॥—प्रथमतः, शुद्धविज्ञानवाचकानि द्रव्यवाचकान्यव्यवहितोपस्थितिकात्मगतावच्छेदकविज्ञानवाचकानि च पदानि कस्य चिद्वास्तविकीं सत्तामनुमापयन्ति, यथा तेषां मूलप्रकृतिरूपं विज्ञानमाविर्भवति । गुणकदम्बवाचकानि त्वात्मगतविज्ञानपर्यवसायिनि न कानपि विमर्शान् प्रकाशयन्तीति विस्तरेण वक्ष्यमाणपरिच्छेदे निरूपयिष्यते ॥

३ ॥ द्वितीयतः शुद्धविज्ञानवाचकानि गुणवाचकानि च नामानि सर्वदा शाब्दान्यार्थानि च तत्तद्विशेषजातीनामसाधारणस्वरूपाणि बोधयन्ति ॥—परं तु प्राकृतिकद्रव्यवाचकानि नामानि तत्तद्द्रव्यविशेषजातीनां शाब्दान्येव स्वरूपाणि सदा बोधयन्तीति विशेषतो द्रव्यनामविषयके परिच्छेदे प्रदर्शयिष्यते ।

४ ॥ शुद्धविज्ञाननामानि न लक्षयितुं शक्यन्ते ॥—मिश्रविज्ञानवाचकानां लक्षणस्य संभवे ऽपि शुद्धविज्ञानवाचकानां नाम्नां लक्षणं भवितुं नार्हति तत्र कानि पदानि लक्षणयोग्यानि कानि नेति त्वद्याप्यनिश्चितमेव । मन्ये तादृशनिश्चयाभावेनैव प्रायशो मनुष्यसंभाषणे महागूढता महाविवादश्चोद्भवतः । तथाहि । के चन लक्षणायोग्यपदानामपि लक्षणानि भवन्तीति संगिरन्ते । अपरे च यदि नियमानुसारेण तादृशलक्षणं कृत्वापि शब्दार्थज्ञानं लक्षणाज्ञानदशातो ऽधिकं स्फुटतरं न स्यात्तर्हि व्याप्यव्यापकार्थबोधकपदकदम्बकृतेन व्याख्यानमात्रेणैव संतोष्टव्यमायुष्मद्भिरिति तान्प्रतिक्षिपन्ति । एतदेव च कानि लक्षणयोग्यानि कानि नेत्यस्य लक्षणसौष्ठवं किं मूलमाश्रयते वृत्यस्य च प्रदर्शनं न सर्वथा प्रकृतोद्देश्यानुपयोगीति प्रायशः पदपदार्थयोर्यथार्थस्वभावप्रकाशनायोपयोक्ष्यते अतस्तद्विस्तरेण निरूपणमर्हति ।

५ ॥ यदि सर्वाणि पदानि लक्षणीयानि स्युस्तदा तेषामनवस्था प्रसज्येत ॥—अनवस्थाभिया न सर्वाणि पदानि लक्षयितुं शक्यन्ते इति पक्षसाधनस्य प्रयासः सर्वेषां लक्षणानि भवितुमर्हन्तीति पक्षसाधनप्रयाससमकक्ष इति संप्रति नारभ्यते । यत एकलक्षणघटकानि पदानि लक्षणान्तरेण लक्षणीयानि स्युस्तर्हि तल्लक्षणघटकान्यपि परेण लक्षणेनेति लक्षणानामनन्तधाराप्रसक्तौ कुत्रान्ततो विरामस्यावसरः, परं तु स्वीय विज्ञानस्वाभाव्याद् नामार्थस्वाभाव्याच्च कुतः कानि चित्पदानि लक्षयितुं शक्यन्ते, कानि चिच्च न, कानि च तानि सन्तीति प्रदर्शयिष्यामः ॥

६ ॥ अथ किं नाम लक्षणम् ॥— अनेकैः पर्यायानात्मकैः पदान्तरैरेकपदस्यार्थविवरणमेव लक्षणं नेतोन्यत्किमपीति मन्ये सर्वतन्त्रानुमतम् । पदानामर्थस्य च तत्तत्पदप्रयोक्तृकल्पितविज्ञानमात्रात्मकत्वाद् यदा यत्किंचित्पदवाच्यं वक्त्रात्मगोचरं विज्ञानं पदान्तरैः परात्मगोचरीकृतमिव भवति तदा तत्पदस्यार्थः प्रदर्शितो भवति । एतदेव च तत्पदस्य लक्षणं नाम । इत्थं च तस्यार्थो निश्चीयते । स चार्थनिश्चय एव लक्षणस्य प्रयोजनमतः स एव तस्य याथार्थ्यायाथार्थ्यनिर्वचने प्रमाणम् ॥

७ ॥ शुद्धविज्ञानानि कुतो न लक्षणार्हाणि ॥—शुद्धविज्ञानबोधकान्येव पदानि न लक्षयितुं शक्यन्त इति पूर्वमुक्तं तत्रेदं कारणं यद् बहूनि लक्षणघटकानि भिन्नभिन्नानेकविज्ञानबोधकानि पदानि न कथमपि विज्ञानान्तराघटितं शुद्धमेकं विज्ञानं ज्ञापयितुं प्रभवन्ति । अतो बहूनां पर्यायानात्मकानां पदानामेकमात्रवस्तुबोधकत्वस्यासंभवेन पदार्थज्ञापनमात्रार्थकं लक्षणं शुद्धविज्ञानवाचकपदस्थले नावकाशं लभते ॥

८ ॥ अत्रोदाहरणं गतिः ॥—अस्मदीयविज्ञानेषु तद्वाचिषु पदेषु चैतद्भेदस्याज्ञानादेव के चन विद्वांसो महता वंशस्तम्बेन लट्वाया अनुकर्षणमिव केषां चिच्छुद्धविज्ञानवाचिपदानां लक्षणकरणाय निरर्थकं महाप्रयासमारभन्ते । भूयिष्ठैः सुप्रसिद्धैर्लक्षणकरणाचार्यैस्तु केवलं लक्षणासंभवं मत्वैव भूयसां तथाविधानां पदानां लक्षणान्यकृत्वैव परित्य-

न्ताणि । अतो वक्ष्यमाणलक्षणतोऽधिकमस्मिन्विषये किमावश्यकं वागाडम्बरं मनुष्यबुद्ध्या रचयितुं शक्यते ॥

९ ॥ अर्वाचीनाः शास्त्रिणोऽपि विदुषां वागाडम्बरसरणिं परित्यक्तुमपेक्षितमात्रं च भाषितुं प्रयतमानाः शुद्धविज्ञानवाचिपदलक्षणं कर्तुं नाशक्नुवन् । परमाणुवादिनः स्थानान्तरक्रमणं गतिरिति गतिपदार्थनिर्वचनं कुर्वन्तः कस्यचित्पदस्यार्थबोधाय च्युते पर्यायशब्दप्रयोगात् किमधिकं कुर्वन्ति । तत्र च गतिं विहाय क्रमणपदार्थः कोऽस्ति यो गतिपदार्थं निर्वक्तुं शक्नुयात् । प्रक्रमपदार्थः क इति जिज्ञासमाना गतिरित्यतः किमितरत् साधुतरं लक्षणं कर्तुं शक्नुयुः । यतो गतिः स्थानान्तरक्रमणमितिवत् क्रमणपदार्थः स्थानान्तरगतिरितिकथनं यथार्थं तदर्थबोधनसमर्थं च किं न भवति? । यदा द्वे पदे परस्परार्थबोधाय प्रयुज्येते तदाऽयमनुवादो नाम नतु लक्षणम् । अज्ञातान्यतरपदार्थस्य ज्ञापनमात्रमेवेदृशकथनस्य फलं परं भवितुमर्हति, परं तु सर्वेषां कोशस्थशब्दानां तत्तत्समानार्थकपदान्तरलक्षणत्वमभ्युपेत्य गमनं गतेर्लक्षणमिति यावद् न स्वीक्रियते तावद् एवंविधं गतिलक्षणं कथमपि भवितुं नार्हति । पदर्थान्तरस्योत्तरोत्तरावयवैः सह संयोगानुकूलव्यापारो गतिरितिडेकार्टाचार्यानुसारिणां लक्षणमपि साधु परीक्षितं सत्यथार्थगतिलक्षणं नैव सिद्ध्येत ॥

१० ॥ नेत्रपटलेषु बलवदाघातकारिणो भूयिष्ठाः क्षुद्रपरमाणव एव प्रकाश इति ये वदन्ति ते प्रत्युत शास्त्रिणोऽपेक्ष्य सुबोध्यं प्रकाशलक्षणं कथयन्ति । एवं सत्यपि यथैव पुरुषविशेषसन्निहितमार्गेण प्रयान्तीभिर्विद्याधरसुन्दरीभिः कांश्चन मनुष्यानभि दण्डेनाहत्य निखिलं दिनं यावत् प्रक्षिप्तानां सदागतिमतां क्रीडाकन्दुकानां समूह एव प्रकाशपदार्थ इति यदि कश्चन वदेत्तदा यादृशं विज्ञानं पुरुषेषूत्पद्यते तथैवानवधारिताशेषविशेषकं विज्ञानं तैः सुपरिचितैः पदैः प्रकाशपदबोध्यविज्ञानं पुराऽजानानं पुरुषं प्रति प्रकाशपदेन बोधयितुं शक्यते नेतोऽन्यत्किमपि । अस्य पदार्थविवरणस्य याथार्थ्यमभ्युपेत्यापि यदि प्रकाशकारणविज्ञानं याथा-

र्थेनावधारितमभविष्यत् तर्हि यथैव सितधाराया असिपुत्र्या आकारगत्यो-
र्विज्ञानं तथा छुरिकया यादृशं दुःखं जनयितुं शक्यते तादृशदुःखविज्ञा-
नमेवास्माभिरन्वभविष्यत । यतः प्रत्यक्षकारणं प्रत्यक्षं च सर्वात्मनैकेन्द्रि-
यग्राह्ये द्वे विज्ञाने स्तः । ते च द्वे विज्ञाने तथा भिन्ने परस्परदूरवर्तिनी
येन ते द्वे न कथमपि ततो ऽधिके भवितुमर्हतः । अतश्च यदि तिमिरदो-
षोपहतचक्षुषः पुरुषस्य नेत्रयोर्डेकार्टीयकन्दुकश्चिरं नर्तितः स्यात्तर्हि के क्षुद्र-
गोला आसन् द्रव्यान्तरे आघातपदार्थश्च कोऽस्तीति जानतो ऽपि तस्या-
त्मनि तेन न किमपिप्रकाशविज्ञानं तत्सजातीयं वा भवेत् । अतश्च डेका-
र्टाचार्यानुयायिनो ऽस्मत्प्रत्यक्षकारणीभूतं प्रकाशं तज्जन्यं विज्ञानं यथार्थं
प्रकाशं च निपुणतरं विवेचयन्ति ।

११ ॥ शुद्धविज्ञानानि कुतो न लक्षयितुं शक्यन्त इतीतः परं निरूप्यते ॥ —पूर्वोक्तप्रकारेण शुद्धविज्ञानानि तत्तज्जातिनियततत्तदिन्द्रियप्रणालिकाद्वारा संनिकृष्टैर्विषयैरात्मसु संपादितैः संस्कारैरेवोपलभ्यन्ते । अनेन प्रकारेण यदि तानि विज्ञानानि नोपलभ्येरंस्तर्हि संसारे कस्यापि पदस्य व्याख्यानाय प्रयुक्तानि सर्वाणि पदानि न कदाप्यस्मासु स्ववाच्यविज्ञानोद्भावनसमर्थानि भवेयुः । यतः शब्दानां ध्वनिरूपतया तत्तद्ध्वनिविज्ञानातिरिक्तानि न कान्यपि विज्ञानान्यस्मासूद्भावयितुमर्हन्ति, नापि लोकव्यवहारेण यादृशशुद्धविज्ञानानां ये शब्दा लिङ्गानि भवन्ति तेषां विज्ञानानां तेषां शब्दानां च माध्यस्थ्येन ज्ञातात्स्वैरिकात्संबन्धादृते ऽस्मासु केनापि शब्देन किमप्युद्भावयितुं शक्यते । इतो ऽन्यथा विचारयिता प्रयततां नाम केनापि शब्दविशेषेणाम्रफलस्य स्वादमनुभवितुं तादृशप्रसिद्धतरसुस्वादुफलरसविज्ञानविशेषस्य स्वात्मनि सत्त्वार्थमपि । स्वरासनानुभवगोचरविषयविशेषजन्यसंस्कारोपहितस्मरणविषयविज्ञानाभिन्नरसविशेषसजातीयो ऽयमस्तीति यो यावद्बोध्यते स तावदेव तत्सादृश्यमवधारयति । परं तु तत्सादृश्यं लक्षणद्वारा तद्विज्ञानमस्मासु नोत्पादयति, अपि तु ज्ञाततत्त्वामभिरन्यानि शुद्धविज्ञानान्युपस्थापयति, यानि पुनरपि तादृशफलविशेषस्य वास्तविकरसादत्यन्तं भिन्नानि भवन्ति । शब्दानामर्थस्य

स्वाभाविकत्वाभावेन केवलं स्वैरिककल्पना जन्यतया च रूपप्रकाशादिषु सर्वेष्वपरेषु शुद्धविज्ञानेष्वप्ययमेव प्रकारः। किं च प्रकाशस्य रक्तरूपस्य वा न किमपि लक्षणं रक्तप्रकाशान्यतरपदेन स्वयं यावत्तयोरन्यतरविज्ञानमुपस्थाप्यते ततो ऽधिकमस्मासूपस्थापयितुं शक्नुयात्। यतः शब्देन साकारद्रव्यगतरूपप्रकाशविज्ञानोत्पत्तेः प्रत्याशा तु शब्दाश्चक्षुर्ग्राह्या, रूपाणि श्रोत्रग्राह्याणि वा भवेयुरित्येतद्रूपैवास्ति। श्रोत्रेन्द्रियमेवैकं निखिलेतरेन्द्रियकार्यनिर्वाहकं भवत्विति, वयं श्रोत्रेणैव पश्येम जिघ्रेम,स्वादयेम चेत्येतद्रूपेति पर्यवसितोऽर्थः। अतश्च येन केनापि पदेनोपस्थापनीयस्य शुद्धविज्ञानस्य पूर्वं यथोचितेन्द्रियप्रणालिकया ऽऽत्मनि ग्रहणं विना लक्षणनियमानुसारेण मिलितैः कैरप्यन्यैः पदैस्तत्पदस्यार्थो न कदापि ज्ञापयितुं शक्यते। यदर्थबोधकतया यत्पदं येन पूर्वं ज्ञातं स एव तत्तदिन्द्रियविषयस्य स्वेन्द्रियेण सह संनिकर्षे सति तादृशविज्ञानं स्वात्मन्युत्पाद्य लक्षणेन तत्पदस्यार्थं ज्ञातुं शक्नोतीत्ययमेको लक्षणेन पदार्थज्ञानस्य प्रकारः। स्वसमीपवर्तिनां रूपाणां प्रकाशस्य च बोधकानां पदानामर्थस्यावगमाय दृश्यपदार्थानधिकृत्य शिरोव्यथासमुदयं यावत् पुस्तकैर्मित्रपाठनद्वारा च चिरमभ्यस्यन् दृढाभ्यासशीलो ऽन्धः कश्चन पुमान् कदाचिदेवमुच्चैरुद्घोषयामास, यदहं संप्रत्यतिरक्तरूपपदार्थं ज्ञातवान्। ततश्च किमस्त्यतिरक्तरूपमिति तन्मित्रेण परिपृष्टः पटहध्वनिसदृशं तदस्तीत्युत्तरयामास। यो हि केवलं यत्किंचिदर्थविवरणाय प्रयुक्तैः पदैरेव लक्षणेनैव वा कस्य चित्पदस्यार्थज्ञानमाशास्ते सोऽप्येवमेव परेषामपि शुद्धविज्ञानवाचकपदानामर्थं ज्ञास्यति।

१२॥ मिश्रविज्ञानेष्वेतद्विपरीतमेवास्तीति प्रतिमेन्द्रधनुषोरुदाहरणाभ्यां प्रदर्श्यते॥ - एतच्च मिश्रविज्ञानेषु सर्वथा विपरीतमेवास्ति। शुद्धानेकविज्ञानघटिते मिश्रविज्ञाने तत्समुदायघटकानेकतत्तद्विज्ञानवाचकपदशक्त्यैव पुरा ऽवर्तमानानामपि मिश्रविज्ञानानां स्वात्मन्युत्पत्तौ तेषां नामानि सुबोध्यानि भवन्ति। एकपदबोध्येष्वीदृशेषु विज्ञानसमुदायेष्वनेकैः पदैरेकस्य पदस्यार्थज्ञापनात्मकं लक्षणमस्मदिन्द्रियागोचराणां वस्तु-

नां नामानि ज्ञापयितुमर्हन्ति। किं च लक्षणघटकस्यैकस्यापि पदस्याप्रयोगे ऽपि यदा लक्षणेन बोधनीयस्य पुरुषस्यात्मन्यवर्तमानानां केषामपि शुद्धविज्ञानानां बोधाय तानि नामानि प्रयुज्यन्ते तदा तदर्थसमानाकाराणि विज्ञानानि परात्मस्वपि रचयितुं शक्नुवन्ति । इत्थं च जनुषान्धं प्रति प्रतिमापदार्थो यदा चित्रपटद्वारा बोधयितुं न शक्यते तदा पदान्तरैराख्यातो भवितुमर्हति । तत्पुरुषस्येन्द्रियैस्तस्मिन्केवलमाकारविज्ञानस्यैवोत्पादाच्च पुनारूपस्येति लक्षणघटकानि पदानि तदात्मनि रूपविज्ञानं नोद्भावयितुं शक्नुवन्ति । अत एव पुरा किल केन चिदन्धेन कृता चित्रलेखकप्रस्तरमूर्तिकारयोः श्लाघा ऽत्यन्तं विलक्षणा प्रतीयाय । तथा हि । कयोश्चिच्चित्रलेखकशिलामूर्तिकारयोः स्वस्वशिल्पस्योत्कर्षेण परितुष्यतोर्मूर्तिकारो मच्छिल्पोत्कर्षस्य नेत्रहीनेनापि प्रत्यक्षीकर्तुं शक्यतया तदस्त्यधिकं श्लाघनीयमिति साडम्बरमुवाच । ततश्चोभाभ्यामनुमते ऽन्धस्य विमर्शे प्रतिमाचित्रपटयोः सविधावानीतान्धः प्रथममेकेन निर्मितां प्रतिमां परीक्षयामास । तत्र च शरीरस्य मुखस्य च सर्वमप्युच्चावचभावं हस्ताभ्यामनुसंधाय महता विस्मयेन प्रतिमानिर्मातुः शिल्पं श्लाघयामास । चित्रपरीक्षणावसरे तु तस्य हस्तं तस्मिंश्चित्रपटे संयोज्य त्वमधुना शिरः स्पृशसि ततः कपालं नेत्रे नासिकामित्यादिक्रमेण तेन चित्रलेखकेनोक्तो ऽस्मिन् संचालिताभ्यां हस्ताभ्यां कोपि विशेषो मया नोपलब्ध इति स प्रोवाच । अस्ति चैतन्निश्चयेनात्यन्तं श्लाघनीयं दिव्यं शिल्पं यत्राहं न किमप्यन्तरानुभवितुं नापि प्रत्यक्षीकर्तुं शक्नोमि तच्चित्रं भवतः प्रति सर्वांस्तांस्तानवयवान् प्रदर्शयितुं शक्नोति ॥

१३ ॥ यः सर्वाणि तानि तानि रूपाणि जानन्नपि न कदाचिदपीन्द्रधनुरपश्यत् तं प्रतीन्द्रधनुःपदं प्रयुञ्जान आकारस्य दैर्घ्यस्य संस्थितेर्वर्णविशेषाणां क्रमस्य च परिगणनेन तथा सुष्ठु लक्षयितुं शक्नोति येन तत्पदस्यार्थः पूर्णो ऽवगतो भवेत् । परं त्वेतल्लक्षणस्य कामं याथार्थ्ये पूर्णत्वे ऽपि न कदाप्यनेन जन्मान्धं प्रति तत्पदस्यार्थो बोधयितुं शक्यते यतस्तादृशमिश्रविज्ञानघटकानां पृथक् पृथक् शुद्धविज्ञानानां कदा चिदपि

Digitized by Google

तदिन्द्रियगोचरत्वाभावेनाननुभूतत्वाच्च केपि शब्दास्तदात्मनि तानि विज्ञानान्युद्बोधयितुमर्हन्ति ॥

१४ ॥ मिश्रविज्ञानानि यदा ऽनेकैः पदैर्बोध्यन्ते तदा ऽप्येषैवगतिः ॥—पूर्वोक्तप्रकारेण शुद्धविज्ञानान्यस्मासु प्रत्यक्षजननसमर्थानां विषयाणामनुभवेनैवोपलब्धुं शक्यन्ते। यदा ऽनेन प्रकारेण तानि विज्ञानानि स्वमनःसु संगृह्य तद्वाचकानि नामानि जानीमस्तदा लक्षणकरणभूमिका संपद्यते। ततश्च लक्षणेन तादृशशुद्धविज्ञानघटितमिश्रविज्ञाननामानि बोद्धुं शक्नुमः। परं तु यदा किमपि पदं केन चित् पुरुषेणाज्ञातस्य शुद्धविज्ञानस्य बोधाय प्रयुज्यते तदा तं पुरुषं प्रति कैरपि पदैस्तदर्थो ज्ञापयितुं न शक्यते। यदा पुरुषविशेषपरिचितविज्ञानज्ञापनाय किमपि पदं प्रयुज्यते परं तु तत्पदमेतद्विज्ञानलिङ्गमस्तीति स पुरुषो न जानाति तदा तं प्रति तत्परिचितेन तद्विज्ञानवाचकेनापरेण नाम्ना तत्पदार्थो ज्ञापयितुं शक्यते। परंतु न कुत्रापि किमपि शुद्धविज्ञानवाचकं पदं लक्षणयोग्यमस्ति ॥

१५ ॥ चतुर्थतः, शुद्धविज्ञाननामानि न सन्ति संदिग्धानि ॥—परं तु शुद्धविज्ञाननाम्नामर्थनिर्णयाय लक्षणसाहाय्यस्याप्रयोजकत्वेपि नैतद्भावहमपि तु तानि नामानि प्रायशो मिश्रभाववाचकानि द्रव्यवाचकानि च नामान्यपेक्ष्य न्यूनमेव संदिग्धानियतार्थकानि सन्ति यतस्तेषां शुद्धैकविज्ञानार्थकतया भूयिष्ठा मनुष्याः सर्वथा सौकर्येण तदर्थे एकमताः सन्तीति तदर्थे भ्रमसंदेहयोरवसर एव न प्रसरति। श्वैत्यं स्वानुभूतदुग्धहिमादिगतो वर्णविशेष इति यः सकृज्जानाति स यावत्तद्विज्ञानमवधारयति तावच्चिरं तस्य शब्दस्य दुष्प्रयोगं न करोति। यदा च सर्वथा तद्विज्ञानसंस्कारशून्यो भवति तदापि तत्पदस्यार्थे न भ्रमति अपि तु तत्पदार्थं नबुध्यामीति जानाति। सह संमिश्रणीयानां शुद्धविज्ञानानां बाहुल्यमेव न मिश्रभावनामसु संदेहं जनयति, नापि तेषां कल्पितत्वमेवापि तु अज्ञातार्थस्वरूपाणां तदाश्रितानां गुणानां च यथार्थसंख्याया अज्ञानमपि द्रव्यनामसु दुर्ज्ञेयतां संपादयति। परं तु शुद्धविज्ञानस्थले पदस्यार्थः

Digitized by Google

सर्वाण्येकदैव ज्ञायते। किंच तथाविधावयवैर्घटितोऽपि नास्ति यदवयवघटिततया तद्विज्ञानं भिन्नं भिन्नं स्यादतश्च पदस्यार्थोऽपि गूढोऽनियतश्च भवेद् ॥

१६ ॥ उत्तरोत्तरव्यापकजातिष्वारोहणावसराः शुद्धविज्ञानेषु स्वल्पे एव सन्ति ॥—पञ्चमतः, शुद्धविज्ञानानि तेषां नामानि चाधिकृत्येदमपि विचारणीयं यत् तेषु व्याप्यतमापरजातिमारभ्य व्यापकतमपरजातिपर्यन्तमुत्तरोत्तरव्यापकजातिष्वारोहणस्यावसराः स्वल्पे एव सन्ति। अस्य कारणमिदमस्ति यद् व्याप्यतमापरजातेः शुद्धैकविज्ञानरूपतया तस्मान्न किमपि हातुं शक्यते। इत्थं च तद्गतभेदस्य परित्यागे सति उभयसाधारणैकविज्ञानधर्मेण यत्किंचिदपरविज्ञानजातीयं भवेद्। तस्य धर्मस्यैकपदबोध्यतया तयोर्द्वयोर्व्यापिकैकाजातिरित्यभिधीयते। तथाहि। श्वैत्यरक्तविज्ञानयोरेकेनसाधारणधर्मेणैकजातीयत्वस्य जातिपदबोध्यत्वस्य च संपादनाय तयोर्विज्ञानयोर्न कोप्यंशः परिहातुं शक्यते। यथा। मनुष्यात्मकमिश्रविज्ञानाद्विवेकस्य परित्यागात् किंचिदधिकसाधारणविज्ञानधर्मेण मनुष्याणां पशुभिः सहैकजातीयत्वं प्राणीतीसाधारणनामबोध्यता च जायेते। अतश्च यदा मनुष्याः त्रासकरं तत्तद्रूपपरिगणनं परिहर्तुमेकेन जातिपदेन श्वेतरक्तादीनि बहूनि शुद्धविज्ञानानि बुबोधयिषन्ति तदा ते स्वात्मगोचरप्रकारबोधकशब्दद्वारा तावदनेकरूपबोधनं विहाय अन्येन प्रकारेण कथमपि तथा कर्तुं न शक्नुवन्ति। यतो यदा श्वेतरक्तपीतादीनि सर्वाणि रूपाण्येकया परजात्या रूपेत्येकपदेन बोध्यन्ते तदैतत्पदं तान्येव विज्ञानानि बोधयति यानि चानुपप्रत्यक्षेणात्मनि समुद्भवन्ति, नेत्रद्वारैव चानुभूयन्ते। किंच यदा ते रूपशब्दादीनिशुद्धविज्ञानानि बोधयितुमितोऽपि व्यापकजातिपदं रचयितुमिच्छन्ति तदा यः शब्दः सर्वाण्येकैकमात्रेन्द्रियग्राह्यविज्ञानानि बोधयति तेनैतत्कुर्वन्ति। इत्थं गुण इतिपदं स्वीयसार्वत्रिकार्थतात्पर्येण प्रयुक्तं सद् रूपाणि शब्दान् रसान् गन्धान् स्पर्शेन्द्रियमात्रग्राह्यान् धर्मांश्चानेकेन्द्रियग्राह्यविज्ञानोत्पादकविस्तारसंख्यागतिसुखदुःखेभ्यो भेदेन बोधयति ॥

१७ ॥ अष्ठतः, शुद्धविज्ञाननामानि न सर्वथा स्वैराणि सन्ति ॥— अष्ठतः, शुद्धविज्ञाननामानि, द्रव्यनामानि, मिश्रभावनामानि चानेनापि भेदेन भिन्नानि सन्ति । तथाहि । मिश्रभावनामानि सर्वथा स्वैरविज्ञानबोधकानि, द्रव्यनामानि न सर्वथा तथा अपि तु कुत्रचित् प्रतिमूर्तिसंबद्धान्यपि, शुद्धविज्ञाननामानि च सर्वथा वस्तुसत्तात एव परिगृहीतानि, अतश्च न कथमपि स्वैराणि सन्ति । इदं च वैलक्षण्यं तेषामर्थेषु किं वैलक्षण्यं जनयतीति तु वक्ष्यमाणपरिच्छेदे निरूपयिष्यते । शुद्धभावनामानि शुद्धविज्ञाननामभ्यः कुत्रचिदेव भिद्यन्ते ।

॥ इति चतुर्थः परिच्छेदः ॥

भूमिका ।

वेदव्यासस्य मुख्यशिष्यौ द्वावास्तां जैमिनिबोधायनौ तत्राद्यो द्वादशलक्षणीं पूर्वमीमांसापदप्रसिद्धां प्रणिनाय, अपरस्तु उत्तरमीमांसापदप्रसिद्धचतुरध्यायीं व्यासदेवप्रणीतामशेषविशेषतोऽधिगत्यतामुपबबृंहे, तदिदमुपबृंहणं वेदान्तवृत्तिरिति बोधायनवृत्तिरिति च नाम्ना प्रसिषेध प्रच चार च एषा च विशिष्टाद्वैतमतानुगा अतएव श्रीमान् रामानुजार्यः स्वीयब्रह्मसूत्रभाष्ये भगवद् बोधायनकृतां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुस्तदनुसृत्य सूत्राक्षराणि व्याख्यास्यन्त, इत्यभिदधौ प्रत्यपी पदश्च विशिष्टाद्वैतपरतया प्रस्थानपञ्चकम् इदं हि दर्शनं बोधायनप्रभृतिभिर्महर्षिभिः सुप्राचीनतमैर्द्रमिडगुहदेवब्रह्मानन्दिप्रभृतिभिराचार्यैश्चोपजीवितं वृत्तिवार्त्तिकादिनिर्माणेन साम्प्रतमपिनिखिलदर्शननिपुणविद्वज्जनसंसेवितमुपबृंहितं च परःशतसंदर्भरचनया उपलभ्यन्ते च प्राचीनतमा आधुनिकाश्च बहवो ग्रन्था आर्षा नार्षसाधारण्येन लघुबृहन्मध्यभावं गताः, परं तु परैस्तावत्तु प्रसिद्धचक्राङ्कनादिव्यवहारएव कथं चिदवलोक्यते स्वरूपसन् दर्शनस्य तु दर्शनमेव सुदूरहतम् । अथामुष्मिन् दर्शने सर्वश्रुतीनां मुख्यार्थयतो द्वैतमामनन्तीना स्थूलचिदचिद्विशिष्टब्रह्मपरत्वम् अद्वैतमामनन्तीनां

च सूक्ष्मचिदचिद्विशिष्टब्रह्मपरत्वम् स्थूलत्वसूक्ष्मत्वे च व्याकृतनामरूपवत्त्वा व्याकृतनामरूपवत्त्वरूपे एव, अथ ब्रह्मणः सगुणत्वप्रतिपादनपरा मुख्यार्थाः । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतिगणेन ब्रह्मणो नन्तकल्याणगुणाम्नानात् नैर्गुण्यवादोपि श्रुतिस्थो मुख्यार्थ एव ब्रह्मणो हेयगुणराहित्यबोधकत्वात्, अभिहितोयमर्थः प्राच्यैः । नित्यं हेयगुणा वधूननपरा नैर्गुण्यवादाः श्रुतौ स्पष्टार्थाः सगुणोक्तयः शुभगुणप्रख्यापनाद् ब्रह्मणः अद्वैतश्रुतयो विशिष्टविषयानिष्कृष्टरूपाश्रया-भेदोक्तिस्तदिहाखिलश्रुतिहितं रामानुजीयं मतम् इति अस्मिन् वेदसंमते सनातनदर्शने रामानुजीयत्वव्यवहारस्तु रामानुजार्यस्य ब्रह्मसूत्रव्याख्यातृतया परेषामिव अयमाचार्यचरणः कृष्टोत्पत्तेः ९९० अनन्तरं मदरासभागे कस्मिंश्चिद् भूतपुरीनामग्रामे वैशाखमासे शुक्लपक्षे पञ्चम्यामार्द्रानक्षत्रे केशवाचार्यगृहे ववतार अयमार्यचरणो हारीतवंशसमुद्भवो यामुनाचार्यप्रशिष्यश्चेति सुनिश्चितम् प्रायोयमनुहरोधशठकोपाचार्ययुक्तीः यास्तालपत्रेषु प्रायो द्रविडलिप्या लिखिता द्राविडभाषा प्रबद्धाः प्रबन्धनाम्ना, अधुनापि उलभेमहि अयं शठकोपनामार्यचरणः कृष्टोत्पत्तेः ३००० प्राक् भगवति कृष्णे स्वर्याते षोडशदिनानन्तरं समुत्पेदे ताम्रपर्णीक्षालितद्रविडभूमौ क्वापि शूद्रगृहे अयं च तपःप्रभावोपनीतदिव्यकरणकलेवरोपि शास्त्रमार्यादां रिरक्षिषुर्नोच्चचार वर्णमेकं श्रुतेरपि तु भाषास्वेवोपचिकीर्षुर्लोकान् निबबन्ध प्रबन्धान् अनशनोष्टिकामूलसंश्रयो व्यास्यदथ शास्त्रं सहस्रगाथासु अयं च ज्ञानगौरवाद् श्रीसम्प्रदायानुयायिनां ब्रह्मविद्यावंशं समभान्त्सीत् समादृतश्चाभवत् तदिदं बहुलनिबन्धमुत्कृष्टदर्शनं मुद्रणादिविरहात् सर्वजनलोचनगोचरतां न प्रयातीति प्रतियता दर्शनदर्शनाहितौत्सुक्येन संस्कृतपाठशालायाम् अध्यक्षप्रातिनिध्यं गतेन श्रीगाफसाहेबमहाशयेन प्रेरितो दर्शनस्यामुष्य सहजकाठिन्यमप्रचारजकाठिन्यंचावलोक्य सर्वसाधारणबोधसंपादनाय प्रथमतस्तत्त्वत्रयचुलुकायितां दीपिकामिमां प्रस्तौति रामानुजदर्शनमहार्णवपारदृश्वनः स्मृतिसरिच्चिबद्धसेतोः श्रीशालिग्रामाचार्यस्य तनयः काशिकराजकीयसंस्कृतपाठशालायां साङ्ख्यद्वितीयाध्यापकः ॥

रामामिश्रशास्त्री

॥ रामानुजदर्शनम् ॥

॥ तत्त्वत्रयचुलुकम् ॥

॥ यतिपतिमतदीपिका ॥

श्रीवेङ्कटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम् ।
कृष्णेन साकं यतिराजमीडे स्वप्ने च दृष्टान्मम देशिकेन्द्रान् ॥ १ ॥

यतीश्वरं प्रणम्याहं वेदान्तार्य्यं महागुरुम् ।
करोमि बालबोधार्थं यतीन्द्रमतदीपिकाम् ॥ २ ॥

श्रीमन्नारायणएव चिद*चिद्विशिष्टाद्वैतं तत्त्वं । भक्तिप्रपत्तिभ्यां† प्रसन्नः स एव उपायः अप्राकृतदेशविशिष्टः स एव प्राप्य इति वेदान्तवाक्यैः प्रतिपादयतां व्यासबोधायनगुहदेवभारुचिब्रह्मानन्दि‡द्रविडाचार्यश्रीपराङ्कुशनाथयामुनमुनियतीश्वरप्रभृतीनां मतानुसारेण बालबोधार्थं वेदान्तानुसारिणी यतिपतिमतदीपिकाख्या शारीरकपरिभाषा महाचार्य्यकृपावलम्बिना मया यथामतिसङ्क्षेपेण प्रकाश्यते ॥

सर्वं पदार्थजातं प्रमाणप्रमेयभेदेन द्विधाभिन्नम् । प्रमाणानि त्रीण्येव प्रमेयं द्विविधं द्रव्याद्रव्यभेदात् द्रव्यं च द्विविधं जडमजडमिति जडं च द्वेधा प्रकृतिः कालश्चेति । प्रकृतिश्चतुर्विंशत्यात्मिका कालस्तु उपाधिभेदात्त्रिविधः ॥

अजडं तु द्विविधं पराक् प्रत्यगिति अजडं परागपि तथा नित्यविभूतिः धर्मभूतज्ञानं चेति प्रत्यगपि द्विविधः जीवेश्वरभेदात् जीवस्त्रिविधः बद्धमुक्तनित्यभेदात् बद्धोपि द्विविधः बुभुक्षुमुमुक्षुभेदात् बुभुक्षुर्द्विविधः अर्थकामपरो धर्मपरश्चेति धर्मपरो द्विविधः देवतान्तरपरो भगवत्परश्चेति मुमुक्षुर्द्विविधः कैवल्यपरो मोक्षपरश्चेति मोक्षपरो द्विविधः भक्तः प्रपन्न-

---

* चिदचित् पदेन जडजीवौ ।

† भक्तिज्ञानकर्म्मभ्योतिरिक्तं मोक्षमुख्योपायमभिदधति ।

‡ द्रमिड इत्यपि पाठः ।

श्चेति प्रपन्नो द्विविधः एकान्ती परमैकान्ती चेति परमैकान्ती द्विविधो दृप्ता ऽऽर्त्तभेदात् ॥

पञ्चधावस्थित ईश्वरः परव्यूहविभवान्तर्य्याम्यर्चावतारभेदात् पर एकधा व्यूहश्चतुर्द्धा वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदात् केशवादिव्यूहान्तरं मत्स्यादयो विभवाः पुनरनन्ताश्च अन्तर्य्यामी प्रतिशरीरमवस्थितः अर्चावतारस्तु श्रीरङ्गवेङ्कटाद्रिहस्तिगिरियादवाद्रिघटिकाचलादिषु सकलमनुजनयनविषयताङ्गतो मूर्त्तिविशेषः ॥

अद्रव्यं तु सत्वरजस्तमश्शब्दस्पर्शरूपरसगंधसंयोगशक्तिभेदाद्दशधैव एवमुद्दिष्टानामुद्देशक्रमेण लक्षणपरीक्षे क्रियेते ॥

तत्र प्रमाकरणं प्रमाणम् प्रमाणं लक्ष्यं प्रमाकरणत्वं लक्षणम् । यथावस्थितव्यवहारानुगुणज्ञानं प्रमा प्रमालक्ष्यम् । यथावस्थितव्यवहारानुगुणज्ञानत्वं लक्षणम् । ज्ञानं प्रमेत्युक्ते शुक्तिकायामिदं रजतमिति ज्ञाने अतिव्याप्तिरत उक्तं व्यवहारानुगुणमिति । एवमपि तत्रैवातिव्याप्तिर्भ्रान्तिदशायामपि इदं रजतमिति व्यवह्रियमाणत्वात् अत उक्तं यथावस्थितमिति यथावस्थितेतिपदेन संशयान्यथा ज्ञानविपरीतज्ञानव्यावृत्तिः ॥

धर्मिग्रहणे मिथो विरुद्धानेकविशेषस्मरणं संशयः यथा ऊर्द्धताविशिष्टे स्थाणुर्वा पुरुषो वेति ज्ञानम् । अन्यथा ज्ञानं नामधर्मविपर्य्यासः यथा कर्तृत्वेन भासमाने आत्मनि कुयुक्तिभिः कर्त्तृत्वस्य भ्रान्तत्वोपपादनम् । विपरीतज्ञानं नाम धर्मिविपर्य्यासः यथावस्तुनो वस्त्वन्तरज्ञानम् ॥

लक्षणस्य त्रीणि दूषणानि सन्ति अव्याप्त्यतिव्याप्त्यसंभवभेदात् लक्ष्यैकदेशे लक्षणस्यावर्त्तमानत्वमव्याप्तिः लक्ष्यादन्यत्र प्रवर्त्तमानत्वमतिव्याप्तिः लक्ष्ये क्वाप्यविद्यमानत्वमसंभवः यथा चाक्षुषो जीव इत्युक्ते असंभव एव अत्रोक्तदूषणत्रयाभावात्प्रमालक्षणं स्वस्थम् ॥

साधकतमं करणम् अतिशयितं साधकं साधकतमं यस्मिन्सत्यविलम्बेन ज्ञानमुत्पद्यते तदतिशयितमित्युच्यते तेन प्रमाकरणं प्रमाणमिति सिद्धम् । अनधिगतार्थगन्तृप्रमाणमित्यादिकं तु तत्तद्वादिभिरेव निरस्तत्वादनादरणीयम् ॥

तानि प्रमाणानि प्रत्यक्षानुमानशब्दाख्यानि त्रीण्येव ॥

अत्र साक्षात्कारप्रमाकरणं प्रत्यक्षम् अनुमानादिव्यावृत्त्यर्थं साक्षात्कारइति दुष्टेन्द्रियजव्यावृत्यर्थं प्रमेति । तच्च प्रत्यक्षं द्विविधं निर्विकल्पकसविकल्पकभेदात् निर्विकल्पकं नाम गुणसंस्थानादिविशिष्टप्रथमपिण्डग्रहणं सविकल्पकं तु स प्रत्यक्षमशं गुणसंस्थानादिविशिष्टद्वितीयादिपिण्डज्ञानम् । उभयविधमपि एतद्विशिष्टविषयमेव अविशिष्टग्राहिणो ज्ञानस्यानुपलम्भादनुपपत्तेश्च ॥

ग्रहणप्रकारस्तु आत्मा मनसा संयुज्यते मनइन्द्रियेण इन्द्रियमर्थेन इन्द्रियाणां वस्तुप्राप्यकारित्वनियमात् अतो घटादिरूपार्थस्य चक्षुरादिरूपेन्द्रियस्य च सन्निकर्षे सति अयं घटः पटइति चाक्षुषज्ञानं जायते एवमेवस्यार्शनप्रत्यक्षादयोपि द्रव्यग्रहणे संयोगः संबन्धः द्रव्यगतरूपादिग्रहणे समवायानङ्गीकारात्संयुक्ताश्रयणसंबन्धः निर्विकल्पकसविकल्पकभिन्नं प्रत्यक्षं द्विविधम् । अर्वाचीनम् अनर्वाचीनं चेति अर्वाचीनं पुनर्द्विविधम् । इन्द्रियसापेक्षं तदनपेक्षं चेति तदनपेक्षं च द्विविधम् । स्वयं सिद्धं दिव्यं चेति स्वयं सिद्धं योगजन्यं दिव्यं भगवत्प्रसादजन्यम् । अनर्वाचीनं तु इन्द्रियानपेक्षं मुक्तनित्येश्वरज्ञानम् अनर्वाचीनं तु प्रसङ्गादुक्तम् एवं साक्षात्कारप्रमाकरणं प्रत्यक्षमिति सिद्धम् ॥

ननु यथावस्थितव्यवहारानुगुणज्ञानं प्रमेत्युक्तम् एवं च स्मृतेरपि यथावस्थितव्यवहारानुगुणत्वेन प्रामाण्यात् स्मृतेरपि प्रमाणत्वेन परिगणनाच्च त्रीण्येव प्रमाणानीति कथं प्रतिपाद्यते इति चेत् उच्यते स्मृतेः प्रामाण्याङ्गीकारेपि संस्कारसापेक्षत्वात् तस्याः प्रत्यक्षमूलभूतत्वात् मूलभूते प्रत्यक्षे ऽन्तर्भावइति न पृथक् प्रमाणकल्पनम् अतस्त्रीण्येवेति संभवति । स्मृतिर्नामपूर्वानुभवजन्यसंस्कारमात्रजन्यंज्ञानं तत्र चोद्बुद्धः संस्कारो हेतुस्तदुद्बोधश्च सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः इत्युक्तप्रकारेण क्वचित्सदृशदर्शनाद्भवति क्वचिददृष्टात्क्वचिच्चिन्तया आदिशब्देन साहचर्यस्यापि ग्रहणात्तेनापि च भवति सादृश्यजा यथा देवदत्तयज्ञदत्तयोः सदृशयोर्देवदत्तदर्शनेन यज्ञदत्तस्मृतिः द्वितीया यथा यादृच्छिकी कालान्तरा-

नुभूतश्रीरङ्गादिदिव्यदेशस्मृतिः तृतीया यथा चिन्त्यमाने सति श्रीवेङ्कटेशस्य कमनीयदिव्यमङ्गलविग्रहस्मृतिः । चतुर्थी तु सहचरितयोर्देवदत्तयज्ञदत्तयोर्मध्ये अन्यतरदर्शनेन तदन्यतरस्मृतिः सम्यक् पूर्वमनुभूतस्य स्मृतिविषयत्वनियमः क्वचित्कालदैर्घ्याद्व्याध्यादिना वा संस्कारप्रमोषात्स्मृत्यभावः यथा स्मृतेः प्रत्यक्षे ऽन्तर्भावस्तथा सोयं देवदत्त इति प्रत्यभिज्ञाया अपि प्रत्यक्षेन्तर्भावः अस्मन्मते अभावस्य भावान्तररूपत्वात् तज्ज्ञानस्यापि प्रत्यक्षान्तर्भावः भूतले घटात्यन्ताभावो भूतलमेव घटप्रागभावो नाम मृद् एव घटध्वंसश्च कपालमेव प्रायः पुरुषेणा ऽनेन भवितव्यम् एतदूहः संशयउक्तः एतयोरपि प्रत्यक्षेन्तर्भावः पुण्यपुरुषनिष्ठाप्रतिभापिप्रत्यक्षेन्तर्गता ॥

सर्वं विज्ञानं यथार्थमिति वेदान्तविदां मतमित्युक्तत्वाद् भ्रमादिप्रत्यक्षज्ञानं यथार्थमेव अख्यात्यात्मख्यात्यनिर्वचनीयख्यात्यन्यथाख्यात्यन्यथाख्यात्यसत्ख्याति वादिनो निरस्य सत्ख्यातिपक्षस्वीकारात् सत्ख्यातिर्नाम ज्ञानविषयस्य सत्यत्वं तर्हि भ्रमत्वं कथमितिचेद्विषयव्यवहारबाधाद्भ्रमत्वं तदुपपादयामः पञ्चीकरणप्रक्रियया पृथिव्यादिषु सर्वत्र भूतानां विद्यमानत्वात् अतएव शुक्तिकादौ रजतांशस्य विद्यमानत्वात्तज्ज्ञानं भ्रमः शुक्त्यंशभूयस्त्वज्ञानाद्भ्रमनिवृत्तिः । स्वप्नादिज्ञानं तु सत्यमेव तत्तत्पुरुषानुभाव्यतया तत्तत्कालावसानात् रथादीन्परमपुरुषः सृजतीति श्रुत्यावगम्यते पीतः शङ्खः इत्यादौ नयनवर्त्तिपित्तद्रव्यसंभिन्नानयनरश्मयः शङ्खादिभिः सहसंयुज्यन्त तत्र पित्तगतपीतिमाभिभूतः शङ्खगतशुक्लिमानगृह्यते अतः सुवर्णानुलिप्तशङ्खवत्पीतशङ्ख इति प्रतीयते सूक्ष्मत्वात्पीतिमास्वनयननिष्क्रांततया स्वेनैव गृह्यते नत्वन्यैः जपाकुसुमसमीपवर्त्तिस्फटिकमणिरपि रक्त इति गृह्यते तज्ज्ञानं सत्यमेव मरीचिकायां जलज्ञानमपि पञ्चीकरणप्रक्रियया पूर्वोक्तवदुपपद्यते । पञ्चीकरणप्रक्रियातु उत्तरत्र वक्ष्यते दिग्भ्रमोऽपि तथैव दिशि दिगन्तरस्य विद्यमानत्वात् अवच्छेदकमन्तरेण दिगिति द्रव्यान्तरानङ्गीकाराच्च अलातचक्रादौ शैघ्र्यादन्तरालाग्रहणात्तत्तद्देशसंयुक्त तत्तद्वस्तुनएव चक्राकारेण ग्रहणं तदपि सत्यम् । दर्पणादिषु निजमुखादिप्रतीतिरपि

यथार्थो दर्पणादिप्रतिहतगतयो नयनरश्मयो दर्पणादिग्रहणपूर्वकं निज-मुखादिग्रहणन्ति तत्राप्यतिशैघ्र्याद्दन्तरालाग्रहणात्तथा प्रतीतिः द्विचन्द्र-ज्ञानादावपि अङ्गुल्यवष्टम्भतिमिरादिभिर्नायनतेजोगतिभेदेन सामग्रीभेदा-त्सामग्रीद्वयमन्योन्यनिरपेक्षं चन्द्रद्वयग्रहणहेतुर्भवति सामग्रीद्वयं पारमा-र्थिकं तेन द्विचंद्रज्ञानं भवति अतः सर्वज्ञानं सत्यं सविषयं च निर्विशेष-वस्तुनो ग्रहणात् एवंभूतं प्रत्यक्षं भेदविशिष्टमेव प्रथमतो गृह्णाति भेदइति व्यवहारे तु प्रतियोग्यपेक्षा न तु स्वरूपे तेन अनवस्थान्योन्याश्रयदोषोपि नास्ति उपर्युपर्यपेक्षा नवस्था परस्परापेक्षा अन्योन्याश्रयः ननु दशमस्त्व-मसीत्येतदपि प्रत्यक्षं किन्नस्यादिति चेन्न त्वमित्ये तस्य प्रत्यक्षत्वेपि दश-मोहमित्यस्य वाक्यजन्मत्वात् यदि दशमोहमित्यस्य प्रत्यक्षविषयत्वं तर्हि धर्मवास्त्वमसीत्ये तस्यापि प्रत्यक्षत्वं स्यात् अङ्गीकारे अतिप्रसङ्गात् अतएव तत्त्वमसीतिवाक्यस्य नापरोक्षज्ञानजनकत्वम् ॥

एतेन प्रत्यक्षप्रमाकरणं प्रमाणं प्रमाच आत्मचैतन्यमेव चैतन्यं च त्रिविधं अन्तःकरणावच्छिन्नचैतन्यम् अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं विष-यावच्छिन्नचैतन्यं चेति यदा त्रयाणामैक्यं तदा साक्षात्कारः सोपि निर्वि-शेषविषयएव अभेदमेव गृह्णातीत्यादि कुदृष्टिकल्पनानिरस्ता । निर्विक-ल्पकं तु नाम जात्यादियोजनाहीनं वस्तुमात्रावगाहिकिंचिदिदमित्या-दिनैयायकोक्तमपिनिरस्तम् ॥

ननु काणादं पाणिनीयं च सर्वशास्त्रोपकारकमित्युक्तत्वात् कथं गौतममतनिरासइति चेदुच्यते । नास्माभिः कार्त्स्न्येनास्य मतस्य निरासः क्रियते यावदिह युक्तियुक्तं तावत्स्वीक्रियते परकल्पिततटाकोपजीवनवत् न खलु तटाकस्थः पंकोपि स्वीक्रियते अतः परमाणुकारणत्ववेदपौरुषेय-त्वेश्वरानुमानिकत्वजीवविभुत्वादिसामान्यसमवायविशेषाणां पदार्थत्वेन स्वीकारः उपमानादेः पृथक् प्रमाणत्वकल्पनं संख्यापरिमाणपृथक्त्वपर-त्वापरत्वगुरुत्वद्रवत्वादीनां पृथग्गुणत्वकल्पनं दिशोपि द्रव्यत्वकल्पनम् इत्यादिसूत्रकारादिविरुद्धप्रक्रिया नास्माभिः स्वीक्रियते इति न विरोधः ॥

Digitized by Google

इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्य्यस्य प्रथमदासेन श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायां प्रत्यक्षनिरूपणं नाम प्रथमो वतारः ॥

अथानुमानं निरूप्यते व्याप्यस्य व्याप्यत्वानुसंधानात् व्यापकविशेषप्रमितिरनुमितिः तत्करणमनुमानं व्याप्यस्य धूमस्याऽग्निव्याप्यत्वानुसंधानात् व्यापकविशेषप्रमितिः वह्निप्रमितिः अनधिकदेशकालनियतं व्याप्यम् । अन्यूनदेशकालवर्त्तिव्यापकं तदिदमविनाभूतं व्याप्यं तत्प्रतिसंबन्धिव्यापकम् इति तेन निरुपाधिकतया नियतसंबन्धोव्याप्तिरित्युच्यते । सेयं यत्र धूमस्तत्र वह्निरिति व्याप्तिर्भूयोदर्शनाद्गृह्यते व्याप्तिर्द्विविधा अन्वयव्यतिरेकभेदात् । साधनविधौ साध्यविधिरूपेण प्रवृत्ताव्याप्तिरन्वयव्याप्तिः यथा यो यो धूमवान्स सोऽग्निमानिति । साध्यनिषेधे साधननिषेधरूपेण प्रवृत्ता व्याप्तिर्व्यतिरेकव्याप्तिः यथा योऽनग्निः सनिर्धूमइति ॥

सेयमुभयविधाव्याप्तिरुपाधिसंभवे दुष्यति । साध्यव्यापकत्वे सति साधनाव्यापकउपाधिः यथावह्निना धूमे साध्यमाने आर्द्रेन्धनम् उपाधिः मैत्रीतनयत्वेन श्यामत्वे साध्यमाने शाकपाकजत्वमुपाधिः स चोपाधिर्द्विविधः निश्चितः शङ्कितश्चेति निश्चितो यथा विप्रतिपन्नासेवा दुःखहेतुः सेवात्वाद्राजसेवावत् इत्यत्र पापारब्धत्वमुपाधिः अयं तु ईश्वरसेवायां नास्तीति निश्चयादयं निश्चितोपाधिः शंकितो यथा विप्रतिपन्नोजीवः एतच्छरीरावसाने मुक्तिमान् । निष्पन्नसमाधित्वात् शुकादिवत् इत्यत्र कर्मात्यन्तपरिक्षयउपाधिः स च निष्पन्नसमाधौ विप्रतिपन्ने जीवेऽस्ति नास्तीति संदिग्धत्वात् शंकितोपाधिः अतो निरुपाधिकसंबन्धवद्व्याप्यमिति सिद्धम् । व्याप्यं साधनं लिङ्गमित्यनर्थान्तरम् तस्य द्विरूपे अनुमित्यङ्गभूते व्याप्तिः पक्षधर्मता चेति । पञ्चरूपाण्यपि सन्ति तानि च पक्षसत्त्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वम् । असत्प्रतिपक्षत्वं चेति सिषाधयिषितधर्मविशिष्टोधर्मीपक्षः यथा ऽग्निमत्त्वादिसाधने पर्वतादिः । सिषाधयिषितसजातीयधर्मवान्सपक्षः यथा महानसादिः साध्यतज्जातीयशून्योविपक्षः यथा महाह्रदः । प्रबलेन प्रमाणेन पक्षे निश्चि-

तसाध्याभाववत्त्वं बाधितविषयत्वं यथा महाह्रदोऽग्निमानित्यादि तदभावस्त्वबाधितविषयत्वं समबलतया प्रतीयमानप्रमाणोपरोधाभावो सत्प्रतिपक्षत्वम् । एवं भूतं व्याप्यं द्विविधम् अन्वयव्यतिरेकिकेवलान्वयि भेदात् पूर्वोक्तपञ्चरूपोपपन्नंव्याप्यम् अन्वयव्यतिरेकि यथा पर्वतोऽग्निमान्धूमवत्त्वात् यो यो धूमवान्स सोऽग्निमान् यथा महानसो योऽनग्निः स निर्धूमः यथा महाह्रदइति तादृशमेव विपक्षरहितं व्याप्यं केवलान्वयी यथा ब्रह्मशब्दवाच्यं वस्तुत्वात् घटवत् विपक्षाभावात्केवलान्वयी चतूरूपोपपन्नः केवलव्यतिरेकिणि साध्याऽप्रसिद्धेस्तद्व्यतिरेकव्याप्तिर्दुर्ग्रहा अतः केवलव्यतिरेकिनिरासः केवलान्वयिनि अन्वयव्यतिरेकिणि चात्यन्तातीन्द्रियार्थगोचरता निरस्ता तदेतदनुमानं स्वार्थं परार्थं चेति द्विधा विभज्य केचिदाहुः ॥

सर्वेषामनुमानानां स्वप्रतिसंधानादिबलेन प्रवृत्ततया स्वव्यवहारमात्रहेतुत्वमिति स्वार्थानुमानमेवेत्यपरे ॥

तदनुमानबोधकवाक्यं प्रतिज्ञा हेतूदाहरणोपनयनिगमनरूपपञ्चावयवसंयुक्तं तत्र पक्षवचनं प्रतिज्ञा यथा पर्वतोऽग्निमानिति लिंगस्य वचनं हेतुः यथा धूमादिति व्याप्तिनिर्देशकपूर्वकं दृष्टान्तवचनमुदाहरणं तद् द्विधा अन्वयि व्यतिरेकिभेदात् यो धूमवान्सोऽग्निमान् यथा महानसइति अन्वयोदाहरणम् । योऽनग्निः स निर्धूमः यथा महाह्रदइति व्यतिरेकोदाहरणं दृष्टान्तनिदर्शनेन व्याप्ततया पक्षे हेतूपसंहारवाक्यमुपनयः सोपि द्विविधः अन्वयव्यतिरेकभेदात् तथा धूमवानित्यन्वयोपनयः अयं च न यथा निर्धूमइति व्यतिरेकोपनयः हेतुपूर्वकं पक्षे साध्योपसंहारवाक्यं निगमनम् । इदमपि द्विविधं तथैव यथा तस्मादग्निमानित्यन्वयेन निगमनं तस्मादयं निरग्निर्न भवतीति व्यतिरेकेण ॥

एवं पञ्चावयववादिनो नैयायिकाः । प्रतिज्ञाहेतूदाहरणरूपत्र्यवयववादिनो मीमांसकाः ॥

उदाहरणोपनयरूपावयवद्वयवादिनः सौगताः

अस्माकंत्वनियमः क्वचित्पञ्चावयवः क्वचित्त्र्यवयवः क्वचिद्द्व्यवयवः उदाहरणोपनयाभ्यामेव व्याप्तिपक्षधर्मतयोः सिद्धत्वात् तावतैव

अनुमित्युपपत्तेश्च मृदुमध्यमकठोरधियां विस्तरसंग्रहाभ्यां व्यवहार उपपद्यते इत्यनियमएव । एवं पञ्चावयवसंयुक्तः सद्धेतुरेवह्न्यनुमापकः सद्धेतुरित्युक्तत्वात् धूमसदृशधूलीपटलाद्वह्न्यनुमितिः ॥

अन्ये तु हेतुवद्भासमाना हेत्वाभासाः तेचासिद्धविरुद्धनैकान्तिकप्रकरणसमकालात्ययापदिष्टभेदेन पञ्चप्रकाराः तत्रासिद्धस्त्रिविधः स्वरूपासिद्धः आश्रयासिद्धः व्याप्यत्वासिद्धश्चेति स्वरूपासिद्धो यथा अनित्यो जीवश्चाक्षुषत्वात् घटवदिति आश्रयासिद्धस्तु व्योमारविन्दसुरभिअरविन्दत्वात्सरोजारविन्दवत् व्योमारविन्दमाश्रयः सचासिद्धः व्याप्यत्वासिद्धो द्विविधः एकोव्याप्तिग्राहकप्रमाणाभावादपरस्तु उपाधिसद्भावात् आद्यो यथा यत्सत्तत्क्षणिकमिति क्षणिकत्वसत्त्वयोर्व्याप्तिग्राहकप्रमाणासिद्धेः द्वितीयो यथा अग्निषोमीयहिंसा अधर्मसाधिका हिंसात्वात्क्रतुबाह्यहिंसावत् इत्यत्र निषिद्धत्वमुपाधिः अतो हिंसात्वं हेतुः सोपाधिकः ॥

साध्यविपरीतव्याप्तो हेतुर्विरुद्धः तद्यथा नित्या प्रकृतिः कृतकत्वात्कालवत् अत्र कृतकत्वं हेतुः साध्याभावव्याप्तः साध्याभावव्याप्तो हेतुर्विरुद्धः ॥

सव्यभिचारो नैकान्तिकः स च द्विविधः साधारणोऽसाधारणश्चेति पक्षसपक्षविपक्षवृत्तिः साधारणः यथा शब्दो नित्यः प्रमेयत्वात्कालवत् असाधारणस्तु विपक्षसपक्षव्यावृत्तः यथा भूमिर्नित्या गंधवत्त्वादिति ॥

प्रकरणसमस्तु साध्यविपरीतसाधकहेत्वन्तरवान् यथा ईश्वरोऽनित्यः नित्यधर्मरहितत्वात् ईश्वरो नित्यअनित्यधर्मरहितत्वादित्ति अयमेव सत्प्रतिपक्षः ॥

कालात्ययापदिष्टः यस्य हेतोः साध्याभाववान्पक्षः स कालात्ययापदिष्टः यथा अग्निरनुष्णः पदार्थत्वाज्जलवत् अयं च प्रत्यक्षेण उष्णत्वावधारणाद्बाधितः ॥

एवमनुमाने निरूपिते उपमानादेरनुमानादावन्तर्भावः यथा अतिदेशवाक्यार्थस्मरणसहकृतगोसादृश्यविशिष्टपिण्डज्ञानमुपमानं गवयमज्ञा-

Digitized by Google

तत्रापि यथा गौस्तथा गवयइति कुतश्चिदारण्यकवाक्यं श्रुत्वा वनं गतो वाक्यार्थं स्मरन्यदा गोसादृश्यविशिष्टपिण्डं पश्यति तदा तद्वाक्यार्थस्मरणसहकृतगोसदृशपिण्डज्ञानं जायते तदुपमानमित्युच्यते स्मरणरूपत्वात्तस्य प्रत्यक्षे ऽन्तर्भावः व्याप्तिग्रहणापेक्षत्वादनुमाने ऽन्तर्भावः वाक्यजन्यत्वाच्छब्देवान्तर्भावः ॥

अर्थापत्तिर्नाम दिवा अभुञ्जानस्य पुरुषस्य पीनत्वदर्शनाद्रात्रौ भोजनं कल्प्यते तदा एतस्याऽनुमाने ऽन्तर्भावः ।

तर्को नाम व्याप्याङ्गीकारेण व्यापकप्रसञ्जनं तद्यथा पर्वतो वन्हिमान्धूमादिति स्थले धूमोस्तु वह्निर्मास्तु इत्युक्ते यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति एतस्य प्रमाणानुग्राहकत्वं तर्कानुगृहीतप्रमाणपूर्वकत्वावधारणं निश्चयः ।

वीतरागकथावादः ।
पक्षद्वयसाधनवती विजिगीषु कथाजल्पः ।
स्वपक्षस्थापनाहीना तु वितण्डा ।
अविवक्षितशब्दार्थारोपणाद्दूषणं छलम् ।
स्वव्यापिदूषणं जातिः असदुत्तरं जातिरिति वा ।

पराजयहेतुर्निग्रहस्थानम् इत्येषामनुमानाङ्गत्वादनुमाने ऽन्तर्भावः क्वचित् क्वचिन्नैयायिकमतानुसारेणोक्तमिति न विरोधः इत्यनुमानं निरूपितम् ॥

इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्य्यस्य प्रथमदासेन श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायाम् अनुमाननिरूपणं नाम द्वितीयोवतारः ॥

अनुमाननिरूपणानन्तरं शब्दो निरूप्यते अनाप्तानुक्तवाक्यजनिततदर्थविज्ञानं शाब्दज्ञानं तत्कारणं शब्दप्रमाणम् अनाप्तानुक्तइत्युक्तत्वाद्वेदस्य पौरुषेयत्वमतनिरासः । करणदोषबाधकप्रत्ययाभाववद्वाक्यं वा सर्गादौ भगवांश्चतुर्मुखाय पूर्वपूर्वक्रमविशिष्टान्वेदान्स्मृत्वा स्मृत्वा उपदि-

शतीत्युक्त्या वेदस्य नित्यत्वमपौरुषेयत्वं च सिद्धमिति करणदोषाभावो बाधकप्रत्ययाभावश्च ॥

ननु वेदवाक्यानां मीमांसकैः कार्य्यपरतयैव प्रमाणत्वस्वीकारात् सिद्धब्रह्मपरवाक्यानां व्युत्पत्त्यसंभवाच्च कथं प्रामाण्यमिति चेन्न सिद्धब्रह्मपरवाक्यानामपि उपासनारूपकार्य्यान्वयस्वीकारात् पिता ते सुखमास्ते इति लौकिकसिद्धपरवाक्यस्यापि बोधकत्वदर्शनाद्बालानां लोके मातृपितृप्रभृतिभिः अंबातातमातुलचन्द्रादिषु अङ्गुल्या निर्दिश्य तदभिधायकशब्दान् प्रयुञ्जानैः क्रमेण भूयः शिक्षितानां तत्तदर्थबुद्ध्युत्पत्तिदर्शनात् वेदेपि परिनिष्पन्नेप्यर्थे शब्दस्य बोधकत्वं संभवतीति न प्रामाण्यस्य शङ्कावकाशः तर्हि अभिचारादिप्रतिपादकवेदांशस्य कथं प्रामाण्यमिति न शङ्कनीयं तस्य दृष्टफलदर्शनेन अदृष्टस्वर्गादिफलसाधनादौ प्रवृत्तिप्रयोजकत्वात् यूपादित्यवाक्यं तु आदित्यवद्रूपप्रकाशनपरम् । अतः कृत्स्नस्य वेदस्य प्रामाण्यम् ॥

स च वेदः कर्मब्रह्मप्रतिपादकपूर्वोत्तरभागाभ्यां द्विधा भिन्नः आराधनकर्मप्रतिपादकं पूर्वकाण्डम् आराध्यप्रतिपादकमुत्तरकाण्डम् उभयोर्मीमांसयोरैकशास्त्र्यं भागद्वयात्मको वेदः ऋग्यजुःसामाथर्वणरूपेण चतुर्धावस्थितः पुनरनन्तप्रकारश्च ऋगादिबहुप्रकारवान्वेदः मन्त्रार्थवादविधिरूपेण त्रिविधः अनुष्ठेयार्थप्रकाशको मन्त्रः विध्यधीनप्रवृत्त्युत्तंभकवाक्यविशेषोऽर्थवादः हितानुशासनवाक्यमिह विधिः स च त्रिविधः अपूर्वपरिसंख्यानियमभेदात् ते पुनर्नित्यनैमित्तिककाम्यादिभेदाद्बहुविधाः व्रीहीन् प्रोक्षतीत्यपूर्वविधिः मनोमयत्वाद्युपासनविधिः विशिष्टविधिः इमामगृभ्णन्नित्यश्वरसनाविधिः परिसंख्याविधिः गुर्वभिगमनादिविधिर्नियमविधिः सन्ध्योपासादिर्नित्यविधिः जातेष्ट्यादिविधिर्नैमित्तिकविधिः ज्योतिष्टोमादिविधिः काम्यविधिः एवं विध्यर्थवादमन्त्रात्मकस्य वेदस्य छन्दःकल्पः शिक्षानिरुक्तं ज्यौतिषं व्याकरणम् । इत्येतान्यङ्गानि छन्दः । अनुष्टुप् त्रिष्टुबादिप्रतिपादनरूपः श्रौतस्मार्त्तप्रतिपादनपरः कल्पः शिक्षा-वर्णात्मिका निरुक्तमपूर्वार्थप्रतिपादकम् ज्यौतिषम् अध्ययनतदर्थानुष्ठान-

कालनिर्णयात्मकं व्याकरणं तु सुशब्दस्वरादिसमर्थनपरम् एवं साङ्गस्य वेदस्य प्रामाण्यं सिद्धम् ॥

अथ श्रुत्यविरुद्धाचारव्यवहारप्रायश्चित्तादिप्रतिपादकाप्तप्रणीता- स्मृतिः प्रमाणं हिरण्यगर्भादीनामाप्तत्वे ऽपि तेषां गुणत्रयवश्यत्वसंभवात् तत्कर्तृकयोगकपिलादिस्मृतीनां मन्वादिस्मृत्यविरुद्धांशएवप्रमाणं तत्त्ववि- पर्यासाद्विरुद्धांशोऽप्रमाणं वेदोपबृंहणरूपेतिहासपुराणयोरपि प्रामाण्यं स्वतः सिद्धम् । तत्र भारतरामायणयोः क्वचित्क्वचिद्विरोधभानेपि तत्त्वांशे वेदान्तवाक्यवदविरोधे नेयः सर्गादिपञ्चप्रतिपादकपुराणेष्वपि सात्त्विकरा- जसतामसभेदभिन्नेषु तत्त्वाविरोधाभावाद्विरुद्धांशोऽप्रमाणम् अन्यत्सर्वं प्रमाणं पाशुपत्याद्यागमोपि तथैव आगमदिव्यतन्त्रयन्त्रान्तरसिद्धान्तभेद- भिन्नस्य श्रीपञ्चरात्रागमस्य क्वचिदपि वेदविरोधाभावात् कार्त्स्न्येन प्रामा- ण्यम् एवं वैखानसागमस्यापि धर्मशास्त्राणामपि तथैव शाण्डिल्यपराश- रभरद्वाजवसिष्ठहारीतादयोधर्मशास्त्रप्रणेतारः शिल्पायुर्वेदगान्धर्वभरता- दिकमप्युपयुक्तांशे तथैव शिल्पो नाम कर्षणादिगोपुरप्राकारादिप्रतिपा- दकः । आयुर्वेदो वैद्यकम् । गान्धर्वो गानादिनिरूपकः । भरतागमो नृत्यादिविधायकं । पुनश्चतुःषष्टिकलारूपेषु शास्त्रेषु तथोपायपुरुषा- र्थोपयुक्तानि प्रमाणानि बकुल*ाभरणादि सूरिसूक्तयः कार्त्स्न्येन प्रमा- णतराः । श्रीमद्रामानुजाचार्यप्रभृतिभिः प्रणीताः श्रीभा†ष्यादिप्रबन्धाः प्रमाणतमाः । पुरुषस्वातन्त्र्याधीनरचनाविशेषविशिष्टं पौरुषेयम् एतेन काव्यनाटकालङ्कारादीनामपि लक्षणमुक्तं स्यात् एवमाप्तेनोच्चारिताङ्काक्षा योग्यता सन्निधिमल्लौकिकवाक्यान्यपि प्रमाणानि यथा नद्यास्तीरे पञ्च- फलानि सन्तीत्यादीनि । एवं वैदिकलौकिकसाधारणं द्विविधं मुख्यवृत्ति- गौणवृत्तिभेदात् मुख्यवृत्तिरभिधावृत्तिः यथा सिंहशब्दस्य मृगेन्द्रेभिधावृत्तिः योगरूढ्यादिभेदवशाद्बहुविधा मुख्यार्थबाधेसति तदा सबन्धे वृत्तिरौपचा-

* शठकोपाचार्यस्यैव नामान्तरम् ।

† रामानुजाचार्यनिर्मितं ब्रह्मसूत्रभाष्यं श्रीभाष्यं वदते ।

रिक्षी सा द्विविधा लक्षणा गैाणीभेदात्प्रथमा यथा गङ्गायां घोषइत्यत्राधिकरणस्य बाधात्तीरे लक्षणा द्वितीया यथा सिंहो देवदत्तइत्यत्र देवदत्ते शौर्यादिगुणयोगः एवं वैदिकलैाकिकरूपं सर्वं वाक्यजातं सविशेषविषयकं भेदविषयकं च शरीरवाचशब्दानां यथा शरीरिणि पर्यवसानम् एवं भगवच्छरीरभूतब्रह्मरुद्राग्नीन्द्रादिचिद्वाचकशब्दानां तथा शरीरभूतप्रकृतिकालाकाशप्राणाद्यचिद्वाचकशब्दानां शरीरिणि परमात्मनि नारायणे पर्यसानमुपपादयन्त्याचार्याः वेदान्तज्ञानाद्भूत्पत्तिः पूर्य्यते इत्युक्तं नारायणस्य सर्वशब्दवाच्यत्वं सर्वशरीरकत्वमित्यादिकं तु उपरि ईश्वरनिरूपणे प्रतिपादयिष्यामः इतिशब्दोनिरूपितः ॥

इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायां शब्दनिरूपणो नाम तृतीयोवतारः ३ ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER VII.

THE ŚAIVA DARŚANA.

(Continued from page 64.)

Now the Souls are threefold, as denominated *vijnánákaláh, pralayákaláh* and *sakaláh.** *a.* The first are those who are

* For these three classes see J. A. O. S. iv. pp 87, 137. They are there described as being respectively under the influence of *áṇavam malam*, only,—or this with *kanmom malam*,—or these with *mayei malam*. The *áṇavam* is described as original sin or that source of evil which was always attached to the soul; *kanmam* is that fate which inheres in the soul's organism and metes out its deserts; *máyer* is matter in its obscuring or entangling power, the source of the senses. Mádhava uses '*kalá*, &c.' for *máyá*,—The reason is to be found in J. A. O. S. p. 70, where it is said that the five *vidyátattwas* (*kalá, vidyá, rága, niyati* and *kála*) and the twenty-four *átmatattwas* (*sc.* the gross and subtile elements, and organs of sense and action, with the intellectual faculties *manas, buddhi, ahankára* and *chitta*),—are all developed from *Máyá*. This exactly agrees with the quotation from Soma Śambhu, *infrá*. We may compare with it what Mádhava says, p. 77., in his account of the Nakulísa Pásupaas, where he discribes *kalá* as unintelligent and composed of the five elements, the five *tanmátras*, and the ten organs, with *buddhi, ahankára* and *manas*.

॥ सर्वदर्शनसङ्ग्रहः ॥

पशुस्त्रिविधः विज्ञानाकलप्रलयाकलसकलभेदात् । तत्रप्रथमो विज्ञानयोगसन्न्यासैर्भोगेन वा कर्म्मक्षये सति कर्म्मक्षयार्थस्य कलादिभोगबन्ध-

under the influence of *mala* only, since their actions are cancelled by receiving their proper fruits or by abstraction, contemplation and knowledge, and since they have no 'fetters' in the form of enjoyments such as kalá, &c., (which fetters would however be the cause of cancelling actions by bringing about their proper fruit.) *b.* The second are those who are under the influence of *mala* and *karma*; since in their case *kalá*, &c. are destroyed by mundane destructions, hence their name *pralayákala*. *c.* The third are those who are bound in the three fetters of *mala, máyá* and *karma*, hence their name *sakala*. The first class are again subdivided into *samápta-kalusháh* and *asamápta-kalusháh*, according as their inherent corruption is perfectly exhausted or not. The former,—having received the mature penalties of their corruptions,—are now, as foremost of men and worthy of authority, raised by Siva's favour to the rank of the Lords of Knowledge, (the Vidyeśwaras), Ananta and the rest. This ogdoad of the Lords of Knowledge is described in the Bahudaivatya:

> "Ananta, and Súkshma, and Śivottama,
> Ekanetra, and again Ekarudra and Trimúrtika,
> Śríkaṇṭha and Śikhaṇḍin,—these are declared to be the Vidyeśwaras.

स्याभावात् केवलमलमात्रयुक्तो विज्ञानाकल इति व्यपदिश्यते। द्वितीयस्तु प्रलयेन कलादेरुपसंहारात् मलकर्म्मयुक्तः प्रलयाकल इति व्यवह्रियते। तृतीयस्तु मलमायाकर्म्मात्मकबन्धत्रयसहितः सकल इति संलप्यते। तत्र प्रथमो द्विप्रकारो भवति समाप्तकलुषासमाप्तकलुषभेदात्। तत्राद्यान् कालुष्यपरिपाकवतः पुरुषधौरेयान् अधिकारयोग्याननुगृह्यानन्तादिविद्येश्वराष्टपदं प्रापयति। तद्विद्येश्वराष्टकं निर्दिष्टं बहुदैवत्ये।

अनन्तश्चैव सूक्ष्मश्च तथैव च शिवोत्तमः।
एकनेत्रस्तथैवैकरुद्रश्चापि त्रिमूर्त्तिकः।
श्रीकण्ठश्च शिखण्डी च प्रोक्ता विद्येश्वरा इमे॥

The latter Śiva, in his mercy, raises to the rank of the seventy million Mantras.* All this is explained in the Tattwaprakáśa.† Similarly Soma-Śambhu has said.

"One class is named *vijnánákala*, the second *pralayákala*,
The third *sakala*,—these are the three whom the Śāstra regards as objects of mercy.
The first is united to *mala* alone, the second to *mala* and *karma*,
The third are united to all the tattwas beginning with *kalá* and ending with 'earth.'‡

The *Pralayákaláh* are also twofold, as being *pakwapáśadwaya* or not, i. e. those in whom the two remaining fetters are matured,—and those in whom they are not. The former attain liberation, but the latter, by the power of *karma*, are endowed with the *puryashṭaka* § body, and pass through various births. As has been said in the Tattwaprakáśa,

* See J. A. O. S. iv. p. 13.—I read अनुग्रहकरणात् in p. 86, l. 3.

† I omit the quotation as it only repeats the preceding. It however names the three classes as *vijnána-kevala*, *pralaya-kevala*, and *sakala*.

‡ I. e. thus including five of the *vidyátattwas* and all the twenty-four *átmatattwas*

§ This term seems to be derived from पुर् 'body' (cf, *puriśaya* for *purusha* Bṛihad Ar. Up. ii. 5. 18) and अष्टक ; cf. also the Sánkhya Pravachana Bháshya p. 135.

अन्त्यान् सप्तकोटिसङ्ख्यातान् मन्त्राननुग्रहकरणान् विधत्ते । तदुक्तं तत्त्वप्रकाशे

पशवस्त्रिविधाः प्रोक्ता विज्ञानप्रलयकेवलौ सकलः ।
मलयुक्तस्तत्राद्यो मलकर्म्मयुतो द्वितीयः स्यात् ॥
मलमायाकर्म्मयुतः सकलस्तेषु द्विधा भवेदाद्यः ।
आद्यः समाप्तकलुषोऽसमाप्तकलुषो द्वितीयः स्यात् ॥
आद्याननुगृह्य शिवो विद्येशत्वे नियोजयत्यष्टौ ।
मन्त्रांश्च करोत्यपरान् ते चोक्ताः कोटयः सप्तेति ॥

सोमशम्भुनाप्यभिहितम्

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 3. AUGUST 1st 1876. Vol. I.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमदुज्जयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

पञ्चमस्याध्यायस्य चतुर्थः पादः ।

उत्तरमृगपूर्वाच्च सक्थ्नः ॥ ९८ ॥

उत्तर मृग पूर्व इत्येतेभ्यः परो यः सक्थिशब्दश्चकारादुपमानाच्च, तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति समासान्तः । उत्तरसक्थम् । मृगसक्थम् । पूर्वसक्थम् । उपमानात्खल्वपि । फलकमिव सक्थि फलकसक्थम् ॥

नावो द्विगोः ॥ ९९ ॥

नौशब्दान्ताद् द्विगोष्टच्प्रत्ययो भवति समासान्तः । द्वे नावौ समाहृते, द्विनावम् । त्रिनावम् । द्विनावधनः । पञ्चनावप्रियः । द्वाभ्यां नौभ्यामागतं, द्विनावरूप्यम् । द्विनावमयम् । द्विगोरिति किम् । राजनौः । अतद्धितलुकीत्येव । पञ्चभिर्नौभिः क्रीतः, पञ्चनौः । दशनौः ॥

अर्द्धाच्च ॥ १०० ॥

अर्द्धशब्दात्परो यो नौशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति । अर्द्धं नावः, अर्द्धनावम् । अर्द्धं नपुंसकमिति समासः । परवल्लिङ्गं न भवति लोकाश्रयत्वाल्लिङ्गस्य ॥

खार्याः प्राचाम् ॥ १०१ ॥

द्विगोरर्द्धाच्चेति द्वयमप्यनुवर्त्तते । खारीशब्दान्ताद् द्विगोरर्द्धाच्च परो यः खारीशब्दस्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति प्राचामाचार्याणां मतेन । द्वे खार्यौ समाहृते, द्विखारम् । द्विखारि । त्रिखारम् । त्रिखारि । अर्द्धं खार्याः, अर्द्धखारम् । अर्द्धखारी ॥

द्वित्रिभ्यामञ्जलेः ॥ १०२ ॥

द्वित्रिभ्यां परो यो ऽञ्जलिशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति । द्वावञ्जली समाहृतौ, द्व्यञ्जलम् । त्र्यञ्जलम् । द्विगोरित्येव । द्वयोरञ्ज-

लिः, द्व्यञ्जलिः । अतद्धितलुकीत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतो, द्व्यञ्जलिः । त्र्यञ्जलिः । प्राचामित्येव । द्व्यञ्जलिप्रियः ॥

अनसन्तान्नपुंसकाच्छन्दसि ॥ १०३ ॥

अवन्तादसन्ताच्च नपुंसकलिङ्गात्तत्पुरुषाट्टच्प्रत्ययो भवति छन्दसि विषये । हस्तिचर्मे जुहोति । ऋषभचर्मेऽभिषिञ्चति । असन्तात् । देवच्छन्दसानि । मनुष्यच्छन्दसानि । अनसन्तादिति किम् । बिल्वदारु जुहोति । नपुंसकादिति किम् । सुत्रामाणं पृथवीं द्यामनेहसम् ॥ अनसन्तान्नपुंसकाच्छन्दसि वावचनम् ॥ * ॥ ब्रह्मसाम । देवच्छन्दः । ब्रह्मसामम् । देवच्छन्दसम् ॥

ब्रह्मणो जानपदाख्यायाम् ॥ १०४ ॥

ब्रह्मन्शब्दान्तात्तत्पुरुषाट्टच्प्रत्ययो भवति समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायते । जनपदेषु भवो, जानपदः । यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदं तस्मादेतत्प्रत्ययविधानम् । सुराष्ट्रेषु ब्रह्मा, सुराष्ट्रब्रह्मः । अवन्तिब्रह्मः । * योगविभागात्सप्तमीसमासः । जानपदाख्यायामिति किम् । देवब्रह्मा नारदः ॥

कुमहद्भ्यामन्यतरस्याम् ॥ १०५ ॥

कुमहद्भ्यां परो यो ब्रह्मा तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवत्यन्यतरस्याम् । कुब्रह्मः । कुब्रह्मा । महाब्रह्मः । महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन्शब्दः ॥

द्वन्द्वाच्चुदषहान्तात्समाहारे ॥ १०६ ॥

तत्पुरुषाधिकारो निवृत्तः । द्वन्द्वाच्चवर्गान्ताद् दकारान्तात् षकारान्तात् हकारान्ताच्च टच् प्रत्ययो भवति स चेद् द्वन्द्वः समाहारे वर्त्तते नेतरेतरयोगे । वाक्च त्वक्च, वाक्त्वचम् । स्रक्च त्वक्च, स्रक्त्वचम् । श्रीस्रजम् । इडूर्जम् । वागूर्जम् । समिद्दृषदम् । संपद्विपदम् । वाग्विप्रुषम् । छत्रोपानहम् । धेनुगोदुहम् । द्वन्द्वादिति किम् । तत्पुरुषान्मा

* कार्योब्रह्मः । इत्यधिकमन्यत्र ।

Digitized by Google

भूत् । पञ्च वाचः समाहृताः, पञ्चवाक् । चुदषहान्तादिति किम् । वाक्-समित् । समाहारइति किम् । प्रावृट्शरदौ ॥

अव्ययीभावे शरत्प्रभृतिभ्यः ॥ १०७ ॥

शरदित्येवमादिभ्यः प्रातिपदिकेभ्यष्टच् प्रत्ययो भवत्यव्ययीभावे । शरदः समीपम्, उपशरदम् । प्रतिशरदम् । उपविपाशम् । प्रतिविपाशम् । अव्ययीभावइति किम् । परमशरत् । ये ऽत्र झयन्ताः पठ्यन्ते तेषां नित्यार्थं ग्रहणम् । स्वर्यते चेदमव्ययीभावग्रहणं प्राग्बहुव्रीहेः । शरत् । विपाश् । अनस् । मनस् । उपानह् । दिव् । हिमवत् । अनडुह् । दिश् । दृश् । चतुर् । यद् । तद् ॥ जराया जरस् ॥ सदृश ॥ प्रतिपरसमनुभ्यो ऽक्ष्णः ॥ पथिन् । प्रत्यक्षम् । परोक्षम् । समक्षम् । अन्वक्षम् । प्रतिपथम् । परपथम् । संपथम् । अनुपथम् ॥

अनश्च ॥ १०८ ॥

अन्नन्तादव्ययीभावाट्टच् प्रत्ययो भवति समासान्तः । उपराजम् । अध्यात्मम् । प्रत्यात्मम् ॥

नपुंसकादन्यतरस्याम् ॥ १०९ ॥

अन इत्येव । नपुंसकग्रहणमुत्तरपदविशेषणम् । अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति समासान्तः । पूर्वेण नित्ये प्राप्ते विकल्प्यते । प्रतिचर्मम् । प्रतिचर्म । उपचर्मम् । उपचर्म ॥

नदीपौर्णमास्याग्रहायणीभ्यः ॥ ११० ॥

नदी पौर्णमासी आग्रहायणी इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति । नद्याः समीपम्, उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि । उपाग्रहायणम् । उपाग्रहायणि ॥

झयः ॥ १११ ॥

झय इति प्रत्याहारग्रहणम् । झयन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति । उपसमिधम् । उपसमित् । उपदृषदम् । उपदृषत् ॥

Digitized by Google

गिरेश्च सेनकस्य ॥ ११२ ॥

गिरिशब्दान्तादव्ययीभावाट्टच् प्रत्ययो भवति सेनकस्याचार्यस्य मतेन । अन्तर्गिरम् । अन्तर्गिरि । उपगिरम् । उपगिरि । सेनकग्रहणं पूजार्थम् । विकल्पोऽनुवर्त्तत एव ॥

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ॥ ११३ ॥

स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद्बहुव्रीहेः षच् प्रत्ययो भवति समासान्तः । अयमर्थोऽभिप्रेतः । सूत्रे तु दुःश्लिष्टविभक्तीनि पदानि । दीर्घं सक्थि यस्य, दीर्घसक्थः । कल्याणाक्षः । लोहिताक्षः । विशालाक्षः । बहुव्रीहाविति किम् । परमसक्थि । परमाक्षि । सक्थ्यक्ष्णोरिति किम् । दीर्घजानुः । सुबाहुः । स्वाङ्गादिति किम् । दीर्घसक्थि शकटम् । स्थूलाक्षिरिक्षुः । टचि प्रकृते षज्ग्रहणं स्वरार्थम् । चक्रसक्थी स्त्री । दीर्घसक्थी स्त्री । सक्थं चाक्रान्तादिति विभाषयोत्तरपदस्यान्तोदात्तत्वं विधीयते तत्र यस्मिन्पक्षे नास्त्युदात्तत्वं तत्र ङीपि सत्युदात्तनिवृत्तिस्वरस्याभावादनुदात्तः श्रूयेत । ङीषि तु सर्वत्रोदात्तः सिद्धो भवति । बहुव्रीहिग्रहणमापादपरिसमाप्तेरनुवर्त्तते ॥

अङ्गुलेर्दारुणि ॥ ११४ ॥

अङ्गुलिशब्दान्ताद्बहुव्रीहेः षच्प्रत्ययो भवति समासान्तो दारुणि समासार्थे । द्व्यङ्गुलं दारु । त्र्यङ्गुलं दारु । पञ्चाङ्गुलम् । अङ्गुलिसदृशावयवं धान्यादीनां विक्षेपणकाष्ठमुच्यते । यस्य तु द्वे अङ्गुली प्रमाणं दारुणस्तत्र तद्धितार्थ इति समासे कृते तत्पुरुषस्याङ्गुलेरित्यचा भवितव्यम् । दारुणीति किम् । पञ्चाङ्गुलिर्हस्तः ॥

द्वित्रिभ्यां ष मूर्द्ध्नः ॥ ११५ ॥

द्वित्रिभ्यां परो यो मूर्द्धन्शब्दस्तदन्ताद्बहुव्रीहेः षः प्रत्ययो भवति समासान्तः । द्विमूर्धः । त्रिमूर्द्धः । द्वित्रिभ्यामिति किम् । उच्चैर्मूर्द्धा ॥

अप्पूरणीप्रमाण्योः ॥ ११६ ॥

पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेन गृह्यन्ते । प्रमा-

णीति स्वरूपग्रहणम् । पूरण्यन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्रत्ययो भवति समासान्तः । कल्याणी पञ्चमी आसां रात्रीणां ताः, कल्याणीपञ्चमा रात्रयः । कल्याणीदशमा रात्रयः । स्त्री प्रमाणी एषां, स्त्रीप्रमाणाः कुटुम्बिनः । भार्याप्रधाना इत्यर्थः ॥ अपि प्रधानपूरणीग्रहणं कर्त्तव्यम् ॥ * ॥ यत्रान्यपदार्थे पूरण्यनुप्रविशति न केवलं वाक्यपदार्थ एव तत्र पूरण्याः प्राधान्यम् । पुंवद्भावप्रतिषेधेपि प्रधानपूरण्येव गृह्यते । इह न भवति । कल्याणी पञ्चमी अस्मिन्पक्षे कल्याणपञ्चमीकः पक्ष इति ॥ नेतुर्नक्षत्र उपसंख्यानम् ॥ * ॥ मृगो नेता आसां रात्रीणां, मृगनेत्रा रात्रयः । पुष्यनेत्राः । नक्षत्रइति किम् । देवदत्तनेतृकाः ॥ छन्दसि च नेतुरुपसंख्यानम् ॥ * ॥ बृहस्पतिनेत्रा देवाः । सोमनेत्राः । मासाद्भृतिप्रत्ययपूर्वपदाट्ठज्विधिः ॥ * ॥ पञ्चको मासो ऽस्य, पञ्चकमासिकः कर्मकरः । दशकमासिकः । सो ऽस्यांशवस्नभृतय इति संख्याया अतिशदन्तायाः कन् ॥

अन्तर्बहिर्भ्यां च लोम्नः ॥ ११७ ॥

अन्तर् बहिस् इत्येताभ्यां परो यो लोमन्शब्दस्तदन्ताद्बहुव्रीहेरप्रत्ययो भवति । अन्तर्गतानि लोमान्यस्यान्तर्लोमः प्रावारः । बहिर्लोमः पटः ॥

अञ्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ ११८ ॥

नासिकान्ताद्बहुव्रीहेरच्प्रत्ययो भवति नासिकाशब्दश्च नसमादेशमापद्यते । अस्थूलादिति नासिकाविशेषणं, न चेत्स्थूलशब्दात्परा नासिका भवतीति । संज्ञायामिति समुदायोपाधिः । द्रुरिव नासिका ऽस्य, द्रुणसः । * वाद्‌ध्रीणसः । पूर्वपदात्संज्ञायामग इति णत्वम् । गोनसः । संज्ञायामिति किम् । तुङ्गनासिकः । अस्थूलादिति किम् । स्थूलनासिको वराहः ॥ खुरखराभ्यां नस् वक्तव्यः ॥ * ॥ खुरणाः । खरणाः ॥ पक्षे ऽच्प्रत्ययोपीष्यते । खुरणसः । खरणसः । शितिनाः । अर्हिनाः । अर्चनाः । इति निगमइष्यते ॥

---

* खरणसः । इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

उपसर्गाच्च ॥ ११९ ॥

उपसर्गात्परो यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् प्रत्ययो भवति नासिकाशब्दश्च नसमापद्यते । असंज्ञार्थं वचनम् । उन्नता नासिका ऽस्य, उन्नसः । प्रणसः । उपसर्गाद्बहुलमिति णत्वम् ॥ वेर्ग्रो वक्तव्यः ॥ * ॥ विगता नासिका ऽस्य विग्रः ॥

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाज-पदप्रोष्ठपदाः ॥ १२० ॥

सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते । अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम् । शोभनं प्रातरस्य सुप्रातः । शोभनं श्वो ऽस्य, सुश्वः । शोभनं दिवा ऽस्य सुदिवः । शारेरिव कुक्षिरस्य, शारिकुक्षः । चतस्रो ऽश्रयो ऽस्य, चतुरश्रः । एण्या इव पादावस्य, एणीपदः । अजस्येव पादावस्य, अजपदः । प्रोष्ठो गौस्तस्येव पादावस्य प्रोष्ठपदः ॥

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२१ ॥

नञ् दुस् सु इत्येतेभ्यः परो यो हलिसक्थिशब्दो तदन्ताद्बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः । अविद्यमाना हलिरस्य, अहलः । अहलिः । दुर्हलः । दुर्हलिः । सुहलः । सुहलिः । अविद्यमानं सक्थ्यस्य, असक्थः । असक्थिः । दुःसक्थः । दुःसक्थिः । सुसक्थः । सुसक्थिः । हलिशक्त्योरिति केचित्पठन्ति । अविद्यमाना शक्तिरस्य, अशक्तः । अशक्तिः । विरूपा शक्तिरस्य, दुःशक्तः । दुःशक्तिः । शोभना शक्तिरस्य, सुशक्तः । सुशक्तिः ॥

नित्यमसिच् प्रजामेधयोः ॥ १२२ ॥

नञ्दुस्सुभ्य इत्येव । नञ् दुस् सु इत्येतेभ्यः परो यो प्रजामेधाशब्दो तदन्ताद्बहुव्रीहेर्नित्यमसिच् प्रत्ययो भवति समासान्तः । अविद्यमाना प्रजा ऽस्य, अप्रजाः । दुष्प्रजाः । सुप्रजाः । अविद्यमाना मेधा ऽस्य, अमेधाः ।

Digitized by Google

दुर्मेधाः। सुमेधाः। नित्यग्रहणं किम्। यावता पूर्वसूत्रे ऽन्यतरस्यांग्रहणं नैव स्वर्यते। एवं तर्हि नित्यग्रहणादन्यत्रापि भवतीति सूच्यते॥

श्रोत्रियस्येव ते राजन्नमन्दकस्याल्पमेधसः।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी॥

बहुप्रजाश्छन्दसि॥ १२३॥

बहुप्रजा इति छन्दसि निपात्यते। बहुप्रजा निर्ऋतिमाविवेश। छन्दसीति किम्। बहुप्रजो ब्राह्मणः॥

धर्मादनिच् केवलात्॥ १२४॥

केवलाद् यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्प्रत्ययो भवति समासान्तः। कल्याणो धर्मोऽस्य, कल्याणधर्मा। प्रियधर्मा। केवलादिति किम्। परमः स्वो धर्मो ऽस्य परमस्वधर्मः। यद्येवं त्रिपदे बहुव्रीहौ प्राप्नोति, परमः स्वो धर्मोऽस्येति। एवं तर्हि केवलादिति पूर्वपदं निर्दिश्यते केवलात्पदात्परो धर्मशब्दो न पदसमुदायात्, तदन्ताद्बहुव्रीहेः प्रत्ययः॥

जम्भा सुहरिततृणसोमेभ्यः॥ १२५॥

बहुव्रीहौ समासे स्वादिभ्यः परं जम्भेति कृतसमासान्तमुत्तरपदं निपात्यते। जम्भशब्दो ऽभ्यवहार्यवाची दन्तविशेषवाची च। शोभनो जम्भो ऽस्य, सुजम्भा देवदत्तः। शोभनाभ्यवहार्य्यः शोभनदन्तो वा। एवं हरितजम्भा। तृणजम्भा। सोमजम्भा। दन्तवचने तृणमिव जम्भो ऽस्य, सोमइव जम्भोऽस्येति विग्रहीतव्यम्। सुहरिततृणसोमेभ्य इति किम्। पतितजम्भः॥

दक्षिणेर्मा लुब्धयोगे॥ १२६॥

दक्षिणेर्मेति कृतसमासान्तो निपात्यते बहुव्रीहौ समासे लुब्धयोगे। लुब्धो व्याधः। दक्षिणमीर्ममस्य, दक्षिणेर्मा मृगः। ईर्मं व्रणमुच्यते। दक्षिणमङ्गं व्रणितमस्य व्याधेनेत्यर्थः। लुब्धयोगइति किम्। दक्षिणेर्मं शकटम्॥

इच् कर्मव्यतिहारे ॥ १२७ ॥

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् प्रत्ययो भवति । तत्र तेनेदमिति सरूपइत्ययं बहुव्रीहिर्गृह्यते । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं, केशाकेशि । कचाकचि । मुमलैश्च मुसलैश्च प्रहृत्य इदं युद्धं प्रवृत्तं मुसलामुसलि । दण्डादण्डि । तिष्ठद्गुप्रभृतिष्वयमिच्प्रत्ययः पठ्यते ॥

द्विदण्ड्यादिभ्यश्च ॥ १२८ ॥

द्विदण्ड्यादयः शब्दा इच्प्रत्ययान्ताः साधवो भवन्ति । द्विदण्ड्यादिभ्य इति तादर्थ्ये एषा चतुर्थी, न पञ्चमी । द्विदण्ड्यार्थमिच् प्रत्ययो भवति । तथा भवति यथा द्विदण्ड्यादयः सिध्यन्तीत्यर्थः । समुदायनिपातनाच्चार्थविशेषे ऽवरुध्यन्ते । द्विदण्डि प्रहरति । द्विमुसलि प्रहरति । इह न भवति । द्विदण्डा शालेति । बहुव्रीह्यधिकारेऽपि तत्पुरुषात्के चिद्विधानमिच्छन्ति । निकुच्य कर्णौ धावति । निकुच्यकर्णि धावति । प्रोह्य पादौ हस्तिनं वाहयति । प्रोह्यपादि हस्तिनं वाहयति । मयूरव्यंसकादित्वात्समासः । द्विदण्डि । द्विमुसलि । उभाञ्जलि । उभयाञ्जलि । उभाकर्णि । उभयाकर्णि । उभादन्ति । उभयादन्ति । उभाहस्ति । उभयाहस्ति । उभापाणि । उभयापाणि । उभाबाहु । उभयाबाहु । एकपदि । प्रोह्यपदि । आढ्यपदि । सपदि । निकुच्यकर्णि । संहतपुच्छि । उभाबाहु उभयाबाह्विति निपातनादिच्प्रत्ययलोपः । प्रत्ययलक्षणेनाव्ययीभावसंज्ञा ॥

प्रसम्भ्यां जानुनोर्ज्ञुः ॥ १२९ ॥

प्र सम् इत्येताभ्यामुत्तरस्य जानुशब्दस्य ज्ञुरादेशो भवति समासान्तो बहुव्रीहौ । प्रकृष्टे जानुनी अस्य प्रज्ञुः । संज्ञुः ॥

ऊर्ध्वाद्विभाषा ॥ १३० ॥

ऊर्ध्वशब्दादुत्तरस्य जानुशब्दस्य विभाषा ज्ञुरित्ययमादेशो भवति । ऊर्ध्वे जानुनी अस्य, ऊर्ध्वजानुः । ऊर्ध्वज्ञुः ॥

ऊधसो ऽनङ् ॥ १३१ ॥

ऊधःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः । कुण्ड-मिव ऊधो ऽस्याः, सा कुण्डोध्नी । घटोध्नी ॥ ऊधसोनङि स्त्रीग्रहणं कर्तव्यम् ॥ इह मा भूत् । महोधाः पर्जन्यः । घटोधो धेनुकम् ॥

धनुषश्च ॥ १३२ ॥

धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति । शार्ङ्गं धनुरस्य, शार्ङ्गधन्वा । गाण्डीवधन्वा । पुष्पधन्वा । अधिज्यधन्वा ॥

वा संज्ञायाम् ॥ १३३ ॥

धनुःशब्दान्ताद्बहुव्रीहेरनङादेशो वा भवति संज्ञायां विषये । पूर्वेण नित्यः प्राप्तो विकल्प्यते । शतधनुः । शतधन्वा । दृढधनुः । दृढ-धन्वा ॥

जायाया निङ् ॥ १३४ ॥

जायाशब्दान्तस्य बहुव्रीहेर्निङादेशो भवति । युवतिर्जाया यस्य, युवजानिः । वृद्धजानिः ॥

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ १३५ ॥

उत् पूति सु सुरभि इत्येतेभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति समासान्तो बहुव्रीहौ समासे । तकार उच्चारणार्थः । उद्गतो गन्धो ऽस्य, उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः । एतेभ्य इति किम् । तीव्रगन्धो वातः ॥ गन्धस्येत्वे तदेकान्तग्रहणम् ॥ * ॥ तेन शोभनो गन्धो ऽस्य सुगन्ध आपणः ॥

अल्पाख्यायाम् ॥ १३६ ॥

अल्पाख्यायां यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे । सूपो ऽल्पो ऽस्मिन्सूपगन्धि भोजनम् । अल्पमस्मि-न्भोजने घृतम् । घृतगन्धि । क्षीरगन्धि । अल्पपर्यायो गन्धशब्दः ॥

उपमानाच्च ॥ १३७ ॥

उपमानात्परो यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो

बहुव्रीहौ समासे। पद्मस्येव गन्धो ऽस्य, पद्मगन्धिः। उत्पलगन्धिः। करीषगन्धिः॥

पादस्य लोपो ऽहस्त्यादिभ्यः॥ १३८॥

उपमानादित्येव। उपमानाद्धस्त्यादिवर्जितात्परस्य पादशब्दस्य लोपो भवति समासान्तो बहुव्रीहौ समासे। स्थानिद्वारेण लोपस्य समासान्तता विज्ञायते। व्याघ्रस्येव पादावस्य, व्याघ्रपात्। सिंहपात्। अहस्त्यादिभ्य इति किम्। हस्तिपादः। कटोलपादः। हस्तिन्। कटोल। गण्डोल। गण्डोलक। महिला। दासी। गणिका। कुसूल॥

कुम्भपदीषु च॥ १३९॥

कुम्भपदीप्रभृतयः कृतपादलोपाः पठ्यन्ते समुदाया एव। तत्रैवं सूत्रं ज्ञेयम्। पादस्य लोपो भवति कुम्भपद्यादिविषये। यथा कुम्भपद्यादयः सिद्ध्यन्ति। समुदायपाठस्य च प्रयोजनं विषयनियमः स्त्रियामेव तत्र ङीप्प्रत्यये एव नान्यत्र। कुम्भपदी। शतपदी। यच्चेहोपमानपूर्वं संख्यापूर्वं च पठ्यते तस्य सिद्धे लोपे नित्यं ङीबर्थं वचनम्। पादोऽन्यतरस्यामिति विकल्पो न भवति। कुम्भपदी। शतपदी। अष्टापदी। जालपदी। एकपदी। मालापदी। मुनिपदी। गोधापदी। गोपदी। कलशीपदी। घृतपदी। दासीपदी। निष्पदी। आर्द्रपदी। कुणपदी। कृष्णपदी। द्रोणपदी। द्रुपदी। शकृत्पदी। सूपपदी। पञ्चपदी। अर्वपदी। स्तनपदी *॥

संख्यासुपूर्वस्य॥ १४०॥

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेः पादशब्दान्तस्य लोपो भवति समासान्तः। द्वौ पादावस्य, द्विपात्। त्रिपात्। शोभनौ पादावस्य, सुपात्॥

वयसि दन्तस्य दतृ॥ १४१॥

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेर्यो दन्तशब्दस्तस्य दतृ इत्ययमादेशो

---

* स्थूलपदी। सूत्रपदी। कलहंसपदी। द्विपदी। विषपदी। सुपदी। सूकरपदी। सूचीपदी। एते शब्दाः पुस्तकान्तरे ऽधिकाः॥

Digitized by Google

भवति समासान्तो वयसि गम्यमाने । ऋकार उगित्कार्यार्थः । द्वौ दन्तावस्य, द्विदन् । त्रिदन् । चतुर्दन् । शोभना दन्ता अस्य समस्ता जाताः, सुदन् कुमारः । वयसीति किम् । द्विदन्तः कुञ्जरः * ॥

छन्दसि च ॥ १४२ ॥

छन्दसि च दन्तशब्दस्य दतृ इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे । पञ्चदन्तमालभेत । उभयदत आलभते ॥

स्त्रियां संज्ञायाम् ॥ १४३ ॥

स्त्रियामन्यपदार्थे संज्ञायां विषये दन्तशब्दस्य दतृ इत्ययमादेशो भवति । अयोदती । फालदती । संज्ञायामिति किम् । समदन्ती । स्निग्धदन्ती ॥

विभाषा श्यावारोकाभ्याम् ॥ १४४ ॥

श्याव अरोक इत्येताभ्यां परस्य दन्तशब्दस्य दतृ इत्ययमादेशो भवति विभाषा समासान्तो बहुव्रीहौ । श्यावदन् । श्यावदन्तः । अरोकदन् । अरोकदन्तः । अरोको निर्दीप्तिः । संज्ञायामित्येव । श्यावदन्तः । अरोकदन्तः ॥

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ १४५ ॥

विभाषेत्येव । अग्रान्ताच्छब्दात् शुद्ध शुभ्र वृष वराह इत्येतेभ्यश्च परस्य दन्तशब्दस्य विभाषा दतृ इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे । कुड्मलाग्रदन् । कुड्मलाग्रदन्तः । शुद्धदन् । शुद्धदन्तः । शुभ्रदन् । शुभ्रदन्तः । वृषदन् । वृषदन्तः । वराहदन् । वराहदन्तः । अनुक्तसमुच्चयार्थश्चकारः । अहिदन् । अहिदन्तः । मूषिकदन् । मूषिकदन्तः । गर्दभदन् । गर्दभदन्तः । शिखरदन् । शिखरदन्तः ॥

ककुदस्यावस्थायां लोपः ॥ १४६ ॥

ककुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तो ऽवस्थायां गम्यमानायाम् । कालाद्विकृता वस्तुधर्मा वयःप्रभृतयो ऽवस्था इत्युच्यते ।

* सुदन्तो दाक्षिणात्यः । इति प्रत्युदाहरणं पुस्तकान्तरे ऽधिकम् ॥

Digitized by Google

असञ्जातं ककुदमस्य, असञ्जातककुत् । बाल इत्यर्थः । पूर्णककुत् । मध्यमवया इत्यर्थः । उन्नतककुत् । वृद्धवया इत्यर्थः । स्थूलककुत् । बलवानित्यर्थः । यष्टिककुत् । नातिस्थूलो नातिकृश इत्यर्थः । अवस्थायामिति किम् । श्वेतककुदः ॥

त्रिककुत्पर्वते ॥ १४७ ॥

त्रिककुदि बहुव्रीहौ ककुदशब्दस्य लोपः समासान्तो निपात्यते पर्वते ऽभिधेये । त्रीणि ककुदान्यस्य, त्रिककुत्पर्वतः । ककुदाकारं पर्वतस्य शृङ्गं ककुदमित्युच्यते । न च सर्वस्त्रिशिखरः पर्वतस्त्रिककुत् । किं तर्हि संज्ञैषा पर्वतविशेषस्य । पर्वतइति किम् । त्रिककुदो ऽन्यः ॥

उद्विभ्यां काकुदस्य ॥ १४८ ॥

उत् वि इत्येताभ्यां परस्य काकुदशब्दस्य लोपो भवति बहुव्रीहौ समासे । उद्गतं काकुदमस्य, उत्काकुत् । विकाकुत् । तालु काकुदमुच्यते ॥

पूर्णाद्विभाषा ॥ १४९ ॥

पूर्णात्परस्य काकुदशब्दस्य विभाषा लोपो भवति बहुव्रीहौ समासे । पूर्णं काकुदमस्य, पूर्णकाकुत् । पूर्णकाकुदः ॥

सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ १५० ॥

सुहृत् दुर्हृत् इति निपात्यते यथासंख्यं मित्रामित्रयोरभिधेययोः । सुशब्दात्परस्य हृदयशब्दस्य हृद्भावो निपात्यते बहुव्रीहौ, तथा दुःशब्दात्परस्य । शोभनं हृदयमस्य, सुहृन्मित्रम् । दुष्टं हृदयमस्य दुर्हृदमित्रम् । मित्रामित्रयोरिति किम् । सुहृदयः कारुणिकः । दुर्हृदयश्चोरः ॥

उरःप्रभृतिभ्यः कप् ॥ १५१ ॥

उरःप्रभृत्यन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति । व्यूढमुरो ऽस्य व्यूढोरस्कः । प्रियसर्पिष्कः । अवमुक्तोपानत्कः । पुमान् अनड्वान् पयो नौर्लक्ष्मीरिति विभक्त्यन्ताः पठ्यन्ते न प्रातिपदिकानि । तत्रेदं प्रयोजनम्, एकवचनान्तानामेव ग्रहणमिह विज्ञायेत द्विवचनबहुवचनान्तानां मा

भूदिति। तत्र शेषाद्विभाषेति विकल्प एव भवतीति। द्विपुमान्। द्विपुंस्कः। बहुपुमान्। बहुपुंस्कः। उरस्। सर्पिस्। उपानह्। पुमान्। अनड्वान्। नौः। पयः। लक्ष्मीः। दधि। मधु। शालिः॥ अर्थान्नञः॥ अनर्थकः॥

इनः स्त्रियाम्॥ १५२॥

इन्नन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति स्त्रियां विषये। बहवो दण्डिनोऽस्यां शालायां बहुदण्डिका शाला। बहुच्छत्रिका। बहुस्वामिका नगरी। बहुवाग्मिका सभा। स्त्रियामिति किम्। बहुदण्डी राजा। बहुदण्डिकः। शेषाद्विभाषेत्येतद्भवति॥

नद्यृतश्च॥ १५३॥

नद्यन्ताद्बहुव्रीहेर्ऋकारान्ताच्च कप् प्रत्ययो भवति। बह्व्यः कुमार्योऽस्मिन्देशे बहुकुमारीको देशः। बहुब्रह्मबन्धूकः। ऋतः खल्वपि। बहुकर्तृकः। तकारः सुखमुखोच्चारणार्थः॥

शेषाद्विभाषा॥ १५४॥

यस्माद्बहुव्रीहेः समासान्तो न विहितः स शेषस्तस्माद्विभाषा कप्प्रत्ययो भवति। बह्व्यः खट्वा अस्मिन्बहुखट्वकः। बहुमालकः। बहुवीणकः। बहुखट्वाकः। बहुमालाकः। बहुवीणाकः। बहुखट्वः। बहुमालः। बहुवीणः। कथमनृक्कं साम बह्वृक्कं सूक्तमिति, यावता विहितोऽत्र सामान्येन समासान्त अच्प्रत्यय इति। नैतदस्ति। विशेषे स इष्यते, अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्यायामिति। शेषादिति किम्। प्रियपथः। प्रियधुरः॥

न संज्ञायाम्॥ १५५॥

संज्ञायां विषये बहुव्रीहौ समासे कप् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। विश्वे देवा अस्य, विश्वदेवः। विश्वयशाः॥

ईयसश्च॥ १५६॥

ईयसन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति। सर्वा प्राप्तिः प्रतिषि-

ध्यते । बह्व्यः श्रेयांसो ऽस्य बहुश्रेयान् । शेषाद्विभाषेत्यस्य प्रतिषेधः । बह्व्यः श्रेयस्यो ऽस्य बहुश्रेयसी । नद्यृतश्चेत्यस्य प्रतिषेधः । ह्रस्वत्वमपि न भवति । ईयसो बहुव्रीहौ पुंवदिति वचनात् ॥

वन्दिते भ्रातुः ॥ १५७ ॥

वन्दितेर्थे यो भ्रातृशब्दो वर्त्तते तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति । वन्दितः स्तुतः पूजित इत्युच्यते । शोभनो भ्राता ऽस्य सुभ्राता । वन्दितइति किम् । मूर्खभ्रातृकः । दुष्टभ्रातृकः ॥

ऋतश्छन्दसि ॥ १५८ ॥

ऋवर्णान्ताद् बहुव्रीहेश्छन्दसि विषये कप् प्रत्ययो न भवति । हता माता ऽस्य हतमाता । हतपिता । हतस्वसा । सुहोता ॥

नाडीतन्त्र्योः स्वाङ्गे ॥ १५९ ॥

स्वाङ्गे यो नाडीतन्त्रीशब्दो तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति । बह्व्यो नाड्यो ऽस्य बहुनाडिः कायः । बहुतन्त्रीर्ग्रीवा । धमनीवचनस्तन्त्रीशब्दः । स्वाङ्गइति किम् । बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा ॥

निष्प्रवाणिश्च ॥ १६० ॥

निष्प्रवाणिरिति नदीलक्षणस्य कपः प्रतिषेधो निपात्यते । प्रोयते ऽस्यामिति प्रवाणी । प्रवयन्ति तयेति वा प्रवाणी । करणसाधनो ऽयं ल्युट् । तन्तुवायशलाका भण्यते । निर्गता प्रवाणी अस्य, निष्प्रवाणिः पटः । निष्प्रवाणिः कम्बलः । अपनीतशलाकः । समाप्तवानः प्रत्यग्रो नवक उच्यते ॥

इति श्रीवामन कृतायां काशिकायां वृत्तौ पञ्चमाध्यायस्य चतुर्थश्चरणः ॥

समाप्तः पञ्चमो ऽध्यायः ॥

Digitized by Google

अथ षष्ठाध्यायस्य प्रथमः पादः ।

एकाचो द्वे प्रथमस्य ॥ १ ॥

अधिकारो ऽयम् । एकाच इति च द्वे इति च प्रथमस्येति च त्रितयमधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः प्राक्संप्रसारणविधानात् तत्रैकाचः प्रथमस्य द्वे भवत इत्येवं तद्वेदितव्यम् । वक्ष्यति लिटि धातोरनभ्यासस्येति । तत्र धातोरवयवस्यानभ्यासस्य प्रथमस्यैकाचो द्वे भवतः । जजागार । पपाच । इयाय । आर । एकाच इति बहुव्रीहिनिर्देशः । एको ऽच् यस्य सो ऽयमेकाच् इत्यवयवेन विग्रहः, समुदायः समासार्थः । अभ्यन्तरश्च समुदाये ऽवयवो भवतीति साचकस्यैव द्विर्वचनं भवति । पच् इत्यत्र येनैवाचा समुदाय एकाच् तेनैव तदवयवो ऽच्शब्दः पशब्दश्च । तत्र पृथगवयवैकाचो न द्विरुच्यन्ते, किं तर्हि समुदायैकाजेव । तथाहि । सकृच्छास्त्रप्रवृत्त्या सावयवः समुदायो ऽनुगृह्यते । पपाचेत्यत्र प्रथमत्वं व्यपदेशिवद्भावात् । इयाय आरेत्यत्रैकाच्त्वमपि व्यपदेशिवद्भावादेव । द्विःप्रयोगश्च द्विर्वचनमिह,मावृत्तिसंख्या हि द्वे इति विधीयते । तेन स एव शब्दो द्विरुच्चार्यते न च शब्दान्तरं तस्य स्थाने विधीयते ॥

अजादेर्द्वितीयस्य ॥ २ ॥

प्रथमद्विर्वचनापवादो ऽयम् । अजादेर्द्वितीयस्यैकाचो द्विर्वचनमधिक्रियते । अच् आदिर्यस्य धातोस्तदवयवस्य द्वितीयस्यैकाचो द्वे भवतः । अटिटिषति । अशिशिषति । अरिरिषति । अर्त्तः स्मिपूङ्रञ्ज्वशां सनीति इट् क्रियते तस्मिन्कृते गुणे च रपरत्वे च द्विर्वचनेचीति स्थानिवद्भावः प्राप्नोति । तत्र प्रतिविधानं द्विर्वचननिमित्ते ऽचीत्युच्यते । न चात्र द्विर्वचननिमित्तमिट्, किं तर्हि कार्यी । न च कार्यी निमित्तत्वेनाश्रीयते । तथाहि । क्ङिन्निमित्तयोर्गुणवृद्ध्योः प्रतिषेधो विधीयमानः शयितेत्यत्र न भवति नहि कार्यिणः शीङो गुणं प्रति निमित्तभाव इति । अच के चिदजादेरिति कर्मधारयात्पञ्चमीमिच्छन्ति, अभ्यासावादिश्चे-

त्यजादिः, अजादेरुत्तरस्यैकाचो द्वे भवत इति । तेषां द्वितीयस्येति विस्पष्टार्थं द्रष्टव्यम् ॥

न न्द्राः संयोगादयः ॥ ३ ॥

द्वितीयस्येति वर्त्तते । द्वितीयस्यैकाचो ऽवयवभूतानां न्द्राणां तदन्तर्भावात् प्राप्तं द्विर्वचनं प्रतिषिध्यते । नकारदकाररेफा द्वितीयैकाचो ऽवयवभूताः संयोगादयो न द्विरुच्यन्ते । उन्दिदिषति । अड्डिडिषति । अर्चिचिषति । न्द्रा इति किम् । ईचिचिषते । संयोगादय इति किम् । प्राणिणिषति । अनितेरुभौ साभ्यासस्येति णत्वम् । अजादेरित्येव । दिद्रासति । के चिदजादेरित्यपि पञ्चम्यन्तं कर्मधारयमनुवर्त्तयन्ति । तस्य प्रयोजनम् । इन्दिद्रीयिषतीति । अजादेरनन्तरत्वाभावाद् दकारो द्विरुच्यतएव नकारो न द्विरुच्यते । इन्द्रमिच्छति । क्यच् । तदन्तात् । इन्द्रीयितुमिच्छतीति सन् ॥ बकारस्याप्ययं प्रतिषेधो वक्तव्यः ॥ * ॥ उब्जिजिषति । यदा बकारोपध उब्जिरुपदिश्यते तदायं प्रतिषेधः । दकारोपधोपदेशे तु न वक्तव्यः । बत्वं तु दकारस्य विधातव्यम् ॥ यकारपरस्य रेफस्य प्रतिषेधो न भवतीति वक्तव्यम् ॥ * ॥ अरार्यते । अर्तेरर्त्यर्तिशूर्णोतीनामुपसंख्यानमिति यङ् । तत्र यङि चेति गुणस्तत्र द्विर्वचनम् ॥ ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम् ॥ * ॥ कस्य तृतीयस्य, के चिदाहुर्व्यञ्जनस्येति । ईर्ष्यियिषति । अपरे पुनस्तृतीयस्यैकाच इति व्याचक्षते । ईर्ष्यिषिषति ॥ कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् ॥ * ॥ कण्डूयियिषति । असूयियिषति ॥ वा नामधातूनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् ॥ * ॥ अश्वीयियिषति । अशिश्वीयिषते । अपर आह ॥ यथेष्टं नामधातुष्विति वक्तव्यम् ॥ * ॥ पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । पुपुतित्रीयियिषति । पुत्रीयियिषति ॥

पूर्वोऽभ्यासः ॥ ४ ॥

द्वे इति प्रथमान्तं यदनुवर्त्तते तदर्थादिह षष्ठ्यन्तं जायते । तत्र प्रत्यासत्तेरस्मिन्प्रकरणे ये द्वे विहिते तयोर्यः पूर्वो ऽवयवः सो ऽभ्यास-

Digitized by Google

संज्ञा भवति । पपाच । पिपक्षति । पापच्यते । जुहोति । अपीपचत् । अभ्यासप्रदेशास्त्वत्र लोपो ऽभ्यासस्येत्येवमादयः ॥

उभे अभ्यस्तम् ॥ ५ ॥

द्वे इति वर्त्तमाने उभेग्रहणं समुदायसंज्ञाप्रतिपत्त्यर्थम् । ये द्वे विहिते ते उभे अपि समुदिते अभ्यस्तसंज्ञे भवतः । ददति । ददत् । दधत् । उभेग्रहणं किम् । नेनिजतीत्यत्राभ्यस्तानामादिरिति समुदाये यथा स्यात् प्रत्येकं पर्यायेण वा मा भूदिति । अभ्यस्तप्रदेशा अभ्यस्ताना-मादिरित्येवमादयः ॥

जक्षित्यादयः षट् ॥ ६ ॥

अभ्यस्तमिति वर्त्तते । जक्ष इत्ययं धातुरित्यादयश्चान्ये षट् धातवो ऽभ्यस्तसंज्ञा भवन्ति । सेयं सप्तानां धातूनामभ्यस्तसंज्ञा विधीयते । जक्ष भक्षहसनयोरित्यतः प्रभृति वेवीङ् वेतिना तुल्यइति यावत् । जक्षति । जाग्रति । दरिद्रति । चकासति । शासति । दीध्यते । वेव्यते । इत्यत्राभ्य-स्तानामादिरित्येष स्वरः प्रयोजनम् । दीध्यदिति च शतरि व्यत्ययेन संपादिते नाभ्यस्ताच्छतुरिति नुमः प्रतिषेधः ॥

तुजादीनां दीर्घो ऽभ्यासस्य ॥ ७ ॥

तुजादीनामिति प्रकारे आदिशब्दः । कश्च प्रकारः । तुजेर्दीर्घाभ्यासस्य न विहितः, दृश्यते च, ये तथाभूतास्ते तुजादयस्तेषामभ्यासस्य दीर्घः साधुर्भवति । तूतुजानः । मामहानः । अनड्वान् दाधार । स्वधां मीमाय । दाधार । स तूताव । दीर्घश्चैषां छन्दसि प्रत्ययविशेषे एव दृश्यते ततो ऽन्यत्र न भवति । तुतोज शबलान् ॥

लिटि धातोरनभ्यासस्य ॥ ८ ॥

लिटि परतो ऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । पपाच । पपाठ । प्रोर्णुनाव । वाच्य ऊर्णोर्णुभ्द्राव इति वचनाद् ऊर्णोतेरिजादेरित्याम् भवति । लिटीति किम् । कर्त्ता । हर्त्ता । धातोरिति किम् । सस्रवांसो विशृण्विरे । सोममिन्द्राय सुन्विरे ।

अनभ्यासस्येति किम् । ऊर्णोनोनाव वृषभो यदीदम् । नोनूयतेर्नोनाव । संमान्या महतः संमिमितुः । लिटि उसतः ॥ द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ॥ * ॥ यो जागार तमृचः कामयन्ते । दाति प्रियाणीति ॥

सन्यङोः ॥ ९ ॥

धातोरनभ्यासस्येति वर्त्तते । सन्यङोरिति च षष्ठ्यन्तमेतत् । सन्नन्तस्य यङन्तस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । पिपक्षति । पिपतिषति । अरिरिषति । उन्दिदिषति । यङन्तस्य । पापच्यते । अटाट्यते । यायज्यते । अरार्यते । प्रोर्णोनूयते । अनभ्यासस्येत्येव । जुगुप्सिषते । लोलूयिषते ॥

श्लौ ॥ १० ॥

श्लौ परतो ऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । जुहोति । बिभेति । जिह्रेति ॥

चङि ॥ ११ ॥

चङि परतो ऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । अपीपचत् । अपीपठत् । आटिटत् । आशिशत् । आर्दिदत् । पचादीनां ण्यन्तानां चङि कृते णिलोप उपधाह्रस्वत्वं द्विर्वचनमित्येषां कार्याणां प्रवृत्तिक्रमः । तथा च सन्वल्लघुनि चङ्परऽइति सन्वद्भावो विधीयमानो ह्रस्वस्य स्थानिवद्भावाच्च प्रतिषिध्यते । यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावो भवति । न चास्मिन् कार्याणां क्रमेणादिष्टादचः पूर्वोऽभ्यासो भवतीति । आटिटदिति द्विर्वचने ऽचीति स्थानिवद्भावाद् द्वितीयस्यैकाचो द्विर्वचनं भवति ॥

दाश्वान् साह्वान् मीढ्वांश्च ॥ १२ ॥

दाश्वान् साह्वान् मीढ्वानित्येते शब्दाश्छन्दसि भाषायां चाविशेषेण निपात्यन्ते । दाश्वानिति दाशृ दानऽइत्येतस्य धातोः क्वसावद्विर्वचनमनिट्त्वं च निपात्यन्ते । दाश्वांसो दाशुषः सुतमिति । साह्वानिति षह मर्षणऽइत्येतस्य परस्मैपदमुपधादीर्घत्वमद्विर्वचनमनिट्त्वं च निपात-

नात् । साह्वान्बलाहकः । मीढ्वानिति मिह सेचनइत्येतस्याद्वित्वमनिट्-त्वमुपधादीर्घत्वं ढत्वं च निपातनात् । मीढुस्तोकाय तनयाय मृडय । एकवचनमतन्त्रम् ॥ क्सादीनां के द्वे भवत इति वक्तव्यम् ॥ * ॥ क्रिपतेनेनेति चक्रम् । विक्लिदम् । क्सः क्लिदेश्च घञर्थे कविधानमिति कः प्रत्ययः ॥ चरिचलिपतिवदीनां द्वित्वमच्याक्चाभ्यासस्य ॥ * ॥ चरादीनां धातूनामपि प्रत्यये परतो द्वे भवतः । अभ्यासस्यागागमो भवति । आगा-गमविधानसामर्थ्याच्च हलादिःशेषो न भवति । हलादिःशेषे हि सत्या-गमस्यादेशस्य चाविशेषो नास्ति । चराचरः । चलाचलः । पतापतः । वदावदः ॥ वेति वक्तव्यम् ॥ * ॥ तेन चरः पुरुषः । चलो रथः । चलं यानम् । वदो मनुष्यः । इत्येवमाद्यपि सिद्धं भवति ॥ हन्तेर्घत्वं च ॥ * ॥ हन्तेरचि प्रत्यये परतो द्वे भवतो ऽभ्यासस्य च हकारस्य घुत्वमाक् चागमो भवति । परस्य अभ्यासाच्चेति कुत्वम् । घनाघनः क्षोभणश्चर्षणीनाम् ॥ पाटेर्णिलुक् चोक् च दीर्घश्चाभ्यासस्य ॥ * ॥ पाटेरचि परतो द्वे भवतो णिलुक्च भवति । अभ्यासस्योगागमो दीर्घश्च भवति । पाटूपटः ॥

ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ १३ ॥

पुत्र पति इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे ष्यङः संप्रसारणं भवति । यणः स्थाने इग् भवतीत्यर्थः । कारीषगन्धीपुत्रः । कारीषगन्धी-पतिः । कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । करीषस्येव गन्धो ऽस्य कुमुदस्येव गन्धो ऽस्येति बहुव्रीहिस्तत्रोपमानाच्चेति गन्धस्येदन्तादेशः, करी-षगन्धेरपत्यमित्यण् तदन्तात्स्त्रियामणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्र इति ष्यङ् ततश्चापि विहिते षष्ठीसमासः । संप्रसारणस्येति दीर्घत्वम् । ष्यङ इति किम् । इभ्यापुत्रः । क्षत्रियापुत्रः । पुत्रपत्योरिति किम् । कारीषगन्ध्याकुलम् । कौमुदगन्ध्याकुलम् । तत्पुरुषइति किम् । कारीषग-न्ध्यापतिरस्य ग्रामस्य, कारीषगन्ध्यापतिरयं ग्रामः । ष्यङ इति स्त्रीप्रत्यय-ग्रहणं स्त्रीप्रत्यये चानुपसर्जनेनेति प्रत्ययग्रहणपरिभाषया यस्मात् स वि-हितस्तदादेरित्येष नियमो नास्ति तेन परमकारीषगन्ध्यायाः पुत्रः परम-

कारीषगन्धीपुत्रः । परमकारीषगन्धीपतिरित्यपि भवति । उपसर्जने तु ष्यङि न भवति । अतिक्रान्तः कारीषगन्ध्यामतिकारीषगन्ध्यास्तस्य पुत्रो ऽतिकारीषगन्ध्यापुत्रः । अतिकारीषगन्ध्यापतिः । पुत्रपत्योः केवलयोरुत्तरपदयोरिदं संप्रसारणं, तदादौ तदन्ते च न भवति कारीषगन्ध्यापुत्रकुलं कारीषगन्ध्यापरमपुत्र इति । ष्यङन्ते यद्यप्यन्ये यणः सन्ति तथापि ष्यङ एव संप्रसारणं निर्दिश्यमानस्यादेशा भवन्तीति । संप्रसारणमिति चाधिक्रियते विभाषा परेरिति यावत् ॥

बन्धुनि बहुव्रीहौ ॥ १४ ॥

ष्यङः संप्रसारणमित्यनुवर्त्तते । बन्धुशब्द उत्तरपदे बहुव्रीहौ समासे ष्यङः संप्रसारणं भवति । कारीषगन्ध्या बन्धुरस्य, कारीषगन्धीबन्धुः । कौमुदगन्धीबन्धुः । बहुव्रीहाविति किम् । कारीषगन्ध्याया बन्धुः । कारीषगन्ध्याबन्धुः । अत्रापि पूर्ववदेव । परमकारीषगन्धीबन्धुरित्यत्र भवति । अतिकारीषगन्ध्याबन्धुरिति च न भवति, तथा कारीषगन्ध्याबन्धुधनः कारीषगन्ध्यापरमबन्धुरिति । बन्धुनीति नपुंसकलिङ्गनिर्देशः शब्दरूपापेक्षया पुल्लिङ्गाभिधेयस्त्वयं बन्धुशब्दः ॥ मातच्मातृकमातृषु ॥ * ॥ ष्यङः संप्रसारणं भवति विभाषया बहुव्रीहावेव । कारीषगन्ध्या माता ऽस्येत्येवं बहुव्रीहौ कृते एतस्मादेवोपसंख्यानात् पक्षे मातृशब्दस्य मातजादेशः । तत्र चित्करणसामर्थ्याद्बहुव्रीहिस्वरमन्तोदात्तत्वं बाधते । मातृमातृकशब्दयोश्च भेदेनोपादानाद् नद्यृतश्चेति कबपि विकल्प्यते । कारीषगन्धीमातः । कारीषगन्ध्यामातः । कारीषगन्धीमातृकः । कारीषगन्ध्यामातृकः । कारीषगन्धीमाता । कारीषगन्ध्यामाता ॥

वचिस्वपियजादीनां किति ॥ १५ ॥

संप्रसारणमिति वर्त्तते । ष्यङ इति निवृत्तम् । वचि । वच परिभाषणे । ब्रुवो वचिरिति च । स्वपि । ञिष्वप् शये । यजादयो, यज देवपूजासंगतिकरणदानेष्वित्यतः प्रभृति आ गणान्तात् । तेषां वचिस्वपियजादीनां किति प्रत्यये परतः संप्रसारणं भवति । वचि । उक्तः ।

उक्तवान् । स्वपि । सुप्तः । सुप्तवान् । यज । इष्टः । इष्टवान् । वप् । उप्तः । उप्तवान् । वह । ऊढः । ऊढवान् । वस । उषितः । उषितवान् । वेञ् । उतः । उतवान् । व्येञ् । संवीतः । संवीतवान् । ह्वेञ् । हूतः । हूतवान् । वद । उदितः । उदितवान् । टुओश्वि । शूनः । शूनवान् । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायते । तेनेह न भवति । वाच्यति वाचिक इति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ एकादशस्तवकावशेषः ॥

पुनरपि घनीभूतघनघटाघटितघनसारत्रसरेणुकल्पघनरसबिन्दुना ततमालमालतिकालतिकाकुसुमगन्धवाहेन गन्धवाहेन सेव्यमानो-ऽव्यमानोत्तममधुरलीलावलिः ॥ १२२ ॥

गन्धवाहेन पवनेन । कीदृशेन, घनीभूताभिर्निविडीभूताभिर्घनघटाभिर्घटिता निष्पादिता घनसारत्रसरेणुकल्पाः कर्पूरकणतुल्या घनरसबिन्दवो यत्र तेनेति शैत्यं, जलबिन्दुभारोद्वहनपरिश्रमेणेव द्रुतत्याभावान्मान्द्यं व्यञ्जितसंभवनागम्यम् । तता विस्तृता माला श्रेणी यासां तासां मालतिकालतिकानां कुसुमगन्धं वहतीति तेन· इति सौगन्ध्यमुक्तम् । अव्यमाना रक्ष्यमाणा· उत्तमा मधुरा लीलावलिर्येन सः ॥ १२२ ॥

वलितललिताङ्गतयागतयातिपरभागभागधेयं गोचारणलकुटिकापुटिकापुरोभागापवर्जितवामकरतलोऽम्बतलोभनीयशोभः सुरुचिरवामजङ्घोपरि परिगमितदक्षिणमहोजङ्घालजङ्घालतः ॥ १२३ ॥

वलिता सुविन्यस्ता ललिताङ्गता मनोहराङ्गभङ्गी तया । कीदृश्या, अतिपरभागस्य·अतिसौन्दर्यस्य भागधेयं भागम्·आगतया प्राप्तया "भागधेयं मतं भाग्ये भागप्रत्ययोः पुमानि"ति मेदिनी । गोचारणसंबन्धिन्या लकुटिकायाः पुरोभागे·अपवर्जितं दत्तं वामकरतलं यस्य सः, दानपर्याये·"अपवर्जनमंहति"रित्यमरः । अत एव तादृश्या भङ्ग्या·अम्बता परि-

पूर्णा लोभनीया शोभा यस्य सः । दक्षिणा सहोत्फुल्ला तेजोवेगधारिणी उत्फुल्लता यस्य तादृशः ॥ १२३ ॥

निजविलासमिव बहुधैवतं सपरहितं मनोमल्लारं मल्लारं रागमालपन् मुरलीरलीलया लयाभिरामेण गानेन वनपरिसरतः परिसरतः कुरङ्गनिकरानुत्कण्ठयन् कण्ठयन्नवनमालो धेनुगणमप्युत्कर्णयन्नात्मसहचरदत्तस्मृतिं निदधे ॥ १२४ ॥

विलासपक्षे बहुधैव बहुप्रकारेणैव तं प्रसिद्धं, मल्लारपक्षे बहवो धैवतस्वरा यत्र तम्, "धैवतांशग्रहन्यासो मल्लारः सपवर्जितः" इति तल्लक्षणात् । परेषां हितेन सह वर्तमानं, षड्जपञ्चमरहितं च । षड्जस्य मूर्धन्यादित्वेऽपि तस्य दन्त्यसकारेण संकेतो गानशास्त्रे प्रसिद्धः, "सड्जो दन्त्यादिरपी"त्यमरटीका चानुसार्या वा । मन एव मल्लो दुर्ग्राह्यत्वात् तमपि आराति गृह्णाति वशीकरोतीति,उभयथापि तुल्यार्थम् । मुरलीम् ईरयति तथा भावे प्रवर्तयति या लीला तया । वनस्य परिसरतः परिसरे, परि सर्वतः सरतः भ्रमतः । कण्ठं यती प्राप्नुवती नवा वनमाला यस्य सः ॥ १२४ ॥

तदा तदाकर्णनकर्णनमदमृतधारापातपातमहिमन्यसुभृतां सुभृतां करणव्यापारपारप्राप्तिं कारयति रयतिभ्मतया प्रमदघनानां घनानां हर्षाश्रुद्रव इव दुर्निवारा जलस्रुतिर्यदि समजनि ॥ १२५ ॥

तदाकर्णनं तच्छ्रवणमेव कर्णयोर्नमन्त्या अमृतधारायाः पातः पतनं तेन पातो रक्षितो यो महिमा तस्मिन् असुभृतां प्राणिनां करणव्यापारस्य इन्द्रियचेष्टायाः पारप्राप्तिं कारयति सति प्रमदेन हर्षेण घनानां निबिडानां घनानां मेघानामपि रयतिभ्मतया वेगानां तीक्ष्णत्वेन हर्षाश्रुद्रव इव । जलस्रुतिर्जलक्षरणम् ॥ १२५ ॥

तदा तमासारं कमठपृष्ठकाठिन्यधरधरणितलकल्पिततल्पतयाल्पतयापि न जातपङ्किलतया किल तया नोद्वेगकरं गुरुतराहारोप्या-

ताशमनतया शमनतया तन्वातन्वानन्दपरया सेहे सेहेहितभगवदा-लोका लोकातीता गवां श्रेणी ॥ १२६ ॥

सा गवां श्रेणी तमासारं सेहे॰असहत । अल्पतया॰ आसारस्या-धिक्याभावेन च न॰ उद्वेगकरं, प्रत्युत गुरुतराहारहेतुकाया उष्णतायाः शमनतया प्रशमकत्वेन शं सुखरूपमेव, अत एव॰ अनतया॰ अकुञ्चितया तन्वा, "अरालं वृजिनं जिह्ममूर्मिमत् कुञ्चितं नत"मित्यमरः, अतन्वान-न्दपरया॰ अनल्पहर्षपरया, सा प्रसिद्धा, इह वृष्टिसमयेऽपि॰ ईहितो भगवदालोको यया सा ॥ १२६ ॥

ततश्च तमालोक्य सहचरनिकरेण करेण सरसमूर्धनितानितानि मूर्धनि तानि तानि निजनिजचेलाञ्चलानि ॥ १२७ ॥

तम्॰ आसारम्॰ आलोक्य श्रीकृष्णस्य मूर्धनि मस्तके तानि तानि प्रसिद्धानि निजनिजचेलाञ्चलानि सरसं यथा स्यात् तथा॰ ऊर्ध्वं मस्त-कोर्ध्वप्रदेशे नितानितानि नितरां विस्तारितानि ॥ १२७ ॥

तैः श्रीकृष्णस्येव निष्कपटपटमण्डपतामापद्य सपद्यसमञ्जसमिव विगलदम्बुधराम्बु धरायामेव पातयामासे मासेव्यमानस्य व्यमानस्य वपुरुपरि ॥ १२८ ॥

ततस्तैश्चेलाञ्चलैः कर्तृभिर्निष्कपटं निर्व्याजमेव पटमण्डपत्वम्॰ आपद्य प्राप्य सपदि तत्क्षणमेव॰ अम्बुधराम्बु मेघसंबन्धिजलं धरायां पृथिव्यामेव पातयामासे, न तु तस्य मूर्धनीत्यर्थः । कृष्णस्य कथंभूतस्य, वपुरुपरि मा वसनसंबन्धिनी शोभा तया सेव्यमानस्य ।

यद्वा वपुरुपरि निष्कपटपटमण्डपताम्॰ आपद्येत्येवं संबन्धनीयम् । व्यमानस्य विगतावमानस्य । यद्वा, धरायामेव पातयामासे मा तस्य वपु-रुपरि । कुतः, सेव्यमानस्य । तदपि कुतः, व्यमानस्य । अवमानरहितो हि सेवार्ह एवेति भावः ॥ १२८ ॥

पुरुपरितोषेण च जगदे जगदेकवल्लभ स्वभावोऽयं मल्लाररागस्या-परागस्यापरोक्ष एव यदस्य जलधरागमकानि गमकानि ॥ १२९ ॥

ततः पुरुपरितोषेण प्रचुरानन्देन सहचरनिकरेण जगदे· उक्तः, श्रीकृष्ण इत्यर्थः। किं तत्, हे जगदेकवल्लभ विश्वेषामेकप्रिय· अस्य मल्लाररागस्यायं स्वभावोऽपरोक्षः साक्षादेव। कथंभूतः, अपराक्· न परा· अञ्चतीत्यपराक्, प्रकृष्ट इत्यर्थः॥ १२९॥

किंतु नीरवनीरवर्षव्यपदेशरोदनकारिता कारिता भवद्गानकौशलेनेव॥ १३०॥

जलधराणामागमनमात्रस्यैव प्रयोजकत्वं तद्गमकानां प्रसिद्धं किंतु नीरवं निःशब्दं यथा स्यात् तथा नीरवर्षणस्य व्यपदेशेन छलेन रोदनं कर्तुं शीलं येषां तेषां भावस्तत्ता सा तु भवत्कर्तृकेन गानकौशलेनैव कारिता· उत्पादिता॥ १३०॥

तदलं गानकलया कलयामो न घनाघनाच्छन्ने दिनकरकरनिकरे दिनमर्यादा मर्यादारक चपलमेव चलामोऽचलामोदमेदुरं दुरन्तं ते मुरलीकलकुलं विरमतु विरमतु च धाराधरधारा धरणितलतल्पादुत्थापयामो गाः॥ १३१॥

गानकलया गानशिल्पेनालं, कुतः, दिनकरस्य करे घनाघनैराच्छन्ने सति दिनमर्यादा न कलयामो न जानीमः, "वर्षुकाब्दा घनाघना" इत्यमरः। हे मर्यादारक मरी मारी तस्या दारक खण्डक। यद्वा, मर्यादा·इयर्तीति तथाविध, चपलं तूर्णमेव चलामो गच्छामः। अचलामोदेन स्थिरानन्देन मेदुरं स्निग्धम्॥ १३१॥

इति सहचरकृतसरसरभसपरिहासहासपेशलवदनविधुरविधुरमहा महामधुरो विरचितवंशीध्वानमध्वानमध्वानमभिसारयन् धेनुगणं दिशि विदिशि विहितविलोकनो लोकनोनूयमानचरितो घनमहसा महसादरेणेव निरुध्यमानप्रसारसारस्यैः कुवलयवलयमहामारकतकतमप्रमुखमुखमोटनकरैरङ्गतरङ्गतरलतासमधिकोच्छलद्भिरतिविस्मयधामभिर्धामभिरन्यादृश इव दृश्यमानोऽमानोदारश्रीः॥ १३२॥

अविधुरमुत्कृष्टं महस्तेजो यस्य सः, विरचितवंशीध्वानं यथा भवत्येवम्· अध्वानम्· अध्वानं प्रतिपथमेव धेनुगणमभिसारयन् । लोकैर्नोनूयमानम्· अतिशयेन स्तूयमानं चरितं यस्य सः । धामभिस्तेजोभिः· अन्यादृश इव । कीदृशैः, अतिविस्मयानां धामभिरास्पदैः । घनमहसा बहिःस्थमेघतेजसा महे· उत्सवे सादरेणेव निरुध्यमानः प्रसारः प्रसरणं तेनैव सारस्यं सरसता येषां तैः । ततश्च धाम्नां प्रसरणाभावेन निविड-तापत्त्या शोभाधिक्यमिति । कुवलयवलयानि नीलोत्पलमण्डलानि च महामारकतानि च तेषु कतमानि मुख्यमुख्यानीत्यर्थः· तन्मुखानां तदादीनां मुखमोटनकरैरतिन्यक्कुर्वद्भिः । अङ्गानां पाणिपादादीनां या तरङ्ग-वत् तरलता तया समधिकमुच्छलद्भिः । अमाना· अनुपमा· उदारा महती श्रीः शोभा यस्य सः ॥ १३२ ॥

सजलधरजलधरणितलचलनचलनवालधीनां खरखुरखुरप्रक्षोदे-नापि नोद्धूनितधूलीनां धेनूनां गणमनु मनुजाकृतिब्रह्मतया मतया-ख्यातः ख्यातः परागतपरागोपरागो नीलसरोजस्तोम इव द्वितीय इव महीमहीयःसौभाग्यरूपी रूपी घनरसदः पीनापीनाभोगभारविवश-तया मन्दमन्दमलसमलसमुपव्रजन्तीर्व्रजं तीव्रतया चालयितुं त्वरा-व्यञ्जकेन रञ्जकेन रंहसा वेणुनिनदस्य धेनूर्नोदयन्नदूरे पुरपुरश्रियं ददर्श ॥ १३३ ॥

जलधरसंबन्धिजलेन सह वर्तमाने धरणितले चलने चलनं कम्पनं येषां तथा भूता वालधयो यासां तासाम् । खरास्तीक्ष्णाः खुरा एव खुरप्राः शरास्तेषां क्षोदेन क्षोदनेनापि नोद्धूनिता नोच्चालिता धूलयो याभिस्तासां धेनूनां गणमनु लक्षितः । मतया संमतया मनुजाकृतिब्रह्मतया· आख्यातः । नामतः ख्यातः प्रसिद्धः, "आख्याह्वे अभिधानं चे"त्यमरः । परागतः परास्तः परागोपरागो धूल्युपरञ्जनं यस्य तथा भूतो नीलसरोजसमूह इव । द्वितीयो रूपी घनरसदः· मेघ इव । मह्याः पृथिव्या महीयो महत्तरं सौभाग्यं तद्रूपी । पीनस्य पुष्टस्य· आपीनस्य· ऊधसः· आभोगः परिपूर्णता तया यो भारस्तेन विवशतया ॥ १३३ ॥

सा हि॰ आसारसारसलिलैः स्नातेव मेघमहोमहोज्ज्वलनीलशाटिकयाशाटिकया कयाचन समावृतावयवेव ॥ १३४ ॥

सा हि पुरश्रीः प्रथममासारसारसलिलैः स्नाता॰ इवासीत् । ततो मेघ इत्यादिलक्षणा॰ इवासीत् । इति प्रतिविशेषणानन्तरमर्थसौन्दर्यार्थ॰मासीदिति क्रियापदस्यावृत्त्या संबन्धः । मेघमहो मेघकान्तिस्तदेव महती॰ उज्ज्वला नीलशाटिका तया । कीदृश्या, आशा दिशोऽटति व्याप्नोतीति तया ॥ १३४ ॥

प्रतिभवनपटलपटलपरिगतमदमेदुरकलापिकलापिकलापैरायतायतैः स्नाननिमितमर्मितमतिघनं केशपाशं प्रसार्य शोषयन्तीव ॥ १३५ ॥

भवनपटलानां गृहच्छदिषां पटले पटले प्रतिसमूहे॰ एव परिगताश्च ते मदेन मेदुरां स्निग्धां कलां नृत्यशिल्पम्॰ आप्तं प्राप्तुं शीलं येषां ते च ये कलापिनो मयूरास्तेषां कलापैः शिखण्डैः । आयतायतैः॰ अतिदीर्घैः । स्नानेन निमितम्॰ आर्द्रितम् ॥ १३५ ॥

घनमुक्तप्रतीचीमुखसंध्यारागसंध्यारागप्रतिबिम्बबिम्बप्रभादूरसिन्दूरशोभालभालस्थलेव ॥ १३६ ॥

घनैर्मेघैर्मुक्ता त्यक्ता प्रतीची पश्चिमदिक् तस्या मुखसंधौ॰ आरगति सम्यक्॰ लगतीति तथा भूतो यः संध्यारागः संध्याकालिकरक्तिमा तस्य प्रतिबिम्बः स्फटिकाट्टादिगतः स एव बिम्बप्रभां दूरयति तिरस्करोति तादृशं सिन्दूरम्, यद्वा, बिम्बप्रभया बिम्बफलकान्त्या॰ अदूरम्॰उपमया संनिकृष्टं च तत् सिन्दूरं चेति तच्छोभालं तच्छोभायाहि भालस्थलं ललाटप्रदेशो यस्याः सा ॥ १३६ ॥

समनुकृतगवाक्षगवाक्षनिकुरम्बेण श्रीकृष्णरूपसौन्दर्यानयनचतुरनयनचतुरशीतिसहस्रेणेव सुकृतसुकृतपाकलब्धेनेव पश्यन्ती ॥ १३७ ॥

एवं क्रमेण सायं स्नानवस्त्रपरिधानकेशशोषणसिन्दूरप्रसाधनैः सखायिकाभावमभिव्यज्य तस्याः श्रीकृष्णविषयकगाढानुरागमप्यनुभावमुखेन

द्योतयन् विशिनष्टि, समनुकृतगवाक्षेण गोनयनाकारेण गवाक्षनिकुरम्बेण जालसमूहेन श्रीकृष्णसंबन्धिरूपसौन्दर्यस्यानयने चतुरं दक्षं यत्· नयनानां चतुरशीतिसहस्रं तेन पश्यन्तीव । चतुरशीतिसहस्रमित्यसंख्यतातात्पर्येण यमकानुरोधादेवोक्तम् ।

ननु तस्याः कथमेवं नयनबाहुल्यं तत्राह सुकृतेति । "विधत्स्व कर्णायुतमेष मे वर" इतिवद्दर्शनातृष्णया नयनबाहुल्यार्थम् । सुष्ठु कृतानि पुण्यानि तेषां पाकेन परिणत्या लब्धेनेव ॥ १३७ ॥

घनमहोन्नत्या निरातपताकान्तपताकान्तकरकिसलयैरिव कृष्णागमनसुखमुल्लासयन्तीव मनो मनोरथाक्रान्तम् ॥ १३८ ॥

घनस्य मेघस्य महोन्नत्या या निरातपता· आतपराहित्यं तया कान्ता रम्याः पताकान्ताः पताकाग्राण्येव करकिसलयानि तैः । मनोरथेनाक्रान्तं मनो लासयन्तीव नर्तयन्तीव ॥ १३८ ॥

परितः परितस्थुषां निर्वृष्टेऽपि घने संभूय भूयश उपचितानामवनीराणां नीराणां रुचिजितकर्पूररेणुरेणुकादलदेलवालुकापरिमलवालुकापरिमलननिष्पङ्कयापङ्कया प्रणालिकालिकासु प्रवहन्त्या धारया रयातिरेकेणागच्छन्तीनां धेनूनामकैतवां श्रद्धामाधाय यतमानेवासीच्चरणधावनाय भवनाय भवन्तीनाम् ॥ १३६ ॥

अथ गोपालस्य तस्य प्रीतिकाम्ययेवास्या गवां सेवापरिपाटीमाह परित इति । प्रणालिकाश्रेणिषु प्रवहन्त्या नीराणां धारया । आगच्छन्तीनां धेनूनां चरणधावनाय पादप्रक्षालनाय यतमाना यत्नवतीवासीत् । नीराणां कथंभूतानाम्, निर्वृष्टेऽपि वृष्टितो विरतेऽपि सति घने मेघे परितः समन्तादट्टालिकापृष्ठादिषु परितस्थुषां प्रथममितस्ततः स्थितवताम् । ततश्च संभूय मिलित्वा भूयशः पुनः पुनरपि· उपचितानाम्· उपचयं प्राप्तानां सताम् । अवनीराणाम्· अवनीं भूतलं रान्ति· ऊर्ध्वतो निपत्य गृह्णन्ति प्राप्नुवन्तीति यावत्, तेषाम् । धारया कथंभूतया, रुचिः कान्ती रोचकत्वं च ताभ्यां जिताः कर्पूररेणवो यया सा चासौ रेणुका

दलदेलवालुकापरिमला चेति, रेणुका च दलन्ती स्फुटन्ती· एलवालुका च तयोः परिमलो यस्यां तथा भूता च या वालुका तस्याः परिमलनेन संमिलनेन निष्पङ्कया पङ्करहितया, "हरेणू रेणुका कौन्ती"· "एलवालुकमैलेय" मिति चामरः। एते सुगन्धलते सौरभ्यार्थमट्टपृष्ठसंधिप्राङ्गणकोणादिष्वारोपिते ज्ञेये। अपङ्कया पङ्कं पापं तद्रहितया· इति सामान्यदृष्ट्या प्रणालिकाप्रसक्तमपावित्र्यं वारितम्। भवनाय भवनं प्रवेष्टुं भवन्तीनां वर्तमानानाम् ॥ १३९ ॥

अथ मन्मथमथनकृद् बहुशोभो बहुशो भोदारविशालगोशालगोचरीकृतगोनिकरो गोनिकरोद्धुततिमिरपटलपटलः स्वभवनचत्वरत्वरमाणागतिर्निजजनिजभवनं प्रति प्रतिजनं विसर्ज्य सर्ज्यमानविरहरंहसा विरसमनसो वयस्यबालकान् समाने वयस्यबालकान् समानेन प्रणयनिरीक्षणेन क्षणेन क्षणेन परितोष्य च ॥ १४० ॥

बह्वी शोभा यस्य सः। भा कान्तिस्तया· उदारं च तद् विशालगोशालं चेति तत्र। गोः कान्तिस्तस्या निकरेणोद्धुतं तिमिरपटलं येन तथा भूतं पटं लाति परिधत्ते· इति तथा सः। सर्ज्यमानस्य· उपार्ज्यमानस्य विरहस्य रंहसा वेगेन, "सर्ज· अर्जने"· इति धातुः। समाने तुल्ये वयसि निमित्ते· अबालं न बालं किंतु प्रौढमेव कं सुखं येभ्यस्तान् ॥ १४० ॥

भवनोदरं विनोदरं विविधभोगसंपदा नभोगसंपदानर्घ्यकारिण्या संप्रविष्टः। पूर्वपूर्वदिनेभ्योऽप्यतिशयितेनाशनपानादिकौशलेन यथायथमुपचरितश्चरितचटुलया प्रस्वा प्रस्वापितश्च कर्पूरपूरवलक्षवलक्षेमकारिणा सकलपरिमलवतामलवतामुपदधानेन कोमलिम्नालिम्नातपरिसरेण सुरभितमेनोपधानेन शोभमाने शयनतले निशामनैषीत् ॥ १४१ ॥

भवनोदरं गृहमध्यम्। कीदृशम्, विविधभोगसंपदा विनोदं हर्षं राति ददातीति। कीदृश्या, नभोगायाः स्वर्गताया अपि संपद आनर्घ्यं

वैयर्थ्यं तत् कर्तुं शीलं यस्यास्तया । प्रस्वा मात्रा प्रस्वापितः शायितः । कीदृश्या, चरिते चरित्रे चटुलया शोभनया । शयनतले कीदृशे, कर्पूरपूरवद्धवले धवले । उपधानेन शोभमाने । कीदृशेन, वलक्षेमकारिणा, इति तस्य मणिमन्त्रौषधिगर्भितत्वं सूचितम् । कोमलिम्ना तदाधिक्यप्रतिपत्त्यर्थं धर्मधर्मिणोरभेदोपचारः । सकलपरिमलवतां समस्तसुरभिद्रव्याणाम्· अलघतां प्रचुरतामखण्डतां वा· उपदधानेन· आधिक्येन धारयता । अत एव· अलिभिर्व्रातः· अभ्यस्तः परिसरो यस्य तेन ॥ १४१ ॥

एवमितः परमितः परमुत्कर्षमुत्कर्षं कुर्वाणां प्राणसखीनां प्रमोहपरम्परां परां प्रादुर्भावयन् भावयन्नखिलकुटुम्बनिकुरम्बमप्युपशमोपायमपायकातरमपरिचीयमानः स कृष्णानुरागमहानलो न लोकेन केनचिदप्यनुभूतचरज्वालो जाज्वल्यमानतामवाप यदि ॥ १४२ ॥

अथोपरिष्टाद्राधानवसंगमं वर्णयिष्यन्निदानीमस्याः पूर्वरागपाकावस्थामन्यवैलक्षण्येन परमकाष्ठामाप्तामभिव्यञ्जयति, इतः परं कृष्णानुरागमहानलो यदि जाज्वल्यमानताम्· अवाप तदा वार्षभानवी बहिर्वृत्तिं विसस्मारेत्यन्वयः । कृष्णानुरागमहानलः कथंभूतः, परम्· अधिकम्· उत्कर्षम्· इतः प्राप्तः । ततश्चास्याः प्रमोहपरम्परां मूर्च्छापरम्परां प्रादुर्भावयन्· जनयन् । कीदृशीं, प्राणसखीनां मुत्कर्षम्· आनन्दस्य कर्षणं नाशं कुर्वाणाम् । भावयन् कथं जीविष्यतीत्युपशमोपायम्· औषधादिकं चिन्तयन् । यतस्तैरपरिचीयमानः, व्याधिमहावेशादिबुद्धैव कथंचिल्लक्ष्यमाण इत्यर्थः । केनचिदपि· अन्यगोपीजनेनापि न· अनुभूतचरी· उपलब्धपूर्वा ज्वाला यस्य सः ॥ १४२ ॥

तदा तं निर्वापयितुमिव प्रियसहचरीनिकरेणाजस्रं स्रवद्भिरस्रनिर्झरैस्तिरस्कृततदानींतनजलधरधारैरभिषिच्यमानविग्रहयावृताङ्गी वार्षभानवी नवीनविपद्वृन्दमासेदुषी विदुषी न परमुपायमाशाबन्धमपि शिथिलयन्ती लयं तीव्रमुपयास्यन्ता बहिर्वृत्तिं विसस्मार स्मारशराघातघनघूर्णा घनघूर्णायमानदिग्वनितानितानितरसमये समये ॥ १४३ ॥

अस्रनिर्झरैः कीदृशैः, तिरस्कृता तदानींतनी जलधरस्यापि धारा यैः, तैरभिषिच्यमानेन सिचयेन वस्त्रेणावृतमङ्गं यस्याः सा । आसेदुषी प्राप्तवती । कथंचिन्मूर्च्छाभङ्गे सति परम् उपायं कृष्णाङ्गसङ्गादन्यं प्रतीकारं न विदुषी, न मानयन्तीत्यर्थः । तस्य दुष्प्रापतां परामृश्य प्राणरक्षकमाशाबन्धमपि शिथिलयन्ती मोचयन्ती । कुतः, दशमीं दशामारुरुक्षुर्लयं नाशम् उप निकट एव यास्यन्ती । बहिर्वृत्तिमिन्द्रियाणां बहिर्व्यापारं विसस्मार विस्मृतवती । स्मारशरस्याघातेन घना निबिडा घूर्णा च यस्याः सा । घनैर्मेघैर्हेतुभिर्घूर्णायमानाभिः संभुक्तकान्तावन्मुद्रितलोचनाभिर्दिग्वनिताभिर्नितरां तानिता विस्तारिता रसा वृष्टिजलानि तन्मये समये । अतस्तस्यास्तादृशदशेक्षणे भ्रामितबुद्धीनां सखीनां क्षणमपि तां त्यक्तुमशक्नुवन्तीनां कृष्णे दूत्यादिप्रक्रियापि नाभूदतो योगमाययैव सर्वसमाधानमिति वक्ष्यति ॥ १४३ ॥

कृष्णोऽपि तदवधि लब्धतदनुरागबाधया राधया स्वहृदयमन्दिरमध्यासीनयानया सह सहर्षसंततं संततमन्तरेव रममाणोऽपि वात्सल्यादिरसजुषां सजुषां पित्रादीनां संनिधौ तथाविधतत्तत्सुखप्रकाशशक्त्यैव बहिर्वृत्तिमप्यनुभाव्यमानोऽमानोदारलीलो विललास ॥ १४४ ॥

लब्धा तस्य कृष्णस्यानुरागबाधा यया तया अनया राधया सह सहर्षसंततं सहर्षविस्तारं यथा भवत्येवं संततं निरन्तरमेव अन्तरेव मनोमध्य एव वात्सल्यसख्यदास्यरससेविनां तत्तद्रसाश्रयाणां पित्रादीनां नन्दादिश्रीदामादिरक्तकादीनां, सजुषां जुट् प्रीतिस्तत्सहितानां स्वस्वरसोचितप्रेमवतामित्यर्थः, तथाविधं स्वस्वरसोपयोगि तत् तत् सुखं कृष्णदर्शनादौ प्रेमतारतम्येन तरतमायमानं सुखं तस्य प्रकाशो यतस्तया स्वभावशक्त्यैव, तेषां प्रेमानुरोधेन बहिर्वृत्तिं, लालनावकाशप्रदानकन्दुकादिक्रीडावेशपरिचर्यानुमोदनादिं, न विद्यते मानस्तत्त्वतो ज्ञानं यस्यास्तथा भूता उदारा महती लीला यस्य सः, अतर्क्यौदार्यचर्य इत्यर्थः ॥ १४४ ॥

अथापरेष्वपि दिवसेषु घनसमयसमयमानमाननीयसौभगेषु मणि-

गणगोवर्धनस्य गोवर्धनस्य गिरिवरस्य रम्यतमासूपत्यकासु त्यक्ता सु पौरपौरवसुरभिषु सुरभिषु चरन्तीषु ॥ १४५ ॥

अथ तत्त्वसंगमसंगमकत्वेन वर्षासमयस्यैवातिथेयत्वं द्योतयन् पुनरपि तद्विलासं वर्णयति, एवमिति । सहचरैरुपचर्यमाणो विजहारेत्यन्वयः । घनसमये मेघागमकाले रम्यगयमानं समागच्छत्, माननीयं सौभगं येषां तेषु दिवसेषु, मणिगणैर्गवां कान्तीनां वर्धनं यस्य तस्य गोवर्धनस्य, उपत्यकासु निकटभूमिषु, त्यक्तासु तासु, अकजन्तं त्यच्छब्दरूपम् । पौराणां सुगन्धि तृणानां पौरवेण पुरुतया प्राचुर्येण हेतुना सुरभिषु सुगन्धासु सुरभिषु धेनुषु चरन्तीषु सतीषु ॥ १४५ ॥

तस्यैव क्षितिधरचूडामणीन्द्रस्यन्दमानरुचिधाराधरधाराधरजलधाराधरगन्धशिलागर्तपरिसरसरद्विसरसरसशिलासिंहासनकृतासनः ॥ १४६ ॥

चूडासु ये मणीन्द्राः कमलरागादयस्तेभ्यः स्यन्दमानां चरन्तीमिव रुचिधारां कान्तिधारां धरन्तीति तथा भूता या जलधरजलानां मेघवृष्टजलानां धारास्ता धरन्ति ये गन्धशिलागर्ताः सुगन्धशिलामयविवराणि तेषां परिसरमुपान्ततटं सरन् प्राप्नुवन् विसरः समूहो यासां तथा भूताः सरसाः शिला एव सिंहासनानि तत्र कृतासनः ॥ १४६ ॥

स्फटिकगण्डशैलशैलजनिषण्णजलदनिकरकरकर्षणजातकौतुकैस्तदुदरदरसमुन्मीलदचिररोचिषां रोचिषां पटलेन रुषा परुषापचिकीर्षया कृतनयनवैकृत्येनेव भियाभियार्पितशङ्कैः परावृत्य वृत्यपरावृतैः पुनरपि धर्तुमुद्यतैर्मुद्यतैरुपसर्पद्भिः पुनरपि तद्गर्जितगर्जितगरिम्णा पलायमानैः पुनरपि चपलतया ताडयितुमुपसर्पद्भिस्तद्द्रोणीनीरनीरन्ध्रशीकरनिकरनिर्भरफूत्कारपराहतैः सहचरैर्हास्यमानः ॥ १४७ ॥

ततः सहचरैर्हास्यमानः । कथंभूतैः, स्फटिकगण्डशैलेषु यानि शैलजानि शिलाजतूनि तत्र निषण्णानामुपविष्टानां जलदनिकराणां करेण

कराधृतदीर्घलकुटेन वा यत् कर्षणमाकर्षणं तत्र जातकौतुकैः । ततस्त- दुदरतो दरमीषन्मीलन्तीनामचिररोचिषां विद्युतां रोचिषां दीप्तीनां पटलेन· अभियापितशङ्कैः प्रापितसाध्वसैः । पटलेन कीदृशेन, रुषा क्रोधेन परुषं यथा भवत्येवम्· अपचिकीर्षया· अपकर्तुमिच्छया कृतं नयनवैकृत्यं नेत्रविकृतीभावो येन तेन· इव । ततश्च भिया परावृत्य पलाय्य, वृत्या· इत इत आगच्छतेति पार्ष्णिग्राहतया वरणेन· अपरैरपि वयस्यैरा- वृतैः । ततश्च लब्धसाहसैर्धर्तुमुद्यमवद्भिः । मुदा तदावेशानन्देन यतैर्व- शीकृतैः ॥ १४७ ॥

कदापि दापितसुखस्तैरेव बहुधा बहुधातुशकलकलनेन कृतवि- विधपरभागपरभाग्येनाकल्पेन ॥ १४८ ॥

दापितं सुखम्, अर्थान्मेघैरेव सहचरेभ्यो येन सः । बहुविधानां धातुखण्डानां कलनेन· आनयनेन । ततश्च कृतस्य विविधै रागैः परभा- गस्य शोभाया अपि परं भाग्यं कृष्णेन स्वीकाराद्यत्र तथा भूतेन· आक- ल्पेन वेषेण ॥ १४८ ॥

कदाचन च, नटद्भिरितस्ततस्तैरेव जनितसारस्यः सारस्यदो रस्योरस्योतलक्ष्मीलक्ष्मा लक्ष्मीलक्ष्माधरविहारी ॥ १४९ ॥

सारस्यदः सारजवः, स्थिरहर्षजन्यवेग इत्यर्थः । रस्यं यदुरो वक्ष- स्तत्र· आ· ऊतं सम्यग्ग्रथितम्· इव लक्ष्मीलक्ष्म यस्य सः । लक्ष्मीले श्रीले श्रीमति क्ष्माधरे गोवर्धनपर्वते विहारी विहरणशीलः ॥ १४९ ॥

घनसमयसुखापसुखापत्तिकारिफलमूलकन्दकन्दलितानन्दः सखि- भिरेव तत्तदभिमतोऽभितोषेणाहृत्य श्रद्धाबद्धावत्प्रणयमहिम्ना हि म्नापिततत्तद्दशनो दशनोज्ज्वलरुचा सितेन हसितेन हरमाणो गिरि- चराणामखिलसत्त्वानां मनो मनोज्ञैस्तैरेव करतललभ्यपूगतरुपूगतरु- णफलमामूलदलितदलितजाम्बूनदाभताम्बूलवल्लीदलदलदतिजीर्णसु- रभिशिलाचूर्णचूर्णसमेतं कर्पूरकदलीकाण्डनिर्यासवासितं ताम्बूलमुपक- ल्प्य परिचर्यमाणो विजहार ॥ १५० ॥

घनसमये प्रावृषि सुखपां सुलभां सुखापत्तिं सुखाप्राप्तिं कर्तुं
शीलं येषां तैः फलमूलकन्दैः कन्दलितानन्दैः· अङ्कुरितहर्षैः, कन्दमूलयो-
र्वर्तुलदीर्घत्वाभ्यां भेदः। अद्रुया बद्धं संबद्धमवतः पालयतः प्रणयस्य महिम्ना
हि निश्चितं स्थापिततत्तद्दशनो निर्वाहिततत्तद्व्राजनः। अखिलसत्त्वानां
सर्वप्राणिनाम्। मनोज्ञैः श्रीकृष्णाभिरुचिविज्ञैस्तैः सहचरैरेव ताम्बूलमुपकल्प्य
परिचर्यमाणः। ताम्बूलमेव कीदृशं, करतलेनैव लभ्यं पूगतरुपूगानां गुवाक-
वृक्षसमूहानां तरुणं पुष्टं फलं यत्र तत्। तथा· आमूलं मूलमभिव्याप्य
दलिता जातदला यासौ दलितं चूर्णितं यज्जाम्बूनदं कनकं तदाभा चेति
तथा भूता या ताम्बूलवल्ली तस्या दलं पर्णं तथा दलन्त्यास्त्रुट्यन्त्या
अतिजीर्णायाः सुरभिशिलायाश्चूर्णः क्षोद एव चूर्णं ताभ्यां समेतम्, "दल
विदारणे" इत्यस्य त्रोटनमप्यर्थः। पचेर्विक्लित्तिविक्लेदनावज्ज्ञेयः ॥ १५० ॥

यदि कदाचित् तत्रैव वर्षति मुदिरो मुदि रोचमानस्तदा सदा-
नन्ददानन्दकन्दकन्दरामन्दिरमासाद्य रमासाद्यमाने तस्योदरे दरे-
क्षितनयनाञ्चलार्पणो दर्पणोदरसन्निभे सन्निभेन्द्रकलभ इवोपविश्य
समयं गमयति ॥ ५५१ ॥

सदैव नन्दतां समृद्धानामानन्दानां कन्दं मूलं यत्र तथा भूतं
कन्दरामन्दिरं, रमया श्रिया·आसाद्यमाने सेव्यमाने, सन् सुन्दर इभेन्द्र-
शावक इव ॥ १५१ ॥

तदा त एव सहचराश्चराचरमनोहरस्य तस्य पुरतः परस्पर-
परमखेलाकोलाहलहलहलारावे प्रतिरवरवणतयादरीकृतया दरीकृत-
या कौतुकपरंपरयापरया पुनरपि सविस्तारतारहूंकारकारिणः पुनर-
पि तथा प्रतिध्वनिध्वनितायां तस्यां पुनरपि ततोऽधिकचीत्कारका-
रणतयानवस्थानवस्थानत्वेन दूषणेऽपि पिशुनतया भूषणायमानतामेवा-
साद्य श्रीकृष्णं रमयामासुः ॥ ५२ ॥

प्रतिरवरवणतया प्रतिरवं प्रतिध्वनिं रातीति तत् तया । कीदृश्या॰ अदरीकृतया॰ अनल्पीकृतया । दरी कन्दरस्तया कृतया निष्पादितया । तया॰ अपरा॰ अन्या कौतुकपरंपरा तया । पुनरपि सविस्तारमत्यायतं तारमत्युच्चं हूंकारं कोऽसि रे किं वदसि रे॰ इत्याद्याक्रोशशब्दं कर्तुं शीलं येषां ते । तस्यां दर्यां पुनरपि तथा प्रतिध्वनिना ध्वनितायां सत्याम्॰ अनवस्था निष्ठायाः पर्याप्त्यभावस्तस्या नवीनस्थानत्वेन॰ उत्तमाश्रयत्वेन ॥ १५२ ॥

कदाचिदपि निपतति बहिः प्रावृट्प्रियो हास इव करकाकदम्बे द्रुतविद्रुतविहारा अवनतकन्धरा धरातलनिहितनयनास्तदानयनास्तदाक्षिण्यमवचित्य करे कृत्वा श्रीकृष्णचरणान्तिके निःक्षिपन्ति ॥ १५३ ॥

करकाकदम्बे वर्षोपलसमूहे बहिर्निपतति सति द्रुतं शीघ्रमेव विद्रुतविहारा विगतखेलाः, तेषामानयने॰ अस्तं निक्षिप्तं दाक्षिण्यं स्वाच्छन्द्यं यत्र तद्यथा भवत्येवं निःक्षिपन्ति । "दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिष्वि"त्यमरः ॥ १५३ ॥

निर्वृष्टे तु घने कन्दरतोऽदरतोषेण बहिर्भूय भूय उपरि गिरिशिखरस्य खरस्यदज्जलदज्जलदरेतरक्षालिते चमूरुवधूजनाच्छपुच्छपुटमार्जिते कस्तूरीहरिणतरुणीमदगन्धिमरकतशिलाशकलेऽशकलेन्दुसुन्दरमुखः सुखावस्थितः ॥ १५४ ॥

अदरतोषेण॰ अनल्पहर्षेण, खरस्यदैस्तीक्ष्णवेगैर्जलदजलैर्दरेतरमदरमनल्पं यथा स्यात् तथा क्षालिते, अशकलेन्दुः पूर्णचन्द्रः ॥ १५४ ॥

स्थित एव परितोऽपरितोषहरः स्वां तनुमिव घनमहसा महसारेण दूरादविभज्यमानावयवां मदकलझंकारमुखरमधुपरागमधुपरागप्रियकप्रियकमालां विलसच्छ्रीवत्सगोचारचारबभूयिष्ठां पीतभास्वदंशुकां सरसरभसहरिणीनयनां चमत्कारकारिणीं हारिणीं ललितललितलम्बमानसुपल्लवपङ्क्तिशाखां वनराजिमालोकमानः ॥ १५५ ॥

स हरिः स्वां तनुमिव वनराजिमालोकमानस्तथा गां द्यां च समभासमालोकयन् शबलि कालि धवले इत्यादि नाम नाम याहं याहं यदि समाजुहाव तदा गिरिवरस्य उपत्यकान्ताः समीयुरित्यन्वयः । घनमहसा निविडकान्त्या, पक्षे, मेघतेजसा हेतुना, दूराद् दूरत अविभज्यमाना विभक्ततया न लक्ष्यमाणा अवयवा यस्यास्ताम् । मदकलानां मदोत्कटानाम् अत एव झंकारमुखराणां मधुपानां रागोऽनुरागो यत्र सा चासौ मधुना परागेण च प्रियं कं सुखं यतः सा चेति तथा भूता प्रियकमाला कदम्बस्रक्, पक्षे कदम्बश्रेणी यस्यां ताम् । विलसतः श्रीवत्सस्य चिह्नविशेषस्य गोचारो रश्मिसंचरणं तेन यच्चारवं चारुत्वं तेन भूयिष्ठां बहुलतमां, पक्षे, विलसच्छ्रीयुक्तानां वत्सानां गवां च चारस्य यच्चारुत्वं तेन भूयिष्ठाम् । पीतं पीतवर्णं भास्वत् तेजस्वि अंशुकमम्बरं यस्यास्तां, पक्षे, पीता निगीर्णा भास्वतः सूर्यस्यांशवो यया ताम् । घनमहसेत्यनुवृत्तेः सरसरभसा रसवेगसहिता हरिणीनयना गोप्यो यस्यां तां, पक्षे, सरसरभसानि हरिणीनां नयनानि यस्यां ताम् । हारिणीं हारवतीं मनोहारिणीं च । लुलितो मृदुलो ललितो लम्बमानः सुपल्लव इव पञ्चशाखः पाणिर्यस्यां तां पक्षे, तादृशसुपल्लवानां पञ्चो विस्तारो यासु तथा भूताः शाखा यस्यां ताम् ॥ १५५ ॥

परितश्चरितश्चमत्कारकारणेन मरकताङ्कुरायमाणसौगन्धिकगन्धिकतृणघनमेदुरामनिम्नोच्चभावभाबहुलामपगतभानुभानुशीतलतलपरिसरामभितो वलयाकारदूरावस्थितवनराजिकृतवेष्टनतया परस्परलग्नामिव चलज्ज्वलनवासरमणिकुण्डलां गां द्यां च समभासमालोकयन्नतिधन्यतमैः सह सहचरैः स हरिः ॥ १५६ ॥

चमत्काराणां कारणेन कर्त्रा चरितः प्राप्तः । चमत्कारहेतूनामास्पदभूत इत्यर्थः । द्याम् आकाशं गां पृथिवीं च कीदृशीं, मरकताङ्कुरायमाणानि सौगन्धिकगन्धीनि कत्तृणानि गन्धतृणानीव ये घना मेघास्तैर्मेदुरां, पक्षे, तादृशकत्तृणैर्घना निविडा चासौ मेदुरा स्निग्धा चेति

ताम्। "सौगन्धिकं तु कह्लार"मित्यमरः। न निर्वे(?)स्वभावो यस्याः सा चासौ भा कान्तिस्तया बहुला चेति ताम्। अपगता अपसृता भानोः सूर्यस्य भानवोंऽशवो यतः स चासौ· अत एव शीतलस्तलपरिसरो यस्याः सा चेति ताम्। चलज्जलनं पिधानं यस्य तथा भूतो वासरमणिः सूर्य एव कुण्डलं यस्यास्तां, "जल पिधान" इति चौरादिकः, पक्षे चलन् जलानां नव वासर वासरणं येषु तथा भूतानि मणिमयानि कुण्डानि जलाशयान् लातीति तथा ताम्॥ १५६॥

अथ तत्र गिरिवरपरिसरे न कोऽपि कंचिदधिक ऊनं सरसतरसौगन्धिकतृणे तृणेढि पशुः पशुमिति निरातङ्कतया तृणास्वादलालसेऽनालसेनाभितो यथेच्छं गते नैचिकीनिचये॥ १५७॥

कोऽपि· अधिकः· अधिकबलः पशुर्व्याघ्रादिः· ऊनं पशुं गवादिं न तृणेढि न हिनस्ति, "तृह हिंसायां" रौधादिकः। तृणास्वादलालसे विषये· अनालसेन॥ १५७॥

करकिसलयसलयधूयमानपीतचेलाञ्चलचालनेन सपताकनीलमणिस्तम्भ इव निखिलसौभाग्यलक्ष्मीविलासगृहारम्भस्य सुधारसाप्लतप्लुतदीर्घदीर्घगम्भीरतरविकस्वरस्वरसौभाग्यध्वनिभृता निभृताद्यरं शवलि कालि धवले · इत्यादि नाम नाम ग्राहं ग्राहं यदि समाजुहाव॥ १५८॥

तादृशस्वरसौभाग्यध्वनिभृतेति पीतचेलाञ्चलचालनेनेत्यस्य विशेषणम्। निभृताद्यरं नितरां पुष्टाद्यरं यथा भवति। नाम प्राकाश्ये। नाम संज्ञां ग्राहं ग्राहमित्याभीक्ष्ण्ये णमुल्॥ १५८॥

तदा युगपदेव तृणगुल्मादिविशालभञ्जिकाः शालभञ्जिका इवैकसूत्रगुम्फिता आपीनापीनाभोगभुग्नगतयोऽपि द्रुतगतयो द्रुतचेतसो इंवेति गद्गदगदनपराः पराहता इव मन्त्रबलेन धावमानाः॥ १५६॥

तृणगुल्मादीन् विशालं पृथुलं यथा भवत्येवं भञ्जयन्त्यामर्दयन्तीति तथा ताः शालभञ्जिकाः पुत्तलिका इवेति, तत्कथनादश्रुत्या जातस्तम्भभावा इति भावः,तथापि वस्तुस्वभाववैलक्षण्येन तदभिमुखधावनं स्तम्भेन न विरुध्यते, यथा वक्ष्यते रासारम्भे वंशीनादेन,

"अतनि तनूनां स्तम्भनमरचि मतीनामथोन्मादः ।
अवितः केवलमासां स्वमार्गसंचारसंस्कारः" ॥

इति, अत एवात्रापि मन्त्रबलेनेव धावमाना इति । आपीनस्य सम्यक् पुष्टस्य· आपीनस्य·ऊधसः· आभोगेन पूर्णतया भुग्नगतयः कुटिलगतयः । द्रुतचेतसो जाताश्रुभावाः ॥ १५९ ॥

पुनस्तस्यैव कृपालोः कृपालोलमनसो मा धावत मा धावतेति कलकोमलध्वनिमध्वनि मधुरमाकर्ण्य निरायासं धावन्त्योऽवन्त्यो भगवदाज्ञामिव समकालमेव गिरिवरस्य द्रुतमुपत्यकामुप त्यकाः समीयुः ॥ १६० ॥

कृपालोलमनसः· अनुकम्पासतृष्णचित्ताः, "लोलश्चलसतृष्णयो"-रित्यमरः । त्यक्तास्त्यक्तुब्दरूपं, ता नैचिक्यः ॥ १६० ॥

तदा कूजितमुरलीकोऽलीकोज्झितसौहृदैः सह सहचरैर्गिरिवरतोऽवरतो लीलातोऽलीलातोऽलसमवतरन् गिरिवरवनचारिखगमृगादिनिखिलजीवनिकायकायतो मन इवावतारयामास ॥ १६१ ॥

गिरिवरतो गोवर्धनतः, लीलातोऽवरतो विरत इत्यर्थः, अलीलातः अलीनामिला गिरोऽभिनन्द्य, "ल्यब्लोपे पञ्चमी," अलसं यथा स्यादेवमवतरन्, मन इवेति, मनसस्तन्मयत्वादुत्प्रेक्षा ॥ १६१ ॥

एवमहरहरहतकौतुके वर्षाविलासे गोचा गोचारचारणमञ्जमञ्जीरमणिमञ्जरीनिकरेण मञ्जुलयोः पदपङ्कजयोः पङ्कजयोद्धुररजसोरजसोमसोमशेखरशेखरमणिमञ्जरीरञ्जितयोर्न्यासेनाध्वजध्वजकमलादिलक्ष्मलक्ष्मणेन भूरसि रसिकताभिक्तारुचिरेऽचिरेण तद्गुरविपन्नाः पन्ना-

वलीर्निर्मिमाणो गिरिवरसानुचरः सानुचरः सगोधनो भवनमाजगाम ॥ १६२ ॥

वर्षाविलासवर्णनमुपसंहरति· एवमिति । पदपङ्कजयोर्न्यासेन भूरसि भूवत्तसि पद्मावलीर्निर्मिमाणः सानुचरो भवनमाजगाम । पदपङ्कजयोः कीदृशयोः, पङ्कं पापं तस्य जये· उद्धुरं समर्थं रजो ययोस्तयोः । अजश्च· उमासहितः सोमशेखरो महेश्वरश्च तयोः प्रणतिकाले शेखरस्थमणिमञ्जर्या रञ्जितयोः, यदुक्तं, "वन्द्यमानचरणः पथि वृद्धै"रिति । न्यासेन कथंभूतेन, गाम्· अञ्चतीति गोङ् तेन गोचा, गवानुगेनेत्यर्थः । अध्वनि वर्त्मनि जायमानैर्ध्वजकमलादिभिर्लक्ष्मभिश्चिह्नैर्लक्ष्मणेन सश्रीकेन, "रामभ्रातरि पुंसि स्यात् सश्रीके त्वभिधेयव"दिति मेदिनी । भूरसि कीदृशे, रसिकता सरसत्वं सिकता वालुका ताभ्यां रुचिरे । पद्मावलीः कीदृशीः, तस्या भुवो भररूपा अघबकादयस्तत्कृतां विपदं विपत्तिं त्रायन्त इति तथा ताः । गिरिवरस्य सानौ चरतीति तथा सः ॥ १६२ ॥

एवमस्मिन्नेव जलदागमे जलदागमे शोभायामिनीषु यामिनीषु प्रसह्य सह्यमानामनुरागबाधामनिराकरणीयावेगामन्तरे वहन्तीनां गोकुलकुलजानां राधादीनामदीनामलपरिमलां पूर्वरागतामपहाय सुकृतपरिपाकात् पाकात् पाकान्तरमासाद्य मधुरां कामधुरां काममपि सततमवतावतारिताखिलसौभगलीलेन श्रीकृष्णेन समं समन्ततस्तु भूयो भूयोऽगमाया योगमाया भगवती योजयन्तीति सफलयति ॥ १६३ ॥

अथ श्रीराधानवसंगमं वर्णयिष्यंस्तत्सर्वसमाधायिकाया योगमायायाः प्रक्रियापरिपाटीमाह· एवमिति । जलस्य दा दानं तया· आगमे, लोकसंचाराभावादुचितसमय इत्यर्थः । शोभायामिनीषु शोभाया आयामिनीषु यामिनीषु· अनुरागबाधामन्तरे वहन्तीनां राधादीनां काममपि कामधुरां कामभारं योगमाया सफलयति । कथंभूता सती, श्रीकृष्णेन समं ता योजयन्ती सती । कामधुरां कीदृशीं, पूर्वरागतां पूर्वरागत्वं स्व-

Digitized by Google

रूपम्· अपहाय त्यक्त्वा सुकृतपरिपाकाद् भाग्यातिरेकात् पाकात् पाकान्तरं परिणामादपि परिणामान्तरं प्राप्य मधुरां जातामित्यर्थः । प्राप्तां क्रियामपेक्ष्य पूर्वकाले क्त्वा । सततमवता स्वरूपगुणमाधुर्यनिःक्षेपेण पालयतेति, कृष्णेनेत्यस्य विशेषणम् । भूयो भूयः पुनः पुनरपि । अगमो दुर्गमोऽयः शुभावहो विधिर्यस्याः सा ॥ १६३ ॥

न तच्चित्रमस्याः कावरा वराकी चित्रलेखा लेखाधिनाथादिदुष्प्रवेशपुरनिरुद्धमनिरुद्धमभ्यासादयामास मासकतिपयगम्यमध्वानमध्वानमेवाभिलङ्घ्य जनानीक्षणेन क्षणेन निजसख्यै ॥ १६४ ॥

का निकृष्टा, अवरा न्यूना, लेखाधिनाथ इन्द्रः, अध्वानं निःशब्दमेव, अभिलङ्घ्य, क्षणेन क्षणमात्रेणैव, निजसख्यै ऊषायै, जनानां तत्रानिरुद्धस्य, इतः ऊषाया अपि परिवाररक्षकादीनाम् अनीक्षणेन अवलोकनमप्यतिक्रम्येत्यर्थः ॥ १६४ ॥

इयं तु भगवतो महायोगवतो महायोगशक्तिस्तासां पतिंमन्यानामन्या नारीस्तत्प्रतिच्छायाच्छायारूपा रूपाकृतिभिस्तत्तत्समानाः समानाय्य नित्यसिद्धश्रीकृष्णप्रेयसीस्वरूपेण रूपेण सहावतीर्णानामासामनियोजितदूतीभावं भावं भावं कृष्णाङ्गसङ्गमङ्गलाय ताः सकलाः सकला यथासमयं यदुपनेष्यति तत्र कः संदेहः ॥ १६५ ॥

अनियोजितदूतीभावं, ताभिरनियोजिताया अपि दूत्या दूत्यं कुर्वत्या यो भावस्तं, भावं भावं प्राप्य प्राप्य, "भू प्राप्तौ" णमुलन्तः, सकलाः कलासहिताः ॥ १६५ ॥

इति सिद्धान्तसिद्धां तदुभयोः केलिं के लिम्पन्ति न वैदग्ध्यादिविलासविशेषाः ॥ १६६ ॥

तत् तस्मात्· उभयो राधामाधवयोरिति सिद्धान्तेन सिद्धां केलिं रतिक्रीडां के वैदग्ध्यादयो विलासविशेषा न लिम्पन्ति नोपचिन्वन्ति· अपितु सर्व एव, "लिप उपदेहे" मुचादिः, उपदेह उपचयः ॥ १६६ ॥

सविशेषा हि लोकोत्तरता कोत्तरतारतम्यकारिणी भवति यदियं केलिकलाकलावतो राधामाधवयोर्वयोऽकृता नित्यसिद्धत्वात् ॥ १६० ॥

लोकोत्तरता, केलेरित्यर्थः । कं सुखं तदुत्तरं तत्प्रधानं यत् तारतम्यं तत्कारिणी भवति, लोकोत्तरताया वैशिष्ट्यतारतम्येनैव सुखतारतम्यं स्यादित्यर्थः । यद्यस्मादियं केलिर्वयोऽकृता वयसा न कृता, प्राकृतलोकानामिव यौवनोत्पादिता न भवतीति पूर्वरागारम्भे प्रपञ्चितमेव ॥ १६० ॥

वात्सल्यरसजुषां सजुषां सद्यस्तनस्तनंधयवत् कृष्णे रतिमुद्वहतां हृतांहसां केषांचिद्यदगोचरस्तद्धि तेषां तथाविधरसस्वरसस्वभावो न तच योगमायामायावैभवमिति ॥ १६८ ॥

सजुषां सप्रेम्णां, प्रीत्यर्थकजुषेर्भावक्विपा रूपं, तथाविधस्य रसस्य स्वोऽसाधारणो रसो बलं तस्य स्वभावः, "शृङ्गारादौ द्रवे वीर्ये देहधातुषु पारदे रस" इति विश्वः ॥ १६८ ॥

तथा सति कस्यामपीक्षणक्षणदायां शुभलक्षणक्षणदायां सौभाग्यरसोक्षणदायां क्षणदायां निबिडतमालमालयेव मुदिरमालया श्यामलीकृतायां प्रथमाभिसारसारस्यभागपरभागभागनुचरीभिरभिरस्यमाना योगमाययैव दर्शितेनाध्वना ध्वनावुपरते चिरानुरक्तिदूतिकया कयाचन पुरोगामिन्या पुरोगामिन्याय्यसाहसहरिष्यमाणकृष्णयाकृष्यमाणा॥१६९॥

कस्यामपि क्षणदायां रजन्यां सा वार्षभानवी अभिससार । कीदृश्याम्, ईक्षणयोः क्षणदायामुत्सवदायाम् । शुभलक्षणो यः क्षणः कालविशेषस्तच्छोधिकायां, तेनैव दा शोधनं वा यस्यास्तस्यां, "दैप् शोधने" । सौभाग्यरसस्य उक्षणमभिषेकस्तद्दायिन्याम् । प्रथमाभिसारे यः सारस्यभागः सरसत्वरूपोंऽशस्तेन परभागं सौन्दर्यं भजन्तीति तथा सा । अध्वना पथा । ध्वनौ शब्दे उपरते शान्ते सति । चिरानुरक्तिरेव दूतिका तयैवाकृष्यमाणा । कीदृश्या, पुरोगामिन्या अग्रगामिन्या, राधागतिरनुरागानुसारिण्येवेति द्योतितम् । पुरोगामिना अग्रभाविना न्याय्यसाहसेन कृष्णासुखैकतात्पर्यकरतिप्रागल्भ्यगमकेन हरिष्यमाणः कृष्णो यया यस्यां वा तया ॥ १६९ ॥

॥ शेषमग्रे ॥

Digitized by Google

॥ विद्वद्वरल्लोकाभिधमहाशयविरचितमानवीयज्ञाननविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य पञ्चमः परिच्छेदः ॥

॥ मिश्रभावानां संबन्धानां च वाचकानां नाम्नां विषये ॥

१ ॥ जातिवाचकपदानीव तानि (नामानि) अवच्छेदकविज्ञानानि बोधयन्ति ॥—मिश्रभाववाचकानां नाम्नां साधारणत्वेन पूर्वोक्तदिशा तानि रूपविशेषविशिष्टानां वस्तूनां जातेर्बोधाय प्रयुज्यन्ते । जातीनामसाधारणस्वरूपाणि च पदबोध्यात्मगतावच्छेदकविज्ञानान्नातिरिच्यन्त इत्युक्तमेव । इत्थं च भूयांसि नामानि मिश्रभावानामसाधारणस्वरूपाणि च सजातीयविज्ञानान्तरसाधारणरूपाण्येव सन्ति । किं चित्सूक्ष्मेक्षिकया दर्शने तु तेषु सम्यग्विचारार्हः कश्चन विशेष उपलप्स्यते ॥

२ ॥ प्रथमतः, पदबोध्यविज्ञानानि बुद्ध्या परिकल्पितानि सन्ति ॥—अवच्छेदकविज्ञानानि मिश्रभावानां तत्तद्विशेषजातिस्वरूपाणि वा बुद्ध्या परिकल्प्यन्ते येन तानि शुद्धविज्ञानजातिभ्यो भिद्यन्त इति प्रथमतो वैषम्यं तेष्वभिधीयते यस्यां कल्पनायां स्वस्मिन् भावोत्पादकानि वस्तुतो वर्तमानानि सन्निहितानि वस्तून्येव मनसा गृह्यन्ते नेतान्यत्किमपि नवीनं कर्तुं शक्यते ।

३ ॥ भावाः स्वैरिकाः स्वेतरसद्वस्तुनिरपेक्षाश्च सन्ति ॥—द्वितीयतो, मिश्रभावविशेषजातीनां स्वरूपाणि न केवलं मनसा परिकल्प्यन्ते, अपितु तानि स्वैरमितरसद्वस्तुनिरपेक्षाण्युत्पद्यन्ते । विशेषजातिस्वरूपाणां तथात्वेनैव तानि स्वीयवास्तविकसत्ताकल्पकगुणवतां गुणाविष्कारकाणां गुणसंबन्धयोग्यानां द्रव्याणां स्वरूपेभ्यो भिद्यन्ते । परं तु मिश्रभावानां मिश्रितविज्ञानेषु मनो यदृच्छया वस्तूनां यथार्थसत्तां नानुसरति । एवं च स्वभावतः पुनः पुनराविर्भवतां बाह्यवस्तुभिः स्फुटं प्रकाशितानां तावतां भिन्नभिन्नविज्ञानानां यत्किंचित्समुदायविशेषेण सह संबद्धुं सत् तमेवावधारयति । अपराणि च विज्ञानानि तत्तन्नामविशेषदानेन विवे-

चनमङ्गत्वैवोपेत्यन्ते । नापि मिश्रितभावानां तेषु स्वरूपविशेषेषु दृष्याणां मिश्रितविज्ञान इव वस्तुसत्तया तानि विज्ञानानि परीक्ष्यन्ते विशेष्यन्ते वा तानि स्वाभाविकसंबन्धविशेषवत्प्रतिमानैः । मनुष्या व्यभिचारपदार्थ-ज्ञानाय किं यत्र कुत्रापि वस्तुतो व्यभिचारं कर्तुं प्रयतन्ते? किं चैवंभूत-कार्यं किं कस्य चित्साह्यकारणादिदमस्ति यथार्थमिति तु न प्रष्टुं शक्यम् । मनुष्याः कदा चिदपि तत्कार्यं वस्तुतः कुर्वन्तु मा वा, परं तु ते मिश्रि-तैकविज्ञानात्मकं तादृशं समुदायं परिकल्पयन्तीत्यलं पल्लवितेन ।

४ ॥ कथमिति चेच्छृणु ॥—एतद्वृत्तस्य यथार्थज्ञानाय मिश्रितवि-ज्ञानानि कथं विरच्यन्ते इत्यवश्यं विचारणीयम् । किं च न किमपि नवीनविज्ञानं निर्मीयते ऽपित्वात्मनि पूर्वावधृतविज्ञानान्येव संघशः क्रियन्ते । तत्संघीकरणे चात्मनस्त्रयो व्यापाराः । तत्र तावदात्मा प्रथमं यत्किंचित्संख्याकानि विज्ञानान्यवधारयति, ततस्तानि परस्परसंयोजनेनै-कीकरोति, ततश्चैकेन नाम्ना संग्रथयति । आत्मा कथमेतेषु व्यापारेषु व्याप्रियते, कथं च तेषु प्रभवतीति परीक्ष्येत, तर्हि मिश्रितभावजातिवि-शेषाणां तानि स्वरूपाणि सन्त्यात्मकार्यरूपाणीति सुस्पष्टं ज्ञायेत । इत्थं च ता विशेषजातयोऽपि मनुष्यकार्यरूपा इति सिद्धम् ॥

५ ॥ पदार्थसत्तायाः पूर्वमपि प्रायस्तद्विज्ञानमस्तीत्यत्र तु मनः स्वतन्त्रमेव ॥—तथाहि । अयं मिश्रितविज्ञानजातिविशेषस्तज्जातीयव्य-क्तिविशेषसत्तायाः पूर्वमपि रचयितुं, व्यवच्छेत्तुं, नामविशेषेण व्यवहर्तुं च शक्यते । एवंप्रकारेण विशेषजातयो रच्यन्त इति विमर्शमात्रेणैवेमानि मिश्रविज्ञानानि व्यावहारिकमूलप्रतिमाननैरपेक्ष्येणात्मनि संघीकृतानां विज्ञानानां स्वैरिकसमूहेन रच्यन्त इत्यत्र न कोऽपि संदिह्यात् । देवस्वा-पहारस्य गुहतल्पगमनस्य वा विज्ञानं सर्वैर्मनुष्यैस्तयोरन्यतरदकृत्वापि स्वात्मनि रचयितुं शक्यते । एवमन्येऽपि मिश्रितविज्ञानविशेषाः कल्पयितुं शक्यन्ते । किं च तेषां बाह्यसत्ताया अभावे केवलमात्मैकगोचरतायामपि सांप्रतिकवास्तविकसद्भाव इव हेतुभिस्तानि यथार्थतत्त्वानीति साधयितुं शक्यते इत्यत्र न कोऽपि संदिह्यात् । एवं सति मिश्रितभावजातयो

Digitized by Google

वास्तविकसत्तादशायामिव यत्र ज्ञानयाथार्थ्ययोरखिलफलानुगता भवन्ति तत्र सा बुद्ध्यैव परिकल्पिता इति स्फुटं भवति । प्राय आन्वीक्षिकीनियमव्यवस्थापकाः स्वस्वबुद्धिपरिकल्पितात्ममात्रनिष्ठकर्मविशेषविषयकान् नियमान् रचयन्तीति तु निर्विवादमेव । किं च मृतपुरुषाणां महाप्रलयोत्तरकालिकं पुनरुत्थानं मिश्रितभावजातिविशेषरूपेणात्मनि तिष्ठतीत्यपि, मन्ये न केनापि प्रतिषिध्येत ।

६ ॥ उदाहरणानि मनुष्यहत्या, गुरुतल्पगमन,मसिपुत्र्या गात्रच्छेदनम् । इमानि मिश्रितभावस्वरूपाणि कथं मनसा स्वैरमुत्पाद्यन्त इति ज्ञानायैतेषामेकतममवश्यं विमर्शनीयम् । आत्मा तानि तानि पृथग् विज्ञानानि मिश्रितैकविज्ञानरूपेण संघीकरोति, नामविशेषं स्वयं परिकल्प्य व्यवस्थाप्य च काश्चन विशेषजातीरचयतीति किं चिदेव विचारेण साधयितुं शक्यते । यतो लोके मनुष्यविज्ञानस्य मरणविज्ञानेन सह मेषीमरणविज्ञानयोः संबन्धमपेत्य कोऽस्त्यधिकः संबन्धो येन स एवाङ्गलभाषीयमर्डरपदवाच्यक्रियाविशेषजातिरूपो भवेद् नापरः । एवं पितृसंबन्धविज्ञानमरणयोः संबन्धे पुत्रभ्रात्रादिसंबन्धविज्ञानमरणयोः संबन्धात्को विशेषो येनाद्य एव पितृहत्यापदप्रतिपाद्यजातिविशेषरूपो भवति । इतरेषां च न विभिन्नजातिविशेषप्रयोजकता । मातापितृघातयोरपत्यघातात् पृथक् सत्यपि विशेषजातिरूपत्वे केषु चिदन्येषु स्थलविशेषु पितृभ्यां सहैव पुत्रादयोऽपि परिगृह्यन्ते, ततश्च ते सर्वेऽपि केन चिद्विशेषजातिरूपेण सममेव बुद्ध्यन्ते । यथा सपिण्डाभिगमनमिति पदेन। इत्थमात्मा मिश्रभावस्थले (यानि २ सुकराणि) सुग्राह्यविज्ञानानि तानि मिश्रितैकविज्ञानरूपेण संघीकरोति, परं तु स्वभावतो मिश्रितानि कानि चिदन्यानि विज्ञानानि न कदाप्येकविज्ञानरूपेण संयुनक्ति । एकनामप्रयोगस्य तेषां बोधायानावश्यकत्वात् । अस्ति चैतत्स्फुटं यदात्मा स्वपरित्यक्तविज्ञानैः सममेव परस्परसंबद्धानि कतिपयविज्ञानानि यदृच्छया संयोजयति । कथमन्यथा छुरिकाहतपदाभिधेयहतविशेषजातिपरिकल्पनाय छुरिकाया आकारविशेषादीन् परित्यज्य हतकारिच्छुरिकाग्रभाग एव तावदवधार्यते । न चाबुध्यैवैतत्कि-

यत इत्येतस्यैव विषयस्य क्रमशो ऽग्रे प्रपञ्चयिष्यमाणत्वात्। परं तु स्वाभीष्टान्वेषणपरायण आत्मा यदृच्छयैव कानि चिद्विज्ञानान्यवधारयतीति तु वक्तव्यमेव । अत इमां मिश्रितविज्ञानविशेषजातयो बुद्धेः कार्याणि सन्ति । किं च प्राय एतद्विज्ञानरचनाय तेषां प्राकृतानि प्रतिमानानि नान्विष्यन्ते, न वा स्वरचितसद्वस्त्वनुरूपविज्ञानैः सह संबध्यते, अपि तु वस्तुतो वर्तमानस्य कस्यापि वस्तुनो ऽनुकरणायाप्रवृत्तः सर्वत्र स्वोद्देशसंपादकान्येव विज्ञानानि संघीकरोतीति सुव्यक्तमेवेति सिद्धम् ॥

७ ॥ एवमपि भाषणफलं साधयन्ति ॥—मिश्रितविज्ञानानि मिश्रभावस्वरूपाणि वा यद्यप्यात्माश्रितान्यात्मना महता स्वाच्छन्द्येन जन्यन्ते च तथापि तानि स्वैरिकाणि नोत्पाद्यन्ते नापि निरर्गलं परस्परसंबद्धानि । एषां मिश्रितविज्ञानानां सर्वदा व्यावहारिकसद्वस्तुसमानाकारत्वाभावेपि तानि सर्वदा ऽवच्छेदकविज्ञानसाध्यफलमनुसन्दधति । किं च यद्यपि तानि विज्ञानसंघीकारकात्मकल्पितपरस्परसंसर्गरहितविज्ञानानामिव परस्परासंबद्धविज्ञानानां समुदायरूपाणि सन्ति, तथापि तानि मुख्यभाषणफलभूतपरस्पराभिप्रायबोधनसौकर्याय सदा रच्यन्ते । संक्षिप्तैः शब्दैः सौकर्येण शैघ्र्येण च न केवलमनन्ततत्तद्व्यक्तिविज्ञानान्तर्भावकाणा,मपि तु मिश्रितैकविज्ञानरूपेण मिलितानेकस्वतन्त्रविज्ञानजातिसंग्राहकाणामपि सामान्यविज्ञानानां बोधनमेव भाषणस्य फलम् । अतो मिश्रितविज्ञानविशेषरचनायां परस्परव्यवहारोपयोगिनस्तानेव विज्ञानसमुदायानवधारयन्ति ये तत्तन्मिश्रितविज्ञानत्वेन समुदिता येषु च नामानि प्रयुज्यन्ते । परन्तु स्वभावतः परस्परसंबद्धानि कानि चिदपराणि विज्ञानान्युपेक्षन्ते । अलमत्रोदाहरणान्तरान्वेषणेन, परिगृह्यतां तावन्मनुष्यक्रियैवोदाहरणाय । यदि नानाविधमनुष्यक्रियाविशेषजातिष्वन्तर्भूतान्यवच्छेदकविज्ञानानि पृथक् पृथगेवावधार्येरंस्तर्हि तान्यनन्तानि स्युः । आनन्त्याच्च तेषां न केवलं तद्विषयकस्मृतिर्भारायमाणा अपितु विसंकुलापि स्यात् तथा च वैफल्यं प्रसज्येत । एतदुक्तं भवति । मनुष्याः स्वीयव्यवहारनिर्वाहाय येषां मिश्रितभावविज्ञानानां नाम्नां प्रयोगमावश्यकं मन्वते तान्येव मिश्रितविज्ञानानि

रचयन्ति तेष्वेव च नामानि प्रयुञ्जते। मरणविज्ञानेन सह पितृविज्ञानं मातृविज्ञानं वा संयोज्य पुत्रहननात्समीपवासिमनुष्यान्तरहननाद्वा पृथगेव विलक्षणां विशेषजातिं रचयन्ति लोकाः। तत्रायं हेतुः। अपराधस्यातिघोरत्वात् मातापित्रोर्वधे पुत्रस्वसमीपवास्यादिवधदण्डाद् भिन्नस्यैव दण्डस्यौचित्याच्च भिन्नसंघीकरणफलभूतं पृथङ्नाम्ना व्यवहारमावश्यकं मन्वते। परं तु यद्यपि हननविज्ञानसंबन्धेन मातृविज्ञानदुहितृविज्ञानयोस्तथात्यन्तं विभिन्नो व्यवहारो येन तयोराद्यमेव हननेन सह संबद्धं सद् यत्किंचित्पदबोध्यावच्छेदकविज्ञानं भिन्नां विशेषजातिं च रचयति न तु द्वितीयम्, तथाप्यभिगमनविज्ञानसंबन्धेन ते उभे अपि विज्ञाने सपिण्डाभिगमनपदार्थे ऽन्तर्भवतः। एकपदबोध्यत्वरूपसौकर्याय विज्ञानान्तरातिक्रान्तविसंकुलापरिस्फुटसंभिन्नैकविशेषजातिरूपेण संग्रहाय चेत्थं क्रियते। अनेन च तेषां विज्ञानानां दीर्घाणि कुटिलानि च विवरणानि परिहृतानि भवन्ति॥

८॥ भिन्नभिन्नभाषीया भाषान्तरेणाशक्यविवरणाः शब्दाः कथं प्रमाणानि॥—भिन्नभिन्नभाषाणां स्वल्पेनैवाभ्यासेन मनुष्य एतस्य तत्त्वमनायासेनावगन्तुं शक्नोति। भाषान्तरे येषां पर्यायशब्दा न सन्ति तथाविधा भूयांसः शब्दाः प्रायः सर्वासु भाषासूपलभ्यन्त इति तु स्फुटमेव। एकदेशीयानां पुरुषाणां सांसारिकव्यवहारानुसारतो विशेषविज्ञानरूपेण परैर्गृहीतानां भूयसां मिश्रविज्ञानानां रचनस्य तेषु नामप्रयोगस्य चावसरः संभवतीत्यपि व्यक्तमेव। यदीमा विशेषजातयः प्राकृतनित्यकार्यरूपा भवेयुर्न पुनर्भाषणसौकर्यनिर्वाहाय नामदानाय चात्मकल्पिताः परिच्छिन्नाश्च समुदायास्तर्हीतो ऽन्यथापि संभाव्येत। धर्माधिकरणीयव्यवहारगोचराणामाङ्गलभाषीयकतिपयशब्दानां पर्यायशब्दा विस्तृतयोरपि स्पेन्देशीयेटलीदेशीयभाषयोर्नोपलभ्यन्ते, किं पुनः तुच्छाभ्यां करवो,वेस्तोभिधाभ्यां तदनुवादस्य प्रत्याशा। तथा हि रोमन्देशीय 'वर्सरा' शब्दस्य युरुवीयदेशीयकार्बान्शब्दस्य वा यथार्थार्थबोधनसमर्थः शब्दो भाषान्तरे नास्त्येव। एतस्य कारणं तु पूर्वं प्रदर्शितमेव। प्रत्युत यद्यपि भाषान्तरानुवादेषु कोशेषु च परस्परार्थप्रकाशनसमर्थानां शब्दानामुपलम्भेन तासु

तासु भाषासु पदान्तरार्थबोधकाः शब्दाः सन्तीति प्रतीयते तथापि यदि पूर्वोक्तविषयस्य किं चित्सूक्ष्मेक्षिकया ऽधिकं विमर्शो भिन्नभाषीयशब्दानां याथार्थ्येन साम्यपरीक्षा च क्रियेतां तर्हि मिश्रितविज्ञानार्थकानां विशेषतो मिश्रभावत्ववाचकानां दशानां नाम्नां मध्ये एकमपि तथा दुर्लभं स्याद्यत् पदान्तरप्रतिपाद्यविज्ञानं याथार्थ्येन बोधयितुं समर्थं सत् कोशेषु परपदपर्यायरूपेण प्रदर्शयितुं शक्येत । कालपरिमाण,विस्तार,गुरुत्वविज्ञानसमानि न्यूनमिश्रितानि साधारणतमानि च विज्ञानान्तराणि न सन्ति । यद्यपि तद्बोधकानां ल्याटिन्देशभाषीयाणां होरा, पेस्, लिब्रेतिपदानां संस्कृतभाषीयैः क्रमेण मुहूर्तप्रक्रमप्रस्थार्धपदैर्बिनैव क्लेशमर्थो बोधयितुं शक्यते तथापि रोमन्देशीयैर्यादृशविज्ञानबोधनायेमे शब्दाः प्रयुज्यन्ते तानि विज्ञानानि संस्कृतपदानामर्थभूतेभ्यो विज्ञानेभ्यो ऽतितरां भिन्नानि सन्ति । यदि कश्चन रोमन्देशीयोऽन्यदेशीयः संस्कृतज्ञो वा स्वस्वभाषीयाणि परिमाणवाचकानि पदानि भाषान्तरीयपदप्रतिपाद्यविज्ञानतात्पर्येण प्रयुञ्जीयात्तर्हि स स्वीयाभिप्रेतार्थं सर्वथा जह्यात् । इमे हेतवः सन्त्यत्यन्तं सुस्पष्टा येन संदेहलेशोपि नोदेतुं शक्नोति । नीतिविषयके प्रकरणे भूय उपलभ्यमानेष्ववच्छेदकविज्ञानवाचकेषु समस्तविज्ञानवाचकेषु च शब्देष्वितो ऽप्यतितरां याथार्थ्यमस्योपलप्स्यते । तेषां शब्दानां भाषान्तरीयैः शब्दैरनुवादकरणसमये ऽनुवाद्यानुवादकयोः परस्परार्थसाम्ये विचार्यमाणे सर्वांशेन समानार्थका अत्यन्तं विरला एवोपलप्स्येरन् ॥

९ ॥ परस्परसंभावणानिर्वाहाय विशेषजातयो रचनीया इति वक्ष्यमाणप्रघट्टकेन प्रदर्श्यते ॥—परापरजात्योर्विषये तासां स्वरूपविषये च तानि नियतानि स्वाभाविकानि स्थिराणि च पदार्थेषु वस्तुतो वर्त्तन्त इति न भ्रमितव्यम् । गाढं विचारे क्रियमाणे तादृशविज्ञानसमुदायानां समयविशेषेष्वेकेनैकजात्याश्रयानेकतत्तद्व्यक्तिबोधनसमर्थेन साधारणजातिनाम्ना बोधनसौकर्याय केवलं तानि स्वरूपाणि विशेषजातयश्च बुद्ध्या परिकल्प्यन्त एव न पुनस्तानि स्थिरवास्तविकरूपवन्ति सन्तीत्येवं प्रतीयते । मिश्रभावानां विशेषजातयो बुद्ध्या परिकल्प्यन्त इति मदीये वाक्ये

नानार्थकं विशेषजातिपदं केषां चिच्छ्रोत्रकटु प्रतीयतां नाम, तथापि मन्ये विशेषजातिपदबोध्यानि मिश्रितावच्छेदकविज्ञानानि आत्मैव रचयतीति केनापि न निषेद्धुं शक्यते । पदार्थेषु नामप्रयोगाय विशेषजातिरचनाय चात्मा प्रतिमानानि रचयतीत्यस्य याथार्थ्ये सति विशेषजातेः परिच्छेदकमपि स एव कल्पयतीति तु निर्विवादं स्वीकरोमि । प्रकारविशेषजात्योः केवलं पदभेदकृतस्यैव भेदस्य सत्त्वात् ॥

॥ शेषो ऽग्रे भविता ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER VII.

THE SAIVA DARŚANA.

(Continued from page 128.)

"Those among the Pralayákalas whose *karma* and *mala* are immature,
Go, united with the *puryashṭaka* body, into many births by the power of *karma*."

The *puryashṭaka* is also thus described in the same work:

"The Puryashṭaka, is composed of the internal organ, thought *(dhī)*, *karma*, and the instrument."

॥ सर्वदर्शनसङ्ग्रहः ॥

विज्ञानाकलनामैको द्वितीयः प्रलयाकलः ।
तृतीयः सकलः शास्त्रे ऽनुग्राह्यस्त्रिविधो मतः ॥
तत्राद्यो मलमात्रेण युक्तो ऽन्ये मलकर्म्मभिः ।
कलादिभूमिपर्य्यन्ततत्त्वैस्तु सकलो युत इति ॥

प्रलयाकलोऽपि द्विविधः पक्वपाशद्वयः, तद्विलक्षणश्च । तत्र प्रथमो मोक्षं प्राप्नोति, द्वितीयस्तु पुर्य्यष्टकयुतः कर्म्मवशान्नानाविधजन्मभाग् भवति । तदप्युक्तं तत्त्वप्रकाशे,

This is thus explained by Aghora Siva Áchárya, "the Puryashṭaka is a subtile body apportioned to each individual soul, which continues from the creation until the close of the kalpa or until liberation: it is composed of the thirty* tattwas beginning with 'earth' and ending with *kalá*." As has been said in the Tattvasangraha:

> "This set of tattwas, commencing with 'earth' and ending
> with *kalá* is assigned to each soul,
> And wanders by the decree of *karma*, through all the bodies
> produced by the world."

The following is the full meaning of this passage. The word '*internal organ*,' which properly includes 'mind,' 'intelligence' 'egotism' and 'reason,'† includes also the seven tattwas which enter into the production of enjoyment [or experience], viz. those called *kalá*, time, fate, knowledge, concupiscence, and nature, and quality ‡; the words '*thought*' (*dhí*) and *karma* signify the five cognizable gross elements, and their originators, the subtile rudiments. By the word '*instruments*' are comprehended the ten organs of sense and action.

* Or rather thirty-one?

† *Manas, buddhi, ahankára, chitta.*

‡ These are the seven *vidyá-tattwas,—kalá, kála, niyati* (fate), *vidyá. rága, prakriti,* and *guṇa*. Hoisington, however, puts *purushan* 'the principle of life, instead of *guṇa*, which seems better, as the three *guṇas* are included in prakriti. He translates *kāla* by 'continency,' and describes it as "the power by which the sense are subdued and the carnal self brought into subjection."

प्रलयाकलेषु येषामपक्वमलकर्म्मणो व्रजन्त्येते ।
पुर्य्यष्टकदेहयुता योनिषु निखिलासु कर्म्मवशादिति ।

पुर्य्यष्टकमपि तत्रैव निर्दिष्टम्,

स्यात् पुर्य्यष्टकमन्तःकरणं धीःकर्म्म करणानीति ।

विवृतं चाघोरशिवाचार्य्येण "पुर्य्यष्टकं नाम प्रतिपुरुषं नियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वा स्थितः पृथिव्यादिकलापर्य्यन्तस्त्रिंशत्तत्त्वात्मकः सूक्ष्मो देहः । तथा चोक्तं तत्त्वसंग्रहे ।

वसुधाद्यस्तत्त्वगणः प्रतिपुंनियतः कलान्तोऽयम् ।
पर्य्यटति कर्म्मवशाद्भुवनजदेहेष्वयञ्च सर्व्वेष्विति ।

Digitized by Google

"But is it not declared in the Śrīmat Kálottara that 'The set of five, sound, touch, form, taste and smell, intelligence, mind and egotism, these constitute the *puryashṭaka.*'

How then can any different account be maintained? We grant this, and hence the venerable Ráma Kanṭha has explained that sútra in its literal meaning [i. e. as *puryashṭaka* is derived from *ashṭa* 'eight;'] so why should we be prolix in the discussion? Still if you ask, how we can reconcile our account with the strict nominal definition of *puryashtaka,* we reply that there is really no contradiction as we maintain that it is composed of a set of eight in the following manner: (1) the five elements; (2) the five rudiments; (3) the five organs of knowledge; (4) those of action; (5) the fourfold, internal organ; (6) their instrument; * (7) the Nature [prakriti;] and (8) the class composed of the five, beginning with kalá which form a kind of case.†

* This 'instrument' (*karaṇa*) seems to mean what Hoisington calls *purushan* or "the principle of life which establishes or supports the whole system in its operation;" he makes it one of the seven Vidyā-tattwas. According to Mādhava, it should be what he calls *guṇa.*

† The thirty-one *tattwas* are as follow: twenty-four *atma-tattwas,*—five elements, five *tanmātras,* ten organs of sense and action, four organs of the *antahkaraṇa* and seven *vidyā-tattwas* as enumerated above.

See J. A .O. S. 1v. pp. 16--17.

तथा चायमर्थः समपद्यत । अन्तःकरणशब्देन मनोबुद्ध्यहङ्कारचि-त्तान्यविना अन्यान्यपि पुंसो भोगक्रियायामन्तरङ्गाणि कलाकालनियति-विद्यारागप्रकृतिगुणाख्यानि सप्त तत्त्वानि उपलक्ष्यन्ते, धीकर्म्मशब्देन ज्ञेयानि पञ्च भूतानि तत्कारणानि च तन्मात्राणि विवक्ष्यन्ते, करणशब्देन ज्ञान-कर्म्मेन्द्रियदशकं संगृह्यते ।

ननु श्रीमत्कालोत्तरे, शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्च-कम् । बुद्धिर्मनस्त्वहङ्कारः पुर्य्यष्टकमुदाहृतमिति श्रूयते तत्कथमन्यथा कथ्यते । सत्यं अतएव च तत्रभवता रामकण्ठेन तत् सूत्रं यथाश्रुतपरतया व्याख्यायीत्यलमतिप्रपञ्चेन । तथापि कथं पुनरस्य पुर्य्यष्टकत्वं भूततन्मा-

Now in the case of some of those souls who are joined to the *puryashṭaka* body, Maheśwara Ananta having compassionated them as possessed of peculiar merit, constitutes them here as lords of the world,—as has been said:

"Maheśwara pities some and grants them to be lords of the world."

The class called *sakala* is also divided into two, as *pakwakalusha* and *ap ιkwakalusha.* As for the former, the Supreme Being in conformity with their ma'urity *(paripáka,)* puts forth a power agreeable thereto, and transfers them to the position of the hundred and eighteen Lords of the Mantras, signified by the words Maṇḍalī, &c., as has been said,

"The rest are denominated *sakala,*—from their connection with *Kalá,* &c., seized by time whose months are days;
The Supreme of his own will make one hundred and eighteen of these the Lords of the Mantras.
Eight of these an called *Maṇḍalins,*—eight again are Krodha, &c.,
Víreśa, Śríkaṇṭha, and the hundred Rudras,—these together are the hundred and eighteen."

In their case again, the supreme, having assumed the form of a teacher, stops the continued accession of maturity and contracts his manifested power,—and ultimately grants to them liberation by the process of initiation, as has been said:

चबुद्धीन्द्रियकर्म्मेन्द्रियान्तःकरणसंज्ञैः पञ्चभिर्वर्गस्तत्कारणेन प्रधानेन कलादिपञ्चकात्मना वर्गेण चारब्धत्वादित्यविरोधः । तत्र पुर्य्यष्टकयुतान् वि.शिष्टपुण्यसम्पन्नान् कांश्चिदनुगृह्य भुवनपतित्वमत्र महेश्वरोऽनन्तः प्रयच्छति । तदुक्तम्,

कांश्चिदनुगृह्य वितरति भुवनपतित्वं महेश्वरस्तेषामिति । सकलोऽपि द्विविधः पक्ककलुषापक्ककलुषभेदात् । तत्राद्यान् परमेश्वरस्तत्परिपाकपरिपाट्या तदनुगुणशक्तिपातेन मण्डल्याद्यष्टादशोत्तरशतं मन्त्रेश्वरपदं प्रापयति । तदुक्तम् ।

"These creatures whose *mala* is matured,—by putting forth a transforming power,—

"He, assuming the form of a teacher, unites by initiation to the highest principle.

It is also said in the Śrímad Mṛigendra: Before it was changed, but now at last it throws off all the bonds of atomic *mala* *."

All this has been explained at great length by Náráyaṇa Kaṇṭha, and there it is to be studied; but we are obliged to pass on through fear of prolixity.

But as for the second class, or those called *apakwakalusha*, the Supreme Being, as impelled by the desert of their respective actions, appoints them, as endued with infinitesimal bodies, to enjoy the rewards of their previous actions.† As has been said:

"The other souls, bound [in their material bonds] He appoints to enjoy their various deserts,

According to their respective actions:—such are the various kinds of souls."

* The *aṇu* in this verse seems to be the same as the second kind of *mala* mentioned by Mr. Hoisington. The first kind of *mala* is the *máyá-mala*, the second *áṇava-mala*, the third *kanmá-mala (karma)*.

† "The Soul, when clothed with these primary things (desire, knowledge, action the *kaládipanchaka*, &c.,) is an exceedingly small body." (Foulkes.)—One of the three *malas* is called *áṇava*, and is described as the source of sin and suffering to souls.

शेषा भवन्ति सकलाः कलादियोगादहर्मुखे काले ।
शतमष्टादश तेषां कुरुते स्वयमेव मन्त्रेशान् ॥
तत्राष्टौ मण्डलिनः क्रोधाद्यास्तत्समाश्च, वीरेशः ।
श्रीकण्ठः शतरुद्राः शतमित्यष्टादशाभ्यधिकमिति ॥

तत्परिपाकाधिक्यनिरोधेन शक्त्युपसंहारेण दीक्षाकरणेन मोक्षप्रदो भवत्याचार्य्यमूर्त्तिमास्थाय परमेश्वरः । तदप्युक्तम्,

परिपक्कमलानेतानुत्सादनशक्तिपातेन ।
योजयति परे तत्त्वे स दीक्षयाचार्य्यमूर्त्तिस्थ इति ॥

श्रीमन्मृगेन्द्रेऽपि

We now proceed to describe the third category, matter (a *pâśa.*)—This is fourfold, *mala,** *karma, mâyâ* and *rodha-śakti.** But it may be objected, "It is not said in the Saiva Âgamas that the chief things are the Lord, souls and matter? now the lord has been shewn to mean Śiva,—'souls' mean atoms (or beings endowed with atomic bodies,) and matter (or 'bond') is said to be the pentad†; hence matter will be fivefold. How then is it now

* The first three are the three kinds of *mala* in the J. A. O. S. viz. *ânavam kanmam* and *mâyei* the last is the 'obscuring' power of Mâyesuran. (Cf vol. 4, pp. 13—14.)—The Śaivas hold that Pâśa, like the Sânkhya Prakṛiti is in itself eternal, although its connection with any particular soul is temporary, See J. A. O. S. iv. p. 228.

† These are the five *vindu, mala, karma, mâyâ* and *rodhaśakti.* *Vindu* is described in Foulkes' translation of the Śiva-prakâśa-patalai: A "sound proceeds out of the mystical syllable om;...and in that sound a rudimentary atom of matter is developed. From this atom are developed the four sounds, the fifty-one Sanskrit letters, the Vedas, Mantras, &c., the bodily, intellectual and external enjoyments of the soul that have not attained to spiritual knowledge at the end of each period of the world's existence and have been swept away by the waters of the world-destroying deluge; after these the three stages of heavenly happiness are developed, to be enjoyed by the souls that have a favourable balance of meritorious deeds or have devoted themselves to the service of God or the abstract contemplation of the deity; viz., (1) the enjoyment of the abode of Śiva; (2) that of near approach to him; (3) that of union with him." Vindu is similarly described J. A. O. S. iv. p. 152—3.

पूर्व्वं व्यत्यासि तस्याणोः पाशजालमपोहतीति ।

व्याहृतञ्च नारायणकण्ठेन तत्सर्व्वं तत एवावधार्य्यम् । अस्माभिस्तु विस्तरभिया न प्रस्तूयते । अपक्वकलुषान् बद्धानणून् भोगभाजो विधत्ते परमेश्वरः कर्म्मवशात् । तदप्युक्तम्,

बद्धान् शेषानपरान् विनियुङ्क्ते भोगभुक्तये पुंसः ।
तत्कर्म्मणामनुगमादित्येवं कीर्त्तिताः पशव इति ॥

अथ पाशपदार्थः कथ्यते । पाशश्चतुर्विधः मलकर्म्ममायारोधशक्तिभेदात् । ननु शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमाच्चितयम् । तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशा इति पाशः पञ्चविधः कथ्यते तत्कथं चतुर्विध इति गण्यते । उच्यते बिन्दोर्मायात्मनः शिवतत्त्व-

reckoned to be only fourfold?" To this we reply as follows. Although the *vindu* or nasal dot which is the germinal atom of máyá, and is called a Śiva-tattwa, may be well regarded as material in comparison with the highest liberation as defined by the attainment of the state of Śiva, still it cannot really be considered as matter when we remember that it is a secondary kind of liberation as causing the attainment of the state of such deities as Vidyeśwara, &c. Thus we see there is no contradiction. Hence it has been said in the Tattwaprakáśa, "the bonds of matter will be fourfold."

And again in the Srímad Mrigendra,

"The enveloper-controller *(mala)*—the overpowerer *(rodha)*—action—and the work of Máyá,—
These are the four 'bonds,' and they are collectively called by the name of 'merit.'

The following is the meaning of this couplet.

(1.) 'Enveloping,' because *mala* exceedingly obscures and veils the soul's powers of vision and action ; "controlling," because *mala*, a natural impurity, controls the soul by its independent influence. As has been said :

"*Mala*, though itself one, by manifold influence interrupts the soul's vision and action ;

यद्वेदनीयस्य शिवपदप्राप्तिलक्षणपरममुक्त्यपेक्षया पाशत्वेऽपि तद्भोगस्य विद्येश्वरादिपदप्राप्तिहेतुत्वेनापरमुक्तित्वात् पाशत्वेनानुपादानमित्यविरोधः । अतएवोक्तं तत्त्वप्रकाशे,

पाशाश्चतुर्विधाः स्युरिति ।

श्रीमन्मृगेन्द्रेऽपि,

आवृतीशो बलं कर्म्म मायाकार्य्यञ्चतुर्विधम् ।
पाशजालं समासेन धर्म्मा नाम्नैव कीर्त्तिता इति ॥

अस्यार्थः आवृणोतीति प्रकर्षेणाच्छादयत्यात्मनो दृक्क्रिये इति आवृतिः स्वाभाविकाशुचिर्मलः स च ईष्टे स्वातन्त्र्येणेति ईशः । तदुक्तम्,

Digitized by Google

It is to be regarded as the husk in rice or rust on copper." *

(2.) The 'overpowerer' is the obscuring power,—this is called a 'bond' [or matter] in a metaphorical sense, since this energy of Śiva obscures the soul by superintending matter [rather than by itself partaking of the nature of matter.]

Thus it has been said:

"Of these I am the chief energy, and the gracious friend of all,
I am metaphorically called páśa,† because I follow desert.

(3.) Action, [or rather its consequences, *karma*,] as being performed by those who desire the fruit. It is in the form of merit or demerit, like the seed and shoot, and it is eternal in a never-beginning series. As has been said in the Śrímat Kirana,

"As *Mala* has no beginning, its least actions are beginningless:
If an eternal character is thus established, then what cause could produce any change therein?"

(4.) 'Máyá'—because herein as an energy of the Divine Being all the world is potentially contained *(yáti)* at a mundane

* See the same illustrations in J. A. O. S. iv. p. 150.

† Some forced derivation seems here intended as of पाश from पश्चात्.

एको ह्यनेकशक्तिर्दृक्क्रिययोश्छादको मलः पुंसः ।
तुषतण्डुलवत् ज्ञेयस्ताम्राश्रितकालिकावद्वेति ॥

बलं रोधशक्तिः अस्याः शिवशक्तेः पाशाधिष्ठानेन पुरुषतिरोधायकत्वादुपचारेण पाशत्वम् । तदुक्तम्,

तासामहं वरा शक्तिः सर्व्वानुग्राहिका शिवा ।
धर्म्मानुवर्त्तनादेव पाश इत्युपचर्य्यत इति ॥

क्रियते फलार्थिभिरिति कर्म्म धर्म्माधर्म्मात्मकं बीजाङ्कुरवत् प्रवाहरूपेणानादि । यथोक्तं श्रीमत्किरणे,

यथानादिर्मलस्तस्य कर्म्माल्पकमनादिकम् ॥
यद्यनादिरसं, सिद्धं वैचित्र्यं केन हेतुनेति ॥

destruction,—and again at a creation it all comes *(Yáti)* into manifestation,—hence the derivation of the name. This has been said in the Śrímat Saurabheya:

"The effects, as a form of the Divine energy, are absorbed therein at a mundane destruction,
And again at a renovation it is manifested anew in the form of effects as kalá, &c. *"

Although much more might be added on this topic, yet we stop here through fear of extending this treatise too far. Thus have the three categories been declared,—the Lord, the soul, and matter.

A different mode of treating the subject is found in the Jnánaratnávalí, &c., in such lines as:

"The Lord, knowledge, ignorance, the soul, matter, and the cause
Of the cessation of the rest,—these are collectively the six categories."

But our readers must seek the full information from the work itself. Thus our account of the system is complete. E. B. C.

* In p. 90. l. 2. read सा कार्य्येण.

मात्यस्यां शक्त्यात्मना प्रलये सर्व्वं जगत्, सृष्टौ व्यक्तिं यातीति माया । यथोक्तं श्रीमत्सौरभेये,

शक्तिरूपेण कार्य्याणि तल्लीनानि महाक्षये ।
विकृतौ व्यक्तिमायाति सा कार्य्येण कलादिनेति ॥

यद्यप्यत्र बहु वक्तव्यमस्ति तथापि ग्रन्थभूयस्त्वभयादुपरम्यते । तदित्थं पतिपशुपाशपदार्थास्त्रयः प्रदर्शिताः ।

पतिविद्ये तथा विद्या पशुः पाशश्च कारणम् ।
तन्निवृत्ताविति प्रोक्ताः पदार्थाः षट् समासतः ।

इत्यादिना प्रकारान्तरं ज्ञानरत्नावल्यादौ प्रसिद्धम् । सर्व्वं तत एवावगन्तव्यमिति सर्व्वं समञ्जसम् ॥

इति सर्व्वदर्शनसंग्रहे शैवदर्शनम्

SARVA-DARS'ANA-SANGRAHA.

CHAPTER VIII.

The Pratyabhijñá-Darśana or Recognitive System.

Other Māheśvaras are dissatisfied with the views set out in the Śaiva system as erroneous in attributing to motiveless and insentient things causality in regard to the bondage and liberation of transmigrating spirits. They therefore seek another system, and proclaim that the construction of the world or series of environments of those spirits is by the mere will of the Supreme Lord. They pronounce that this Supreme Lord who is at once other than and the same with the several cognitions and *cognita*, who is identical with the transcendent self posited by one's own consciousness, by rational proof, and by revelation, and who possesses independence, that is, the power of witnessing all things without reference to aught ulterior, gives manifestation in the mirror of one's own soul to all entities as if they were images reflected upon it. Thus looking upon recognition as a new method for the attainment of ends and of the highest end, available to all men alike, without any the slighest trouble and exertion such as external and internal worship, suppression

---

॥ सर्वदर्शनसङ्ग्रहः ॥

अत्रापेक्षाविहीनानां जडानां कारणत्वं दुष्यतीत्यपरितुष्यन्तो मतान्तरमन्विष्यन्तः परमेश्वरेच्छावशादेव जगन्निर्म्माणं परिघुष्यन्तः स्वसंवेदनोपपत्त्यागमसिद्धप्रत्यगात्मतादात्म्ये नानाविधमानमेयादिभेदाभेदशालिपरमेश्वरोऽनन्यमुखप्रेक्षित्वलक्षणस्वातन्त्र्यभाक् स्वात्मदर्पणे भावान् प्रतिबिम्बवदवभासयतीति भणन्तो बाह्याभ्यन्तरचर्य्याप्राणायामादिक्लेशप्रयासकलावैधुर्य्येण सर्व्वसुलभमभिनवं प्रत्यभिज्ञामात्रं परापरसिद्ध्युपायमभ्युपगच्छन्तः परे माहेश्वराः प्रत्यभिज्ञाशास्त्रमभ्यस्यन्ति । तस्येयत्तापि न्यरूपि परीक्षकैः

of the breath, and the like, these Māheśvaras set forth the system of recognition. The extent of this system is thus described by one of their authorities:

> The aphorisms, the commentary, the gloss, the two explications, the greater and the less,
> The five topics, and the expositions,—such is the system of recognition.

The first aphorism in their text-book is as follows:

> Having reached somehow or other the condition of a slave of Maheśvara, and wishing also to help mankind.
> I set forth the recognition of Maheśvara, as the method of attaining all felicity.

[This aphorism may be developed as follows :]

Somehow or other, by a propitiation, effected by God, of the lotus feet of a spiritual director identical with God, having reached, having fully attained, this condition, having made it the unintercepted object of fruition to myself. Thus knowing that which has to be known he is qualified to construct a system for others: otherwise the system would be a mere imposture.

Maheśvara is the reality of unintermitted self-luminousness, beatitude, and independence, by portions of whose divine essence Vishṇu, Viriñchi, and other deities, are deities, who though they

---

सूत्रं वृत्तिर्विवृतिर्लघ्वी बृहतीत्युभे विमर्शिन्यौ ।
प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः ॥

तत्रेदं प्रथमं सूत्रम्,

कथञ्चिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन् ।
समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामीति ॥

कथञ्चिदिति । परमेश्वराभिन्नगुरुचरणारविन्दयुगलसमाराधनेन परमेश्वरघटितेनैवेत्यर्थः । आसाद्येति । आ समन्तात् परिपूर्णतया सादयित्वा स्वात्मोपभोग्यतां निरर्गलां गमयित्वा तदनेन विदितवेद्यत्वेन परार्थशास्त्रकरणे ऽधिकारो दर्शितः । अन्यथा प्रतारकत्वमेव प्रसज्येत् । मयोत्तीर्णा

transcend the cosmothetic illusion are yet implicated in the infinite illusion.

The condition of being a slave to Maheśvara is the being a recipient of that independence or absoluteness which is the essence of the divine nature, a slave being one to whom his lord grants all things according to his will and pleasure.

The word *mankind* imports that there is no restriction of the doctrine to previously qualified students. Whoever he may be to whom this exposition of the divine nature is made, he reaps its highest reward, the emanatory *principium* itself operating to the highest end of the transmigrating souls. It has been accordingly laid down in the Siva-drishṭi by that supreme guide the revered Somānanda-nātha :

> When once the nature of Śiva that resides in all things has been known with tenacious recognition, whether by proof, or by instruction in the words of a spiritual director :
>
> There is no further need of doing aught, or of any further reflection. When he knows Suvarṇa or Śiva, a man may cease to act and to reflect.

अपि महामायाधिकृता विष्णुविरिञ्च्याद्या यदीयैश्वर्य्यलेशेनेश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः. तस्य दास्यं दीयत ऽस्मै स्वामिना सर्व्वं यथाभिलषितमिति दासः परमेश्वरस्वरूप-स्वातन्त्र्यपात्रमित्यर्थः । जनशब्देनाधिकारिविषयनियमाभावः प्रादर्शि । यस्य यस्य हीदं स्वरूपकथनं तस्य तस्य महाफलं भवति प्रधानस्यैव परमार्थफलत्वात् । तथोपदिष्टंशिवदृष्टौ परमगुरुभिर्भगवत्सोमानन्द-नाथपादैः,

> एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः ।
> ज्ञाते शिवत्वे सर्व्वस्थे प्रतिपत्त्या दृढात्मना ॥
> करणेन नास्ति कृत्यं क्वापि भावनया सकृत् ।
> ज्ञाते सुवर्णे करणं भावनां वा परित्यजेदिति ॥

The word *also* excludes the supposition that there is room in self which has recognised the nature of Maheśvara, and which manifests to itself its own identity with him, and is therefore fully satisfied, for any other motive than felicity for others. The well-being of others is a motive, whatever may be said, for the definition of a motive applies to it: for there is no such divine curse laid upon man that self-regard should be his sole motive to the exclusion of a regard for others. Thus Akshapāda defines a motive: A motive is that object towards which a man energises.

The preposition *upa* in *upapādayami* (I set forth) indicates proximity: the result is the bringing of mankind near unto God.

Hence the word all, in the phrase *the method of attaining all felicities.* For when the nature of the Supreme Being is attained, all felicities, which are but the efflux thereof, are overtaken, as if a man acquired the mountain Rohaṇa (Adam's Peak) he would acquire all the treasures it contains. If a man acquire the divine nature, what else is there that he can ask for? Accordingly Utpalāchārya says:

> What more can they ask who are rich in the wealth of devotion? What else can they require who are poor in this?

We have thus explained the motive expressed in the words *the method of attaining all felicities,* on the supposition that

---

अपिशब्देन स्वात्मनस्तदभिज्ञतामाविष्कुर्व्वता पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्तप्रयोजनान्तरावकाशश्च पराकृतः। परार्थश्च प्रयोजनं भवत्येव तल्लक्षणयोगात् न ह्ययं देवशापः स्वार्थ एव प्रयोजनं न परार्थ इति। अतएवोक्तमक्षपादेन "यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजन" मिति। उपशब्दः सामीप्यार्थः तेन जनस्य परमेश्वरसमीपताकरणमात्रं फलम्। अतएवाह, समस्तेति। परमेश्वरतालाभे हि सर्व्वाः सम्पदस्तन्निष्य-न्दमय्यः सम्पन्ना एव रोहणाचललाभे रत्नसम्पद इव। एवं परमेश्वरता-लाभे किमन्यत् प्रार्थनीयम्। तदुक्तमुत्पलाचार्य्यैः,

भक्तिलक्ष्मीसमृद्धानां किमन्यदुपयाचितम्।
अनया वा दरिद्राणां किमन्यदुपयाचितमिति॥

the compound term is a Tat-purusha genitively constructed. Let it be taken as a Bahuvrihi or relative compound. Then the recognition of Maheśvera, the knowing him through vicarious idols, has for its motive the full attainment, the manifestation, of all felicities, of every external and internal permanent happiness, in their proper nature. In the language of every-day life recognition is a cognition relative to an object represented in memory: for example, This (perceived) is the same (as the remembered) Chaitra. In the recognition propounded in this system there arises the cognition I am that selfsame God; there being a God whose omnipotence is known from the accredited legendaries, from accepted institution, and from argumentation, and the selfsame powers being recognised in the individual soul presented in internal perception.

This same recognition I set forth. To set forth is to enforce. I establish this recognition by a stringent process which renders it convincing. [Such is the articulate development of the first aphorism of the Recognitive Institutes.]

Here it may be asked: If soul is manifested only as consubstantial with God, why this laboured effort to exhibit the recognition? The answers is this. The recognition is thus exhibited, because though the soul is (as you contend) continually

---

इत्थं षष्ठीसमासपक्षे प्रयोजनं निर्दिष्टम् । बहुव्रीहिपक्षे तूपायः समस्तस्य बाह्याभ्यन्तरस्य नित्यसुखादेर्या सम्पत्सिद्धिः तथात्वप्रकाशः तस्याः सम्यगवाप्तिर्यस्याः प्रत्यभिज्ञायाः हेतुः, सा तथोक्ता तस्य महेश्वरस्य प्रत्यभिज्ञा प्रतिमाभिमुख्येन ज्ञानम् । लोके हि स एवायं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते इहापि प्रसिद्धपुराणसिद्धागमानुमानादिज्ञातपरिपूर्णशक्तिके परमेश्वरे सति स्वात्मन्यभिमुखीभूते तच्छक्तिप्रतिसन्धानेन ज्ञानमुदेति नूनं स एवेश्वरोऽहमिति । तामेतां प्रत्यभिज्ञामुपपादयामि, उपपत्तिः सम्भवः सम्भवतीति तत्समर्थाचरणेन प्रयोजनव्यापारेण सम्पादयामीत्यर्थः । यदीश्वरस्वभाव एवात्मा प्रकाशते तर्हि किमनेन प्रत्यभिज्ञाप्रदर्शनप्रयासेनेति चेत्,

Digitized by Google

manifested as self-luminous (and therefore identical with God), it is nevertheless under the influence of the cosmothetic illusion manifested as partial, and therefore the recognition must be exhibited by an expansion of the cognitive and active powers in order to achieve the manifestation of the soul as total (the self-being to the natural man a part, to the man of insight, the whole, of the divine pleroma). Thus then the syllogism : This self mus be God, because it possesses cognitive and active powers; for so far forth as any one is cognitive and active, to that extent he is a lord, like a lord in the world of every-day life, or like a king; therefore the soul is God. The five-membered syllogism is here employed, because so long as we deal with the illusory order of things the teaching of the Naiyāyikas may be accepted. It has thus been said by Udayakarasūnu :

> What self-luminous self can affirm or deny that self active and cognitive is Maheśvara the primal being ?
>
> Such recognition must be effected by an expansion of the powers, the self being cognised under illusion, and imperfectly discerned.

तत्रायं समाधिः। स्वप्रकाशतया सततमवभासमानेऽप्यात्मनि मायावशात् भागेन प्रकाशने पूर्णतावभाससिद्धये दृक्क्रियात्मकशक्त्याविष्करणेन प्रत्यभिज्ञा प्रदर्श्यते। तथा च प्रयोगः अयमात्मा परमेश्वरो भवितुमर्हति, ज्ञानक्रियाशक्तिमत्त्वात् यो यावति ज्ञाता कर्त्ता च स तावतीश्वरः प्रसिद्धेश्वरवत् राजवद्वा। आत्मा च विश्वज्ञाता कर्त्ता च तस्मादीश्वरोऽयमिति अवयवपञ्चकस्याश्रयणं मायावादेन नैयायिकमतस्य कक्षीकारात्। तदुक्तमुदयाकरसूनुना,

कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः॥
किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते॥

And again :

The continuance of all living creatures in this transmigratory world is as long as their respiratory *involucrum ;* knowledge and action are accounted the life of living creatures.

Of these knowledge is spontaneously developed, and action (or ritual) which is best at Kāśī,

Is indicated by others also : different from these is real knowledge.

And also :

The knowledge of these things is determined by the order of those things :

The knower, whose essence is beatitude and knowledge without succession, is Maheśvara.

Somānanda-nātha also says :

He always knows by identity with Śiva : he alys waknows by identity with the real.

Again at the end of the section on knowledge:

Unless there were this unity with Śiva, cognitions could not exist as facts of daily life :

Unity with God is proved by the unity of light. He is the one knower (or illuminator of cognitions).

तथा हि ।

सर्व्वेषामिह भूतानां प्रतिष्ठा जीवदाश्रया ।
ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम् ॥
तत्र ज्ञानं स्वतः सिद्धं क्रिया काश्याश्रिता सती ।
परैरप्युपलक्ष्येत तयाऽन्यज्ज्ञानमुच्यत इति ॥
या चैषां प्रतिभा तत्तत्पदार्थक्रमरूपिता ।
अक्रमानन्दचिद्रूपः प्रमाता स महेश्वर इति च ॥
सोमानन्दनाथपादैरपि,

सदाशिवात्मना वेत्ति स वा वेत्ति मदात्मना इत्यादि ॥

ज्ञानाधिकारपरिसमाप्तावपि,

He is Maheśvara, the great Lord, by reason of the unbroken continuity of objects :
Pure knowledge and action are the playful activity of the deity.

The following is an explanation of Abhinava-gupta. The text, After that as it shines shines the all of things, by the light of that shines diversely this ALL, teaches that God illumines the whole round of things by the glory of his luminous intelligence, and that the diversity or plurality of the object world, whereby the light which irradiates objects is a blue, a yellow, light, and the like, arises from diversity of tint cast upon the light by the object. In reality God is without plurality or difference, as transcending all limitations of space, time, and figure. He is pure intelligence. self-luminousness, the manifester; and thus we may read in the Śaiva Aphorisms, Self is intelligence. His synonymous titles are Intelligential Essence, Unintermitted Cognition, Irrespective Intuition, Existence as a mass of Beatitude, Supreme Domination. This selfsame existing self is knowledge.

By pure knowledge and action (in the passage of Somānandanātha cited above) are meant real or transcendent cognition and activity. Of these the cognition is self-luminousness, the activity is energy constructive of the world or series of spheres of transmigratory experience. This is described in the section on activity.

तदैक्येन विना नास्ति संविदां लोकपद्धतिः ।
प्रकाशैक्यात्तदेकत्वं मातैकः स इति स्थितः ॥

स एवार्थमृशत्वेन नियतेन महेश्वरः ।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यत इति ॥

विवृतं चाभिनवगुप्ताचार्यैः । "तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभातीति" श्रुत्या प्रकाशचिद्रूपमहिम्ना सर्व्वस्य भावजातस्य भासकत्वमभ्युपेयते ततश्च विषयप्रकाशस्य नीलप्रकाशः पीतप्रकाश इति विषयोपरागभेदाद्भेदः । वस्तुतस्तु देशकालाकारसङ्कोचवैकल्यादभेद एव । स एव चैतन्यरूपः प्रकाशः प्रमातेत्युच्यते । तथा च पठितं शिवसूत्रेषु "चैतन्यमात्मेति" । तस्य चिद्रूपत्वमनवच्छिन्नविमर्शत्वमनन्योन्मुखत्वमानन्दैकघनत्वं माहेश्वर्य्यमिति पर्य्यायः स एव ह्ययं भावात्मा

Digitized by Google

> He by his power of bliss gives light unto these objects, through the efficacy of his will: this activity is creativeness.

And at the close of the same section:

> The mere will of God, when he wills to become the world under its forms of jar, of cloth, and other objects, is his activity determined by motive and agent.
>
> This emanatory causality of effects whereby this being is, cannot be attributed to motiveless, insentient, things.

According to these principles, causality not pertaining either to the insentient or to the non-divine intelligence, the mere will of Maheśvara, the absolute Lord, when he wills to reside under thousands of forms, as this or that difference, this or that action, this or that modification of entity, of birth, continuance, and the like, in the series of transmigratory environments,—his mere will is his successive and essentially unimpeded activity, his universal creativeness.

How he creates the world by his will alone is clearly exhibited in the following illustration:

> As by the mere will of thaumaturgists, without clay, without seed, a jar or a tree is produced, so is it with that source of continuous self-regarding activity.

विमर्शः । शुद्धे पारमार्थिक्यौ ज्ञानक्रिये तत्र प्रकाशरूपता ज्ञानं, स्वतो जगन्निर्म्मातृत्वं क्रिया । तच्च निरूपितं क्रियाधिकारे,

> एष चानन्दशक्तित्वादेवमाभासयत्यमून् ।
> भावानिच्छावशादेषा क्रिया निर्म्मातृता ऽस्य सेति ॥

उपसंहारे ऽपि ।

> इत्थं तथा घटपटाद्याकारजगदात्मना ।
> तिष्ठासोरेवमिच्छैव हेतुकर्तृकृता क्रियेति ॥
>
> तस्मिन् सतीदमस्तीति कार्य्यकारणतापि या ।
> साप्यपेक्षाविहीनानां जडानां नोपपद्यते ॥

इति न्यायेन यतो जडस्य न कारणता न वा अनीश्वरस्य चेतनस्यापि तस्मात्तेन तेन जगद्गतजन्मास्थित्यादिभावविकारतत्तद्भेदक्रियासहस्ररूपेण स्थातुमिच्छोः स्वतन्त्रस्य भगवतो महेश्वरस्येच्छैवोत्तरोत्तर-

If clay and similar materials were really the substantial cause of the jar and the rest, how could they be produced by the mere volition of the thaumaturgist? If you say: Some jars and some plants are made of clay, and spring from seeds, while others arise from the bare volition of the thaumaturgist; then we would inform you that it is a fact notorious to all the world that *different* educts must proceed from different materials.

As for those who say that a jar or the like cannot be made without materials to make it of, and that when a thaumaturgist makes one he does so by putting atoms in motion by his will, and so composing it:—they may be informed that unless there is to be a palpable violation of the causal relation *all* the co-efficients without exception must be desiderated; to make the jar there must be the clay, the potter's staff, the potter's wheel and all the rest of it; to make a body there must be the congress of the male and female and the successive results of that congress. Now, if that be the case, the genesis of a jar, a body, or the like, upon the mere volition of the thaumaturgist, would be hardly possible.

On the other hand there is no difficulty in supposing that Mahādeva amply free to remain within or to overstep any limit whatever, the Lord, manifold in his operancy, the intelligent principle, thus operates. Thus it is that Vasuguptāchārya says:

मुच्छूनस्वभावा क्रिया विश्वकर्तृत्वं वोच्यत इति । इच्छामात्रेण जगन्नि-र्म्माणमित्यत्र दृष्टान्तो ऽपि स्पष्टं निर्द्दिष्टः ।

योगिनामपि मृद्बीजे विनैवेच्छावशेन यत् ।
घटादि जायते तत्तत् स्थिरस्वार्थक्रियाकरमिति ॥

यदि घटादिकं प्रति मृदाद्येव परमार्थतः कारणं स्यात्तर्हि कथं योगीच्छामात्रेण घटादिजन्मस्यात् । अथोच्येत अन्य एव मृद्बीजादि-जन्या घटाङ्कुरादयो योगीच्छाजन्यास्त्वन्या एवेति तत्रापि बाध्यसे साम-ग्रीभेदात्तावत् कार्य्यभेद इति सर्व्वजनप्रसिद्धम् । ये तु वर्णयन्ति नोपा-दानं विना घटाद्युत्पत्तिरिति योगीत्विच्छया परमाणून् व्यापारयन् सङ्घट-यतीति ते ऽपि बोधनीयाः । यदि परिदृष्टकार्य्यकारणभावविपर्य्ययो न लभ्येत तर्हि घटे मृद्दण्डचक्रादि देहे स्त्रीपुरुषसंयोगादि सर्व्वमपेक्ष्येत । तथा च योगीच्छासमनन्तरसञ्जातघटदेहादिसम्भवो दुःसमर्थ एव स्यात् । चेतन

To him that painted this world-picture without materials, without appliances, without a wall to paint it on,—to him be glory, to him resplendent with the lunar digit, to him that bears the trident.

It may be asked: If the transcendent self be no other than God, how comes this implication in successive transmigratory conditions? The answer is given in the section treating of accredited institution:

This agent of cognition blinded by illusion transmigrates through the fatality of works:

Taught his divine nature by science, as pure intelligence, he is enfranchised.

It may be asked: If the subject and the object are identical, what difference can there be between the self bound and the self liberated in regard to the objects cognisable by each? The answer to this question is given in a section of the Tattvārtha-Sangraha:

Self liberated cognises all that is cognisable as identical with itself, like Maheśvara free from bondage: the other (or unliberated) self has in it infinite plurality.

An objection may be raised: If the divine nature is essential to the soul, there can be no occasion to seek for this recognition; for if all requisites be supplied the seed does not fail to germinate because it is unrecognised. Why then this laboured effort for

---

एव तु तथा भाति भगवान् भूरिभगो महादेवो नियत्यनुवर्त्तनोल्लङ्घनघनतरस्वातन्त्र्य इति पक्षे न काचिदनुपपत्तिः । अत एवोक्तं वसुगुप्ताचार्य्यैः ।

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिन इति ॥

ननु प्रत्यगात्मनः परमेश्वराभिन्नत्वे संसारसम्बन्धः कथं भवेदिति चेत्तत्रोक्तमागमाधिकारे,

एष प्रमाता मायान्धः संसारी कर्म्मबन्धनः ।
विद्यादिज्ञापितैश्वर्य्यश्चिद्घनो मुक्त उच्यत इति ॥

ननु प्रमेयस्य प्रमात्रभिन्नत्वे बन्धमुक्तयोः प्रमेयं प्रति को विशेषः अत्राप्युत्तरमुक्तं तत्त्वार्थसंग्रहाधिकारे,

मेयं साधारणं मुक्तः स्वात्माभेदेन मन्यते ।
महेश्वरो यथाबद्धः पुनरत्यन्तभेदवदिति ॥

the recognition of the soul? To such an objection we reply: Only listen to the secret we shall tell you. All activity about objects is of two degrees, being either external as the activity of the seed in developing the plant, or internal as the activity which determines felicity, which consists in an intuition which terminates in the conscious self. The first degree of activity presupposes no such recognition as the system proposes, the second does presuppose it. In the Recognitive System the determinate activity is the exertion of the power of unifying personal and impersonal spirit, a power which is the attainment of the highest and of mediate ends, the activity consisting in the intuition I am God. To this activity a recognition of the essential nature of the soul is a prerequisite.

It may be urged that determinate activity is observed which terminates in the conscious self, independent of recognition. To this it is replied: A certain damsel hearing of the many good qualities of a certain gallant, fell in love with him before she had seen him, and agitated by her passion and unable to suffer the pain of not seeing him, wrote to him a love-letter descriptive of her condition. He at once came to her, but when she saw him

---

नन्वात्मनः परमेश्वरत्वं स्वाभाविकं चेत्नार्थः प्रत्यभिज्ञाप्रार्थनया। नहि बीजमप्रत्यभिज्ञातं सति सहकारिसाकल्ये अङ्कुरं नोत्पादयति तस्मात् कस्माद्गात्मप्रत्यभिज्ञाने निर्बन्ध इति चेदुच्यते। शृणु तावदिदं रहस्यं द्विविधा ह्यर्थक्रिया बाह्याङ्कुरादिका प्रमातृविश्रान्तिचमत्कारसारा प्रीत्यादिरूपा च तत्राद्या प्रत्यभिज्ञानं नापेक्षते द्वितीया तु तदपेक्षत एव। इहाप्यहमीश्वर इत्येवम्भूतचमत्कारसारा परापरसिद्धिलक्षणजीवात्मैकत्वशक्तिविभूतिरूपार्थक्रियेति स्वरूपप्रत्यभिज्ञानमपेक्षणीयम्। ननु प्रमातृविश्रान्तिसारार्थक्रिया प्रत्यभिज्ञानेन विना दृष्टा सती तस्मिन् दृष्टेति क्व दृष्टम्। अत्रोच्यते नायकगुणगणसंश्रवणप्रवृद्धानुरागा काचन कामिनी मदनविह्वला विरहक्लेशमसहमाना मदनलेखावलम्बनेन स्वावस्थानिवेदनानि विधत्ते तथा वेगात्तत्रिकटमटत्यपि तस्मिन्नवलोकितेऽपि तदवलोकनं तदीयगुणपरामर्शाभावे जनसाधारणत्वं प्राप्ते हृदयङ्गमभावं न लभते। यदा तु मूर्तिवचनात्तदीयगुणपरामर्शं करोति तदा तत्क्षणमेव पूर्णभावमत्येति। एवं स्वात्मनि विश्वेश्वरात्मना भासमानेऽपि तन्नि-

she did not recognise in him the qualities she had heard about; he appeared much the same as any other man, and she found no gratification in his society. So soon, however as she recognised those qualities in him, which her companions now pointed out, she was fully gratified. In like manner though the personal self be manifested as identical with the universal soul, its manifestation effects no complete satisfaction so long as there is no recognition of those attributes; but as soon as it is taught by a spiritual director to recognise in itself the perfections of Maheśvara, his omniscience, omnipotence, and other attributes, it attains the whole pleroma of being.

It is therefore said in the fourth section:

> As the gallant standing before the damsel is disdained, as like all other men, so long as he is unrecognised, though he humble himself before her with all manner of importunities: In like manner the personal self of mankind though it be the universal soul in which there is no perfection unrealised, attains not its own glorious nature; and therefore this recognition comes into action.

This system has been treated in detail by Abhinava-gupta and other teachers, but as we have in hand a summary exposition of systems we cannot extend the discussion of it any further, lest our work become too prolix. This then may suffice.

A. E. G.

भासनं तदीयगुणपरामर्शविरहसमयं पूर्णं भावं न सम्पादयति । यदा तु गुरुवचनादिना सर्व्वज्ञत्वसर्व्वकर्तृत्वादिलक्षणपरमेश्वरोत्कर्षपरामर्शो जायते तदा तत्क्षणमेव पूर्णात्मतालाभः । तदुक्तं चतुर्थे विमर्शे,

> तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके
> कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा ।
> लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो
> नैवायं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता इति ॥

अभिनवगुप्तादिभिराचार्य्यैर्विहितप्रतानोऽप्ययमर्थः संग्रहमुपक्रममाणैरस्माभिर्विस्तरभिया न प्रतानित इति सर्व्वं शिवम् ॥

इति सर्व्वदर्शनसंग्रहे प्रत्यभिज्ञादर्शनम् ॥

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4. SEPTEMBER 1ST 1876. VOL. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

षष्ठाध्यायस्य प्रथमः पादः ॥

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥ १६ ॥

ग्रह उपादाने, ज्या वयोहानौ, वेञो वयिः, व्यध ताडने, वश कान्तौ, व्यच व्याजीकरणे, ओव्रश्चू छेदने, प्रच्छ ज्ञीप्सायां, भ्रस्ज पाके, इत्येतेषां धातूनां ङिति प्रत्यये परतश्चकारात्किति च संप्रसारणं भवति । ग्रह । गृहीतः । गृहीतवान् । ङिति । गृह्णाति । जरीगृह्यते । ज्या । जीनः । जीनवान् । ल्वादिभ्य इति निष्ठानत्वम् । ङिति । जिनाति । जेजीयते । हल इति संप्रसारणदीर्घे कृते प्वादीनामिति ह्रस्वः क्रियते । वयि । लिटि परतो वेञो वयिरादेशस्तस्य ङिदभावात् किदेवोदाह्रियते । ऊयतुः । ऊयुः । यद्येवं वयिग्रहणमनर्थकम्, यजादिषु वेञ् पठ्यते । नैवं शक्यम् । लिटि तस्य वेञ इति प्रतिषेधो वक्ष्यते । तत्र यथैव स्थानिवद्भावाद्वयेर्विधिरेवं प्रतिषेधोपि प्राप्नोति । नैष दोषः । लिटि वयो य इति यकारस्य संप्रसारणप्रतिषेधाद् वयेर्विधौ ग्रहणं प्रतिषेधे चाग्रहणमनुमास्यते । सत्यमेतत् । एष एवार्थः साक्षान्निर्देशेन वयेः स्पष्टीक्रियते । व्यध । विद्धः । विद्धवान् । ङिति । विध्यति । वेविध्यते । वश । उशितः । उशितवान् । ङिति । उष्टः । उशन्ति । व्यच । विचितः । विचितवान् । ङिति । विचति । वेविच्यते । व्यचेः कुटादित्वमनसि प्रतिपादितम् । तेन सर्वत्राञ्णिति प्रत्यये संप्रसारणं भवति । उद्विचिता । उद्विचितुम् । उद्विचितव्यमिति । व्रश्चेः । वृक्णः । वृक्णवान् । अथ कथमत्र कुत्वं व्रश्चभ्रस्जेति हि षत्वेन भवितव्यम् ॥ निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः ॥ * ॥ तत्र षत्वं प्रति नत्वस्य सिद्धत्वाद् झलादिर्निष्ठा न भवति । कुत्वे तु कर्त्तव्ये तदसिद्धमेवेति प्रवर्तते कुत्वम् । ङिति । वृश्चति । वरीवृश्च्यते । प्रच्छ । पृष्टः ।

Digitized by Google

पृष्टवान् । छिति । पृच्छति । परीपृच्छ्यते । प्रश्नः । नहि तु प्रश्ने चासन्नकालइति निपातनाद्संप्रसारणम् । भ्रस्ज । भृष्टः । भृष्टवान् । छिति । भृज्जति । बरीभृज्ज्यते । सकारस्य झलां जश् झशीति जश्त्वेन दकारः, स्तोः श्चुना श्चुरिति श्चुत्वेन जकारः ॥

लिट्यभ्यासस्योभयेषाम् ॥ १७ ॥

उभयेषां वच्यादीनां ग्रहादीनां च लिटि परतो ऽभ्यासस्य संप्रसारणं भवति । वचि । उवाच । उवचिथ । स्वप् । सुष्वाप । सुष्वपिथ । यज । इयाज । इयजिथ । डुवप् । उवाप । उवपिथ । ग्रहादीनां, तत्र ग्रहेरविशेषः । जग्राह । जग्रहिथ । ज्या । जिज्यौ । जिज्यिथ । वयि । उवाय । उवयिथ । व्यध । विव्याध । विव्यधिथ । वश । उवाश । उवशिथ । व्यच । विव्याच । विव्यचिथ । वृश्चतेः सत्यसति वा योगे नास्ति विशेषः । योगारम्भे तु सति यदि संप्रसारणमकृत्वा हलादिःशेषेण रेफो निवर्त्यते तदा वकारस्य संप्रसारणं प्राप्नोति । अथ रेफस्य संप्रसारणं कृत्वा उरदत्वं रपरत्वं च क्रियते । तदानीमुरदत्वस्य स्थानिवद्भावाच्च संप्रसारणे संप्रसारणमिति प्रतिषेधो भवतीत्यस्ति विशेषः ॥ वव्रश्च । वव्रश्चिथ । पृच्छतिभृज्जत्योरविशेषः । अकिदर्थं चेदमभ्यासस्य संप्रसारणं विधीयते । किति हि परत्वाद्धातोः संप्रसारणे कृते पुनः प्रसङ्गविज्ञानाद् द्विर्वचनम् । ऊचतुः । ऊचुरिति । अधिकारादेवोभयेषां ग्रहणे सिद्धे पुनरुभयेषामिति वचनं हलादिःशेषमपि बाधित्वा संप्रसारणमेव यथास्यादिति । विव्याध ॥

स्वापेश्चङि ॥ १८ ॥

स्वापेरिति स्वपेर्ण्यन्तस्य ग्रहणं तस्य चङि परतः संप्रसारणं भवति । असूषुपत् । असूषुपताम् । असूषुपन् । द्विर्वचनात्पूर्वमत्र संप्रसारणं, तत्र कृते लघूपधगुणस्तस्य णौ चङ्युपधाया ह्रस्वत्वं ततो द्विर्वचनं दीर्घो लघोरिति दीर्घत्वम् । चङीति किम् । स्वाप्यते । स्वापितः । कितीति निवृत्तं, ङितीति केवलमिहानुवर्त्ततइत्येतद्विज्ञानम् ॥

स्वपिस्यमिव्येञां यङि ॥ १९ ॥

ञिष्वप् शये, स्यमु स्वन ध्वन शब्दे, व्येञ् संवरणे, इत्येतेषां धातूनां यङि परतः संप्रसारणं भवति । सोषुप्यते । सेसिम्यते । वेवीयते । यङीति किम् । स्वप्नक् ॥

न वशः ॥ २० ॥

यङीति वर्त्तते । वशेर्धातोर्यङि परतः संप्रसारणं न भवति । वावश्यते । वावश्येते । वावश्यन्ते । यङीति किम् । उष्टः । उशन्ति * ॥

चायः की ॥ २१ ॥

यङीति वर्त्तते । चायृ पूजानिशामनयोरित्येतस्य धातोर्यङि परतः कीत्ययमादेशो भवति । चेकीयते । चेकीयेते । चेकीयन्ते । दीर्घकरणं यङ्लुगर्थम् । चेकीतः ॥

स्फायः स्फी निष्ठायाम् ॥ २२ ॥

स्फायी ओप्यायी वृद्धावित्यस्य धातोर्निष्ठायां परतः स्फीत्ययमादेशो भवति । स्फीतः । स्फीतवान् । निष्ठायामिति किम् । स्फातिः । स्फातीभवतीत्येतदपि क्तिवन्तस्यैव रूपं न निष्ठान्तस्य । निष्ठायामित्येतदधिक्रियते लिड्यङोश्चेति प्रागेतस्मात् सूत्रात् ॥

स्त्यः प्रपूर्वस्य ॥ २३ ॥

निष्ठायामिति वर्त्तते संप्रसारणमिति च । स्फी इत्येतच्च स्वर्यते । स्त्यै ष्ट्यै शब्दसंघातयोर्द्वयोरप्येतयोर्धात्वोः स्त्याद्रूपमापन्नयोः सामान्येन ग्रहणम् । स्त्या इत्येतस्य प्रपूर्वस्य धातोर्निष्ठायां परतः संप्रसारणं भवति । प्रस्तीतः । प्रस्तीतवान् । संप्रसारणे कृते यणवत्त्वं विहतमिति निष्ठानत्वं न भवति । प्रस्त्योऽन्यतरस्यामिति तु पक्षे मकारः क्रियते । प्रस्तीमः । प्रस्तीमवान् । प्रपूर्वस्येति किम् । संस्त्यानः । संस्त्यानवान् । प्रस्त्य इत्येवसिद्धे पूर्वग्रहणमिहापि यथा स्यात् । प्रसंस्तीतः । प्रसंस्तीतवान् ।

* यङीति किम् । उष्टः उशन्तीत्येकस्मिन् पुस्तके नास्ति ।

तत्कथं प्रपूर्वस्येति षष्ठ्यर्थे बहुव्रीहिः। प्रः पूर्वो यस्य धातूपसर्गसमुदायस्य स प्रपूर्वस्तदवयवस्य स्त्य इति व्यधिकरणे षष्ठ्यौ तत्र प्रसंस्तीत इत्यत्रापि प्रपूर्वसमुदायावयवः स्त्याशब्दो भवति ॥

द्रवमूर्त्तिस्पर्शयोः श्यः ॥ २४ ॥

द्रवमूर्त्तौ द्रवकाठिन्ये स्पर्शे वर्त्तमानस्य श्यैङ् गतावित्यस्य धातोर्निष्ठायां परतः संप्रसारणं भवति। शीनं घृतम्। शीना वसा। शीनं मेदः। द्रवावस्थायाः काठिन्यं गतमित्यर्थः। श्यो ऽस्पर्श इति निष्ठानत्वम्। स्पर्शे। शीतं वर्त्तते। शीतो वायुः। शीतमुदकम्। गुणमात्रे तद्वति चास्य शीतशब्दस्य वृत्तिर्द्रष्टव्या। द्रवमूर्त्तिस्पर्शयोरिति किम्। संश्यानो वृश्चिकः ॥

प्रतेश्च ॥ २५ ॥

श्य इति वर्त्तते। प्रतेरुत्तरस्य श्यायतेर्निष्ठायां परतः संप्रसारणं भवति। प्रतिशीनः। प्रतिशीनवान्। द्रवमूर्त्तिस्पर्शाभ्यामन्यत्रापि यथा स्यादिति सूत्रारम्भः ॥

विभाषा ऽभ्यवपूर्वस्य ॥ २६ ॥

श्य इति वर्त्तते। अभि अव इत्येवंपूर्वस्य श्यायतेर्निष्ठायां विभाषा संप्रसारणं भवति। अभिशीनम्। अभिश्यानम्। अवशीनम्। अवश्यानम्। द्रवमूर्त्तिस्पर्शविवक्षायामपि विकल्पो भवति। अभिशीनं घृतम्। अभिश्यानं घृतम्। अवशीनं मेदः। अवश्यानं मेदः। अभिशीतो वायुः। अभिश्यानः। अवशीतमुदकम्। अवश्यानमुदकम्। सेयमुभयत्र विभाषा द्रष्टव्या। पूर्वग्रहणस्य च प्रयोजनं समभिश्यानं समवश्यानमित्यत्र मा भूदिति के चिद्व्याचक्षते। न किलायमभ्यवपूर्वः समुदाय इति। योऽत्राभ्यवपूर्वः समुदायस्तदाश्रयो विकल्पः कस्मान्न भवति। तस्मादत्र भवितव्यमेव। यदि तु नेष्यते ततो यथान्तर्भोष्येयमस्माद्विभाषाविज्ञानात्। व्यवस्थेयम्। पूर्वग्रहणस्य चान्यत् प्रयोजनं वक्तव्यम्। अभिसंशीनमभिसंश्यानं वा।

Digitized by Google

अवसंशीनमवसंश्यानं वा । अत्र विकल्पो यथा स्याद् इति पूर्वग्रहणं स्यः प्रपूर्वस्येतिवत् * ॥

शृतं पाके ॥ २७ ॥

विभाषेत्यनुवर्तते । श्रा पाके इत्येतस्य धातोर्ण्यन्तस्याण्यन्तस्य च पाके ऽभिधेये क्तप्रत्यये परतः शृभावो निपात्यते विभाषा । शृतं क्षीरम् । शृतं हविः । व्यवस्थितविभाषा चेयं, तेन क्षीरहविषोर्नित्यं शृभावो भवति । अन्यत्र न भवति । श्राणा यवागूः, श्रपिता यवागूरिति । यदापि श्राह्ये प्रयोजके द्वितीयो णिजुत्पद्यते तदापि नेष्यते । श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति । श्रातिरयमकर्मकः । कर्मकर्तृविषयस्य पचेरर्थे वर्तते स ण्यन्तः प्राकृतं पच्यर्थमाह । तदत्र द्वयोरपि शृतमितीष्यते । शृतं क्षीरं स्वयमेव । शृतं क्षीरं देवदत्तेन । पाकग्रहणं निपातनविषयप्रदर्शनार्थं तेन क्षीरहविषोरेव ॥

प्यायः पी ॥ २८ ॥

विभाषेत्येव । ओप्यायी वृद्धावित्यस्य धातोर्निष्ठायां विभाषा पीत्ययमादेशो भवति । पीनं मुखम् । पीनो बाहू । पीनमुरः । इयमपि व्यवस्थितविभाषैव । तेनानुपसर्गस्य नित्यं भवति सोपसर्गस्य तु नैव भवति । प्रप्यानः । आप्यानश्चन्द्रमाः । आङ्पूर्वस्यान्धूधसोर्भवत्येव । आपीनोन्धुः । आपीनमूध इति ॥

लिड्यङोश्च ॥ २९ ॥

विभाषेति निवृत्तम् । प्यायः पीत्येतच्चशब्देनानुकृष्यते । लिटि यङि च परतः प्यायः पीत्ययमादेशो भवति । आपिप्ये । आपिप्याते । आपिप्यिरे । परत्वात् पीभावे कृते पुनःप्रसङ्गविज्ञानाद् द्विर्वचनमेरने-काच इति यणादेशः । यङि । आपेपीयते । आपेपीयेते । आपेपीयन्ते ॥

* अभिसंश्यीनमित्यारभ्य स्यः प्रपूर्वस्येतिवदित्यन्तःपाठः प्रक्षिप्तो वेदितव्यः, पद-मञ्जर्यां तस्य दर्शनात् ।

विभाषा श्वेः ॥ ३० ॥

लिड्यङोरिति वर्त्तते संप्रसारणमिति च । लिटि यङि च श्वयते-र्धातोर्विभाषा संप्रसारणं भवति । शुशाव । शिश्वाय । शुशुवतुः । शिश्वि-यतुः । यङि । शोशूयते । शेश्वीयते । तदत्र यङि संप्रसारणमप्राप्तं विभाषा विधीयते लिटि तु किति यजादित्वात् नित्यं प्राप्तं तत्सर्वत्र विकल्पेन भवतीत्युभयत्र विभाषा । यदा च धातोर्न भवति । तदा लिट्यभ्या-सस्योभयेषामित्यभ्यासस्यापि न भवति ॥

णौ च संश्चङोः ॥ ३१ ॥

विभाषा श्वेरिति वर्त्तते । सन्परे चङ्परे णौ परतः श्वयतेर्धातो-र्विभाषा संप्रसारणं भवति । शुशावयिषति । शिश्वाययिषति । चङि । अशूशवत् । अशिश्वयत् । संप्रसारणं संप्रसारणाश्रयं च बलीयो भवतीति-वचनादन्तरङ्गमपि वृद्ध्यादिकं संप्रसारणेन बाध्यते । कृते तु संप्रसारणे वृद्धिरावादेशश्च । तत श्वेः पुयणज्यपर इत्येतद्वचनं ज्ञापकं णौ कृतस्या-निवद्भावस्येति स्थानिवद्भावात् शुशब्दो द्विरुच्यते ॥

ह्वः संप्रसारणम् ॥ ३२ ॥

णौ च संश्चङोरिति वर्त्तते । सन्परे चङ्परे च णौ परतो ह्वः संप्रसारणं भवति । जुहावयिषति । जुहावयिषतः । जुहावयिषन्ति । अजू-हवत् । अजूहवताम् । अजूहवन् । संप्रसारणस्य बलीयस्त्वात् शाच्छा-साह्वाव्यावेपां युगिति प्रागेव युग्भवति । संप्रसारणमिति वर्त्तमाने पुनः संप्रसारणमित्युक्तं विभाषेत्यस्य निवृत्त्यर्थम् । ह्वः संप्रसारणमभ्यस्तस्येत्ये-कयोगेन सिद्धे पृथग्योगकरणमनभ्यस्तनिमित्तप्रत्ययव्यवधाने संप्रसारणाभा-वज्ञापनार्थम् । ह्वायकमिच्छति ह्वायकीयति । ह्वायकीयतेः सन् जिह्वाय-कीयिषति ॥

अभ्यस्तस्य च ॥ ३३ ॥

ह्व इति वर्त्तते, तदभ्यस्तस्य चेत्यनेन व्यधिकरणम्, अभ्यस्तस्य यो ह्वयतिः, कश्चाभ्यस्तस्य ह्वयतिः, कारणं, तेनाभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात्संप्रसारणं भवति । जुहाव । जोहूयते । जुहूषति ॥

बहुलं छन्दसि ॥ ३४ ॥

हू इति वर्त्तते । छन्दसि विषये हूयतेर्धातोर्बहुलं संप्रसारणं भवति । इन्द्राग्नी हुवे । देवीं सरस्वतीं हुवे । हुवे। लट्यात्मनेपदोत्तमैकवचने बहुलं छन्दसीति शपो लुकि कृते संप्रसारणमुवङादेशश्च । न च भवति । हूयामि मरुतः शिवान् । हूयामि विश्वान्देवान् ॥

चायः की ॥ ३५ ॥

बहुलं छन्दसीति वर्त्तते । चायतेर्धातोश्छन्दसि विषये बहुलं कीत्ययमादेशो भवति । विधुना निचिक्युः । नान्यं चिक्युर्न निचिक्युरन्यम् । लिट्युसि रूपम् । न भवति । अग्निर्ज्योतिर्निचाय्यः ॥

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः ॥ ३६ ॥

छन्दसीति वर्त्तते । अपस्पृधेथामिति । स्पर्द्ध संघर्षे इत्यस्य लङि आथामि द्विर्वचनं रेफस्य संप्रसारणमकारलोपश्च निपातनात् । इन्द्रश्च विष्णो यदपस्पृधेथाम् । अस्पर्द्धेथामिति भाषायाम् । अपर आह । स्पर्द्धेरपपूर्वस्य लङ्याथामि संप्रसारणमकारलोपश्च निपातनात् । बहुलं छन्दस्यमाङ्योगेपीत्यडागमाभावः । अत्र प्रत्युदाहरणमपास्पर्द्धेथामिति भाषायाम् । आनृचुरानृहुरिति । अर्च्च पूजायामर्ह पूजायामित्यनयोर्द्धात्वोर्लिट्युसि संप्रसारणमकारलोपश्च निपातनात् । ततो द्विर्वचनमुरदत्वमत आदेरिति दीर्घत्वम् । तस्मान्नुड् द्विहल इति नुडागमः । यद्या अर्कमानृचुः । न वसून्यानृहुः । आनर्चुः । आनर्हुरिति भाषायाम् । चिच्युषे । च्युङ गतावित्यस्य धातोर्लिटि सेशब्दे ऽभ्यासस्य संप्रसारणमनिट् च निपातनात् । चिच्युषे । चुच्युविषइति भाषायाम् । तित्याज । त्यज हानावित्यस्य धातोर्लिट्यभ्यासस्य संप्रसारणं निपात्यते । तित्याज । तत्याजेति भाषायाम् । श्राता इति । श्रीञ् पाकइत्येतस्य धातोर्निष्ठायां आभावः । श्रातास्त इन्द्र सोमाः । श्रितमिति । तस्यैव श्रीणातेर्ह्रस्वत्वम् । सोमो गौरी अधिश्रितः । श्रिता नो ग्रहाः । अनयोः आभाव श्रिभावयो-

विषयविभागमिच्छन्ति । सोमेषु बहुषु श्राभाव एव । अन्यत्र श्रिभाव इति । सोमादन्यत्र क्व चिदेकस्मिन्नपि श्राभावो दृश्यते । यदि श्रातो जुहोतन । तस्य श्राता इति बहुवचनस्याविवक्षितत्वादुपसंग्रहो द्रष्टव्यः । आशीराशीर्त्त इति । तस्यैव श्रीणातेराङ्पूर्वस्य क्विपि निष्ठायां च शीरादेशः निष्ठायाश्च नत्वाभावो निपातनात् । तामाशीरादुहन्ति । आशीर्त्तमूर्ज्जम् । तीरैर्मध्यत आशीर्त्तः ॥

न संप्रसारणे संप्रसारणम् ॥ ३७ ॥

संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न भवति । व्यध । विद्धः । व्यच । विचितः । व्येञ् । संवीतः । एकयोगलक्षणमपि संप्रसारणमत एव वचनात्प्रथमं परस्य यणः क्रियते । पूर्वस्य च प्रसक्तं प्रतिषिध्यते । संप्रसारणमिति वर्त्तमाने पुनः संप्रसारणग्रहणं विदेशस्थस्यापि संप्रसारणस्य प्रतिषेधो यथा स्यादिति । श्वयुवमघोनामतद्धिते । यूनः । यूना । संप्रसारणग्रहणसामर्थ्यादेव पूर्वस्य प्रतिषेधे वक्तव्ये सवर्णदीर्घत्वमेकादेशो न स्थानिवद्भवति । सति वा स्थानिवत्त्वे व्यवधानमेतावदाश्रयिष्यते ॥ ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि ॥ * ॥ ऋचि परतस्त्रेः संप्रसारणं भवति, उत्तरपदादिलोपश्च छन्दसि विषये । तिस्र ऋचो यस्मिन् तत् तृचं सूक्तं, तृचं साम । ऋक्पूरब्धूः पथामानक्षे इति समासान्तः । छन्दसीति किम् । त्र्यृचं कर्म ॥ रयेर्मतौ बहुलम् ॥ * ॥ रयिशब्दस्य छन्दसि विषये मतौ परतो बहुलं संप्रसारणं भवति । आ रेवानेतु नो विशः । न च भवति । रयिमान्पुष्टिवर्द्धनः ॥

लिटि वयो यः ॥ ३८ ॥

न संप्रसारणमित्यनुवर्त्तते । लिटि परतो वयो यकारस्य संप्रसारणं न भवति । उवाय । ऊयतुः । ऊयुः । लिड्ग्रहणमुत्तरार्थम् ॥

वश्चास्यान्यतरस्यां किति ॥ ३९ ॥

अस्य वयो यकारस्य किति लिटि परतो वकारादेशो भवत्यन्यतरस्याम् । ऊवतुः । ऊवुः । ऊयतुः । ऊयुः । कितीति किम् । उवाच । उवचिथ ॥

वेञः ॥ ४० ॥

लिटीत्यनुवर्त्तते । वेञ् तन्तुसंतानइत्यस्य धातोर्लिटि परतः संप्रसारणं न भवति । ववौ । ववतुः । ववुः । कितीति यजादित्वाद्‌ धातोः प्राप्तमकित्यपि लिट्यभ्यासस्योभयेषामित्यभ्यासस्यात उभयं प्रतिषिध्यते ॥

ल्यपि च ॥ ४१ ॥

वेञ इत्यनुवर्त्तते । ल्यपि च परतो वेञः संप्रसारणं न भवति । प्रवाय । उपवाय । पृथग्योगकरणमुत्तरार्थम् ।

ज्यश्च ॥ ४२ ॥

ल्यपीत्येव । ज्या वयोहानावित्यस्य धातोर्ल्यपि परतः संप्रसारणं न भवति । प्रज्याय । उपज्याय ॥

व्यश्च ॥ ४३ ॥

ल्यपीत्येव । व्येञ् संवरणइत्येतस्य धातोर्ल्यपि परतः संप्रसारणं न भवति । प्रव्याय । उपव्याय । योगविभाग उत्तरार्थः ॥

विभाषा परेः ॥ ४४ ॥

ल्यपि च व्यश्चेत्यनुवर्त्तते । परेरुत्तरस्य व्येञित्येतस्य धातोर्ल्यपि परतो विभाषा संप्रसारणं न भवति । परिवीय यूपम् । परिव्याय । संप्रसारणे कृते परपूर्वत्वे च ह्रस्वस्येति तुक् प्राप्नोति स हल इति दीर्घत्वेन परत्वाद्बाध्यते ॥

आदेच उपदेशे ऽशिति ॥ ४५ ॥

धातोरिति वर्त्तते । एजन्तो यो धातुरुपदेशे तस्याकारादेशो भवति, शिति तु प्रत्यये न भवति । ग्लै । ग्लाता । ग्लातुम् । ग्लातव्यम् । शो । निशाता । निशातुम् । निशातव्यम् । एच इति किम् । कर्त्ता । हर्त्ता । उपदेशइति किम् । चेता । स्तोता । अशितीति किम् । ग्लायति । म्लायति । कथं जग्ले, मम्ले । नैवं विज्ञायते । शकार इद्यस्य सोयं शिदिति, किं तर्हि श एव इत् शित् । तत्र यस्मिन्विधिस्तदादावल्ग्रहणइति

शिदादौ प्रत्यये प्रतिषेधः । एष शकारान्तो भवति । अशितीति च प्रसज्यप्रतिषेधोयम् । तेनैतदात्त्वमनैमित्तिकं प्रागेव प्रत्ययोत्पत्तेर्भवतीति । सुग्लः । सुम्लः इति । आतश्चोपसर्ग इति कप्रत्ययः । सुम्लानः सुग्लान इत्यातो युक्तित्येवमादि सिद्धं भवतीति । आकाराधिकारश्चायं नित्यं स्मयतेरिति यावत् ॥

न व्यो लिटि ॥ ४६ ॥

व्येञ् इत्येतस्य धातोर्लिटि परत आकारादेशो न भवति । संविव्याय । संविव्ययिथ । लिट्यभ्यासस्योभयेषामित्यभ्यासस्य संप्रसारणम् । अल्यचो ञ्णितीति वृद्धिः ॥

स्फुरतिस्फुलत्योर्घञि ॥ ४७ ॥

आदेच इति वर्त्तते । स्फुर स्फुल चलन इत्येतयोर्धात्वोरेचः स्थाने घञि परत आकारादेशो भवति । विस्फारः । विस्फालः । विष्फारः । विष्फालः । स्फुरतिस्फुलत्योर्निर्निविभ्य इति वा षत्वम् ॥

क्रीङ्जीनां णौ ॥ ४८ ॥

डुक्रीञ् द्रव्यविनिमये, इङ् अध्ययने, जि जये, इत्येतेषां धातूनामेचः स्थाने णौ परत आकारादेशो भवति । क्रापयति । अध्यापयति । जापयति ॥

सिध्यतेरपारलौकिके ॥ ४९ ॥

णाविति वर्त्तते । षिधु हिंसासंराद्ध्योरित्यस्य धातोरपारलौकिकेर्थे वर्त्तमानस्यैचः स्थाने णौ परत आकारादेशो भवति । अन्नं साधयति । ग्रामं साधयति । अपारलौकिक इति किम् । तपस्तापसं सेधयति । स्वान्येवैनं कर्माणि सेधयन्ति । अत्र हि सिद्ध्यतिः पारलौकिके ज्ञानविशेषे वर्त्तते । तापसः सिद्ध्यति । ज्ञानविशेषमासादयति । तं तपः प्रयुङ्क्ते । स च ज्ञानविशेष उत्पन्नः परलोके जन्मान्तरे फलमभ्युदयलक्षणमुपसंहरन् परलोकप्रयोजनो भवति । इह कस्मान्न भवति । अन्नं साधयति । ब्राह्मणेभ्यो दास्यामीति । सिधेरत्रार्थो निष्पत्तिः । तस्याः प्रयोजनमन्नम् । तस्य यद्दानं तत्पारलौकिकम्, न पुनः सिद्धिरेवेति न आत्वं पर्युदस्यते । साक्षात्परलो-

Digitized by Google

कम्मयोजने च सिध्यर्थं ह्लान्तकार्थं वचनमेवं विषयं नावगाहते । सिध्यते- रिति श्यना निर्देशः षिधु गत्यामित्यस्य भौवादिकस्य निवृत्त्यर्थः ॥

मीनातिमिनोतिदीङां ल्यपि च ॥ ५० ॥

आदेच उपदेशऽइति वर्त्तते। मीञ् हिंसायाम्, डुमिञ् प्रक्षेपणे, दीङ् क्षय,इत्येतेषां धातूनां ल्यपि विषये चकारादेचश्च विषये उपदेशएव प्राक्- प्रत्ययोत्पत्तेरलोन्त्यस्य स्थाने आकारादेशो भवति। प्रमाता । प्रमातव्यम् । प्रमातुम् । प्रमाय । निमाता । निमातुम् । निमातव्यम् । निमाय । उपदाता । उपदातव्यम् । उपदातुम् । उपदाय । उपदेशएवात्वविधा- नादिवर्णान्तलक्षणः प्रत्ययो न भवति । आकारान्तलक्षणश्च भवति । उपदायो वर्त्तते । ईषदुपदानमिति घञ्युचौ भवतः ॥

विभाषा लीयतेः ॥ ५१ ॥

ल्यपीति वर्त्तते, आदेच उपदेशऽइति च । लीङ् श्लेषणऽइति दिवादिः ली श्लेषणऽइति क्र्यादिस्तयोरुभयोरपि यका निर्देशः स्मर्यते । लीयतेर्लुातेर्ल्यपि च एचश्च विषये उपदेशएवालोन्त्यस्य स्थाने विभाषा आकारादेशो भवति । विलाता । विलातुम् । विलातव्यम् । विलाय । विलेता । विलेतुम् । विलेतव्यम् । विलीय ॥ निमीमिलियां खलचोः प्रतिषेधो वक्तव्यः ॥ * ॥ ईषत्प्रमयः। प्रमयो वर्त्तते । ईषन्निमयः । निमयो वर्त्तते । ईषद्विलयः । विलयो वर्त्तते । अत्र लियो व्यवस्थितविभाषावि- ज्ञानात्सिद्धम् । एवं च प्रलम्भनशालीनीकरणयोश्च णौ नित्यमात्वं भवति । कस्त्वामुल्लापयते । श्येनो वर्त्तिकामुल्लापयते ॥

खिदेश्छन्दसि ॥ ५२ ॥

विभाषेति वर्त्तते । खिद दैन्यऽइत्यस्य धातोरेचः स्थाने छन्दसि विषये विभाषा आकार आदेशो भवति । चित्तं चिखाद । चित्तं चिखेद । छन्दसीति किम् । चित्तं खेदयति ॥

अपगुरो णमुलि ॥ ५३ ॥

गुरी उद्यमनऽइत्यस्य धातोरपपूर्वस्य णमुलि परत एचः स्थाने

विभाषा आकार आदेशो भवति । अपगारमपगारम् । अपगोरमपगोरम् । आभीक्ष्ण्ये णमुल्चेति णमुल् । अस्यपगारं युध्यन्ते । अस्यपगोरं युध्यन्त-इत्यत्र द्वितीयायां चेति णमुल् ॥

चिस्फुरोर्णौ ॥ ५४ ॥

चिञ् स्फुर इत्येतयोर्द्धात्वोर्णौ परत एचः स्थाने विभाषा आकारादेशो भवति । चापयति । चाययति । स्फारयति । स्फोरयति ॥

प्रजने वीयतेः ॥ ५५ ॥

णाविति वर्त्तते । वी गतिप्रजनकान्त्यसनखादनेषु इत्यस्य धातोः प्रजने वर्त्तमानस्य णौ परतो विभाषा आकारादेशो भवति । पुरोवातो गाः प्रवापयति । पुरोवातो गाः प्रवाययति । गर्भं ग्राहयतीत्यर्थः । प्रजनो हि जन्मन उपक्रमो गर्भग्रहणम् ॥

बिभेतेर्हेतुभये ॥ ५६ ॥

णाविति वर्त्तते विभाषेति च । हेतुरिह पारिभाषिकः स्वतन्त्रस्य प्रयोजकस्ततो यद्भयम्, स यस्य भयस्य साक्षाद्धेतुः, तद्भयं हेतुभयम् । तत्र वर्त्तमानस्य ञिभी भयइत्यस्य धातोर्णौपरतो विभाषा आकारादेशो भवति । मुण्डो भापयते । मुण्डो भीषयते । जटिलो भापयते । जटिलो भीषयते । भीस्म्योर्हेतुभयइत्यात्मनेपदम् । भियो हेतुभये षुक् । स चात्वपक्षे न भवति । लिभियोरीकारप्रश्लेषनिर्देशादीकारान्तस्य भियः षुग्विधीयते । हेतुभयइति किम् । कुञ्चिकयैनं भाययति । अत्र हि कुञ्चिकातो भयं कारणाच हेतोर्देवदत्तात् ॥

नित्यं स्मयतेः ॥ ५७ ॥

णाविति वर्त्तते । हेतुभयइति च । नित्यग्रहणाद्विभाषेति निवृत्तम् । ष्मिङ् ईषद्धसनइत्यस्य धातोर्हेतुभयेर्थे णौ परतो नित्यमाकारादेशो भवति । मुण्डो विस्मापयते । जटिलो विस्मापयते । भयइति किम् । कुञ्चिकयैनं विस्मापयति । भयशब्देन हेत्वर्थसामान्यादिह स्मयतेरर्थोऽभिधीयते । नहि मुख्ये भये स्मयतेर्वृत्तिरस्ति ॥

Digitized by Google

सृजिदृशोर्झल्यमकिति ॥ ५८ ॥

सृज विसर्गे, दृशिर् प्रेक्षणे, इत्येतयोर्द्धात्वोर्झलादावकिति प्रत्यये परतो ऽमागमो भवति । स्रष्टा । स्रष्टुम् । स्रष्टव्यम् । द्रष्टा । द्रष्टुम् । द्रष्टव्यम् । लघूपधगुणापवादोयममागमः । अस्राक्षीत् । अद्राक्षीत् । सिचि वृद्धिरपि कृते भवति पूर्वं तु बाध्यते । झलीति किम् । सर्ज्जनम् । दर्शनम् । अकितीति किम् । सृष्टः । दृष्टः । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादिह न भवति । रज्जुसृड्भ्यां देवदृग्भ्यामिति ॥

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ॥ ५९ ॥

उपदेशइति वर्त्तते झल्यमकितीति च । उपदेशे ऽनुदात्तस्य धातो-र्ऋकारोपधस्य झलादावकिति प्रत्यये परतो ऽन्यतरस्याममागमो भवति । त्रप्ता । तर्पिता । तर्प्ता । द्रप्ता । दर्प्ता । दर्पिता । तृप प्रीणने दृप हर्षमोचनयोः, इत्येतौ रधादी धातू तयोरिडागमो रधादिभ्यश्चेति विकल्प्यते । अनुदात्तोपदेशः पुनरमर्थ एव । अनुदात्तस्येति किम् । वर्ढा । वर्ढुम् । वर्ढव्यम् । वृहू उद्यमनइत्ययमुदात्तोपदेश ऊदित्वाच्चा-स्येड् विकल्प्यते । ऋदुपधस्येति किम् । भेत्ता । छेत्ता । झलीत्येव । तर्प्पणम् । दर्प्पणम् । अकितीत्येव । तृप्तः । दृप्तः ॥

शीर्षंश्छन्दसि ॥ ६० ॥

शीर्षन्निति शब्दान्तरं शिरःशब्देन समानार्थं छन्दसि विषये निपात्यते न पुनरयमादेशः शिरःशब्दस्य सोपि हि छन्दसि प्रयुज्यत एव । शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति । यत्ते शीर्ष्णो दौर्भाग्यम् । छन्दसीति किम् । शिरः ॥

ये च तद्धिते ॥ ६१ ॥

शीर्षन्निति वर्त्तते । आदेशोयमिष्यते स कथं तद्धितइति हि परं निमित्तमुपादीयते स तदनुरूपां प्रकृतिं शिरःशब्दमाक्षिपति । यकारादौ तद्धिते परतः शिरःशब्दस्य शीर्षन्नादेशो भवति । शीर्षण्यो हि मुख्यो भवति । शीर्षण्यः स्वरः । शिरसि भव इति शरीरावयवाच्चेति यत् ।

ये चाभावकर्म्मणोरिति प्रकृतिभावः । तद्धितइति किम् । शिर इच्छति शिरस्यति ॥ वा केशेषु ॥ * ॥ शिरसः शीर्षवादेशो वक्तव्यः । शीर्षण्याः केशाः । शिरस्याः केशाः ॥

अचि शीर्षः ॥ ६२ ॥

अजादौ तद्धिते शिरसः शीर्षशब्द आदेशो भवति । हस्तिशिरसो ऽपत्यं, हास्तिशीर्षिः * । बाह्वादिभ्यश्चेति इञ् । स्थूलशिरस इदं स्थौलशीर्षम् । शीर्षन्भावे हि अनिति प्रकृतिभावः स्यात् । हास्तिशीर्षिशब्दात् स्त्रियामिञो ऽणिञोरनार्षयोः ष्यङादेशे कृते शीर्षस्य शिरःशब्दग्रहणेन ग्रहणात् शीर्षवादेशः प्राप्नोति । तत्र प्रकृतिभावे सति हास्तिशीर्षण्येत्यनिष्टं रूपं स्यात् । इष्यते तु हास्तिशीर्ष्येति तत्कथं, कर्त्तव्योऽत्र यत्नः । अणिञन्ताद् वा परः प्रत्ययः ष्यङाश्रयितव्यस्तत्र यस्येतिलोपस्य स्थानिवद्भावाद् व्यवधानम् ॥

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ ६३ ॥

पाद दन्त नासिका मास हृदय निशा असृज् यूष दोष यकृत् शकृत् उदक आसन इत्येतेषां शब्दानां स्थाने शस्प्रभृतिप्रत्ययेषु परतः पद् दत् नस् मास् हृत् निश् असन् यूषन् दोषन् यकन् शकन् उदन् आसन् इत्येते आदेशा यथासंख्यं भवन्ति । पद् । निपदश्चतुरो जहि । पदा वर्त्तय गोदुहम् । पादस्य पत् । दत् । या दतो धावति तस्यै श्यावदन् । नस् । सूकरस्त्वखनचसा । मास् । मासि त्वा पश्यामि चक्षुषा । हृद् । हृदा पूतेन मनसा जातवेदसम् । निश् । अमावास्यायां निशि यजेत । असन् । असिक्तोऽस्नावरोहति । यूषन् । यापात्राणि यूष्ण आसेचनानि । दोषन् । यत्ते दोष्णो दौर्भाग्यम् । यकन् । यक्नोवद्यति । शकन् । शक्नोवद्यति । उदन् । उद्नो दिव्यस्य नावा ते । आसन् । आसनि किं लभे मधूनि । शस्प्रभृतिष्विति किम् । पादौ ते प्रतिपीड्यो

* पैलुशीर्षिरित्यधिकं पुस्तकान्तरे ।

नासिके ते छशे । के चिदत्र छन्दसीत्यनुवर्त्तयन्ति । अपरे पुनरविशेषेणेच्छन्ति । तथाहि । भाषायामपि पदादयः शब्दाः प्रयुज्यन्ते ।

व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥

इत्येवमादयः । अन्यतरस्यामित्येतदनुवर्त्तयन्ति । तेन पादादयोऽपि प्रयुज्यन्ते । शस्प्रभृतिष्विति प्रकारे प्रभृतिशब्द इति । शला दोषणी इत्यत्रापि दोषन्नादेशो भवति ॥ पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् ॥ * ॥ मांस पृतना सानु इत्येतेषां स्थाने यथासंख्यं मांस् पृत् स्नु इत्येते आदेशा भवन्ति । मांस्पचन्या उखायाः । मांसपचन्या इति प्राप्ते । पृत्सु मर्त्यम् । पृतनासु मर्त्यमिति प्राप्ते । न ते दिवो न पृथिव्या अधि स्नुषु । अधिसानुष्विति प्राप्ते ॥ नस् नासिकाया यत्तस्क्षुद्रेषु ॥ * ॥ नासिकाया नस्भावो वक्तव्यो यत् तस् क्षुद्र इत्येतेषु परतः । नस्यम् । नस्तः । नस्क्षुद्रः ॥ यति वर्णनगरयोर्नेति वक्तव्यम् ॥ * ॥ नासिक्यो वर्णः । नासिक्यं नगरम् ॥

धात्वादेः षः सः ॥ ६४ ॥

धातोरादेः षकारस्य स्थाने सकारादेशो भवति । षह । सहते । षिच । सिञ्चति । धातुग्रहणं किम् । षोडश । षडिकः । षण्डः । आदेरिति किम् । कर्षति । छषति । आदेशप्रत्यययोरित्यत्र षत्वव्यवस्थार्थं षादयो धातवः के चिदुपदिष्टाः । के पुनस्ते ये तथा पठ्यन्ते । अथवा लक्षणं क्रियते । अज्दन्त्यपराः सादयः षोपदेशाः स्मिस्विदिस्वदिस्विञ्जिस्वपितयश्च । मकारवकारयोरनज्दन्त्यत्वान्न भवतीति अप्राप्ते विधानम् । * सृपिसृजिस्तृस्त्यासेकृसृवर्जम् ॥ सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधो वक्तव्यः ॥ * ॥ षोडीयति । षण्डीयति । ष्वष्कते । ष्ठिवु इत्यस्य द्वितीयस्थकारष्ठकारश्चेष्यते । तेन तेष्ठीव्यते टेष्ठीव्यते इति चाभ्यासरूपं द्विधा भवति ॥

* मकारवकारयोरित्यारभ्य विधानमित्यन्तः पाठो बहुषु पुस्तकेषु नास्ति ।

णो नः ॥ ६५ ॥

धातोरादेरित्यनुवर्त्तते । धातोरादेर्णकारस्य नकार आदेशो भवति । णीञ् । नयति । णम । नमति । णह । नह्यति । धात्वादेरित्येव । अणति । सुब्धातोरयमपि नेष्यते । णकारमिच्छति, णकारीयति । उपसर्गादसमासेपि णोपदेशस्येत्यत्र णत्वविधेर्व्यवस्थार्थं णादयो धातवः के चिदुपदिश्यन्ते । के पुनस्ते । ये तथा पठ्यन्ते अथ वा लक्षणं क्रियते । सर्वे णादयो णोपदेशाः । नृनन्दिनर्दिनक्कनाटिनाथृनाधृवर्जम् ॥

लोपो व्योर्वलि ॥ ६६ ॥

धातोरिति प्रकृतं यत् तद् धात्वादेरिति पुनर्द्धातुग्रहणाच्चिन्नम् । तेन धातोरधातोश्च वकारयकारयोर्वलि परतो लोपो भवति । दिव् । दिदिवान् । दिदिवांसौ । दिदिवांसः । ऊयी । ऊतम् । क्नूयी । क्नूतम् । गोधाया ढ्रक् । गौधेरः । पचेरन् । यजेरन् । वकारस्य । जीवेरदानुक् । जीरदानुः । स्रिवेः । आस्रेमाणम् । उणादयो बहुलमिति बहुलवचनाच्छ्वोः शूडनुनासिके चेति ऊठ् न भवति । वलीति किम् । ऊय्यते । क्नूय्यते । पूर्वं लोपग्रहणं किम् । वेरपृक्तलोपात्पूर्वं वलि लोपो यथा स्यात् । कण्डूयतेः क्विप् । कण्डूः । लोलूयतेः । लोलूः । व्रश्चादीनामुपदेशसामर्थ्याद् वलि लोपो न भवति । वृश्चति वव्रश्चेत्यत्रापि हि संप्रसारणहलादिःशेषयोर्बहिरङ्गत्वात्प्राप्नोति ॥

वेरपृक्तस्य ॥ ६७ ॥

लोप इति वर्त्तते । वेरिति क्विबादयो विशेषाननुबन्धानुत्सृज्य सामान्येन गृह्यन्ते । वेरपृक्तस्य लोपो भवति । ब्रह्मभ्रूणवृत्रेषु क्विप् । ब्रह्महा । भ्रूणहा । स्पृशोनुदके क्विन् । घृतस्पृक् । तैलस्पृक् । भजो ण्विः । अर्द्धभाक् । पादभाक् । तुरीयभाक् । अपृक्तस्येति किम् । दृदृभ्यां विन् । दर्विः । कॄगॄशॄदॄजागृभ्यः क्विः । जागृविः ॥

Digitized by Google

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ ६८ ॥

लोप इति वर्त्तते । तदिह लौकिकेनार्थेनार्थवत् कर्मसाधनं द्रष्टव्यम् । लुप्यत इति लोपः । हलन्ताद् ङ्यन्तादाबन्ताच्च दीर्घात्परं सु ति सि इत्येतदपृक्तं हल् लुप्यते । हलन्तात् सुलोपः । राजा । तक्षा । उखास्रत् । पर्णध्वत् । ङ्यन्तात् । कुमारी । गौरी । शार्ङ्गरवी । आबन्तात् । खट्वा । बहुराजा । कारीषगन्ध्या । हलन्तादेव तिलोपः सिलोपश्च । तत्र तिलोपस्तावत् । अबिभर्भवान् । भृञो लङि तिपि श्लौ भृञामित् इत्यभ्यासस्येत्वम् । अजागर्भवान् । सिलोपः । अभिनोऽत्र । अच्छिनोऽत्र । दस्य रेफः । हल्ङ्याब्भ्य इति किम् । ग्रामणीः । सेनानीः । दीर्घादिति किम् । निष्कौशाम्बिः । अतिखट्वः । सुतिसीति किम् । अभैत्सीत् । तिपा सहचरितस्य सिशब्दस्य ग्रहणात्सिचो ग्रहणं नास्ति । अपृक्तमिति किम् । भिनत्ति । छिनत्ति * । हलिति किम् । बिभेद । चिच्छेद । अथ किमर्थं हलन्तात्सुतिसीनां लोपो विधीयते संयोगान्तलोपेनैव सिद्धम् । न सिद्ध्यति राजा तक्षेत्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपो न स्यात् । उखास्रत् पर्णध्वदित्यत्रापदान्तत्वाद्दत्वं च न स्यात् । अभिनोऽत्रेत्यत्रातो रोरप्लुतादप्लुत इत्युत्वं न स्यात् । अबिभर्भवानित्यत्र तु रात्सस्येति नियमाल्लोप एव न स्यात् ॥

संयोगान्तस्य लोपे हि नलोपादिर्न सिद्ध्यति ।
रात्तु तेनैव लोपः स्याद्धलस्तस्माद्विधीयते ॥

एङ्ह्रस्वात्संबुद्धेः ॥ ६९ ॥

लोप इति वर्त्तते, हलिति च । अपृक्तमिति नाधिक्रियते । तथा च पूर्वसूत्रे पुनरपृक्तग्रहणं कृतम् । एङन्तात्प्रातिपदिकाद् ह्रस्वान्ताच्च परो हल्लुप्यते स चेत्संबुद्धेर्भवति । एङन्तात् । हे अग्ने । हे वायो । ह्रस्वान्तात् । हे देवदत्त । हे नदि । हे वधु । हे कुण्ड । कुण्डशब्दादतोऽमित्यम् । अमि पूर्व इति पूर्वत्वे कृते हल्मात्रस्य मकारस्य लोपः ।

* बिभर्तीत्यधिकमेकस्मिन्पुस्तके ।

Digitized by Google

हे कतरदित्यत्र ड्डिदयमदृडादेशस्तत्र टिलोपे सति ह्रस्वाभावान्नास्ति संबुद्धिलोपः । एङ्ग्रहणं क्रियते संबुद्धिगुणबलीयस्त्वात् ॥

शेश्छन्दसि बहुलम् ॥ ७० ॥

शि इत्येतस्य बहुलं छन्दसि विषये लोपो भवति । या क्षेत्रा । या वना । यानि क्षेत्राणि । यानि वनानि ॥

ह्रस्वस्य पिति कृति तुक् ॥ ७१ ॥

पिति कृति परतो ह्रस्वस्य तुगागमो भवति । अग्निचित् । सोमसुत् । प्रकृत्य । प्रहृत्य । उपस्तुत्य । ह्रस्वस्येति किम् । आलूय । ग्रामणीः । पितीति किम् । कृतम् । हृतम् । कृतीति किम् । पटुतरः । पटुतमः । ग्रामणिकुलमित्यत्र ह्रस्वस्य बहिरङ्गस्यासिद्धत्वात् तुग्न भवति ॥

संहितायाम् ॥ ७२ ॥

अधिकारो ऽयमनुदात्तं पदमेकवर्जमिति यावत् । प्रागेतस्मात्सूत्रादित उत्तरं यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम् । वक्ष्यति । इको यणचि । दध्यत्र । मध्वत्र । संहितायामिति किम् । दधि अत्र । मधु अत्र ॥

छे च ॥ ७३ ॥

ह्रस्वस्य तुगिति वर्त्तते । छकारे परतः संहितायां विषये ह्रस्वस्य तुगागमो भवति । इच्छति । गच्छति । ह्रस्व एवात्रागमी न त्वदन्तः । तेन चिच्छिदतुश्चिच्छिदुरित्यत्र तुगभ्यासस्य ग्रहणेन न गृह्यत इति हलादिःशेषेण न निवर्त्त्यते । नावयवावयवः समुदायावयवो भवतीति ॥

आङ्माङोश्च ॥ ७४ ॥

तुगित्यनुवर्त्तते, छ इति च । आङो ङित ईषदादिषु चतुर्ष्वर्थेषु वर्त्तमानस्य माङश्च प्रतिषेधवचनस्य छकारे परतस्तुगागमो भवति । पदान्ताद्वेति विकल्पे प्राप्ते नित्यं तुगागमो भवति । ईषदर्थे । ईषच्छाया । आच्छाया । क्रियायोगे । आच्छादयति । मर्यादाभिविध्योः । आच्छा-

Digitized by Google

याया: । आच्छायम् । माङः खल्वपि । माच्छत्सीत् । माच्छिदत् । छिद्रिशिष्टग्रहणं किम् । आछाया । आच्छाया । प्रमाछन्दः । प्रमाच्छन्दः ॥

दीर्घात् ॥ ७५ ॥

छे तुगिति वर्त्तते । दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव दीर्घस्य तुगागमो भवति । ह्रीच्छति । म्लेच्छति । अपचाच्छायते । विचाच्छायते ॥

पदान्ताद्वा ॥ ७६ ॥

दीर्घाच्छे तुगिति वर्त्तते । पदान्ताद्दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव दीर्घस्य पूर्वेण नित्यं प्राप्तो वा तुगागमो भवति । कुटीच्छाया । कुटीछाया । कुवलीच्छाया । कुवलीछाया ॥ विश्वजनादीनां छन्दसि वा तुगागमो भवतीति वक्तव्यम् ॥ * ॥ विश्वजनच्छत्रम् । विश्वजनछत्रम् । नच्छायां कुरवोपराम् । नछायां कुरवोपराम् ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ एकादशस्तबकावशेषः ॥

नीलनिचोलचोलधारिणी मृगनाभिलिप्ता नाभिलिप्ता स्तम्भजम्बालजम्बालमान्थर्यमासादयता साध्वसेन कुतः क्व यामीति स्वयमप्यजानती न तीव्रतरतरलतां चात्मनो निन्दन्ती ॥ १७० ॥

निचोलः प्रच्छदपटः । चोलः कञ्चुलिका । स्तम्भः स्तब्धता स एव जम्बालः पङ्कः तज्जं तदुद्भवं बालमान्थर्यं प्रथममन्थरताम् आसादयता साध्वसेन न अभिलिप्ता । अभिसारे स्तब्धताकारिण्या शङ्कया रहितेत्यर्थः । स्वयमप्यजानतीति, प्रेमवैवश्येनैव तदाचरन्तीत्यर्थः । बहिर्दूत्यसंकेतपरस्परसंमतिवार्ताज्ञानं विना भूतोऽप्ययं प्रथमाभिसारो भगवदिच्छाशक्तिवशात् तत्प्रौढानुरागस्यान्यनिरपेक्षत्वप्रदर्शनायैवेति भावः । तीव्रतरां तरलतां तारल्यमपि न निन्दन्ती । प्रेष्ठसङ्गसुखप्राप्तिभावनेति भावः ॥ १७० ॥

Digitized by Google

तदुपगमगमकविलक्षणलक्षणशुभक्षणाकृतक्षणस्य कृष्णस्य तस्याश्च मनसा मनसैव कृतं संकेतकेतनं मकरकेतनचेतनया परिचायितं परिचायितं च सा वार्षभानवी न*वीनसङ्गरसरसरसरलहृदया हृदयाधिनाथाकृष्टहृदयाभिससार ॥ १७१ ॥

तस्या राधाया उपगम उपसर्पणं तस्य गमकं सूचकं विलक्षणं लक्षणं यत्र तथा भूते शुभक्षणे मङ्गलसमये कृतः क्षणः स्वाभिसारोत्सवो येन तस्य कृष्णस्य तस्या राधायाश्च । मनसा मनसैवेति, हे प्रिये तत्र कुञ्जमन्दिरेऽद्याभिसृत्य भवत्या भवितव्यमिति ध्यानात्तदामेव राधां प्रति कृष्णस्य संकेतः, तथैव तं प्रत्यस्या अपि स ज्ञेयः । ध्यानेनैव कृतः स न तु प्रकटमिति तु विवेको द्वयोरपि नास्तीति ज्ञेयम् । सख्यादीनामपि राधासंगमार्थं दूत्यक्रिया तदनुरागकथनं वशीकारस्तत्संमत्यानयनं तद्गुशाकथनमित्यादिकमपि ध्यानेनैव तथैवाभूदिति ज्ञेयम् । अन्यथा तथाभिसारस्तस्यास्तदानीं ताभिर्निषिध्येतैवेति भावः । एतच्च सर्वमनुरागिजनमात्राणां स्वेच्छाकृतध्यानस्यापि सत्यत्वदर्शनार्थमिति । मकरकेतनस्य प्रेमात्मककन्दर्पस्य चेतनया संविदा परिचायितं कृतपरिचयं, यतः परिचायितं प्रदर्शितं च "चायृ निशामने" इति ॥ १७१ ॥

ततश्च ।

अहस्तम्भे प्रियसहचरीदत्तहस्तावलम्बा
स्यन्देऽस्त्राणां पदविहरणे वर्त्मनो वित्तिशून्या ।
कम्पेनालीकरकिशलयं कम्पयन्तीति कृच्छ्रा-
दायातापि प्रियगृहमहो हन्त निर्गन्तुमैच्छत् ॥ १७२ ॥

अस्त्राणां स्यन्दे क्षरणे सति पदविहरणे गमने वर्त्मनो वित्तिशून्या वर्त्मज्ञानरहिता ॥ १७२ ॥

किंच ।

त्वरयति सखीवृन्दे मान्द्यं हठादवलम्बते
चलति यदि वा किंचिद्भूयस्तरां विनिवर्तते ।

* नवीनसंगमरसरसरलहृदया-इति पा० ।

अपि हृदि समुत्कण्ठे साम्यं मुहुर्वहिरीहते
प्रकृतिकुटिला: कामं वामा नवा: किल किं पुन: ॥१०३॥

त्वरयति समीपगमनार्थं त्वरां कुर्वति सति। समुत्कण्ठे सम्यगुत्कण्ठावत्यपि हृदये ॥ १०३ ॥

ततश्च।

प्रणयसहचरीभि: प्रार्थनाचाटुवादै:
प्रसभरभसया च प्रापिता कान्तगेहम्।
अपरिचितरतश्रीसंगमानादराय
व्यतनुत तनुमध्या ह्रीसखीसन्नियोगम् ॥ १०४ ॥

अद्यैव केवलमेकवारमेव निजस्पर्शसुखमात्रममुष्मै वितरेति प्रार्थना, मा परमन्येद्युरस्यान्तिकं कदापि त्वां प्रहिणुम इति सशपथमुक्त्वा दयावति राधे· अस्य व्याकुलतां वीक्ष्य त्वं प्रसीदेत्यादिचटुप्रसभरभसया हठवेगेन, रभसाशब्दस्टावन्तोऽपि कोशे दृष्ट:; अपरिचिता या रतश्री: सुरतसंपत्तिस्तत्कर्तृकसंगमे· अनादराय तामवमन्तुं ह्रीर्लज्जैव सखी तस्या: सन्नियोगम्· उक्तमाज्ञां व्यतनुत साङ्गीकारं विस्तृतवती। अयं भाव:, रतश्रियमेतामहं न परिचिनोमि तथापि· एता मत्सख्यस्तत्संगमार्थमेव मां प्रहिण्वन्ति तस्मादहं सांप्रतं मदनुकूलां लज्जामेव सखीत्वेन वृणोमि तन्निदेशेनैव रतश्रियमनादृत्य स्ववाम्यमाविष्करोमीति ॥ १०४ ॥

ततश्च।

गच्छन्तीषु सखीषु गन्तुमनस: कृष्णेन पाणौ धृते
तस्य स्पर्शरसादसारि मनसा तस्या: स्थितौ चेत् स्पृहा।
मा यातेति मनोऽनुलापपिशुनैर्भ्रूभङ्गकैर्वारिता:
प्राणाश्वासतयेव केलिभवनद्वार्येव सख्योऽभवन् ॥ १०५ ॥

गन्तुमनसो निर्गन्तुकामायास्तस्या: पाणौ कृष्णेन धृते सति तस्य स्पर्शरसात् प्रेष्ठस्य स्पर्शसुखमनुभूय तस्या मनसा स्थितौ चेद्यदि स्पृहा·

ऽसारि प्राप्ता तदा निर्गमाशङ्की स्वहस्तरोधमेव हेतुं ज्ञापयन्त्यास्तस्या मा यातेति हे सख्यो मामस्य हस्ते निक्षिप्य मा बहिर्गच्छतेति यो मनोऽनुलापो मनसैव पुनःपुनर्भाषणं तस्य पिशुनैः सूचकैः, "अनुलापो मुहुर्भाषे"त्यमरः, प्राप्ताश्वासतयैवेति, कृष्णकर्तृकहस्तरोधे तस्याः स्वरोऽपिधायिनीं स्पृहामनुमायेति भावः, तथापि किंचिद्वाम्यसाहाय्याय भवनस्य द्वार्यैव नत्वन्तः ॥ १७५ ॥

ततश्च ।

कृष्णो पश्यति लोचने मुकुलयत्यापृच्छति स्वागतं
तूष्णीमेव शृणोति संस्पृशति च स्वैरं परावर्तते ।
न त्रासादवहित्थया न च न तद्व्याजेन वाम्येन वा
बालानामभिलाषवत्यपि हृदि प्रायः स्वभावो हि सः ॥ १७६ ॥

लोचने स्वनेत्रे मुकलयति मुद्रयति । शृणोति न तु प्रतिवक्ति । संस्पृशति निर्गमशङ्कया वामपाणिना धृतदक्षिणहस्ताया एव तस्याः कञ्चुलिकादिकं दक्षिणेन पाणिना स्पृशति सति परावर्तते । तदसहिष्णुतयेव किंचित् स्वबलमाविष्कृत्य विघट्टत इत्यर्थः । न त्रासादिति, तद्विरोधिनो हर्षस्य प्राबल्यदर्शनात् । न॰अवहित्थयेति, बुद्धिपूर्वकत्वाभावेनैव सहसैव तत्तच्चेष्टोद्गतेः । न व्याजेनेति, प्रयोजनान्तरसापेक्षत्वानुपलम्भात् । न वाम्येनेति, असंमतिं बहिरभिव्यञ्ज्यापि तत्र रसवाधनत्वांशानाविष्कारात् । प्राय इति, तादृशसत्त्वायिकानामेव न तु सर्वासामिति ॥ १७६ ॥

ततश्च ।

उपनमयति यद्यत् प्रातिकूल्यं नताङ्गी
प्रभवति किल तत् तत् कृष्णकौतूहलाय ।
रसयति हि पदार्थो दुर्लभस्तावदेव
व्यभिचरति तदीयं दुर्लभत्वं न यावत् ॥ १७७ ॥

Digitized by Google

रसयतीति, यदि प्राकृतस्यापि पदार्थस्य रसदत्वं दुर्भनायां सत्यां तदा किं पुनरप्राकृतस्य सुखैकमयस्यास्य पदार्थस्य सुलभत्वेऽपि सदा रसयतो दुर्लभतायामित्यभिप्रायः ॥ १८७ ॥

किंच ।

आलिङ्गितुं कृतमतौ दयिते नतभ्रू-
रुत्थाय गन्तुमभिलष्यति केलितल्पात् ।
बाला तथाप्यजनि तस्य मनःप्रसादे
सांनिध्यमेव हि मणेस्तमसोऽपहत्यै ॥ १८८ ॥

नतभ्रूः कुटिलभ्रूः ॥ १८८ ॥

एवं च सति ।

नालीनां शपथैर्हरेरनुनयव्याहारमन्त्रैश्च नो
कन्दर्पस्य च नैव वैभववतो बाणेन यन्निर्ममे ।
विद्युद्दामघटाकटाक्षकटुभिः क्रोधोर्जितैर्गर्जितै-
रेका प्रौढसखीव कण्ठमनयत् तां तस्य कादम्बिनी ॥ १८६ ॥

आलीनां शपथैरिति, हठिनि राधे यद्यतः परं वामा भवसि तदास्माकं शिरसां शपथोऽस्तु ते· इति । अनुनय इति, प्रियतमे स्मरगरलेन जाज्वल्यमानहृदयोऽस्मि त्वं परिरम्भसुधया जीवय मामिति । मन्त्रैरिति, ततश्च विचित्रचन्दनकस्तुलिकादिकं निर्माय कौशलेन त्वामपि विस्मापयामि· अलमत्र नेपथ्यभङ्गवैमनस्यव्यञ्जनयेत्यामन्त्रणैः । कादम्बिनी मेघमाला ॥ १८९ ॥

ततश्च परमदुरासत्वेन रासदत्वेन चापि मनसा न साधयितुमर्हां महामकस्मात् कस्मादपि केनापि करे निहितां हितां सुधाकरकलामिवं ॥ १८० ॥

ततश्च तां परिरभ्य परितस्युषा व्रजराजयुवराजेन रराजे· इत्यन्वयः । परमदुरासदत्वेन· अतिदुष्प्रापत्वेन । रासदत्वेन रासं रससमूहः

स्वार्थेऽपि रस एव वा, रसनं रास आस्वादनं वा, तद्दायित्वेन । मनसापि साधयितुम्, उपार्जयितुं नार्हां न योग्याम्, अत्यसंभवे वस्तुनि मनोरथस्याप्यगतेः । अर्हां माननीयाम् । अकस्मात्, आकेतमेव । कस्मादप्यनिर्वाच्याद्धेतोः । सुधाकरकलामिति, वैकल्यतिमिरध्वंसित्वेन चेतश्चन्द्रकान्तद्रावकत्वेन कामसंज्वरोपशमकत्वेन साहजिककसौन्दर्येण च, उत्प्रेक्षा ॥ १८० ॥

अकृतकामनामनाघ्रातां मधुकरेण करेण समाक्रष्टुमशक्यामशक्यापवारणाम् ॥ १८१ ॥

न कृता केनापि कामना यस्यामिति, कल्पतरुपक्षे, अदत्तकामत्वेन परिपूर्णसारां, राधापक्षे स्पष्टमेव । मधुकरेण, अनाघ्रातामिति परागमकरन्दाभ्यामविच्युतामित्यर्थः, पक्षे तस्याः पतिमन्येनाननुभूतमाधुर्यकाम् । समाक्रष्टुमशक्यामिति, अतिभाग्यलभ्यामित्यर्थः, पक्षे पतिमन्यस्य करस्पर्शमात्रेणाप्यशक्याम् । अपवारणमाच्छादनम् ॥ १८१ ॥

परिमलमलघीयांसमादधानां मादधानां कामपि सुरतरुकुसुममालामालापमन्तरेणापि केनापि कण्ठे निहितामिव ॥ १८२ ॥

मादो हर्षस्तस्य धानामर्पयित्रीम् । सुरतरुकुसुममालामिति, अखिलवाञ्छितसंपादकत्वेन सुखस्पर्शदत्वेन व्यज्यमानालिङ्गनसौष्ठवसभाजनत्वेन विशिष्टसौन्दर्याधायकत्वेन च । आलापम्, अर्पणवाक्यम् ॥ १८२ ॥

परमाह्लादरभसाधारां धारां सुधारसस्येव केनापि नापि लपित्वा वचसि निक्षिप्तामिव ॥ १८३ ॥

परमाह्लादस्य रभसं वेगम्, आ सम्यग्धारयतीति "स्वार्थण्यन्तात् पचाद्यच्"ताम् । सुधाधारामिति निरतिशयास्वादाधायकत्वेन, वैपरीत्येन तत्रामघटकावरद्वयवाच्यत्वेन च ॥ १८३ ॥

अकपटपटदतिसाध्वससाध्वसदभिसोभलुलितामधिकण्ठमनुत्कण्ठमनायत्तिवशात् कृतावलम्बामलम्बामलक्ष्मीकेन भुजवलयेन अव-

लयेन तं समयमारभ्य परिरभ्य परितस्थुषा व्रजराजयुवराजेन रराजे न रसादपरं परं विविदे च ॥ १८४ ॥

अकपटं निर्व्याजमेव पटता भीरुतया प्राप्नुवता· अतिसाध्वसेन हेतुना साधु यथा स्यात् तथा· असद्भिस्त्रासजन्यत्वादभद्रैर्मिथ्याभूतैर्वा· अभिज्ञाभैर्ललितां मर्दितां नाम् । अत एव· अनायत्तिरनधीनता तद्वशादपि· अनुत्कण्ठं विनाप्युत्कण्ठाम्· अधिकण्ठं कण्ठे कृतोऽवलम्बो यया ताम् । अलमत्यर्थं वामा मनोज्ञा लक्ष्मीः शोभा यस्य तेन भुजमण्डलेन । कीदृशेन,जवस्य वेगस्य लयो मेलनं यत्र तेन । रसादानन्दजाड्यादपरमन्यत्र विविदे न ज्ञायते स्म ॥ १८४ ॥

तामथ कृष्णेन सह सहचर्यो हसितोत्कण्ठाः कटाक्षविक्षेपेण पश्यन्त्यः श्यन्त्यश्च स्वममानस्यं मानस्यं चाभिलाषं सफलमिव मन्यमाना मानातीतसंमाननया जलधरोर्जितगर्जितगरिमाणं स्वसखीं श्रावयित्वा श्रावयित्वा स्वसंकोचं पूजयामासुः ॥ १८५ ॥

स्वम्· अमानस्यं दुःखं श्यन्त्यः खण्डयन्त्यः । मनसि भवं मनसोहितं वा मानस्यम् । मानं परिमाणं तदतीतया· अपरिमितया संमाननया स्वसंकोचं श्रावयित्वा गमयित्वा । "श्रु गतौ" तालव्यादिरपि ॥ १८५ ॥

धन्योऽसि घन रसद रसद एवासि त्वमुचित एव चित एवमस्य तव वर्णमित्रस्य मित्रस्य नवकमलिनीवृन्दारिकावृन्दानां मैत्रीकरणेन यदियं मे दुराराधामेदुरा राधा हुंकारमात्रेणैव कृष्णकण्ठं प्रापितास्ति भवतावता परमसौभाग्यम् ॥ १८६ ॥

तव वर्णमित्रस्यास्य मैत्रीकरणेन कर्त्रा त्वं चितः· व्याप्तः, "चितं छन्ने चित्त्वि"ति मेदिनी । कमलिनीवृन्दारिकाः श्रेष्ठकमलानि श्रेष्ठसुन्दर्यश्च "वृन्दारकनागकुञ्जरैः पूज्यमान"मिति समासः । मित्रस्य सूर्यस्य सख्युश्च । मम· इयं सखी राधा, मे· इति जात्या· एकवचनं, दुराराधा दुःसाध्या । कुतः । अमेदुरा· अवचस्कारत्वात्, कठोरेत्यर्थः ॥ १८६ ॥

इति सखीजनसोत्प्रासप्रासविद्धहृदयेव भयोपरमे परमेणाग्रहेण तदुरसो रसोदधेरिवापि बहिर्बुभूषया भूषयामास यदि स्वमात्मानम् ॥ १८७ ॥

ततः सा तदुरसो बहिर्बुभूषया बाम्यांविष्कारेण यदि स्वमात्मानं भूषयामास तदा कृष्णेन प्रसभेन हठेन तस्याः कपोलचुम्बनादीनि कृतानीत्यन्वयः । प्रासः कुन्तनामास्त्रभेदः ॥ १८७ ॥

तदा प्रसभेन सभेन ग्रहविशेषेणाशेषेणामोदेन कृष्णेन च तस्याश्चिचितलतोपवनानीव न जातपत्त्राङ्कुरभङ्गानि कपोलचुम्बनानि ॥१८८॥

सभेन सदीप्तिना । ग्रहविशेषेण सुरततन्त्रोक्तवेणीचिबुकादिधृतिविशेषेण । अशेषेण संपूर्णेन । न जातः पत्त्राणामङ्कुराणां भङ्गो यत्र तानि, पत्त्राङ्कुर आकल्पभेदः । मुग्धालक्षणनायिकायामतिभीरुत्वस्वभावायां प्रथमसंभोगस्य तथौचित्यात्, तस्या मध्याप्रगल्भयोरिव संभोगगाढत्वासहिष्णुत्वात् ॥ १८८ ॥

यमुनाजलानीव कज्जलशोभाम्लानिकराणि नयनचुम्बनानि ॥१८९॥

कज्जलशोभाया म्लानिकराणि, पक्षे· अम्लानिकराणि ॥ १८९ ॥

भक्तिरसरसिकहृदयमिव समक्षतयावकरागमधरपानम् ॥ १९० ॥

समक्षतया प्रत्यक्षतयैव· अवकरैर्दोषैरगम्· अगम्यं, गमेर्डः कर्मण्यपि बाहुल्यात्, यद्वा· अवकरान् न गच्छति न प्राप्नोतीति तथा, पक्षे सम्यगक्षतो यावकरागोऽपि यत्र तत् ॥ १९० ॥

द्वितीया हिमकरलेखेव· अलक्ष्यमाणलाञ्छना दशननखपदपदवी ॥ १९१ ॥

लाञ्छनं कलङ्कचिह्नं च । अधरे दशनस्य, स्तनयोर्नखराणां यत् पदं चिह्नं तस्य पदवी पद्धतिः ॥ १९१ ॥

सुप्रतिष्ठितशिवलिङ्गसंमाननमिव सदामोदकरकमलपूजनजनितपरभागं स्तनयुगपरामर्शनम् ॥ १९२ ॥

सदा मोदकरैः कमलैर्यत् पूजनं, पक्षे सदामोदं यत् करकमलं तेन पूजनं स्पर्शस्तेनैव जनितः परभागः शोभा यस्य तत् ॥ १९२ ॥

शुक्तिसंपुटा इवानुद्धृतमुक्तावलीकाः परिरम्भाः ॥ १९३ ॥

अनुद्धृता· अनपनीता, पक्षे· अच्छिन्ना मुक्तावली येषु ते ॥ १९३ ॥

विषमविषधरीधारणमिव साहसमात्रप्रतिपादकं रोमलतापरिशीलनम् ॥ १९४ ॥

रोमलतापरिशीलनं स्तनाध आरभ्य रोमावलीवर्त्मना करचालनम् ॥ १९४ ॥

तीर्थसलिलमिव स्पर्शमात्रेणैव कृतार्थमन्यताकारिनाभिह्रदपरिसरकरप्रदानम् । मोक्ष इव परमदुःशको नीविमोक्षश्च कृतानि ॥ १९५ ॥

कृतानीति, कृतश्च कृताश्च कृतं च कृतानि चेति कृतानि, "नपुंसकमनपुंसकेने"त्यादिना नपुंसकत्वम् ॥ १९५ ॥

ततस्तस्या अपि ब्रह्मेव नेति नेति निषेधसिद्धं वचनं, तडित्प्रामेव· उत्पद्येव लीयमानं कटाक्षविक्षेपणं, गिरिनिर्झरजलमिव· उत्सवाहितादरस्रवद् विलोकितम् ॥ १९६ ॥

नेति नेतीति रतारम्भे । कटाक्षेति किंचिदसहिष्णुताव्यञ्जनाय । उत्सेत्यादि रतमध्ये । उत्से प्रस्रवणे वाहितं च तद्· अदरमनल्पं यथा स्यात् तथा स्रवच्चेति तत् । "उत्सः प्रस्रवण" मित्यमरः । पक्षे· उत्सवेन रतोत्सवेन· आहितमर्पितमदरास्रम्· अल्पाश्रु तद्वत् तद्युक्तम् ॥ १९६ ॥

गोवर्धनसानव इव स्वनवाचालमणिकटकाः करकम्पाः ॥ १९७ ॥

कटकं गिरिनितम्बो वलयं च ॥ १९७ ॥

वर्षाशिखरीव· अभङ्गुरपयोधरः प्रतिपरिरम्भः ॥ १९८ ॥

प्रतिपरिरम्भः श्रीराधाकर्तृकः ॥ १९८ ॥

मलयानिल इव मृदुस्यन्दः· वसन्तदिनकरातप इव दरघर्मको·

लाल: किशलयकलाप इव मृदुलीलाकरकम्पः, तडाग इव विपुलकभङ्गश्च देहः समजनि ॥ १६६ ॥

मृदुस्यन्द इत्यादि रतोपान्ते । मृदुस्यन्दो मन्दगतिर्जातस्तम्भभावश्च । दरघर्मकीलालः ईषद्घर्मजलजनकः, जातस्वेदभावश्च । मृदुर्लीलानां विलासानाम् आकरो येन तथा भूतः कम्पो यत्र सः, पक्षे मृदुर्लीलया करकम्पो हस्तगतकम्पभावो यत्र सः । विपुलः कस्य जलस्य भङ्गस्तरङ्गो यत्र सः, पक्षे विशिष्टो पुलकस्वरभङ्गो यत्र सः ॥ १९९ ॥

ततश्च दूरादालोकयन्तीनामालीनामालीनानां द्वारोपकण्ठे कण्ठे गृहीतां कृष्णेन तां नतां ह्रीभरेण निर्भरेण निभीतां प्रियवयस्यां वयस्याञ्जस्येन नूतनतया प्रगाढरसासहेऽवस्थितामनवस्थितामनवधानपरां प्रियतमाग्रहे ग्रहेण केनाप्यभिभूतामिव कश्चिदालाप आसीदितरेतरम् ॥ २०० ॥

द्वारस्य उपकण्ठे समीपे आ ईषद् लीनानां निह्नुतवतीनाम् । तां राधाम् । ह्रीभरेण लज्जातिशयेन नतां कुञ्चनपराम् । वयसि नवयौवने अञ्जसा रत्यस्य भाव आञ्जस्यं तेन अनवधानपराम् आनन्दमत्ताम् । प्रियतमस्याग्रहे सति अतिवाम्यसाधकेन केनापि ग्रहेण पराक्रान्तामिव ॥ २०० ॥

यथा ।

अयमयं सखि भाति किशोरयो-
र्नवकिशोरवरः सुरतोत्सवः ।
अयमिह प्रतिपत्तिविमूढतां
गत इव प्रतिभाति मनोभवः ॥ २०१ ॥

सुरतोत्सवोऽपि नवकिशोरवरः प्राप्तप्रथमयौवनारम्भमात्रः, अतस्तादृशो मनोभवोऽपि प्रतिपत्तिविमूढतामिव गतः आनन्दजाड्यं प्राप्त इव ॥ २०१ ॥

Digitized by Google

अस्यास्तु ।

चिरमनोरथ एष चिरात् फलन्
फलभरेण मनो व्यथयन्निव ।
अहह दुःसह एव भवत्यहो
सुखतयापि च दुःखतयापि च ॥ २०२ ॥

सुखतयापीति, फलन् सन्, दुःखतयापीति पूर्वदशायाम् अफलन् सन्, अतः सदैव दुःसह एवैव भवतीत्यर्थः ॥ २०२ ॥

ततश्च स्वकृतापसरणरणश्रमादेव प्रबलवलमानश्वासां शिथिलकचहस्तां हस्ताम्बुजेन दधतीं श्लथमानां नीवीं नीवीं यथा त्रुटितैकावलिकावलिकामस्तव्यस्तामिव सतृष्णेनापि कृष्णेनापि कृतरतोपरमेण परमेण प्रणयेन निबद्धे केशपाशे पाशेन निबद्धायां नीवौ ग्रथिते च तारे हारे क्षापिते च करकमलेनामलेनाम्बुनि घर्मजे नर्मजेन वचसा सरसीक्रियमाणामवलोक्य सहचर्यः सह चर्यया प्रणयस्मितनिरीक्षणक्षणरूपया क्षणरूपया कृष्णकथया पुरत उपतस्थिरे ॥२०३॥

स्वेनैव कृतम् अपसरणं पराजित्य पलायनमिव यत्र तथा भूते रणे सुरतसंग्रामे यः श्रमस्तस्मात् । कचहस्तः केशसमूहः, "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" इत्यमरः । नीवीं यथा मूलधनमिव, "स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च"त्यमरः । त्रुटिता एकावलीनामावलिः श्रेणी यस्यास्ताम् । उभयत्रैवाप्रियत्वादनुकम्पायां कप्रत्ययः । कृष्णेनापि 'कृष शब्दश्च सत्तार्थो णश्चानन्द" इत्यर्थवशादानन्दप्रदेनापि तारे मुक्तामये । घर्मजे अम्बुनि करकमलेन क्षापिते दूरीकृते सति । प्रणयान्वितरूपया चर्यया आचरणेन । क्षणरूपया उत्सवभूतया ॥ २०३ ॥

स्थिरेव किंचिदथ सा विधुमुखी नतमुखी न तदाननानि पश्यन्ती पश्यन्ती च भ्रुकुटिकुटिलेन कटाक्षेणान्तरान्तरा ताभिरूचे ॥ २०४ ॥

Digitized by Google

तासामाननानि न पश्यन्ती, कुतः, नम्रमुखी, प्राप्तसंभोगत्वेन सलज्जेत्यर्थः । अन्तरा· अन्तरा पश्यन्ती च । भ्रुकुटिकुटिलेनेति, भवतीभिरेवास्य हस्ते बलाद्विक्षिप्ताया मम सतीव्रतध्वंसनं कृतमिति भावः ॥ २०४ ॥

एहि सखि गृहं यामो यामो ह्यवशिष्यते शिष्यतेह विरमतु रति-कलागुरोरस्य गुरोरस्यरहस्यशिक्षायाम् ॥ २०५ ॥

यामः प्रहरः । शिष्यता शिष्यत्वम् । गुरा· उद्यमेन, "गुरी· उद्यमे" भावे क्विप् । उरस्यम्· उरसि भवं यद्रहस्यम्· आलिङ्गनप्रत्यालि-ङ्गनादि तस्य शिक्षायाम् ॥ २०५ ॥

किमपरं विलम्बसे लम्बसे वा न कथं केलितल्पादिति सपरि-हासहासभाषिणीः स्वसखीः कपटपटद्भ्रुकुटिकुटिलाक्षमलसलसता भुजामृणालेन केशकलापसौरभ्यगर्भकेण गर्भकेण ताडयन्तीडयन्तीव स्वलावण्यविशेषमशेषमनारतं कृष्णस्य मनसा न सारस्यमुचा कृत-कृतकरुषा परुषापि परमसरसमनाः ॥ २०६ ॥

कपटेन पटन्त्या प्राप्नुवत्या भ्रुकुट्या कुटिले अक्षणी यत्र तद्यथा स्यादेवम् । केशकलापस्य सौरभ्यं गर्भे यस्य तेन गर्भकेण माल्येन, "केश-मध्ये तु गर्भक" इत्यमरः । कृष्णस्य मनसा प्रयोज्यकर्त्रा· ईडयन्तीव स्तावयन्तीव । स्वलावण्यविशेषं तदानीं सखीताडनचेष्टोत्थम् । अशेषं संपूर्णम् । न सारस्यमुचा सरसताममुञ्चन्त्या कृतया कृत्रिमरुषा परुषा कठोरापि ॥ २०६ ॥

मनाक् स्मित्वास्मि त्वादृशीनामीदृशीनामीहितकापट्यनाट्यना-यिका क्रीडाशालभञ्जिका भञ्जिका स्वाधीनतायाः किलाहं यदा यदालपथ विपथविशिष्टपथयोरथ योग्यं तदेव देवतावाक्यमिव कर-वाणि किमिति मां संप्रति संप्रतिपत्तिमूढां कुरुथ कया वाचागतं कया वा न गम्यत इति कोमलालापेन यदि किंचिदुक्तवती ॥ २०७ ॥

क्रीडाशालभञ्जिका खेलनपुत्तलिका· अस्मि । स्वाधीनतायाः स्वातन्त्र्यस्य भञ्जिका स्वयमेव नाशकर्त्री । कुत एतदित्यत आह यद्वेति ॥ २०७ ॥

तदा तदाकर्णनेनापूर्वेण संतापच्छिदुरदुरवापमोदमेदुरदुरवस्थितमनाः कृष्णः शुभवतीनां भवतीनां प्रसादतः सादतः किलाहं विमुक्तोऽस्या वचनसुधासुधारापरिशीलनेनेति वदन् पारितोषिकमिव ताभ्यो जनं जनं प्रति प्रतिपन्नप्रणयः प्रणयति स्म परिष्वङ्गं यदि ॥ २०८ ॥

संतापानां छिदुरो दुरवापो दुर्लभश्च मोद आनन्दस्तेन मेदुरं सान्द्रस्निग्धम्· अतृप्रिवशादुरवस्थितं च मनो यस्य सः । सादतः संतापात् ॥ २०८ ॥

तदा तदालोच्य चेतसा चेतसारस्या वचसा च सा परिहासवता स्रवता पीयूषशीकरानिव किमपि मन्दमधुरं मधुरञ्जि निजगाद ॥ २०९ ॥

चेतसा च मनसापि· इतसारस्या प्राप्तरसा । वचसा च वाक्येनापि । सा राधा । कीदृशेन, पीयूषशीकरान् स्रवता· उत्पादयता । "षु प्रसवैश्वर्ययो"रिति भौवादिकोऽयम् ॥ २०९ ॥

अधुना गलितहृद्दूषणा दूषणाभाववत्यो भवत्यो भवन्ति नापरं परिहसिष्यन्तीति ॥ २१० ॥

ऊषणं पीडा, "ऊष रुजायां", गलितमनःपीडा इत्यर्थः ॥ २१० ॥

ताश्च कृष्णाङ्गसंगमनिर्वृतिनिर्वृतिभाजो निजसखीसुखमीक्षणसमनुभूतमपि भूतमपि वर्तमानमिव पुनरात्मानुभवेन विदांचक्रुः ॥ २११ ॥

कृष्णाङ्गसंगमेन निर्वृतिरानन्दः· तस्या निर्वृतिरनावरणं तद्भाजः । भूतमपि· अतीतमपि । वर्तमानमिवेति, ईदृशं सुखमेतन्मत्सखेवाधुनापि प्राप्नोत्वित्याशास्तिव्यातिता ॥ २११ ॥

अथ सा विभावरी विभावरीयसी भूत्वापि यामायामावशेषतयैव सदोषा दोषाख्यामपि समाससाद ॥ २१२ ॥

विभावरी रात्रिः, विभया कान्त्या वरीयसी श्रेष्ठा भूत्वापि यामस्य एकप्रहरमात्रस्यैवायामोऽवशेषो यस्यास्तत्तया सदोषा दोषयुक्ता, दोषाख्यां दोषेति नाम ॥ २१२ ॥

ससादतया यतस्ताः प्रियसखीमादाय कृष्णाभवनान्निजभवनं समासेदुः ॥ २१३ ॥

यतो हेतोः, ताः सख्यः, ससादतया सावसादत्वेन ॥ २१३ ॥

अथ विभातायां विभावर्यां विभावर्यां श्यामामागतां वीक्ष्य वीक्ष्यमाणेनात्मनोऽन्यभावेन विस्मितां स्मितांशुधौताधरामधोमुखी विधुरिता ह्रिया यदि बभूव ॥ २१४ ॥

श्यामां कीदृशीं, विभावर्याम् ॥ २१४

तदा श्यामापि मापितनवरनवरमणीयकृष्णाङ्गसङ्गसंगतपारभाग्यापारभाग्याम्भोधिमात्मन एव जानती न तीव्रं किमपि पप्रच्छ ॥ २१५ ॥

मापितं मानं मा प्रमा ताम्‌ आपितं नवर केवलं नवरमणीयस्य कृष्णस्याङ्गसङ्गात् संगतं मिलितं पारभाग्यं परभागो यया सा, चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । न तीव्रं, किंतु कोमलमित्यर्थः ॥ २१५ ॥

अयि कस्मादकस्मादस्मदालोकेन लोकेन नानुभूतां भूताण्डवकारिणीमिव दशां दधत्या विलक्षणलक्षणयापत्रपया कलाकलापविचक्षणे चक्षणे तव हृदयम् ॥ २१६ ॥

अस्मदालोकेन सतैवापत्रपया लज्जया तव हृदयं चक्षणे, "चणु हिंसायां",ग्रस्तं बभूवेत्यर्थः । कीदृश्या, भुवः पृथ्वीस्थलोकमात्रस्यैव ताण्डवकारिणीं हर्षनाट्यकारयित्रीमिव दशां दधत्या धारयन्त्या । तत्र हेतुगर्भसंबोधनं हे कलाकलापविचक्षणे इति ॥ २१६ ॥

Digitized by Google

किंच ।

अलघवलितमङ्गं स्वावसादं व्यनक्ति
ग्लपितमिव मृणालीकन्दलं दोर्द्वयं ते ।
दशनवसनमेतन्नीरसं गण्डपाली
ललितललितपत्त्रा प्रक्रमः कस्तवेषः ॥ २१७ ॥

नीरसं नीरागम् ॥ २१७ ॥

किंच ।

अभिनवलतिकेव वातरुग्णा
नवनलिनीव मतङ्गजेन भुग्ना ।
मृदुतरनवमालिकेव धूता
मदमधुपेन विलक्ष्यसे त्वमद्य ॥ २१८ ॥

वातरुग्णेत्यङ्गविन्यासानामस्तव्यस्तता म्लानता च । मतंगजेन भुग्नेति दशनक्षतादि । मदमधुपेन धूतेति स्वनायकसाक्षात्संभोगकौतुकं सूचितम् ॥ २१८ ॥

अपि चिरमभिलष्यमाण एवं
प्रणयिनि कोऽपि सुदुर्लभो हि लब्धः ।
अथ कथमियमन्यथास्मदादेः
फलितवती सखि भाग्यकल्पवल्ली ॥ २१९ ॥

फलितवतीति, कृष्णेन तव संभोग एव तस्याः फलं, तच्चानुभवसाक्षात्कारितत्वात् प्रत्यक्षं जातमित्यर्थः । कल्पवल्लीत्यखिलवाञ्छितपूरणात् ॥ २१९ ॥

इति प्रणयरहस्यादरसादरसाहससाधुवादेन पृच्छ्यमानाच्छ्यमानाप्य मनसि न छिद्रकपटा पटान्तेन मुखमावृत्य सादरविस्मितं सादरविस्मितं निजगाद ॥ २२० ॥

सादरमनल्पम्॰ आदरसाहसाभ्यां च सहितं यथा स्यात् तथा साधुवादेन पृच्छ्यमाना सती, मनसि॰ आरुह्यम्॰ अच्छन्तां वञ्चनाराहित्यलक्षणाम्॰ आनाय्य संगमय्य, यतो न सिद्धकपटा, सर्वमेव ज्ञातवत्यां तस्यां कपटासिद्धेः, सादरविस्मितम्॰ आदरविशिष्टस्मितसहितं, सा राधा, सादरविस्मितम्॰ अनल्पविस्मययुक्तं च यथा स्यात् तथा, हन्त कथमनया सर्वमेवाभिज्ञातमित्येवं, यद्वा॰आदरविस्मयाभ्यां सहितं यथा भवति, सदरा॰अनल्पा विः कान्तिर्यच्च तादृशं स्मितं यत्र तच्च यथा स्यात् तथा ॥२२०॥

श्यामे किं ब्रवीमि ।

क्काहं स्थिता क्क चलिता क्क च वा स पन्था
नीतास्मि केन नलिनाक्षि तदीयपार्श्वम् ।
किं वा बभूव मयि तव समेतवत्यां
जानाम्यहं यदि तदा भवती न वेत्ति ॥ २२१ ॥

तदा भवती न वेत्तीति, भवत्या अनुमन्त्रणं विना मम कोऽपि व्यापारः कदापि माभूदेवेत्यत्र भवत्येव प्रमाणमिति भावः ॥ २२१ ॥

किंच ।

व्यापारो मनसश्च यत्र न गतः संभावनाभावतो
यत् स्वप्नः किमथेन्द्रजालमथवा भ्रान्तिः सुदीर्घैव मे ।
तत् किं ह्लादि किमार्तिदं किमुभयं किं वा न तन्नापि तच्चेतोविद्रुतिकारकं च मनसो मूर्च्छाकरं चाभवत् ॥ २२२ ॥

असंभावितवस्तुदर्शनलिङ्गेनाह स्वप्न इति । तस्यापि जागरणदशानुत्पत्तिमाशङ्क्याह॰ इन्द्रजालमिति । तस्यापि चिरस्थायित्वमाशङ्क्याह सुदीर्घा भ्रान्तिरिति। तदिति सुरतचेष्टितं, ह्रिया स्पष्टं वक्तुमशक्तेः । किं ह्लादि॰ आह्लादकं, पौर्वकालिकनिखिलदुःखप्रशमनपूर्वकनिस्तुलसुखदत्वेनानुभवात् । किम्॰ आर्तिदं पीडादायि, औत्तरकालिक्या महोत्कण्ठायाः कारणभूतत्वेनाधुना विचारतो दुःखदत्वेनैवानुभूतत्वात् । किं वा॰ उभयं

ह्लादार्त्योर्दायकं, तदानीमप्यपरिमितसुखानुभवतदुत्कण्ठानुभवयोर्दुर्वारत्वात्। न तथापि तत्, न ह्लादि नाप्यार्तिदं चेत्यर्थः, तदैवापि उत्कण्ठाबाहुल्येन ह्लादांशावरणात्, ह्लादबाहुल्येन च उत्कण्ठावरणादिति। एवं च निर्वक्तुमशक्नुवती केवलमनुभावमात्रमाह चेत इति ॥ २२२ ॥

अथ सपरिहासं हासं हासमेवाह श्यामा श्यामाब्जनयने नयनेयमेतत्। तथाहि।

केलीकलाध्ययनकौशलमेकदैव
न स्यादतः किमपि नो भवती विवेद।
भूयस्ततः सखि विलासगुरोः सकाशा-
द्यत्नादधीष्व यदि विस्मृतमासि भूष्णुः ॥ २२३ ॥

हासं हासं हसित्वा हसित्वा। नये नीतौ नेयं नेतुमर्हम्, एतत्त्वद्वचनं न्याय्यमित्यर्थः। नो विवेद नाज्ञासीत्। भूष्णुर्भविष्णी ॥ २२३ ॥

अथ सौभाग्यसाराधिका सा राधिका सरसतरं सतरङ्गरङ्गवतीव किंचिदुवाच।

मातः परं सुमुखि यामि तदीयपार्श्वे
दूरादसौ नयनवर्त्मनिवर्तनीयः।
अध्येतु नाम भवती तत एव तत् ते
पाण्डित्यमेव मनसो रसदं मम स्यात् ॥ २२४ ॥

सतरङ्गरङ्गवतीवेति, श्यामापरिहाससुधांशूदयमुपलभ्य तस्या रङ्गसिन्धुरुच्छलित इवेत्यर्थः। असौ नयनवर्त्मनः सकाशाद्विवर्तनीयः। ततो विलासगुरोः सकाशात्। तत् तस्मात् भवत्येव अध्येतु स्मरतु, पुनः पुनरावृत्त्या अभ्यस्यत्वित्यर्थः। "इक् स्मरणे" इत्यस्य रूपम्। ततश्च विस्मरणशीलाया मम तेनापि पुनरपि तादवस्थ्यमेव भविष्यति, अतो भवत्या मेधाविन्या एव तत्राधिकार इति भावः। ततश्च ते तवैव पाण्डित्यं मम मनसो रसदं स्यात्, सौहार्दादैक्यादेवेति भावः ॥ २२४ ॥

Digitized by Google

तदा तदाश्चर्याणायाः सपरिहसितहसितसितकिरणज्योत्स्नास्नपिते दशनवाससि ललिता ललितातरं निजगाद । उचितं चितं हि तत्रभवत्या भवत्या रसपाठोपदेशेन ॥ २२५ ॥

तत् प्रतिवचनम्· आचक्षाणायाः कथयन्त्यास्तस्याः सपरिहसितं परिहाससहितं यद्धसितं हास्यं तदेव सितकिरणश्चन्द्रस्तस्य ज्योत्स्नया स्नपिते सति दशनवाससि· अधरे, ललिता निजगाद, रसाधां प्रतीत्यर्थः । उचितं चितं, योग्यमेव प्रस्तुतमित्यर्थः ॥ २२५ ॥

किंतु ।

शिष्यायितं प्रथममत्र यया तदीय-
भङ्गे प्रयातु पठितुं कथमन्यशिष्या ।
तेनानया सह कृशोदरि दीर्घमेव-
मध्येतुमर्हसि विलासगुरुं तमेत्य ॥ २२६ ॥

तदीयभङ्गे तत्कर्तृके भङ्गे सति, स्वाध्ययनस्येत्यर्थः । अन्या चासौ शिष्या चेत्यन्यशिष्या । अनया श्यामया ॥ २२६ ॥

इत्येतस्मिन्नेव कालेऽकालेरितां वात्यामिवागतां कटूकृताननां ननान्दरमभिवीक्ष्य सर्वासु चकितासु तासु प्रतिभाप्रतिभासमानेव ललितैव शिष्यायितं प्रथममित्यादिपादत्रयानन्तरम्, अनन्तरभसाद्, एवमध्येतुमर्हसि विधाय गुरूपसत्तिमिति यदा पपाठ ॥ २२७ ॥

न विद्यते· अन्तो नाशो यस्य तथा भूतात् रभसात्, भयेनाप्य-नष्टपाठस्वरवेगादित्यर्थः ॥ २२७ ॥

पाठस्वरमुपश्रुत्य सा मुखरा मुखरागमासामालोक्य वितर्कयन्ती निजगाद ।

ललिते किं शिक्षयसि ॥ २२८ ॥

मुखरा· अतितीक्ष्णस्वभावा । मुखरागं मुखासक्तिम् ॥ २२८ ॥

सा ह गुहूपसन्निम् ।

साप्याह । शिष्यायितं प्रथममेवेत्यादेः कोऽर्थः ।

साह । प्रथममनया गुरुजनेन यदुक्तं तद्गृहीत्वैव भङ्गो दत्तः. एकाकिसाध्यं न तदित्यनया सार्धं तदध्येतुमर्हसीत्युक्तम् ॥ २२६ ॥

गुरुजनेन हितोपदेष्टृश्वश्र्वादिपुरन्ध्रीजनेन ॥ २२९ ॥

साप्यथाह, ललिते कथमधुना परलोकालोकाय समुद्युक्तासि ।

श्यामाह, आबाल्यमेवैषा परलोकाय समुद्युक्ता च, तत् कथमधुनेत्युच्यते ॥ २३० ॥

परलोकालोकाय परपुरुषदर्शनाय । परलोकाय सद्धर्मप्राप्यस्वर्गादिलोकाय । समुत् सानन्दा । युक्ता विवेकवती ॥ २३० ॥

साह, श्यामे न जानासि श्यामानुरागिण्यः खल्वेताः ।

श्यामाह, अयि सुप्रसिद्धमेवैतदाबाल्यमेवैतासां मय्यनुरागित्वम् ॥ २३१ ॥

मय्यनुरागित्वमिति, श्यामायां मयि अनुरागिण्य इत्येव तच्छब्दव्युत्पत्तिर्बोधिता ॥ २३१ ॥

साह, श्यामे कृष्णपक्षपातिकलाः सकलाः सर्वदैताः ॥ २३२ ॥

कृष्णस्य पक्षपातिनी कला शिल्पं यासां ताः ॥ २३२ ॥

श्यामाह, नाप्येतत्, नहि कृष्णपक्षपातिन्यः कलाः सर्वदा चित्रभास्वराः स्वरागता इव शोभन्ते ॥ २३३ ॥

कृष्णपक्षो यः शुक्लपक्षेतरस्तत्पातिन्यः कलाश्चन्द्रसंबन्धिन्य इति कृष्णपक्षपातिकलापदस्यार्थः, सर्वदा चित्रभास्वराः चित्रकान्तिमय्य इति सर्वदैता इत्यस्यार्थः, "चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे" इत्यमरः । स्वरेभ्यः षड्जादिभ्य आगताः कला मधुरास्फुटध्वनय इव, ते यथा सर्वदा चित्रभास्वराः शोभन्ते तथा नेति ॥ २३३ ॥

साह, श्यामाह कृष्णवर्त्मगाः किलैताः ।

श्यामाह, क्व तावदेष कृष्णवर्त्मा, स तु कालियदमनरजन्यामेव प्रबुद्ध आसीत् ॥ २३४ ॥

कृष्णवर्त्मगाः कृष्णस्य वर्त्मगामिन्यः, तस्मै स्वसंभोगदानार्थमिति भावः। कृष्णवर्त्मा वह्निस्तत्र गमनम्, अत्र कथमासां ब्रवीषीति भावः॥ २३४ ॥

साह, श्यामे मां परीक्षसे, पीताम्बरानुरागिण्यो ह्येताः ।

श्यामाह, मा हठकारिण्येवं वादीः, प्रत्यक्षविरुद्धमेतत्, नीलारुणाम्बरप्रियाः खल्विमाः ।

साह,श्यामे व्रजराजतनयश्रद्धाबद्धा बहुधैवैताः प्रतीयन्ताम् ।

श्यामाह, अत्यलीकमेतत्, व्रजस्थराजतस्य नये कथममूः श्रद्धालवः ॥ २३५ ॥

व्रजराजस्य तनये कृष्णे रमणार्थं या श्रद्धा तया बद्धाः । व्रजस्येति, व्रजस्य राजतं रजतस्य विकारः समूहो वा तस्य नये ग्रहणे ॥ २३५

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य पञ्चमः परिच्छेदः ॥

१० ॥ पदमेव मिश्रितभावानां समुदायं निबध्नाति, जातीश्च रचयति ॥—पदमेव तानि स्वरूपाण्युत्पादयति तेषु च स्वीयत्वमप्युत्पादयतीति विचारावसरे विशेषजातीनां स्वरूपाणां, साधारणनाम्नां च परस्परं प्रत्यासन्नः संबन्धो ऽस्ति, विशेषतश्च मिश्रभावविषय इति स्फुटीभविष्यति । यतो मिश्रविज्ञानस्य विश्लिष्टावयवानां संबन्धस्यात्मरचिततया यदि किमपि तेषामवयवानां विश्लेषस्य वारकं सह व्यवस्थापकं च न स्यात् तर्हि नैसर्गिकोत्पत्तिरहितो ऽयं संबन्धः पुनर्विनश्येत । अत

आत्मनस्तादृशविज्ञानसमुदायत्वनासामर्थ्येऽपि पदमेव तेषां दृढसंश्रयत्व-कमस्ति । तथा हि । ज्योतिष्टोमशब्दः कथमसंख्यानि नानाविधानि विज्ञा-नानि संघीकरोति, बोधयति चास्मांस्तान्येकविशेषजातिरूपेण । यदि तावत्क्रियाकलापबोधकं ज्योतिष्टोमपदं नाभविष्यत्तर्हि निःसंदेहमस्माभि-स्तत्क्रियाकलापबोधनाय बहूनि पदानि प्रयोक्तव्यानि स्युः । एवं सति, मन्ये तादृशार्थबोधाय प्रयुक्तं ज्योतिष्टोमपदमेव तावतां भिन्नानेकक्रिया-रूपावयवानामेकमिश्रितविज्ञानरूपेण संग्राहकमस्ति । अन्यथा ज्योति-ष्टोमघटकानेकक्रियाकलापस्यैकपदार्थरूपेण चिन्तनमेवासंभवि भवेत् । यथा हि लोके सम्यक्क्रियमाणाभिनवनाटकाद्यभिनयस्यैकसंज्ञाशब्देनै-कमिश्रितविज्ञानात्मकतया पूर्वमसंगृहीतस्य । अतो मिश्रितभावविषये तेषां स्वरूपसंपत्तये आवश्यक्यैकरूपता क्रियत्यात्माश्रिता, तादृशविज्ञा-नैक्यस्य सातत्यं स्थिरत्वं च तदर्थे प्रयुज्यमाने पदे च कियदाश्रितमिति तु स्वरूपविशेषजात्यैर्नैसर्गिकसद्वस्तुरूपतां व्यवस्थापयन्त एव विचारयन्तु ॥

११ ॥ अथोक्तसिद्धान्तस्यैवोपोद्बलकं किंचिदुच्यते ॥—मिश्रितभावा-नधिकृत्य भाषमाणा मनुष्या विशेषजातिविषये ऽपरं न किमपि चिन्तयन्ति कल्पयन्ति वा किं तु तएव, ये नाम्ना निर्दिश्यन्ते इत्येवोपलभ्यते । तास-केवलं नामदानाय मनुष्यैः कल्पितत्वादेव पदसंबन्धमन्तरा विश्लिष्टाने-कविज्ञानानामेकविज्ञानरूपेण मनुष्यकल्पितस्य समुदायस्य लिङ्गभूता कापि विशेषजातिरस्तीत्यस्याकल्पनीयत्वात् । तेन च नाम्ना संबन्धं विना ज्ञातुमशक्यानां तदवयवानां स्थिरं संबन्धं साधयन्ति यावद्वात्मा-तादृशावच्छेदकविज्ञानयुक्तः सन् वस्तुतस्तद्विमर्शाद्विरमति । परं तु यत्किं चिज्जातिविशेषं प्रति येन तादृशमिश्रविज्ञानावयवा नियतस्थिरै-क्यविशिष्टा भवन्ति, तादृशनामदानोत्तरं यत्किंचिद्विशेषजातेः स्वरूपं व्यवस्थाप्यते, पूर्णता च तस्या विचार्यते । अन्यथा यत्किं चिदवच्छेदक-धर्मद्वारा यावत्तानि साधारणानि न संपाद्यन्ते तावत् तन्मिश्रितविज्ञा-नानां स्मृतिर्नैकमप्यर्थं साधयति । किं च तेषां साधारणत्वस्यापि किं

फलं, यावत् परस्पराभिप्रायाविष्करणरूपभाषणसौकर्याय तेष्वर्थेषु जातिपदानि न प्रयुज्यन्ते। इत्थं च यद्यपि परशुना ऽसिना वा मनुष्यहननं पृथग्विशेषजातिरूपेण न विचार्यते, तथापि शरीरे छुरिकाग्रस्य प्रवेशमवधार्य कुत्र चिच्छुरिकाग्रप्रवेशेन घातो ऽपि विभिन्नविशेषजातिरूपेण पृथग् नाम्ना च व्यवह्रियते। यथा इाङ्गलभाषायां स "स्त्याबिङ्" इति पदेन। परं तु यत्र देशे छुरिकाग्रघातस्य शस्त्रावयवान्तरहननाद्विवेचनाय पदविशेषो नोपलभ्यते तत्रायं न पृथग्विशेषजातिपुरस्कारेण व्यवह्रियते। साकारपदार्थविषये तु यद्यपि मन एव नामप्रतिपाद्यं स्वरूपं रचयति, तथापि तेन स्वरूपेण समुदितानि तानि विज्ञानानि मनोव्यापारं विनापि स्वभावत एवैकीभूतानीति कल्पनात् तादृशमिश्रितविज्ञानस्य नाम्ना व्यवहारे तद्व्यवच्छेदनव्यापारे वा मनसा ऽक्रियमाणे ऽपि तानि भिन्ननामानीव विचार्यन्ते ॥

१२ ॥ मिश्रभावानां मूलकारणमात्मैव, स एव च तान् बुद्धिकार्यरूपेण प्रदर्शयतीत्यतोऽतिरिक्तं न किमपि विचारयामः ॥—मिश्रितभावविशेषजातिस्वरूपमधिकृत्य यदेतावत्पर्यन्तं प्रत्यपादि तस्मादप्येतदेव निःसरति यत् तानि स्वरूपाणि सन्ति बुद्धिपरिकल्पितानि न पुनर्नैसर्गिकाणि। तेषां विज्ञानानां नामान्यास्मसु परामर्शान् जनयन्तीत्यतो ऽतिरिक्तं न किमप्यस्माभिरनुभूयत इत्यनुभवो ऽप्यमुमेवार्थमुपोद्बलयति। वस्तुतस्तु शक्यकल्पनं न कमपि विद्यमानपदार्थं स्वात्मनि कल्पयामो ऽपि तु तद्धर्मवद्धवच्छेदकविज्ञानैरेवास्माकं परामर्शाः परिच्छिद्यन्ते इत्येव, न ततः परं किमपि। यथा हि, यदा लोहाश्वादीनधिकृत्योच्यते तदा तेषां विशेषविज्ञानानि केवलमात्मगतत्वेनैव न विचार्यन्ते ऽपि तु तादृशमूलप्रकृतिमूर्तिरूपेषु वस्तुष्वपि। परं तु मिश्रभावेषु प्रायो भूयःसु मनुष्यादिषु तदीयप्रतिरूपकाण्यात्मगतत्वेन विचार्य तत्तज्जीवविशेषविवेचनाय पृथक् पृथग् नामान्यपि प्रयुञ्ज्मः। अत एव मिश्रितभावविशेषजातीनां स्वरूपाणि बौद्धानि विज्ञानानीति विशेषसंज्ञया व्यवह्रियन्ते।

१३ ॥ तेषां तथा मिश्रितत्वे तेषां प्रतिरूपकानेरपेक्ष्येण बुद्ध्या परिकल्पितत्वमेव हेतुः ॥—मिश्रभावानां मिश्रितविज्ञानानि प्रायशो नैसर्गिक-

द्रव्याण्यपेक्ष्याधिकं समस्तानि समस्तसमस्तानि च सन्तीत्यस्य कारणम-स्मादेवाभिहितं भवति । परात्मनि बोधनीयानां विज्ञानानां लाघवेना-विष्करणस्य सौष्ठवाय केवलं स्वीयार्थसिद्धये बुद्धिपरिकल्पितत्वादेव येषां नैसर्गिकः संबन्धो नास्ति तानि वस्तून्येकावच्छेदकविज्ञानरूपेण बहुशः संघीभवन्ति । एवं प्रकारेण नानाविधानि समस्तानि समस्तसमस्तानि च विज्ञानानि सहैवैकपदेन बोध्यन्ते । इत्थं च वाग्यान इति पदं कथं नानाविधानां पुरुषाणां, व्यवहाराणां, दीपिकानां, क्रमाणां, गतीनां, शब्दानां च बहूनि, एकैकपदेन बोधनाय स्वात्मनि स्वैरं सहैवावधारितानि विज्ञानानि मिश्रितैकविज्ञानरूपेण बोधयति । परं तु द्रव्यजातीनां मिश्रितविज्ञानानि प्रायः स्वरूपैर्वामिश्रितविज्ञानैर्घटितानि सन्ति । प्राणिविशेषजातिषु च शब्दाकारौ द्वावेव प्रायः शाब्दस्वरूपघटकौ स्तः ॥

१४ ॥ मिश्रितभावनामानि सर्वदा स्वीयवास्तविकस्वरूपबोधायैव प्रयुज्यन्ते । एतावता पूर्वोक्तप्रबन्धेनेदमपरमपि विचारणीयं यद् मिश्रितभाववाचकपदानां नियतार्थपरत्वे सति तानि विशेषजातीनां वास्तविकस्वरूपाणां सुबोधायैव प्रयुज्यन्ते । अवच्छेदकविज्ञानानामात्मरचिततया नैसर्गिकवस्तुसंबद्धतया च केवलमात्मरचितमिश्रविज्ञानमपेक्ष्य किंचिदधिकमपि तत्पदबोध्यमस्तीति शङ्कापि नोदेति । तच्च स्वकल्पितं तत्पदबोध्यसर्वस्वरूपं विज्ञानमेव सर्वे विशेषजातिगुणा आश्रयन्ति तस्मादेव च ते सर्वे उद्भवन्ति । एवं रीत्या वार्थानि शाब्दानि च स्वरूपाणि परस्परमभिन्नानि सन्ति । अयं च विषयो यस्कं चित्साधारणज्ञानसंबद्ध इति पुरतो वक्ष्यते ॥

१५ ॥ कथं स्वबोध्यविज्ञानावगमात्पूर्वमपि प्रायस्तद्वाचकाः शब्दा उपलभ्यन्ते ॥—प्रायः स्वबोध्यविज्ञानानां पूर्णज्ञानात्पूर्वमेव तद्वाचकाः शब्दाः कस्मात्क्रियन्त इत्यस्य कारणमस्मादवगम्यते । प्रायशो विज्ञातविज्ञानानां तद्वाचकपदातिरिक्तायाः कस्या अपि विशेषजातेरनुपलम्भेन तस्या विशेषजातेस्तदीयस्वरूपस्य चात्मकल्पितस्वैरिकावच्छेदकमिश्रवि-

ज्ञानरूपतया च तादृशविज्ञानानां रचनात्पूर्वमपि तद्वाचकपदज्ञानं सुकरमावश्यकमप्यस्ति। यदि मनुष्यात्मनि भूयांसि मिश्रितावच्छेदकविज्ञानानि पर्याप्तानि न स्युस्तर्हि परेषां तत्तद्विज्ञानवाचकशब्दज्ञानाभावात्तानि विज्ञानानि सर्वथाऽकिंचित्कराणि (दरिद्राणां मनोरथा इव) स्वल्पेनैव कालेन पुनर्विलुप्तानि भवेयुः। यथैव भाषाया आरम्भे यत्किंचिद्विज्ञानं प्रति नामदानात्पूर्वं तादृशविज्ञानमात्मन्यवश्यमवधारितमासीत्तथैव चेदानीमपि नामप्रयोगात्पूर्वमेव तादृशं विज्ञानमवधार्यते, यत्र मनुष्यो नवीनं मिश्रितं विज्ञानं प्रकल्प्य तद्बोधाय नवीननामप्रयोगेणापूर्वं शब्दं प्रयुङ्क्ते। परं तु मनुष्या यानि विज्ञानानि भूयो भूयोऽवधार्य परान् प्रति प्रयच्छन्ति, तेषां पूर्वरचितभाषाभिः सार्वत्रिकव्यवहारे नेदमावश्यकम्। ननु मा भूदियमीदृशस्थले सार्वजनिकी रीतिस्तथापि बालास्तत्तत्पदवाच्यविज्ञानावधारणात्पूर्वमेव मिश्रितभावानां नामान्यभ्यस्यन्ति। न हि सहस्राणां मध्ये एकोऽपि यशोमहत्त्वाकाङ्क्षापदयोः परिचयात्पूर्वं यशसो महत्त्वाकाङ्क्षाया वाऽवच्छेदकं विज्ञानं रचयतीति चेत्सत्यम्। अस्तु मिश्रितविज्ञानेषु तथा परं तु शुद्धविज्ञानेषु द्रव्येषु च पुनरेतद्विपरीतमेवास्तीत्यनुमन्ये। तादृशविज्ञानानां वस्तुतः सद्भावात् सर्वत्र लोके एकरूपतया च तत्र नाम्नां विज्ञानपूर्वकत्वमेवोपलभ्यते॥

१६॥ एतावद्विस्तरेणैतद्विषयपरिशोधनस्य कारणमिदानीं निरूप्यते॥—अत्र मिश्रितभावानां विषये यदुक्तमेतावता विस्तरेण, किंचिदेव विकृतं तदेव संबन्धविषयेऽपि योजयितुं शक्यत इत्यस्य सर्वैरपि जनैः स्वयमेव ज्ञातुं शक्यतया विस्तरेण तत्कारणवर्णनक्लेशोऽत्र मया परित्यज्यते। विशेषतश्चैतोऽपि हेतोर्यदत्र तृतीयेऽध्याये शब्दानधिकृत्याभाणि तदेव केचनैवंविधे लघुनि विषयेऽनपेक्षितं बहुतरं मंस्येरन्। यद्यप्ययं विषयः संक्षेपेणापि प्रतिपादयितुं शक्यते, तथापि अस्मिंस्तर्कसागरे आतलं निमज्ज्योन्मज्ज्य चान्विष्येत चेत् कश्चनैवंविधोऽचिन्तितपूर्वो महोपयोगिविषय उपलप्स्येत, येन सार्वजनिकभ्रमपरिशो-

धनविमुखा अपि जनास्तथाविधभ्रमविषयं परिशोधयेयुरिति स्वीयान् पाठान् प्रति बोधयितुं मदीयोऽयं किंचिदुपासङ्गकमभिनवतर्कमधिकृत्य विस्तृतवर्णनप्रयासः । यदि चायं शब्दस्वरूपविषयक उद्योगः, शब्दानां विसंकुलानवहितव्यवहारेण तत्तदर्थेषु प्रयोगेण च ज्ञानानां वादानां संलापानां च सर्वे प्रकाराः कथं संकीर्णा विपर्यस्ताश्च सन्तीति च विचार्येत तर्हि विस्तरशो वर्णनस्य महार्हतामवधार्य, मन्ये, ममैतद्विस्तृतवर्णनं क्षम्येत । अस्मिन्विषये मनुष्याणां दोषा न केवलं यथार्थज्ञानप्रतिबन्धका अपि तु लोकास्तान् गुणत्वेन विचार्य तद्वत्तया ऽऽत्मानं ख्यापयन्ति । यदि मनुष्याः सर्वजनसुपरिचितैः शीघ्रं स्वार्थोपस्थापकैः शब्दैः कानि विज्ञानानि बोध्यन्ते कानि च नेति प्रचरितशब्दव्यवस्थामतिक्रम्य विचारयेयुस्तर्हि बहुजनानुमतेष्वपि तेषु मतेषु तर्का याथार्थ्यं च प्रायोऽत्यन्तमल्पतरे स्त इति तैर्ज्ञातुं शक्यते एव । अस्य दोषस्य भाषान्तरेऽपि भूय उपलभ्यमानत्वादहं यदि यथोचितार्थबोधका उत्तमशब्दा अपि स्वीयेषु लेखेषु भाषणेषु वा ऽनियतार्थकत्वेनानर्थकत्वेन वा कदाचित्प्रयुक्ताः स्युरित्याशङ्काकरणाय तत्तद्भाषीयं शब्दप्रयोगमधिकृत्य विमर्शपूर्वकं मनुष्यान् प्रति साधुहेतुवादप्रकारान् बोधयेयं तर्हि मन्ये तत्त्वस्य शास्त्रस्य चोपबर्हणेन जनानानन्दयेयम् । अत एव विवेकशालिभिः पुरुषैः स्वयमप्येतद्व्यापारोद्यतैर्भाव्यमथवा परेण क्रियमाणायां स्वपरीक्षायां विमतैर्न भाव्यम् । एतदेव मनसि निधायैनं विषयमधिकृत्य वक्ष्यमाणग्रन्थेन विस्तरशो वर्णयिष्यामीत्यलम् ॥

॥ इति पञ्चमः परिच्छेदः ॥

॥ रामानुजदर्शनम् ॥

॥ तत्त्वत्रयचुलुकम् ॥

॥ यतिपतिमतदीपिका ॥

प्रमाणनिरूपणानन्तरं प्रमेयं निरूप्यते ॥

प्रकर्षेण मेयं प्रमेयम् तच्च द्विविधं द्रव्याद्रव्यभेदात् द्रव्यम् उपादानम् अवस्थाश्रयमुपादानम् ॥

ननु द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्था इति मतान्तरस्थैः षोढापरिगणनात्कथं द्रव्याद्रव्यभेदेन द्वेधा समर्थनमिति चेदुच्यते उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात्कर्म पञ्चधावस्थितमिति कल्पने गौरवात् चलनात्मकं कर्मेत्येकधैवोपपत्तेः तस्यापि संयोगसमवायैवोपपत्तेः ॥

संस्थानमेव जातिरिति संस्थानातिरेकिसामान्यानङ्गीकारात् ॥

समवाये समवायान्तराङ्गीकारेऽनवस्थानात् तस्यापि संयुक्तविशेषणतयैवोपपत्तेः जीवेश्वरयोरणुत्वविभुत्वादिविभाजकधर्मसत्त्वेन विशेष इति किंचित्पदार्थान्तराङ्गीकारे गौरवादतः कर्मसामान्यविशेषसमवायानां पृथग्द्रव्यत्वेनानङ्गीकाराच्च द्रव्यमद्रव्यमिति द्विधा विभाग उपपद्यते एतेनाभावः सप्तमःपदार्थ इत्यपि निरस्तम् अभावस्यभावान्तररूपत्वात् प्रागभावो नाम पूर्वावस्था परम्परा प्रध्वंसाभावो नाम उत्तरावस्था परम्परा अत्यन्तान्योन्याभावौ तु धर्म्यन्तरस्वरूपावेव एतस्य प्रत्यक्षेन्तर्भावः पूर्वमुक्तः उपादानं द्रव्यमित्युक्तं गुणाश्रयो वा द्रव्यमिति सामान्यलक्षणं संभवति ॥

तानि च द्रव्याणि षट्प्रकृतिकालशुद्धसत्त्वधर्मभूतज्ञानजीवेश्वरभेदात् ॥

तत्र जडाजडरूपयोः विभक्तयोर्मध्ये जडलक्षणमुच्यते अमिश्रसत्त्वरहितं जडमिति तद् द्विविधं प्रकृतिकालभेदात् तत्र सत्त्वरजस्तमोरूपगुणाश्रया प्रकृतिः सा नित्या अक्षरा अविद्या मायाशब्दवाच्या च तस्याः भगवत्संकल्पाधीनगुणवैषम्यात्कार्योन्मुखावस्था अव्यक्तशब्देनोच्यते तस्मान्महानुत्पद्यते स महान्सात्त्विकराजसतामसभेदात् त्रिधावस्थितः महतोऽहंकार उत्पद्यते सोपि सात्त्विकाहंकारो राजसाहंकारस्तामसाहंकारश्चेति त्रिविधो मतः एतेषां त्रयाणां वैकारिकस्तैजसो भूतादिरिति नामान्तराण्यपि संभवन्ति । तेषु वैकारिक इति प्रसिद्धाद्राजसाहंकारसहकृतात्सात्त्विकाहंकारादेकादशेन्द्रियाणि जायन्ते ॥

सात्त्विकाहंकारोपादानकं द्रव्यमिन्द्रियम् । इन्द्रियं द्विविधं ज्ञानेन्द्रियं कर्मेन्द्रियं चेति ज्ञानप्रसरणशक्तमिन्द्रियं ज्ञानेन्द्रियं तत्षोढा मनः श्रोत्रचक्षुर्घ्राणरसनात्वग्भेदात् ॥

स्मृत्यादिकरणमिन्द्रियं मनः तच्च हृदयदेशवृत्ति बुद्ध्यहंकारचित्तादिशब्दवाच्यं बन्धमोक्षहेतुभूतं च शब्दादिपञ्चके शब्दमात्रग्रहणशक्तमिन्द्रियं श्रोत्रं तन्मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नप्रदेशवृत्ति ॥ द्विजिह्वानां नयनवृत्ति । एवं रूपमात्रग्रहणशक्तमिन्द्रियं चक्षुः तत्सर्वेषां नयनवृत्ति। गन्धमात्रग्रहणशक्तमिन्द्रियं घ्राणं नासाग्रवृत्ति ॥ रसमात्रग्रहणशक्तमिन्द्रियं रसनेन्द्रियं जिह्वाग्रवृत्ति । स्पर्शमात्रग्रहणशक्तमिन्द्रियं त्वगिन्द्रियं सर्वशरीरवृत्ति। नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात्स्पर्शानुपलम्भः। श्रोत्रादीन्द्रियाणां भौतिकत्वप्रतिपादनं भूताप्यायितृत्वेनौपचारिकम् । एतेषां विषयसंबन्धः क्वचित्संयोगः क्वचित्संयुक्ताश्रयणमिति वृद्धसंप्रदायः उच्चारणादिष्वन्यतमक्रियाशक्तत्वं कर्मेन्द्रियसामान्यलक्षणम् । तच्च वाक्पाणिपादपायूपस्थभेदात् पञ्चधावस्थितम् । वर्णोच्चारणकारणमिन्द्रियं वाक् तच्च हृत्कण्ठजिह्वामूलतालुदन्तोष्ठनासामूर्द्धरूपस्थानाष्टकवृत्ति मृगादिषु तदृष्टिविरहात्तदभावः शिल्पादिकारणमिन्द्रियं पाणिः सच मनुष्यादीनामङ्गुल्यादिवृत्तिः वारणादीनां नासावृत्तिः । संचरणमिन्द्रियं पादः सच मनुष्यादीनां चरणवृत्तिः भुजङ्गपतङ्गादीनामुरःपक्षादिवृत्तिः मलादित्यागकारणमिन्द्रियं पायुः सच तत्तदवयववृत्तिः आनन्दविशेषकारणमिन्द्रियमुपस्थः सच मेहनादिवृत्तिः एतानीन्द्रियाण्यणूनि परकायप्रवेशे लोकान्तरगमनादिषु च जीवेन सह गमनमिन्द्रियाणां मुक्तिदशायाम्, प्राप्राकृतदेशगमनासंभवादिहैव यावत्प्रलयं स्थितिः करणाधुरैरन्यः परिग्रहो वा कर्मेन्द्रियाणां शरीरनाशान्नाश इति पक्षस्तु भाष्या*विरोधेन नेयः एतेन पुरुषेन्द्रियं स्त्रीन्द्रियम् एकेन्द्रियवादः त्वगिन्द्रियैकत्वस्वीकारः इत्यादि विमतपक्षा निरस्ताः ॥

राजसाहंकारसहकृताद्भूतादिसंज्ञकतामसाहंकाराच्छब्दादिपञ्चतन्मात्राणि आकाशादिपञ्चमहाभूतानि चोत्पद्यन्ते भूतानामव्यवहितसूक्ष्मावस्थाविशिष्टं द्रव्यं तन्मात्रम् तदेव भूतोपादनं विशिष्टशब्दादिविष-

* रामानुजाचार्यप्रणीतब्रह्मसूत्रभाष्यम् ।

याधिकरणं भूततन्मात्राणि शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति पञ्चभूतानि च यथा आकाशवायुतेजोऽप्पृथिवीभेदात् तत्र तामसाहंकाराकाशयोर्मध्यमावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रं क्षीरदध्नोरन्तराले कलिलपरिणामवत्तस्मादाकाशो जायते अस्पर्शवत्त्वे सति विशिष्टशब्दाधारत्वं श्रोत्राश्रयायित्वं च आकाशलक्षणं ॥ सच शब्दमात्रगुणकः अवकाशहेतुः नीलं नभइति प्रतीतेरूपवांश्च एतेनाकाशस्य अजन्यत्वनिरासः सूर्य्यपरिस्पन्दादिभिराकाशस्यैव प्राच्यादिव्यवहारोपपत्तो दिगिति न पृथग् द्रव्यकल्पनं दिक्सृष्टिस्तु अन्तरिक्षादिसृष्टिवदुपपद्यते आकाशःस्पर्शतन्मात्रम् आकाशवाय्वोर्मध्यमावस्थाविशिष्टद्रव्यं स्पर्शतन्मात्रं तस्माद्वायुः विशिष्टस्पर्शवत्त्वे सति रूपशून्यत्वम् अस्मदादिस्पर्शनेकेन्द्रियग्राह्यद्रव्यत्वम् अनुष्णाशीतविशिष्टस्पर्शवत्त्वे सति गन्धशून्यत्वमित्यादिकं वायोर्लक्षणं तस्मिन्नानासलिलातपकुसुमाद्यवयवयोगात् शीतोष्णसौरभादिप्रतीतिः सच त्वगिन्द्रियाप्यायकत्वेन उपकरोति तस्य शब्दस्पर्शौ गुणौ तत्र शरीरधारणादिहेतुर्वायुविशेषः प्राणादिसंज्ञकः पञ्चप्रकारः प्राणापानव्यानोदानसमानभेदात् हृदि प्राणः गुदे पानः सर्वशरीरगो व्यानः कण्ठे उदानः नाभिदेशे समान इति जङ्गमेष्विव स्थावरेषु प्राणसंबन्धस्तुल्यएव सच स्पार्शनप्रत्यक्षः एतेनानुमेयवादनिरासः वायुतेजसोर्मध्यमावस्थाविशिष्टद्रव्यं रूपतन्मात्रं तस्मात्तेजः उष्णस्पर्शवत्त्वभास्वररूपवत्त्वादिकं तु तेजसो लक्षणं तस्य बहिः पचनादिहेतुत्वमग्निसूर्य्यात्मना अन्तर्वैश्वानरसंज्ञकजाठराग्निरूपेण दिवाभीतादिव्यतिरिक्तानां चाक्षुषज्ञाने आलोकादिरूपेण सहकारी भवति तच्चतुर्द्धा भौमदिव्यौदर्य्याकरजभेदात् तत्र पार्थिवमात्रेन्धनं तेजोभौमं तद्दीपादिजलमात्रेन्धनं दिव्यं सूर्य्यादिपार्थिवजलेन्धनमौदर्यं तज्जाठरं निरिन्धनं तेज आकरजं स्वर्णादिस्वर्णस्य द्रव्यान्तरसंसर्गादुष्णस्पर्शाभावः पुनः सामान्येन प्रभा प्रभावांश्चेति विभक्तमावरणसदसद्भावाधीनसंकोचविकाशः प्रसरिततेजोविशेषः प्रभा साच प्रभावद्भिस्सहोत्पद्यते सह नश्यति द्रव्यरूपा गुणभूता सावयवा च अनेन प्रभायाः केवलगुणत्वमतनिरासः प्रभाविशिष्टं तेजः प्रभावत्तच्च-

सुविधं प्रतिपादितं तत्तेजः शब्दस्पर्शरूपगुणवच्च तेजस्सलिलयोर्मध्यमा-
वस्थाविशिष्टं द्रव्यं रसतन्मात्रं तस्मादापः । शीतस्पर्शवत्त्वे निर्गन्धत्वे
सति विशिष्टरसवत्त्वं इत्यादि अपांलक्षणं तासां शुक्लमधुरशीतैकस्वभा-
वानाम् आश्रयादिसंसर्गभेदाद्रूपरसस्पर्शवैचित्र्यारोपः ताः समुद्रसरिद्ह्रदा-
दिरूपेण बहुप्रकाराः शब्दस्पर्शरूपरसवत्यश्च सेचनपिण्डीकरणादिहेतवः
अप्पृथिव्योर्मध्यमावस्थाविशिष्टं द्रव्यं गंधतन्मात्रं तस्मात्पृथिवीविशि-
ष्टगन्धवत्त्वं रसवत्त्वे सति विशिष्टस्पर्शवत्त्वमित्यादि पृथिवीलक्षणं सा
सुरभिर्मधुरा कृष्णादिरूपा च अनुष्णाशीतस्पर्शवती पाकजभेदात्तु विचित्र-
वर्णा विचित्ररसा च अस्याश्च मनःप्राणाप्यायकत्वेन उपकारकत्वं मृत्पा-
षाणाचौषधादिबहुप्रकारवती शब्दस्पर्शरूपरसगन्धगुणकाधारणहेतुश्च
तमसः पृथिव्यामन्तर्भावः तद्गुणत्वात्तदवस्थान्तरत्वाद्वा अतएव आलोका-
भावमात्रं द्रव्यान्तरं वा इत्यादिपक्षा निरस्ताः भूतेषु सर्वत्र पञ्चीकरण-
प्रक्रियया शब्दादीनां गुणानामुपलम्भः पञ्चीकरणप्रक्रिया तु भगवान्
भूतानि सृष्ट्वा एकैकमेव भूतं द्विधाकृत्य द्वयोर्भागयोः स्वभागमेकं निधा-
यभागान्तरं चतुर्धा कृत्य तान् चतुर्भागान्भूतान्तरेषु चतुर्षु योजयति एवं
सर्वेषु भूतेषु क्रियमाणेषु एकैकस्य भूतस्याऽर्धे स्वभागोऽर्द्धान्तरं चतुर्णां
भूतानां भागसमुच्चयइति भवति यथाच स्वभागस्य भूयस्त्वात्परभागस्या-
ल्पीयस्त्वाच्च पृथिव्यादिव्यपदेशाः वेदे त्रिवृत्करणोपदेशस्तु पञ्चीकरण-
स्याप्युपलक्षणं भूतैः साकं महदहंकारौ मिलित्वा सप्तीकरणमित्यप्याहुः
एतेषु चतुर्विंशतिसंख्याकेषु पञ्चभूतानि प्रकृतिमहदहंकाराश्च शरीरोपा-
दानानि एकादशेन्द्रियाणि प्रत्येकमसंख्यातानि प्रतिपुरुषं भिन्नानि आभ-
रणार्पितरत्नानीव शरीरमाक्रम्य तिष्ठंति ॥

शरीरं नाम चेतनं प्रत्याधेयत्वविधेयत्वशेषत्वनियमैरपृथक्सिद्धो
द्रव्यविशेषः इत्येकं लक्षणं नियमेन यदाधेयं नियमेन यद्विधेयं नियमेन
यच्छेषमिति लक्षणत्रयं वा योऽन्यं ईश्वरतज्ज्ञानव्यतिरिक्तं द्रव्यं शरीरमिति
वा तटस्थलक्षणम् एतेन चेष्टाश्रयः शरीरम् । इन्द्रियाश्रयः शरीरं ॥ भोगा-
यतनं शरीरं शिरस्पाण्यपादादिमयं शरीरम् इत्यादीनि परोक्तानि शरी-

रलक्षणानि निरस्तानि शरीरं द्विविधं नित्यमनित्यमिति तत्र नित्यं त्रिगुणद्रव्यकालजीवशुभाश्रयादिकम् ईश्वरशरीरं नित्यसूरीणां च स्वाभाविकगरुडभुजगादिरूपम् ॥ अनित्यं द्विविधम् अकर्मकृतं कर्मकृतं चेति प्रथममीश्वरस्य महदादिरूपं तथा अनन्तगरुडादीनां च इच्छागृहीतं तत्तद्रूपं ॥

कर्मकृतमपि द्विविधं स्वसंकल्पसहकृतकर्मकृतं केवलं कर्मकृतं चेति पूर्वं महतां सौभरिप्रभृतीनाम् उत्तरं चान्येषां पुनः सामान्यतो द्विविधं स्थावरजंगमभेदात् स्थावराः शिलावृक्षगुल्मलतादयः जंगमश्चतुर्धा देवमनुष्यतिर्यङ्नारकिभेदात् उद्भिज्जस्वेदजजरायुजाण्डजादिभेदा अपि त्रिभागजधर्माः अयोनिजशरीराण्यपि सन्ति एवं पञ्चीकृतानामेवांडोत्पादकत्वम् अंडोत्पादनात्पूर्वसृष्टिः समष्टिसृष्टिः अनन्तरसृष्टिर्व्यष्टिसृष्टिः महदादीनामुत्पत्तिर्नाम तालीपलाशताटंकन्यायेन अवस्थान्तरापत्तिरेव सेनावनराश्यादिव्यवहारवत् पूर्वापरावस्था विशेषसंबन्धमात्रेण कार्यकारणभेदव्यवहारः तत्र पूर्वावस्थाप्रहाणेन विजातीयावस्था प्राप्तौ तत्त्वान्तरव्यपदेशः पृथिवीपर्यन्तमेव इत्थं प्रकृति महदहंकारैकादशेन्द्रियतन्मात्रपञ्चकभूतपञ्चकविभागेन चतुर्विंशतितत्त्वानि वर्णितानि एतेन न्यूनाधिकसंख्याकतत्त्ववादिनो बाह्याः पाशुपताश्च निरस्ताः परमाणुकारणत्ववादिनोऽपि निरस्ताः प्रकृत्यादयः ईश्वरस्य जीवस्य च भोग्यभोगोपकरणभोगस्थानानि च भवन्ति भोग्यं विषयाः भोगोपकरणं चक्षुरादिकरणानि भोगस्थानानि चतुर्दशभुवनान्तर्वर्त्यण्डजातानि अण्डं नामकपित्थफलाकारं पञ्चीकृतपञ्चभूतारब्धं प्राकृतद्रव्यं तद्यथा पद्माकारा भूः कर्णिकाकारो मेरुः मेरोर्दक्षिणतः भारत किंपुरुष हरिवर्षाणि उत्तरतो रम्यकहिरण्यककुरुवर्षाणि त्रीणि पुरतो भद्राश्च वर्षं पश्चात्केतुमालाख्यं वर्षं मध्ये तु इलावृत एवं नववर्षयुक्तं जम्बूद्वीपं लक्षयोजनविस्तीर्णं समपरिमाणेन लवणसागरेणावृतं ससिन्धुर्द्विगुणेन सप्तवर्षात्मकेन प्लक्षद्वीपेन वेष्टितः सोऽपि इक्षुसमुद्रेण सोऽब्धिः शाल्मलिद्वीपेन स पुनः सुरासमुद्रेण स कुशद्वीपेन स सर्पिः समुद्रेण सोऽपि क्रौञ्चद्वीपेन सदध्यर्णवेन सोऽपि शाकद्वीपेन वेष्टितः स क्षीरार्णवेन सवर्षद्वयविभाजकवलयाकारमानसोत्तरपर्वतसहितेन पुष्करद्वीपेन स शुद्धजला-

र्णवेन एवं द्वीपानामुत्तरोत्तरद्वैगुण्यं द्रष्टव्यं प्लक्षद्वीपादिपञ्चसप्तवर्षात्मकाः सप्तद्वीपात्मकोऽयं द्विगुणीकृतया काञ्चनभूम्यावृतः काञ्चनभूमिस्तु लोकालोकापर्वतेन पर्वतस्त्वन्धतमसा तदन्धतमो गर्भोदकेन ततोऽण्डकटाहेन एवं भूमेरधः अतलवितलरसातलतलातलमहातलसुतलपातालभेदात् सप्तलोकाः अधोनारकाः ते च पापकर्मणां पापानुभव भूमयः रौरवाद्या मुख्यतया एकविंशतिप्रभेदाः ततस्तमः ततो भगोदकम् अनन्तरमण्डकटाहः एवं भूमेरुपरि लक्षयोजनात्सूर्यमंडलं तदेव भुवर्लोकः तदुपरि चन्द्रमंडलं तस्मादुपरि नक्षत्र बुधशुक्राङ्गारकबृहस्पतिशनिसप्तर्षिमंडलानि तदुपरि ध्रुवः सूर्यमण्डलमारभ्य ध्रुवलोकपर्यन्तस्स्वर्लोकः चतुर्लक्षादुपरि कोटियोजनोच्छ्रायो महर्लोकः तस्माद् द्विगुणो जनलोकः ततश्चतुर्गुणस्तपोलोकः तस्माद् द्वादशकोट्युच्छ्रायः सत्यलोकः ततस्तमः गर्भोदकम् अण्डकटाहश्च एवं तिर्यगूर्द्ध्वप्रमाणेन पञ्चाशत्कोटियोजनत्वं भूमेरुक्तं भवति शतकोटियोजनविस्तीर्णवादो मानभेदेन अण्डकटाहस्तु कोटियोजनोच्छ्रायः तदण्डं दशोत्तरावरणावृतम् एतादृशानि अण्डानि अनन्तानि जलबुद्बुदवत् युगपदीश्वरसृष्टानि ईश्वरस्य चतुर्मुखपर्यन्ता सृष्टिरद्वारिका तदनन्तरं सद्वारिकेति विवेकः विस्तरस्तु पुराण*रत्नादिषु द्रष्टव्यः इति प्रकृतिर्निरूपिता ॥

इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्यप्रथमकृपापात्रेण श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायां प्रकृतिनिरूपणं नाम चतुर्थोऽवतारः ॥ ४ ॥

अथाचिद्विशेषः कालो निरूप्यते ॥

कालो नाम गुणत्रयरहितो जडद्रव्यविशेषः स च नित्यो विभुश्च भूतभविष्यद्वर्त्तमानभेदेन त्रिविधः युगपत् क्षिप्रचिरादिव्यपदेशहेतुः निमेषकाष्ठाकलामुहूर्त्तदिवसपक्षमासर्त्वयनवत्सरादिव्यपदेशहेतुश्च मनुष्यमानेन मासः पितॄणां दिनं तेषाममावस्या मध्यान्हः मनुष्यमानेन वत्सरो देवानां दिनं तेषामुत्तरायणमहः दक्षिणायनं रात्रिः एवं देवमानेन द्वादशवर्षसहस्रसंख्याकं चतुर्युगमित्युच्यते तत्र चतुःसहस्रवर्षसंख्याकं कृत-

* विष्णुपुराणमाचक्षते ।

युगं तत्र पूर्णो धर्मः त्रिसहस्रकं त्रिपाद्धर्मवत्त्रेतायुगं द्विसहस्रवर्षपरिमितं सार्द्धधर्मस्तद्द्वापरं सहस्रवर्षसंख्याकम् । एकपादधर्मसंयुक्तं कलियुगम् । एतेषां सन्धिः द्विसहस्रसंख्याकः एवं चतुर्युगसहस्राणि ब्रह्मणो दिवसप्रमाणमुच्यते इत्युक्तरीत्या चतुर्युगसहस्राणि ब्रह्मणो दिवसमात्रप्रमाणिकैव रात्रिरपि ब्रह्मणो ऽह्नि चतुर्दशमनवो जायन्ते इन्द्रा अपि तथैव तथा सप्तऋषयश्च एकैकमनोरेकसप्ततिचतुर्युगपरिमाणकालः एवं ब्रह्ममानेन ब्रह्मणः शतवर्षजीवित्वम् । एतत्सर्वं कालाधीनम् । एवं नित्यनैमित्तिकप्राकृतप्रलया अपि कालाधीनाः कालस्य कार्य्यं प्रति उपादानत्वम् । अखण्डः कालो नित्यः कार्यः पुनरनित्यः एवंभूतः काल ईश्वरस्य क्रीडापरिकरो भवति लीला * विभूतौ ईश्वरः कालाधीन एव कार्य्यं करोति नित्य † विभूतौ तु कालस्य विद्यमानत्वे ऽपि तस्य न स्वातन्त्र्यं केचित्तु तत्र कालो नास्तीति वदन्ति ॥

केचित्तु षडिन्द्रियवेद्यः काल इत्यप्याहुः तेनानुमेयवादनिरासः इति काले निरूपितः ॥

इति श्रीमन्महाचार्यस्य प्रथमदासेन विरचितायां यतीन्द्रतदीपिकायां कालनिरूपणं नाम पञ्चमो ऽवतारः ॥ ५ ॥

अथ नित्यविभूतिर्निरूप्यते ‡ शुद्धसत्त्वधर्मभूतज्ञानजीवेश्वरसाधारणं लक्षणमजडत्वम् अजडत्वं नाम स्वयं प्रकाशत्वं तत्र शुद्धसत्त्वधर्मभूतज्ञानसाधारणलक्षणं पराक्त्वे सत्यजडत्वं तत्तु स्वयं प्रकाशत्वे सति परस्मा एव भासमानत्वं शुद्धसत्त्वं नाम त्रिगुणद्रव्यव्यतिरिक्तत्वे सति सत्त्ववत्त्वं निःशेषा विद्या निवृत्तदेशविजातीयान्यत्वं सा विभूति ऊर्द्ध्वप्रदेशे ऽनन्ता अधःप्रदेशे परिच्छिन्ना अचेतना स्वयंप्रकाश च आनन्दावहत्वादानन्दनामिका पञ्चोपनिषन्मन्त्रप्रतिपाद्यतया पञ्चोपनिषदात्मिका अप्राकृतपञ्चशक्तिमयतया पञ्चशक्तिमयीति निगद्यते सा विभूतिरीश्वरस्य नित्या

* वैकुण्ठातिरिक्तसृष्टिलीलाविभूतिः ।

† वैकुण्ठसृष्टिः ।

‡ रजस्तमोभ्यामसंसृष्टम् ।

मुक्तानाम् ईश्वरसंकल्पाद्भोग्यभोगोपकरणभोगस्थानरूपा च भवति भोग्यमीश्वरशरीरादिभोगोपकरणं चन्दनकुसुमवस्त्रभूषणायुधादीनि भोगस्थानं तु गोपुरपुरप्राकारमण्डपविमानोद्यानपद्मिन्यादिकं तत्रेश्वरस्य * नित्यानां च शरीराणि भगवन्नित्येच्छा सिद्धानि मुक्तानां तेषां पित्रादिसृष्टिर्युगपदनेकशरीरपरिग्रहा । इत्यादीनि भगवत्संकल्पादेव भवन्ति भगवतो व्यूहविभवार्चावतारशरीराण्यपि अप्राकृतमयानि अर्चावतारेषु प्रतिष्ठानन्तरं प्रसादोन्मुखेश्वरसंकल्पाधीनम् अप्राकृतं शरीरमत्राविर्भवति प्राकृते ऽप्राकृतसंसर्गः कथमिति न शङ्कनीयं रामकृष्णाद्यवतारशरीरवदिति प्रमाणानुसारेण परिहारो द्रष्टव्यः मुक्तानां शरीरपरिग्रहस्तु वसन्तोत्सववेषपरिग्रहादिवत्स्वामिनः कैङ्कर्यमेव ईश्वरशरीरस्य षाड्गुण्यमिति व्यवहारः षाड्गुण्यप्रकाशकत्वात् नित्यनिरवद्यनिरतिशयोज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनमार्दवार्जवादयो दिव्यमङ्गलविग्रहगुणाः तस्य व्यापकत्वं गीतादिषु प्रसिद्धं मुक्तस्य शरीरं नास्तीति वचनं तु कर्मकृतशरीराभावपरं तत्रत्येन्द्रियाणां† नित्यत्वात् अत एव कार्यकारणभावाभावात् प्राकृतवाच तत्त्वान्तरव्यपदेशः एतेन तत्र शरीरेन्द्रियादिकं नास्तीति मतनिरासः तमसः परस्तादित्युक्त्या प्रकृत्येकदेशवादिमतनिरासः अप्राकृतशब्दस्पर्शरूपरसगन्धाश्रयत्वात् आकाशादिव्यावृत्तिः ज्ञानात्मकत्वप्रतिपादनाज्जडत्वमतनिरासः भगवतः अप्राकृतदिव्यमंगलविग्रहस्तु अस्त्रभूषणाध्या‡योक्तसर्वोपाश्रयः तद्यथा पुरुषस्य कौस्तुभाकारत्वं प्रकृतेः § श्रीवत्सरूपत्वं महतो गदारूपत्वं सात्त्विकाहंकारस्य शंखरूपत्वं तामसाहंकारस्य शार्ङ्गत्वं ज्ञानस्य खड्गरूपत्वम् अज्ञानस्य तदावरकत्वं मनसश्चक्रत्वं ज्ञानेन्द्रियाणां शररूपत्वं सूक्ष्मस्थूलभूतानां वनमालात्वम् ॥

---

* विष्वक्सेनप्रभृतीनाम् ।

† अयमर्थ आकरेषूपपादितमिति नोपहसनीयं नापित्रसनीयम् ।

‡ पाञ्चरात्रीयप्रकरणविशेषः ।

§ भगवद्वक्षःस्थलस्थचिह्नविशेषः ।

Digitized by Google

चेतश्चक्रमति चेतना सिरमतिस्तत्संसृतिर्मालिका
भूतानि स्वगुणोऽहंकृतियुगं शङ्खेन शार्ङ्गायते ।
बाणाः खानि दशापि कौस्तुभमणिर्जीवः प्रधानं पुनः
श्रीवत्सं कमलापते तव गदामाहुर्महान्तं बुधाः ॥ १ ॥

इति सङ्गृहीतोक्तं पद्यमनुसन्धेयम् ॥

सा विभूतिरामोदप्रमोदसंमोदवैकुण्ठाख्यरूपेण चतुर्विधा पुनरन्ता च त्रिपाद्विभूति परमपदपरमव्योमपरमाकाशाऽमृतनाकाप्राकृतलोकानन्दलोकवैकुण्ठायोध्यादिशब्दवाच्या एतस्यां विभूतौ द्वादशावरणोपेतम् । अनेकगोपुरप्राकारैरावृतं वैकुण्ठं नाम नगरं तत्राऽऽनन्दनामको दिव्यालय स्तदंतः रत्नमयानेकस्तंभसहस्रैर्विरचिता महामणिमण्डपाख्या सभा तस्यां सहस्रफणामणिविराजितोऽनन्तः तस्मिन् धर्मादिमयदिव्यसिंहासनं तदुपरि चामरहस्तैर्विमला*दिभिः सेवितमष्टदलात्मकं पद्मं तदुपरि प्रकृष्टविज्ञानधामाशेषः तदुपरि वाचः परमद्भुतम् एवं नित्यविभूतिनिरूपणं नाम षष्ठोवतारः ॥ ६ ॥

अथ क्रमप्राप्तं धर्मभूतज्ञानं निरूप्यते स्वयंप्रकाशाचेतनद्रव्यत्वे सति विषयित्वं विभुत्वे सति प्रभावद् द्रव्यगुणात्मकत्वम् । अर्थप्रकाशो बुद्धिरिति तल्लक्षणं तद्धर्मभूतज्ञानमीश्वरस्य नित्यानां च सर्वदा नित्यमेव विभु च बद्धानां तिरोहितमेव मुक्तानां पूर्वं तिरोहितम् अनन्तरमाविर्भूतम् ॥

ज्ञानस्य नित्यत्वे ज्ञानमुत्पन्नं ज्ञानं नष्टमिति व्यवहारः कथमिति चेव ज्ञानस्य संकोचविकाशावस्थामादाय तत्संभवात् दृतेः पादाद्यथा उदकं वरति तथा ज्ञानमपि इन्द्रियद्वारा निःसृत्य अर्थेन सन्निकृष्यते अहिकुण्डलवत्संकोचविकाशौ ॥

सर्वं ज्ञानं स्वतएव प्रमाणं स्वप्रकाशं च विप्रतिपन्ना संवित् स्वगतव्यवहारं प्रति स्वाधीनकिंचित्कारीस्व स्वजातीयसंबन्धानपेक्षव्यवहारहेतु-

* नित्यपारिषदाः ।

त्वात् अर्थेन्द्रियदीपवत् नच चक्षुरालोकयोः सजातीयत्वम् । आहंकारिकतैजसभेदाद्भेदः अनेन ज्ञानस्य क्षणिकत्वं त्रिक्षणावस्थायित्वं प्रातिभासिकवद्व्यवहारस्य मिथ्यात्वं परतः प्रामाण्यं ज्ञानस्यैव आत्मत्वमित्यादिपक्षा निरस्ताः ॥

स्तम्भस्तम्भ इत्यादि धारावाहिकज्ञानं तु एकमेव ननु आगमबलाज्ज्ञानस्य नित्यत्वाङ्गीकारे कथं जागरसुषुप्त्यादिभेदसिद्धिरिति चेन्न यथा दाहकस्य वह्नेर्दाह्यसन्निधौ मण्यादिप्रतिबन्धके दाहाभावः तद्वत् ज्ञानस्य तिरोधायकतमो विशेषसंनिधानाभ्यां स्वापादिसिद्धिः पुंस्त्वादिवच्च पुंस्त्वादिकं बाल्ये तिरोहितं यौवने आविर्भवति यो यदाश्रितस्वभावः स तस्य गुण इति लक्षणलक्षितत्वाज्ज्ञानं गुणः विशेषणादिवत् । यतः संकोचविकाशावस्थावत् अतो द्रव्यमपि भवति आत्मगुणभूतस्य ज्ञानस्य द्रव्यत्वं कथमिति न शङ्कनीयं प्रभावत् एकस्यैव द्रव्यत्वगुण*त्वयोर्विरोधाभावात् अवस्थाश्रयो द्रव्यमिति द्रव्यलक्षणं स्वाश्रयादन्यत्र वर्त्तमानत्वमपि प्रभावदेवोपपद्यते प्रयोगश्च । गुणभूता बुद्धिर्द्रव्यं प्रसरणादिमत्त्वात्प्रभावत् ज्ञानं द्रव्यं संयोगादृष्टान्यत्वे सति भावनाकरणत्वादात्मवदिति मुक्तज्ञानस्य युगपदनन्तदेहसंयोगः सायनसूर्यादितेजोवत् संभवति ज्ञानं मतिः प्रज्ञासंवित् धिषणाधीः मनीषाशेमुषी मेधा बुद्धिरित्येव मादयः शब्दा ज्ञानपर्य्यायाः बुद्धिरेवोपाधिभेदात्सुखदुःखेच्छाद्वेषप्रयत्नरूपा सुखादिजनकज्ञानातिरेके प्रमाणाभावात् इच्छामि द्वेष्मि इति व्यवहारस्य स्मरामीत्यादिवत् ज्ञानविशेषेणैवोपपत्तेः । ननु कामः संकल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव इत्युक्तं ज्ञानरूपत्वं कथमिति चेन्न ज्ञानस्य मनः सहकारित्वनियमात् मनएवेत्युपचारादुक्तमिति न विरोध, एवं प्रत्यक्षानुमानागमस्मृतिसंशयविपर्य्ययभ्रमविवेकव्यवसायमोहरागद्वेषमदमात्सर्य्यचापलदम्भलोभक्रोधदर्पस्तम्भद्रोहाभिनिवेशनिर्वेदानन्दादयः सुमतिर्दुर्मतिः सुप्राप्तिः तुष्टिः उन्नतिः शान्तिः कान्तिः विरक्तिः रतिः मैत्री दया मुमुक्षा लज्जा तितिक्षा विचारणा जिगीषा मुदिता क्षमा

* रामानुजमते वैशेषिकादिवन्नविरुद्धे। द्रव्यत्वगुणत्वे इति सूक्ष्ममीक्ष्यतामिदमेव।

चिकीर्षा जुगुप्सा भावना कुहना असूया जिघांसा तृष्णा दुराशा वासना
दुर्वासना चर्चा श्रद्धा भक्तिः प्रपत्तिरित्येवमादयश्च जीवगुणाः अनन्ताः
धर्मभूतज्ञानावस्थाविशेषा एव एवं ज्ञानशक्तिबलैश्वर्यवीर्यतेजःसौशील्य-
वात्सल्यमार्दवार्जवसौहार्दधैर्यसाम्यकारुण्यमाधुर्यगांभीर्यौदार्यस्थैर्य-
पराक्रमादयो भगवतो ऽनन्तकल्याणगुणाः ज्ञानशक्त्योर्विततिभूताः तत्र
ज्ञानं नाम सर्वसाक्षात्काररूपं शक्तिरघटितघटनासामर्थ्यं बलं धारणसा-
मर्थ्यं ऐश्वर्यं नियमनसामर्थ्यं वीर्यमविकारित्वं तेजः पराभिभवनसामर्थ्यं
महतो मन्दैः सह नीरन्ध्रेण संश्लेषस्वभावत्वं सौशील्यं वात्सल्यं दोषेपि
गुणत्वबुद्धिर्दोषादर्शित्व वा आश्रितविरहासहत्वं मार्दवं मनो वा क्कायै-
करूपमार्जवं स्वसत्तानपेक्षतदर्थतापरत्वं सौहार्दं जन्म ज्ञानवृत्तगुणाद्यनपे-
क्षया सर्वैराश्रयणीयत्वं साम्यम् आश्रितदोषगोपनं चातुर्यम्। अकम्पनीयत्व
स्थैर्यम्। अभग्नप्रतिज्ञत्वं धैर्यं परबलप्रवेशनसामर्थ्यं शौर्यं तन्निराकरणं
पराक्रमः स्वप्रयोजनमनपेक्ष्यपरदुःखनिराचिकीर्षादयापरदुःखदुःखित्वं वा
क्षीरवदुपाध्यभावेपि स्वादुत्वं माधुर्यं भक्तानुग्रहवदान्यत्वादिमत्त्वम् दुर-
वगाहत्वं गाम्भीर्यं प्रभुत्व दत्त्वाप्यतृप्तत्वमौदार्य्यम् एवं वदान्य इत्या-
दावप्यूह्यम् ॥

ज्ञानविशेषभूतयोर्भक्तिप्रपत्त्योः स्वरूपं किंचिदुच्यते भक्तिप्रपत्तिभ्यां
प्रसन्नईश्वरएव मोक्षं ददाति अतस्तयोरेव मोक्षोपायत्वं मोक्षोपायत्वे-
नोक्तानां कर्मयोगज्ञानयोगप्रभृतीनां भक्तिद्वारैव साधनत्वम् ॥

कर्मयोगो नाम उपदेशाज्जीवपरयाथात्म्यज्ञानवता शक्त्यनुसारेण
फलसंगरहिता ऽनिषिद्धकाम्यनित्यनैमित्तिकरूपपरिगृहीतकर्मविशेषः। स
तु देवार्चनातपस्तीर्थदानयज्ञादिभेदभिन्नः अयं तु जीवगतकल्मषापनयन-
द्वारा ज्ञानयोगमुत्पाद्य तद्द्वारा साक्षात्कारभक्त्युत्पादको भवति ॥

ज्ञानयोगो नाम कर्मयोगान्निर्मलान्तःकरणस्य ईश्वरशेषत्वेन प्रकृति
वियुक्तस्वात्माचिन्ताविशेषः एतस्य साक्षाद्भक्त्युपयोगित्वम् एवं साधना-
न्तराणामपि भक्त्युपयोगित्वमूह्यम् ॥

Digitized by Google

भक्तियोगो नाम यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपा ऽष्टांगवान् तैलधारावदविच्छिन्नस्मृतिसन्तानरूपः सत्र विवेकविमोकाभ्यासक्रिया कल्याणानवसादा ऽनुद्धर्षरूपसाधनसप्तकजन्यः तत्र विवेको नाम जात्याश्रयनिमित्तादुष्टादन्नात्कायशुद्धिः विमोकः कामानभिष्वङ्गः अभ्यासः पुनः पुनरालम्बनं संशीलनं शक्तितः पञ्चमहायज्ञाद्यनुष्ठानं क्रियाकल्याणानि सत्यार्जवदयादानाहिंसादीनि अनवसादो दैन्याभावः अनुद्धर्षस्तुष्ट्यभावः अतिसन्तोषश्च विरोधीत्यर्थः एवं साधनसप्तकानुगृहीता भक्तिर्दर्शनसमानाकारा अन्तिमप्रत्ययावधिका च भवति सचान्तिमप्रत्ययः एतच्छरीरावसाने शरीरान्तरावसाने वा भवति वेदनध्यानोपासनादिशब्दवाच्या भक्तिः परभक्तिपरमज्ञानपरमभक्तिरूपा क्रिया क्रमवती प्रपत्त्यङ्गिका च सा द्विविधा साधनभक्तिफलभक्तिभेदात् उक्तसाधनजन्या साधनभक्तिः फलभक्तिस्तु ईश्वरकृपाजन्या पराङ्कुश*नाथादिनिष्ठामद्भक्तजनवात्सल्यमित्यादिषु स्तुतिनमस्कारादिषु च भक्तिशब्दप्रयोग औपचारिकः ॥

ननु वेदान्ते श्रवणमननयोरपि विधानात्कथं ध्यानमेव विधीयत इति चेदुच्यते अधीतसाङ्गवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्तन्निर्णयाय स्वयमेव श्रवणे प्रवर्त्तते इति श्रवणस्य प्राप्तत्वादनुवादः श्रवणप्रतिष्ठार्थत्वान्मननस्याप्यनुवादः तस्माद्ध्यानमेव विधीयते इति न विरोधः ध्यानशब्दवाच्या भक्तिर्विद्याभेदाद्बहुविधाः काश्चित् विद्या उच्यन्ते अन्तरिक्षविद्या अन्तरादित्यविद्या दहरविद्या भूमिविद्या सद्विद्या मधुविद्या उपकोशलविद्या शाण्डिल्यविद्या उद्गीथविद्या पुरुषविद्या प्रतर्द्दनविद्या वैश्वानरविद्या इत्यादिका ब्रह्मविद्याः न्यासविद्या प्रपत्तिः प्रपत्तिर्नाम आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा आत्मनिक्षेपकार्पण्यमित्यङ्गपञ्चकयुक्ता एतद्देहावसाने मोक्षप्रदानकृत्कर्त्तव्या न्यासः शरणागतिः इत्यादिशब्दवेद्या ज्ञानविशेषरूपा

* सुप्रसिद्धतमः श्रीरामानुजार्यात्प्राचीनतमस्ताम्रपर्णीतीरनिवासतव्यः ।

प्रपत्तिः गुरुमुखाद्रहस्य* शास्त्रेषु संप्रदायतया वेदितव्येति इह बालबोधनार्थं प्रवृत्ते ग्रन्थे न प्रकाश्येति विरम्यते भक्तिप्रपत्त्योरेव मोक्षसाधनत्वेन स्वीकारात्परोक्तोपायनिरासः यथा वेदबाह्यानां मध्ये केषांचिन्मते देहातिरिक्तात्मनो ऽनङ्गीरकारात्मोक्षे प्रवृत्तिरेव न संभवति अन्येषां मते ज्ञानस्य क्षणिकत्वात्तस्यैवात्मत्वात्कस्य प्रवृत्तिः संतानस्येति चेत् न अन्यं प्रति अन्येन यत्नो न कर्त्तव्य इति न प्रवृत्तिः अपरे†षां मते धर्माधर्मादिसप्तभङ्गीरीत्या हि अनेकान्तवादात्‡ प्रवृत्तिः वैशेषिकादिपक्षे पाषाणकल्पे मोक्षे प्रवृत्तिः कस्यापि न संभवति सांख्यादिपक्षेषु ईश्वरानङ्गीकारात्पुरुषस्य प्रकृतेर्वा मोक्ष इति संशयाच्च प्रवृत्तिः मायि§मन्ते व्यावहारिकस्य पारमार्थिकाभेदज्ञानजनकत्वाच्च प्रवृत्तिः भास्करयादवोक्तकर्मज्ञानसमुच्चयवादोऽपि उक्तादेव निरस्तः शैवमते तु पशुपतेः प्राप्यत्वस्वीकारद्रुद्राक्षभस्मधारणादेः साधनत्वेन स्वीकाराच्च तन्निरासः एवं मतिर्निरूपिता ॥

इति श्रीयतीन्द्रमतदीपिकायां बुद्धिनिरूपणं नाम सप्तमो ऽवतारः ॥ ७ ॥

---

* जैनानाम् ।

† स्याद्वादः ।

‡ शङ्कराचार्यमते ।

§ श्रीवचनभूषणादिषु ।

श्रीविश्वेश्वरो जयति ।

अथ फाल्गुनकृष्णाप्रतिपदि संस्कृतसमाजनाम्नी सभोपस्तीर्णा । तस्यां च प्रथमं सभासंपादको रामकृष्णशास्त्री पूर्वसभावृत्तान्तं यथावद्वाचयित्वा सभ्येभ्यो ऽश्रावयत् । ततः सभाप्रोत्साहकः श्रीप्रमदादासमित्रमहाशयः सकलसभ्यविवक्षितमेवार्थं श्रीबापूदेवशास्त्रिणः प्रार्थयत तन्न-

था, अगाधमतिदुरूहमपि ज्योतिःशास्त्रं यैरनेकलघुतरकल्पनाभिर्नानाविधग्रन्थनिर्माणेन सततमनुकम्पया सकलशिष्येभ्यः पाठनेन च बहुजनोपकारि संपादितम्, तत एव च येषां यशो भारतवर्षे ऽवकाशमनासादयदिव सागरमप्यतीत्य नानाविधान्द्वीपानलंकरोति तैरियं सभा स्वाध्यक्षतां केवलमनुग्रहधिया निखिलजनातिगया च सुजनतया ऽङ्गीकुर्वद्भिः परमनुगृहीतेति । ततश्च ते सभाध्यक्षा उपविशन्तस्तत्र सर्वेभ्यो विनयातिशयमनीदृशो ऽप्यहं यतः सभाध्यक्षतामङ्गीकारितस्तेन नितरामुपकृतो ऽस्मीति प्रमितात्तरमब्रुवन् । ततश्च सभाप्रोत्साहको विनयातिशयपुरःसरं श्रीबालशास्त्रिणामभिमुखीभूयाभ्यधत्त । तद्यथा, एकैकमपि हि शास्त्रमतिगभीरार्थतया सुचिरमप्यभ्यस्यमानं यत्र नाधिरोहति मतौ स्थिरतां तत्र कैवाऽऽशा नानाविधानां दर्शनानां वशीकरणे, तादृशानि सकलानि दर्शनानि यान्सन्ततमेवोपासते वेदो ऽपि यथार्थ्येन यैः सकलो ज्ञायते, न च केवलं तज्ज्ञानमात्रमपि तु कण्ठतःपाठे ऽपि शक्यते यैः कर्तुं, कथंकारं ते ऽस्मादृशलघीयोजनस्तुतिवचसा शक्येरन् गोचरीकर्तुम् । अथापि ते निरवग्रहेण सभायामस्यामनुग्रहेण संस्कृतोत्साहवशंवदेन च नेतमा सभाध्यक्षसहायताममंसत, तेनोन्मस्तकमुपकारं सभेयं धारयतीति । ततः केशवशास्त्री निजलिखितमीश्वरसर्वज्ञताविषये विचारमवाचयत् ॥

ईश्वरो हि न्यायविद्भिर्नित्यानां ज्ञानेच्छाकृतीनामाश्रयः परमात्मा विभुत्वादिगुणयुक्तः सर्वज्ञः स्वीक्रियते । अत एव भगवान्वात्स्यायन'स्तत्कारित्वादहेतु'रिति गौतमदर्शनतुरीयाध्यायस्थसूत्रव्याख्यानावसरे आगमाच्च द्रष्टा बोद्धा सर्वज्ञातेश्वर इत्याञ्जाह । तथा चाशेषसूत्राणि भूतभविष्यद्वर्तमानानि भौतिकान्यभौतिकानि वा कार्याणि परमात्मना सर्वदा ज्ञातान्येवावतिष्ठन्ते, न किमपि तदज्ञातं कार्यान्तरं पुरुषकारेण संपादयितुं शक्यते एवं स्थिते स्वाराज्यकामो वाजपेयेन यजतां स्वर्गकामो ज्योतिष्टोमेनेत्यादीनां परःशतानां वेदोक्तविधीनां परमात्माज्ञातार्थप्राप्ति-

सूचकत्वम्, अहोस्वित् तज्ज्ञातार्थप्राप्तिसूचकत्वमेवेति मीमांस्यताम् । तत्र नाद्यः, ईश्वरसर्वज्ञताहानिप्रसङ्गात् । नाप्यन्त्यः, ईश्वरज्ञातार्थानां स्ववश्यंभावात् तदर्थं वेदोक्तकर्मानुष्ठाने प्रेक्षावतामप्रवृत्तेः । न चेश्वरप्रेरिता एव जनास्तथाविधानि कर्माण्याचरन्तीति वाच्यम् । कांश्चन पुरुषान्साधुफलकेषु कांश्चनासाधुफलकेषु कर्मसु प्रेरयत ईश्वरस्य नैर्घृण्यापत्तेः । न चैवं संभवति । यत्सर्वत्र समदर्शनो भगवानेकं पुरुषं श्रेयस्करमपरं चाश्रेयस्करं कर्म कारयेत् । एवं च यथार्थात्मतत्त्ववित्नैयायिको ऽखिलान् वैदिकविधीनपार्थान्मन्यमानो ऽशेषकार्यजातस्येश्वरज्ञातत्वं स्मरन्नग्निशकटस्थितं बटुकरचरणत्वात्स्वयमचेष्टमानमपि तादृशशकटनीतं सदिष्टाननिष्टान् वा देशान्प्राप्नुवत्पुरुषान्तरमिवाभीष्टाननभीष्टान् वा भोगान् प्राप्नुवन् न कमपि पुरुषकारं कर्तुं प्रयतेत । परं तु न्यायनये वेदस्यापि प्रामाण्यमङ्गीक्रियते । अत एव भगवान्गौतमो द्वितीयाध्याये ‘मन्त्रायुर्वेदप्रामाण्याच्च तत्प्रामाण्यमाप्तप्रामाण्या’दित्याह । तद्भाष्यकारो वात्स्यायनो ऽपि तत्रेदं कृत्वेष्टमधिगच्छति इदं वर्जयित्वा ऽनिष्टं जहातीत्याद्युदाहरति । इत्थं च वेदोक्तकर्मानुष्ठानसार्थक्यं स्वीकुर्वाणा न्यायकोविदाः कथं नामेश्वरसर्वज्ञत्वं साधयेयुः । वेदोक्तकर्मणामसिद्धकार्यसाधकत्वे एव सार्थकत्वोपगमात् । कार्याणां च सिद्धेः प्रागविद्यमानत्वेनेश्वरज्ञानागोचरत्वात् भविष्यतामपि कार्याणामीश्वरज्ञानगोचरत्वं मन्यते चेत्तेषामवश्यंभावित्वेन तदर्थं वैदिककर्मानुष्ठानचोदनाया वैयर्थ्यं स्पष्टमेवेति तादृशचोदनायाः सार्थकत्वमुपाद्येश्वरसर्वज्ञत्वं नैयायिकानां दुरुपपादमिव प्रतीयते ॥ ततो राममिश्रशास्त्री । भो नेश्वरे ऽस्य मनुष्यस्य स्वर्गो भविष्यतीत्येतावदेव ज्ञानमुपेयते येन भवदुक्तो दोषो ऽवकाशमासादयेदपि तु यद्ययं मनुष्यो ज्योतिष्टोमेन यजेत ततो ऽस्यापूर्वमुत्पद्येत ततश्च स्वर्गो भवेदथ न यजेज्ज्योतिष्टोमेन नोत्पद्येताप्यस्यापूर्वं ततश्च न स्यात्स्वर्ग, इति हि ज्ञानमुपेयते पदार्थमात्रस्य भगवज्ज्ञानविषयत्वादिति । ततो ढुण्ढीराजशास्त्री । यद्येवमुच्यते तर्हि भगवतः सर्वव्यक्तिषु सुखं दुःखाभावो वा भवत्विति इच्छामात्रेण तथाविधेन वा ज्ञानेन सर्वव्यक्तीनां

Digitized by Google

सुखादिसंभवे ऽपि यतो न तादृशं ज्ञानमिच्छा वा, तत आपततीश्वरे वैषम्यनैर्घृण्यरूपो दोष इति । ततो राममिश्रशास्त्री । नायं दोषो भगवति तथाविधज्ञानेच्छयोः कर्मसापेक्षत्वात् । यस्य हि यादृशं शोभनं तदितरद्वा कर्म भवेत्तत्सहकारेण तथाविधमेव भगवतो ज्ञानमिच्छा वा अभ्यधायि चैतदेवमेव सूत्रकृता 'कर्मणश्च जडतया: सुखदुःखयोः संपादने स्वातन्त्र्याभावादीश्वरः सिध्यती'ति तर्हि कर्मैव.लं कृ.तमीश्वरेणेति न दोष इति ॥

ततः प्रमदादासमित्रमहाशयो राममिश्राभिहितमेव.र्थं संक्षिप्तं तत्तत्कारणव्यापारपूर्वकमेव यदयं मनुष्यो ज्योतिष्टोमेन यजेत ततोऽस्यापूर्वमुत्पद्येतेत्येव ज्ञानमीश्वरे ऽभ्युपगम्यत इति विस्तरेणोपापादयत् । अथ शिवकुमारमिश्रो भवदुक्तो हि ज्ञानाकारो विकल्पात्मकतामवगाहते स चेश्वरे न कैरप्युपेयते प्रमात्मकस्यैव ज्ञानस्येश्वरे ऽभ्युपगमादित्यर्थकं वाक्यसंदर्भं सकलसभ्यबोधाय विस्तरेणोपापादयत् । ततो ऽयं पुरुषो य.गं करिष्यत्येव ततोऽस्य स्वर्गो भविष्यत्येवेति हीश्वरे प्रमात्मकमेव ज्ञानमुपेयते ऽतो न भवदुक्तदोषावकाश इति राममिश्राशये श्रीबालशास्त्रिभिः स्फुटमुपपादिते, शिवकुमारमिश्र एवं सति प्रम.त्मकमेव ज्ञानमी.श्वरे वर्त्तते सकलवस्तुविषयकं चेति निश्चिन्वतः पुंसः प्रवृत्तेरनुपपत्तिरापद्यत इत्यवोचत् । ततो ऽतिगहनो ऽयं विचारो नाद्यसमाप्नुयादिति सभान्तरे केशवशास्त्रिशिवकुमारमिश्रौ पूर्ववादं राममिश्रराजारामशास्त्रिणौ चोत्तरवादं कुर्यातामिति श्रीबालशास्त्रिभिरादिष्टेष्वेषु सायंसमये ऽपि जाते सभ्याः सर्वे सभां विससृजुरिति शम् ॥

अथ फाल्गुनशुक्लप्रतिपदि संस्कृतसमाजनाम्नी· सभोपस्तीर्णा । तस्यां च सम्पादको रामकृष्णशास्त्री पूर्वसभावृत्तान्तं यथावदवानयत् । तदनु प्रमदादासमित्रमहाशयो बालशास्त्रिभिः प्राङ्निरूपितमर्थं तथालिखितमवगत्य· तान्प्रार्थयत, श्रीमद्भिः प्राङ् निरूपितो ऽर्थो ऽतीव विशदः सयुक्तिको ऽल्पज्ञानामपि साधुबोधसम्पादको नात्र पत्रे यथावल्लिखित

इति कृपया तं भवन्तो ऽत्र पत्रे विलेखयितुं प्रसीदन्त्विति । ते चागामिनि पत्रे ऽवश्यमेव तदर्पयिष्यामि लेखितुमिति प्रत्यशृण्वन् । ततः शिवकुमारमिश्रः प्रारब्धविचारविषये ऽवोचत । ईश्वरो हि नित्यज्ञानेच्छाकृतिकश्चेदुपेयते तत्समवेतस्य च ज्ञानस्य सत्यत्वं तदेवरज्ञानविषयेण कार्येणावश्यमेव भवितव्यं तत्सत्यत्वान्यथा ऽनुपपत्तेरिति निश्चिन्वतः पुरुषस्य प्रवृत्तिर्नोपपद्यते, तस्य तूष्णीम्भावे ऽपि कार्याणामवश्यम्भावसिद्धेरिच्छाप्रतिबन्धकत्वात् । किञ्च लोके हि पूर्वं यदिष्टसाधनतया जानाति ततस्तदिच्छति ततः प्रवर्त्तत इत्यानुभविकः सर्ववादिसम्प्रतिपन्नश्च क्रमः, स च ज्ञानेच्छयोर्द्वयोरपि नित्यत्वाभ्युपगमे विरुध्यते । किञ्चैवमङ्गीकारे केवलेन ज्ञानेनेच्छया कृत्या वा सकलकार्योत्पत्तिव्यवस्थितेः सूपपादनया ज्ञानाङ्गीकार इच्छाकृत्योरिच्छाश्रयणे वा ज्ञानकृत्योः कृत्यभ्युपगमे वा ज्ञानेच्छयोरानर्थक्यमापद्यते । ततो राममिश्रशास्त्री । नहि क्षित्यङ्कुरादिकार्यैरेकदैव तदनुकूलज्ञानेच्छाकृतिमाननुमातुमिष्यते येन भवदुक्तदोषावकाशो ऽपि तु पृथगेव तदनुकूलज्ञानवान् तदनुकूलेच्छावान् तदनुकूलकृतिमांश्चानुमीयते, कार्यत्वस्य ज्ञानवत्त्वेच्छावत्त्वकृतिमत्त्वैः पृथगेव व्याप्यत्वात् । ततश्च तदनुमितौ लाघवाज् ज्ञानेच्छाकृतीनां नित्यत्वमनित्यत्वे हि तेषामनन्तप्रागभावप्रध्वंसकल्पनेन गौरवापत्तिः । न च तेषां क्रमिकत्वभङ्गरूपो दोषः प्रकृतार्थबाधकः । लोके ज्ञानेच्छाकृतीनामनित्यत्वदर्शने ऽपि प्रकृते लाघवानुरोधेन तदनाश्रयस्यैव तेषामक्रमिकत्वाश्रयणस्यादोषत्वात् । दृष्टान्तदृष्टसर्वधर्मानुरोधेनानुमानस्यायुक्तत्वात् इति । ततः शिवकुमारमिश्रेण ज्ञानेच्छाद्यन्यतमेन निर्वाहे त्रितयाङ्गीकारस्य फलं किमिति प्रश्नस्य किमुत्तरमुक्तमित्यभिहितो राममिश्रशास्त्री, क्षित्यङ्कुरादीनां कार्यत्वेन हि कर्ता ऽनुमीयते स एव चेश्वरः । न च शरीराजन्यत्वेन कर्त्रजन्यत्वं सिध्येदिति वाच्यम् । अप्रयोजकत्वात् । प्रसिद्धकर्तृजन्यत्वाभावसाधने सिद्धसाधनादप्रसिद्धकर्तृजन्यत्वाभावसाधने चाप्रसिद्ध्यैव तत्साधनस्यायुक्तत्वाच्चेतनत्वव्याप्यतया ज्ञानेच्छाकृतीनामाकाशादिषु चेतनत्वस्य बाधाच्चेतन एवेश्वरः सिध्यतीति । अथेश्वरः सत्यज्ञान-

Digitized by Google

वानिति निश्चिन्वतः पुंसः प्रवृत्तिर्नोपपद्यत इत्याक्षेपमित्थं निराकरोत्प्रमदादासमित्रमहाशयः । भो केयं सम्प्रत्यवश्यंभावि भवेद्वेति सम्भावना भवत्कं हृदयमाकुलयति । किं ज्योतिष्टोमादिकमविदधतो ऽपि पुंसः स्वर्गो भवेदित्यस्ति भगवति ज्ञानम् । नहि, किन्तु यद्येष पुमान् ज्योतिष्टोमेन यजेत ततो ऽस्य स्वर्गो भवेदिति । नहीश्वरो ऽपि क्लृप्तकारणकदम्बकव्यापारनिरपेक्षां कार्योत्पत्तिमनुसंधत्ते, कारणगणनिर्माणस्यैव वैयर्थ्यापत्तेः । प्रलपितमिदं केनापि । 'अवश्यंभाविनो भावा भवन्ति महतामपि' तथा, 'यदभावि न तद्भावि भावि चेन्न तदन्यथा । इति चिन्ताविषघ्नो ऽयमगदः किं न पीयते' इति । नहि कश्चित्प्रेक्षावान् यदि मे स्याज्जीवनादृष्टं ततो जीवेयमेवेति तुङ्गादचलशृङ्गान्निजमङ्गं पातयन्नुन्मत्त उच्यते । न चास्ति प्रवर्त्तकानां निवर्त्तकानां च श्रुत्यादिवचसामानर्थक्यमत्र पक्षे, तेषामुपायप्रदर्शनार्थत्वात् । नहि कश्चिदुपदेष्टा भाव्यभावने केवलमुपदिशन् भावकं चानुपदिशन्नवञ्चकः श्रोतव्यवचनश्च स्यात् । अतश्च भगवान्प्रवृत्तिनिवृत्तिलक्षणं वेदं प्रकाशयन्निष्टेषु पुरुषाणामिच्छां जनयति द्विष्टेषु च तां निवर्त्तयति । सा च तेषुतेषु कर्मस्विष्टजनकतामनिष्टजनकतां चागृह्णतः पुरुषस्य नोपपद्यत इति सर्वमेव साधु सार्थकमिति । ततः शिवकुमारमिश्रः । साधु महाशयैरुक्तम् यज्ज्योतिष्टोमादिकमविदधतोऽपि स्वर्गो भवेदिति ज्ञानं भगवति नास्तीत्यादि परन्तु केनैतादृशं ज्ञानमीश्वरे स्वीक्रियते, केन वा यद्येष पुमान् ज्योतिष्टोमेन यजेत अथ स्वर्गमाप्नुयात् इति ज्ञानं तस्मिन्न स्वीक्रियते,को वा ऽदृष्टमास्थाय तुङ्गशिखरादात्मानं पातयन्तमनुमोदयति, प्रत्युत भवद्भिरेवेश्वरीयज्ञानादिकं कूटस्थमुपगच्छद्भिर्यद्येष पुमानित्याद्याकारकं संभावनात्मकं तज्ज्ञानं न शक्यत उपगन्तुम् । नहि भाविवस्तु दृढं निश्चिन्वन् ईश्वर एवं सम्भावयितुमर्हति, भवतामेव च पर्वतात्पतन्ननुमोदनीय उन्मत्त इति भावितुमशक्यश्च भविष्यति तदीयपतनप्रवृत्तेरनादीश्वरेच्छयैव परिगृहीतत्वात् इति नित्यत्वकल्पे दोषमुद्भावयन्तः श्रीमन्तो ऽस्मद्वक्तव्यमेव भाषमाणा अस्मन्मतप्रविष्टा इवाभान्ति । अस्माभिस्तु एतावन्मात्रमुच्यते यत् ईश्व-

Digitized by Google

रज्ञानव्यवस्थितातिरिक्तः कार्यलेशोऽप्युत्पादयितुमशक्य इति न्यायमतं स्मरतो मत्प्रवृत्त्यभावेऽपि तदन्यथाभावो न भवतीति निश्चिन्वतश्च कथं प्रवृत्तिरिति । यच्च रामभिश्रेणापृष्टमपि प्रसिद्धकर्तृजन्यत्वाभावसाधनेत्यादिनोक्तम् । तत्रेदमुच्यते । भवन्मते ऽपि प्रसिद्धकर्तृजन्यत्वसाधने बाधः । अप्रसिद्धकर्तृजन्यत्वसाधने साध्याप्रसिद्धिरितितुल्यमेवेति या चास्य लाघवाचित्यत्वसिद्धिरित्युक्तिः सा तु नित्यत्वानित्यत्वयोर्लाघवचर्चातिरिक्तांशे साम्याभावादेवानादेया दोषान्तरराहित्यसाम्ये लाघवचर्चाद्रियते । यच्च कार्यत्वस्य इच्छावत्त्वादिना प्रत्येकं व्याप्यत्वात्सकलानुमानमित्युक्तम् । तदपि न साधु । नित्यचैतन्यवज्जन्यत्ववत्त्वेन सोपाधिकत्वात् ।

किं चैवं सतीश्वरे ईश्वरत्वमेव न सिध्यति जगत्कारणत्वमेव हि तस्मिन्नीश्वरत्वमभिमन्यन्ते । स च न जगतः साक्षात्कारणं स्वप्रयत्नेन व्यवहितत्वात् । नापि स्वप्रयत्नद्वारा, तत्प्रयत्नस्य नित्यतया तत्प्रयत्ने व्यापारत्वस्याऽसंभवात् । स एव हि व्यापारो यस्तज्जन्यः सन् तज्जन्यं जनयेत् । नहि साक्षात्परंपराभ्या मन्या का चित्कारणविधास्ति या भगवत्यवकाशमासादयेत् । किं च केवलमदृष्टं जडात्मकतया शुभाशुभफले व्यवस्थापयितुमधिष्ठातृसहकारं विना न शक्नोतीति तदधिष्ठातृतया चेतन ईश्वरः कल्प्यते एवं स्थिते ऽवश्यमस्य चैतन्येन जगदुत्पत्तौ कुत्र चिदुपकर्तव्यम् । परं तच्चैतन्यं न जगद्विषयिण्यां भगवदिच्छायामुपकरोति तस्या नित्यत्वात् । नापि जगद्विषयके भगवत्प्रयत्ने तस्यापि नित्यत्वात् । नापि जगदुत्पत्तौ सहकारिकारणं तद्भगवदिच्छाप्रयत्नयोरेव जगदुत्पत्तौ पर्याप्तत्वात् । नन्वचेतनं कथमिच्छेत्प्रयतेत चेत्येवं चमत्कुरुष चेत् हन्त भोः आयातं तर्हि चैतन्येच्छयोः प्रयोज्यप्रयोजकभावेनेति त्यज्यतामीश्वरीयज्ञानादिनित्यतायां दुराग्रहः । आदौ जानात्यनन्तरं कामयते इति दृष्टनियमस्यैवेदानीं भवताप्यनुसृतत्वात् । ईश्वरचैतन्यस्येश्वरेच्छाद्यावनुपयोगित्वे तु जगदुत्पत्तिव्यवस्थायास्तत्तत्कार्योत्पत्तिप्राक्क्षणादितोऽपि संभवेनेश्वर

एवानुपयुक्तः स्यादित्यहो नित्यत्वश्रद्धायां दुष्परिणामापातः । किं चेश्वरप्रणिधानाद्वेति पातञ्जलयोगसूत्रव्याख्यावसरे प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णातीति द्वैपायनोक्तिर्भवदभिमते प्राणान्तक्लेशेनाराधनेपि दयालेशशून्ये ईश्वरे विरुध्यते । आस्तां वा श्रीमतामभिलाषः । मह्यं तु अष्टसंख्याकगुणवान् नित्यज्ञानेच्छाकृतिभिः पाशरज्जुभिरिवैकाकारतया ऽनादिकालाद्व्यवस्थाप्यमान ईश्वरो न रोचते अपि त्वनन्तानन्तकोटिगुणविभूषितः कदा चित्सृष्टीच्छा कदा चित्पालनेच्छा कदा चित्संहारेच्छा कदा चिद्भक्तवरदानेच्छा कदा चिदेकान्तभक्तोद्धारेच्छेत्येवमादिभिर्नानाविधाभिः सत्येच्छाभिर्विलसन्नेव परमेश्वरो मदीयमानसे निवसेदिति अलमनल्पालापेनेति ॥

एवं परस्परं बहुना विवादेनानध्यवसीयमाने विषये ऽन्यतरकोट्यवधारणाशामुपायान्तरेणापश्यन्तः प्रमदादासमहाशयास्तदर्थं बालशास्त्रिणोभ्यर्थयन् ते च तदानीं कुतश्चित् शारीरखेदादुक्तुमनिच्छन्तो ऽपि तथाविधश्लाघनीयपुरुषप्रार्थनागौरवादीश्वरस्य नित्यज्ञानादिमत्त्वमित्यमसिद्धान्तयन् । भवेदेतदीश्वरस्यानित्यज्ञानादिमत्त्वं गुरुभूतमप्युपगन्तुमर्हम् चेन् नित्यज्ञानादिमत्त्वे आपाद्यमानानां दोषाणां मध्ये एकोप्यनित्यत्वकल्पे उद्धर्तुं शक्येत, न पुनस्तच्छक्यते तथाहि । ये ऽप्यनित्यं तदास्थिषत, तैरपीदमुच्यताम्, किम्भवन्मते भगवदिच्छायाः कार्यवर्गं प्रति कारणत्वमस्ति न वा । अस्ति चेत्, अवश्यमनित्येच्छाया ज्ञानविशेषजन्यतया तदर्थमेव भाविवस्तुविषयकं ज्ञानं भाविवस्तुकारणीभूतभगवदिच्छातः प्रागेवेश्वरे उत्पद्यते इति मन्तव्यम्, ततश्च तज्ज्ञानस्य प्रमात्वानुरोधादेव कार्यावश्यम्भावनिश्चयादनित्यत्ववादेपि कथम्प्रवृत्त्युपपत्तिः । ईश्वरेच्छायाः कारणत्वानङ्गीकारे तु ईश्वरोपगमस्यैवानर्थक्यापत्तौ तदीयज्ञानादीनां नित्यत्वानित्यत्वविचारो निरास्पदः स्यात् । किञ्च योगिनां योगजप्रत्यक्षस्य सर्वविषयकत्वप्रमात्वाङ्गीकारात् स्वचिकीर्षितस्य तदीयविषयकोटिप्रवेशाप्रवेशाभ्यामपि स्वप्रवृत्त्यनुपपत्तिः, योगिप्रत्यक्षस्य

यत्किञ्चिद्वस्तुमात्रविषयकत्वे तु तादृशज्ञानस्य लौकिकप्रमेणापि सिद्धतया दीर्घतरकालायासाध्ययोगसिद्धौ प्रवृत्तिरेवानुपपन्ना स्यात् । प्रसिद्धं च योगिप्रत्यक्षं सर्ववस्तुविषयकमापामरम् । किञ्चेदानीमीश्वरीयज्ञाने ऽस्मदीयज्ञानात्को विशेषः । न तावद्यथार्थत्वमात्रम्, अस्मदीयप्रमास्वपि तत्संभवात् । नापि सकलावगाहित्वम्, प्रमेयत्वादिनायावद्विषयितायाः अस्मदीयज्ञानेपि सद्भावात् । नापि सकलतत्तद्व्यक्तित्वप्रकारकत्वम्, अनभ्युपगमात् । नापि प्रवृत्तिजनकतावच्छेदकविषयतावच्छेदकीभूतयावत्कार्यताकारणतावच्छेदकधर्मविषयकत्वम्, कार्यकारणभावावच्छेदककोटौ तद्व्यक्तित्वानामपि प्रवेशेन पुनरप्यनङ्गीकृताङ्गीकारापत्तेः । अत्र साधारणधर्मातिरिक्तत्वं समादधीथाश्चेद् हन्त भोः सर्वज्ञत्वसंकोचस्यावश्यकत्वे प्रमेयत्वेनैव सार्वज्ञ्यं समर्थयमानमन्यम्प्रति किं वक्ष्यसीत्यलं यः सर्वज्ञः सर्वविदित्यादिश्रुतिसहस्रगीयमानभगवत्सार्वज्ञविद्वेषिवक्रकल्पनाभिः । नित्यत्वकल्पे के चनासमाधेयदोषा निपतेयुश्चेत् अनिर्वचनीयतावादमाश्रित्य समाधेयाः, स हि चार्वाकानामपि शरणीकरणीयः किम्पुनरनेकादृश्यवस्तुस्वीकारभारमन्थरबुद्धीनामास्तिकानाम् । अन्यथा चार्वाकोपि सुखमेव कस्मात्कामयसे दुःखमेव कस्माच्चेत्येवम्पृष्टः किमुत्तरयेत् । तस्मात् ईश्वरीयज्ञानादीनि कदाप्यप्रत्यक्षयद्भिरस्माभिः कथमतर्क्यमाहात्म्यस्य तानि यथावद् वर्णयितुं शक्यन्ताम् इति युक्तो ऽनिर्वचनीयतावादो न तु तदीयज्ञानस्याल्पज्ञशङ्कामात्रात्संकोचनम् । यदि तु भगवतः कृतिर्नैव बहूनान्दर्शनकृतामिष्टा तस्याः स्वावच्छेदकशरीरक्रियात्वेनोपयोगादीश्वरे तदसम्भवात् केवलं नैयायिकेनैव सा स्वीक्रियते इत्युच्यते, तर्हि मास्तु सा, परम्भगवतो ज्ञानेच्छे तु नित्ये सर्वविषये अवश्यं मन्तव्ये इत्यलम् ॥

संस्कृतपत्रसंपादकाः { रामकृष्णशास्त्री, तत्सहकारिणौ गङ्गाधरशास्त्रिकेशवशास्त्रिणौ च ।

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 5. OCTOBER 2ND 1876. VOL. I.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अर्कैर्रश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

षष्ठाध्यायस्य प्रथमः पादः ।

इको यणचि ॥ ७७ ॥

अचि परत इको यणादेशो भवति । दध्यत्र । मध्वत्र । कर्त्रर्थम् । हर्त्रर्थम् । लाकृतिः ॥ इकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थं यणादेशो वक्तव्यः ॥ * ॥ भो३ इ इन्द्रम् । भो३ यिन्द्रम् । अचीति चायमधिकारः संप्रसारणाच्चेति यावत् ॥

एचोऽयवायावः ॥ ७८ ॥

एचः स्थानेऽचि परतोऽय् अव् आय् आव् इत्येते आदेशा यथासंख्यं भवन्ति । चयनम् । लवनम् । चायकः । लावकः । कयेते । ब्ययेते । यावबवणाङ्गि ॥

वान्तो यि प्रत्यये ॥ ७९ ॥

योऽयमेचः स्थाने वान्तादेश ओकारस्य अव् औकारस्याव् स यकारादौ प्रत्यये परतो भवति । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । पिचव्यः कार्पासः । नाव्यो ह्रदः । वान्त इति किम् । रायमिच्छति रैयति । यीति किम् । गोभ्याम् । नौभ्याम् । प्रत्यय इति किम् । गोयानम् । नौयानम् ॥ गोर्यूतौ छन्दसि ॥ * ॥ गोशब्दस्य यूतौ परतश्छन्दसि विषये वान्तादेशो वक्तव्यः । आनो मित्रावरुणा घृतैर्गव्यूतिमुचतम् । छन्दसीति किम् । गोयूतिः ॥ अध्वपरिमाणे च ॥ * ॥ गोर्यूतौ परतो वान्तादेशो वक्तव्यः । गव्यूतिमात्रमध्वानं गतः ॥

धातोस्तन्निमित्तस्यैव ॥ ८० ॥

एव इति वर्तते । वान्तो यि प्रत्यय इति च । धातोर्य एच् तन्निमित्तो यकारादिप्रत्ययनिमित्तस्तस्य यकारादौ प्रत्यये परतो वान्तादेशो

Digitized by Google

भवति । लव्यम् । पव्यम् । अवश्यलाव्यम् । अवश्यपाव्यम् । धातोरिति किम् । प्रातिपदिकस्य नियमो मा भूत् । तत्र को दोषः । बाभ्रव्य इत्यत्रैव स्यात् । इह न स्याद् गव्यं नाव्यमिति । तन्निमित्तस्येति किम् । अतन्निमित्तस्य मा भूत् । ओयते । औयत । लोयमानिः । पोयमानिः । अत इत् । एवकारकरणं किम् । धात्ववधारणं यथा स्यात् तन्निमित्तावधारणं मा भूदिति । तन्निमित्तस्य हि धातोश्चाधातोश्च भवति । बाभ्रव्यः । अवश्यलाव्यम् । लव्यम् ॥

क्षय्यजय्यौ शक्यार्थे ॥ ८१ ॥

क्षि जि इत्येतयोर्धात्वोर्यति प्रत्यये परतः शक्यार्थे गम्यमाने एकारस्यायादेशो निपात्यते । शक्यः क्षेतुं, क्षय्यः । शक्यो जेतुं, जय्यः । शक्यार्थ इति किम् । क्षेयं पापम् । जेयो वृषलः ॥

क्रय्यस्तदर्थे ॥ ८२ ॥

क्रीणातेर्धातोस्तदर्थे क्रयार्थे यत्तस्मिन्नभिधेये यति प्रत्यये परतो ऽयादेशो निपात्यते । क्रय्यो गौः । क्रय्यः कम्बलः । क्रयार्थं यः प्रसारितः स उच्यते । तदर्थ इति किम् । क्रेयं नो धान्यं न चास्ति क्रय्यम् ॥

भय्यप्रवय्ये चच्छन्दसि ॥ ८३ ॥

बिभेतेर्धातोः प्रपूर्वस्य च वी इत्येतस्य यति प्रत्यये परतश्छन्दसि विषये ऽयादेशो निपात्यते । भय्यं किलासीत् । वत्सतरी प्रवय्या । भय्येति कृत्यल्युटो बहुलमित्यपादाने यत्प्रत्ययः । बिभेत्यस्मादिति भय्यम् । प्रवय्या इति स्त्रियामेव निपातनम् । अन्यत्र प्रवेयमित्येव भवति । छन्दसीति किम् । भेयम् । प्रवेयम् ॥ ह्रदय्या आप उपसंख्यानम् ॥ * ॥ ह्रदय्या आपः । ह्रदे भवा, भवे छन्दसीति यत्प्रत्ययः ॥

एकः पूर्वपरयोः ॥ ८४ ॥

अधिकारोयम् । ख्यत्यात्परस्येति प्रागेतस्मात्सूत्रादित उत्तरं यद्वक्ष्यामस्तत्र पूर्वस्य परस्य द्वयोरपि स्थाने एकादेशो भवतीत्येतद्वेदितव्यम् । वक्ष्यति । आद्गुण इति । तत्राचि पूर्वस्यावर्णाच्च परस्य स्थाने

Digitized by Google

एको गुणो भवति । खट्वेन्द्रः । मालेन्द्रः । पूर्वपरग्रहणं द्वयोरपि युगपदादेशप्रतिपत्त्यर्थम् । एकैकस्यैव हि स्यात् । नोभे सप्तमीपञ्चम्यौ युगपत्प्रकल्पिके भवत इति । एकग्रहणं पृथगादेशनिवृत्त्यर्थं स्थानिभेदाद्धि भिन्नादिषु नत्ववद्भावादेशौ स्याताम् ॥

अन्तादिवच्च ॥ ८५ ॥

एक इति वर्त्तते, पूर्वपरयोरिति च । एकः पूर्वपरयोरिति योऽयमेकादेशो विधीयते स पूर्वस्यान्तवद्भवति, परस्यादिवद्भवति । यथा तस्यान्त आदिर्वा तदन्तर्भूतस्तद्ग्रहणेन गृह्यते तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यतइत्येषोऽतिदेशार्थः । ब्रह्मबन्धूरित्यत्र ब्रह्मबन्ध्विति प्रातिपदिकम्, ऊङित्यप्रातिपदिकं, तयोः प्रातिपदिकाप्रातिपदिकयोर्य एकादेशः स प्रातिपदिकस्यान्तवद्भवति । यथा शक्यते कर्त्तुं ङ्याप्प्रातिपदिकादिति स्वादिविधिः । वृक्षावित्यत्र सुबौकारः असुबकारः, तयोः सुबसुपोरेकादेशः सुप आदिवद्भवति । यथा शक्यते वक्तुं सुबन्तं पदमिति । वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यते, तथाहि खट्वाभिरित्यत्रान्तवद्भावाभावादतो भिस ऐसिति न भवति । हूयतेर्जुहावेति संप्रसारणपूर्वत्वस्यादिवद्भावाभावादात औ णल इति न भवति । अस्यै अश्वः, अस्या अश्व इति वृद्धिरेचीति वृद्धिरेङः पदान्तादतीत्यत्र विधावादिवन्न भवति । पूर्वपरसमुदाय एकादेशस्य स्थानी, स हि तेन निवर्त्यते, तत्रावयवयोरानुमानिकं स्थानित्वमिति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तमित्यन्तादिवद्भावो विधीयते ॥

षत्वतुकोरसिद्धः ॥ ८६ ॥

षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्धो भवति, सिद्धकार्यं न करोतीत्यर्थः । असिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च । कोसिचद् इत्यत्र एङः पदान्तादतीत्येकादेशस्य परं प्रत्यादिवत्त्वादपदादेरिण उत्तरस्यादेशस्य सकारस्य षत्वं प्राप्नोति, तदसिद्धत्वान्न भवति । कोस्य योस्य कोस्मै योस्मै इत्येकादेशस्यासिद्धत्वादिण इति षत्वं न भवति । तुग्विधौ । अधीत्य प्रेत्येत्यत्रैकादेशस्यासिद्धत्वात् ह्रस्वस्य पिति

ज्ञलि तुगिति तुग्भवति ॥ संप्रसारणङीट्सु प्रतिषेधो वक्तव्यः ॥ * ॥ संप्रसारणे । ब्रह्महूषु । परिवीषु । संप्रसारणपूर्वत्वस्यासिद्धत्वात्षत्वं न प्राप्नोति । ङौ । वृक्षेच्छत्रम् । वृक्षे छत्रम् । ईटि । अपचेच्छत्रम् । अपचे छत्रम् । आद्गुणस्यासिद्धत्वाद् ह्रस्वलक्षणो नित्योऽत्र तुक् प्राप्नोति, दीर्घात्पदान्ताद्वेति तुग्विकल्प इष्यते ॥

आद्गुणः ॥ ८७ ॥

अचीत्यनुवर्तते । अवर्णात्परो योऽच् अचि च पूर्वो योऽवर्णस्तयोः पूर्वपरयोरवर्णाचोः स्थाने एको गुण आदेशो भवति । तवेदम् । खट्वेन्द्रः । मालेन्द्रः । तवेहते । खट्वेहते । तवोदकम् । खट्वोदकम् । तवर्श्यः । खट्वर्श्यः । तवल्कारः । खट्वल्कारः । लृकारस्य स्थाने योऽण् तस्य लपरत्वमिष्यते ॥

वृद्धिरेचि ॥ ८८ ॥

आदिति वर्तते । अवर्णात्परो य एच् एचि च पूर्वो योऽवर्णस्तयोः पूर्वपरयोरवर्णैचोः स्थाने वृद्धिरेकादेशो भवति । आद्गुणस्यापवादः । ब्रह्मैडका । खट्वैडका । ब्रह्मैतिकायनः । खट्वैतिकायनः । ब्रह्मौदनः । खट्वौदनः । ब्रह्मौपगवः । खट्वौपगवः ॥

एत्येधत्यूठ्सु ॥ ८९ ॥

वृद्धिरेचीति वर्तते, आदिति च । तदेतदेज्ग्रहणमेतेरेव विशेषणं न पुनरेधतेरव्यभिचारादूठश्चासंभवात् । इण् गतावित्येतस्मिन्धातावेचि एध वृद्धावित्येतस्मिन् ऊठि च पूर्वे यदवर्णं ततश्च परो योऽच् तयोः पूर्वपरयोरवर्णाचोः स्थाने वृद्धिरेकादेशो भवति । उपैति । उपैषि । उपैमि । उपैधते । प्रैधते । प्रष्ठौहः । प्रष्ठौहा । प्रष्ठौहे । ऊठ्याद्गुणापवादो वृद्धिर्विधीयते । एत्येधत्योस्त्वेङिपररूपापवादः । ओमाङोश्चेत्येतत्तु पररूपं न बाध्यते, येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति, पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इति वा । तेनेह न भवति । उप आ इत उपेत इति । एचीत्येव । उप इत, उपेतः ॥ अक्षादूहिन्यां वृद्धिर्वक्तव्या ॥ * ॥ अक्षौहिणी ॥ स्वादीरेरिणोर्वृद्धिर्वक्तव्या ॥ * ॥

स्वैरम् । स्वैरिणी * ॥ प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या ॥ * ॥ प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः † ॥ ऋते च तृतीयासमासे ऽवर्णाद् वृद्धिर्वक्तव्या ॥ * ॥ सुखेन ऋतः, सुखार्तः । दुःखेन ऋतो, दुःखार्तः । ऋत इति किम् । सुखेन इतः सुखेतः । तृतीयेति किम् । परमर्तः । समासइति किम् । सुखेनर्तः ॥ प्रवत्सतरकम्बलवसनानामृणे वृद्धिर्वक्तव्या ॥ * ॥ प्र । प्रार्णम् । वत्सतर । वत्सतरार्णम् । कम्बल । कम्बलार्णम् । वसन । वसनार्णम् ॥ ऋणदशाभ्यां वृद्धिर्वक्तव्या ॥ * ॥ ऋणार्णम् । दशार्णम् ॥

आटश्च ॥ ९० ॥

एचीति निवृत्तम् । अचीत्यनुवर्त्तते । आटः परो योऽच् अचि च पूर्वो य आट् तयोः पूर्वपरयोराडचोः स्थाने वृद्धिरेकादेशो भवति । ऐचिष्ट । ऐक्षत । ऐक्षिष्यत । औभीत् । आर्द्धात् । औब्जीत् । चकारोऽधिकविधानार्थं उस्योमाङ्गोश्च पररूपबाधनार्थः । औस्रीयत् । औकारीयत् । आ ऊढा ओढा, तामैच्छत्, औढीयत् ॥

उपसर्गादृति धातौ ॥ ९१ ॥

आदित्येव । अवर्णान्तादुपसर्गादृकारादौ धातौ परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति । आद्गुणापवादः । उपार्च्छति । प्रार्च्छति । उपार्ध्नोति । उपसर्गादिति किम् । खट्वर्च्छति । मालर्च्छति । प्रगता ऋच्छका अस्माद्देशात्, प्रर्च्छको देशः । यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका इति । ऋतीति किम् । उप इत, उपेतः । तपरकरणं किम् । उप ऋकारीयति । उपर्कारीयति । वा सुप्यापिशलेरिति विकल्पः स्यात् । उपसर्गग्रहणादेव धातुग्रहणे सिद्धे धातुग्रहणं शाकलनिवृत्त्यर्थम् । ऋत्यक इति हि शाकल्यस्य प्रकृतिभावः प्राप्नोति ॥

वा सुप्यापिशलेः ॥ ९२ ॥

आदित्येव । उपसर्गादृति धाताविति च । सुबन्तावयवे धाता-

---

* स्वादीरेरिणोर्वृद्धिर्वक्तव्या ॥ * ॥ स्वैरः । स्वैरी । पा० २ ।

† अत्र वार्त्तिके ऊहग्रहणं· प्रौह इति तदुदाहरणं च पुस्तकान्तरेऽधिके ।

Digitized by Google

वृकारादौ परतो ऽवर्णान्तादुपसर्गात्पूर्वपरयोरापिशलेराचार्यस्य मतेन वा वृद्धिरेकादेशो भवति । उपर्षभीयति । उपार्षभीयति । उपल्कारीयति । उपाल्कारीयति । ऋकारलृकारयोः सावर्ण्यंविधिरिति ऋतीति लृकारोपि गृह्यते । आपिशलिग्रहणं पूजार्थम् । वेति सुव्यतएव ॥

ओतो ऽम्शसोः ॥ ९३ ॥

ओतो ऽमि शसि च परतः पूर्वपरयोराकार आदेशो भवति । गां पश्य । गाः पश्य । द्यां पश्य । द्याः पश्य । ओशब्दोप्योकारान्त एव विद्यते, ततोपि परं सर्वनामस्थानं णिदिष्यते, तेन नाप्राप्तायां वृद्धावयमाकारो विधीयमानस्तां बाधते । अमिति द्वितीयैकवचनं गृह्यते, शसा साहचर्यात् सुपीति चाधिकारात् । तेनाचिनवमसुनवमित्यत्र न भवति ॥

एङि पररूपम् ॥ ९४ ॥

आदित्येव, उपसर्गाद्धाताविति च । अवर्णान्तादुपसर्गादेङादौ धातौ पूर्वपरयोः पररूपमेकादेशो भवति । वृद्धिरेचीत्यस्यापवादः । उपेलयति । प्रेलयति । उपोषति । प्रोषति । केचिद्वा सुप्यापिशलेरित्यनुवर्त्तयन्ति तद्वाक्यभेदेन सुब्धातौ विकल्पं करोति । उपेडकीयति । उपैडकीयति । उपोद्नीयति । उपौदनीयति ॥ शकन्ध्वादिषु पररूपं वक्तव्यम् ॥ * ॥ शक अन्धुः, शकन्धुः । कुल अटा, कुलटा ॥ सीमन्तः केशेषु ॥ सीम्नो ऽन्तः, सीमन्तः । अन्यत्र सीमान्तः ॥ एवे चानियोगे पररूपं वक्तव्यम् ॥ * ॥ इह एव, इहेव । अद्य एव, अद्येव । अनियोगइति किम् । इहैव भव मा ऽन्यत्र गाः ॥ ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम् ॥ * ॥ स्थूल ओतुः, स्थूलोतुः । स्थूलौतुः । बिम्बोष्ठी । बिम्बौष्ठी । समासइति किम् । तिष्ठ देवदत्तौष्ठं पश्य ॥ एमन्नादिषु छन्दसि पररूपं वक्तव्यम् ॥ * ॥ अपां त्वा एमन्, अपां त्वेमन् । अपां त्वा ओद्मन्, अपां त्वोद्मन् ॥

ओमाङोश्च ॥ ९५ ॥

आदित्येव । अवर्णान्तादोमि आङि च परतः पूर्वपरयोः स्थाने

Digitized by Google

पररूपमेकादेशो भवति । का ओमित्यवोचत्, कोमित्यवोचत् । योमित्यवोचत् । आङि खल्वपि । आ ऊढा, ओढा । अद्य ओढा, अद्योढा । कदा ओढा, कदोढा । तदा ओढा, तदोढा । वृद्धिरेचीत्यस्यापवादः । इह तु आ ऋश्यात् अर्श्यात् अद्य अर्श्यात् अद्यर्श्यादिति अकः सवर्णे दीर्घत्वं बाधते ॥

उस्यपदान्तात् ॥ ९६ ॥

आदित्येव । अवर्णादपदान्तादुसि पूर्वपरयोराद्गुणापवादः पररूपमेकादेशो भवति । भिन्द्या उस्, भिन्द्युः । छिन्द्या उस्, छिन्द्युः । अदा उस्, अदुः । अया उस्, अयुः । अपदान्तादिति किम् । का उस्रा, कोस्रा । का उषिता, कोषिता । आदित्येव । चक्रुः । अबिभयुः ॥

अतो गुणे ॥ ९७ ॥

अपदान्तादिति वर्त्तते । अकारादपदान्ताद्गुणे परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । पचन्ति । यजन्ति । अकः सवर्णे दीर्घस्यापवादः । पचे यजे इत्यत्र वृद्धिरेचीति वृद्धिः प्राप्नोति । अत इति किम् । यान्ति । वान्ति । गुण इति किम् । अपचे । अयजे । अपदान्तादित्येव । दण्डाग्रम् । यूपाग्रम् ॥

अव्यक्तानुकरणस्यात इतौ ॥ ९८ ॥

अव्यक्तमपरिस्फुटवर्णं तदनुकरणं परिस्फुटवर्णमेव केन चित्सादृश्येन तदव्यक्तमनुकरोति तस्य योऽच्छब्दस्तस्मादितौ पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । पटत् इति, पटिति । घटत् इति, घटिति । झटत् इति, झटिति । छमित् इति, छमिति । अव्यक्तानुकरणस्येति किम् । जगत् इति, जगदिति । अत इति किम् । मरट् इति, मरडिति । इताविति किम् । पटत् अत्र, पटदत्र ॥ अनेकाच इति वक्तव्यम् ॥ * ॥ इह मा भूत् । स्रत् इति, स्रदिति । कथं घटदिति गम्भीरमम्बुदैर्नदितमिति । दकारान्तमेतदनुकरणं द्रष्टव्यम् ॥

नाम्रेडितस्यान्त्यस्य तु वा ॥ ९९ ॥

अव्यक्तानुकरणस्याम्रेडितस्य यो ऽच्छब्द इतो तस्य पररूपं न भवति तस्य योन्त्यस्तकारस्तस्य वा भवति। पटत्पटदिति। पटत्पटेति करोति। नित्यवीप्सयोरिति द्विर्वचनम्। यदा तु समुदायानुकरणं तदा भवत्येव पूर्वस्य पररूपं पटत्पटेति करोति ॥

नित्यमाम्रेडिते डाचि ॥ १०० ॥

अव्यक्तानुकरणस्यातो ऽन्त्यस्येति चानुवर्त्तते। डाच्परं यदाम्रेडितं तस्मिन्पूर्वस्याव्यक्तानुकरणस्याच्छब्दस्य योन्त्यस्तकारस्तस्य पूर्वस्य परस्य चाकारस्य वर्णस्य नित्यं पररूपमेकादेशो भवति। पटपटा करोति। दमदमा करोति *। पटदित्यस्मादव्यक्तानुकरणादिति डाचि विहिते डाचि बहुलमिति द्विर्वचनं तच्च टिलोपात्पूर्वमेवेष्यते ॥

अकः सवर्णे दीर्घः ॥ १०१ ॥

अकः सवर्णे ऽचि परतः पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति। दण्डाग्रम्। दधीन्द्रः। मधूदके। होतॄश्यः। अक इति किम्। अग्नये। सवर्णइति किम्। दध्यत्र। अचीत्येव। कुमारी शेते। नाज्झलावित्यत्र यद्ग्रहणात्याहारग्रहणं तत्र ग्रहणकशास्त्रस्यानभिनिर्वृत्तत्वात्सवर्णा न गृह्यन्त इति सवर्णत्वमीकारशकारयोरप्रतिषिद्धम् ॥ सवर्णदीर्घत्वे ऋति ऋ वा वचनम् ॥ * ॥ ऋति सवर्णे परभूते तत्र ऋ वा भवतीति वक्तव्यम्। होतृ ऋकारः, होतृऋकारः। यदा न ऋ तदा दीर्घ एव होतॄकारः ॥ ऌति ऌ वा वचनम् ॥ * ॥ ऌति सवर्णे परतो ऌ वा भवतीति वक्तव्यम्। होतृ ऌकारः। होतॢकारः। होतॄकारः। ऋकारऌकारयोः सवर्णविधिरुक्तो दीर्घपक्षे तु समुदायान्तरतमस्य ऌवर्णस्य दीर्घस्याभावात् ऋकारः क्रियते ॥

प्रथमयोः पूर्वसवर्णः ॥ १०२ ॥

अक इति दीर्घ इति वर्तते। प्रथमाशब्दो विभक्तिविशेषे रूढस्तत्साहचर्यात् द्वितीयापि प्रथमेत्युक्ता। तस्यां प्रथमायां द्वितीयायां च विभक्तावचि अकः पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशो भवति। अग्नी।

* मटमटाकरोतीत्यधिकं पुस्तकान्तरे।

Digitized by Google

वायू। वृक्षाः। प्लक्षाः। वृक्षान्। प्लक्षान्। अतो गुणे इति यदकारे पररूपं तदकः सवर्णे दीर्घत्वमेव बाधते, न तु पूर्वसवर्णदीर्घत्वं, पुरस्तादपवादा अनन्तरान्विधीन्बाधन्तइति। अचीत्येव। वृक्षः। प्लक्षः। अक इत्येव। नावौ। पूर्वसवर्णग्रहणं किम्। अग्नी इत्यत्र पक्षे परसवर्णो मा भूत्। दीर्घग्रहणं किम्। त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थम्॥

तस्माच्छसो नः पुंसि॥ १०३॥

तस्मात्पूर्वसवर्णदीर्घादुत्तरस्य शसोऽवयवस्य सकारस्य पुंसि नकारादेशो भवति। वृक्षान्। अग्नीन्। वायून्। कर्तॄन्। हर्तॄन्। षण्डकान्। स्थूरान्। अरकान्पश्य। सर्वएते पुल्लिङ्गविशिष्टं स्वार्थं प्रतिपादयन्ति। इह तु चञ्चेव चञ्चा। लुम्मनुष्यइति कनो लुपि कृते लुपि युक्तवद् व्यक्तिवचनइति पुंसोपि स्त्रीलिङ्गता, तेन नत्वं न भवति, चञ्चाः पश्य, वध्रिकाः पश्येति। तस्मादिति किम्। एतांश्चरतो गाः पश्य। शस इति किम्। वृक्षाः। प्लक्षाः। पुंसीति किम्। धेनूः। बह्वीः। कुमारीः॥

नादिचि॥ १०४॥

अवर्णादिचि पूर्वसवर्णदीर्घो न भवति। वृक्षौ। प्लक्षौ। खट्वे। कुण्डे। आदिति किम्। अग्नी। इचीति किम्। वृक्षाः॥

दीर्घाज्जसि च॥ १०५॥

दीर्घाज्जसि इचि च परतः पूर्वसवर्णदीर्घो न भवति। कुमार्यौ। कुमार्यः। ब्रह्मबन्ध्वौ। ब्रह्मबन्ध्वः॥

वा छन्दसि॥ १०६॥

दीर्घाच्छन्दसि विषये जसि च इचि च परतो वा पूर्वसवर्णदीर्घो न भवति। मारुतीश्चतस्रः। पिण्डीः। मारुत्यश्चतस्रः। पिण्ड्यः। वाराही। उपानही। वाराह्यौ। उपानह्यौ॥

अमि पूर्वः॥ १०७॥

अक इत्येव। अमि परतोऽकः पूर्वपरयोः स्थाने पूर्व एकादेशो भवति। वृक्षम्। प्लक्षम्। अग्निम्। वायुम्। पूर्वग्रहणं किम्। पूर्व एव

यथास्यात्, पूर्वसवर्णो ऽन्तरतमो मा भूदिति । कुमारीमित्यत्र हि त्रिमात्रः स्यात् । वा छन्दसीत्येव । शर्मी च । शर्म्यं च । गौरीं च । गौर्यं च ॥

संप्रसारणाच्च ॥ १०८ ॥

पूर्व इत्येव । संप्रसारणादचि परतः पूर्वपरयोः स्थाने पूर्व एकादेशो भवति । यजि । इष्टम् । वपि । उप्तम् । ग्रहि । गृहीतम् । संप्रसारणविधानसामर्थ्याद्विगृहीतस्य श्रवणे प्राप्ते पूर्वत्वं विधीयते । वा छन्दसीत्येव । मित्रावरुणौ यज्यमानौ । पूर्वत्वविधाने सत्यर्थवत्संप्रसारणविधानमिति इष्ट इत्येवमादिषु पूर्वत्वाभावे यणादेशो भवत्येव । अन्तरङ्गे चाविकृतार्थं वचनमिति बाह्ये पश्चात्संनिपतिते पूर्वत्वं न भवति । शकहूा । शकहूयम् ॥

एङः पदान्तादति ॥ १०९ ॥

एङ् यः पदान्तस्तस्मादति परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । अग्नेऽत्र । वायोऽत्र । अयवादेशयोरयमपवादः । एङ इति किम् । दध्यत्र । मध्वत्र । पदान्तादिति किम् । चयनम् । लवनम् । अतीति किम् । वायो इति । भानो इति । वायविति । भानविति । तपरकरणं किम् । वायवायाहि ॥

ङसिङसोश्च ॥ ११० ॥

एङ इति वर्त्तते, अतीति च । एङ उत्तरयोर्ङसिङसोरति परतः पूर्वपरयोः स्थाने पूर्व एकादेशो भवति । अग्नेरागच्छति । वायोरागच्छति । अग्नेः स्वम् । वायोः स्वम् । अपदान्तार्थ आरम्भः ॥

ऋत उत् ॥ १११ ॥

ङसिङसोरित्येव । ऋकारान्तादुत्तरयोर्ङसिङसोरति पूर्वपरयोरुकार एकादेशो भवति । होतुरागच्छति । होतुः स्वम् । द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यः स लभते ऽन्यतरव्यपदेशमिति उरण् रपर इति रपरत्वमत्र कृत्वा रात्सस्येति सलोपः कर्तव्यः ॥

ख्यत्यात्परस्य ॥ ११२ ॥

ङसिङसोरिति वर्त्तते, उदिति च। ख्यत्यादिति खिशब्दखीशब्दयोस्तिशब्दतीशब्दयोश्च कृतयणादेशयोरिदं ग्रहणं, ताभ्यां परस्य ङसिङसोरत उकारादेशो भवति। सख्युरागच्छति। सख्युः स्वम्। पत्युरागच्छति। पत्युः स्वम्। खीशब्दस्योदाहरणम्। सह खेन वर्त्तत इति सखस्तमिच्छतीति क्यच् सखीयति। सखीयतेः क्विप् सखीस्तस्य ङसिङसोः सख्युरिति। तीशब्दस्यापि। लूनमिच्छति, लूनीयति। लूनीयतेः क्विपि लुप्ते लून्युरागच्छति। लून्युः स्वम्। निष्ठानत्वं पूर्वत्रासिद्धमित्यसिद्धम्। विकृतनिर्द्देशादेवेह न भवति, अतिसखेरागच्छति, सेनापतेरागच्छतीति। सखिशब्दस्य केवलस्य घिसंज्ञा प्रतिषिध्यते न तदन्तस्य॥

अतो रोरप्लुतादप्लुते॥ ११३॥

अति, उदिति वर्त्तते। अकारादप्लुतादुत्तरस्य रोरेफस्य उकारानुबन्धविशिष्टस्य अकारे ऽप्लुते परत उकारादेशो भवति। वृक्षोऽत्र। प्लक्षोऽत्र। भोभगोअघोअपूर्वस्य योऽशीत्यस्मिन्प्राप्ते उत्वं विधीयते। उत्वमस्याश्रयत्वात्पूर्वत्रासिद्धमित्यसिद्धं न भवति। अत इति किम्। अग्निरत्र। तपरकरणं किम्। वृक्षा अत्र। सानुबन्धग्रहणं किम्। स्वरत्र। प्रातरत्र। अतीत्येव। वृक्ष इह। तस्यापि तपरत्वादत्र न भवति। वृक्ष आश्रितः। अप्लुतादिति किम्। सुस्रोता३ अत्र न्वसि। अप्लुत इति किम्। तिष्ठतु पय आ३श्विन्। अत्र प्लुतस्यासिद्धत्वादुत्वं प्राप्नोतीत्यप्लुतादप्लुत इत्युच्यते॥

हशि च॥ ११४॥

हशि च परतो ऽत उत्तरस्य रोरुकारादेशो भवति। पुरुषो याति। पुरुषो हसति! पुरुषो ददाति॥

प्रकृत्या ऽन्तःपादमव्यपरे॥ ११५॥

एङो ऽतीत्येव। एङ इति यत्पञ्चम्यन्तमनुवर्त्तते तदर्थादिह प्रथमान्तं भवति। प्रकृतिरिति स्वभावः कारणं वा ऽभिधीयते। अन्तरित्यव्ययमधिकरणभूतं मध्यमाचष्टे। पादशब्देन च ऋक्पादस्यैव ग्रहणमिष्यते न तु श्लोकपादस्य। अवकारयकारपरे ऽति परत एङ् प्रकृत्या

भवति । स्वभावेन कारणात्मना वा न विकारमापद्यते । तौ चेन्निमित्त-कार्यिणावन्तःपादमृक्पादमध्ये भवतः । ते अग्रे अश्वमायुञ्जन् । ते अस्मिन् जवमादधुः । उपप्रयन्तो अध्वरम् । शिरो अपश्यम् । सुजाते अश्वसूनृते । अध्वर्यो अद्रिभिः सुतम् । अन्तःपादमिति किम् । कया मती कुत एतास एते ऽर्चन्ति । अव्यपरइति किम् । ते ऽवदन् । ते ऽयस्मयम् । एङिति किम् । अन्वग्निरुषसामग्रमख्यत् । के चिदिदं सूत्रं नान्तःपादमव्यपरइति पठन्ति, ते संहितायामिह यदुच्यते तस्य सर्वस्य प्रतिषेधं वर्णयन्ति ॥

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ॥ ११६ ॥

अव्यात् अवद्यात् अवक्रमुः अव्रत अयम् अवन्तु अवस्यु इत्येतेषु यकारवकारपरेष्वपि परतो ऽन्तःपादमेङ् प्रकृत्या भवति । अग्निः प्रथमो वसुभिर्नो अव्यात् । मित्रमहो अवद्यात् । मा शिवासो अवक्रमुः । ते नो अव्रताः । शतधारो अयं मणिः । ते नो अवन्तु पितरः । कुशिकासो अवस्यवः ॥

यजुष्युरः ॥ ११७ ॥

उरः शब्द एङन्तो यजुषि विषये ऽति प्रकृत्या भवति । उरो अन्तरिक्षम् ॥ अपरे यजुष्युरो इति सूत्रं पठन्ति । उकारान्तमुरुशब्दं संबुध्यन्तमधीयते तदिदमुदाहरन्ति, उरो अन्तरिक्षं सजूरिति । यजुषि पादानामभावादनन्तःपादार्थं वचनम् ॥

आपोजुषाणोवृष्णोवर्षिष्ठेम्बेम्बालेम्बिकेपूर्वे ॥ ११८ ॥

यजुषीत्येव । आपो जुषाणो वृष्णो वर्षिष्ठे इत्येते शब्दा अम्बे अम्बाले इत्येतौ च यावम्बिकेशब्दात्पूर्वौ यजुषि पठितौ ते अति परतः प्रकृत्या भवन्ति । आपो अस्मान्मातरः शुन्धयन्तु । जुषाणो अप्तुराज्यस्य । वृष्णो अंशुभ्यां गभस्तिभिः । वर्षिष्ठे अधिनाके । अम्बे अम्बाले अम्बिके । यजुषीदमीदृशमेव पठ्यते । अस्मादेव निपातनादम्बार्थनद्योर्ह्रस्व इति ह्रस्वत्वं न भवति ॥

Digitized by Google

अङ्ग इत्यादौ च ॥ ११९ ॥

अङ्गशब्दे य एङ् तदादौ चाकारे यः पूर्वः स यजुषि विषये ऽति प्रकृत्या भवति । ऐन्द्रः प्राणो अङ्गेअङ्गे अदीध्यत् । ऐन्द्रः प्राणो अङ्गेअङ्गे निदीध्यत् । ऐन्द्रः प्राणो अङ्गेअङ्गे अरोचिषम् ॥

अनुदात्ते च कुधपरे ॥ १२० ॥

यजुषीत्येव । अनुदात्ते चाति कवर्गधकारपरे परतो यजुषि विषये एङ् प्रकृत्या भवति । अयं सो अग्निः । अयं सो अध्वरः । अनुदात्त इति किम् । अधोग्ने । अग्रशब्द आद्युदात्तो निपात्यते । कुधपर इति किम् । सोयमग्निः सहस्रियः ॥

अवपथासि च ॥ १२१ ॥

यजुषीत्येव । अनुदात्त इति चशब्देनानुकृष्यते । अवपथाःशब्दे ऽनुदात्ते ऽकारादौ परतो यजुषि विषय एङ् प्रकृत्या भवति । त्री रुद्रेभ्यो अवपथाः । वपेर्लङि थासि तिङ्ङतिङ इति निघातेनानुदात्तत्वम् । अनुदात्त इत्येव । यद्रुद्रेभ्योवपथाः । निपातैर्यद्यदिहन्तेति निघातः प्रतिषिध्यते ॥

सर्वत्र विभाषा गोः ॥ १२२ ॥

सर्वत्र, छन्दसि भाषायां चाति परतो गोरेङ् प्रकृत्या भवति विभाषा । गोग्रम् । गो अग्रम् । छन्दसि । अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोश्वाः ॥

अवङ् स्फोटायनस्य ॥ १२३ ॥

अतीति निवृत्तम् । अचीत्येतत्त्वनुवर्त्तत एव । अचि परतो गोः स्फोटायनस्याचार्यस्य मतेनावङादेशो भवति । गवाग्रम् । गोग्रम् । गवाजिनम् । गोजिनम् । गवोदनम् । गवौदनम् । गवोष्ट्रम् । गवुष्ट्रम् । आद्युदात्तश्चायमादेशो निपात्यते स निपातनस्वरो बहुव्रीहौ प्रकृतिस्वरविधाने भवति । गावो अग्रमस्य, गवाग्र इति । अन्यत्र तु समासान्तोदात्तत्वेन

Digitized by Google

बाध्यते । स्फोटायनग्रहणं पूजार्थं, विभाषेत्येव हि वर्त्तते । व्यवस्थितविभाषेयं, तेन गवाग्रमित्यत्र नित्यमवङ् भवति ॥

इन्द्रे च नित्यम् ॥ १२४ ॥

इन्द्रशब्दस्थे ऽचि परतो गोर्नित्यमवङादेशो भवति । गवेन्द्रः । गवेन्द्रयज्ञस्वरः* ॥

प्लुतप्रगृह्या अचि ॥ १२५ ॥

प्लुताश्च प्रगृह्याश्चाचि प्रकृत्या भवन्ति । देवदत्ता३ अत्र न्वसि । यज्ञदत्ता३ इदमानय । आश्रयादत्र प्लुतः सिद्धः । प्रगृह्याः । अग्नी इति । वायू इति । खट्वे इति । माले इति । अचीत्यनुवर्त्तमाने पुनरज्ग्रहणमादेशनिमित्तस्याचः परिग्रहार्थम् । तेनेह न भवति । जानु उ अस्य रुजति, जान्वस्य रुजति । प्रगृह्यादुकारात्परस्याकारस्य सवर्णदीर्घत्वं प्रत्यनिमित्तत्वात्तत्र प्रकृतिभावो न भवति । नित्यग्रहणमिहानुवर्त्तते । प्लुतप्रगृह्याणां नित्यमयमेव प्रकृतिभावो यथा स्यादिकोऽसवर्णे शाकल्यस्य ह्रस्वश्चेत्येतन्मा भूदिति ॥

आङो ऽनुनासिकश्छन्दसि ॥ १२६ ॥

आङो ऽचि परतः संहितायां छन्दसि विषये ऽनुनासिकादेशो भवति स च प्रकृत्या भवति । अभ्रआँ अपः । गभीरआँ उग्रपुत्रे जिघांसत । केचिदाङोऽनुनासिकश्छन्दसि बहुलमित्यधीयते । तेनेह न भवति । इन्द्रो बाहुभ्यामातरत् । आ अतरत् ॥

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ १२७ ॥

इको ऽसवर्णे ऽचि परतः शाकल्यस्याचार्यस्य मतेन प्रकृत्या भवन्ति, ह्रस्वश्च तस्येकः स्थाने भवति । दधि अत्र । दध्यत्र । मधु अत्र । मध्वत्र । कुमारि अत्र । कुमार्यत्र । किशोरि अत्र । किशोर्यत्र । इक इति किम् । खट्वेन्द्रः । असवर्ण इति किम् । कुमारीन्द्रः । शाकल्यस्य ग्रहणं पूजार्थम् ।

* यज्ञचकः । पा॰२ ।

Digitized by Google

आरम्भसामर्थ्यादेव हि यणादेशेन सह विकल्पः सिद्धः ॥ सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्यः ॥ * ॥ सिनि । अयं ते योनिर्ऋत्वियः । नित्यसमासे । व्याकरणम् । कुमार्यर्थम् ॥ ईषाअक्षादिषु छन्दसि प्रकृतिभावमात्रं वक्तव्यम् ॥ * ॥ ईषा अक्षः । का ईमारे पिशङ्गिला । यथा अगमन् ॥

ऋत्यकः ॥ १२८ ॥

शाकल्यस्य ह्रस्वश्चेत्येतदनुवर्त्तते । ऋकारे परतः शाकल्यस्याचार्यस्य मतेनाकः प्रकृत्या भवन्ति, ह्रस्वश्च तस्याकः स्थाने भवति । खट्व ऋश्यः । माल ऋश्यः । कुमारि ऋश्यः । होतृ ऋश्यः * । ऋतीति किम् । खट्वेन्द्रः । अक इति किम् । वृक्षावृश्यः । सवर्णार्थमनिगर्थं च वचनम् ॥

अप्लुतवदुपस्थिते ॥ १२९ ॥

उपस्थितं नामानार्ष इतिकरणः समुदायादवच्छिद्य पदं येन स्वरूपे ऽवस्थाप्यते तस्मिन्परतो ऽप्लुतवद्भवति । प्लुतकार्यं प्रकृतिभावं न करोति । सुश्लोका३ इति, सुश्लोकेति । सुमङ्गला३ इति, सुमङ्गलेति । वत्करणं किम् । अप्लुत इत्युच्यमाने प्लुत एव प्रतिषिध्यते । तत्र को दोषः । प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् । अग्नी३ इति । वायू३ इति ॥

ई३ चाक्रवर्मणस्य ॥ १३० ॥

ई३ कारः प्लुतो ऽचि परतश्चाक्रवर्मणस्याचार्यस्य मतेनाप्लुतवद्भवति । अस्तु हीत्यब्रवीत् । अस्तु ही३ इत्यब्रवीत् । चिनु हीदम् । चिनु ही३ इदम् । चाक्रवर्मणग्रहणं विकल्पार्थं तदुपस्थिते निवृत्त्यर्थम् अनुपस्थिते प्राप्त्यर्थमित्युभयत्र विभाषेयम् । इकारादन्यत्राप्ययमप्लुतवद्भाव इष्यते । वशा३ इयम् । वशेयम् ॥

दिव उत् ॥ १३१ ॥

एङः पदान्तादतीत्यतः पदग्रहणमनुवर्त्तते । दिव इति प्राति-

* पोतृ ऋश्य इत्यधिकं पुस्तकान्तरे ।

यदिकं गृह्यते न धातुः, सानुबन्धकत्वात् । दिवः पदस्य उकारादेशो भवति । दिवि कामो यस्य, द्युकामः । द्युमान् । विमलद्यु दिनम् । द्युभ्याम् । द्युभिः । निरनुबन्धकग्रहणादिह न भवति । अक्षद्यूभ्याम्, अक्षद्यूभिरिति । तपरकरणमूठो निवृत्त्यर्थं द्युभ्यां द्युभिरिति । अत्र हि परत्वादूठ् प्राप्नोति । पदस्येति किम् । दिवौ । दिवः ॥

एतत्तदोः सु लोपो ऽकोरनञ्समासे हलि ॥ १३२ ॥

एतत्तदौ यावककारौ नञ्समासे न वर्त्तते तयोर्यः सुशब्दः कश्च तयोः सुशब्दो यस्तदर्थेन संबद्धस्तस्य संहितायां विषये हलि परतो लोपो भवति । एष ददाति । स ददाति । एष भुङ्क्ते । स भुङ्क्ते । एतत्तदोरिति किम् । यो ददाति । यो भुङ्क्ते । सुग्रहणं किम् । एतौ गावौ चरतः । अकोरिति किम् । एषको ददाति । सको ददाति । तन्मध्यपतितस्तद्ग्रहणेन गृह्यतइति रूपभेदेपि साकच्कावेतत्तदावेव भवतः । अनञ्समासइति किम् । अनेषो ददाति । असो ददाति । उत्तरपदार्थप्रधानत्वान्नञ्समासस्यैतत्तदोरेवात्र संबद्धः सुशब्दः । हलीति किम् । एषोऽत्र । सोऽत्र ॥

स्यश्छन्दसि बहुलम् ॥ १३३ ॥

स्य इत्येतस्य छन्दसि हलि परतो बहुलं सोर्लोपो भवति । एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि । एष स्य ते मधुमां इन्द्र सोमः । न च भवति । यत्र स्यो निपतेत् ॥

सो ऽचि लोपे चेत्पादपूरणम् ॥ १३४ ॥

स इत्येतस्याचि परतः सुलोपो भवति लोपे सति चेत्पादः पूर्यते । सेदु राजा क्षयति चर्षणीनाम् । सौषधीरनुरुध्यसे । लोपे चेत्पादपूरणमिति किम् । सइव व्याघ्रो भवेत् । अचीति विस्पष्टार्थम् । पादग्रहणेनात्र श्लोकपादस्यापि ग्रहणं के चिदिच्छन्ति । तेनेदमपि सिद्धं भवति ।

सैष दाशरथी रामः, सैष राजा युधिष्ठिरः ॥

सुट् कात्पूर्वः ॥ १३५ ॥

अधिकारोयं, पारस्करप्रभृतीनि च संज्ञायामिति यावत्। इत उत्तरं यद्वक्ष्यामस्तत्र सुडिति कात्पूर्व इति चैतदधिकृतं वेदितव्यम् वक्ष्यति। संपर्युपेभ्यः करोतौ भूषणे। संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम्। कात्पूर्वग्रहणं सुटो ऽभक्तत्वज्ञापनार्थम्। तथाहि संस्क्रियीष्ट संस्क्रियतइति संयोगादिलक्षणाविड्गुणौ न भवतः। तिङ्ङतिङ इति निघातोपि तर्हि न प्राप्नोति सुटा व्यवहितत्वात्। स्वरविधौ व्यञ्जनमविद्यमानवदिति वचनान्नास्ति व्यवधानम्। संचस्करतुः संचस्करुरिति गुणः कथं, तन्मध्यपतितस्तद्ग्रहणेन गृह्यतइति। संयोगोपधग्रहणं च ऋतश्च संयोगादेर्गुण इत्यत्र कर्तव्यम्। टित्करणं सुट्स्तुस्वञ्जामित्यत्र विशेषणार्थम् ॥

अडभ्यासव्यवायेपि ॥ १३६ ॥

अड्व्यवाये ऽभ्यासव्यवाये सुट् कात्पूर्वो भवति। समस्करोत्। समस्कार्षीत्। संचस्कार। परिचस्कार। किमर्थं पुनरिदमुच्यते। पूर्वं धातुरुपसर्गेण युज्यतइति तत्र धातूपसर्गयोः कार्यमन्तरङ्गमिति पूर्वं सुट् क्रियते पश्चादडभ्यासौ। अभक्तश्च सुडित्युक्तं ततः सकारादुत्तरावडभ्यासावनिष्टे देशे स्याताम्। एतस्मिंस्तु सत्यत एव वचनात् कृतयोरडभ्यासयोस्तद्व्यवायेपि सुट् कात्पूर्वः क्रियतइति सिद्धमिष्टं भवति ॥

संपर्युपेभ्यः करोतौ भूषणे ॥ १३७ ॥

सम् परि उप इत्येतेभ्यो भूषणार्थे करोतौ परतः सुट् कात्पूर्वो भवति। संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम्। अत्र संपुंकानां सत्वमिति समो मकारस्य सकारः पूर्वस्य चाकारस्यानुनासिकः। परिष्कर्ता। परिष्कर्तुम्। परिष्कर्तव्यम्। सुट्स्तुस्वञ्जामिति षत्वम्। उपस्कर्ता। उपस्कर्तुम्। उपस्कर्तव्यम्। भूषणइति किम्। उपकरोति। संपूर्वस्य क्वचिदभूषणेपि सुडिष्यते संस्कृतमन्नमिति ॥

समवाये च ॥ १३८ ॥

समवायः समुदायस्तस्मिंश्चार्थे करोतौ संपर्युपेभ्यः कात्पूर्वः सुडा-

गमो भवति । तत्र नः संस्कृतम् । तत्र नः परिष्कृतम् । तत्र न उपस्कृतम् । समुदितमित्यर्थः ॥

उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु ॥ १३९ ॥

सतो गुणान्तराधानमाधिक्याय वृद्धस्य वा तादवस्थ्याय समीहा प्रतियत्नः । विकृतमेव वैकृतम् । प्रज्ञादित्वादण् । गम्यमानार्थस्य वाक्यस्य स्वरूपेणोपादानं वाक्यस्याध्याहारः । एतेष्वर्थेषु गम्यमानेषु करोतौ धातौ परत उपात् सुट् कात्पूर्वो भवति । प्रतियत्ने तावत् । एधोदकस्योपस्कुरुते । काण्डगुणस्योपस्कुरुते । वैकृते । उपस्कृतं भुङ्क्ते । उपस्कृतं गच्छति । वाक्याध्याहारे । उपस्कृतं जल्पति । उपस्कृतमधीते । एतेष्विति किम् । उपकरोति ॥

किरतौ लवने ॥ १४० ॥

उपादित्येव । उपादुत्तरस्मिन्किरतौ धातौ लवनविषये सुट् कात्पूर्वो भवति । उपस्कारं मद्रका लुनन्ति । उपस्कारं काश्मीरका लुनन्ति । विक्षिप्य लुनन्तीत्यर्थः ॥ णमुलत्र वक्तव्यः ॥ * ॥ लवनइति किम् । उपकिरति देवदत्तः ॥

हिंसायां प्रतेश्च ॥ १४१ ॥

किरताविल्येव । उपात्प्रतेश्चोत्तरस्मिन्किरतौ विषये सुट् कात्पूर्वो भवति । उपस्कीर्णं हं ते वृषल भूयात् । प्रतिस्कीर्णं हं ते वृषल भूयात् । तथा ते वृषल विक्षेपो भूयाद् यथा हिंसामनुबध्नातीत्यर्थः । हिंसायामिति किम् । प्रतिकीर्णम् ॥

अपाच्चतुष्पाच्छकुनिष्वालेखने ॥ १४२ ॥

किरताविल्येव । अपादुत्तरस्मिन्किरतौ चतुष्पाच्छकुनिषु यदालेखनं तस्मिन् विषये सुट् कात्पूर्वो भवति । अपस्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्ष्यार्थी । अपस्किरते श्वा आश्रयार्थी । आलिख्य विक्षिपतीत्यर्थः । चतुष्पाच्छकुनिष्विति किम् । अपकिरति देवदत्तः ॥ हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् ॥ * ॥ इह मा भूत् । अपकिरति

श्वा ओदनपिण्डमाश्रितः ॥ हर्षजीविकाकुलायकरणेष्वेव किरतेरात्मनेपदस्योपसंख्यानम् ॥ * ॥

कुस्तुम्बुरूणि जातिः ॥ १४३ ॥

कुस्तुम्बुरूणीति सुट् निपात्यते जातिश्चेद्भवति । कुस्तुम्बुरुर्नामौषधिजातिः । धान्यकम् । तत्फलान्यपि कुस्तुम्बुरूणि । सूत्रनिर्देशे नपुंसकलिङ्गमविवक्षितम् । जातिरिति किम् । कुत्सितानि तुम्बुरूणि कुतुम्बुरूणि तुम्बुरुशब्देनात्र तिन्दुकीफलान्युच्यते, समासेन तेषां कुत्सा ॥

अपरस्पराः क्रियासातत्ये ॥ १४४ ॥

अपरस्परा इति सुट् निपात्यते क्रियासातत्ये गम्यमाने । अपरस्पराः सार्था गच्छन्ति । सन्ततमविच्छेदेन गच्छन्तीत्यर्थः । क्रियासातत्य इति किम् । अपरपराः सार्था गच्छन्ति । अपरे परे च सकृदेव गच्छन्तीत्यर्थः । नात्र गमनस्य सातत्यं प्रबन्धो विवक्षितः । किमिदं सातत्यमिति । सततस्य भावः सातत्यम् । कथं सततम्,समस्तते विकल्पेन मकारलोपो विधीयते ।

लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि ।
समो वा हिततततयोर्मांसस्य पचियुड्घञोः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ एकादशस्तबकावशेषः ॥

साह ।

हरिणापहृतमानसा ह्येताः ।

श्यामाह ।

क्व तावदत्र हरिणः, तद्बाचाले वाचा लेलिह्यसे वैदग्ध्यं ननु ते तदस्ति, तद्विरम विरम ॥ २३६ ॥

हे बाबाले बाबा बाक्येन तद्बुद्ध्यम् ॥ २३६ ॥

साह ।

श्यामे तवैव दग्धी दग्धीकरोति मे मनः, तत् कथय कथमपरापराह्वविलक्षणलक्षणमस्या वपुरिदं राधायाः ॥ २३७ ॥

अपरस्मादपरस्मादङ्गा विलक्षणं लक्षणं यस्य तत् ॥ २३७ ॥

श्यामाह ।

सौभाग्यदं मृगदृशां शशिखण्डमौलि

यद्दैवतं प्रथमवर्णविहीनमेकम् ।

आराधनाय किल तस्य धृतव्रतेयं

स्नानं ततः कुसुमकोमलमङ्गमस्याः ॥ २३८ ॥

शशिनः खण्डं मौलौ यस्य तत् । कीदृशं, प्रथं चन्द्रशेखरत्वेन ख्यातम् । अवर्णो आक्षेपस्तेन विहीनम्, "अवर्णाक्षेपनिर्वाद" इत्यमरः । प्रथमेन वर्णेन शकारेण विहीनमिति वास्तवोऽर्थः ॥ २३८ ॥

साह ।

क्व सा देवता ।

श्यामाह । अत्र साधुना साधुना भावेन मनोमय्येव मय्येव विश्वस्ता सती मान्यथा शङ्किष्ठाः ॥ २३९ ॥

सा देवता, अधुना· इदानीम् ॥ २३९

इत्येवं सत्येवं स रसमयः समयः समपादि यदि तदा वदनविजितचन्द्रा चन्द्रावलिरपि निजवयस्याभिरभिनववयस्याभिरभिनवरागवतीभिरेव निजकलाकलापप्रख्यापनेन कृष्णाङ्गसङ्गसंगररङ्गमङ्गलाभ्यासमासाद्य साद्यमानं यदि चकार विचकार विविध एव तदा कुलजाकुलजातिशीलाद्यनपेक्षयाक्षयामोदकरः·कोऽपि मधुररसमयः समयमानसंकोचः सकलसकलकमलमुखीनां च ॥ २४० ॥

अभिनववयसि कैशोरे· आभिर्निजवयस्याभिः सह· अभ्यासम्· आसाद्य निकटं प्राप्य साद्यमानं व्यज्यमानं यदि चकार तदा कोऽप्यनिर्वाच्यो विविधो विचकार, विकारो रोमाञ्चाद्यनुभावोऽभूदित्यर्थः । कथंभूतः, कुलजासंबन्धिनां कुलादीनामनपेतया· अचयमामोदमानन्दं करोतीति सः । कुलादिनैरपेत्यादेव सम्यक्· अयमानः संकोचो यत्र सः । एवं चन्द्रावलेर्यथायमुक्तस्तथान्यासामपि ज्ञातव्य इत्याह सकलेति, सकलानां सर्वासामेव कलासहितकमलमुखीनां च ॥ २४० ॥

एवं जलदसमये रसमये रसिको रसिकोरसि कोविदः कलाकलापे स खलु व्रजपुरपुरन्दरनन्दनो रमते स्मरमते स्म ॥ २४१ ॥

उपसंहरति, स श्रीकृष्णो रसिकानां गोपीनाम्· उरसि स्वयं च रसिकः स्मरमते कामतन्त्रमते रमते स्म· अरमत, यतः कलाकलापे कोविदः पण्डितः ॥ २४१ ॥

ततश्च तस्मिन् श्रीकृष्ण आतिष्ठद्गु तिष्ठद्गुरुगौरवो गुरुजनान्तिकमेव तिष्ठति दिनं दिनमायतीगवमायतीगवन्धुनिकरैः समं वनादायाति याति स्म वर्षासमयः ॥ २४२ ॥

तत्र कालविभागमाह, तस्मिन् जलदसमये· आतिष्ठद्गु गुरुजनान्तिकं तिष्ठति, तिष्ठन्ति गावो यस्मिन्· तं कालमभिव्याप्य, प्रातरित्यर्थः, यतस्तिष्ठद्गुरुगौरवः· तिष्ठन्ति गुरूणां मातापित्रादीनां गौरवाणि स्वलालनप्रदानसंमाननादिलक्षणानि यत्र सः, दिनं दिनं प्रतिदिनं, तथा· आयतीगवम्· आयत्यः· आगच्छन्त्यो गावो यत्र तस्मिन्· आयतीगवं तिष्ठद्गुप्रभृतित्वात् साधुत्वम्, आयत्याम्· उत्तरकाले· आयतिर्दीर्घा वा या· ईलत्मीस्तां गच्छन्तीति तथा ते च बन्धुनिकराश्च तैः समं सह, आयाति एहम् । "आयतिस्तु स्त्रियां दैर्घ्ये आचारागामिकालयो"रिति मेदिनी । तेन मध्याह्ननिशीथादौ रमणमिति ॥ २४२ ॥

ततश्चैवं विलसति सति सकलसौभगवति भगवति निजसेवापरमे परमे दुःखेऽदुःखे मद्गुमिव समन्तत एव जलदाः ॥ २४३ ॥

निजसेवाया उपरमे सति परमे दुःखे जाते, खे· आकाशे भङ्गमिव· अदुर्दत्तवन्तः ॥ २४३ ॥

ततश्चासन्नेऽसन्ने निजसेवासमये स मयेह सेवनीय इत्युत्कण्ठयेत्कमना इव विकसद्वदनसारसा सा रसादिव विमलकासारा कासारापायसीमन्तितजम्बालाबालामोदमेदुरहंसहंसका कलकूजितसारससारसना दलदिन्दीवरवरलोचना शरद्वधूः समुपससाद ॥ २४४ ॥

ततश्च निजसेवासमये· आसन्ने सति । कीदृशे, असन्ने· अविशीर्णे । स श्रीकृष्णो मया· इह वृन्दावने सेवनीयः स्वसमृद्ध्या संतोषणीय इत्युत्कण्ठया· उत् कम्· उत्कृष्टं कं सुखं यत्र तथा भूतं मनो यस्याः सा· इव शरद्वधूः समुपससाद । कीदृशी, विकसद् वदनसारसं मुखपद्मं यस्याः सा, पक्षे विकसद्वदनाः सारसाः पक्षिणो यस्यां सा । सा· इति छेदः, रसात्· अनुरागादिव, विमलो निर्मलः कस्य सुखस्य· आसारो यस्यां सा, पक्षे रसं वर्षावृष्टं जलं प्राप्येव वीन् पक्षिणो मलन्ति धारयन्तीति तथा भूताः कासाराः सरांसि यस्यां सा, "मल मल्ल धारणे" पचाद्यच् । कस्य जलस्य· आसारापाये सति· असारांशनाशे वा सति सीमन्तितः सीमन्तीभूतो जम्बालः पङ्को यस्यां सा । अबालैः प्रौढैरामोदैर्मेदुरा स्निग्धा हंसा एव हंसकः पादकटको यस्याः सा । कलं कूजितं येषां ते सारसा एव सारसनं काञ्ची यस्याः सा ॥ २४४ ॥

ततश्च प्रक्षालितघनजम्बालमिव नभस्तलं सुजनमनांसीव सुप्रसन्नानि सलिलानि· उत्तमश्लोकश्लोका इव लब्धविकाशाः काशाः· निशानिशात इव निशाकरः कृतोद्वर्तनानीव नक्षत्राणि विकसितसप्तच्छदामोदमेदुरा वनश्रीः ॥ २४५ ॥

उत्तमश्लोकस्य भगवतः श्लोका यशांसि । निशया शाणस्थानीयया निशातस्तेजित इव । "निशितक्ष्णुतशातानि तेजित" इत्यमरः । सप्तच्छदः· छातन इति ख्यातः सतपना इति पाश्चात्याः ॥ २४५ ॥

अपगतमानकालुष्याः प्रमदा इव क्रमहृसत्कमला धवला बलाहकततीः सितसूक्ष्मसिचयविततीर्विततीकृत्येव वर्षासारसारस्यापसारणे वितते द्योतते द्योरमणी तपस्विनी ॥ २४६ ॥

द्यौरेव रमणी तपस्विनी सती द्योतते । कदा, वर्षाभवेन आसारेण सारस्यं सरसतेव सरागता तस्यापसारणे वितते विस्तृते सति, "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस" इत्यमरः । वीतरागोचितं परिधानीयमाह, बलाहकततीर्मेघश्रेणीरेव सितसूक्ष्मवस्त्रततीर्विततीकृत्य विस्तार्य । बलाहकततीः कथं भूताः, गतमानकौर्याः प्रमदा इव क्रमेण हृसन्ति ह्रासवन्ति कमलानि सुखरोधकमालिन्यानि जलानि च यस्यास्ताः, "सुखशीर्षजलेषु" कमिति विश्वः । "सलिलं कमलं जल"मित्यमरः ॥ २४६ ॥

अपिच ।

तरङ्गिणीनां रङ्गिणीनां वर्षासखीविरहतो हृतोदकप्राचुर्यादप्यकुल्यानां कुल्यानां श्रेणय इव बहिरवलोक्यन्ते पुलिनश्रेणयः ॥ २४७ ॥

तरङ्गिणीनां नदीनां हृतं यदुदकस्य प्राचुर्यं तस्माद्धेतोरपि अकुल्यानां क्षुद्रनदीत्वमप्राप्तानां "कुल्याल्पा कृत्रिमा सरि"दित्यमरः । पुलिनश्रेणयः कुल्यानां श्रेणय इव अस्थ्नां समूहा इव । "कीकसं कुल्यमस्थि च"त्यमरः ॥ २४७ ॥

किं वा स्वच्छतयेव तासां बहिः प्रकाशिताः शुद्धा हृद्वृत्तय इव ॥ २४८ ॥

पुलिनानां श्वेतिम्ना कदाचिदश्लीलत्वं व्यज्येतेति पुनरन्यथोत्प्रेक्षते किंवेति ॥ २४८ ॥

सुललितलेखानां लेखानां च मनोहराणां चरतामनुकूलमनुकूलगिरां गिरां देव्या च कथयितुमशक्यश्रियां मदकलकलहंससारसारसमरसमनोरथरथचरणकुररकहृबकारण्डवादीनां चरणचिह्नचिचितानि सैकतानि ॥ २४९ ॥

सुललिता लेखा श्रेणी वल्गुचरणकल्पिता रेखा वा येषां तेषां लेखानां देवानामपि, "दिविषदो लेखा" इत्यमरः, अनुकूलं कूले कूले चरतां मदकला मत्ताः कलहंसाश्च साराः श्रेष्ठाः सारसाश्च सरसा मनोरथा येषां ते रथचरणाश्चक्रवाकाश्च निकृष्टत्वादप्राप्तविशेषणाः कुररादयश्च तेषाम् । कङ्को बकः । कारण्डवस्तद्भेदः ॥ २४९ ॥

अमलकमलकह्लारहल्लकहल्लीशकोपदेशपेशलस्तरलतरललिततरङ्गशीकरनिकरनिर्भरमन्थरो मन्थरो जनमनसामजनमनसामग्रीसमवेत इव समुपसन्नसमीरणः समीरणश्चेति ॥ २५० ॥

निर्मलानां कमलादीनां हल्लीशकस्य नाट्यविशेषस्य उपदेशे पेशलो दक्षः, अत एव तरलतराणां ललिततरङ्गाणां शीकरस्य निःशेषभरेण मन्थरो मन्दगतिः, अत एव सौगन्ध्यशैत्यमान्द्यैर्जनमनसां मन्थं मन्थनं राति ददातीति सः, अजस्य श्रीकृष्णस्य नमनं नमस्कारस्तस्य या सामग्री रिक्तहस्तेन वन्दनमयुक्तमिति हल्लीशकमुपदिश्य लब्धा दक्षिणारूपा परागशीकरादिका तया समवेत इव, अत एव समुपसन्नं सम्यक्‌ ईरणं प्रवेशो यस्य सः ॥ २५० ॥

तत्र सकलविलक्षणलक्षणसमेतायामुपेतायामुपेत्य वनपरिसरं विरतजलधरागमं रागमञ्जुलमेदुरादुरालोकलोकरमणीयमहसारस्यदेन स्यदेन धेनूनामनुसृतिमासाद्य ॥ २५१ ॥

अथ तत्रभगवतो विलासं वर्णयिष्यंस्तत्संबन्धेन शरदोऽपि शोभाविलक्षण्यमाह तत्रेति । तत्र शरदि वनपरिसरम् उपेत्य खेलता तेन श्रीकृष्णेन स्वस्य वैभवेर्वा शरदः संधिरिव कारयामासे इत्यन्वयः । उपेतायाम् उपसन्नायाम् । स्यदेन वेगेन । कथंभूतेन, रागेण अनुरागेण मञ्जुलानां मेदुराणां स्निग्धानाम्, अत एव अदुरालोकानाम् अदुर्दर्शानाम्, तन्निकटवर्तिनामित्यर्थः, तादृशलोकानां रमणीयो महस्तादृशदर्शनोत्सवस्तेन सारस्यदायिना, अनुसृतिमनुगतिम्, आसाद्य प्राप्य ॥ २५१ ॥

सह सहचरैः खेलता लतातरुवीथिवीथिषु सर्वदाबलाकामदेन कामदेन विलोलविकसितविमलपरिमलप्रियकमालेन ॥ २५२ ॥

लतातरूणां वीथयः श्रेणयस्तासां वीथिषु पदवीषु । वर्षालक्षणव्यत्ययार्थं श्रीकृष्णं जलदसमयरूपत्वेन विशिनष्टि, सर्वदा· अबलानां रमणीनां कामदेन कन्दर्पसमर्पकेण, पक्षे बलाकाया बकपङ्क्तेर्मदो मत्तता यतस्तेन, कामदेन सुखदेन, पक्षे कामोद्दीपकेन । प्रियकमाला कदम्बस्रक्, कदम्बपङ्क्तिश्च ॥ २५२ ॥

मदकलकलापिकलापिबर्हभूषणेन कनकनिकषकषणवसनविद्युता विद्युताभिरामेण ॥ २५३ ॥

मदकला मत्ताश्च ते कलां नृत्यादिवैदग्धीम्· आप्तुं प्राप्तुं शीलं येषां तथा भूता ये कलापिनस्तेषां बर्हं शिखण्डो भूषणं शिरोवतंसो यस्य तेन, पक्षे तेषां बर्हं भूषयतीति तेन, वर्षास्वेव तच्छोभोदयात् । कनकनिकषं निकषपरीक्षितं स्वर्णं कषति स्वशोभया तिरस्करोतीति तद्वसनमेव विद्युद्यत्र तेन । विशिष्टया द्युता दीप्त्या· अभिरामेण ॥ २५३ ॥

मुरलीध्वनिस्तनितपरंपरया परया मदमयूरमण्डलीमभितो नर्तयतार्तयता च खगमृगावलिं निर्झरयता रयतादवस्थ्येन गिरिकन्दरतो दरतोयं सरसयतायतायतेन सारस्येन तरुलताः, सरितां च स्थगितप्रवाहतयाहतया जातपूरेणाम्बुपूरेणाम्बुजवनीमुत्सारयता सारयता च पुलिनवीथीः ॥ २५४ ॥

स्तनितं मेघगर्जनम्· आर्तयता मुहुरास्वादेनाप्यतृप्तं कुर्वता । गिरिकन्दरतः प्रसृतं दरतोयम्· अल्पजलमपि रयस्य वेगस्य तादवस्थ्यं, यथा वेग आगतस्तथैव स्थितो न तु प्रसृत इति तदवस्थत्वं, निस्यन्दत्वमित्यर्थः, तेन हेतुना निर्झरयता निर्झरं कुर्वता । ताद्रूप्येन परतः प्रसरणाभावात्, "पर्वतात् स्रुत्वा· एकत्र स्थिते बहुजले निर्झर" इत्यमरटीका । आयतायतेन दीर्घदीर्घेण सारस्येन, दूरात्यपरंपरयेत्यर्थः । सरितां

नदीनां च स्थगितप्रवाहतया हेतुना परतः प्रसरणाभावात्· अम्बुपूरेण पूर्वतः प्रसृतजलप्रवाहेण जातः पूरः पूरणं तेन· अम्बुजवनीम्· उत्सारयता, जलवृद्ध्यनुसारे वर्धनादूर्ध्वमुत्थापयतेत्यर्थः । अहतयेति स्थगितप्रवाहतयेत्यस्य विशेषणम्, अपरास्तयेत्यर्थः । पुलिनवीथीश्च सारयता जलवृद्ध्यैव लुप्ताः कुर्वतेत्यर्थः, "सृ गतौ" णयन्तः, गतत्वमत्र लुप्तत्वम् । सर्वत्रैव मुरलीध्वनिस्तनितपरंपरयेत्ययं हेतुरनुवर्त्यः । वर्षालक्षणं च स्पष्टम् ॥ २५४ ॥

परितश्च श्यामलतया श्यामलयता हरितो निवृत्यागतेनेव पुनरपि जलदसमयेन रसमयेन रतिप्रदेन व्रजमृगनयनापाङ्गशरदितेन ऋतुसंधिरिव कारयामासे ॥ २५५ ॥

श्यामलतया निजश्यामलिम्ना परितो हरितः सर्वा दिशः श्यामलयता श्यामलवर्णाः कुर्वता । ततश्च जलदसमयेन निवृत्यापि पुनरागतेनेवेत्युत्प्रेक्षा । व्रजस्य मृगनयनानां हरिणाक्षीणामपाङ्गशरैर्दितेन खण्डितेन ॥ २५५ ॥

अथ कस्मिन्नपि दिवसे ।

चिकुरनिकरचञ्चच्चारुबर्हावतंसः
श्रवसि दधदुदेजत्कुण्डले कर्णिकारम् ।
कनककपिशवासा वैजयन्तीं दधानो
न्यविशत नटराजश्रीः स वृन्दावनान्तः ॥ २५६ ॥

वेणुवादनविलासोचितवेशं तं वर्णयति, चिकुरनिकरेति चूडासूचनं, "चूडाचुम्बितचन्द्रका"विति वक्ष्यते च । वैजयन्तीं·पञ्चवर्णमयीं मालाम् ॥ २५६ ॥

चरणकमलचिह्नैरङ्कुशाम्भोजवज्र-
प्रभृतिभिरतिचित्रैश्चित्रयन् क्षोणिवक्षः ।
अधरकिसलयाग्रे वेणुमाधाय धीरं
व्यतनुत शरदर्हे मालश्रीप्रगानम् ॥ २५७ ॥

धीरमचपलं,श्लेषेण वेणोरपि तच्छिष्यतयैव गाने पाण्डित्यमिव जातमित्युत्प्रेक्षा च व्यञ्जिता ॥ २५७ ॥

किंच ।

विम्बाधरारुणकराङ्गुलिकान्तिपूरैः
पूर्णोदरान्तविवरेण बहिः सरद्भिः ।
सा मालवश्रियमिव प्रतिलङ्घ्य कामं
रागावलीं तनुमतीं वमतीव वंशी ॥ २५८ ॥

बिम्बाधरस्यारुणकराङ्गुलीनां च कान्तिप्रवाहैः स्वयं पूर्णा सती सा वंशी· उदरस्यान्तर्विवरेण तत्र मातुमसंभवादिव बहिः प्रसरद्भिस्तैर्मालवश्रियं प्रस्तुतमेकमात्रं रागं प्रतिलङ्घ्येव कामं यथेष्टं रागावलीं रागश्रेणीं तनुमतीं मूर्तिमतीं सतीं वमतीव ॥ २५८ ॥

किंच ।

स्फुरताधरपल्लवेन मन्दं
विकसद्भिर्दशनांशुभिः स्मितेन ।
रमणीमुखसौभगं प्रपेदे
मुरलीरन्ध्रमनेन चुम्ब्यमानम् ॥ २५६ ॥

मुरल्या रन्ध्रम्· अनेन श्रीकृष्णेन चुम्ब्यमानं सत्, रमण्या मुखस्य सौभगं प्रपेदे प्राप । तत्र कृष्णनिष्ठमनुभावसारूप्यमेव लिङ्गमाह स्फुरतेत्यादि ॥ २५९ ॥

किंच ।

येयं मुरली ।
सरन्ध्रा नीरन्ध्रा भवति मुखरागैर्मधुपतेः
कठोरा सारस्यं गमयति कठोरान्तरमपि ।
अतूष्णीका तूष्णीकयति मृगपक्षिप्रभृतिकं
स्वयं वंशे जाता विकलयति सद्वंशजवधूः ॥ २६० ॥

विकलयति व्याकुलीकरोति ॥ २६० ॥

किंच ।

स्वयं शून्याप्यन्तर्बहु वहति रागव्यतिकरं
दधात्येकं पर्वे प्रकटयति पर्वाणि शतशः ।
कलान् धत्ते रम्यान् विकलयति सर्वं जगदहो
मुरारेर्वंशीयं जडयति समुल्लासयति च ॥ २६१ ॥

कलान् मधुरास्फुटनादान् ॥ २६१ ॥

किंच ।

कलो यस्याः सूक्ष्मो विलसति विसारी त्रिभुवे
विशत्यन्तः श्रोत्रं सकलतनुपीडां रचयति ।
रसं नानाकारं सहजमधुरोऽप्येष तनुते
कदाचित् पीयूषं वितरति कदाचिद्विषमपि ॥ २६२ ॥

नानाकारं कान्तादीनां यथास्वं स्थायिभावानुगतं, पीयूषं संयोगे, विषं विच्छेदे ॥ २६२ ॥

अम्भः स्तम्भयति द्रुतं द्रवयति द्रागद्रिमद्रिं द्रवन्
शुष्कानप्यवनीरुहः किशलयत्यामूलमुन्मूलितान् ।
ब्रह्मानन्दलयं गतानपि मुनीनुच्चैः समुच्चाटय-
त्याश्चर्यस्य निधानमेव जयति श्रीकृष्णवेणुध्वनिः ॥ २६३ ॥

किंच, धर्मविपर्ययवत्त्वेन वस्तुजातमनुभावयतीत्याह· अम्भ इति । स्तम्भयतीति· स्तम्भोऽद्रिधर्मः । अद्रिमद्रिं प्रतिपर्वतं द्रवन् गच्छन् सन् । द्रवयतीति· द्रुतत्वमम्भोधर्मः, इत्येवम् ॥ २६३ ॥

तमास्वाद्यास्वाद्यमास्वाद्य माद्यन्त इव द्यन्त इव सकलसंतापं स्थावरतामापुरस्थावराः पुरस्था वराः सीमन्तिन्यश्च गणशोऽगणशो-भाभरनिर्व्यूढानुरागपरभागभागधेयधेयसौशील्याः परस्परं समवासनाः

समवासनार्थितसौहृदा हृदा हृदा परिरभ्य रभ्यमाणमानसविकारास्तमेव वंशीकलमुद्दिश्य मुद्दिश्यमानकलपदाः परार्थभूतश्रीकृष्णगुणगणगणनकलया कलयामासुर्दिनसमापनम् ॥ २६४ ॥

तं वेणुध्वनिम्, आस्वाद्यास्वाद्यम्·आस्वाद्येषु मध्ये सुष्ठु· आद्यं मुख्यम्, आस्वाद्य तन्माधुर्यमनुभूय, माद्यन्त इव· आनन्दमत्ता भवन्त इव, अत एव सकलसंतापं द्यन्त इव खण्डयन्त इव, अस्थावराः पक्षिमृगादयः स्थावरतां तदीयजाड्यधर्मम्· आपुः प्रापुः । तथा पुरस्था व्रजपुरे स्थिता वराः श्रेष्ठाः सीमन्तिन्यः सुन्दर्यस्तु गणशः प्रतियूथमेव·अगणोऽगण्यः शोभाभरो यत्र तद्यथा स्यात् तथा निःशेषेण व्यूढो योऽनुरागपरभागः प्रेमोत्कर्षस्तत एव यत् परं श्रेष्ठं भागधेयं भाग्यं तस्मादेव धेयं धारणार्हं सौशील्यं यासां ताः समवासनास्तुल्यवासनाः· अत एव परस्परारोचकत्वस्वभावादेव समवासा एकस्थानस्थितयश्च ताः· नार्थितं प्रार्थितं परमसौहृदमन्योन्यं याभिस्तथा भूताश्चेति ताः· मुदा· आनन्देन दिश्यमानानि निर्दिश्यमानानि कलानि मधुराणि पदानि किं ब्रूम इत्यादिसुप्तिङन्तवृन्दानि याभिस्ताः कलयामासुश्चक्रुः ॥ २६४ ॥

तथाहि ।

किं ब्रूमोऽविमतोऽक्षिसौभगमहो यद्रामदामोदरौ
वृन्दारण्यविहारिणावभवतां गोचारणे गोचरौ ।
स्निग्धापाङ्गतरङ्गरिङ्गितकृपातुङ्गीकृतानन्दथू
वेणुध्वानविधानधूनितधराधैर्यावहार्यश्रियौ ॥ २६५ ॥

अत्रैकैकस्या यूथाधिपाया द्विशो द्विशः पद्यमन्यत् प्रायेण । तत्र काचित् प्रथमं निजभावं प्रकटमुद्घाटयितुमतिशङ्कितचित्ता· अन्यजनवत् सामान्यतो विलासमात्रवर्णनेनान्यालक्षितं निजरसौत्कण्ठ्यं स्वसखीष्वेव किंचिद्व्यञ्जयन्त्याह किमिति । अविमतौ नेत्रधारिणो जनस्य· अक्ष्णोः सौभगं सौभाग्यं किं ब्रूमः । अनिर्वाच्यत्वाद् वक्तुं न शक्नुम इत्यर्थः । तावपश्यन्त्यो वयमेव दुर्भगनेत्रा इति भावः । रामदामोदराविति, रामो-

ल्लेखो निजभावगोपनार्थमेव । तच्च विविक्तेऽपि तत्राकस्माद्विवजातीयजनप्रवेशापातशङ्कया । उत्तरोत्तरवाक्येषु तु प्रेमवैहूल्यात् तदशक्तिरपि ज्ञेया । स्निग्धैरपाङ्गतरङ्गै रिङ्गिता गमिता ज्ञापिता या कृपा तया तुङ्गीकृत आनन्दथुरानन्दस्तत्रत्यसमस्तद्रष्टृजनानां याभ्यां तौ । तत्र वयमेव वञ्चिता इति भावः । धूनितं खण्डितं धरायाः पृथिव्या धरास्थसमस्तलोकस्यापि वा धैर्यं याभ्यां तौ । तत्रास्माकं का कथेति भावः । अहार्या अव्यया श्रीः शोभा ययोस्तौ । तथा च "अतएवतां फलमिद"मिति मूलपद्यम् ॥ २६५ ॥

चूडाचुम्बितचन्द्रकौ विलसितावालोलया मालया
दीव्यद्दिव्यतमालपत्त्ररचनावत्युज्ज्वलौ धातुभिः ।
प्रत्यङ्गं कृतमण्डनौ स्तबकिभिश्चित्रैर्लताखण्डके-
स्तन्वाते नयनोत्सवं नटवरौ रङ्गप्रविष्टाविव ॥ २६६ ॥

तमालपत्त्रं तिलकं, धातुभिर्मनःशिलादिभिः, तथा च "चूतप्रबाले"ति ॥ २६६ ॥

धन्या धयन्ति मुखपङ्कजमस्य दृग्भ्यां
चुम्बन्ति तत् किमपि धन्यतरास्त एके ।
ते नाम के मुरलिकापरिपीतशेषं
येऽस्याधरं सुमुखि धन्यतमाः पिबन्ति ॥ २६७ ॥

अन्या प्रकटमेवोत्कण्ठमाना निःशङ्का एवाह । अस्य श्रीकृष्णस्य । धयन्ति पिबन्ति दृग्भ्यां, दूरत एव पश्यन्तिमात्रमित्यर्थः । तन्मुखपङ्कजं चुम्बन्ति, दृग्भ्यामित्यस्यानुवृत्तेः स्वसंमुखेनैवेत्यर्थः । एके मुख्या जनास्ते ते नाम के इति, न तेषां सौभाग्यं वक्तुं शक्नोमीत्यर्थः । हे सुमुखि सखीति, त्वदादिका वयं शोभनमुखधारिण्योऽपि तदप्राप्त्या विफलमुख्य एवेति भावः ॥ २६७ ॥

धन्यासि भो मुरलि यत् परिपीयमाणा
श्यामेन तद्घनचन्द्रिकयासि दिग्धा ।

स्निग्धा सती मणितवत् कलकूजितानि
संतन्वती भुवनमुत्तरलीकरोषि ॥ २६८ ॥

ननु शश्वद्विहारिणी प्रतिदिनमेव तेन कान्तेन तथा दीव्यन्ती तर्हि त्वमेव धन्यतमासीति तत्रानुरागप्रौढिम्ना तस्य मुहुरनुभूतस्त्वेऽप्यननुभूतत्वमननेनालीकवादिनि कदा मे तथा सौभाग्यं जातमिति तत्रौत्सुक्यमेव व्यञ्जयन्ती तत्संबन्धवर्तीं मुरलीमेव संबोध्य स्तौति धन्यासीति। मणितं सुरतध्वनिः ॥ २६८ ॥

तेषां वा दशनानां किमाभिरूप्यं निरूपयामः ।

तथाहि ।

आपच्यमानदरदाडिमबीजराजी
राजीवमध्यमपि चेदुररीकरोति ।
इन्दूदरं विशति चेत् कुरुविन्दपङ्क्ति-
र्दन्तावलिः किल तदस्य तुलां बिभर्ति ॥ २६९ ॥

दशनचन्द्रिकयासि दिग्धेत्यनुस्मृतं तद्दशनसौन्दर्यं विशेषेणाह तेषां वेति ॥ २६९ ॥

अत्यन्तसाहसवती मुरली यदेषा
कृष्णाधरं पिबति यः परकीयपेयः ।
किं सौभगं तदनयातनि येन रत्नं
यत्नं विनापि पुरतः स्वयमेति यस्याः ॥ २७० ॥

अथ तत्र तस्यै काचिदीर्ष्यन्तीव तत्सौभाग्यमभिनन्दति· अत्यन्तेति । यः कृष्णाधरः परकीयपेयः, साजात्येन गोपिकानामेव पानार्ह इत्यर्थः । अतनि व्यस्तारि । तथा च "गोप्यः किमाचर"दित्यादि ॥ २७० ॥

यत्पीतशेषरसशीकरसंप्रयोगा-
न्नद्यः प्रफुल्लकमलावलिलोमहर्षाः ।

स्तभ्नन्ति रुद्धतरसस्तरवः प्रसून-
माध्वीकलोचनजलाः परितो रुदन्ति ॥ २७१ ॥

यस्याः पीतशेषो यो रसस्तस्य शीकरस्यापि संप्रयोगात् मुरली-वादनानन्तरस्नानावगाहनादिभिरधरे प्रवाहसंयोगाद् रुद्धतरसो रुद्धवेगास्तरवस्तत्तीरस्थास्तज्जलं मूलद्वारेणाकर्षन्तः, परंपरया तत्प्राप्त्यभिमानवन्त इति भावः। तथा च "यदव शिष्टरस"मित्यादि ॥ २७१ ॥

धन्या जयत्यपि मही महिता महिम्ना
कृष्णस्य यच्चरणचिह्नविचित्रवक्षाः।
वंशीरवामृतरसैः सरसान्तरेव
याजस्रमेव यवसाङ्कुररोमहर्षा ॥ २७२ ॥

अन्या तद्विरहभीता तन्नित्यसंयोगं कामयमानेवाह धन्येति। जयति, ब्रह्मलोकादिभ्योऽप्युत्कर्षेण वर्तते। मही, श्रीवृन्दावनसंबन्धात् सर्वापीत्यर्थः। चरणचिह्नेति, एकेनावयवेनालंकृतेन अवयवी अलंकृत इव, चरणचिह्नालंकृतेन वक्षःस्थलरूपवृन्दावनप्रदेशेन कृत्स्नापि मही धन्येत्यर्थः। अत्र विचित्रेति वक्ष इत्याभ्यां तस्याः कुचयोश्चित्रकञ्चुलिकानिर्माणं तेनैवेत्यभिव्यज्य सैव सदा स्वाधीनकान्तेति सूचयति या अन्तःसरसैव, तत्राप्यजस्रमेव, रात्रिंदिवमपि कृष्णविच्छेदासंभवादिति भावः ॥ २७२ ॥

वृन्दावनस्य महिमा नहि मादृशीनां
गम्यो यदत्र मुरभिन्मुरलीरवेण।
स्वान्तं विलास्य मृदुलास्यमयुर्मयूराः
स्पन्दं जहुस्तरुलता महताहताश्च ॥ २७३ ॥

मुरभिदः कृष्णस्य मुदिराकृतेर्मुरलीनादरूपगर्जनेन। अयुः प्रापुः। महता आहताश्चालिता अपि। तथा च "वृन्दावनं सखि भुव" इति। ततश्च "अद्रिसान्द्रवरतान्यसमस्तसत्त्व"मिति दृष्ट्वा तरुलताशब्देन तत्रस्था विहगादयो लक्ष्यन्त इति वा ॥ २७३ ॥

किं दुश्चरं चरितमालि तपो मृगीभि:
पश्यन्ति या: समुरलीकलमास्यमस्य ।
अक्ष्णो: प्रकामकमनीयगुणत्वमासां
नासाग्रतं भवति संप्रति संप्रतीहि ॥ २०४ ॥

अन्या स्वदर्शनोत्सुक्यं सख्यामभिव्यञ्जयन्त्याह किमिति । नासाग्रतं नायोग्यं, संप्रति· इदानीमेव, संप्रतीहि सम्यक् प्रतीतिं याहि । तथाहि, "धन्याः स्म मूढमतय" इति ॥ २०४ ॥

सौभाग्यभागियमहो सखि कृष्णसारी
सारीकरोति नयने सह कृष्णसारा ।
वंशीनिनादमकरन्दभरं दधानं
कृष्णास्यपङ्कजमशङ्कितमापिबन्ती ॥ २०५ ॥

तास्वेव काचिन्निकटवर्तिनीमालक्ष्य· उत्कर्षोपन्यायेनाह सारीकरोतीति । च्विप्रत्ययादितः पूर्वं नयने श्रेष्ठे नाभूतामित्यर्थः । सह कृष्णसारेति, कृष्ण एव सारो यस्येत्यन्वर्थनामत्वं तस्योचितमेव, मत्पतिस्तु तद्विपरीतधर्मा· अतिदुष्ट एवेति भावः । अशङ्कितमिति, अहं तु सायं व्रजागतमपि तं पत्यादिशङ्कया न सम्यक् पश्यामीति भावः ॥ २०५ ॥

धन्या विमानवनिता जनितानुरागाद्
रागात्तगाढरतिभिः पतिभिः परीताः ।
नीलालकक्वणितवेणुमवेक्ष्य कृष्णं
धैर्यादथावहन्मुहुर्मुहुर्मुहुश्च ॥ २०६ ॥

न च स्वपतिसहिताया एव मृग्याः कृष्णेऽनुरागः, पशुत्वेन विशेषविवेकाभावादिति वाच्यम् । यतः के वा विदग्धशिरोमणयोऽपि जनाः कृष्णे नानुरज्यन्तीत्यप्रस्तुतप्रशंसया काचिदाह धन्येति । विमानवनिता विमानचारिण्यो देवाङ्गनाः । श्लेषेण तासामपि मानं वेणुनादो लुम्पेदेव, अस्माकं तु का कथेति भावः । जनितानुरागा इति, ता एव वनितापद-

वाच्यतामर्हन्ति नान्या इति भावः । "वनिता जनितात्यर्थानुरागायां च योषिती"त्यभिधानात् । तथा च "कृष्णं निरीक्ष्ये"ति ॥ २७६ ॥

विस्रंसमानचिकुराः श्लथमाननीव्यो
देव्यो धृतिव्यसनतो निखिला दिवीव ।
आरिप्समानममरद्रुमपुष्पवर्षं
विस्मृत्य हन्त वबृषुर्नयनाम्भ एव ॥ २७७ ॥

दिवीव नभसि वर्तमाना एव ॥ २७७ ॥

अर्धावलीढयवसाङ्कुरशोभिदन्ताः
सोत्कण्ठमुन्मिषितनेषमुदीर्णकर्णम् ।
चित्रार्पिता इव पतन्तमिवामृतौघं
वेणुध्वनिं श्रुतिपुटे गमयन्ति गावः ॥ २७८ ॥

अन्या तु वेणुमाधुर्यं प्राणिमात्राणामपि मुदा चित्ताकर्षकमिति वदन्ती प्रेमसामान्यरीतिमालम्ब्य विजातीयभाववतीरपि गास्तत्र प्रस्तौति· अर्धावलीढेति । तथा च "गावश्च कृष्णमुखनिर्गते"ति ॥ २७८ ॥

चूषन्ति चूचुकमहो न न संत्यजन्ति
वत्सा नयन्ति न पयःकवलं गलाधः ।
वंशीकलाहृतहृदां सखि नैचिकीनां
स्नेहस्नुतस्तनरसो धरयैव पीतः ॥ २७९ ॥

किञ्च, आहारविहारमात्रप्रसक्तानां वत्सानामपि तत्र महान् प्रेमोदय इति सशीत्कारमाह चूषन्तीति । न चूषन्ति न च संत्यजन्ति । ननु तर्हि वत्सायत्तमन्तरेण तन्मातरोऽपि किं प्रस्नवन्ति तत्राह वंशीकलेति । धरयैव भूम्यैव । तथा च "शावाः स्नुतस्तनपयःकवला" इति ॥ २७९ ॥

वंशीकलं कलयतोऽस्य निपीय दृग्भ्यां
रूपामृतं पुनरमुष्य रसानुभूत्या ।

ध्यायन्ति मीलितदृशः सखि बद्धमौनं
बद्धासनं मुनय एव पतत्रिणोऽमी ॥ २८० ॥

अपरा च तिरश्चां मध्येऽप्यतिचपलानां पक्षिणामपि महाधीर-मुख्यचिह्नमालक्ष्य किंचिदनुमिमाना सविस्मयमाह वंशीकलमिति । कल-यतो धारयतः । अस्य कृष्णस्य । तथा च "प्रायो बताम्ब मुनय" इति ॥२८०॥

न स्पन्दते सखि न रौति न वीक्षतेऽन्य-
न्नान्यच्छृणोति न जिघत्सति पक्षिसंघः ।
रोमाञ्चवानिव मुदा गरुतं धुनानो
वंशीकलास्वदनमेव परं करोति ॥ २८१ ॥

प्रेमानुभावविशेषस्यैव मुनित्वगमकतामप्याह न स्पन्दत इति, स्तम्भाख्योऽनुभाव एव समाधिलक्षणगमकः । न रौतीत्यादिभिश्चतुर्भि-र्विषयान्तरारोचकत्वमेव वागादीन्द्रियप्रत्याहारज्ञापकम् । रोमाञ्चवानि-त्युभयत्र भक्तिसूचकतद्राहित्ये सति मुनित्वस्यापि वैफल्यज्ञापनाय । न जिघत्सति न भोक्तुमिच्छति । गरुतं पक्षम् ॥ २८१ ॥

स्रस्ते रथाङ्गकलहंसविचित्रचेले
प्रव्यक्तसैकतनितम्बमुदीर्णफेणम् ।
आवर्तवर्तितघनभ्रमिभिः समीये-
ऽपस्मार एव मुरलीनिनदैर्नदीभिः ॥ २८२ ॥

तदेवं मुरल्याः सर्वेष्वपि रसेष्वप्युद्दीपकत्वे, शृङ्गारे त्वतिवैशिष्ट्येन तत् कथयन्ती स्वीयं भावमेव व्याचक्षाणा काचिदचेतना अपि नदीः प्रस्तौति स्रस्ते-इति । रथाङ्गाः कलहंसाश्चैव विचित्रं चेलं परिधानीय-वस्त्रं तस्मिन् स्रस्ते सति, तेषामपि भाववैवश्येन पुलिनाद्बहिष्प्रदेशान्त-र्लुठनात् । प्रव्यक्तं सैकतं सिकतामयपुलिनमेव नितम्बं येन तदन्यथा स्यादेवम्, अपस्मारोऽत्र कामशराघातजनित आधिविशेष एव, समीये संप्राप्तः ॥ २८२ ॥

वीचीकरैः सरसिजाञ्जलिमर्पयन्त्यः
कृष्णाङ्घ्रिपङ्कजयुगं बहु मानयन्त्यः ।
सच्छीकरैः शिशिरयन्ति रसेन वंशी-
नादप्रहृष्टमनसः सखि शैवलिन्यः ॥ २८३ ॥

शैवलिन्यो नद्यः । तथा च "नद्यस्तदा तदुपधार्ये"ति ॥ २८३ ॥

आच्छादयन् शरदशीतकरस्य तापं
छत्रायितः स्ववपुषायमचेतनोऽपि ।
संसर्पति प्रतिपथं परितः प्रसर्पन्
मैत्रीं विभावयति मेघरुचीह मेघः ॥ २८४ ॥

एवं नद्यो यथा नायिकात्वाभिमानवत्यो निजसच्छीकरादिभिस्तस्य भूतलगततापं शमयन्त्यः सेवन्ते, तथा मेघोऽपि सख्याभिमानेन नभस्तलगतं तापं शमयन् सेवमानो लक्ष्यते । अतः के तावद्दास्यं न कुर्वन्ति केवलं वयमेव तत्र वञ्चिता इत्यभिव्यञ्जयन्ती काचिदाह· आच्छादयन्निति । शरदशीतकरस्य शारदसूर्यस्य । मेघस्येव रुक् कान्तिर्यस्य तस्मिन्, इति सावर्ण्यमेव मैत्रीहेतुः, तथा जगत्तापशमकत्वादिकं च ज्ञेयम् । इह श्रीकृष्णे ॥ २८४ ॥

कर्पूरपूरपरमाणुसमेन वारां
शीतेन शीकरभरेण विसारिणा यः ।
गोचारणश्रममपाकुरुतेऽनुगायन्
वंशीममुष्य घन एव निसर्गबन्धुः ॥ २८५ ॥

यः श्रीकृष्णः । अमुष्य श्रीकृष्णस्य । तथा च "दृष्ट्वातपे"·इति॥२८५॥

स्निग्धेषु शाद्वलतलेषु पदारविन्द-
स्यन्दीनि वल्लभतमाकुचकुङ्कुमानि ।
वक्षोरुहेषु च मुखेषु च रूषयन्त्यो
धन्याः पुलिन्दसुदृशः सुरसा भवन्ति ॥ २८६ ॥

Digitized by Google

हन्तैवं सर्वजगदेव प्राप्तकृष्णमाधुर्यार्णवानुशीलनतया धन्यं केवलमेकैवाहं तत्र वञ्चितेति सर्वमुख्यतमा कापि सदा भोगेऽपि तद्गन्धमात्राधारस्तुतिरित्युज्ज्वलमणिलक्षितमादनभावोदयेनाह हिन्ध्येति । अत्र यद्यपि वल्लभतमा स्वयमेव तथापि· अनुरागस्यातिप्रौढिम्ना स्वस्य तथात्वाननुभवादपरेति भावना । पदारविन्दात् स्यन्दीनीति, रतिसमये लग्नान्यासन्नित्यर्थः । क्षयन्त्यो लिम्पन्त्यः । वक्षोरुहेष्विति, तच्चरणार्पणस्यैवाभिमानः । मुखेष्विति, तत्सौरभ्यलोभपारवश्येन ॥ २८६ ॥

हन्ताधिकार्यनधिकारितया न भेदः

सर्वाभिलाषसदने मधुरिम्णि तस्य ।

युक्तं पुलिन्दसुदृशो यदिहानुरक्ता

रागस्य च प्रकटने ह्ययमेव मार्गः ॥ २८७ ॥

अधिकार्यनधिकारितयेति· स्वस्यापि तत्र योग्यतास्थापनेनाश्वासनम् । युक्तमित्यत्र हेतुः सर्वाभिलाषेति । रागस्य प्रटन इति, स्वस्यायोग्यत्वे ज्ञातेऽपि लोभस्तु भवेदेवेति भावः । तथा च "पूर्णाः पुलिन्द्य" इति ॥ २८७ ॥

यः कन्दकन्दरपयःफलधातुरागैः

क्रीडोपयोगिभिरसौ भजतेऽनुवेलम् ।

गोवर्धनो गिरिवरः स हि माधवस्य

लीलासखश्च सखि भागवतोत्तमश्च ॥ २८८ ॥

पुलिन्दीप्रस्तावेनानुस्मृतं तदास्पदस्य श्रीगोवर्धनस्य भूरि सौभगं वर्णयन्ती भङ्ग्या तत्रैव स्वाभिसारौत्सुक्यमपि सखीष्वभिव्यञ्जयन्त्याह यः कन्देति । लीलासखश्चेति, कन्दरादीनां क्रीडोपयोगित्वात् सख्यम् । भागवतोत्तमश्चेति, कन्दपयःफलधात्वाद्युपचारैः परिचरणाद्दास्यम् ॥ २८८ ॥

यस्याश्रयं कृतवतां सखि बद्धतृष्णाः

कृष्णस्तनोत्यभिमतं मतमेतदेव ।

श्रेयः सिषाधयिषवो न विना सहायं
योग्याश्च तद् घटयितुं कुशला भवन्ति ॥ २८६ ॥

वैष्णवोत्तमानुवृत्त्यैव विष्णोः प्राप्तिरिति सिद्धान्तयन्तीव तत्र गोवर्धनानुवृत्तिस्तु साक्षात् कृष्णवशीकारित्वलक्षणमिति वैशिष्ट्यमानयन्तो तत्रैव स्वस्यापि संजिगमिषां प्राणसख्यां सूचयन्त्याह यस्येति । मतमेतदेवेति, सात्वततन्त्रप्रामाण्यादपीति भावः । योग्यश्च योग्या अपि । तथा च "हन्तायमद्रिरबला" इत्यादि ॥ २८९ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य षष्ठः परिच्छेदः ॥

॥ द्रव्यवाचकनाम्नां विषये ॥

१ ॥ द्रव्यवाचकानि सामान्यनामानि जातीर्बोधयन्ति ॥—द्रव्यवाचकान्यपराणि च सामान्यनामानि जातितात्पर्येणैव प्रयुज्यन्ते, यथा बहूनां व्यक्तिरूपाणां द्रव्याणामनुगमः क्रियते कर्तुं शक्यते च, यद्वत्तया च तानि सर्वाणि साधारणजातावन्तर्भावमेकपदेन बोधनं चार्हन्ति । अनुगमः क्रियते कर्तुं शक्यते इति द्विधाकथनं तु जगति सत्यप्येकस्मिन्नेव दिवाकरे तद्विज्ञानस्य यत्किंचिद्धर्मेणावच्छिन्नतया यथा सत्सु बहुष्वेकजातीयद्रव्येषु तेषामेकैकमपि तत्तत्साधारणावच्छेदकधर्मेणानुगतं भवति, तथा यदि नक्षत्राणीव सूर्या अप्यनेके स्युस्तर्हि तेषामप्येकैकस्य सूर्यत्वधर्माक्रान्तत्वसंपत्तये । यदि मनुष्यो नक्षत्रेभ्यो यथोचितदूरे स्थित्वा तानि पश्येत्तर्हि सूर्यपदबोध्यविज्ञानसमानाकाराण्येव महान्ति प्रतीयेरन्निति सूर्यबहुत्वं कल्पयद्भिरूहितो हेतुरप्यत्र नापेक्ष्यते । एतदुक्तं भवति । परापरजातो मनुष्यरचिततथाविधविज्ञानसमुदायमेवाश्रवतो न पुनः सन्तं वस्तु-

स्वभावम् । वस्तुतो यत्रैकस्य (दूरस्थस्य) नक्षत्रं प्रतीयते तदपरस्य (समीपस्थस्य) सूर्यो भायादित्यस्यापि संभाव्यत्वात् ॥

२ ॥ सर्वस्या अपि जातेः स्वरूपमवच्छेदकविज्ञानमस्ति ॥—सर्वस्या अपरजातेः परिच्छेदकं तस्याः स्वरूपमस्ति, यद्वत्त्वेन द्वे विशेषजाती पर-स्परस्या भिद्येते । तच्च तदवबोधावच्छेदकविज्ञानमेव न त्वन्यत्कि-मपि । इत्थं च यद्यत्तादृशविज्ञानघटकं तत्सर्वमपि तस्या जातेरैकान्ति-कम् । यद्यपि यदस्माभिर्ज्ञायते येन च वयं तानि द्रव्याणि तत्तज्जाति-रूपेण पृथक्कुर्मस्तत्सर्वमपि सद्वस्तूनां स्वरूपतोऽभिन्नमेवास्ति तथापि सर्वेषां तज्जातीयगुणानां स्वरूपविशेषाश्रयत्वाद् द्रव्याणामार्थस्वरूपात्तस्य स्वरूपस्य विवेचनाय शाब्दस्वरूपमिति विशेषपरिभाषया तदत्राभि-धीयते । यथा । भवतु, सुवर्णं पीतं गुरु, द्रवत्वयोग्यं, स्थिरमाघातवर्द्ध-नीयं, तथापि तस्य तदेव शाब्दं स्वरूपं यत्तात्पर्येण सुवर्णपदं प्रयुज्यते । परंतु यत्र सुवर्णस्य सर्वे धर्माः सन्ति तदेव तद्द्रव्यस्याप्रत्यक्षावयवसंस्थानरूपं वास्तविकं रूपमस्ति । उभयोः शाब्दार्थयोः स्वरूपपदाभिधेयत्वेऽपि कोऽनयोः परस्परं भेद इति तावत्स्पष्टं विचार्यते ॥

३ ॥ आर्थस्वरूपशाब्दस्वरूपे परस्परं भिद्येते ॥—यद्यपि शाकार-पिण्डविशेषाश्रिता गतिः, प्रियं विवेकश्चेतीमे धर्मा एव तादृशं मिश्रवि-ज्ञानं यद्बोधायास्मदादिभिर्मनुष्यपदं प्रयुज्यते । अत एव च तत्तस्या विशेषजातेः शाब्दं स्वरूपं भवितुमर्हति, तथापि न कोऽपि पुमान् मिश्रितं विज्ञानमेवार्थं स्वरूपमस्ति, तदेव च तज्जातीयव्यक्तिविशेषउपलभ्यमा-नानां सर्वेषां (गुणानां) व्यापाराणां मूलमिति कथयति । मिश्रितविज्ञा-नघटकानां सर्वेषां धर्माणां मूलं तु किमपि सर्वथा ततो भिन्नमस्ति । किंच यस्माद्गतिप्रत्यक्षतर्कशक्त्यादय उद्भवन्ति यं च सा नियताकृतिराश्र-यते तादृशं मनुष्यावयवसंस्थितिविशेषं यदि वयमीश्वरा इव देवयोतयइव वा विशेषरूपेणाजानीम तर्हि साम्प्रतिकमनुष्यविशेषजातिलक्षणघटका-त्तस्य स्वरूपविज्ञानं सर्वथा भिन्नमेवाभविष्यत् । अस्मदीयं मनुष्यव्यक्ति-विज्ञानं च साम्प्रतिकलोकप्रसिद्धमनुष्यविज्ञानात् सर्वथा भिन्नमेव स्यात् ।

यथा हि सुप्रसिद्धतरस्य द्वासवर्गनगरीयघटीयन्त्रस्य निखिलानवयवान् विमर्शपूर्वकं पश्यतस्तद्विज्ञानं केवलं बाह्यावयवान् मुहूर्तादिसूचकसूचीचलनमात्रं च पश्यतो घण्टामणेरभिहतस्य घनरवमात्रं शृण्वतश्च ग्रामीणस्य तद्यन्त्रविज्ञानात् सर्वथा विजातीयं भवति ॥

४ ॥ शाब्दार्थोभयविधमपि स्वरूपं व्यक्तिसंबद्धं नास्ति ॥—अस्मादेतदभिहितं भवति । स्वरूपपदस्य लोकप्रसिद्धार्थपरत्वे तदर्थो जातिः । व्यक्तिविषये च तास्ताव्यक्तयस्तासु तासु जातिषु परिगण्यन्ते इत्येव प्रतीयते नेतोऽन्यत्किमपि । किं च यद्यपि तथा व्यक्तयस्तत्तज्जातिष्वन्तर्भवन्ति, जातिवाचकपदेनाभिधातुं च शक्यन्ते, तान्यवच्छेदकविज्ञानानि पृथक्कृत्य यदि व्यक्तयो जातिनाम्ना ऽभिधीयेरंस्तर्हि कस्या अपि तादृशव्यक्तिसमुदायघटकैकव्यक्तेः सर्वस्यापि स्वरूपस्य विमर्शोऽपि तत्त्वतएव लुप्येत । एकस्य ज्ञानं विना परस्य ज्ञानासंभवादेव च तयोः परस्परं संबन्धो ऽस्तीति प्रतीयते । यद्यपि यथा इमस्मि तथैव मया भाव्यम् । ईश्वरेण प्रकृत्या च तथैव सृष्टत्वात्, तथापि मयि किमप्यसाधारणं नास्ति यन्मदितरसत्तानधीनसत्ताकं स्यात् । परिवर्तनं नाम दैववशाद्रोगवशाद्वा मम वर्णाकारौ । ज्वरो निद्राभावो वा मदीयां बुद्धिं स्मृतिमुभयं वा ऽपकुर्यादङ्गविकारश्चेन्द्रियाणि चैतन्यं जीवनमपि नाशयेत् । एवमन्येषामपि मत्समानाकृतिमतां प्राणिनां मदपेक्षया ऽधिकं सम्यक्तरा न्यूना विरुद्धा वा ज्ञानशक्तयो भवेयुः । अपरे च मत्तोऽत्यन्तं भिन्नाकारा ज्ञानेन्द्रियवन्तो भवितुमर्हन्ति । तत्रैतेषां ज्ञानशक्तीन्द्रियादीनां मध्ये न किमपि कस्यापि व्यक्तिविशेषस्यासाधारणं स्वरूपं भवितुमर्हति, यावत्तत्तद्वस्तूनां सामान्यजातिर्विशेषजातिर्वा ऽऽत्मनि नावधार्यते । जात्यवधारणे तु सद्य एव तज्जातेरवच्छेदकविज्ञानानुसारि किमप्यसाधारणं स्वरूपमुपलभ्यते । निजविमर्शानां चिन्तने क्रियमाणे यावदेव किमपि स्वरूपं कल्पयितुमुपक्रम्यते तावदेव कस्याश्चिद्विशेषजातेर्विमर्शो यत्किंचित्पदबोध्यविज्ञानं वा ऽऽत्मगोचरो भवतीति तु सर्वैः स्वस्वविमर्शपरीक्षयैवावधारयितुं शक्यते । अनेनैवसंबन्धेन स स धर्मस्तस्य तस्यासाधारणस्वरूपत्वेनाभिधी-

यते । नन्वेवं बुद्धिमत्त्वं मम यस्य कस्यापीतरस्य शरीरिणो व्यक्तिविशेषस्यासाधारणं स्वरूपं संभवतीति चेन्न । एतस्य तादृशव्यक्तिस्वरूपत्वे यस्मिन्नहं लिखामि तत्पत्रव्यक्तेरक्षरवत्त्वमिव तदतिप्रसक्तं स्यात् । परं तु यदि कश्चन प्राणी मनुष्यजातावन्तर्भाव्यो मनुष्यपदवाच्यश्च स्यात्तदा बुद्धेर्मनुष्यपदाभिधेयविज्ञानघटकतया सा तस्यासाधारणं स्वरूपं स्यात् । यथा हि । यदा मल्लिखितं पत्रं पुस्तकेतिनाम्ना व्यवह्रियेत तस्यां विशेषजातावन्तर्भाव्येत च तदा ऽक्षरवत्त्वं तादृशपत्रव्यक्तेरपि स्वरूपं भवितुमर्हति । इत्थं चासाधारणस्वरूपवत्त्वं तदभावश्च केवलमस्मद्विज्ञानतद्वाचकपदयोः संबन्धिनी स्तः । तथा चायं निर्गलितोऽर्थः यज्जातिवाचपदाभिधेया यदवच्छेदकविज्ञानघटका धर्मा यासु यासु व्यक्तिषु न स्युस्तास्ता व्यक्तयो न तद्विशेषजातीयत्वेन परिगण्यन्ते, न वा तद्वाचकपदेनाभिधीयन्ते । तस्यैवावच्छेदकविज्ञानस्य तद्विशेषजात्यसाधारणस्वरूपत्वात् ॥

५ ॥ एवं च यदि केषां चिन्मते शरीरविज्ञानं केवलं विस्तारविज्ञानात्मकं देशविज्ञानात्मकं वा स्यात्तर्हि घनत्वं शरीरस्यासाधारणं स्वरूपं नैव भवेत् । अपरे यदि यत्र शरीरपदं प्रयुञ्जते तत्र तद्विज्ञानं घनत्वविस्तारोभयधर्मघटितं कल्पयेयुस्तर्हि शरीरस्यासाधारणं लक्षणं घनत्वमपि स्यात् । अतस्तदेव तस्य स्वरूपं भवति यज्जातिवाचकपदाभिधेयमिश्रितविज्ञानघटकं स्यात्, यद्वैधुर्येण च न कापि व्यक्तिस्तज्जातीयत्वेन परिगण्येत नापि तेन नाम्ना व्यवहर्तुं शक्येत । यदि किं चन तादृशं धातुखण्डमुपलभ्येत, यस्मिन्नयस्कान्ताभिमुखीभवनं तेनाकृष्टत्वं वा विहायान्ये सर्वे लोहगुणाः स्युस्तदाप्यस्मिन्नसाधारणं स्वरूपं नास्तीति तु नाशङ्कनीयम् । वस्तुतो वर्तमानस्य पदार्थस्य किमप्यसाधारणं स्वरूपमस्ति न वेति प्रश्नस्यैव तावद्व्याहतत्वात् । अवच्छेदकविज्ञानस्यैव च विशेषधर्मासाधारणस्वरूपान्यतरपरिच्छेदकतया प्रकृते ऽसाधारणस्वरूपं भेदको विशेषो वा रचितोऽस्ति न वेति शङ्कापि न कर्तुमुचिता । किं च पदप्रतिपाद्यावच्छेदकविज्ञाननैरपेक्ष्येण यत्र कुत्रापि वस्तुषु भेदकविशेषाणां चर्चा तु भ्रान्तप्रलपितसमानैव स्यात् । विशेषजातीनां प्रतिमानत्वेन परिदृष्ट-

यत्किंचिदवच्छेदकविज्ञाननैरपेक्ष्येण ययोः कयोरपि द्वयोः पदार्थयोः परस्परं भेदकस्य विशेषस्य कल्पकं किमस्तीति तं प्रति प्रष्टुं शक्यत्वात्। सर्वेषामीदृशानां प्रतिमानानामत्यन्तं दूरोत्सारितत्वादन्यनैरपेक्ष्येण विचारितासु तत्तद्व्यक्तिषु सर्वत्र धर्माः सममेवासाधारणा उपलभ्येरन्। प्रत्येकस्यां व्यक्तौ वर्तमानं सर्वमपि तद्व्यक्तेरसाधारणमेव चेदसाधारणातिरिक्तकथं चच्छेदप्रसङ्गः। यद्यप्ययस्कान्तानुसरणं लोहस्यासाधारणं स्वरूपमस्ति न वेत्यपि प्रश्नस्तथैव, तथापि मन्ये, यत्किंचिद्विशेषजातीयत्वं लोहपदबोध्यत्वं वाऽविचार्य लेखनीकर्तनसाधनीभूतद्रव्यखण्डविशेषस्यायस्कान्तानुसरणमसाधारणस्वरूपं भवति नवेति जिज्ञासाप्यत्यन्तमनुचिता निरर्थिका च। किं च यदुक्तरीत्या पदाभिधेयावच्छेदकविज्ञानानि विशेषजातीनां परिच्छेदकानि स्युस्तर्हि तादृशविज्ञानानन्तर्गतं न किमप्यसाधारणं स्वरूपं भवितुमर्हति॥

६॥ वस्तुषु शाब्दस्वरूपपदेन मयाऽभिधीयमानेभ्यो द्रव्याणामवच्छेदकविज्ञानेभ्यो द्रव्यगतमार्थस्वरूपं पृथगेवास्तीति भूयो वर्णितम्। अनेनार्थस्वरूपपदेन शाब्दस्वरूपसमनियतत्वेनोपलभ्यमानानां तस्मिन्नेव समुदितानां सर्वेषां धर्माणां मूलभूतं यस्य कस्यापि वस्तुनोऽवयवानां वास्तविकं स्वेतरसंबन्धनैरपेक्ष्येण सर्वेषु वर्तमानं संस्थितिविशेषमेवाहमभिप्रैमि। परं त्वस्मिन्नप्यर्थे स्वरूपं जातिसापेक्षं विशेषजातिं चापेक्षते। धर्माणां जातिमात्रसंबन्धित्वाद्व्यक्तिसंबन्धाभावाच्च धर्माश्रयपदार्थसंस्थितिरूपमिदमवश्यं कां चन विशेषजातिमपेक्षते। तथा हि। सुवर्णस्य वर्णविशेषो गुरुत्वमाघातवर्धनीयत्वं द्रवयोग्यता चेतीमानि शाब्दस्वरूपाणि सन्तीति परिकल्पनादार्थं स्वरूपमेषां धर्माणां समागमाधिकरणस्य द्रव्यस्यावयवानां संस्थितिरूपं भवति। अस्ति चैतच्चाकचिक्यादीनामन्येषां तादृशमिश्रविज्ञानसहचरितानां धर्माणामपि मूलम्। अपत्याख्ययस्या जातेः साधारणावच्छेदकविज्ञानस्य वा कल्पनामाश्रित्यैव स्वरूपाणि धर्मा वा सन्ति। परं त्वेतादृशद्रव्यविशेषो नास्त्येव यस्मिंस्तेषां धर्माणां केचनासाधारणस्वरूपाणि तदविनाभूतानि वा भवेयुः। असाधारणस्वरूपं

च तस्य तत्तज्जातीयत्वप्रयोजकं भवति । परं त्वस्यावच्छेदकविज्ञानविशेषबोधकपदाभिधेयत्व न विचार्यंत चेच किमप्येतस्यासाधारणं नाप्यनेनाविनाभूतं वा स्यात् । वस्तुतस्तु द्रव्याणामार्थस्वरूपविषये तु तानि किंरूपाणि सन्तीत्येतस्य यथार्थज्ञानमन्तरा तेषां सत्ता तु केवलं कल्पनामात्रमेव । परं तु विशेषजात्या सह तेषां नित्यसंबन्धस्य प्रयोजकं तु शाब्दमेव स्वरूपं यस्य ते धर्मा मूलानि कारणानीति च परिकल्प्यन्ते ॥

७ ॥ शाब्दं स्वरूपं विशेषजातिं परिच्छिनत्ति ॥— इदमपरमपि विचारणीयं यत्तयोः स्वरूपयोः कतरेण द्रव्याणि जातिरूपेण विशेषजातिरूपेण वा परिच्छिद्यन्ते । तत्र जातिवाचकपदबोध्यत्वादेव च शाब्दमेव स्वरूपं द्रव्याणि परिच्छिनत्तीति तु स्पष्टमेव । अतो जातिवाचकपदाभिधेयान्तर्भूतेन न येन केन वित्ताः पदार्थजातयः परिच्छेत्तुं शक्यन्ते, अपि तु तादृशावच्छेदकविज्ञानरूपेण, यल्लिङ्गतया तत्पदं तात्पर्यगोचरो भवेत् तदेव चास्माभिः पूर्वोक्तप्रकारेण शाब्दं स्वरूपमिति निगद्यते । कथमन्यथाऽस्माभिः शक्यते वक्तुमयमश्वोऽयमश्वतरोऽयं प्राणीयमोषधीरिति । कथं वा ऋते तस्य तस्य तत्तच्छाब्दस्वरूपवत्त्वात्तत्तत्पदबोध्यावच्छेदकविज्ञानाभिन्नयत्किंचिद्रूपवत्त्वाद्वा इदममुकामुकजातीयमित्युपपद्येत । यदा कश्चनैवमादीनि द्रव्यनामानि तद्वाच्यस्वरूपाणां यत्किंचिद्विशेषजातीयत्वस्य ज्ञानाय ज्ञापनाय वा शृणोति वदति वा तदा ऋते स्वीयपरामर्शचिन्तनात् किमपि कर्तुं शक्नोतीति कथय भो मित्र ॥

८ ॥ एतदुक्तं भवति । विशेषजातयः स्वात्मगोचरमिश्रविज्ञानानुसारेणैव भिन्नभिन्ननामाभिधेयगणान्तःपातित्वरूपा एव न पुनर्यथार्थविविक्तार्थस्वरूपानुसारेण । किं चैकजातीया बह्व्यो व्यक्तय एकेन नाम्नाभिधीयन्ते एकविशेषजातीयाश्च भवन्ति । एवमपि तासु व्यक्तिषु वास्तविकावयवसंस्थित्याश्रिता धर्मा व्यक्त्यन्तरधर्मतस्तथैवात्यन्तं भिन्नाः सन्ति यथा भिन्नविशेषजातीयव्यक्तिधर्माः स्वतो भिद्यन्ते । प्राकृतिकद्रव्यविचारकैः सर्वैरप्येतस्य सुलभविमर्शनीयत्वाद्रासायनिका यदा गन्धकस्य स्रोतोऽञ्जनस्य तुत्थस्य वैकस्मिन् खण्डे वर्तमानान्धर्मानपरस्मिन्नपि खण्डे कदाचिद्दृष्टे-

वान्वेषयन्ति तदा ते विशेषतः स्वीयक्लेशकरानुभवेनापीदमेव प्रायो निश्चि-न्वन्ति । यद्यप्येकपदाभिधेयशाब्दस्वरूपवत्त्वात्तान्येकजातीयानि द्रव्याणि भवन्ति तथापि सूक्ष्मपरीक्षाप्रकारैस्तथा परस्परं भिन्ना धर्मा ऊह्यन्ते येन सुनिपुणरासायनिकानां परिश्रमा आशाश्च निष्फला भवन्ति । परं तु यदि पदार्थाः स्वीयार्थस्वरूपानुसारेण तत्तद्विशेषजात्या पृथक्क्रियेरंस्तर्ह्ये-कविशेषजातीययोर्द्वयोर्व्यक्त्योर्भिन्नभिन्नधर्माणामुपलब्धिस्तथैवासंभाव्या स्याद् यथैव द्वयोः समपरिमाणयोः समभुजत्रिकोणयोर्वर्तुलयोर्वा भिन्न-भिन्नधर्मोपलब्धिः । अस्मदभिप्रेतमसाधारणस्वरूपं तु तदेव येन सर्वा व्यक्तय-स्तत्तज्जातिषु परिच्छिद्यन्ते ऽथवा तत्तदेकैकजातिनामसु तत्तज्जातिषु वा यदेकरूपमस्ति । किं च नामनिर्धारणावच्छेदकविज्ञानादृते किं रूपमस्तीति नावधारयितुं शक्यते । अतश्चैतद् यावज्जातिवाचकेन सह वस्तुतः संबध्यते न तावद्व्यक्तिविशेषसद्भावेन सहेति ॥

SARVA-DARSANA-SANGRAHA.

CHAPTER IX.

THE RASESVARA-DARSANA OR MERCURIAL SYSTEM.

(Continued from page 196.)

Other Māheśvaras there are who while they hold the identity of self with God, insist upon the tenet that the liberation in this life allowed in all the systems depends upon the stability of the bodily frame, and therefore celebrate the virtues of mercury or quicksilver as a means of strengthening the body. Mercury is

---

॥ सर्वदर्शनसङ्ग्रहः ॥

अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनो ऽपि पिण्डस्थैर्ये सर्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पिण्डस्थैर्योपायं पारदादिप-दवेदनीयं रसमेव सङ्गिरन्ते रसस्य पारदत्वं संसारपरपारप्रापणहेतुत्वेन । तदुक्तम्

called *pārada*, because it is a means of conveyance beyond the series of transmigratory states. Thus it has been said:

> It gives the farther shore of transmigration: it is called *pārada*.

And again in the Rasārṇava:

> It is styled *pārada*, because it is employed for the highest end by good practitioners.
>
> Since this asleep, equal to me, goddess, arises from my members, And is the exudation of my body, it is called *rasa*.

It may be urged that the literal interpretation of these words is incorrect, the liberation in this life being explicable in another manner. This objection is not allowable, liberation being set out in the six systems as posterior to the death of the body, and upon this there can be no reliance, and consequently no activity to attain to it free from misgivings. This is also laid down in the same treatise:

> Liberation is declared in the six systems to follow the death of the body.

संसारस्य परं पारं दत्ते ऽसौ पारदः स्मृत इति । रसार्णवे ऽपि

पारदो गदितो यस्मात् परार्थं साधकोत्तमैः ।
सुप्तो ऽयं मत्समो देवि मम प्रत्यङ्गसम्भवः ।
मम देहरसो यस्माद्रसस्तेनायमुच्यते इति ॥

प्रकारणान्तरेणापि जीवन्मुक्तियुक्तौ नेयं वाचोयुक्तिर्युक्तिमतीति चेन्न षट्स्वपि दर्शनेषु देहपातानन्तरं मुक्तेरुक्ततया तत्र विश्वासानुपपत्त्या निर्विचिकित्सप्रवृत्तेरनुपपत्तेः । तदप्युक्तं तत्रैव

षड्दर्शने ऽपि मुक्तिस्तु दर्शिता पिण्डपातने ।
करामलकवत् सापि प्रत्यक्षा नोपलभ्यते ।
तस्मात् तं रक्षयेत् पिण्डं रसैश्चैव रसायनैरिति ॥

गोविन्दभगवत्पादाचार्यैरपि

Such liberation is not cognised in perception like an emblic myrobalan fruit in the hand.

Therefore a man should preserve that body by means of mercury and of medicaments.

Govinda-bhagavat also says :

Holding that the enjoyments of wealth and of the body are not permanent, one should strive

After emancipation; but emancipation results from knowledge, knowledge from study, and study is only possible in a healthy body.

The body, some one may say is seen to be perishable, how can its permanency be effected? Think not so, it is replied, for though the body, as a complexus of six sheaths or wrappers of the soul, is dissoluble, yet the body, as created by Hara and Gaurī under the names of mercury and mica, may be perdurable. Thus it is said in the Rasahridaya :

They who without quitting the body have attained to a new body, the creation of Hara and Gaurī,

They are to be lauded, perfected by mercury, at whose service is the aggregate of magic texts.

इति धनशरीरभोगान्मत्वा ऽनित्यान् सदैव यतनीयम् ।
मुक्तौ सा च ज्ञानात् तच्चाभ्यासात् स च स्थिरे देहे इति ।

ननु विनश्वरतया दृश्यमानस्य देहस्य कथं नित्यत्वमवसीयते इति चेन्मैवं मंस्थाः षाट्कौशिकस्य शरीरस्यानित्यत्वे ऽपि रसाभ्रकपदाभिलप्यहरगौरीसृष्टिजातस्य नित्यत्वोपपत्तेः । तथाच रसहृदये

ये चात्यक्तशरीरा हरगौरीसृष्टिजान्तरं प्राप्ताः ।
वन्द्यास्ते रससिद्धा मन्त्रगणः किङ्करो येषामिति ॥

तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमं दिव्यतनुर्विधेया हरगौरीसृष्टिसंयोगजनितत्वञ्च रसस्य हरजत्वेनाभ्रकस्य गौरीसम्भवत्वेन तत्तदात्मकत्वमुक्तम्

The ascetic, therefore, who aspires to liberation in this life, should first make to himself a glorified body. And inasmuch as mercury is produced by the creative conjunction of Hara and Gaurī, and mica is produced from Gaurī, mercury and mica are severally identified with Hara and Gaurī in the verse:

> Mica is thy seed, and mercury is my seed,
>
> The combination of the two, O goddess, is destructive of death and poverty.

This is very little to say about the matter. In the Raseśvarasiddhānta many among the gods, the Daityas, the Munis, and mankind, are declared to have attained to liberation in this life by acquiring a divine body through the efficacy of quicksilver.

> Certain of the gods, Maheśa and others; certain Daityas Sukra and others;
>
> Certain Munis, the Bālakhilyas and others; certain kings, Someśvara and others;
>
> Govinda-bhagavat, Govinda-nāyaka,
>
> Charvati, Kapila, Vyāli, Kāpāli, Kāndalāyana,
>
> These and many others proceed perfected, liberated while alive,

---

अभ्रकस्तव बीजन्तु मम बीजन्तु पारदः ।
अनयोर्मेलनं देवि मृत्युदारिद्र्यनाशनमिति ॥

अत्यल्पमिदमुच्यते देवदैत्यमुनिमानवादिषु बहवो रससामर्थ्या-द्दिव्यं देहमाश्रित्य जीवन्मुक्तिमाश्रिताः श्रूयन्ते रसेश्वरसिद्धान्ते ॥

देवाः केचिन्महेशाद्या दैत्याः काव्यपुरःसराः ।
मुनयो बालखिल्याद्या नृपाः सोमेश्वरादयः ।
गोविन्दभगवत्पादाचार्यो गोविन्दनायकः ।
चर्वटिः कपिलो व्यालिः कापालिः कन्दलायनः ।
एतेऽन्ये बहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि ।

Having attained to a mercurial body, and therewith identified.

The meaning of this, as explicated by Parameśvara to Parameśvarī, is as follows:

By the method of works is attained, O supreme of goddesses, the preservation of the body;
And the method of works is said to two-fold, mercury, and air,
Mercury and air swooning carry off diseases, dead they restore to life,
Bound they give the power of flying about.

The swooning state of mercury is thus described:

They say quicksilver to be swooning when it is perceived as characterised thus,
Of various colours, and exempt from excessive volatility.
A man should regard that quicksilver as dead, in which the following marks are seen,
Wetness, thickness, brightness, heaviness, mobility.

The bound condition is described in another place as follows:

The character of bound quicksilver is that it is
Continuous, fluent, luminous, pure, heavy, and that it parts asunder under friction.

तनुं रसमयीमाप्य तदात्मककथाचणा इति ॥

अयमेवास्यार्थः परमेश्वरेण परमेश्वरीं प्रति प्रपञ्चितः

कर्म्मयोगेन देवेशि प्राप्यते पिण्डधारणम् ।
रसश्च पवनश्चेति कर्म्मयोगो द्विधा स्मृतः ॥
मूर्च्छितो हरति व्याधीन् मृतो जीवयति स्वयम् ।
बद्धः खेचरतां कुर्य्याद्रसो वायुश्च भैरवीति ॥

मूर्च्छितस्वरूपमप्युक्तम्

नानावर्णो भवेत् सूतो विहाय घनचापलम् ।
लक्षणं दृश्यते यस्य मूर्च्छितं तं वदन्ति हि ॥

Some one may urge: If the creation of mercury by Hara and Gaurī were proved, it might be allowed that the body could be made permanent; but how can that be proved? The objection is not allowable, inasmuch as that *can* be proved by the eighteen modes of elaboration. Thus it is stated by the authorities:

> Eighteen modes of elaboration are to be carefully discriminated,
> In the first place as pure in every action, in perfecting the wise.

And these modes of elaboration are enumerated thus:

> Sweating, rubbing, swooning, fixing, dropping, coercion, restraining,
> Kindling, going, falling into globules, pulverising, covering,
> Internal flux, external flux, burning, colouring, and pouring,
> And eating it by parting and piercing it, are the eight modes of treating quicksilver,

These treatments have been described at length by Govinda-bhagavat, Sarvajña-rāmeśvara and the other ancient authorities, and are here omitted to avoid prolixity.

> आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवचापलम् ।
> यस्यैतानि न दृश्यन्ते तं विद्यात् मृतसूतकमिति ॥

अन्यत्र बद्धस्वरूपमप्यभ्यधायि

> अक्षतश्च लघुद्रावी तेजस्वी निर्म्मलो गुरुः ।
> स्फोटनं पुनरावृत्तौ बद्धसूतस्य लक्षणमिति ॥

ननु हरगौरीसृष्टिसिद्धौ पिण्डस्थैर्य्यमास्थातुं पार्य्यते तत्सिद्धिरेव कथमिति चेन्न अष्टादशसंस्कारवशात्तदुपपत्तेः । तदुक्तमाचार्य्यैः

> तस्य हि साधनविधौ सुधियां प्रतिकर्म्मनिर्म्मलाः प्रथमम् ।
> अष्टादश संस्कारा विज्ञातव्याः प्रयत्नेनेति ।

ते च संस्कारा निरूपिताः

The mercurial system is not to be looked upon as merely eulogistic of the metal, it being immediately through the conservation of the body, a means to the highest end, liberation. Thus it is said in the Rasārṇava :

Declare to me, O god, that supremely efficacious destruction of the blood, that destruction of the body, imparted by thee, whereby it attained the power of flying about in the sky. Goddess, (he replied) quicksilver is to be applied both to the blood and to the body. This makes the appearance of body and blood alike. A man should first try it upon the blood, and then apply it to the body.

It will be asked: Why should we make this effort to acquire a celestial body, seeing that liberation is effected by the self-manifestation of the supreme principle, existence, intelligence, and beatitude? We reply: This is no objection, such liberation being inaccessible unless we acquire a healthy body. Thus it is said in the Rasahṛidaya:

> That intelligence and bliss set forth in all the systems, in which a multitude of uncertainties are melted away,
> Though it manifest itself, what can it effect for beings whose bodies are unglorified?

स्वेदन मर्द्दन मूर्च्छन स्थापन पातन निरोधनियमाश्च
दीपन गगन ग्रासप्रमाणमथ जारणा पिधानम् ॥
गर्भद्रुतिबाह्यद्रुतिवारणा सरागसारणाश्चैव ।
क्रामणवेधौ भक्षणमष्टादशधेति रसकर्म्मेति ॥

तत्प्रपञ्चस्तु गोविन्दभगवत्पादाचार्य्यसर्व्वज्ञरामेश्वरभट्टारकप्रभृतिभिः प्राचीनैराचार्य्यैर्निरूपित इति ग्रन्थभूयस्त्वभयादुपेक्ष्यते ।

न च रसशास्त्रं धातुवादार्थमेवेति मन्तव्यं देहवेधद्वारा मुक्तेरेव परमप्रयोजनत्वात् । तदुक्तं रसार्णवे

लोहवधस्त्वया देव यद्दत्तं परमीशितः ।
तं देहवेधमाचक्ष्व येन स्यात् खेचरी गतिः ॥

He who is worn out with decrepitude, though he be free from cough, from asthma, and similar infirmities,
He is not qualified for meditation in whom the activities of the cognitive organs are obstructed.
A youth of sixteen addicted to the last degree to the enjoyment of sensual pleasures,
An old man in his dotage, how should either of these attain to emancipation?

Some one will object: It is the nature of the personal soul to pass through a series of embodiments, and to be liberated is to be extricated from that series of embodiments; how, then, can these two mutually exclusive conditions pertain to the same bodily tenement? The objection is invalid, as unable to stand before the following dilemmatic argument: Is this liberation, as to the nature of which all the founders of institutes are at one, to be held as cognisable or as incognisable? if it is incognisable, it is a pure chimera; if it is cognisable, we cannot get rid of life, for that which is not alive cannot be cognisant of it. Thus it is said in the Rasasiddhânta:

The liberation of the personal soul is declared in the mercurial system, O subtile thinker.

यथा लोहे तथा देहे कर्त्तव्यः सूतकः सता
समानं कुरुते देवि प्रत्ययं देहलोहयोः ।
पूर्व्वं लोहे परीक्षेत पश्चाद्देहे प्रयोजयेदिति ॥

ननु सच्चिदानन्दात्मकपरतत्त्वस्फुरणादेव मुक्तिसिद्धौ किमनेन दिव्यदेहसम्पादनप्रयासेनेति चेत्तदेतदवार्त्तं वार्त्तशरीरालाभे तद्वार्त्ताया अयोगात् । तदुक्तं रसहृदये

गलितानल्पविकल्पः सर्व्वाध्वविवर्जितश्चिदानन्दः ।
स्फुरितो ऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्येति ॥
यं जरया जर्ज्जरितं काशश्वासादिदुःखविशदञ्च ।
योग्यं तं न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम् ॥

In the tenets of other schools which repose on a diversity of argument,
Know that this knowledge and knowable is allowed in all sacred texts;
One not living cannot know the knowable, and therefore there is, and must be life.

And this is not to be supposed to be unprecedented, for the adherents of the doctrine of Vishnusvāmin maintain the eternity of the body of Vishṇu half-man and half-lion. Thus it is said in the Sākara-siddhi:

I glorify the man-lion set forth by Vishnu-svāmin,
Whose only body is existence, intelligence, and eternal and inconceivably perfect beatitude.

If the objection be raised that the body of the man-lion which appears as composite and as coloured is incompatible with real existence, it may be replied: How can the body of the man-lion be otherwise than really existent, proved as it is by three kinds of proof, (1) by the intuition of Śanaka and others, (2) by Vedic texts such as A thousand heads has Purusha, and (3) by Purāṇic texts such as That wondrous child, lotus-eyed, four-armed, armed with the conch-shell, the club and other weapons? Real existence and

---

बालः षोडशवर्षो विषयरसास्वादलम्पटः परतः ।
यातविवेको वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिमिति ॥

ननु जीवत्वं नाम संसारित्वं तद्विपरीतत्वं मुक्तत्वं तथा च परस्परविरुद्धयोः कथमेकायतनत्वमुपपद्यं स्यादिति चेत्तदनुपपद्यं विकल्पानुपपत्तेः मुक्तिस्तावत् सर्व्वतीर्थकरसम्मता सा किं ज्ञेयपदे निविशते न वा चरमे शशविषाणकल्पा स्यात् प्रथमे न जीवनं वर्जनीयमजीवतो ज्ञातृत्वानुपपत्तेः । तदुक्तं रसेश्वरसिद्धान्ते

रसाङ्कमेयमार्गोक्तो जीवमोक्षो ऽस्त्यधोमनाः ।
प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु ॥

other like predicates are affirmed also by Srīkānta-miśra the devoted adherent of Vishnu-svāmin. Let then those who aspire to the highest end of personal souls be assured that the eternity of the body which we are setting forth, is by no means an unprecedented doctrine. It has, thus, been said :

> What higher beatitude is there than a body undecaying, immortal,
> The repository of sciences, the root of merit, riches, pleasure, liberation ?

It is mercury alone that can make the body undecaying and immortal, as it is said :

> Only this supreme medicament can make the body undecaying and imperishable.

Why describe the efficacy of this metal? its value is proved even by seeing it, and by touching it, as it is said in the Rasārnava :

> From seeing it, from touching it, from eating it, from merely remembering it,

---

ज्ञानज्ञेयमिदं विद्धि सर्व्वमन्त्रेषु सम्मतम् ।
नाजीवन् ज्ञास्यति ज्ञेयं यदतोऽस्त्येव जीवनमिति ॥

न चेदमदृष्टचरमिति मन्तव्यं विष्णुस्वामिमतानुसारिभिः नृपञ्चास्यशरीरस्य नित्यत्वोपपादनात् । तदुक्तं साकारसिद्धौ ॥

सच्चिन्नित्यनिजाचिन्त्यपूर्णानन्दैकविग्रहम् ।
नृपञ्चास्यमहं वन्दे श्रीविष्णुस्वामिसम्मतमिति ॥

नन्वेतत् सावयवं रूपवदवभासमानं नृकण्ठीरवाङ्गं सदिति न सङ्गच्छत इत्यादिनाक्षेपपुरःसरं सनकादिप्रत्यक्षं सहस्रशीर्षा पुरुष इत्यादिश्रुतिः तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधमित्यादि पुराणलक्षणेन प्रमाणत्रयेण सिद्धं नृपञ्चाननाङ्गं कथमसत् स्यादिति । सदादीनि विशेषणानि गर्भश्रीकान्तमिश्रैः विष्णुस्वामिचरणपरिणतान्तःकरणैः प्रतिपादितानि । तस्मादस्मदिष्टदेहनित्यत्वमत्यन्तादृष्टं न भवतीति पुरुषार्थकामुकैः पुरुषैरेष्टव्यम् । अत एवोक्तम्

From worshipping it, from tasting it, from imparting it, appear its six virtues.

Equal merit accrues from seeing mercury as accrues from seeing all the phallic emblems

On earth, those at Kedāra, and all others whatsoever.

In another place we read :

The adoration of the sacred quicksilver is more beatific than the worship of all the phallic emblems at Káśi and elsewhere.

Inasmuch as there is attained thereby enjoyment, health, exemption from decay, and immortality.

The sin of disparaging mercury is also set out :

A wise man on hearing quicksilver heedlessly disparaged, should recall quicksilver to mind.

He should at once shun the blasphemer, who is by his blasphemy for ever filled with sin.

आयतनं विद्यानां मूलं धर्म्मार्थकाममोक्षाणाम् ।
श्रेयः परं किमन्यच्छरीरमजरामरं विहायैकमिति ।

अजरामरीकरणसमर्थश्च रसेन्द्र एव तदाह

एको ऽसौ रसराजः शरीरमजरामरं कुरुत इति ॥

किं वर्ण्यते रसस्य माहात्म्यं दर्शनस्पर्शनादिनापि महत्फलं भवति ।

तदुक्तं रसार्णवे

दर्शनात् स्पर्शनात्तस्य भक्षणात् स्मरणादपि ।
पूजनाद्रसदानाच्च दृश्यते षड्विधं फलम् ॥
केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित् ।
तानि दृष्ट्वा तु यत्पुण्यं रसदर्शनादित्यादिना ॥

अन्यत्रापि

काश्यादिसर्व्वलिङ्गेभ्यो रसलिङ्गार्च्चनं शिवमिति ।
प्राप्यते येन तल्लिङ्गं भोगारोग्यामृतामरमिति ।

रसनिन्दायाः प्रत्यवायो ऽपि दर्शितः

Digitized by Google

The attainment, then, of the highest end of the personal soul, takes place in the manner we have described, by an intuition of the highest principle by means of the practice of union (ἕνωσις) after the acquisition of a divine body.

Thereafter :

> The light of pure intelligence shines forth unto certain men of holy vision,
>
> Which, seated between the two eyebrows, illumines the universe, like fire, or lightning, or the sun :
>
> Perfect beatitude, unalloyed, absolute, the essence whereof is luminousness, undifferenced,
>
> From which all troubles are fallen away, knowable, tranquil, self-recognised :
>
> Fixing the internal organ upon that, seeing the whole universe manifested, made of pure intelligence,
>
> The aspirant even in this life attains to the absolute, his bondage to works annulled.

A Vedic text also declares: That is Rasa (mercury), having obtained this he becomes beatitude.

प्रमादाद्रसनिन्दायाः श्रुतावेनं स्मरेत् सुधीः ।
द्राक् त्यजेच्चिन्दकं नित्यं निन्दया पूरिताशुभमिति ॥

तस्मादस्मदुक्तया रीत्या दिव्यं देहं सम्पाद्य योगाभ्यासवशात् परतत्त्वे दृष्टे पुरुषार्थप्राप्तिर्भवति । तदा

भ्रूयुगमध्यगतं यत् शिखिविद्युत्सूर्य्यवज्जगद्भासि ।
केषाञ्चित्पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः ।
परमानन्दैकरसं परमं ज्योतिःस्वभावमविकल्पम् ।
विगलितसकलक्लेशं ज्ञेयं शान्तं स्वसंवेद्यम् ।
तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत् पश्यन् ।
उत्सन्नकर्म्मबन्धो ब्रह्मत्वमिहैव चाप्नोतीति ।

श्रुतिश्च

Thus then it has been shown that mercury alone is the means of passing beyond the burden of transmigratory pains. And conformably we have a verse which sets forth the identity between mercury and the absolute :

May that mercury which is the absolute preserve us from dejection and from the terrors of transmigration,
Which is naturally to be applied again and again by those that aspire to liberation from the enveloping illusion,
Which perfected endures, which plays not again when the soul awakes,
Which when it arises pains no other soul, which shines forth by itself from itself.

A. E. G.

रसो वै सः रसं ह्येवायं लब्ध्वानन्दीभवतीति ।

तदित्थं भवेदन्यदुःखभरतरणोपायो रस एवेति सिद्धम् । तथाच रसस्य परब्रह्मणा साम्यमिति प्रतिपादकः श्लोकः

यः स्यात् प्रावरणाविमोचनधियां साध्यः प्रकृत्या पुनः
सम्पक्वो सहते न दीव्यति परं वैश्वानरे जाग्रति ।
जातो यच्चापरं न वेदयति च स्वस्मात् स्वयं द्योतते
यो ब्रह्मैव स दैन्यसंसृतिभयात् पायादसौ पारद इति ॥

इति सर्व्वदर्शनसंग्रहे रसेश्वरदर्शनम् ॥

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

THIRD ADHYÁYA.

कङ्कचित एतेनात्मा पुच्छं च व्याख्यातम् । १३६

Thereby is the átman and the tail of the kańkachiti (the agni constructed in the form of a kite) explained.

The area of the two mentioned parts of the kańka is equal to the area of the corresponding parts of the second kind of the vakrapaksha śyena.

कङ्को नाम वयोविशेषः । कङ्क इव चित् कङ्कचित् । तस्यानन्तरोक्तेन श्येनेनात्मा पुच्छं च व्याख्यातम् । पञ्चमीनां पञ्चाशद् द्वे चात्मनि । पञ्चदश पुच्छ इत्यर्थः । लेखकरणमपि तथैव । आत्मा षडरत्निव्यासो दशारत्न्यायामः । अर्धव्यायामेन स्रक्तीनामपच्छेदः । पुच्छस्त्र्यरत्निव्यासोऽष्टारत्न्यायाम उदगायतः । तस्यांसौ त्रिभिस्त्रिभिररत्निभिरपच्छिन्द्यात् ।

शिरसि पञ्चोपदध्यात् । १३७

Five pańchamís are to be placed in the head.

सामर्थ्याद् द्व्यरत्निव्यासमरत्निद्वीर्घं शिरो भवति ।

तस्याकृतिर्व्याख्याता । १३८

Its shape has been explained.

From an oblong of three aratnis length by two aratnis breadth the two east-corners are cut off with one aratni. The remaining area is equal to five pańchamís.

तस्यांसौ प्रक्रमेणेत्युक्तप्रकारेणारत्निनापच्छेद इत्यर्थः । एवमपच्छिन्ने पञ्च पञ्चम्यो भवन्ति ।

सप्तपञ्चाशद्दक्षिणे पक्ष उपदध्यात् । १३९

Fifty-seven pańchamís are to be placed in the southern wing.

द्वितीयार्थं प्रथमा । षडरत्निव्यासं नवारत्न्युदगायतं दीर्घचतुरस्रं कृत्वा व्यायामेन सप्रादेशेन पक्षयोरपनाम इति वक्ष्यमाणत्वान्नवप्रादेशेन पक्षनमनं कृत्वा पक्षान्ते पञ्चम्यर्धाभिः षट् षट् पङ्क्तीः कुर्यात् । एवं सप्तपञ्चाशत्सप्तम्यो भवन्ति ।

तथोत्तरे । १४०

The same is to be done in the northern wing.

सप्रपञ्चाशदुपदध्यादित्येव ।

व्यायामेन सप्रादेशेन पक्षयोरपनामः । १४१

The bending of the wings is to be done with a vyáyáma together with a prádeśa. (= 108 aṅgulis).

The proceeding is analogous to that in the vakrapaksha śyena.

उक्तार्थः ।

पञ्चमभागीयार्ध्याभिः षट् षट् पक्षाणि कुर्यात् । १४२

With bricks which are equal to half a pańchamí six feathers are to be made at each wing.

व्याख्यातप्रायम् । एवमात्मपुच्छशिरःपक्षेषु षडशीतिशतं पञ्चम्यो भवन्ति ।

अध्यर्धावशिष्यते । १४३

One adhyardhá-brick remains.

A'tman, wings, head and tail, as described in the preceding sútras, require one hundred and eighty-six pańchamís; as the whole agni contains one hundred eighty-seven and a half, one and a half remain. These are used for the two feet of the kańka.

अध्यर्धा पञ्चम्याः परिशिष्यते ।

तया पुच्छस्यावस्तात्पादावरत्निमात्रावरत्न्यन्तरालौ प्रादेशव्यासौ भवतः । १४४

With this adhyardhá two feet are made at the western end of the tail, of the measure (length) of one aratni = 24 aṅgulis, distant from each other one aratni and having the breadth of one prádeśa = 12 aṅgulis.

तयाध्यर्धया पुच्छस्यावस्तात् । तन्वोपप्लवमध्येरित्युक्ते ऽपि । अन्तरालविधानेनात्मन्यसंभवात् । पुच्छाग्रे दक्षिणत उत्तरतश्च व्यर-

त्रिमात्रमवशिष्यानन्तरमरत्निद्वीर्घौ प्रादेशव्यासौ प्रत्यञ्चौ पादौ भवतः। एवं पञ्चमी विनियुक्ता भवति । अथोदरत्न्यन्तरालौ च भवतः ।

तयोरवस्तादभितो द्वौ द्वावष्टमभागौ प्राग्भेदावुपदध्यात् । १४५

At the western end of these (bricks mentioned in the preceding sútra) on each side a brick the area of which is equal to the eighth part of a panchamí, has to be placed, their differences (hypotenuses) turned towards the east. (Four triangular bricks with their hypotenuses running towards the north-east and the south-east respectively).

तयोः प्रादेशव्यासारत्निद्वीर्घयोः पदयोः पुरस्तात्प्रादेशप्रमाणमवशिष्य पश्चिमप्रादेशभागस्याभितो दक्षिणत उत्तरतश्च प्रत्येकं द्वौ द्वावष्टमभागौ प्राग्भेदावुभयत्र दक्षिणतः प्रागुत्तरविशेषौ उत्तरतः प्राग्दक्षिणविशेषौ । एवं चतुर्भिरष्टमभागैः पञ्चम्यर्धा विनियुक्ता भवति । एवमध्यर्धा सा कल्पेन पादयोर्विनियुक्ता भवति ।

एवं सारत्निप्रादेशः सप्तविधः संपद्यते । १४६

In this manner the seven-fold agni together with the two aratnis and the prádeśa is brought about.

एवमात्मप्रभृतिषु शतमशीतिः सप्तार्धा च पंञ्चम्यो द्रष्टव्याः ।

अथेष्टकानां विकाराः पञ्चमभागीयाः सावयवाः । १४७

Now the different kinds of bricks will be described. Pañchamís and their parts (ardhyás, pádyás and ashṭamís).

पञ्चमभागीयास्तदर्ध्यास्तत्पाद्यास्तदष्टम्य इत्यर्थः । नित्यमस्थयापच्छेदनमित्यस्य सार्वत्रिकत्वाद् वचनादृते सर्वत्राक्षयापच्छेदनम् ।

पादेष्टकां चतुर्भिः परिगृह्णीयात् । १४८

[1]. A. B. C. °त्रार्धपञ्च प°

A brick equal to the fourth part of a paúchamí is to be enclosed by four sides.

पञ्चम्याश्चतुर्भागीयमेवं चतुर्भिः फलकैः कुर्यात् ।

अर्धप्रादेशेनाध्यर्धप्रादेशेन प्रादेशेन प्रादेशसविशेषेणेति । १४९

With half a prádeśa = 6 aṅgulis, one prádeśa and a half = 18 aṅgulis, a prádeśa = 12 aṅgulis and the saviśesha of a prádeśa = 16 angulis 33 tilas. — The area of this brick = 144 square aṅgulis = the fourth part of the area of a paúchamí.

चतुरस्रपाद्यासूत्रेण व्याख्यातम् । अत्र दक्षिणत उत्तरतः पश्चात्पुरस्ताच्चेति क्रमः ।

अध्यर्धेष्टकां चतुर्भिः परिगृह्णीयादर्धव्यायामेन द्वाभ्यामरत्निभ्यामरत्निसविशेषेणेति । १५०

An adhyardhá-brick is to be enclosed with four sides, half a vyáyáma = 48 aṅgulis, two sides of one aratni length and the saviśesha of an aratni (about 33 aṅgulis 32 tilas).

अर्धव्यायामेन ह्यरत्निनोत्तरं फलकम् । द्वाभ्यामरत्निभ्यां प्रत्यग्दक्षिणफलके । अरत्निप्रमाणे इत्यर्थः । अरत्निसविशेषेण पूर्वफलकम् । एवं संनिवेशे ऽध्यर्धिका पञ्चमी भवति ।

ताः षट् । १५१

This are six kinds of bricks.

एवं षट्प्रकारा इष्टका इत्यर्थः । विस्पष्टार्थं वचनम् । तत्र नवत्यधिकं शतत्रयं पञ्चम्यः । अशीतिशतमध्यर्धाः । अष्टशतं पाद्याः । विंशतिरष्टम्यः । त्रिंशतिश्चतुरस्रपाद्याः । द्व्यशीत्यधिकं शतद्वयमध्यर्धाः । चोडानाकसदः षडध्यर्धाः पञ्चम्यश्चतस्रः । अथोपधानम् ।

तासां चतुरस्रपाद्याः साष्टमभागाः पादयोरुपधाय शेषं यथायोगं यथासंख्यं यथाधर्मं चोपदध्यात् । १५२

Having placed from among these bricks the four-cornered quarter bricks together with the ashṭamís in the two feet, the rest of the agni is to be covered with bricks as it fits, as the prescribed number requires, as the nature of the agni requires.

तासां षट्प्रकाराणां मध्ये पादयोः प्रादेशत्र्यस्रारत्निदीर्घप्रदेशे द्वे द्वे चतुरस्रपाद्ये अन्तर्विशेषे उपधायैकैकस्य द्वौ द्वावष्टमभागावभितः पश्चिमार्धे प्राग्भेदावुपधाय शेषाश्चतुःप्रकाराः । यथायोगमित्यादि व्याख्यानम् । प्रस्तारद्वयस्य प्रपञ्चेनानुक्तिः । तत्रैवमुपधानम् । शिरोऽग्रे बहिर्भेऽमध्ये ततः शिरस्यरत्निचतुष्टयम् । आत्मापच्छेदेषु चतुर्षु बहिर्विशेषा अष्टावर्धेष्टकाः । आत्मशेषे ऽष्टचत्वारिंशदरत्नयः । पुच्छपार्श्वयोः षडध्यर्धाः । मध्ये रीतिचयेण द्वादश पञ्चम्यः । एवमात्मशिरःपुच्छेषु पादाभ्यां सहाष्टाशीतिरिष्टकाः । निर्णामाय एकैका पाद्या । ततः पश्चात्पञ्चमी । ततः पश्चाद् द्वे अध्यर्धे प्राक्प्रत्यगयिके । तयोः पश्चात्प्रत्यगयिकाध्यर्धा । निर्णामादौ दक्षिणत उत्तरतो चावशिष्टत्वेन पादेष्टका । एवं षडिष्टका रीतिः । निर्णामरीतिमभितश्चतस्रो ऽध्यर्धारीतयः चतुरिष्टकाः प्राच्यः । तासामभितश्चतस्रो ऽरत्निरीतयः । तासु मध्ये पञ्च पञ्च पञ्चम्यः पार्श्वेष्वष्टाध्यर्धाः । एवं सप्तेष्टका रीतयः । पत्राङ्गुलाः षडध्यर्धाः स्युः । आत्मनि षट्पञ्चाशत् । पुच्छे ऽष्टादश । पादयोरष्टौ । षट् शिरसि । पक्षयोर्द्वादशशतम् । अस्मिन्प्रस्तारे षडधिकं शतं पञ्चम्यः । चतुश्चत्वारिंशदध्यर्धाः । चतस्रः पाद्याः । अष्टाविंशदध्यर्धाः ।

अथापरः प्रस्तारः । शिरोऽग्रे प्रागया पाद्या । तस्याः पश्चात्प्राक्प्रत्यगयिके अन्योन्यासंगते द्वे अध्यर्धे । तयोः पश्चिमात्मानमर्धारत्निना व्याप्ता । तयोरध्यर्धयोरभितः शिरसि चतस्रश्चतस्रः पाद्याः । तासां पश्चात्प्रागरत्निपार्श्वे प्रागुदक्प्राग्दक्षिणासविशेषे आत्मशिरःसंधौ द्वे अर्ध्ये । एवं शिरसि त्रयोदशेष्टकाः । तासां पश्चा-

दध्यर्धाद्वयं दक्षिणोत्तरमक्ष्णयासंगतम् । पार्श्वयोरर्ध्ये । ततः पश्चात्पक्षाप्यययोरुभयत्र प्रादेशमवशिष्य पञ्चमीरीतयः पञ्चेष्टकाः सप्रादीच्यः । तासां पश्चादध्यर्धाद्वयम् । पार्श्वयोरर्ध्ये । ततः पश्चात्पुच्छात्मसंधौ मध्ये पञ्चमी तामभितो द्वे अर्ध्ये आत्मगतारत्निपार्श्वे दक्षिणोत्तरसविशेषे । तयोः पश्चिमपार्श्वे पुच्छक्षेत्रे प्रागग्रे द्वे पाद्ये । एवं पञ्चेष्टका संधिरीतिः । ततः पश्चादध्यर्धाद्वयं दक्षिणोत्तरम् । पार्श्वयोरर्ध्ये । ततश्चतस्रोऽध्यर्धास्तिरश्च्यः । ततः पुच्छापरीत्यां पार्श्वयोः पाद्याः पञ्च पञ्च । ततो द्वे अर्ध्ये पदमध्यगताग्रिके प्राक्स्थारत्निपार्श्वे दक्षिणोत्तरपार्श्वस्थसविशेषे । तयोर्मध्ये प्रागग्रा पाद्या । तामभितः प्रत्यगग्रिके द्वे अष्टम्यौ । पादान्तयोर्द्वे द्वे चतुरस्रपाद्ये दक्षिणोत्तरायते प्रत्यक्स्थदीर्घपार्श्वे । ततः पूर्वप्रविष्टाध्यग्रसंहितामेकैकामष्टमीं पादमध्ययोरुपदध्यात् । एवं समस्ता एकविंशतिरिष्टकाः । पक्षात्मसंधिरीत्योश्चतस्रश्चतस्रोऽध्यर्धाः प्रागायताः । तासां पौरस्त्यपाश्चात्याः प्राक्प्रत्यगग्रिकाः । तत्र पूर्वपक्षात्मसंध्योर्दक्षिणोत्तरभागे द्वे पाद्ये उदग्दक्षिणाग्रे । एवं पञ्चेष्टके एते रीत्यौ । पक्षयोः पक्षसंधिरीत्योर्मध्ये चतुरिष्टका अध्यर्धारीतयः । प्रत्येकमष्टौ । पक्षपत्रेषु पादेष्टके अर्धेष्टकामिति पूर्ववदुपधानम् । एवं शिरसि त्रयोदशेष्टकाः । आत्मनि पक्षपुच्छसंधिरीतिभिः सह षट्पञ्चाशत् । पुच्छ एकविंशत् । पक्षयोः शतम् । अस्मिन्प्रस्तारे षट्त्रिंशत्पञ्चम्यः । चतुर्विंशतिरर्ध्याः । अष्टाचत्वारिंशत्पाद्याः । चतस्रोऽष्टम्यः । चतस्रश्चतुरस्रपाद्याः । चतुरशीतिरध्यर्धाः । अत्र कल्पोक्तो विधिरनुसंधेयः । तत्रैवमुक्तम् । कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वानमुष्मिँल्लोके स्यामिति । एतस्यैव सतोऽरत्निमात्रेण प्राक् शिर इव निरूहति । स तथा विमितो भवति यथा न बहिर्वेदि यूपः स्यादिति । तत्रारत्निमात्रेण प्राक् शिर इव निरूहतीति । अस्य व्याख्याताभिप्रायेणोक्तं शिरसि पञ्चोपदध्यादिति ।



Kankachit.

I. prastára.

Digitized by Google



Kankachit.

II. prastára.

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 6. NOVEMBER 1st 1876. Vol. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

गोष्पदं सेवितासेवितप्रमाणेषु ॥ १४५ ॥

गोष्पदमिति सुट् निपात्यते तस्य च षत्वं सेविते ऽसेविते प्रमाणे च विषये । गोष्पदो देशः । गावः पद्यन्ते यस्मिन् देशे स गोभिः सेवितो देशो गोष्पद इत्युच्यते । असेविते । अगोष्पदान्यरण्यानि । असेविते गोष्पदशब्दो न संभवतीत्यगोष्पदशब्दार्थं निपातनम् । यद्येवं नार्थ एतेन, गोष्पदप्रतिषेधादगोष्पदं भविष्यति । सत्यमेतत् । यत्र तु सेवित-प्रसङ्गोऽस्ति तत्रैव स्यादगोष्पदमिति । यत्र त्वत्यन्तासंभव एव तत्र न स्यादगोष्पदान्यरण्यानीति । असेवितग्रहणात्तत्रापि भवति । यानि हि महान्त्यरण्यानि येषु गवामत्यन्तासंभवस्तान्येवमुच्यन्ते । प्रमाणे । गोष्पदमात्रं क्षेत्रम् । गोष्पदपूरं वृष्टो देवः । नात्र गोष्पदं स्वार्थप्रतिपादनार्थमुपादीयते, किं तर्हि क्षेत्रस्य वृष्टेश्च परिच्छेत्तुमियत्ताम् । सेवितासेवितप्रमाणेष्विति किम् । गोः पदं, गोपदम् ॥

आस्पदं प्रतिष्ठायाम् ॥ १४६ ॥

आत्मयापनाय स्थानं प्रतिष्ठा, तस्यामास्पदमिति सुट् निपात्यते । आस्पदमनेन लब्धम् । प्रतिष्ठायामिति किम् । आपदापन्नः, आपदम् ॥

आश्चर्यमनित्ये ॥ १४७ ॥

अनित्यतया विषयभूतया ऽद्भुतत्वमिह लक्ष्यते तस्मिन्नाश्चर्ये निपात्यते । चरेराङि चागुराविति यत्प्रत्यये कृते निपातनात्सुट् । आश्चर्यं यदि स भुञ्जीत । आश्चर्यं यदि सो ऽधीयीत । चित्रमद्भुतमित्यर्थः । अनित्यइति किम् । आचर्यं कर्म शोभनम् ॥

वर्चस्के ऽवस्करः ॥ १४८ ॥

कुत्सितं वर्चो, वर्चस्कमन्नमलं, तस्मिन्नभिधेये ऽवस्कर इति निपा-

Digitized by Google

ष्यते । अवपूर्वस्य किरतेः कर्मणि ऋदोरप् इत्यप्, निपातनात्सुट् । अव-कीर्यतइत्यवस्करो ऽन्नमलम् । तत्संबन्धाद्देशोऽपि तथोच्यते । वर्चस्क-इति किम् । अवकरः ॥

अपस्करो रथाङ्गम् ॥ १४९ ॥

अपस्कर इति निपात्यते रथाङ्गं चेद्भवति । अपपूर्वात्किरतेर्ऋदोर-बित्यप्, निपातनात् सुट् । अपस्करो रथावयवः । रथाङ्गमिति किम् । अपकरः ॥

विष्किरः शकुनिर्विकिरो वा ॥ १५० ॥

विकिर इति किरतेर्विपूर्वस्येगुपधज्ञाप्रीकिरः कः इति कप्रत्यये विहिते सुट् निपात्यते शकुनिश्चेद्भवति । विकिरशब्दाभिधेयो वा शकु-निर्भवति ।

सर्वे शकुनयो भक्ष्या विष्किराः कुक्कुटादृते ।

विष्किरो वा शकुनाविति वाग्रहणादेव सुड्विकल्पे सिद्धे विकिरग्रहणमिह तस्यापि शकुनेरन्यत्र प्रयोगो मा भूत् ॥

ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ॥ १५१ ॥

चन्द्रशब्दउत्तरपदे ह्रस्वात्परः सुडागमो भवति मन्त्रविषये । सुश्चन्द्रो युष्मान् । ह्रस्वादिति किम् । सूर्याचन्द्रमसाविव । मन्त्रइति किम् । सुचन्द्रा पौर्णमासी । उत्तरपदं समासएव भवतीति प्रसिद्धं, तत इह न भवति । शुक्रमसि चन्द्रमसि ॥

प्रतिष्कशश्च कशेः ॥ १५२ ॥

कश गतिशासनयोरित्येतस्य धातोः प्रतिपूर्वस्य पचाद्यचि कृते सुट् निपात्यते, तस्यैव षत्वम् ॥

ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः ।

वार्त्तापुरुषः सहायः पुरोयायी वा प्रतिष्कश इत्यभिधीयते । कशेरिति किम् । प्रतिगतः कशां, प्रतिकशो ऽश्वः । अत्र यद्यपि कशेरेव

कशाशब्दस्तथापि कशेरिति धातोरुपादानं तदुपसर्गस्य प्रतेः प्रतिपत्त्यर्थम् । तेन धात्वन्तरोपसर्गाच्च भवति ॥

प्रस्कण्वहरिश्चन्द्रावृषी ॥ १५३ ॥

प्रस्कण्वो हरिश्चन्द्र इति सुट् निपात्यते ऋषी चेदभिधेयौ भवतः । प्रस्कण्व ऋषिः । हरिश्चन्द्र ऋषिः । हरिश्चन्द्रग्रहणममन्त्रार्थम् । ऋषी इति किम् । प्रकण्वो देशः । हरिचन्द्रो माणवकः ॥

मस्करमस्करिणौ वेणुपरिव्राजकयोः ॥ १५४ ॥

मस्कर मस्करिन् इत्येतौ यथासंख्यं वेणौ परिव्राजके च निपात्येते । मकरशब्दो ह्यव्युत्पन्नं प्रातिपदिकं तस्य वेणावभिधेये सुट् निपात्यते परिव्राजके त्विनिरिति । मस्करो वेणुः । मस्करी परिव्राजकः । वेणुपरिव्राजकयोरिति किम् । मकरो ग्राहः । मकरी समुद्रः । के चित्पुनरत्र माङ्युपपदे करोतेः करणे ऽच्प्रत्ययमपि निपातयन्ति माङश्च ह्रस्वत्वं सुट् च । मा क्रियते येन प्रतिषिध्यते, स मस्करो वेणुः । वेणुग्रहणं च प्रदर्शनार्थमन्यत्रापि भवति मस्करो दण्ड इति । परिव्राजकेपि माङ्युपपदे करोतेस्ताच्छील्यइनिर्निपात्यते । माङो ह्रस्वत्वं सुट् च तथैव ॥ माकरणशीलो मस्करी कर्मापवादित्वात्परिव्राजक उच्यते । स ह्येवमाह । मा कुरुत कर्माणि शान्तिर्वः श्रेयसीति ॥

कास्तीराजस्तुन्दे नगरे ॥ १५५ ॥

कास्तीर अजस्तुन्द इत्येतौ शब्दौ निपात्येते नगरे ऽभिधेये । ईषत्तीरमस्य. अजस्येव तुन्दमस्येति व्युत्पत्तिरेव क्रियते नगरं तु वाच्यमेतयोः । कास्तीरं नाम नगरम् । अजस्तुन्दं नाम नगरम् । नगरइति किम् । कातीरम् । अजतुन्दम् ॥

कारस्करो वृक्षः ॥ १५६ ॥

कारस्कर इति सुट् निपात्यते वृक्षश्चेद्भवति । कारं करोतीति दिवाविभानिशाप्रभाभास्कारान्तेति टप्रत्ययः । कारस्करो वृक्षः । वृक्ष इति

किम् । कारकरः । के चिदिदं सूत्रं नाधीयते, पारस्करप्रभृतिष्वेव कारस्करो वृक्ष इति पठन्ति ॥

पारस्करप्रभृतीनि च संज्ञायाम् ॥ १५७ ॥

पारस्करप्रभृतीनि च शब्दरूपाणि निपात्यन्ते संज्ञायां विषये । पारस्करो देशः । कारस्करो वृक्षः । रथस्या नदी । किष्कुः प्रमाणम् । किष्किन्धा गुहा ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च ॥ तस्करश्चोरः । बृहस्पतिर्देवता । चोरदेवतयोरिति किम् । तत्करः । बृहत्पतिः । संज्ञाग्रहणादुपाधिपरिग्रहे सिद्धे गणे चोरदेवताग्रहणं प्रपञ्चार्थम् ॥ प्रात्तुम्पतौ गवि कर्तरि ॥ तुम्पतौ धातौ प्रशब्दात्परस्सुट् भवति गवि कर्तरि । प्रस्तुम्पति गौः । गवीति किम् । प्रतुम्पति वनस्पतिः । पारस्करप्रभृतिराकृतिगणः । अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः । प्रायश्चित्तम् । प्रायश्चित्तिः । यदुक्तं प्रायस्य चित्तिचित्तयोः सुडस्कारो वेति, तत्संगृहीतं भवति ॥

अनुदात्तं पदमेकवर्जम् ॥ १५८ ॥

परिभाषेयं स्वरविधिविषया । यत्रान्यः स्वर उदात्तः स्वरितो वा विधीयते तत्रानुदात्तं पदमेकं वर्जयित्वा भवतीत्येतदुपस्थितं द्रष्टव्यम् । अनुदात्ताच्कमनुदात्तम् । कः पुनरेको वर्ज्यते, यस्यासौ स्वरो विधीयते । वक्ष्यति । धातोरन्त उदात्तो भवतीति । गोपायति । धूपायति । धातोरन्त्यमचं वर्जयित्वा परिशिष्टमनुदात्तं भवति । धातुस्वरं श्नास्वरो बाधते । लुनाति । श्नास्वरं तस्स्वरः । लुनीतः । पुनीतः । तस्स्वरमाम्स्वरः । लुनीतस्तराम् । पुनीतस्तराम् ।

आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च ।
पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः ॥

आगमस्य । चतुरनडुहोरामुदात्तः । चत्वारः । अनड्वाहः । आगमस्वरः प्रकृतिस्वरं बाधते । विकारस्य । अस्थानि दधनीत्यनङ्स्वरः प्रकृतेः । गोपायति । धूपायति । प्रकृतिस्वरः प्रत्ययस्य । कर्त्तव्यम् ।

इत्तंव्यम् । प्रत्ययस्वरः प्रकृतेः स्वरस्य बाधकः । परनित्यान्तरङ्गापवादैः स्वरैर्व्यवस्था सतिशिष्टेन च । यो हि यस्मिन् सति शिष्यते स तस्य बाधको भवति । तथाहि । गोपायतीत्यत्र धातुस्वरापवादः प्रत्ययस्वरस्तेनैव धातुस्वरेण प्रत्ययान्तस्य धातोः सतिशिष्टत्वाद् बाध्यते । कार्ष्णोत्तरा सङ्गपुत्र इत्यत्र च समासस्वरापवादो बहुव्रीहिस्वरः सतिशिष्टेन समासान्तोदात्तत्वेन बाध्यते । विकरणस्वरस्तु सतिशिष्टोपि सार्वधातुकस्वरं न बाधते । लुनीत इति तस एव स्वरो भवति ॥ विभक्तिस्वरान्नञ्स्वरो बलीयानिति वक्तव्यम् ॥ * ॥ अतिस इत्यत्र तिसृभ्यो जस इति सतिशिष्टोपि विभक्तिस्वरो नञ्स्वरेण बाध्यते ॥ विभक्तिनिमित्तस्वराच्च नञ्स्वरो बलीयानिति वक्तव्यम् ॥ * ॥ अचत्वारः । अनड्वाह इति । यस्य विभक्तिर्निमित्तमामस्तस्य यदुदात्तत्वं तन्नञ्स्वरेण बाध्यते । पदग्रहणं किम् । देवदत्त गामभ्याज शुक्लां दण्डेनेति वाक्ये हि प्रतिपदं पृथक् स्वरो भवति । परिमाणार्थं चेदं पदग्रहणं पदाधिकारस्य निवृत्तिं करोति । तेन प्रागेव पदव्यपदेशात् स्वरविधिसमकालमेव शिष्टस्यानुदात्तत्वं भवति । तथा च कुवल्या विकारः कौवलमित्यत्रानुदात्तादिलक्षणो ऽञ् सिद्धो भवति । तथा गर्भिणीशब्दस्यानुदात्तादिलक्षणस्याञो बाधनार्थं भिक्षादिषु पठ्यते । कुवलगर्भशब्दावाद्युदात्तौ ॥

कर्षात्वतो घञो ऽन्त उदात्तः ॥ १५९ ॥

कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तो भवति । कर्षः । पाकः । त्यागः । रागः । दायः । धायः । ञ्नित्यादिर्नित्यमित्यस्यापवादः । कर्ष इति विकृतनिर्देशः कृषतेर्निवृत्त्यर्थः । तौदादिकस्य घञन्तस्य कर्ष इत्याद्युदात्त एव भवति ॥

उञ्छादीनां च ॥ १६० ॥

उञ्छ इत्येवमादीनामन्त उदात्तो भवति । उञ्छः । म्लेच्छः । जञ्जः । जल्पः । एते घञन्ता इति ञित्स्वरः प्राप्तः । जप व्यध इत्यबन्तौ, तयोर्धातुस्वरः प्राप्तः । के चित्तु वध इति पठन्ति । युजेर्घञन्तस्य

निपातनादगुणत्वं विशिष्टविषये च निपातनमिदमिष्यते । कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगोऽन्यत्र हि योग एव भवति ॥ गरो दूष्ये ऽबन्तः ॥ गरशब्दो ऽबन्तः स दूष्यएवान्तोदात्तः । गरो विषम् । अन्यत्राद्युदात्त एव ॥ वेगवेदचेष्टबन्धाः करणे ॥ हलश्चेति घञन्ता एते करणे ऽन्तोदात्ता भवन्ति । भावे त्वाद्युदात्ता एव ॥ स्तुयुद्रुवश्छन्दसि ॥ उपसमस्तार्थमेतत् । परिष्टुत् । संयुत् । परिद्रुत् ॥ वर्तनिः स्तोत्रे ॥ स्तोत्रं साम । तत्स्थो वर्तनिशब्दोऽन्तोदात्तो भवति, अन्यत्र मध्योदात्तः ॥ श्वभ्रे दरः ॥ श्वभ्रे ऽभिधेये दरशब्दोऽन्तोदात्तो ऽन्यत्रावन्तत्वादाद्युदात्तः ॥ साम्बतापौ भावगर्हायाम् ॥ अन्तोदात्तावन्यत्राद्युदात्तौ ॥ उत्तमशश्वत्तम-शब्दौ सर्वत्र ॥ के चित्तु भावगर्हायामित्यत्राप्यनुवर्त्तयन्ति ॥ भक्षमन्थभोग-देहाः ॥ एते घञन्ता भविष्यन्तोपि घञन्त एव । एरजण्यन्तानामिति वचनात् ॥

अनुदात्तस्य च यत्रोदात्तलोपः ॥ १६१ ॥

उदात्त इति वर्तते । यस्मिन्ननुदात्ते परत उदात्तो लुप्यते तस्या-नुदात्तस्यादिरुदात्तो भवति । कुमार ई, कुमारी । कुमारशब्दोऽन्तोदात्तस्तस्य ङीप्यनुदात्ते उदात्तो लुप्यते । अनुदात्तो ङीब् उदात्तः । भस्य टेर्लोपः । पथः । पथा । पथे । पथिन्शब्दोऽन्तोदात्तः । कुमुदनडवेतसेभ्यो ड्मतुप् । कुमुद्वान् । नड्वान् । वेतस्वान् । कुमुदादयोऽन्तोदात्ताः । ड्मतुबनुदात्तः । अनुदात्तस्येति किम् । प्रासङ्गं वहति प्रासङ्ग्यः । प्रासङ्गशब्दस्याथादिस्व-रेणान्तोदात्तः । तस्य यति तित्स्वरितमिति स्वरिते उदात्तो लुप्यते । नैतदस्ति, स्वरिते हि विधीयमाने परिशिष्टमनुदात्तं तत् कुत उदात्तलोप,-स्तदेतदनुदात्तग्रहणमादेरनुदात्तस्योदात्तार्थम् । अन्त इति हि प्रकृतत्वाद-न्तस्य स्यात् । मा हि धुक्षाताम् । मा हि धुक्षाथाम् । यत्रेति किम् । भार्गवः । भार्गवौ । भृगवः । प्राक् सुबुत्पत्तेर्गोत्रप्रत्ययस्य लुक् । उदात्त-ग्रहणं किम् । वैदी । औवीं * ॥

* मौञ्जायनेत्यधिकमेकस्मिन्पुस्तके ।

धातोः ॥ १६२ ॥

अन्त इत्येव । धातोरन्त उदात्तो भवति । पचति । पठति । ऊर्णोति । गोपायति । याति ॥

चितः ॥ १६३ ॥

चितोऽन्त उदात्तो भवति । भञ्जभासमिदो घुरच् । भङ्गुरम् । भासुरम् । मेदुरम् । आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् । कुण्डिनाः ॥ चिति प्रत्यये प्रकृतिप्रत्ययसमुदायस्यान्त उदात्त इष्यते ॥ बहुपटवः । उच्चकैः ॥

तद्धितस्य ॥ १६४ ॥

चित इत्येव । चितस्तद्धितस्यान्त उदात्तो भवति । गोत्रे कुञ्जादिभ्यश्च्फञ् । कौञ्जायनाः । मौञ्जायनाः । किमर्थमिदं, परमपि ञित्स्वरं बाधित्वा ऽन्तोदात्तत्वमेव यथा स्यादिति ॥

कितः ॥ १६५ ॥

तद्धितस्येत्येव । तद्धितस्य कितोन्त उदात्तो भवति । नडादिभ्यः फक् । नाडायनः । चारायणः । प्राग्वहतेष्ठक् । आक्षिकः । शालाकिकः ॥

तिसृभ्यो जसः ॥ १६६ ॥

तिसृभ्य उत्तरस्य जसोऽन्त उदात्तो भवति । तिस्रस्तिष्ठन्ति । उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्यस्यापवादः । शसि उदात्तयणो हल्पूर्वादिति सिद्धे ऽन्यत्र बहुवचने षट्त्रिचतुर्भ्यो हलादिरिति विधानाज्जसेव लभ्यत इति जस्ग्रहणमुपसमस्तार्थमेक इच्छन्ति । अतितिस्रावित्यत्र स्वरो मा भूदिति ॥

चतुरः शसि ॥ १६७ ॥

चतुरः शसि परतो ऽन्त उदात्तो भवति । चतुरः पश्य * । चतस्रादेशे आद्युदात्तनिपातनाद्यणादेशस्य च पूर्वविधौ स्थानिवत्त्वादयं स्वरो न भवति चतस्रः पश्येति ॥

---

* चतुरो देहीत्यपि पुस्तकान्तरे ।

सावेकाचस्तृतीयादिर्विभक्तिः ॥ १६८ ॥

साविति सप्तमीबहुवचनस्य सुशब्दस्य ग्रहणम् । तत्र सौ य एकाच् तस्मात्परा तृतीयादिर्विभक्तिरुदात्ता भवति । वाचा । वाग्भ्याम् । वाग्भिः । वाग्भ्यः । याता । याद्भ्याम् । याद्भिः । साविति किम् । राज्ञा । राज्ञे । एकाच इति किम् । हरिणा । गिरिणा । राजसु । तृतीयादिरिति किम् । वाचौ । वाचः । विभक्तिरिति किम् । वाक्तरा । वाक्तमा । सप्तमीबहुवचनस्य ग्रहणादिह न भवति त्वया त्वयीति ॥

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥ १६९ ॥

एकाच इति वर्तते, तृतीयादिर्विभक्तिरिति च । नित्यशब्दः स्वर्यते । तेन नित्याधिकारविहितः समासः पर्युदस्यते । नित्यसमासादन्यत्रानित्यसमासे यदुत्तरपदमन्तोदात्तमेकाच्च तस्मात्परा तृतीयादिर्विभक्तिरन्यतरस्यामुदात्ता भवति । परमवाचा । २ । परमवाचे । २ । परमत्वचा । २ । परमत्वचे । २ । यदा विभक्तिरुदात्ता न भवति तदा समासान्तोदात्तत्वमेव । अन्तोदात्तादिति किम् । अवाचा । सुवाचा । सुत्वचा । तत्पुरुषोयम् । तत्र तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययेति पूर्वपदप्रकृतिस्वरः । उत्तरपदग्रहणमेकाच्त्वेनोत्तरपदं विशेषयितुम् । अन्यथा हि समासविशेषणमेतत्स्यात् । तत्र शुन ऊर्जे श्वोर्ज्जेत्यत्रैवायं विधिः स्यात् । अनित्यसमासइति किम् । अग्निचिता । सोमसुता । उपपदमतिङ् इत्ययं नित्याधिकारे समासो विधीयते तत्र गतिकारकोपपदात् कृदित्युत्तरपदप्रकृतिस्वरेण चित् शब्द उदात्तः । यस्तु विग्रहाभावेन नित्यसमासस्तत्र भवत्येव विकल्पः । अवाचा ब्राह्मणेन, सुवाचा ब्राह्मणेनेति । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं भवति ॥

अञ्चेश्छन्दस्यसर्वनामस्थानम् ॥ १७० ॥

अञ्चेः परा ऽसर्वनामस्थानविभक्तिरुदात्ता भवति छन्दसि विषये । इन्द्रो दधीचो अस्थभिः । चाविति पूर्वपदान्तोदात्तत्वं प्राप्तम् । तृतीया-

द्विरिति वर्त्तमाने शसोपि परिग्रहार्थमसर्वनामस्थानग्रहणम् । इहापि यथा स्यात् प्रतीचो बाहून्प्रतिभङ्ध्येषामिति ॥

ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः ॥ १७१ ॥

ऊठ् इदम् पदादि अप् पुम् रै दिव् इत्येतेभ्यो ऽसर्वनामस्थानविभक्तिरुदात्ता भवति । ऊठ् । प्रष्ठौहः । प्रष्ठौहा । ऊठ्युपधाग्रहणं कर्त्तव्यमिह मा भूत् । अक्षद्युवा । अक्षद्युवे । इदम् । आभ्याम् । एभिः । अन्तोदात्तादित्यधिकारादन्वादेशे न भवति । अथो आभ्यां निपुणमधीतमिति । पदादयः पद्दन्नोमासित्येवमादयो निशूपर्यन्ता इह गृह्यन्ते । निपदश्चतुरो जहि । या दतो धावति । असृक्प्रभृतिभ्यो विभक्तिरनुदात्तैव भवति । ग्रीवायां बद्धो अपि कक्षआसनि । मत्स्यं न दीन उदनि क्षियन्तम् । अप् । अपः पश्य । अद्भिः । अद्भ्यः । पुम् । पुंसः । पुम्भ्याम् । पुम्भ्यः । पुंसा । पुंसे । रै । रायः पश्य । राभ्याम् । राभिः । दिव् । दिवः पश्य । दिवा । दिवे ॥

अष्टनो दीर्घात् ॥ १७२ ॥

अष्टनो दीर्घान्तादसर्वनामस्थानविभक्तिरुदात्ता भवति । अष्टाभिः । अष्टाभ्यः । अष्टासु । घृतादिपाठादष्टन्शब्दोन्तोदात्तस्तस्य झल्युपोत्तममित्यस्यापवादो विभक्तेरेवोदात्तत्वं विधीयते । दीर्घादिति किम् । अष्टसु प्रक्रमेषु आत्मनोऽग्नीनादधीत । इदमेव दीर्घग्रहणमष्टन आत्वविकल्पं ज्ञापयति कृतात्वस्य च षट्संज्ञां ज्ञापयति । अन्यथा ह्यात्वपक्षे सावकाशो ऽष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यतइति किं दीर्घग्रहणेन ॥

शतुरनुमो नद्यजादी ॥ १७३ ॥

अन्तोदात्तादिति वर्त्तते । अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिर्विभक्तिरसर्वनामस्थानमुदात्ता भवति । तुदती । नुदती । लुनती । पुनती । तुदता । नुदता । लुनता । पुनता । अनुम इति किम् । तुदन्ती । नुदन्ती । अत्राप्युपदेशादिति लसार्वधातुकानुदात्तत्वे एका-

देशस्तस्यैकादेश उदात्तेनोदात्त इत्युदात्तत्वं तस्य पूर्वत्रासिद्धत्वं नेष्य-तइति शत्रन्तमन्तोदात्तं भवति । नद्यजादी इति किम् । तुदद्भ्याम् । तुदद्भ्याम् । तुदद्भिः । अन्तोदात्तादित्येव । ददती । दधती । अभ्यस्तानामादिरित्याद्युदात्तावेतौ ॥ बृहन्महतोरुपसंख्यानम् ॥ * ॥ बृहती । महती । बृहता । महता ॥

उदात्तयणो हल्पूर्वात् ॥ १७४ ॥

उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी अजादिर्या ऽसर्वनामस्थानविभक्तिरुदात्ता भवति । कर्त्री । हर्त्री । प्रलवित्री । प्रसवित्री । कर्त्रा । हर्त्रा । प्रलवित्रा । प्रसवित्रा । तृजन्ता एते ऽन्तोदात्ताः । उदात्तयहणं किम् । कर्त्री । हर्त्री । कर्त्रा । हर्त्रा । तृचन्तोयमाद्युदात्तः । हल्पूर्वादिति किम् । वहति नावा ब्राह्मण्या । नकारग्रहणं च कर्त्तव्यम् ॥ * ॥ वाक्पत्नीयं कन्या ॥

नोङ् धात्वोः ॥ १७५ ॥

ऊङो धातोश्च य उदात्तयण् हल्पूर्वस्तस्मात्परा ऽजाद्यसर्वनामस्थानविभक्तिर्नोदात्ता भवति । ब्रह्मबन्ध्वा । ब्रह्मबन्ध्वे । वीरबन्ध्वा । वीरबन्ध्वे । ऊङ् प्रत्ययस्वरेणोदात्तः । तेन सह य एकादेशः सोप्युदात्त इति उदात्तयणवकारस्तस्मादुदात्तत्वे प्रतिषिद्धे उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति विभक्तिः स्वर्यते । धातुयणः खल्वपि । सकृल्ल्वा । सकृल्ल्वे । खलप्वे । क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य श्वोः सुपि यणादेशः ॥

ह्रस्वनुड्भ्यां मतुप् ॥ १७६ ॥

अन्तोदात्तादित्येव । ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुब् उदात्तो भवति । अग्निमान् । वायुमान् । कर्तृमान् । हर्तृमान् । नुटः खल्वपि । अक्षण्वता । शीर्षण्वता । अन्तोदात्तादित्येव । वसुमान् । वसुशब्द आद्युदात्तस्तस्मान्मतुब् अनुदात्त एव भवति । अत्र च स्वरविधौ व्यञ्जनमविद्यमानवदित्येषा परिभाषा नाश्रीयते नुड्ग्रहणात् तेन मरुत्वानित्यत्र न

Digitized by Google

भवति ॥ रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् ॥ * ॥ आरेवान् ॥ त्रेश्च प्रतिषेधो वक्तव्यः ॥ * ॥ त्रिवतीर्याज्यानुवाक्या भवन्तीति ॥

नामन्यतरस्याम् ॥ १७७ ॥

ह्रस्वग्रहणमनुवर्त्तते मतुब्ग्रहणं च । तेन मतुपा ह्रस्वो विशेष्यते । मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तादन्यतरस्यां नाम् उदात्तो भवति । अग्नीनाम्२ । वायूनाम्२ । कर्तृणाम्२ । मतुपा ह्रस्वविशेषणं किम् । मत-पूर्वेऽपि ह्रस्वे यथा स्यात् । अन्यथा हि साम्प्रतिकएव स्यात् तिसृणां पत-सृणामिति । सनुट्कस्य ग्रहणं किम् । धेन्वाम् । शकट्याम् । उदात्तयणो हल्पूर्वादित्ययमन्तोदात्तः । ह्रस्वादित्येव । कुमारीणाम् । अन्तोदात्ता-दित्येव । त्रपूणाम् । वसूनाम् ॥

ङ्याश्छन्दसि बहुलम् ॥ १७८ ॥

ङ्यन्ताच्छन्दसि विषये नामुदात्तो भवति बहुलम् । देवसेनाना-मभिभञ्जतीनाम् । बह्वीनां पिता । न च भवति नदीनां पारे जयन्तीनां महतः ॥

षट्त्रिचतुर्भ्यो हलादिः ॥ १७९ ॥

अन्तोदात्तादित्येतन्निवृत्तम् । षट्संज्ञकेभ्यस्त्रि चतुर् इत्येताभ्यां च परा हलादिर्विभक्तिरुदात्ता भवति । षण्णाम् । षड्भिः । षड्भ्यः । पञ्चा-नाम् । सप्तानाम् । त्रि । त्रिभिः । त्रिभ्यः । त्रयाणाम् । चतुर् । चतुर्भ्यः । चतुर्णाम् । हलादिरिति किम् । चतस्रः पश्य ॥

झल्युपोत्तमम् ॥ १८० ॥

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे यदुपोत्तममुदात्तं भवति । त्रिप्रभृतीनामन्त्यमुत्तमं तत्समीपे च यत्तदुपोत्तमम् । पञ्चभिस्त-पस्तपति । सप्तभिः परान् जयति । तिसृभिश्च वहसे त्रिंशता । चतुर्भिः । झलीति किम् । पञ्चानाम् । सप्तानाम् । उपोत्तममिति किम् । षड्भिः । षड्भ्यः ॥

विभाषा भाषायाम् ॥ १८१ ॥

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवति विभाषा भाषायां विषये । पञ्चभिः । २ । सप्तभिः । २ । तिसृभिः । २ । चतसृभिः । २ ॥

न गोश्वन्त्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥ १८२ ॥

गो श्वन् साववर्ण सौ प्रथमैकवचने यदवर्णान्तं राड् अङ् क्रुङ् कृद् इत्येतेभ्यो यदुक्तं तन्न भवति । गवा । गवे । गोभ्यामिति । सावेकाचस्तृतीयादिर्विभक्तिरिति प्राप्तिः प्रतिषिध्यते । सुगुना । सुगवे । सुगुभ्याम् । अन्तोदात्तादुत्तरपदादिति प्राप्तिः । श्वन् । शुना । शुने । श्वभ्याम् । परमशुना । परमशुने । परमश्वभ्याम् । पूर्ववत्प्राप्तिः । साववर्णः । सौ प्रथमैकवचने यदवर्णान्तं तस्य ग्रहणम् । येभ्यः । तेभ्यः । केभ्यः । राट् । राजतिः क्विबन्तः । राजा । परमराजः । अङ् । अञ्चतिः क्विबन्तस्तस्य सनकारस्य ग्रहणं विषयावधारणार्थं, यत्रास्य नलोपो नास्ति तत्र प्रतिषेधो यथा स्यात् । नाञ्चेः पूजायामिति प्रतिषिध्यते नलोपः । प्राञ्चा । प्राङ्भ्याम् । नलोपविषये तु भवत्येव विभक्तेरुदात्तत्वम् । प्राचा । प्राचे । प्राग्भ्याम् । क्रुङ् क्विबन्त एव । क्रुञ्चा । परमक्रुञ्चा । कृत् । करोतिः कृन्तिर्वा क्विबन्तः । कृता । परमकृता ॥

दिवो झल् ॥ १८३ ॥

दिवः परा झलादिर्विभक्तिर्नोदात्ता भवति । द्युभ्याम् । द्युभिः । सावेकाच इति ऊडिदम्पदाद्यप्पुम्रैद्युभ्य इति वा प्राप्तिः प्रतिषिध्यते । झलीति किम् । दिवा ॥

नृ चान्यतरस्याम् ॥ १८४ ॥

नृ इत्येतस्मात्परा झलादिर्विभक्तिरन्यतरस्यां नोदात्ता भवति । नृभ्याम् । नृभिः । नृभ्यः । नृषु । झलित्येव । ना । त्रे ॥

तित्स्वरितम् ॥ १८५ ॥

तित्स्वरितं भवति । सवन्तावन्त् । चिकीर्ष्यम् । जिहीर्ष्यम् । अहलोपर्यन्त् । कार्यम् । हार्यम् । प्रत्ययाद्युदात्तस्यापवादः ॥

तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तम-ह्न्विङोः ॥ १८६ ॥

तासेरनुदात्तेतो ङितो ऽकारान्तोपदेशाच्च शब्दात्परं लसार्वधातुकमनुदात्तं च भवति ह्नुङ् इङ् इत्येताभ्यां परं वर्जयित्वा । तासेस्तावत् । कर्त्ता । कर्त्तारौ । कर्त्तारः । प्रत्ययस्वरापवादोयम् । अनुदात्तेतः । आस । आस्ते । वस । वस्ते । ङित् । षूङ् । सूते । शीङ् । शेते । अदुपदेशात् । तुदतः । नुदतः । पचतः । पठतः । अनुबन्धस्यानैकान्तिकत्वादकारान्तोपदेशएव शप् । पवमानः । यजमानः । यद्यत्र मुक् अकारमात्रस्य स्यात् तदा लसार्वधातुकमदुपदेशादनन्तरमिति सिद्धो निघातः । अथाकारान्तस्याङ्गस्य, तथापि लसार्वधातुकानुदात्तत्वे कर्त्तव्ये बहिरङ्गत्वादसिद्ध इति सिद्धम् । चित्स्वरोप्यनेन लसार्वधातुकानुदात्तत्वेन परत्वाद्बाध्यते । तास्यादिभ्य इति किम् । चिनुतः । चिन्वन्ति । ङिदयं श्नुः पूर्वस्य कार्यं प्रति न तु परस्य । उपदेशग्रहणं किम् । इह च यथा स्यात् पचावः पचाम इति । इह च मा भूत् हतो हथ इति । लग्रहणं किम् । कर्त्तीह पवमानाः । सार्वधातुकमिति किम् । शिश्ये । शिश्याते । शिश्यिरे । अह्न्विङोरिति किम् । ह्नुते । यदधीते ॥

आदिः सिचो ऽन्यतरस्याम् ॥ १८७ ॥

उदात्त इति वर्त्तते । सिजन्तस्यान्यतरस्यामादिरुदात्तो भवति । मा हि कार्ष्टाम् । मा हि कार्ष्टाम् । एकोत्राद्युदात्तः । अपरो ऽन्तोदात्तः । मा हि लाविष्टाम् ।२। एकोत्राद्युदात्तः । अपरो मध्योदात्तः । सिचश्चित्करणादागमानुदात्तत्वं हि बाध्यते ॥ सिच आद्युदात्तत्वे ऽनिटः पितः पक्षे उदात्तत्व वक्तव्यम् ॥ * ॥ मा हि कार्षम् ।२। अनिट इति किम् । मा हि लाविषम् ।२। मध्योदात्त एवाद्युदात्ताभावपक्षे भवति ॥

स्वपादिर्हिंसामच्यनिटि ॥ १८८ ॥

लसार्वधातुकग्रहणं यदनुवर्त्तते तदच्यनिटीति संबन्धादिह सप्तम्यन्तं भवति। स्वपादिरा वृत्करणात् । स्वपादीनां हिंसेश्चाजादावनिटि लसार्वधातुके परतो ऽन्यतरस्यामादिरुदात्तो भवति । स्वपन्ति।२। श्वसन्ति।२। हिंसेः खल्वपि । हिंसन्ति।२। प्रत्ययस्वरेण पक्षे मध्योदात्तः। अचीति किम् । स्वप्यात् । हिंस्यात्। अनिटीति किम्। स्वपितः। श्वसितः॥ हित्यजादावयं विधिरिष्यते ॥ इह न भवति । स्वपानि। हिनसानि ॥

अभ्यस्तानामादिः ॥ १८९ ॥

अभ्यस्तानामजादावनिटि लसार्वधातुके परत आदिरुदात्तो भवति । ददति । ददतु । दधति । दधतु । जक्षति । जक्षतु । जाग्रति । जाग्रतु । अचीत्येव । दद्यात् । अनिटीत्येव । जक्षितः । आदिरिति वर्त्तमाने पुनरादिग्रहणं नित्यार्थम् ॥

अनुदात्ते च ॥ १९० ॥

अविद्यमानोदात्ते च लसार्वधातुके परतो ऽभ्यस्तानामादिरुदात्तो भवति। अनजाद्यर्थ आरम्भः *। ददाति। जहाति। दधाति। जिहीते। मिमीते। अनुदात्तइति बहुव्रीहिनिर्द्देशो लोपयणादेशार्थः। मा हि स्म दधात्। दधात्यत्र ॥

सर्वस्य सुपि ॥ १९१ ॥

सर्वशब्दस्य सुपि परत आदिरुदात्तो भवति। सर्वः। सर्वौ। सर्वे। सुपीति किम् । सर्वतरः । सर्वतमः ॥ प्रत्ययलक्षणेनाप्ययं स्वर इष्यते सर्वस्तोम इति ॥ सर्वस्वरो ऽनकच्कस्येति वक्तव्यम् ॥ * ॥ सर्वकः। चित्स्वरेणान्तोदात्तो भवति ॥

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ॥ १९२ ॥

* अनजाद्यर्थ आरम्भ इति पदमञ्जर्यां दर्शनादत्रापपाठः।

Digitized by Google

भी ह्री भृ हु मद जन धन दरिद्रा जागृ इत्येतेषामभ्यस्तानां लसार्वधातुके पिति प्रत्ययात्पूर्वमुदात्तं भवति । बिभेति । जिह्रेति । बिभर्त्ति । जुहोति । ममत्तु नः परिज्मा । मदेर्बहुलं छन्दसीति विकरणस्य श्लुः । जजनदिन्द्रम् । जन जननइत्यस्य पञ्चमे लकारे रूपम् । धन धान्यइत्यस्य पञ्चमे लकारे दधनत् । दरिद्राति । जागर्ति । भ्यादीनामिति किम् । ददाति । पितीति किम् । दरिद्रति ॥

लिति ॥ १९३ ॥

लिति प्रत्ययात्पूर्वमुदात्तं भवति । चिकीर्षकः । जिहीर्षकः । भौरिकिविधम् । भौलिकिविधम् । ऐषुकारिभक्तम् ॥

आदिर्णमुल्यन्यतरस्याम् ॥ १९४ ॥

णमुलि परतो ऽन्यतरस्यामादिरुदात्तो भवति । लोलूयंलोलूयम् । आम्रेडितानुदात्तत्वे कृते पूर्वो लोलूयंशब्द एकत्राद्युदात्तः । अपरत्र लित्स्वरेण मध्योदात्तः ॥

अचः कर्तृयकि ॥ १९५ ॥

उपदेशइति वर्त्तते । अजन्ता ये उपदेशे धातवस्तेषां कर्तृयकि अन्यतरस्यामादिरुदात्तो भवति । लूयते केदारः स्वयमेव । २ । स्तीर्यते केदारः स्वयमेव । २ । यदा ऽऽद्युदात्तत्वं न भवति तदा लसार्वधातुकनिघाते कृते यक एव स्वरो भवति । जनादीनामुपदेशएवात्वं द्रष्टव्यम् । तत्राप्ययं स्वर इष्यते । जायते स्वयमेव । सायते स्वयमेव । खायते स्वयमेव । २ । अच इति किम् । भिद्यते स्वयमेव । कर्तृग्रहणं किम् । लूयते केदारो देवदत्तेन ॥

थलि च सेटीडन्तो वा ॥ १९६ ॥

सेटि थलि इट् वा उदात्तो भवति अन्तो वा आदिर्वा ऽन्यतरस्याम् । लुलविथ । ३ । यदानेते त्रयः स्वरास्तदा लिति प्रत्ययात्पूर्वमुदात्तं भवति । तेनेते चत्वारः स्वराः पर्यायेण भवन्ति । सेटीति किम् । ययाथ । लिति प्रत्ययात्पूर्वमुदात्तमित्ययमेवात्र स्वरो भवति ॥

अनित्यादिर्नित्यम् ॥ १९७ ॥

ञिति निति च नित्यमादिरुदात्तो भवति । गर्गादिभ्यो यञ् । गार्ग्यः । वात्स्यः । वासुदेवार्जुनाभ्यां वुन् । वासुदेवकः । अर्जुनकः । प्रत्ययस्वरापवादोयं योगः । प्रत्ययलक्षणमत्र नेष्यते । तेन गर्गाः बिदाः चञ्चा इत्यत्र यञि अञि कनि च लुप्ते न भवति ॥

आमन्त्रितस्य च ॥ १९८ ॥

आमन्त्रितस्यादिरुदात्तो भवति । देवदत्त । देवदत्तौ । देवदत्ताः । अत्र कारकाद्दत्तश्रुतयोरेवाशिषीति प्राप्तिर्बाध्यते ॥ लुमतापि लुप्ते प्रत्ययलक्षणमत्रेष्यते ॥ सर्पिरागच्छ सप्तागच्छतेति ॥

पथिमथोः सर्वनामस्थाने ॥ १९९ ॥

पथिमथिशब्दावौणादिकाविनिप्रत्ययान्तौ प्रत्ययस्वरेणान्तोदात्तौ तयोः सर्वनामस्थाने परत आदिरुदात्तो भवति । पन्थाः । पन्थानौ । पन्थानः । मन्थाः । मन्थानौ । मन्थानः । सर्वनामस्थानइति किम् । पथः पश्य । मथः पश्य । उदात्तनिवृत्तिस्वरेणान्तोदात्तो भवति । प्रत्ययलक्षणमत्रापि नेष्यते । पथिप्रिय इत्यत्र पूर्वपदप्रकृतिस्वरेणान्तोदात्तः पथिशब्दः ॥

अन्तश्च तवै युगपत् ॥ २०० ॥

तवैप्रत्ययान्तस्यान्तश्चशब्दादादिश्च युगपदुदात्तौ भवतः । कर्त्तवै । हर्तवै । प्रत्ययाद्युदात्तत्वापवादः । युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् । एकवर्जमिति वचनाद्यौगपद्यं न स्यात् ॥

क्षयो निवासे ॥ २०१ ॥

क्षयशब्दो निवासे ऽभिधेये आद्युदात्तो भवति । क्षियन्ति निवसन्त्यस्मिन्निति क्षयः । पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययान्तस्य प्रत्ययस्वरः प्राप्तः । क्षये जागृहि प्रपश्यन् । निवासइति किम् । क्षयो वर्त्तते दस्यूनाम् । एरजित्ययमजन्तः ॥

जयः करणम् ॥ २०२ ॥

जयशब्दः करणवाची आद्युदात्तो भवति । जयन्ति तेनेति जयः । पुंसि संज्ञायां घः प्रायेणेति घस्तस्य प्रत्ययस्वरः प्राप्तः । जयोश्वः । करणमिति किम् । जयो वर्तते ब्राह्मणानाम् । अत्राप्येरजित्ययमजन्तः ॥

वृषादीनां च ॥ २०३ ॥

वृष इत्येवमादीनामादिरुदात्तो भवति । वृषः । जनः । ज्वरः । ग्रहः । हयः । गयः । एते सर्वे पचाद्यच्प्रत्ययान्ताः । गय इत्यत्र गायते-र्निपातनादेत्वम् । नयः । तयः । पयः । वेदः । अंशः । दवः । एते ऽपि तथैवाच्प्रत्ययान्ताः । सूद इगुपधाद्विति कप्रत्ययान्तः । गुहाभिदादिर-ङ्प्रत्ययान्तः ॥ शमरणौ संज्ञायां संमतौ भावकर्मणोः ॥ शमो भावे रणः कर्मणि अजन्तावेतौ निपातनाद् भावकर्मणोर्भवतः । मन्त्रः पचाद्यजन्तः । शान्तिरिति क्तिजन्तः । कामः । यामः । घञन्तावेतौ । आराधाराकारा भिदादयः । वहो गोचरादिषु घप्रत्ययान्तः । कल्पः । अजन्तः । पादो घञन्तः । तत्र क्व चित्प्रत्ययस्वरः प्राप्तः क्व चित्कर्षात्वतो घञोन्त उदात्त इति । वृषादिराकृतिगणः । अविहितमाद्युदात्तत्वं वृषादिषु द्रष्टव्यम् ॥

संज्ञायामुपमानम् ॥ २०४ ॥

उपमानशब्दः संज्ञायामाद्युदात्तो भवति । चञ्चा । वद्धिका । खर-कुटी । दासी । उपमानशब्दा एते उपमेयस्य संज्ञाः । तत्र इवे प्रतिकृताविति यः कन् तस्य लुम्मनुष्य इति लुप् । यद्येवं किमर्थमिदमुच्यते प्रत्ययलक्षणेन सिद्धमाद्युदात्तत्वम् । एतदेव ज्ञापयति क्व चिदिह स्वरविधौ प्रत्ययलक्षणं न भवतीति । तथा च पूर्वत्रोदाहृतम् । संज्ञायामिति किम् । अग्निर्मा-णवकः । उपमानमिति किम् । देवदत्तः ॥

निष्ठा च द्व्यजनात् ॥ २०५ ॥

निष्ठान्तं च द्व्यच् संज्ञायां विषये आद्युदात्तं भवति स चेदादि-राकारो न भवति । दत्तः । गुप्तः । बुद्धः । प्रत्ययस्वरापवादः । निष्ठेति

किम् । देवः । भीमः । क्तजिति किम् । चिन्तितः । रचितः । अनादिति किम् । ज्ञातः । आप्तः । संज्ञायामिति किम् । कृतम् । हुतम् ॥

शुष्कधृष्टौ ॥ २०६ ॥

आदिरुदात्त इति वर्त्तते । शुष्क धृष्ट इत्येतावाद्युदात्तौ भवतः । शुष्कः । धृष्टः । असंज्ञार्थ आरम्भः ॥

आशितः कर्त्ता ॥ २०७ ॥

आशितशब्दः कर्तृवाची आद्युदात्तो भवति । आशितो देवदत्तः । अश्नेरयमाङ्पूर्वादविवक्षिते कर्मणि कर्तरि क्तः । तत्र थाथघञिति प्राप्तः स्वरो बाध्यते । कर्तरीति किम् । आशितमन्नम् । आशितं देवदत्तेन । पूर्वत्र कर्मणि क्तः, उत्तरत्र भावे ॥

रिक्ते विभाषा ॥ २०८ ॥

रिक्तशब्दे विभाषा आदिरुदात्तो भवति । रिक्तः । रिक्तः । संज्ञायां निष्ठा च द्व्यजनादित्यनेन पूर्वविप्रतिषेधेन नित्यमाद्युदात्तः ॥

जुष्टार्पिते चच्छन्दसि ॥ २०९ ॥

जुष्ट अर्पित इत्येते शब्दरूपे छन्दसि विषये विभाषा आद्युदात्ते भवतः । जुष्टः । २ । अर्पितः । २ । छन्दसीति किम् । भाषायां प्रत्ययस्वरेणान्तोदात्तावेतौ ॥

नित्यं मन्त्रे ॥ २१० ॥

जुष्ट अर्पित इत्येते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते भवतः । जुष्टं देवाना,मर्पितं पितॄणाम् । पूर्वेणात्र विकल्पः प्राप्तः । के चिदत्र जुष्टेत्येतदेवानुवर्तयन्ति । अर्पितशब्दस्य विभाषा मन्त्रेपीच्छन्ति । अन्तोदात्तोपि ह्ययं मन्त्रे पठ्यते । तस्मिन्साकं त्रिशता न शंकवोर्पिता इति ॥

युष्मदस्मदोर्ङसि ॥ २११ ॥

युष्मदस्मदी मदिक्प्रत्ययान्ते ऽन्तोदात्ते तयोर्ङसि परत आदिरुदात्तो भवति । तव स्वम् । मम स्वम् ॥

ङयि च ॥ २१२ ॥

युष्मदस्मदोरिति वर्तते, आदिरुदात्त इति च । ङे इत्येतस्मिंश्च परतो युष्मदस्मदोरादिरुदात्तो भवति । तुभ्यम् । मह्यम् । पृथग्योगकरणं यथासंख्यशङ्कानिवृत्त्यर्थम् ॥

यतो ऽनावः ॥ २१३ ॥

निष्ठा च द्व्यजनादित्यतो द्व्यज्ग्रहणमनुवर्त्तते । यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो भवति न चेदौशब्दात्परो भवति । अचो यत् । चेयम् । जेयम् । शरीरावयवाद्यत् । कण्ठ्यम् ॥ ओष्ठ्यम् । तित्स्वरितमित्यस्यापवादः । अनाव इति किम् । नाव्यम् । द्व्यच इत्येव । चिकीर्ष्यम् । ललाट्यम् ॥

ईडवन्दवृशंसदुहां ण्यतः ॥ २१४ ॥

ईड वन्द वृ शंस दुह इत्येतेषां यो ण्यत् तदन्तस्यादिरुदात्तो भवति । ईड्यम् । वन्द्यम् । वार्यम् । शंस्यम् । दोह्या धेनुः । द्व्यनुबन्धकत्वाद् ण्यतो यद्ग्रहणेन ग्रहणं नास्तीति तित्स्वरितमित्येतत् प्राप्तम् । वार्यमिति वृङ् संभक्ताविन्त्यस्यायं ण्यत् । क्यब्विधौ हि वृञ एव ग्रहणमिष्यते ॥

विभाषा वेण्विन्धानयोः ॥ २१५ ॥

वेणु इन्धान इत्येतयोर्विभाषा आदिरुदात्तो भवति । वेणुः । वेणुः । इन्धानः । इन्धानः । वेणुशब्दोयमजिवृरीभ्यो निदिति णुप्रत्ययान्तो नित्त्वाच्चित्यमाद्युदात्तः प्राप्तः । इन्धानशब्दोपि यदा चानशन्तस्तदा चित्त्वादन्तोदात्तः । अथ शानजन्तस्तदा सार्वधातुकमनुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः । तदेवमिन्धाने सर्वथा ऽप्राप्तमाद्युदात्तत्वं पक्षे विधीयते । वेणुरिव वेणुरित्युपमानं यदा संज्ञा भवति तदा संज्ञायामुपमानमिति नित्यमाद्युदात्तत्वमिष्यते ॥

त्यागरागहासकुहश्वठक्रथानाम् ॥ २१६ ॥

त्याग राग हास कुह श्वठ क्रथ इत्येतेषां विभाषा आदिरुदात्तो भवति । त्यागः । २ । रागः । २ । हासः । २ । एते घञन्तास्तेषां पक्षे कर्षात्वतो

घञोन्त उदात्त इत्युदात्तत्वमेव भवति। कुहः।२। स्वठः।२। क्षयः।२। ते पचाद्यजन्ताः॥

उपोत्तमं रिति॥ २१७॥

रिदन्तस्योपोत्तममुदात्तं भवति। त्रिप्रभृतीनामन्त्यमुत्तमं तस्य समीपे यत्तदुपोत्तमम्। करणीयम्। हरणीयम्। पटुजातीयः। मृदुजातीयः। प्रत्ययस्वरापवादोयम्॥

चङ्यन्यतरस्याम्॥ २१८॥

चङन्ते ऽन्यतरस्यामुपोत्तममुदात्तं भवति। मा हि चीकरताम्।२। न माङ्योग इत्यटि प्रतिषिद्धे हि चेति निघाते ऽदुपदेशादिति लसार्वधातुकानुदात्तत्वे कृते चङ एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तो भवति। उपोत्तमग्रहणाद्द्वयोर्न भवति। मा हि दधत्॥

मतोः पूर्वमात्संज्ञायां स्त्रियाम्॥ २१९॥

मतोः पूर्व आकार उदात्तो भवति तच्चेन्मत्वन्तं स्त्रीलिङ्गे संज्ञा भवति। उदुम्बरावती। पुष्करावती। वीरणावती। शरावती। शरादीनां चेति दीर्घः। आदिति किम्। इक्षुमती। द्रुमवती। संज्ञायामिति किम्। खट्वावती। स्त्रियामिति किम्। शरावान्। मतोरिति किम्। गवादिनी॥

अन्तोऽवत्याः॥ २२०॥

संज्ञायामित्येव। अवतीशब्दान्तस्य संज्ञायामन्त उदात्तो भवति अजिरवती। खदिरवती। हंसवती। कारण्डवती*। ङीपः पित्त्वादनुदात्तत्वं प्राप्तम्। अवत्या इति किमुच्यते न वत्या इत्येवमुच्येत। नैवं शक्यमिहापि स्यात्। राजवती। स्वरविधौ नलोपस्यासिद्धत्वान्नायमवतीशब्दः। वत्वं पुनराश्रयात्सिद्धम्॥

ईवत्याः॥ २२१॥

* वेत्रवतीत्यधिकं पुस्तकान्तरे।

रेवतीशब्दान्तस्यान्त उदात्तो भवति स्त्रियां संज्ञायां विषये। अहीवती। कृषीवती। मुनीवती *॥

चौ॥ २२२॥

चाविन्त्यञ्चतिर्लुप्तनकारो गृह्यते। तस्मिन्परतः पूर्वस्यान्त उदात्तो भवति। दधीचः पश्य। दधीचा। दधीचे। मधूचः पश्य। मधूचा। मधूचे। उदात्तनिवृत्तिस्वरापवादोयम्॥ चावतद्धितइति वक्तव्यम्॥ *॥ दाधीचः। माधूचः। प्रत्ययस्वर एवात्र भवति॥

समासस्य॥ २२३॥

समासस्यान्त उदात्तो भवति। राजपुरुषः। ब्राह्मणकम्बलः। कन्यास्वनः। पटहशब्दः। नदीघोषः। राजदृषत्। ब्राह्मणसमित्। स्वरविधौ व्यञ्जनमविद्यमानवदिति हलन्तेप्यन्तोदात्तत्वं भवति। नानापदस्वरस्यापवादः॥

इति काशिकायां वृत्तौ षष्ठस्याध्यायस्य प्रथमः पादः॥

---

* कपीवतीत्यधिकमेकस्मिन्पुस्तके।

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य॥

॥ एकादशस्तबकावशेषः॥

अथातिमानवतया नवतया च सदा सदाविगर्यं बलवतावतानुरागेण परमधन्या धन्यादयः कुलकन्याः कुलकन्यायविदोऽपि विदोऽपि न गोचरमुत्कलिकामुत्कलिकामिव बिभ्रत्योऽभ्रत्योघे मन्दाचस्य मन्दाचस्यदाः परस्परं परम्पराप्राप्तप्राक्तनप्रणयेन समालिङ्गन्त्यः समभाषन्त॥ २६०॥

पूर्वाह्लादो परोढानामालापमनुरागजम्।
समाप्य पूर्वरागोत्थमनूढानामथाह तम्॥

नन्वेताभिर्व्रजस्थाभिः कृष्णो वनविहारिणि ।
नदीमेघपुलिन्द्याद्रेस्तथा भावस्तदात्मनः ॥
ज्ञातः कथं शृणु प्रौढभक्तस्याप्यमले हृदि ।
स्वतमेव स्फुरत्यासां मूर्तप्रेम्णां तु किं पुनः ॥

अतिमानवतया, लोकोत्तरतयेत्यर्थः, सदा नवतया नित्यनूतनत्वेन च हेतुना बलवता प्रबलेनानुरागेण प्रेम्णा मदाविलयं परस्परहृदयोद्घाटनलक्षणसारल्यसहितं यथा भवत्येवमभाषन्त । उत्कलिकाम्· उद्गतां कलिकामिव दुर्ज्ञेयान्तस्तत्त्वाम्· उत्कलिकाम्· उत्कण्ठां बिभ्रत्यो धारयन्त्यः । यतो विदोऽपि विज्ञस्यापि न गोचरम्, आविष्टलिङ्गत्वात् पुंस्त्वम् । विदः कथंभूतस्य, कुलकं समवायस्तस्य न्यायं विन्ते, एताः समवेता भूत्वा नूनं किंचिन्मन्त्रयन्त्य इति विचारयतीति तथा तस्यापि । इदानीं तु वेणुगानारम्भे प्रेमवैवश्यान्मन्दायस्य लज्जाया ओघे वेगे समूहे वा· अभति गच्छति सति, "अभ गतौ"विति धातोः । मन्दः· अक्षाणां करचरणादीन्द्रियाणां स्पदो वेगो यासां ताः, स्तम्भादिसात्त्विकोदयादिति भावः ॥ २९० ॥

वंशीकलः किल हरेः सखि सिद्धवीर्यो
वस्तुस्वभावपरिवृत्तिकरो हि मन्त्रः ।
निश्चेतनत्वमुदपादि सचेतनानां
यच्चेतनत्वमुपपन्नमचेतनानाम् ॥ २९१ ॥

उदपादि· उत्पादयामास, वंशीकलः कर्ता, तथा यद् यतो वंशीकलात् ॥ २९१ ॥

दृश्यतां च तदेतत् ।

स्तभ्नन्ति हन्त हरिणाश्च गवां गणाश्च
वृक्षौकसश्च सरितश्च जलेचराश्च ।
भूमीभृतश्च सखि भूमिरुहश्च भूश्च
स्विद्यन्ति च प्रकटयन्ति च रोमहर्षम् ॥ २९२ ॥

तदेतत् स्वभावपरिवर्तनम् । दृश्यतामिति दूरस्थमपि तत् तत् सर्वं साक्षात् क्रियमाणमिवाभिप्रयन्ति स्तम्भन्तीति । हरिणादीनां पञ्चानां जंगमानां स्तम्भः स्थावरधर्मः । तथा भूमीभृदादीनां त्रयाणां स्थावराणां स्नेहाश्रुपातरोमहर्षौ जंगमधर्मौ । वृक्षौकसः पक्षिणः । जलेचरा मीनादयः । भूमीभृतः शैलाः । सर्वत्र चकारा भावोदये सर्वेषामेव प्राधान्यसूचकाः । शैलानां भुवश्च तृणाद्यङ्कुरोद्गमनिर्झरादिभ्यां पुलकाश्रुपातौ । वृक्षाणां तु मुकुलोद्गममकरन्दाभ्याम् । तथा च "अस्पन्दनं गतिमता"मिति ॥ २९२ ॥

यं कालकूटमिव कालकरं करालं
कालेन कालियरिपुः कलयांचकार ।
तं कालि कालयतु केलिमती कुलीना
वंशीकलं किल कुलस्य कलङ्ककीलम् ॥ २९३ ॥

नन्वस्तु नाम हरिणादीनां तिरश्चामल्पधियां तथा भूभृदादीनां च ततोऽपि ज्ञानाभावाच्चूनकोटौ प्राप्तलेखानां तथात्वं दोषानाधायकमेव, किंच विशिष्टपरामर्शशालिनृज्ञातिष्वपि कुलकुमार्यस्तु स्वधर्मरक्षार्थमपि यत्नतो धृतिमालम्बेरन्नेवेति तत्र सविचारमाहुर्यमिति । कालेन कैशोरप्राप्त्या यं वंशीकलं कलयांचकार· अभ्यस्तवान्, कालियरिपुः कालकूटमूलखण्डकोऽपि कालकूटमिव कालकरं मृतिपर्यन्तदशाप्रापकम्, अत एव करालं घोरम्, हे· आलि सखि तं का कुलीनापि कालयतु वारयतु, प्रत्युत केलिमती सतीति केलीनां भाविस्त्वेऽपि तत्र निश्चयदार्ढ्येनैव नित्ययोगार्थकमतुपा तदौत्सुक्यस्यापि दुर्निवारत्वं ध्वनितम् । यद्वा, केलिमती तेन प्राप्तसुरतापि कान्त्या तृप्तिं विभाव्य धृतिमालम्बतामित्यर्थः । वयं तु तदप्राप्तिमुर्मुरज्वलिता एवेति भावः ॥ २९३ ॥

स्मरत स्मरतरलमानसं मानसंपत्तिसमर्दं समर्दंदह्यमानेन हृदयेन हृदयेनमतिरुचिरं रुचिरञ्जितसकलभुवनतलं वनतलं गतमगतमहोत्सवं व्रजराजनन्दनम् ॥ २९४ ॥

अथ "ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते" इति तत्त्वशास्त्रोक्तदृष्ट्या तत्प्राप्तिसाधनं तद्ध्यानमेवेति निश्चिन्वन्त्यस्तस्यैव सौहार्देन स्वीयाः प्रति विदधाना इवाहुः स्मरतेति । मानस्य सर्वजनकृतस्यादरस्य संपत्त्या समदं, प्रस्तुतत्वादौचित्येन व्यञ्जितवैणुगानगर्वं, समेन सर्वासामस्माकमैकमत्या तुल्येन, तत्प्राप्त्यभावाद् दंदह्यमानेन हृदयेन मनसा स्मरत । कीदृशं, हृदयेनं हृदयनाथम्, जगतोत्सवं नित्यमहोत्सवयुक्तम् ॥ २९४ ॥

सुस्निग्धदीर्घघनकुञ्चितकेशपाशं
मन्दभ्रमद्भ्रमरकावलिभव्यभालम् ।
सुभ्रूलतं स्वलकमुन्नतचारुनासं
घ्रेयं भविष्यति कदास्य तदास्यपद्मम् ॥ २९५ ॥

अत एव स्मारणार्थमिव आकेशमाचरणाज्ज मुख्यमुख्यमङ्गं सनिजाभिलाषोद्गारं वर्णयन्ति सुस्निग्धेति । भ्रमरका ललाटालका ॥ २९५ ॥

किंच ।

माधुर्यसिन्धुमधि यस्य भवेन्निपात-
स्तत् केवलं मधुरिमाणमुरीकरोति ।
उष्णीषसीमनि सहेलगता मुरारे-
र्गोच्छन्दरज्जुरपि मज्जति रम्यतायाम् ॥ २९६ ॥

गवां छन्दरज्जुः पादबन्धनरज्जुः, सा च पीतपट्टसूत्रमयी मुक्तालम्बितचमर्यया ज्ञेया ॥ २९६ ॥

किंच ।

रत्नोल्लसन्मकरकुण्डलताण्डवेन
विभ्राजमानतममस्य कपोलबिम्बम् ।
ताम्बूलगन्धिरदनच्छदबन्धुजीवे-
र्धन्याः परं प्रमुदिताः परिपूजयन्ति ॥ २९७ ॥

ताम्बूलगन्धीति, तत्पूजनसाधनतादृशपुष्पाणामितदेव सौगन्ध्यमिति भावः ॥ २९७ ॥

किंच ।

श्रीवत्सकौस्तुभरमावनमालिकानां
लक्ष्मीभरेण परयापि च हारभासा ।
विभ्राजमानपरिणाहममुष्य वक्षः
का नाम वामनयनेच्छति न प्रवेष्टुम् ॥ २९८ ॥

परिणाहो विशालता ॥ २९८ ॥

किंच ।

जानुद्वयीलवणिमामृतमुद्रिधीषुः
पार्श्वस्थयोर्मदमनोभवनागयूनोः ।
शुण्डाद्वयीव भुजयोर्द्वितयीयमस्य
कस्या विलोडयति हन्त न हृत्तडागम् ॥ २९९ ॥

जानुद्वयीति, भुजयोराजानुलम्बितत्वेनाणाभ्यां स्वत एव तत्स्पर्शस्तथात्वेनोत्प्रेचितः ॥ २९९ ॥

किंच ।

आवेल्लितं सुवलितावलिभिर्वलीभि-
र्मुष्टिप्रमेयमपि पुष्टमिवौजसा यत् ।
लग्नं मुहुस्तदवलग्नममुष्य नोऽन्त-
र्हा हन्त तत् कृशमिदं च कृशीकरोति ॥ ३०० ॥

सुवलिता॰ आवलिर्यासां ताभिर्वलीभिः॰ आवेल्लितम्॰ आवेष्टितं, यद्वा पूरकरेचकश्वासानुरोधेन॰ आवेल्लितम्॰ ईषत् कम्पितम्, ओजसा बलेन तत्॰ अवलग्नं मध्यभागः॰ नोऽस्माकम्॰ अन्तर्मनसि लग्नं सत् कृशमपि॰ अन्तः कृशीकरोति, औत्कण्ठ्यात्मकताडनेनेति भावः, यद्वा स्वयं कृशमपि सत्॰ अन्यदपि कृशं करोति ॥ ३०० ॥

किंच ।

लावण्यकल्पतरुकोटरकल्पनाभी-
निर्यत्तनुभ्रमरराजिरिवोन्मुखीयम् ।
रोमावलिर्मलिनिमानमहो वहन्ती
हा हन्त कालभुजगीव ददंश हृन्नः ॥ ३०१ ॥

लावण्यकल्पतरोः कोटरकल्पा या नाभिस्ततो निर्यती निर्गच्छन्ती तनुः सूक्ष्मा भ्रमरराजिरिव मलिनिमानं वहन्ती रोमावलिरुन्मुखी सती तदीयहृदयपर्यन्तं गच्छन्त्यपि नोऽस्माकमेव हृदयं कालभुजगीव ददंश ॥ ३०१ ॥

किंच ।

शोणारविन्दरुचिनिन्दकमङ्घ्रियुग्मं
वज्राङ्कुशध्वजसरोरुहलक्ष्मलक्ष्मि ।
मञ्जीररत्नकिरणोल्लसदङ्गुलीकं
वक्षस्तटीमहह भूषयिता कदा नु ॥ ३०२ ॥

वज्रादिभिर्लक्ष्मभिर्लक्ष्मीः शोभा यस्य तत् अङ्घ्रियुग्मं कर्तृ, वक्षस्तटीमित्यस्य पूर्वश्लोकस्थेन न इति पदेनानुषङ्गः, भूषयिता भूषयिष्यति ॥ ३०२ ॥

इत्येवमुत्कण्ठमानाः कण्ठमानाय्य जीवितमिव ता एता एताइवानुरागपरभागेण कथंकथंचिच्छरदं गमयित्वा तरङ्गयित्वातरं चोत्साहस्य साहस्यरयं गता अहहेमन्तं* हेमन्तं समासेदुः ॥ ३०३ ॥

जीवितं जीवनं कण्ठमानाय्य, कण्ठगतप्राणा इवेत्यर्थः, एवं पूर्वरागे दशम्या दशायाः प्रागभावप्राप्तिरुक्ता, केवलमाशयैव निरुद्धजीविता इति भावः, अनुरागपरभागेण महाप्रेमोत्कर्षेण ताः प्रसिद्धा एता गोप-

* अत्रापि संधिर्लुपितोऽपि यमकसौष्ठवावबोधाय ।

कन्या एता इव॰ अन्यचौपम्याभावादनन्वयालङ्कारोऽयं, तदपि॰ उत्साहस्य॰ अतरं दुस्तरं तरङ्गम्॰ अयित्वा प्राप्य, सहसा॰ इत्यस्य भावः साहस्यं तस्य रयं वेगं गताः, कात्यायन्यर्चनव्रतार्थमित्यर्थः, अहहेति सुकुमारीणामपि तादृशं तप इति खेदे, तं प्रसिद्धम्॰ इमं तथा भावोदयेन सात्वादिवोपसन्नं हेमन्तं तत्रामतुं प्रापुः ॥ ३०३ ॥

ततश्च मूलमिलितदरपरिशिष्टविशिष्टविकचसौगन्धिककगन्धिकपिपासयेव नम्रकम्रकपिशपिशङ्गकणिशशालिशालिक्षेत्रस्य ॥ ३०४ ॥

ततश्च सहसो मासस्य हेमन्त ऋतोः प्रथमे सहोमासे मार्गशीर्षे मासि सह मिलिता एव ताः प्रसिद्धा धन्यादिकन्या उमायाः सेवनम्॰ आरेभिरे॰ इत्यन्वयः । "सहो बलिष्ठेऽपि च मार्गशीर्षहेमन्तयोश्चापि सहाः प्रदिष्ट" इति विश्वः । मासशब्देन ऋत्वभिधानमुपचारात् तदवयवत्वाद् यमकशोभार्थम्, यद्वा सहसो मासस्येति व्यधिकरणषष्ठी, ततश्च सहसो हेमन्तऋतोर्मासस्य मध्ये यः सहोमासस्तत्रेत्यर्थः । कीदृशस्य, मूले मिलितं मूलमावलम्नं दरपरिशिष्टम्॰ ईषदवशिष्टं विकचसौगन्धिकगन्धि प्रफुल्लकह्लारतुल्यगन्धं कं जलं तस्य पिपासयेव तत् पातुमिच्छयेव नम्रा नताः कम्राः कमनीयाः कपिशपिशङ्गकणिशशालिनो जातिभेदेन कपिशवर्णपिशङ्गवर्णमञ्जरीयुक्ता ये शालयो धान्यानि तेषां क्षेत्रं यत्र तस्य ॥ ३०४ ॥

दराङ्कुरितनिर्यवसयवसहितगोधूमधूमलितोदारकेदारकेवलवलमानशोभस्य मेदुरतरकुस्तुम्बुरुस्तम्बरुचिरमधुरामधुरावनेः ॥ ३०५ ॥

दराङ्कुरितैर्जाताल्पाङ्कुरैर्निर्यवसैर्निस्तृणैर्यवसहितगोधूमैर्धूमलिता धूमलवर्णीकृता ये॰ उदारकेदारा बृहत्क्षेत्राणि तैरेव केवलं वलमाना शोभा यस्य, कुस्तुम्बुरूणां धन्याकानां स्तम्बैर्गुच्छै रुचिरास्तत्साहित्येन शोभना या मधुरा मधुरिका महुरीति प्रसिद्धास्ताभिर्मधुरा माधुर्यवती॰ अवनिः पृथ्वी यतस्तस्य ॥ ३०५ ॥

सुस्निग्धवास्तुकवास्तुकस्य दिक्षु दिक्षु वलदिक्षुवलजवलजनितलक्ष्मीकस्य सहसो मासस्य ॥ ३०६ ॥

सुस्निग्धानि वास्तुकानि वास्तुभूमयो येस्तानि वास्तुकानि शाकविशेषा यत्र तस्य, दिक्षु दिक्षु वलन्ति· इक्षुवलजानि· इक्षुक्षेत्राणि तैर्बलेनैव जनिता· उत्पादिता लक्ष्मीः शोभा यस्य तस्य ॥ ३०६ ॥

शस्यसंपत्तिप्रथमे प्रथमेऽपि स्वभावसिद्धा भावसिद्धावुत्कण्ठया कण्ठयापितजीविता इव साधकाभिमानजुषोऽमानजुषो विहितसंगोपना गोपनाथतनयो नयोपपन्नः पतिर्नो भूयादिति संकल्प्य सहोमासे सहोमासेवनमारेभिरे ॥ ३०७ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे ऋतुविहारे राधानवसंगमो नामैकादशः स्तवकः ॥ ११ ॥ :::: ॥

सहोमासे कीदृशे,शस्यसंपत्त्या प्रथा ख्याता मा शोभा यस्य तस्मिन्, स्वभावसिद्धा अपि नित्यसिद्धा अपि, भावसिद्धौ कृष्णकान्तात्वरूपो यो भावस्तस्य सिद्धिर्निमित्ते साधकाभिमानजुषः, अमाना अपरिमाणा जुट् प्रीतिर्यासां ताः ३०७ ॥

इत्यानन्दवृन्दावने टीकायां सुखवर्तिन्यामेकादशस्तबकसंगमनम् ॥ ११ ॥ :::: ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ द्वादशस्तबकारम्भः ॥

अथ यदहरेवारभ्य तादृशसंकल्पसंकल्पलताकुसुमसुमनोहराणामासामासादितसामञ्जस्यो व्यापारोऽपारोत्कण्ठया समजनि तदहरेव विशिष्टपतिलाभेन हृदयशंकुलबालानां यं कुलबालानां समुचितमिति विचारयन्तो तासां प्रत्येकं मातापितरौ मा तापितरौ बभूवतुः ॥ १ ॥

द्वादशे यस्य संगायानर्चुरार्यां कुमारिकाः ।
स तासां परिधानीयवासांस्यप्यहरद्धरिः ॥

तादृशः संकल्पो गोपनायतनयः पतिर्नो भूयादित्युक्तलक्षणः स एव लता श्लेषात् परम्परितरूपकेण संकल्पलतेव सम्यक् कल्पलता वाञ्छितार्थसाधकात्वात् तस्याः कुसुमैर्भाविफलद्योतकैर्लक्षणविशेषैः सुष्ठुमनोहराणां, प्राप्ताश्वासतया स्तिमितचित्तत्वेन लोकैर्लक्ष्यमाणानामित्यर्थः । कुसुमसुमन इति पुनरुक्तवदाभासालङ्कारोऽयम् । तदहरेवेति कालकर्मणि द्वितीया । विशिष्टपतिलाभेन कुलबालानां कुलकन्यकानां समुचितं शं सुखमिति विचारयन्तौ हृदये शंकुला चौत्कण्ठ्यलक्षणकीलग्राहिण्यश्च ता बालाः प्राप्तप्रथमकैशोरावस्थाश्चेति तासां मातापितरौ जननीजनकौ मा तापितरौ न· अतिशयेन तापवन्तौ बभूवतुरित्यन्वयः । मत्वर्थकेनिप्रत्ययान्तात् तरप् प्रत्ययः ॥ १ ॥

प्रत्युत तदनुकूलव्यापारपारणाये कुशलिनावास्ताम् ॥ २ ॥

पारणाये पारप्राप्तये, "पार तीर कर्मसमाप्ता"विति धातोः ॥ २ ॥

तथा सति तासां मात्रा मात्राधिकेन स्नेहेन परमरमणीया ते तनुव्रतती व्रततीक्ष्णतां सोढुमसाम्प्रतं साम्प्रतं कथमेतादृशमुत्साहमुत्साहमुत्साहसेन दधत्या दुष्करं कर्म कर्मठताशून्यतयानन्यतयानधिकारिण्या त्वया करिष्यत इति प्रत्येकं प्रतिषिद्धानामद्धा नाम श्रद्धा शुद्धाशु वरीवृध्यत एव स्म ॥ ३ ॥

किंच ।

तासां प्रत्येकं मात्रा जनन्या मात्राधिकेन परिमाणाधिकेन स्नेहेन प्रतिषिद्धानामपि श्रद्धा वरीवृध्यते स्मैव· अतिशयेनावर्धत· एव,"मात्रा कर्णविभूषायां वित्ते माने परिच्छदे" इति मेदिनी । तत्प्रतिषेधवाक्यमाह परमेत्यादि । ते तव तनुव्रतती देहलता व्रतस्य तीक्ष्णतां तज्जनितदुःखं सोढुमसाम्प्रतमयोग्या । अत एव साम्प्रतमिदानीम्· एतादृशों निजतत्त्मोठिलक्षणां मुदं हर्षं सहत इति "कर्मण्यण्", तादृशमुत्साहम·

ध्यवसायम्· उत्साहसेन· उच्चैः साहसेन दधत्या धारयन्त्या त्वया दुष्करं कर्म कथं करिष्यते । दुष्करत्वे हेतुः कर्मठताशून्यतया, व्रते तव कर्मठता नैव लक्ष्यत इत्यर्थः । तत्राप्यनन्यतया, पूर्वपूर्वाभिरीदृशव्रतस्यानाचरणादिति भावः । अत एवानधिकारित्वया ॥ ३ ॥

ततश्च तासां मातरः पप्रच्छुः । पुत्र्यः किमुमा किमुमाधवः किमु माधवः किं कमला कमलासनो वा का देवता अताराधनीया भवतीभिः कीदृशं वाराधनं धनं वा कियदुपयोगि कोऽत्र वाचार्यो वाचार्यो विहित इत्यखिलं विचार्य नः कथयन्त्विति ॥ ४ ॥

ततश्च तासां तन्निश्चयदाढर्यज्ञानानन्तरम् । उमा गौरी, उमाया धवः शंकरः, माधवो लक्ष्मीकान्तः, कमला लक्ष्मीः, कमलासनो ब्रह्मा, अत· अनुकम्पायाम्, उपयोगि, नैवेद्यादावित्यर्थः, आचार्यः उपदेष्टा । कीदृशः, वाचा देवादिमन्त्रवाक्येन· आर्यो विज्ञः ॥ ४ ॥

तासां निगदिते विदिते वितर्कनिरासाय स्वतात्पर्यपर्यवसानस्य ता अपि सविनयमूचुः ॥ ५ ॥

इति तासां मातॄणां निगदिते भाषिते विदिते ज्ञाते सति ताः पुत्र्योऽप्यूचुः । कथं, स्वेषां तात्पर्यस्य पर्यवसानं पतिभावेन श्रीकृष्णप्राप्तिरूपं तस्य यो वितर्कस्तन्निरासाय, प्रत्युत्तरप्रदानं विना सशङ्काभिर्मातृभिः सदा दृढानुसंधानपराभिस्तदपि कदाचिद्वितर्क्यतैव वेति भावः ॥ ५ ॥

जननि जननियमोऽयमेव, यत्र यावद्यस्य श्रद्धा बद्धा बहुतरा भवति सा तस्य तावदेव देवता, तेनेह तेनेऽहमुमामेव देवतां मन एवाचार्ये चार्ये तदुपदिष्टं दिष्टं नस्तथाविधं जनयिष्यते नयिष्यते च पारमध्वनः, तेनगुरुणा स्वप्नेनास्वप्नेनादिष्टो मन्त्र एव नोऽर्थसाधक इति ॥ ६ ॥

ता ऊचुरिति, तासु· एकस्या मुख्याया एव वचनेऽपि बहुवचनं सर्वासामेकमत्यात्, अत एवाग्रे तेन· इत्येकवचनमपि । यद्वा स्वस्वमातरं

प्रति ता एकैकश ऊचुरिति, अत एव हे जननीत्येकवचनम्। तेन हेतुना· इह· उमामेव देवताम्· अहं तेने सकामार्चने विस्तृतवत्यस्मि, लिङ्गादीनां भूतसामान्य एव भूरिप्रयोगदर्शनाचात्र परोक्षापरोक्षविवेकः। आचार्ये च· आचार्यमपि, मन एव· आर्ये श्रेष्ठम्, तदुपदिष्टं तस्योपदेश एव नोऽस्माकं तथाविधं दिष्टम्· अदृष्टं जनयिष्यते, तच्च· अध्वनो व्रतरूपवर्त्मनः पारं फलस्थानं नयिष्यते नेष्यति, "नय प्रापणे" इत्यात्मनेपदिनो रूपम्। तेन मनोरूपेण गुरुणा मन्त्रः स्वप्नेन· आदिष्टः।

ननु स्वप्नः स्वप्नोपम एवाप्रामाण्यात्, मैवम्,अस्वप्नेन, जागरनिर्विशेषेणेत्यर्थः। यद्वा· अस्वप्नेन जागरणेन च, अकस्मादेव हृदि स्फुरणादिति भावः॥ ६॥

ततश्च ताभिरनिवर्त्यानां तासां तदेव निर्धार्य धार्यमाणोत्कलिकयालिकया कृतानुकूल्यानां शुभेऽहनि हनिष्यमाणान्तराये हृत्प्रमोदरससंदोहविष्यं हविष्यं समारभ्य कृतव्रतोद्यमानां बभूवुस्ताम्बूलाभावेन स्वभावभावहुलतया वर्षाजलधौ तानि नवाशोकदलानीव दशनवसनानि॥ ७॥

ताभिर्मातृभिरनिवर्त्यानां व्रताद्विवर्तयितुमशक्यानां तासां कुमारीणाम्, उत्कण्ठया· आलिकया सानुकम्पसख्या, हनिष्यमाणा नष्टीकरिष्यमाणा अन्तराया विघ्ना येन तथा भूते ऽहनि, हृत्प्रमोदरसानां संदोहस्य संदोहे वा या विड् व्याप्तिः, "विषु व्याप्तौ", तस्यां साधुः, साध्वर्थे यः प्रत्ययः, स्वभावेनैव भावहुलतया कान्तिबाहुल्येन, ताम्बूलरसानावृतत्वादत्यरुणिमोद्गमादिति भावः॥ ७॥

प्रत्यहमभ्यङ्गमभ्यङ्गराहित्येन परुषतया केतकीदलपाण्डुराण्यङ्गकानि॥ ८॥

अभ्यङ्गम्·अङ्गं लक्ष्यीकृत्य, अभ्यङ्गराहित्येन तैलाभ्यञ्जनाभावेन॥८॥

तथा निःस्नेहतयाहतया निर्विण्णजनमनांसीव रूक्षाणि चिकुरनिकुरम्बाणि॥ ९॥

निः स्नेहतया निष्प्रेमतया निस्तैलत्वेन च । कीदृश्या, वैराग्यसिद्ध्यर्थं व्रतस्य साङ्गतासिद्ध्यर्थं च· अहतया प्रमादप्यनष्टया । अत्र यद्यपि तासामङ्गानि केशाश्च तैलाभ्यङ्गाभावेऽपि स्वभावादेव स्निग्धानि तथापि प्रेमवतां द्रष्टृजनानां रूक्षतासंभावनयैव रूक्षाण्युक्तानि, यथा पुत्रदेहं पुष्टमपि पश्यन्त्या मात्रा मत्पुत्रदेहोऽयं क्षुधा क्षाम इति संभाव्यते ॥ ९ ॥

तथा सकृदद्नतयानतया तनवोऽपि तनवोऽपिहितरुचोऽद्वितीयाया द्वितीयायाः शशिकलायाः सौभाग्यहारिण्यो हारिण्योऽपि ॥ १० ॥

सकृदद्नतयेति, कर्तरि ल्युप्रत्ययान्ताद्भावे प्रत्ययः, पुंवत्त्वम् । कीदृश्या, अनतया पूर्ववद्दृढतयेत्यर्थः । तनवोऽपि देहा अपि, तनवः कृशाः, अपिहितरुचश्छन्नकान्तयः ।

यद्वा भागुरिमतेनाकारलोपे नञा· अनाच्छन्नकान्तयः, श्रीकृष्णासङ्गप्राप्त्याशाबलादिति भावः । किंवा, तनवोऽपि कृशा अपि तनवो हितरुचः, कृष्णाङ्गसंगमोपयोगिकान्तय इत्यर्थः । अद्वितीयाया एकस्या एव द्वितीयायास्तिथेः संबन्धिन्याः शशिकलायाः सौभाग्यहारिण्यः, सर्वजनकारुण्यजनककार्श्यादिति भावः । अद्वितीयाया इति, तस्या द्वितीयातिथिसाहित्ये किंचित् कलापुष्टिः संभवेदिति । हारिण्योऽपि हारवत्योऽपि । हारकान्त्या सद्वितीया अपि· अद्वितीयाया द्वितीयाशशिकलायाः सौभाग्यहारिण्य इति विरोधः ॥ १० ॥

यदि पुनरजनि रजनिविरामस्तदा भूशयनाः शयनादुस्थिताः सत्यः कृष्णाशया शयालुताविरहेण विकषाकषायवदरुणनयना नयनादिधावनं विधाय रागानक्तं नक्तंतनवसनं निरस्य रस्यतमं वसनान्तरं परिधाय ॥ ११ ॥

एवं प्रतिनीवर्णयित्वा तच्चेष्टा विवृण्वान आह यदीति । रजनिविरामो यद्यजनि जातस्तदा शमनानुजाताया यमुनाया रोधः पुलिनं समाजग्मुरित्यन्वयः । शयालुता स्वाभाविकी निद्रा तद्विरहेण । विकषा मञ्जिष्ठा, "मञ्जिष्ठा विकषा जिङ्गी"त्यमरः । रागेण रक्तिम्ना· अनक्तं न

भ्रचितं, श्वेतमित्यर्थः । रस्यतमं साधब्यसौभाग्यव्यञ्जकम्, अवर्णादिवर्णमित्यर्थः ॥ ११ ॥

विगतवैकल्यं प्रतिकल्यं प्रतिपत्स्यमानयमुनाप्लवप्लवमानमानसाः समनन्तरमनन्तरहसा पूर्वसंवादेनाकारणाकारणाभावेऽपि मिलित्वालि त्वामपेक्ष्य वर्तामहे महेच्छे त्वरितमेहीति विलम्बमानां प्रति प्रतिपद्यमानमाननागिरः ॥ १२ ॥

प्रतिकल्यं प्रतिप्रातः प्रतिपत्स्यमानेन भाविना यमुनायामाप्लवेन स्नानेन प्लवमानमार्द्रीभवन्मानसं यासां ताः, अनन्तरहसा· अतिगोप्येन, "रहोऽतिगुह्ये सुरते" इति विश्वः, पूर्वसंवादेन पूर्वदिनसायंसमये संहत्य श्वः प्रातरेवं करिष्यामहे· इति संकेतेनैव हेतुना, आकारणाकारणाभावेऽपि· आह्वानहेत्वभावेऽपि सति, "हूतिराकारणाह्वान"मित्यमरः, मिलित्वा संमिल्य, हे· आलि हे सखि ॥ १२ ॥

तदनु परस्परपरमप्रेम्णैव विषक्तविसलतावलिवलितललितलक्ष्मणा धरणितलसंचारिचारिमभरप्रगाढाः कमलिन्य इव इतरेतरतरलशाखाशाखाक्रमनं किंचन काञ्चनकान्तलतोद्यानमिव जंगमं निजनिजचपलतावलेपलेपनाय परस्परगुम्फिन्यः चणप्रभाः क्षणप्रभावितभूतलावतारा; क्षणप्रभा इव गृहीतभुजवलयाः ॥ १३ ॥

परस्परं गृहीतभुजवलयाश्चलन्तीस्ता उत्प्रेक्षते। परस्परं यः परमः प्रेमा तेनैव विषक्ताः परस्परं मिलिता विसलतावलयो मृणाललताश्रेण्यस्ताभिरेव वलितं यल्ललितं लक्ष्म चिह्नं तेन कमलिन्य इव। किंच, धरणितले संचारिण्यश्च ताश्चारिमभरेण चारुत्वातिशयेन प्रगाढाश्चेति तथा भूता इत्याश्चर्यम्। अत्र सावर्ण्यानुपलम्भ इति पुनरुत्प्रेक्षते, इतरेतरं तरलशाखानां यः शाखो व्याप्तिः, "शाखृ व्याप्तौ," धात्वर्थः, तेन· आक्रमनं सम्यक् शोभनं, किंचन· अद्भुतं काञ्चनस्य कनकस्य लतोद्यानम्। अत्रापि जगत्मोहरणपरमचमत्कारिप्रभानिवहालाभ इति पुनरुत्प्रेक्षते; निजनिजचपलतायाः प्रतिस्वचापल्यस्य· अवलेपेन· अहंकारेण लेपनाय

Digitized by Google

प्रक्षेपार्थे, परस्परं प्रसञ्जनार्थमिति यावत्, परस्परं गुम्फन्यः परस्परग्रन्थनपराः, रणरूपा उत्सवमय्यः प्रभा यासां ताः, रणादेव प्रकर्षेण भावितः कृतो भूतलेऽवतार आविर्भावो याभिस्तथा भूताः रणप्रभा इव विद्युत इव ॥ १३ ॥

वलयावलिनिनदनिर्जितमदकलकलविङ्कझङ्करणमान्दोलितकराः करालतरतरणिकिरणैर्यथा कमलिनीमलिनीभावो न भवति तथाहरहरति जरीजृम्भ्यमाणकृष्णतृष्णापरिभवेनापि विलसन्मुख्यो मुख्योत्तमकल्पकल्पनासंभृतदेवीपूजासंभारभारमणीयपाणिभिरनुचरीभिरनुगम्यमानाः ॥ १४ ॥

निर्जितं मदकलस्य मत्तस्य कलविङ्कस्य चटकस्य झङ्करणं झङ्कारो यत्र तद्यथा स्यात् तथा आन्दोलितकराः । कृष्णस्य तृष्णारूपेण परिभवेणेति, सोऽपि कृष्णेनैव प्रयुक्तः कटुतरस्वतेजोविशेष एवेति दृष्टान्तसंगतिः । मुख्या या उत्तमकल्पस्य कल्पना तया संभृता ये देवीपूजासंभाराः पुष्पदीपनैवेद्यादयस्तेषां भा कान्तिस्तया रमणीयाः पाणयो यासां ताभिः ॥ १४ ॥

चतुर्मुखमुखलेखलेखामुखमुखरितहरिगुणगुणनझङ्कारकारणादरविवृतमुखकमलामोदप्रमोदप्रपतदलिकुलातिरेकरेकणकणत्कूणनकमनीयनयनाञ्चलं भविकविकस्वरस्वरसौभाग्यं परिवादिनीपरिवादि नीरन्ध्रमृदुलतरं गायन्त्यो लघुतरम् ॥ १५ ॥

चतुर्मुखो ब्रह्मा तन्मुखास्तदादयो लेखा देवास्तेषां लेखाः श्रेण्यस्तासां मुखैर्मुखरिता ये हरिगुणास्तेषां गुणनं कीर्तनामन्त्रणं तस्य झङ्कारकारणाज्झङ्कारहेतोर्दरमीषद्विवृतं यन्मुखकमलं तस्य आमोदात् निर्गच्छतः सुगन्धाद्धेतोः प्रमोदेन प्रपतताम् अलिकुलानाम् अतिरेकाद् रेकणं शङ्का तेन हेतुना कणत् प्रकाशमानं कूणनं संकोचस्तेन कमनीयं नयनाञ्चलं यत्र तद्यथा स्यात् तथा, "रेकृ शङ्कायां" "कण दीप्तौ" "कूण

संकोचे" इति धातवः। भविकं मङ्गलमयं विकस्वरस्य स्वरस्यापि सौभाग्यं यत्र तद्यथा स्यात् तथा। परिवादिनी वीणा तामपि परिवदितुं तिरस्कर्तुं शीलं यस्य तद्यथा स्यात् तथा। नीरन्ध्रं निबिडं च तन्मृदुलं कोमलं चेति तत्। गानक्रियाविशेषणपञ्चकम् ॥ १५ ॥

तमोनुद्यनुद्यति तिमिरनुदोऽपत्यतायामपि तिमिरधाराधारायमाणायाः सकलतापोपशमनानुजातायाः शमनानुजाताया रोधोरोधोपशमपूर्वमेव समाजग्मुः ॥ १६ ॥

तमोनुदि सूर्ये॰ अनुद्यति न॰ उदयति सति शमनानुजाताया यमुनाया रोधः पुलिनं समाजग्मुः। रोधः स्नेहात् पित्रापि कृतवारणं तदुपशमपूर्वकम्। शमनानुजातायाः कीदृश्याः, तिमिरं नुदति दूरीकरोतीति तिमिरनुत् सूर्यः॰ तस्य॰ अपत्यतायां सत्यामपि तिमिरधाराया आधारोऽधिकरणं तद्वदाचरन्त्याः, सकलानां तापानामुपशमनम्॰ अनु पश्चाज्जातं स्नानाद्यनन्तरोत्पन्नं भवति यतस्तस्याः ॥ १६ ॥

सा च तरङ्गिणी रङ्गिणीव तासां श्रीनन्दनन्दनं पतित्वेन लब्धुमिच्छूनां मिच्छूनां अद्धामद्धा महतीमालोक्य सबहुमानमागच्छतागच्छतेति तरलतरङ्गकरैरालिलिङ्गिषुरिव ॥ १७ ॥

तरङ्गिणी यमुना। मिद्दा स्नेहेन प्रेमपरिणामविशेषेण शूनां वृद्धां, "टुओश्वि गतिवृद्ध्योः"। अद्धा साक्षादेव ॥ १७ ॥

तत्तच्चरणसंचरणरणत्कलहंसकझङ्करणकोलाहलैर्झटिति झटिति कृत्वा समुड्डीयमानानां जलशकुनानामालापेन यथाभिमतसिद्धिमिव सूचयन्तीरयन्ती रमणीयमादरमिव विहगमिथुनस्य निशाविरहस्य रहस्यमुत्पादयितुमुद्यदरुणकिरणाहतहतनिद्रबिसिनीकुसुमनयनाञ्चलैः सस्नेहमालोकयामास ॥ १८ ॥

तासां तासां चरणानां संचरणे रणतां शब्दायमानानां कलहंसकानां शोभनपादकटकानां संहतानां झङ्कारकोलाहलैर्जलशकुनानां जल-

चरपक्षिणामादरमिव· भादरमयं वाक्यमिव· ईरयन्तीव। विहगमिथुनस्य चक्रवाकद्वयस्य निशायां विरहो यस्य तस्य रहस्यं सुरतमयसङ्गं "रहोऽतिगुह्ये सुरते" इति विश्वः· उन्मादयितुमुद्गतोऽरुणस्य सूर्यस्य किरणानाम्· आहतमाघातस्तेन हता निद्रा यस्य तद् विसिनीकुसुमं कमलपुष्पमेव नयनं तस्याश्चलैः ॥ १८ ॥

ताश्च तदा विलम्बं सोढुमनीशा नीशारमपहाय सुमहिमहिमकणासारमपि सारमपिहितं हितं तन्वानं तन्वानन्दपरयैव सहमाना मानातीतोत्कलिकयालिकया सममेव ॥ १९ ॥

नीशारं शीतप्रावरणवस्त्रम्। शोभनो महिमा तपःप्रापकत्वलक्षणो येषां तेषां हिमकणानामासारमपि· आनन्दपरयैव तन्वा सहमानाः। कीदृशं, सारं श्रेष्ठं हितम्· अपिहितम्· अनावृतं प्रकटमेव सत् तन्वानं विस्तारयन्तम्। यद्वा· अपिहितम्· आच्छन्नं, प्राप्यमाणस्य श्रीकृष्णसङ्गरूपहितस्य अनेरन्तर्यत्वात्। मानं परिमाणं तदतिक्रान्तया· उत्कलिकया आनोत्कण्ठया हेतुना· आलिकया सख्या समम् ॥ १९ ॥

दरकम्प्रकं प्रचलदधरकिसलयलयविकसितसितदशनसंचारिचारिमशीत्कारसत्कृतमधुरहासमितरेतरेक्षणक्षणकौतुकमाकुञ्चितकलेवरं चितकले परं व्रतरसे तरसेह समादरं वहन्त्यो भगवतीं कालिन्दीमभिवन्द्य तदम्भसि स्नातुमवतेरुः ॥ २० ॥

दरमीषत् कम्प्रं कम्पयुक्तं कं शिरो यत्र तद् यथा स्यात् तथा प्रचलतः प्रकर्षेण कम्पमानस्याधरकिसलयस्य लयाचाट्याद् विकसितेषु सितदशनेषु संचारी चारिम्णा चारुतया यः शीत्कारस्तेन सत्कृतो मधुरो हासो यत्र तत्। हासे हेतुरितरेतरेति। परस्परस्वसाधर्म्यदर्शनमेव हास्योद्गमकमिति भावः।

ननु किमेतावता शीतसहनेन, तत्राह। इह व्रतरसे परं श्रेष्ठं समादरं वहन्त्यः। कथंभूते, चिता संचिता कला शिल्पं स्नानादिसमस्तव्रताङ्गकौशलं यत्र तस्मिन् ॥ २० ॥

अवतीर्य चागणितशीतभीति यथाविधि विधीयमानस्नानाः समुत्साहसाहसमुदिताः समुदितास्तीरं समुत्तेरुः ॥ २१ ॥

सम्यगुत्साहादेव शीतादिदुःखसहिष्णुतायां साहसं तेन मुदिताः समुदिताः संमिलिता एव ॥ २१ ॥

स्नानसमुत्तीर्णानां मुत् तीर्णा नाञ्जसा जायते स्म यदि तासां तदा यमुनाङ्गसङ्गसंबाधेन चारुदतीनां रुदतीनां तनुरुचामश्रुबिन्दव इव सेसिच्यमानसिचयनिचया गात्रसलिलपृषताः पृषताक्षीणामक्षीणा महीतलं पेतुः ॥ २२ ॥

स्नानसमुत्तीर्णानां स्नानात् सम्यगुत्थितानां तासां मुत्· मनःप्रसादमयी प्रीतिः· अञ्जसा शीघ्रं यदि न तीर्णा जायते स्म, अपारत्वात्, ताभिरेवेत्यर्थः । तदा चारुदतीनां तासां पृषताक्षीणां हरिणनयनानां गात्रतः सलिलपृषताः स्नानजलबिन्दवः· अक्षीणा बहुतरा महीतलं पेतुः । "पृषतैणर्श्यरोहिताश्चमरो मृगाः," "पृषन्ति बिन्दुपृषता" इत्यमरः । कथंभूताः, सेसिच्यमानः पुनः पुनः सिच्यमानः सिचयनिचयो वस्त्रसमूहो यैस्ते । तानेवोत्प्रेक्षते, तनुरुचामङ्गकान्तीनाम्· अश्रुबिन्दव इव । केन हेतुना, यमुनाया अङ्गसङ्गेन जलान्तःप्रवेशेन यः सम्यग् बाधस्तेन । यमुनायाः श्यामत्वात् प्रतिकूलकान्तिभ्यः प्राप्ताघातत्वेनेत्यर्थः ॥ २२ ॥

ये खलु लावण्यामृतसारविन्दवोऽरविन्दबोधकरकन्याकन्यायवासगमितवयसां वयसां गणेन सुचिरमन्वमीयन्त ॥ २३ ॥

अरविन्दस्य कमलस्य बोधकरः सूर्यस्तस्य कन्या यमुना तस्याः के जले यो न्यायवासो न्यायप्राप्ता वसतिस्तेनैव गमितानि यापितानि वयांसि बाल्यादीनि यैस्तेषां वयसां पक्षिणां गणेन वृन्देन । तानालोकयद्भिः पक्षिभिरपि तथा माधुर्यानुभवस्तत्पूर्वजन्ममध्ये कदापि न लब्ध इति भावः ॥ २३ ॥

तदा च सहजवैरवैरस्यमपहाय द्वयोद्वयोत्तरलाभिः कौमुदीभि-

रिव मुदीभिरिव मूर्ताभिः प्रतिभयाप्रतिभया रुदतीरिव तिमिरततीं रत-तीव्रसलिलनिःस्यन्दाः कबरीर्वैरीयसीर्मार्जनेन मार्जनेन सलिलनिःसारेण सारेण लालयन्तीभिरिव शोभाभरेण पुनराभिराभिराम्यकाम्यकार्तस्वरकान्तकान्तिभिरासेदे कापि माधुर्यस्य परा काष्ठा ॥ २४ ॥

अथ स्वस्वकबरीर्मार्जयन्तीस्ता उत्प्रेक्षते । सहजमौत्पत्तिकमपि वैरजनितवैरस्यम् अपहाय त्यक्त्वा प्रत्युत दयाया उदय उद्गमस्तेनैव उत्तरलाभिः कौमुदीभिर्ज्योत्स्नाभिरिव । एवं कार्यनिष्ठं गुणं वर्णयित्वा मनोनिष्ठमपि गुणं वर्णयन्वैरत्यागेऽपि कारणमाह मुद्भीभिरिवेति, मुदाम् आनन्दानाम् ईभिर्लक्ष्मीभिरिव मूर्ताभिर्मूर्तिमतीभिः । प्रतिभयं भीतिस्तेन या अप्रतिभा कर्तव्यास्फुरणं तया रुदतीरिव तिमिराणां ततीः श्रेणीः रतः अभिरतस्तीव्रः सलिलनिःस्यन्दोऽश्रुपातरूपो यासु ताः कबरीः सलिलानां निःसारो निःसारणं तद्रूपेण मार्जनेन वात्सल्याल्लालयन्तीभिरिव । अत एव वस्त्रखण्डेन कृताश्रुजलापसाराणामाश्वासितानां तासां रोदननिवृत्तिरभूदिति भावः । मार्जनेन कथंभूतेन मा शोभा तस्या अर्जनं लाभो यतस्तेन इति, प्रत्युत तासां हर्ष एवाभूदिति भावः, तथा भूताभिः आभिः कुमारीभिः । आभिराम्यमभिरामता तेनापि काम्या कार्तस्वरात् कनकादपि कान्ता रम्या कान्तिर्यासां ताभिः । कापि परा काष्ठा कोऽपि परम उत्कर्ष आसेदे प्राप्ता ॥ २४ ॥

तदनु च विनिवारितवारितनुलताः कृष्णगानगानन्दमाधुरीधुरीणमुखकमलाः कमलातोऽपि सौभगवत्यो भगवत्योतप्रोतरागाः प्रत्युद्गमनीयमुद्गमनीयमुत् परिदधुः ॥ २५ ॥

विशेषेण निवारितानि वारीणि याभ्यस्तथा भूतास्तनुलता यासां ताः, कृष्णस्य गानगतो य आनन्दस्तेनैव माधुरीधुरीणानि माधुर्यभारवाहकानि मुखकमलानि यासां ताः, प्रत्युद्गमनीयं धौतवस्त्रयुग्मं, "तत् स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युग"मित्यमरः । उद्गमनीया व्रतोपयोगिपाविच्यवृष्ट्या उद्गमवती मुत् प्रीतिर्यस्मिंस्तत् ॥ २५ ॥

तथा च सति परिगृहीतांशुकान्तांशुकान्तां मार्जितकेशकलापां कलापाखिडत्यवतीं सैकतं कतमदुपेयुषीं संपादितसामग्र्यवधानपराम् ॥ २६ ॥

परिगृहीतानाम् अंशुकानाम् अन्ता अञ्चलानि तेषां येऽशवः कनकरसचित्रसंबन्धिकिरणास्तैः कान्तां, सैकतं सिकतामयं कतमत् पुलिनम् उपेयुषीं प्राप्तवतीम्, संपादितं सामग्र्यं समग्रता अखण्डत्वं यस्यास्तथा भूता या सामग्री पूजोपयोगिद्रव्याणि तत्रावधानपरां, कदाचित् पतद्भिः पक्षिभिरुपहन्येत वेति शङ्कया ॥ २६ ॥

दरशीतशीतलताजनितशीत्कारवाहवदनकमलपरिसरसरदलिपत्रवातवातूलतातूलतान्तभ्रुवं कुमारिकाश्रेणीं यमुनातातोऽपि सुतातोऽपि सुतरां वात्सल्यपात्रीं कदुष्णेन मृदुना शीतोपमकरेण लालयन्नुदियाय ॥ २७ ॥

दरशीतस्य अल्पशीतस्यैव या शीतलता वपुषां सौकुमार्यात् प्रातः स्नानानभ्यासाच्च यच्छीतदायित्वं तज्जनितेन शीत्कारेण वाहयां वदनकमलानां परिसरे सरतां सौरभं प्राप्य गच्छताम् अलीनां यः पत्रसंबन्धी वातस्तस्य वातूलतया वातासहिष्णुतया तूलवत् तान्ता भीतिचपला भ्रुवो यस्यास्तां, "वातूलः पुंसि वात्यायामपि वातासहे त्रिषु" त्यमरः । यमुनातातोऽपि सूर्योऽपि, सुतातोऽपि सुताभ्योऽपि ॥ २७ ॥

ततश्च जलचरचरणचिह्नानुपहतेऽहते च जनान्तरेणान्तरेणानिलं कुत्रचन कर्पूरधवलेऽवलेपरहिते हिते पुलिने पुनरपि निजनिजकरकमलपरिशोधिते पूजनसामग्रीमग्रीयामवतार्य वतार्यचरितास्ताः किल कोकिलकोमलवचसो रचनारसिकताभिः सिकताभिर्भगवदुमामूर्तिर्निर्मित्सवः परस्परमभाषन्त ॥ २८ ॥

अनिलमन्तरेण पवनेन विना । जनान्तरेण अहते, किंत्वनिलेनैव हते, प्रत्युत ऋजूकृते इति भावः । अवलेपः फेनादिकल्कप्रलेपस्तद्रहिते ।

लघीयान्· चक्रमात् । अवनतायां स्थापयित्वा । रचनायां इसिकता यासु तथा भूताभिः सिकताभिर्वालुकाभिः ॥ २८ ॥

॥ शेषमये ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीय-ज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य षष्ठः परिच्छेदः ॥

॥ द्रव्यवाचकनाम्नां विषये ॥

१ ॥ न तावदज्ञातमेवार्थस्वरूपं जातेः परिच्छेदकं भवति ॥—तेषां ज्ञानाभावेन हेतुना न वयं पदार्थान् जातिषु व्यवस्थाप्य तत्फलत्वेन च तेषामार्थस्वरूपैस्तानभिदध्मः । द्रव्येषु परिदृश्यमानानां प्रत्यक्षगोचराणां विज्ञानानां समुदायमपेत्य नाधिकमस्मज्ज्ञानशक्त्या द्रव्याणां ज्ञापनं विवेचनं च कर्तुं समर्थाः । केवलं ये घटीयन्त्रस्य बाह्याकारमेव पश्यन्ति तैर्यथा तद्यन्त्रस्याभ्यन्तरव्यापारविशेषा नैव ज्ञायन्ते तथैव यावच्छक्यं सुनिपुणतरविमर्शपूर्वकं पश्यद्भिरप्यस्माभिस्ते गुणोत्पादका आभ्यन्तरसंस्थितिविशेषाः कथमपि नैव ज्ञायन्ते । न कोऽप्यौषधिविशेषो जीवो वा सुज्ञेयोऽस्ति, यस्य ज्ञाने महत्या अपि बुद्धेर्व्यामिश्रणं न स्यात् । यद्यपि तेषां पदार्थानां चिरपरिचयोऽस्माकमाश्चर्यं निराकरोति, तथाप्यज्ञानं न परिहरति । यदा स्वपादाधोवर्तिनः प्रस्तरान् स्वहस्तगतं लोहखण्डं वा परीक्षयामस्तदा तेषामाकारस्य ज्ञानमस्माकं नास्तीति जानीमस्तेषु वर्तमानानां भिन्नभिन्नगुणानां कारणं च प्रदर्शयितुं न शक्नुमः । पदार्थगुणा यदधीनाः सन्ति तदाभ्यन्तरसंस्थानमस्माभिर्न ज्ञायते इति तु स्पष्टमेव । यतो यत्किमपि तेषु कल्पयितुं शक्यते तावदेव स्फुटतममतिस्थूला जिज्ञासा एवमेव भवन्ति, यद् अवयवानां संस्थितिविशेषः कोऽस्ति, आद्ये स्वरूपं वा किमस्ति येन सीसं स्रोतोञ्जनं वा द्रुतं भवति । किं तत्काष्ठं प्रस्तरा वा, सीसं लोहं च केनाघातवर्धनीयं, स्रोतोञ्जनेन प्रस्तरैर्वा ?। एवं सत्यपि

जन्तूनां महीरुहाणां वा सूक्ष्मप्रयत्नानुकल्पनीयान्यार्थस्वरूपाणि च कथमतिलघूनि कतिपयान्येव वा सन्तीति तु सर्वैर्ज्ञायते चैतन्यतन्तुसंस्थितो सर्वेषु तदीयावयवेषु चोत्तमप्रतिभाशालिमनुष्यस्य कल्पना अनभिज्ञतममानुष्यकल्पना अपेक्ष्य यथैवात्यन्तं साधुतरा भवन्ति ततोऽप्यधिकं पूर्णप्रज्ञस्य सर्वशक्तिमतः परमेश्वरस्य कार्यं सुपरीक्षकबुद्धिमत्तरमनुष्यकार्याण्यतिशेते। अतो वयं ज्ञानागोचरैस्तेषामार्थस्वरूपैः पद्बोध्ययत्किंचिद्वर्गेषु जातिषु च पदार्थान् व्यवस्थापयामः। अन्धस्तथैव शीघ्रं पदार्थांस्तत्तज्जातीयत्वेन विवेचयेत् अपगतघ्राणेन्द्रियोऽपि तदीयैर्गन्धैरेव जवाकमलबकुलादीनि विभेदयेद् यथा हि स्वाज्ञाताभ्यन्तरावयवसंस्थितिभिर्वयं पदार्थान्विवेचयितुं शक्नुमः। अज्ञातार्थस्वरूपैरेव मेषांश्छागांश्च विवेचयितुं शक्नोमीति य आत्मानं मनुते, मन्ये स कदा चित् 'कासिचवरि' 'क्वेरिचिञ्जियो' इतिपदाभ्यामभिहितं जातिद्वयमपि विवेचयेत्। किं च यत्र देशे ते पक्षिणो निवसन्ति तत्र यद्बोधाय तौ शब्दौ प्रयुज्येते तादृशमिश्रविज्ञानमविज्ञायैव तयोर्जात्योः परिच्छेदनायापि प्रयतेत॥

१० ॥ नापि यान् वयं न जानीमस्ते वास्तविकाकारा जातिं नियमयन्ति ॥—अत एव बह्वीनां विशेषजातीनां भिन्ना भिन्ना वास्तविका आकाराः सन्तीति, तएव च द्रव्याणां भेदं परापरजातिरूपेण साधयन्तीति च शिक्षिता जनाः सर्वथा दुर्ज्ञेयानामार्थस्वरूपाणां निरर्थकजिज्ञासायामासक्तमनस इतीतोऽप्यधिकमप्रासंगिकमनल्पं वर्णयन्ति ॥

११ ॥ येन विशेषजातयो विविच्यन्ते तदेव शाब्दं स्वरूपमिति तु स्वात्मगतविज्ञानादप्यधिकं सुस्पष्टम् ॥—प्राकृतिकद्रव्याणां विशेषजातिषु परिगणनं तत्तज्जातिमत्त्वेन विवेचनं चात्मकल्पितशाब्दस्वरूपजन्यएव न पुनर्वस्तुषूपलभ्यमानार्थस्वरूपजन्यमित्यात्मविज्ञानेभ्योऽपि सुस्पष्टम्। यत आत्मशक्तिमुख्यानां स्वव्यापारेषु भानादेवात्मगतत्वेनाधिकरणचिन्तनं विनैव स्वस्मिन्नेवोपलभ्यमानानां तेषां सर्वेषां व्यापाराणां चेतनजातिविशेषे आरोपणेनैवात्मनो ज्ञानं भवति नान्यथा। किं चास्माकं महत्तममीश्वरज्ञानमपि स्वात्मसूपलभ्यमानानां (व्यापाराणां) परिचिन्तनेना-

स्माभिरुपलब्धानां तेषामेव शुद्धविज्ञानानामारोपणात्मकमस्ति, यानि च स्वाभावमपेक्ष्य स्वयमधिकं पूर्णानीति कल्प्यन्ते, तेषां विज्ञानानामीश्वरे ऽपरिच्छिन्नपरिमाणेनारोपणमेवात्र मया विवक्ष्यते। इत्थं च स्वस्मिन् प्रत्यग्दर्शनेनैव येषां येषां सत्ता साधुतरा प्रतीयते न पुनस्तदभावस्तानि सत्ताज्ञानशक्तिसुखादीनां विज्ञानान्युपलभ्य तेषु सर्वेष्वपरिच्छिन्नपरिमाणेन समुदितेषु सत्सु नित्यस्य सर्वज्ञस्य सर्वशक्तिमतो ऽपरिच्छिन्नबुद्धिमतः परमानन्दशीलसत्त्वस्य मिश्रितं विज्ञानमस्माभिरवधार्यते। यद्यपि दिव्यपुरुषाणां भिन्नविशेषजातयः सन्तीति ज्ञायते ऽस्माभिस्तथापि न जानीमस्तेषां भिन्नभिन्नविज्ञानविशेषाः कथं रचनीया इति। स्पष्टं चैतद् यद् दिव्यपुरुषाणामनेकजातीनां सत्तायाः शक्यसंभवत्वेपि विचारे हर्षे स्वीयानेकावयवसंचालने च प्रवृत्तेभ्यो निजमनोव्यापारेभ्यः स्वस्वात्मभ्यश्च परिगृहीतानि कानि चिद्विज्ञानानि विहायापरेषां तादृशसत्त्वेषु प्रयोक्तुमर्हाणां विज्ञानानामभावात् नवीनापरविज्ञानरचनासामर्थ्याच्च वयं स्वज्ञानेषु दिव्यपुरुषाणां विविधविशेषजातीनां परस्परं विवेचनं केवलं तेषु स्वात्मगोचराणां तादृशव्यापाराणां शक्तीनां च न्यूनाधिकपरिमाणेनारोपणेनैव कर्तुं शक्नुमः। इत्थं चेश्वरविज्ञानं विहाय न कानि चिदत्यन्तं भिन्नानि विशेषविज्ञानान्यवसीयन्ते यतस्तस्मिन् काले सर्वाणि च तानि विज्ञानान्यपरिच्छिन्नान्यारोप्यन्ते ऽपरेषु दिव्यपुरुषेषु तु सावधिकानि तानि विज्ञानान्यारोप्यन्ते। न च मन्ये, ईश्वरतदितरदिव्यपुरुषयोः परस्परासमानाधिकरणानां शुद्धविज्ञानानां संख्यया न कमपि भेदमस्मदीयविज्ञानेषूपलभामहे ऽपि तु केवलं विज्ञानानन्त्येनैव। सत्ताज्ञानेच्छाशक्तिगत्यादीनां सर्वेषां विशेषविज्ञानानामस्मन्मनोव्यापारजन्यविज्ञानरूपतया केवलं परिमाणभेदेनैव सर्वासु दिव्यपुरुषजातिषु तानि सर्वाणि विज्ञानान्यारोपयामः। अन्ततो यदा यावच्छक्यमादिपुरुषस्य विज्ञानानि कल्प्यन्ते तदा तस्मिन्परमात्मनि तेषामानन्त्यमपि कल्पयितुं शक्यते। अस्ति चैतद्यदीश्वरः स्वीययथार्थपरमोत्तमस्वभावेन श्रेष्ठतमत्वेन पूर्णतमत्वेन च सांसारिकेभ्यो भूयिष्ठेभ्यः क्षुद्रपदार्थेभ्यः श्रेष्ठतमान् मनुष्यान् परमपवित्रान्

मुनिवरान् देवदूतानप्यतिशेतेतराम् । अत एवास्माभिरल्पबुद्ध्या यावत्कल्पयितुं शक्यते ततोऽप्यानन्त्येन स सर्वं सांसारिकं वस्तुज्ञानमतिशेते ॥

१२॥ दिव्यपुरुषाणामप्यनन्ता विशेषजातयः संभवन्ति ॥—यथा प्रत्यक्षयोग्यवस्तूनां ये धर्मा अस्माभिर्ज्ञायन्ते तेषु च निश्चीयन्ते तैरेव धर्मैस्तेषां विशेषजातयः परस्परं भिद्यन्ते तथा येषां विज्ञानान्यस्मदात्मसु नोद्भवन्ति तैर्धर्मैः परस्परं भिद्यमाना विरुद्धाश्च दिव्यपुरुषाणामपि बह्व्यो विशेषजातयः संभवन्तीति तु नासंभवनीयं,नापि तर्काप्रतिष्ठितम् । सर्वस्मिन् दृश्ये भौतिके जगति उत्कृष्टापकृष्टभावापन्नजीवश्रेण्यां विच्छेदस्यादर्शनात् अस्मदपकृष्टानां प्रत्यक्षगोचराणां भौतिकानां यावन्त्यो विशेषजातयः सन्ति ततोऽपि भूयिष्ठा उत्कृष्टोत्कृष्टतरबुद्धिमतां जीवानां विशेषजातयः संभवन्ति । मनुष्यानारभ्य स्तम्बपर्यन्ताः सर्वे क्रमिकाल्पिष्ठवैलक्षण्यवन्तो ऽधोऽधोऽल्पाल्पज्ञानशक्त्यादिगुणविशिष्टा वस्तूनामविच्छिन्नश्रेणिरूपाः सन्ति येन प्रतिश्रेणि तेषां परस्परमल्पीयानेव भेदोऽस्ति । सन्ति तथाविधा मत्स्याः पक्षवन्तो ये आकाश उत्पतितुं शक्नुवन्ति । सन्ति च तथा पक्षिणोऽपि ये जले निवसन्ति । तेषां मत्स्यसमानशीतरुधिरवत्त्वात्तत्तुल्यरसवत्त्वाच्च व्रतपरायणा जना मत्स्यमात्राशनदिवसेषु फलाहाररूपेण तेषामपि भक्षणमनुमन्यन्ते । एवंविधा अपि जन्तवः सन्ति ये पशुजातीयैः पक्षिभिश्च तथा ऽत्यन्तं प्रत्यासन्ना येन ते उभयोर्मध्यस्था इव भवन्ति । जलस्थलचरा जीवाः स्थलैकनिवासिनो जीवान् जलमात्रनिवासिभिः सह संयोजयन्ति । यथा । मकराः स्थले जले च निवसन्ति । पर्पाईस् संज्ञका मत्स्यविशेषाः सूकरसमानान्त्रोष्णरुधिरवन्तः सन्ति । समुद्रीयस्त्रीपुंसयोश्च विषये किमपि विश्वहार्हं वर्णनं नास्तीति तदिह नोदाह्रियते । के चन पशवोऽपि केचिन्मनुष्यैः सममेव ज्ञानिनो बुद्धिमन्तश्च सन्ति । जीवमहीरुहवर्गौ तथा परस्परं प्रत्यासन्नौ येनाद्यवर्गस्यापकृष्टतमजन्तोर्द्वितीयवर्गीयोत्कृष्टतममहीरुहस्य च तारतम्ये जिज्ञासिते तयोरन्योन्यं भेदः स्वल्प एवोपलप्स्येत । एवं सर्वथा ऽपकृष्टतमपर्यन्तं निरिन्द्रियाणां द्रव्यावयवानां च विचारे क्रियमाणे बह्व्यो विशेषजातयः परस्परं प्रत्यासन्नास्तासां परस्परमन्तरं चात्यन्तं

स्वत्वमुपलप्स्येरन् । किं च जगत्स्रष्टुरपरिच्छिन्नत्वमस्याऽनन्तत्वादेश्च विचारे क्रियमाणे, यथा मनुष्यानारभ्य स्तम्बपर्यन्तं सर्वा विशेषजातयः क्रमेणाधोऽधोऽपचीयमानगुणवन्त्यः परस्परं प्रत्यासन्नाश्च सन्ति तथैवास्मानारभ्य परेशपर्यन्तमपि क्रमिकोत्तरोत्तरोत्तमगुणवज्जीवपरंपरयैवोपर्युपर्यारोहणं सांप्रतमित्येव कथनमनन्तकल्याणशीलस्य परमात्मनो महत्तमाशयं जगतः स्फुटं परस्परसाम्यं चानुसरतीति सोपपत्तिकं वचः । अत एव चास्मानपेक्ष्यापकृष्टानां जीवानां विशेषजातयो यावन्त्यः संभवन्ति ततोऽत्यन्तमधिका उत्तमानां जीवानां विशेषजातयः सन्तीति निश्चयोऽप्युपपद्यते । यतो निर्गुणकल्पादपकृष्टतमात्कृमिविशेषाद्वयं यावति दूरे स्मस्ततोऽतितरां दूरेऽस्मत्तः पूर्णानन्तगुणं पारमेश्वरसत्त्वं वर्तते । एवं सत्यपि तासां सर्वासां भिन्नभिन्नविशेषजातीनां तत्तदसाधारणोत्कृष्टविवेकवत्त्वेन स्फुटानि तत्तद्विज्ञानान्यस्माकं न जायन्ते ॥

१३ ॥ शाब्दस्वरूपं विशेषजातिस्वरूपाद्भिन्नमिति जलहिमोदाहरणाभ्यां साध्यते ॥—अथ सिंहावलोकनन्यायेन भौतिकद्रव्याणां विशेषजातीरधिकृत्य किंचिदुपपाद्यते । तथाहि । यदि कश्चन जलं हिमं चेति किं पृथग्वस्तुविशेषजातिद्वयमस्तीति कं चन पृच्छेत्तर्हि निःसंदेहमस्तीत्येवोत्तरं लभेत । किं च यस्तादृशवस्तुविशेषजातिद्वयमस्तीति कथयति स नास्ति यथार्थभाषीत्यपि न शक्यते वक्तुम् । परं तु यदि कश्चनाङ्गलो मनुष्यो बाल्यात्प्रभृति "जमैका"नाम्नि देश एव पोषितोऽश्रुतदृष्टपूर्वहिमो दैववशादाङ्गलदेशमागत्य हेमन्ततौ निशि पात्रे निहितं जलं प्रभाते घनीभूतं पश्यन् केन चित्पुरुषान्तरेणेदं किमस्तीति पृष्टो जलमेव घनावस्थामापन्नमित्येवोत्तरयेत् । नन्वस्ति किं तत्पुरुषदृष्ट्या तद्धिमं जलात्पृथगेव नवीनं विशेषजात्यन्तरमिति चेदत्रोच्यते । यथा द्रुतोष्णादुष्णिकाविशेषात्तदेव शीतीकृतं सत् कठिनीभूतं लेहद्रव्यं न भिद्यते । यथा वा मूषागतं द्रुतं सुवर्णं सर्वजनदृष्ट्या स्वर्णकारहस्तगतात्कठिनसुवर्णान्नातिरिच्यते, तथैव तत्पुरुषदृष्ट्या हिमं जलान्नातिरिच्येत । एवं स्थितेऽस्माकं भिन्नभिन्ना विशेषजातयस्तत्तच्छब्दाभिधाय प्रयुक्तैस्तैस्तैर्नामभिरुपलक्षितानि तत्तद्वि-

Digitized by Google

ज्ञानान्येव न पुनस्ततोऽतिरिच्यन्ते । सर्वाण्यपि विद्यमानद्रव्याणि स्वस्वाकारविशेषवन्ति सन्ति, यांस्तेष्वनुभूयमानाः प्रत्यक्षयाम्यास्ते ते गुणाः शक्तयश्चाश्रयन्तइति तु सत्यं, तथापि पदार्थानां विशेषजातिषु व्यवस्थापनं (परिगणनं) तत्तत्पदार्थविज्ञानानुसारेणैवास्माभिः क्रियते, तस्य तत्तदनेकनामबोध्यत्वानतिरिक्तत्वात् । तच्च (पृथक्पृथग्जातिषु परिगणनं यद्यपि नामभिस्तेषां विवेचनाय पर्याप्तमस्ति येन तेषु पुरतो वर्तमानेष्वसत्स्वपि तानधिकृत्य भाषितुं शक्यते, तथापि तेषां पदार्थानां वस्तविकाभ्यन्तरसंस्थितयोच कारणम् । अत एव च विद्यमानवस्तूनि स्वभावत एवार्थस्वरूपैस्तत्तद्विशेषजातिरूपेण भिद्यन्ते यथैवास्माभिस्तानि नामभिस्तत्तद्विशेषजातिरूपेण विविच्यन्ते ॥

१४ ॥ कतिपयार्थस्वरूपविषयमनुपपत्तयः ॥—सन्ति कानि चिदर्थस्वरूपाणि वस्त्वाकारा वा यैः सर्वा विद्यमाना व्यक्तयः स्वभावत एव तत्तज्जातिरूपेण परस्परं भिद्यन्तइति सर्वेविकल्पनानुसारेण विद्यमानानां सत्त्वानां तत्तद्विशेषजातिभिर्विवेचनाय वक्ष्यमाणान्यावश्यकानि सन्ति ॥ ॥ शेषमग्रे ॥

॥ रामानुजदर्शनम् ॥

॥ तत्त्वत्रयचुलुकम् ॥

॥ यतिपतिमतदीपिका ॥

॥ अथ जीवो निरूप्यते ॥

प्रत्यक्त्वचेतनत्वात्मत्वकर्तृत्वादीनि ईश्वरजीवसाधारणानि लक्षणानि प्रत्यक्त्वं नाम स्वयमेव स्वस्मै भासमानत्वं चेतनत्वं ज्ञानाश्रयत्वम् आत्मत्वं शरीरप्रतिसंबन्धित्वं कर्तृत्वं सङ्कल्पज्ञानाश्रयत्वं एवं सामान्यलक्षणलक्षितस्य विशेषलक्षणान्युच्यन्ते अणुत्वे सति चेतनत्वं स्वतः शेषत्वे सति चेतनत्वम् एवमाधेयत्वविधेयत्वपराधीनकर्तृत्वपरतन्त्रत्वादिकमूह्यं सच देहेन्द्रियमनःप्राणादिभ्यो विलक्षणः यथा मम शरीरमिति प्रतीत्या देहाद्व्यावृत्तः चक्षुषा पश्यामि श्रोत्रेण शृणोमि वाचा वदामि इत्यादि

प्रत्ययाद्बाह्येन्द्रियेभ्यो व्यावृत्तः मनसा जानामीति मनसः। ज्ञानकरणत्व-प्रतीतेः मम प्राणा इति व्यतिरेकोक्तेः जानाम्यहमिति ज्ञानाच्च मनः प्राणज्ञानेभ्यो व्यावृत्तः स चाणुपरिमाणः उत्क्रान्त्यादेः श्रवणात् प्रमाणानुसाराच्च अणुत्वे युगपदनेकविषयानुभवः कथमिति न शङ्कनीयं धर्मभूतज्ञान-व्याप्त्या उपपत्तेः एतेनैव सौभरिप्रभृतीनां युगपदनेकशरीरपरिग्रहोपि संभवति सच नित्यः पूर्वानुभूतार्थप्रतिसन्धानात् जीवउत्पन्नो जीवो नष्टइति प्रतीतिः कथमिति चेन्न जीवस्य देहसंबन्धउत्पत्तिः तद्वियोगो नाशइति प्रति-पादनाज्जीवस्वरूपं नित्यमेव सच प्रतिशरीरं भिन्नएकपरिमाणेषु अनेकेषु सुवर्णघटेषु एको घटइति प्रतीतिवद्व्रीहिराशावेकोव्रीहिरिति वच्च ज्ञाने-काकारतया एकत्वव्यवहारः। ननु स्वरूपैक्यं प्रमाणविरोधात्स्वतः सुखी उपाधिवशात्संसारः अयं च कर्त्ता भोक्ता शरीरी शरीरं च भवति प्रकृत्यऽपेक्षया शरीरी ईश्वरापेक्षया शरीरं तस्य प्रत्यक्षश्रुतिभ्यां स्वयं प्रकाशत्वं च सिद्धं प्रयोगश्च आत्मा स्वयं प्रकाशः ज्ञानत्वाद्धर्मभूतज्ञानवत् इति ज्ञानाणुत्वाऽमलत्वादय एतस्य स्वरूपनिरूपकधर्मा एतेन ज्ञानस्य क्षणिकत्वं क्षणिकत्वसन्तानरूपआत्मेति बौद्धपक्षे भूतचतुष्टयात्मकत्वाद्देहस्य देहावधिकआत्मेति चार्वाकपक्षः गजदेहे गजपरिमाणः पिपीलिकादेहे तत्परिमाणः अतो देहपरिमाणआत्मेति जैनपक्षः कर्तृत्वभोक्तृत्वादिकं प्रकृतेरेव नतु पुरुषस्येति सांख्यपक्षः ब्रह्मांशो जीवइति यादवपक्षः सोपाधिब्रह्मखण्डो जीवइति भास्करपक्षः अविद्याकल्पितएकजीववादप*क्षः अन्तःकरणावच्छिन्नानेक-जीववादपक्षः इत्येवमादयो विरुद्धपक्षानिरस्ताः विभुत्ववादपक्षोपि ॥

ननु जीवस्य विभुत्वानङ्गीकारे ऽदृष्टजनितदेशान्तरफलोपलब्धिः कथमिति चेन्न जीवस्य संबन्धाभावेपि अदृष्टवशादेवोपपत्तेः अदृष्टं नाम भगवत्प्रीत्यऽप्रीतिजनकजीवकर्तृककर्मविशेषजन्यो ज्ञानविशेषः स विशेषो भगवत्संकल्पएव विभुस्वरूपं भगवन्तमाश्रितः अतः फलोपलब्धिरिति न विरोधः स जीवस्त्रिविधः बद्धमुक्तनित्यभेदात् तत्र बद्धानामानि वृत्तसंसाराः ते चतुर्द्दशभुवनात्मकाण्डकटाहवर्त्तिनो ब्रह्मादिकीटपर्य्यन्ताश्चेतन-

* शङ्कराचार्याणाम्।

विशेषाः श्रीमन्नारायणनाभिकमलादुत्पन्नो ब्रह्मा ब्रह्मणो रुद्रः पुनर्ब्रह्मणः सनकादियोगिनो नारदादिदेवऋषयो वशिष्ठभृग्वत्र्यादिब्रह्मऋषयः पुलस्त्यमरीचिदक्षकाश्यपादिनवप्रजापतयो बभूवुः तेभ्यो देवाः दिक्पालाश्चतुर्दशेन्द्राश्चतुर्दशमनवः असुराः पितरः सिद्धगन्धर्वकिन्नरकिंपुरुषविद्याधरादयो वसवो रुद्राः आदित्या अश्विनौ च दानव यक्षराक्षसपिशाचगुह्यकादयः एवं देवयोनयो मनुष्या अपि ब्राह्मणक्षत्रियवैश्यशूद्रादिजातिभेदाद्बहुविधाः तिर्य्यञ्चोऽपि पशुमृगपक्षिसरीसृपपतङ्गकीटादिभेदाद्बहुविधाः ॥ स्थावरा अपि वृक्षगुल्मलतावीरुत्तृणादिभेदाद्बहुविधाः वृक्षादीनां जलाहरणोपयुक्त किंचिज्ज्ञानसंबन्धोऽस्त्येव अप्राणिमत्सु स्वल्पासेत्युक्तत्वात् अतो देवमनुष्यतिर्य्यक्स्थावरभेदभिन्नाबद्धाः जरायुजाण्डजोद्भिज्जस्वेदजाश्च भवन्ति देवमनुष्याजरायुजाः तेषु ब्रह्मरुद्रादयः सनकादयश्च द्रौपदी धृष्टद्युम्नादयः भूतप्रेतवेतालादयश्च अयोनिजाः तिर्यगादयश्च जरायुजाअण्डजाः स्वेदजाश्च भवन्ति स्थावरादयउद्भिज्जाः एवं भूताबद्धाः बीजाङ्कुरन्यायेन विषमप्रवाहतया अनादिकालप्रवृत्ता विद्या कर्मवासना रुचिप्रकृतिसंबन्धैश्चक्रवत्परिवर्त्तमानैर्गर्भजन्मबाल्ययौवनजागरस्वप्नसुषुप्तिमूर्छाजरामरणस्वर्गनरकगमनादिविविधविचित्रावस्थावन्तोऽनाद्यनन्तप्रकारातिदुःसहतापत्रयाभितप्ताः स्वतः प्राप्तभगवदनुभवविच्छेदवन्तश्च ते द्विविधाः शास्त्रवश्यास्तदवश्याश्चेति तयोर्मध्ये करणायत्तज्ञानानां बद्धानां शास्त्रवश्यता तिर्य्यक्स्थावरादीनां तन्नास्ति शास्त्रवश्या द्विविधाः बुभुक्षवो मुमुक्षवश्चेति तत्र बुभुक्षवस्त्रैवर्गिकपुरुषार्थनिष्ठाः पुरुषाः तेच द्विविधाः अर्थकामपरा धर्मपराश्चेति केवलार्थकामपरा देहात्माभिमानवन्तः धर्मपराश्च अलौकिकश्रेयः साधनं धर्मः चोदनालक्षणोऽर्थो धर्मइति लक्षणलक्षितयज्ञदानतपस्तीर्थयात्रादिनिष्ठाः तेच देहातिरिक्तात्मनः परलोकोऽस्तीति ज्ञानवन्तः धर्मपराद्विविधाः देवतान्तरपरा भगवत्पराश्चेति देवतान्तरपरा ब्रह्मरुद्राग्न्याद्याराधनपराः भगवत्पराश्च आर्त्तोजिज्ञासुरर्थार्थीत्युक्ताधिकारिणः आर्त्ताभ्रष्टैश्वर्यकामः अर्थार्थीत्वपूर्वैश्वर्य्यकामः मुमुक्षवो द्विविधाः कैवल्यपरा मोक्षपराश्चेति कैवल्यं नाम ज्ञानयोगात्प्रकृतिवियुक्तस्वात्मानुभवरूपो

ऽनुभवः अर्चिरादिमार्गेण परमपदं गत एव क्वचित्कोणे पतितः त्यक्तपत्नीन्यायेन भगवदनुभवव्यतिरिक्तस्वात्मानुभव इत्याहुः ॥

केचिदर्चिरादिमार्गेण गतस्य पुनरावृत्त्यश्रवणात्प्रकृतिमण्डल एव क्वचिद्देशे स्वात्मानुभव इत्यप्याहुः। मोक्षपराश्च द्विविधाः भक्ताः प्रपन्नाश्चेति भक्ताः पुनरधीतसांगशिरस्कवेदाः पूर्वोत्तरमीमांसापरिचयाच्चिदचिद्विलक्षणमनवधिकातिशयानन्दस्वरूपं निखिलहेयप्रत्यनीकं समस्तकल्याणगुणात्मकं ब्रह्मावधार्य तत्प्राप्त्युपायभूतां सांगभक्तिं स्वीकृत्य तया मोक्षं प्राप्तुकामाः भक्तावधिकारस्त्रैवर्णिकानामेव देवा*दीनामप्यस्ति अर्थित्वसामर्थ्ययोः संभवाच्च शूद्राधिकारः अपशूद्रा†धिकरणविरोधात् भक्तिस्वरूपं तु बुद्धिपरिच्छेदे प्रतिपादितं भक्ताः द्विविधाः साधनभक्तिनिष्ठाः साध्यभक्तिनिष्ठाश्चेति व्यासादयः साधनभक्तिनिष्ठाः पराङ्कु‡शादयः साध्यभक्तिनिष्ठाः ॥ आकिंचन्यानन्यगतिकत्वधर्मविशिष्टो भगवन्तमाश्रितः प्रपन्नः सोपि द्विविधः त्रैवर्गिकपरो मोक्षपरश्चेति त्रैवर्गिकपरो नाम भगवत एव धर्मार्थकामाभिलाषी मोक्षपरस्तु सत्संगान्नित्यानित्यविवेके सति संसारे निर्वेदाद्वैराग्ये उत्पन्ने मोक्षेच्छायां जातायां तत्सिद्ध्यर्थम् आचार्यो वेदसंपन्नः स्यादाचार्यलक्षणलक्षितं गुरुं संश्रित्य तद्द्वारा पुरुषकारभूतां श्रियं प्रपद्य भक्त्याद्युपायान्तरेण अशक्तः अतएवाऽकिंचनानन्यगतिः श्रीमन्नारायणचरणावेव उपायत्वेन यः स्वीकरोति स प्रपन्नः प्रपत्तिः § सर्वाधिकारा सच प्रपन्नो द्विविधः एकान्ती परमैकान्ती चेति यो मोक्षफलेन साकं फलान्तराण्यपि भगवत एवेच्छति स एकान्ती देवतान्तरशून्य इत्यर्थः भक्तिज्ञानाभ्यामन्यत्फलं भगवतोपि यो नेच्छति स परमैकान्ती स द्विविधः दृप्तः आर्त्तश्चेति अवश्यमेव भोक्तव्यमिति प्रारब्धकर्मानुभवन् एतद्देहावसानसमयमीक्षमाणो दृप्तः जाज्वल्यमानाग्निमध्यस्थितस्येव संसारावस्थितेरतिदुः-

* तथा चतुर्थे बादरायणः तदुपर्यपि बादरायणः संभवादिति ।

† अत्राधिकरणे अतीव वैचित्र्यं वेदान्तसूत्रभाष्यकृतां विरोधश्चान्योन्यम् ।

‡ रामानुजाचां पूर्वाचार्याः ।

§ अत्र शूद्रादीनामप्यधिकारः ।

सहत्वात् प्रपत्युत्तरकालमेतावता मध्यार्त्तः मुक्तो नाम उपायपरिग्रहणानन्तरं नित्यनैमित्तिकभगवदाज्ञाकैङ्कर्यरूपाणि स्वयं प्रयोजनतया कुर्वन् भगवद्भागवतापराधांश्च वर्जयन् देहावसानकाले सुकृतदुष्कृते मित्रामित्रयोर्निक्षिपन् वाङ्मनसीत्यादिप्रकारेण हार्दं परमात्मनि विश्रम्य मुक्तिद्वारभूतसुषुम्नाख्यनाड्यां प्रविश्य ब्रह्मरन्ध्राद्विनिष्क्रम्य हार्देन साकं सूर्यकिरणद्वारा अग्निलोकं गत्वा दिनपूर्वपक्षोत्तरायणसंवत्सराभिमानदेवताभिर्वायुना च कृतसत्कृतः सूर्यमण्डलं भित्त्वा नभोरन्ध्रद्वारा सूर्यलोकं गत्वा तदनन्तरं चन्द्रविद्युद्वरुणेन्द्रप्रजापतिभिर्मार्गेषु तैस्तैरातिवाहिकगणैः सोपचारैः सह तत्तल्लोकानतीत्य प्रकृतिवैकुण्ठसीमपरिच्छेदिकान्तिविरजां तीर्त्वा सूक्ष्मशरीरं विहाय अमानवकरस्पर्शात् अप्राकृतविग्रहयुक्तश्चतुर्भुजो ब्रह्मालंकारेणालंकृत इन्द्रप्रजापतिसंज्ञकनगरद्वारपालकानभ्यनुज्ञाप्य श्रीवैकुण्ठाख्यं दिव्यनगरं प्रविश्य गरुडानन्तयुक्तपताकालंकृतदीर्घप्राकारसहितगोपुरमतीत्यैरंमदाख्यामृतसरस्सोमसवनाख्याश्वत्थं दृष्ट्वा शतं मालाहस्ता इत्युक्तपंचशतदिव्याप्सरोगणैरुपचरितो ब्रह्मगन्धादिभिरलंकृतस्तत्रत्यानन्तगरुडविष्वक्सेनादीन्प्रणम्य तैर्बहुमतो महामणिमण्डपमासाद्य पर्यङ्कसमीपे स्वाचार्यान् प्रणम्य पर्यङ्कसमीपं गत्वा धर्मादिपीठोपरि कमले अनन्ते विमलादिभिश्चामरहस्तैः सेव्यमानं श्री भू लीला समेतं शङ्खचक्रादिदिव्यायुधोपेतं चाञ्चल्यमानकिरीटं मकरकुण्डलग्रैवेयहारकेयूरकटककौस्तुभमुक्तादामोदरबन्धनपीताम्बरकाञ्चीगुणनूपुराद्यपरिमितदिव्यभूषणभूषितम् अपरिमितोदारकल्याणगुणसागरं भगवन्तं दृष्ट्वा तत्पादारविन्दयुगले शिरसा प्रणम्य वाहेन पर्यङ्कमारुह्य तेन स्वाङ्के स्थापितः कोऽसीति पृष्टः ब्रह्मप्रकाशोऽस्मीत्युक्त्वा तेन कटाक्षितः तदनुभवजनितहर्षप्रकर्षात्सर्वदेशसर्वकालसर्वावस्थोचित सर्वविधकैङ्कर्यरतिः आविर्भूतगुणाष्टकः उत्तरावधिरहितब्रह्मानुभववान्यः स मुक्त इत्युच्यते मुक्तस्य ब्रह्मसाम्यापत्तिश्रुतिस्तु भोगसाम्यमाह जगद्व्यापारवर्जनस्य प्रति*पादनात्तस्य नानात्वं सर्वलोकसंचरणं च संभवति ॥

---

* तयोक्तं जगद् व्यापारवर्जं प्रकरणादसंनिहितत्वाच्चेति ।

Digitized by Google

ननु मुक्तस्याऽनावृत्तिप्रतिपादनादस्मिंल्लोके संचारः कथमिति न शङ्कनीयं कर्मकर्तृकस्यैव निषेधात् स्वेच्छया संचरणोपपत्तेः अतो मुक्तो भगवत्संकल्पायत्तस्वेच्छया सर्वत्र सञ्चरति नित्या नाम कदाचिदपि भगवदनभिमतविरुद्धाचरणाभावेन ज्ञानसंकोचप्रसंगरहिताः अनन्तगरुडविष्वक्सेनादयः ॥ तेषामधिकारविशेषः ईश्वरस्य नित्येच्छयैव अनादित्वेन व्यवस्थित· एतेषामवतारास्तु भगवदवतारवत्स्वेच्छया एवं बद्धमुक्तनित्यभेदभिन्नो जीवो निरूपितः ॥

इति श्रीयतीन्द्रमतदीपिकायां जीवनिरूपणं नामाष्टमोऽवतारः ॥ ८ ॥

॥ शेषमग्रे ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER X.

THE VAIŚESHIKA OR AULÚKYA DARŚANA.*

(Continued from page 316.)

Whoso wishes to escape the reality of pain, which is established by the consciousness of every soul through its being felt to be

* The Vaiśeshikas are called Aulúkyáh in Hemachandra's *Abhidhána-chintámani*; in the Váyu-puráṇa (quoted in Aufrecht's *Catal.* p. 53) Akshapáda, Kaṇáda, Ulúka and Vatsa are called the sons of Śiva.

॥ सर्वदर्शनसङ्ग्रहः ॥

इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया निखिलात्मसंवेदनसिद्धं दुःखं जिहासुस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति

essentially contrary to every rational being, and wishes therefore to know the means of such escape,—he learns that the knowledge of the Supreme Being is the true means thereof, from the authority of such passages as these (*Śwetāśwatara Upan.* vi. 20):

> "When men shall roll up the sky as a piece of leather,
> Then shall there be an end of pain without the knowledge of Śiva."
>
> Now the knowledge of the Supreme is to be gained by hearing, (*Śravaṇa*), thought (*manana*), and reflection (*bhāvanā*), as it has been said,
>
> By scripture, by inference, and by the force of repeated meditation,—
>
> By these three methods producing knowledge man gains the highest union (*yoga*).

Here thought depends on inference, and inference depends on the knowledge of the *vyāpti* (or universal proposition), and the knowledge of the *vyāpti* follows the right understanding of the

---

यदा चर्म्मवदाकाशं वेष्टयन्तीह मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥

इत्यादिवचननिचयप्रामाण्यात् । परमेश्वरसाक्षात्कारश्च श्रवण-मननभावनाभिर्भावनीयः । यदाह

आगमेनानुमानेन ध्यानाभ्यासबलेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति ॥

तत्र मननमनुमानाधीनं अनुमानञ्च व्याप्तिज्ञानाधीनं व्याप्तिज्ञा-नञ्च पदार्थविवेकसापेक्षम् । अतः पदार्थषट्कम् अथातो धर्म्मं व्याख्या-स्याम इत्यादिकायां दशलक्षण्यां कणभक्षेण भगवता व्याख्यापि तत्रा-ह्निकद्वयात्मके प्रथमे ऽध्याये समवेताशेषपदार्थकथनमकारि । तत्रापि प्रथमाह्निके जातिमन्निरूपणं, द्वितीयाह्निके जातिविशेषयोर्निरूपणम् । आह्निकद्वययुक्ते द्वितीये ऽध्याये द्रव्यनिरूपणं, तत्रापि प्रथमाह्निके भूतवि-

categories,—hence the saint Kanada* establishes the six categories in his tenfold treatise, commencing with the words "Now therefore we shall explain duty."

In the first book, consisting of two daily lessons, he describes all the categories which are capable of intimate relation,—in the first *āhnika* he defines those which possess 'class' (*jāti*), in the second class (or 'generality') itself and 'particularity.' In the similarly divided second book he discusses 'substance,' giving in the first *āhnika* the characteristics of the five elements, and in the second he establishes the existence of space and time. In the third book he defines the soul and the internal sense, the former in the first *āhnika*, the latter in the second. In the fourth book he discusses the body and its adjuncts; the latter in the first *āhnika*, and the former in the second. In the fifth book he investigates action,—in the first *āhnika* he considers action as connected with the body, in the second as belonging to the mind. In the sixth book he examines merit and demerit as revealed in Śruti; in the first *āhnika* he discusses the merit of giving, receiving gifts, &c., in the second the duties of the four periods of religious life. In the seventh book he discusses quality and intimate relation, in the first *āhnika* he considers the qualities independent of thought

* He is here called by his synonym Kanabhaksha.

शेषणलक्षणं, द्वितीये दिक्कालप्रतिपादनम् । आह्निकद्वययुक्ते तृतीये आत्मान्तःकरणलक्षणं, तत्राप्यात्मलक्षणं प्रथमे द्वितीये अन्तःकरणलक्षणम्, आह्निकद्वययुक्ते चतुर्थे शरीरतदुपयोगिविवेचनं, तत्रापि प्रथमे तदुपयोगिविवेचनं द्वितीये शरीरविवेचनम् । आह्निकद्वयवति पञ्चमे कर्म्मप्रतिपादनं, तत्रापि प्रथमे शरीरसम्बन्धिकर्म्मचिन्तनं, द्वितीये मानसकर्म्मचिन्तनम् । आह्निकद्वयशालिनि षष्ठे श्रौतधर्म्मनिरूपणं, तत्रापि प्रथमे दानप्रतिग्रहधर्म्मविवेकः, द्वितीये चातुराश्रम्योचितधर्म्मनिरूपणम् । तथाविधे सप्तमे गुणसमवायप्रतिपादनं, तत्रापि प्रथमे बुद्धिनिरपेक्षगुणप्रतिपादनं द्वितीये तत्सापेक्षगुणप्रतिपादनं समवायप्रतिपादनञ्च । अष्टमे निर्विक-

in the second those qualities which are related to it, and also intimate relation. In the eighth book he examines 'indeterminate' and 'determinate' perception, and means of proof. In the ninth book he discusses the characteristics of intellect. In the tenth book he establishes the different kinds of inference.

The method of this system is said to be threefold, 'enunciation,' 'definition,' and 'investigation.'* "But," it may be objected, "ought we not to include 'division' and so make the method fourfold, not threefold?" We demur to this, because 'division' is really included in a particular kind of enunciation. Thus when we declare that substance, quality, action, generality, particularity, and intimate relation are the six positive categories,—this is an example of enunciation. If you ask 'what is the cause for this definite order of the categories?' we answer as follows. Since 'substance' is the chief, as being the substratum of all the categories, we enounce this first; next 'quality,' since it resides in its generic character in all substances (though different substances have different qualities;) then 'action,' as it agrees with 'substance' and 'quality' in possessing 'generality;' † then 'generality,' as residing in these three; then 'particularity' inasmuch as it possesses

* For this extract from the old *bhāshya* of Vátsyáana, see Colebrooke's *Essays* (new ed.) vol. i. p. 285.

† Cf. *Bhāshā-parichchheda*, śl. 14.

ल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम् । नवमे बुद्धिविशेषप्रतिपादनम् । दशमे अनुमानभेदप्रतिपादनम् । तत्र उद्देशो लक्षणं परीक्षा चेति त्रिविधास्य शास्त्रस्य प्रवृत्तिः । ननु विभागापेक्षया चातुर्विध्ये वक्तव्ये कथं त्रैविध्यमुक्तमिति चेन्मैवं मंस्थाः । विभागस्य विशेषोद्देशएवान्तर्भावात् । तत्र द्रव्यगुणकर्म्मसामान्यविशेषसमवाया भावा इति षडेव ते पदार्था इत्युद्देशः । किमत्र क्रमनियमे कारणम् । उच्यते । समस्तपदार्थायतनत्वेन प्रधानस्य द्रव्यस्य प्रथममुद्देशः, अनन्तरं गुणत्वोपाधिना सकलद्रव्यवृत्तेर्गुणस्य, तदनु सामान्यवत्त्वसाम्यात् कर्म्मणः, पश्चात्त्रितयाश्रितस्य सामान्यस्य, तदनन्तरं समवायाधिकरणस्य विशेषस्य, अन्ते अवशिष्टस्य समवायस्येति

'intimate relation,'* lastly 'intimate relation' itself; such is the principle of arrangement.

If you ask, "Why do you say that there are only six categories since 'non-existence' is also one?"— We answer: Because we wish to speak of the six as positive categories, *i. e.* as being the objects of conceptions which do not involve a negative idea. "Still," the objector may retort, "how do you establish this definite number 'only six,' for either horn of the alternative fails; thus, for instance, is the thing to be thus excluded already thoroughly ascertained or not;—if it is thoroughly ascertained how can you exclude it? and why mention it at all, if it is not thoroughly ascertained what sensible man, pray, spends his strength in denying that a mouse has horns! Thus your definite number 'only six' fails as being unproved." This however we cannot admit; if darkness, &c., are allowed to form certainly a seventh category (as 'non-existence,') we thus (by our definite number) deny it to be one of the six *positive* categories,—and if others attempt to include 'capacity,' 'number,' &c., which we allow to be certainly positive existences, we thus deny that they make a *seventh* category. But enough of this long discussion.

Substantiality, &c., *(dravyatwádi)*—i. e. the classes of substance, quality and action,—are the definition of the triad substance, quality and action respectively.—The class of substance *(dravyatwa)* is that which, while it alike exists with intimate rela-

* 'Particularity' *(viśesha)* resides by 'intimate relation' in the eternal atoms, &c.

क्रमनियमः । ननु षडेव पदार्था इति कथं कथ्यते, अभावस्यापि सद्भावादिति चेन्मैवं वोचः । नञर्थानुल्लिखितधीविषयतया भावरूपतया षडेवेति विवक्षितत्वात् । तथापि कथं षडेवेति नियम उपपद्यते, विकल्पानुपपत्तेः । तथाहि । नियमव्यवच्छेद्यं प्रमितं न वा । प्रमितत्वे कथं निषेधः, अप्रमितत्वे कथन्तरां । नहि कश्चित् प्रेक्षावान् मूषिकविषाणं प्रतिषेद्धुं यतते, ततश्चानुपपत्तेर्नो नियम इति चेन्मैवं भाषिष्ठाः । सप्तमतया प्रमिते अन्धकारादौ भावत्वस्य भावतया प्रमिते शक्तिसङ्ख्यादौ सप्तमत्वस्य च निषेधादिति कृतं विस्तरेण ।

tion in the (eternal) sky and the (transitory) lotus, is itself eternal* and does not exist with intimate relation in smell.†

The class of quality *(guṇatwa)* is that which is immediately subordinate to the class existence, and exists with intimate relation in whatever is not an intimate mediate cause. ‡—The class of action *(karmatwa)* is that which is immediately subordinate to the class of existence, and is not found with intimate relation in anything eternal. §—Generality (or class, *sámánya*) is that which is found in many things with intimate relation, and can never be the counter-entity to emergent non-existence. || Particularity ¶

* This clause is added, as otherwise the definition would apply to 'duality' and 'conjunction.'

† This is added, as otherwise the definition would apply to 'existence' *(sattā)* which is the summum genus, to which substance, quality and action are immediately subordinate.

‡ Existence *(sattā)* is the genus of *dravya*, *guṇa*, and *kriyā*. *Dravya* alone can be the intimate cause of anything; and all actions are the mediate (or non-intimate) cause of conjunction and disjunction. *Some* qualities (as *samyoga*, *rūpa*, &c.,) may be mediate causes, but this is accidental and does not belong to the essence of *guṇa*, as many gunas can never be mediate causes.

§ As all karmas are transitory, *karmatwa* is only found in the *anitya*. I correct in p. 105, l. 20 *nityāsamavetatwa*; this is the reading of the MS. in the Calcutta Sanskrit College Library.

|| *i. e.* it can never be destroyed. Indestructibility, however, is found in time space, &c.; to exclude these, therefore, the former clause of the definition is added.

¶ 'Particularity' (whence the name Vaiseshika) is not, as it has been sometimes rendered, "individuality, as of this particular flash of lightning,"—but it is the individuality either of those eternal substances which, being single, have no class, as ether, time, space, &c., soul; or of the different atomic minds; or of the atoms of the four remaining substances, earth, water, fire and air,—these atoms being supposed to be the *ne plus ultra*, and, as they have no parts, they are what they are by their own indivisible nature. Ballantyne translated *viśesha* as 'ultimate difference.'

तत्र द्रव्यादित्रितयस्य द्रव्यत्वादिर्जातिर्लक्षणम् । द्रव्यत्वं नाम गगनारविन्दसमवेतत्वे सति नित्यगन्धासमवेतम् । गुणत्वं नाम समवायिकारणासमवायिकारणभिन्नसमवेतसत्तासाक्षाद्व्याप्यजातिः । कर्म्मत्वं नाम नित्यसमवेतत्वरहितसत्तासाक्षाद्व्याप्यजातिः । सामान्यन्तु प्रध्वंसप्रतियोगित्वरहितमनेकसमवेतम् । विशेषो नामान्योन्याभावविरोधिसामान्यरहितः समवेतः । समवायस्तु समवायरहितः सम्बन्ध इति षण्णां लक्षणानि व्यवस्थितानि ।

(viśesha) exists with intimate relation, but it is destitute of generality which stops mutual non-existence.*—Intimate relation (*samavâya*) is that connection which itself has not intimate relation.† Such are the definitions of the six categories.

Substance is ninefold,—earth, water, fire, air, ether, time, space, soul, and mind. The classes of earth, &c., *(prithivítwa)* are the definitions of the first four. The class of earth is that which is immediately subordinate to substance, and resides in the same subject with form produced by baking. ‡

The class of water is that generality which is found with intimate relation in water, being also found in intimate relation in river and sea. The class of fire is that generality which is found with intimate relation in fire, being also found with intimate relation in the moon and gold. The class of air is that which is immediately subordinate to substance and is found with intimate relation in the organ of the skin. §

* Mutual non-existence *(anyonyábháva)* exists between two notions which have no property in common as a "pot is not cloth," but the class is the same in two pots, both alike being pots.

† "*Samavāya-sambandābhāvāt samavāyo na jātih,*" Siddh. Mukt. (*Samyoga* being a *guna* has *gunatwa* existing in it with intimate relation.)

‡ *Rūpa* seems to mean here *sparśa.* The feel or touch of earth is said to be "neither hot nor cold, and changed by union with fire," (Bhāshāparichcheda § 103.)

§ The organ of touch is an aërial integument (Colebrooke).

द्रव्यं नवविधं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसीति । तत्र पृथिव्यादिचतुष्टयस्य पृथिवीत्वादिजातिर्लक्षणम् । पृथिवीत्वं नाम पाकजरूपसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिः । अप्त्वं नाम सरित्सागरसमवेतत्वे सति सलिलसमवेतं सामान्यम् । तेजस्त्वं नाम चन्द्रचामीकरसमवेतत्वे सति ज्वलनसमवेतं सामान्यम् । वायुत्वं नाम त्वगिन्द्रियसमवेतद्रव्यत्वसाक्षाद्व्याप्यजातिः । आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति आकाशः कालो दिगिति । संयोगाजन्यजन्यविशेषगुणसमानाधिकरणविशेषाधिकरणमाकाशम् । विभुत्वे सति दिगसमवेतपरत्वासमवायिकारणाधिकरणः कालः । अकालत्वे सत्यविशेष-

As ether, space, and time, from their being single, cannot be subordinate classes, their several names stand respectively for their technical appellations. Ether is the abode of particularity, and is found in the same subject with the non-eternal special quality which is not produced by contact.*

Time is that, which being a pervading substance, is the abode of the mediate cause † of that idea of remoteness *(paratwa)* which is not found with intimate relation in *space*; ‡ while space is that pervading substance which possesses no special qualities and yet is not time.§ The classes *ātmatwa* and *manastwa* are the respective definitions of soul *(ātman)*, and mind *(manas)*. The class of soul is that which is subordinate to substance, being also found with intimate relation in that which is without form || *(amūrta)*. The class of mind is that which is subordinate to substance, being also found existing with intimate relation in an

* Sound is twofold—'produced from contact,' as the *first* sound and 'produced from sound' as the *second*. *Janya* is added to exclude God's knowledge, while *Sanyogājanya* excludes the soul, which is produced by contact, as of the soul and mind, mind and the senses, &c.

† The mediate cause itself is the conjunction of time with some body, &c., existing in time,—this latter is the intimate cause, while the revolutions of the sun are the instrumental cause.

‡ Paratwa being of two kinds, *daiśika* and *kālika*.

§ Time, space and mind have no special qualities ; the last, however, is not pervading but atomic.

|| The three other padárthas which are amúrta,—time, ether and space,—are not classes.

गुणासहवृत्ती दिक्। आत्ममनसोरात्मत्वमनस्त्वे। आत्मत्वं नाम अमूर्त्तसमवेत-
द्रव्यत्वापरजातिः। मनस्त्वं नाम द्रव्यसमवायिकारणत्वरहिताणुसमवेत-
द्रव्यत्वापरजातिः। रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपर-
त्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च कण्ठोक्ताः सप्तदश चशब्दसमु-
च्चिताः गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः।
तत्र रूपादिशब्दान्तानां रूपत्वादिजातिर्लक्षणम्। रूपत्वं नाम नीलसम-
वेतगुणत्वापरजातिः। अनया दिशा शिष्टानां लक्षणानि द्रष्टव्यानि। कर्म्म
पञ्चविधम्, उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात्। भ्रमणरेचना-

atom, but (unlike other atoms) not the intimate cause of any substance. There are twenty-four qualities, seventeen mentioned directly in Kaṇāda's Sūtras, (i. 1. 6), "form, taste, smell, touch, number, quantity, severalty, conjunction, disjunction, remoteness, proximity, intelligence, pleasure, pain, desire, aversion, and effort," and, besides these, seven others are understood in the word "*and*," viz. gravity, fluidity, viscidity, faculty, merit, demerit and sound. Their respective genera, (*rūpatwa*, &c.) are their several definitions. The class of 'form' is that which is subordinate to quality and exists with intimate relation in blue. In the same way may be formed the definitions of the rest.

'Action' is fivefold, according to the distinction of throwing upwards, throwing downwards, contracting, expanding and going: wandering, evacuating, &c. being included under 'going.' The class of throwing upwards, &c. will be their respective definitions. The class of throwing upwards is the subordinate class to action, it exists with intimate relation and is to be established as the mediate cause of conjunction with a higher place. In the same manner are to be made the definitions of throwing downwards, &c. Generality (or class) is twofold, extensive and non-extensive; existence is extensive as found with intimate connection in substance and quality, or in quality and action; substance, &c. are non-extensive. The definition of generality has been given before. Particularity and intimate relation cannot

---

दीनां गमनएवान्तर्भावः । उत्क्षेपणादीनामुत्क्षेपणत्वादिजातिर्लक्षणम् । तत्र उत्क्षेपणं नाम ऊर्द्ध्वदेशसंयोगासमवायिकारणप्रमेयसमवेतकर्म्मत्वापरजातिः । एवमवक्षेपणादीनां लक्षणं कर्त्तव्यम् । सामान्यं द्विविधं परमपरञ्च । परं सत्ता वा अपरं द्रव्यत्वादि तल्लक्षणं प्रागेवोक्तम् । विशेषाणामनन्तत्वात् समवायस्य चैकत्वाद्विभागो न सम्भवति तल्लक्षणञ्च प्रागेवावादि ।

> द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे ।
> यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुरिति ॥

be divided, — in the former case in consequence of the infinite number of separate particularities, in the latter from intimate relation being but one; — their definitions have been given before.

There is a popular proverb:

"Duality, change produced by baking, and disjunction produced by disjunction, whose mind vacillates not in these three, *he* is a true Vaiśesheka;" and therefore we will now show the manner of the production of duality, &c.

There is here first the contact of the organ of sense with the object; thence there is the knowledge of the genus unity; then the distinguishing perception *apekshābuddhi* (by which we apprehend 'this is one,' 'this is one,' &c.), then the production of duality *dwitwa* (in the object *), then the knowledge of the abstract genus of duality (*dwitwatwa*), then the knowledge of the quality duality as it exists in the two things, then imagination † (*saṇskāra*). ‡

E. B. C.

* All numbers, from duality upwards, are artificial *i. e.* they are made by our minds; unity alone exists in things themselves—each being *one* and they only become two, &c. by our choosing to regard them so, and thus joining them in thought.

† Saṇskāra is here the idea conceived by the mind—created in fact by its own energies out of the material previously supplied to it by the senses and the internal organ or mind.

‡ Here and elsewhere I omit the metrical summary of the original, as it adds nothing new to the previous prose.

आभाणकस्य सद्भावात् द्वित्वाद्युत्पत्तिप्रकारः प्रदर्श्यते । तत्र प्रथममिन्द्रियार्थसन्निकर्षस्तस्मादेकत्वसामान्यज्ञानं ततो ऽपेक्षाबुद्धिः ततो द्वित्वोत्पत्तिस्ततो द्वित्वसामान्यज्ञानं तस्माद्द्वित्वगुणज्ञानं ततः संस्कारः । तदाह

आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधी-
रेकत्वोभयगोचरा मतिरतो द्वित्वं ततो जायते ।
द्वित्वत्वप्रमितिस्ततो ऽनु परतो द्वित्वप्रमानन्तरं
द्वे द्रव्ये इति धीरियं निगदिता द्वित्वोदयप्रक्रियेति ॥

To

THE EDITOR OF THE 'PANDIT.'

SIR,

Towards the conclusion of his paper on the relations of the priests and the other classes of Indian society printed in your valuable journal (vide vol. II. No. 14 page 45, old series) Dr. John Muir throws out certain remarks regarding the Vedic divinity Rudra which seem open to grave objection. The Doctor asks, though with apparent diffidence — "Is it possible to look upon Rudra as having been originally a demon worshipped by the aborigines, as the lord of the evil spirits and subsequently introduced into the Aryan worship"—on the ground that the death of man and cattle is ascribed to this deity. The real fact is that he is the immortal and undecaying lord of life and death as well as immortality: and, as such, frequently prayed to for the longevity of man, children and cattle. He is the dispenser of healing medicines, the best of physicians and the father of the world. His wrath is dreaded as the avenger of the wicked, and his help is solicited in repelling the assaults of sin. All these representations however are very summarily explained away by supposing them due to flattery. But I would only ask the learned Doctor to what power he would, in reality, attribute disease and death, if an attribution of the same to a deity would turn him to a demon. Would he, like John Stuart Mill look upon the God of nature himself in a similar light? — not to mention the God of Christianity who, for weightier reasons, is regarded by that thinker as an embodiment of wickedness *ne plus ultra.* (Autobiography, p. 41.) The impartial and unprejudiced critic would never forget that it is to the God of nature that the Aryan offered his prayers, whether contemplated as Indra presiding over the vast expanse of the heavens, or as Savitri present in the sun, or as Rudra ruling the storms, or as Agni blazing in the fire. To set aside this natural mode of interpretation, and to resort to wild and invidious conjectures, in studying the characters of the Indian deities, bespeaks, by no means a spirit of fair criticism.

Digitized by Google

I shall quote only a few texts here from the Ṛik, Yajush, and Atharva Vedas, which will suffice to illustrate the character of this deity:—(R. V. ii. 33.)

(2). "By the most auspicious remedies conferred by thee, may I, O Rudra, attain a hundred winters. Drive away far from us enmity and sin and divers diseases.

(6). May the Showerer attended by the Maruts exhilarate me his suppliant with vigorous nourishment. May I, freed from sin, obtain the grace of Rudra as one oppressed with heat (obtains) shade; so I serve Rudra.

(7). Where Rudra is that protecting hand of thine which is healing and beneficent? O Showerer (of graces), repelling the evil which comes from the gods, do thou forgive me.

(10). Adorable one, thou dost hold the arrows and the bow; Adorable one, thou dost wear the glorious garland omniform; Adorable one, thou dost pity all this vast (universe); None Rudra, there is mightier than thou,"

(10). "Magnify with these songs the father of the world, Rudra by day, Rudra by night. Let us, impelled by the poet, specially invoke (Him) the mighty, the exalted, the undecaying, the blessed." (R. V. vi. 49.)

(60). We worship Tryambaka (Rudra), the illustrious, the increaser of nourishment. May I, like a cucumber (severed) from its stem, be freed from death not from immortality." Yajurveda. Vāj. S. 3.

"Bhava rules the heaven, Bhava rules the earth, Bhava hath filled the vast ether. Adoration be to him from hence, in whatsoever quarter (he may be)." Atharva V. xi 2. 27.

"Adoration be to that Rudra—Agni, to Rudra who is in fire, who is in the waters, who has entered into the plants and bushes, who has created all these worlds." A. V. vii. 87. 1.

"Let Bhava and Śarva hurl the lighthing, the bolt of the gods, against the sinful (man), against the sorcerer, against the evil-doer." A. V. x. i. 23.

But what is most surprising, critically as well as morally speaking, is that the learned Doctor could be so far led away by

Digitized by Google

a spirit of religious intolerance as to insinuate that the verse quoted by him from the Atharva Veda viz., स एव मृत्युः सो ऽमृतं सो ऽभ्वं स रक्षः ("He is death, he is immortality, he is vastness, he is *rakshas*") gives colour to his conjecture about the origin of Rudra's worship. Supposing even that the verse refers to Rudra, the attributes of immortality, and vastness (or infinity), would naturally lead an unbiassed critic to interpret the term रक्षः not in its ordinary, but in a figurative sense here. *But the verse does not refer to Rudra.** It belongs to one of the grandest of the Atharva Veda hymns, and the pronoun सः stands unmistakably for the One God who is the subject. The hymn begins thus :—

"He comes—the Sun—to the firmament, he shines forth in the middle of the heavens. He—the mighty Indra, surrounded by his rays, comes to the sky filled (with his refulgence) He is the Maker, He is the Sustainer, He is the Wind, He is the lofty Ether He is Aryaman, He is Varuna, He is Rudra, He is the Great God (Mahadeva). He is Fire, He is the Sun and the mighty Yama is He. Him do the ten calves (दिशः?—the eight points of the compass and the regions above and below) who have one head, attend united. He is one, sole-existing, He is one only. In him are all these deities unified.

"Prayer and penance, fame and renown, water (अम्भः) and ether (नभः), priestly energy, food and power to eat, the past and the future, faith and lustre, heaven and *swadhā* (belong to him) who knows this Deity as one. *He is death, He is immortality, He is vastness, He is rakshas* (the destructive principle ?). He is Rudra, the giver of wealth (वसुवनि), in the sacrifice for the attainment of wealth, and contemplated as the *vashatkāra* in the reverential invocation (नमोवाके.) All these demons wait upon his command. All those stars, with the moon, are at his control."

Dr. Muir seems to have entirely misunderstood the scope of this remarkable hymn, so clearly and forcibly illustrating the Aryan conception of the unity of the Being who variously mani-

* In one sense, indeed, it may be said to refer to Rudra as well as to all the other deities, considered as one and the same God.

Digitized by Google

fests himself in the great powers of nature.* For instance, again the Doctor renders सो ऽर्यमा स वरुणः स रुद्रः स महादेवः...स रुद्रो वसुवनिर्वसुदेये-नमोवाके वषट्कारो ऽनुसंहितः thus—"He (Savitri) is Aryaman, &c. He (Rudra) the giver of wealth is placed as the *vashaṭkāra* in the reverential invocation," &c. (Sans. T. iv. p. 281.) In these verses, he supposes Savitri and Rudra to be the subjects, whilst nothing can be clearer than that the name Rudra is a member of the predicate, and so is Savitri too, very probably, the pronoun स he (being the only continued subject throughout a long series of verses referring to the One God who is addressed as Maghavan in v. 44 and Indra in v. 46.) Thus mutilating the hymn and confounding subject and predicate, the Doctor asserts '—While in the Atharva Veda, all the *yatus* are said to obey his (Rudra's) commands,' as if this circumstance, even if conceded would deteriorate the character of this deity, any more than the fact, as it is, deteriorates that of the One God. Such a procedure resembles that of the man who said 'The Bible declares that there is no God,' suppressing the preceding clause, 'The fool hath said in his heart;' and affords a striking illustration of the poet's saying दोषोह्यविद्यमानो ऽपि तद्दुष्टो-नां प्रकाशते ।

As god of winds, Rudra's connection with the air breathed by animals is not unintelligible.† Hence, it seems, he is called Paśupati, or lord of animals, regarded as subject to death, in con-

* Professor Monier Williams seems to have overlooked this hymn, for in his recent work Indian Wisdom, so remarkable for its liberal and candid spirit of criticism, and generally characterised by a clear, able and faithful representation of things, the professor remarks—'And even in these (the hymns containing a conception of divine unity) the idea of one God present in all nature is somewhat nebulous and undefined. In a foot-note, he adds—'Though vaguely stated in the Veda, it was clearly defined in the time of Manu.' The present hymn is by no means less explicit than Manu.

† In the Brihadáranyaka Upanishad (p. 645 Roer's edition) the character of the Rudras is thus set forth :—

"Who are the Rudras? These ten vitalities *(práṇa)* in man, and the soul, the eleventh. When they depart from this mortal body, they make people weep. Inasmuch as they cause weeping *(rodayanti)*, they are Rudras."

The vitalities are explained by Śankara to mean the five organs of sense and the five organs of action and the soul, *(Atman)* according to him, is here the mind. I have not found the above text quoted by Dr. Muir in his Sanskrit Texts, though it seems to throw some light on the character of this deity.

Digitized by Google

tradistinction from Prajápati, the lord of animals regarded as born As *paśu* means an animal to be immolated at a sacrifice, it is probable that in the compound *Paśupati* it signifies animal in general, as liable to be killed by death. For instance, in this verse of the Atharva Veda :

भव राजन् यजमानाय मृड पशूनां हि पशुपतिर्बभूथ ।
यः श्रद्दधाति सन्ति देवा इति चतुष्पदे द्विपदे ऽस्य मृड ॥

The epithet of *Pasupati* if construed here to mean 'the lord of beasts' would be irrelevant in a prayer for the protection of the worshipper and his bipeds as well as quadrupeds.

In conclusion, I would remark by the way, that when the Doctor says: (see the same article, p. 47.) 'The wonderful powers of the *Brahma-chārin,* or student of sacred science, are described in a hymn' (A. V. xi. 5.), he does not seem to represent the real fact in a very fair light. For the truth is not that a Brahma-chārin, in the literal sense of the term, is described in the hymn, but that the deity himself is figured under that character, as in other hymns (xi. 7. and xiii. 1.), he is represented under the appellations of Uchhishta (the Remaining or Super-abiding) and Rohita (the High or Exalted). *

PRAMADĀDĀSA MITTRA.

* Instances might be multiplied from Dr. Muir's otherwise most valuable work the Sanskrit Texts, of a distorted view taken even of plain things. I may cite here one :

जेतारं लोकपालानां क्षेप्तारं शङ्करस्य च। (Rāmāyana, vi. 113 Calc, ed.)

"The conquerer of the Guardians of the world, and contemner of Śankara."

This is one of the verses in which Mandodarī laments her husband Rāvana killed by Rāma. The Doctor remarks : "Śankara could not therefore have been looked on by the writer of this as the Supreme deity. From the story of Nandiswara quoted above, it will have been seen, however, that Rāvana was really no match for Śankara." (Sans. Texts iv. Appendix, p. 421.) We ask—did not the writer of the sentence 'Wherefore do the wicked contemn God' Ps. x. regard 'God' as the Supreme Deity? And did not Milton represent Satan as contemning the Almighty? Mandodari, it is to be remembered, was the wife of the great Rākshasa, and could well, in her fondness contrast his fate, at last, at the hands of a seeming mortal with that undaunted spirit and stupendous might by which he had not only conquered the guardian deities but contested, though of course with ill success, even with Him who is above them. What the Doctor supposes is therefore not only not true but the reverse of truth.

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 7. DECEMBER 1ST 1876. VOL. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1876.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

षष्ठाध्यायस्य द्वितीयः पादः ।

बहुव्रीहौ प्रकृत्या पूर्वपदम् ॥ १ ॥

पूर्वपदग्रहणमत्र पूर्वपदस्थे स्वरे उदात्ते स्वरिते वा वर्त्तते । बहुव्रीहौ समासे पूर्वपदस्य यः स्वरः स प्रकृत्या भवति, स्वभावेनावतिष्ठते, न विकारमनुदात्तत्वमापद्यते । समासान्तोदात्तत्वे हि सति अनुदात्तं पदमेकवर्जमिति सो ऽनुदात्तः स्यादिति समासान्तोदात्तत्वापवादोयमारभ्यते। कार्ष्णोत्तरासङ्गः । कृष्णो मृगस्तस्य विकारः कार्ष्णः । प्राणिरजतादिभ्योञित्यञ्प्रत्ययान्तो ञित्स्वरेणाद्युदात्तः । यूपवलजः । यूपशब्द उणादिषु कुसुयुभ्यश्चेति पप्रत्ययान्तः । तत्र च दीर्घ इति निदिति च वर्त्तते तेनाद्युदात्तः । ब्रह्मचारिपरिस्कन्दः । ब्रह्मचारिशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । स्नातकपुत्रः । स्नातशब्दः कन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। अध्यापकपुत्रः। लित्स्वरेणाध्यापकशब्दो मध्योदात्तः। श्रोत्रियपुत्रः । श्रोत्रियशब्दो नित्वादाद्युदात्तः । मनुष्यनाथः । मनुष्यशब्दस्तित्स्वरितमिति स्वरितान्तः । उदात्तग्रहणं स्वरितग्रहणं चात्रानुवर्त्तते तेन सर्वानुदात्ते पूर्वपदे विधिरेव नास्तीति समासान्तोदात्तत्वं भवति । समभाग इति समशब्दो हि सर्वानुदात्तः ॥

तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ॥ २ ॥

तत्पुरुषे समासे तुल्यार्थं तृतीयान्तं सप्तम्यन्तमुपमानवाचि अव्ययं द्वितीयान्तं कृत्यान्तं च यत्पूर्वपदं तत्प्रकृतिस्वरं भवति । तुल्यार्थं । तुल्यश्वेतः । तुल्यलोहितः । तुल्यमहान् । सदृक्श्वेतः । सदृग्लोहितः । सदृग्महान् । सदृशश्वेतः । सदृशलोहितः । सदृशमहान् । एते कृत्यतुल्याख्या अजात्येति कर्मधारयाः । तत्र तुल्यशब्दो यतो ऽनाव इत्या-

ऽनुदात्तः । सदृक्शब्दः समानान्ययोश्चेति क्विन्प्रत्ययान्तः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । सदृशशब्दोपि कञन्तो मध्योदात्तः । तुल्यार्थ । तृतीया । शङ्कुलया खण्डः, शङ्कुलाखण्डः । किरिणा काणः, किरिकाणः । शङ्कुपूर्वाल्लातेर्घञर्थे कविधानमिति वा कप्रत्ययान्तः शङ्कुलाशब्दोन्तोदात्तः । किरिशब्दोपि किरतेः कॄगॄशॄपॄकुटिभिदिच्छिदिभ्यश्चेतीकारप्रत्ययः किदौणादिकस्तेनासावन्तोदात्तः । तृतीया । सप्तमी । अक्षेषु शौण्डो, ऽक्षशौण्डः । पानशौण्डः । अशेर्देवनइति सप्रत्ययान्तोक्षशब्दोन्तोदात्तः । पानशब्दो ल्युडन्तो लित्स्वरेणाद्युदात्तः । सप्तमी । उपमान । शस्त्रीश्यामा । कुमुदश्येनी । हंसगद्गदा । न्यग्रोधपरिमण्डला । दूर्वाकाण्डश्यामा । शरकाण्डगौरी । उपमानानि सामान्यवचनैरिति समासः । शस्त्रीशब्दो ङीष्प्रत्ययान्तोन्तोदात्तः । कुमुदशब्दोपि कौ मोदतइति मूलविभुजादित्वात्कप्रत्ययान्तो नब्विषयस्यानिसन्तस्येति वा ऽऽद्युदात्तः । हंसशब्दो वृतॄवदिहनिकमिकषिभ्यः स इति सप्रत्ययान्तः । न्यग्रोहतीति न्यग्रोधः । पचादित्वादच्प्रत्ययान्तस्तस्य 'न्यग्रोधस्य च केवलस्ये'ति निपातनाद् हकारस्य धकारो मध्योदात्तत्वं च । दूर्वाकाण्डशरकाण्डशब्दौ षष्ठीतत्पुरुषावुत्तरपदाद्युदात्तौ । उपमान । अव्यय । अब्राह्मणः । अवृषलः । कुब्राह्मणः । कुवृषलः । निष्कौशाम्बिः । निर्वाराणसिः । अतिखट्वः । अतिमालः । एतान्यव्ययान्याद्युदात्तानि ॥ अव्यये नञ्कुनिपातानामिति वक्तव्यम् ॥ * ॥ इह मा भूत् । स्नात्वाकालक इति । अव्यय । द्वितीया । मुहूर्तसुखम् । मुहूर्तरमणीयम् । सर्वरात्रकल्याणी । सर्वरात्रशोभना । अत्यन्तसंयोगे चेति द्वितीयासमासः । मुहूर्तशब्दः पृषोदरादिरन्तोदात्तः । सर्वरात्रशब्दो ऽच्प्रत्ययान्तः । द्वितीया । कृत्य । भोज्योष्णम् । भोज्यलवणम् । पानीयशीतम् । हरणीयचूर्णम् । भोज्यशब्दो ण्यदन्तोन्तस्वरितः । पानीयहरणीयशब्दयोरुपोत्तमं रितीति ईकार उदात्तः ॥

वर्णो वर्णेष्वनेते ॥ ३ ॥

प्रकृत्या पूर्वपदं, तत्पुरुषइति च वर्तते । वर्णे वर्णवाचि पूर्वपदं वर्णवाचिष्वेवोत्तरपदेषु एतशब्दवर्जितेषु परतस्तत्पुरुषे समासे प्रकृतिस्वरं

भवति । कृष्णसारङ्गो, लोहितसारङ्गः । कृष्णकल्माषो, लोहितकल्माषः । कृषेर्वर्णे इति कृष्णशब्दो नक्प्रत्ययान्तोऽन्तोदात्तः । लोहितशब्दोऽपि रुहेरश्च लो वेतीतन्प्रत्ययान्त आद्युदात्तः । वर्णे इति किम् । परमकृष्णाः । वर्णेष्विति किम् । कृष्णतिलाः । अनेतइति किम् । कृष्णैतः । लोहितैतः ॥

गाधलवणयोः प्रमाणे ॥ ४ ॥

प्रमाणवाचिनि तत्पुरुषे समासे गाध लवण इत्येतयोरुत्तरपदयोः पूर्वपदं प्रकृतिस्वरं भवति । शम्बगाधमुदकम् । अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः । गोलवणम् । अश्वलवणम् । यावद्गवे दीयते तावदित्यर्थः । षष्ठीसमासा एते । तत्र शमेर्बन्विति बन्प्रत्ययान्तत्वाच्छम्बशब्द आद्युदात्तः । अरित्रशब्दो ऽर्त्तिलूधूसू इतीत्रप्रत्ययान्तो मध्योदात्तः । गोशब्दो डोप्रत्ययान्तो ऽन्तोदात्तः । अश्वशब्दो ऽशूप्रुषीति क्वन्प्रत्ययान्त आद्युदात्तः । प्रमाणमियत्तापरिच्छेदमात्रमिह द्रष्टव्यं, न पुनरायाम एव । स्वरव्यङ्ग्यं च प्रमाणविशेषविषयत्वमेतेषाम् । प्रमाणइति किम् । परमगाधम् । परमलवणम् ॥

दायाद्यं दायादे ॥ ५ ॥

तत्पुरुषे समासे दायादशब्दउत्तरपदे दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं भवति । विद्यादायादः । धनदायादः । संज्ञायां समजनिषदेति विद्याशब्दः क्यप्प्रत्ययान्तः । उदात्त इति च तत्र वर्त्तते, तेनायमन्तोदात्तः । कृपृवृजिमन्दिनिधाञ्भ्यः क्युरिति बहुलवचनात् केवलादपि धाञः क्युप्रत्ययस्तेन धनशब्दः प्रत्ययस्वरेणाद्युदात्तः । अथ विद्यादायाद इति केन षष्ठी, स्वामीश्वराधिपतिदायादेति । यद्येवं प्रतिपदविधाना च षष्ठी न समस्यतइति समासप्रतिषेधः प्राप्नोति । एवं तर्हि शेषलक्षणैवात्र षष्ठी तस्यास्तु सप्तमी विधीयमाना बाधिका मा विज्ञायीति पुनरभ्यनुज्ञायते । दायाद्यमिति किम् । परमदायादः । अत्र समासान्तोदात्तत्वमेव भवति ॥

Digitized by Google

प्रतिबन्धि चिरकृच्छ्रयोः ॥ ६ ॥

तत्पुरुषे समासे चिरकृच्छ्रयोरुत्तरपदयोः प्रतिबन्धिवाचि पूर्वपदं प्रकृतिस्वरं भवति । गमनचिरम् । गमनकृच्छ्रम् । व्याहरणचिरम् । व्याहरणकृच्छ्रम् । गमनव्याहरणशब्दौ ल्युडन्तौ तयोर्लित्स्वरः । गमनं च यच्चिरं चेति विशेषणसमासोयं मयूरव्यंसकादिर्वा द्रष्टव्यः । गमनं हि कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते । प्रतिबन्धीति किम् । मूत्रकृच्छ्रम् ॥

पदे ऽपदेशे ॥ ७ ॥

अपदेशो व्याजस्तद्वाचिनि तत्पुरुषे समासे पदशब्दउत्तरपदे पूर्वपदं प्रकृतिस्वरं भवति । मूत्रपदेन प्रस्थितः । उच्चारपदेन प्रस्थितः । मूत्रशब्दः सिविमुच्योष्टेरूच्चेति ष्ट्रन्प्रत्ययान्तो मूत्रयतेर्वा घञन्त आद्युदात्तः । उच्चारशब्दोपि घञन्तस्थाथघञ्क्ताजबित्रकाणामित्यन्तोदात्तः । विशेषणसमासोयं मयूरव्यंसकादिर्वा । अपदेशइति किम् । विष्णोः पदं, विष्णुपदम् ॥

निवाते वातत्राणे ॥ ८ ॥

निवातशब्दउत्तरपदे वातत्राणवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । कुट्येव निवातं, कुटीनिवातम् । शमीनिवातम् । कुड्यनिवातम् । वातस्याभावो निवात,मर्थाभाव इत्यव्ययीभावः । निरुद्धो वातोस्मिन्निति वा निवातमिति बहुव्रीहिः । तत्र कुड्यादिहेतुके निवाते कुड्यादयो वर्तमानाः समानाधिकरणेन निवातशब्देन सह समस्यन्ते । कुटीशमीशब्दौ गौरादिङीषन्तावन्तोदात्तौ । कुड्यशब्दोपि कवतेर्यत् हुक्चेति यत्प्रत्ययान्त आद्युदात्त इत्येके । क्यक् प्रत्ययान्तोन्तोदात्त इत्यपरे । वातत्राणइति किम् । राजनिवाते वसति । सुखं मातृनिवातम् । निवातशब्दोयं पार्श्ववाची रूढिशब्दस्तत्रोभयत्र षष्ठीसमासः ॥

शारदे ऽनार्तवे ॥ ९ ॥

ऋतौ भवमार्तवम् । अनार्तववाचिनि शारदशब्दउत्तरपदे तत्पुरुषे

समासे पूर्वपदं प्रकृतिस्वरं भवति । रज्जुशारदमुदकम् । दृषच्छारदाः सक्तवः । शारदशब्दोयं प्रत्ययवाची तस्य नित्यसमासो ऽस्वपदविग्रह इष्यते । सद्यो रज्जूद्धृतमुदकं प्रत्ययमनुपहतं रज्जुशारदमुच्यते । रज्जुशब्दः सृजेरसुम् चेति उप्रत्ययान्त आदिलोपश्च । धान्ये नित्विति च तत्र वर्त्तते तेनाद्युदात्तः । दृषत्शब्दो दृणातेः षुग् ह्रस्वश्चेति अदिक्प्रत्ययान्तोन्तोदात्तः । अनार्त्तवइति किम् । परमशारदम् । उत्तमशारदम् । शरदि ऋतुविशेषे भवं यत्तदिह शारदम् ॥

अध्वर्युकषाययोर्जातौ ॥ १० ॥

अध्वर्यु कषाय इत्येतयोर्जातिवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । प्राच्याध्वर्युः । कठाध्वर्युः । कलापाध्वर्युः । एते समानाधिकरणसमासा जातिवाचिनो नियतविषया,स्तत्र प्राच्यशब्दो यत्प्रत्ययान्त आद्युदात्तः । कठशब्दः पचाद्यचि व्युत्पादितस्ततः कठेन प्रोक्तमिति वैशम्पायनान्तेवासिभ्यश्चेति णिनिस्तस्य कठचरकाल्लुगिति लुक् । कलापिना प्रोक्तमिति कलापिनोण् तस्मिन्निनण्यनपत्यइति प्रकृतिभावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानमिति टिलोपः । तदेवं कलापशब्दोन्तोदात्तः । सर्प्पिर्मण्डकषायम् । उमापुष्पकषायम् । दौवारिककषायम् । षष्ठीसमासव्युत्पादिता रूढिशब्दा एते । तत्र सर्पिर्मण्डशब्द उमापुष्पशब्दश्च षष्ठीसमासावन्तोदात्तौ । दौवारिकशब्दोपि द्वारे नियुक्त इति ठकि सत्यन्तोदात्त एव । जाताविति किम् । परमाध्वर्युः । परमकषायः ॥

सदृशप्रतिरूपयोः सादृश्ये ॥ ११ ॥

सदृश प्रतिरूप इत्येतयोरुत्तरपदयोः सादृश्यवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । पितृसदृशः । मातृसदृशः । पितृमातृशब्दावुणादिष्वन्तोदात्तौ निपातितौ । षष्ठीसमासायं च सदृशग्रहणमिह तदलुकि षष्ठ्याः प्रयोजयति दास्याः सदृशो वृषल्याः सदृश इति ।

अत्र दासीवृषलीशब्दयोरन्तोदात्तत्वादुदात्तयणो हल्पूर्वादिति विभक्तिरन्तोदात्ता । पितृप्रतिरूपः । मातृप्रतिरूपः । सादृश्यइति किम् । परमसदृशः । उत्तमसदृशः । समासार्थोत्र पूज्यमानता न सादृश्यम् ॥

द्विगौ प्रमाणे ॥ १२ ॥

द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । प्राच्यसप्तसमः । गान्धारिसप्तसमः । सप्तसमाः प्रमाणमस्येति मात्रच उत्पन्नस्य प्रमाणे लो द्विगोर्नित्यमिति लुक् । प्राच्यश्चासौ सप्तसमश्चेति, प्राच्यसप्तसमः । प्राच्यशब्द आद्युदात्तः । गान्धारिशब्दः कर्दमादित्वादाद्युदात्तो मध्योदात्तो वा । द्विगाविति किम् । व्रीहिप्रस्थः । प्रमाणइति किम् । परमसप्तसमः ॥

गन्तव्यपण्यं वाणिजे ॥ १३ ॥

वाणिजशब्दउत्तरपदे तत्पुरुषे समासे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरं भवति । मद्रवाणिजः । काश्मीरवाणिजः । गान्धारिवाणिजः । मद्रादिषु गत्वा व्यवहरन्तीत्यर्थः । सप्तमीसमासा एते । तत्र मद्रशब्दो रक्प्रत्ययान्तत्वादन्तोदात्तः । काश्मीरशब्दोपि पृषोदरादिषु मध्योदात्तः । गान्धारिशब्दः कर्दमादिषु पठ्यते तत्र कर्दमादीनां वेति पक्ष आद्युदात्तो भवति द्वितीयो वा । पण्य । गोवाणिजः । अश्ववाणिजः । गोशब्दोन्तोदात्तः । अश्वशब्द आद्युदात्तः । गन्तव्यपण्यमिति किम् । परमवाणिजः । उत्तमवाणिजः ॥

मात्रोपज्ञोपक्रमच्छाये नपुंसके ॥ १४ ॥

मात्रा उपज्ञा उपक्रम छाया एतेषूत्तरपदेषु नपुंसकवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । भिक्षामात्रं न ददाति याचितः । समुद्रमात्रं न सरो ऽस्ति किं चन । मात्रशब्दोयं वृत्तिविषयएव तुल्यप्रमाणे वर्त्तते । तत्र भिक्षायास्तुल्यप्रमाणमित्यस्वपदविग्रहः षष्ठीसमासः । तत्र भिक्षाशब्दो गुरोश्च हल इत्यप्रत्ययान्तोन्तोदात्तः । समुद्रशब्दोपि फिषि पाटलापालङ्काम्बासागरार्थानामित्यन्तोदात्त एव । उपज्ञा । पाणि-

नोपज्ञकालकं व्याकरणम् । व्याड्युपज्ञं दुष्करणम् । आपिशल्युपज्ञं गुरुलाघवम् । षष्ठीसमासा एते । तत्र पाणिनोपत्यमित्यणन्तः पाणिनशब्दः प्रत्ययस्वरेणान्तोदात्तः । व्याडिरिञन्तत्वादाद्युदात्तः । तद्वदापिशलिः । उपक्रम । आढ्योपक्रमं प्रासादः । दर्शनीयोपक्रमम् । सुकुमारोपक्रमम् । नन्दोपक्रमाणि मानानि । एतेपि षष्ठीसमासा एव । तत्रैत्यैनं ध्यायन्तीत्याढ्यः । घञर्थे कविधानमिति कप्रत्यय आङ्पूर्वाद् ध्यायतेः पृषोदरादित्वाद्धस्य ढत्वम् । तदयमाढ्यशब्दस्याणादिस्वरेणान्तोदात्तः । दर्शनीयशब्दो रित्त्वादुपोत्तमोदात्तः । सुकुमारशब्दो नञ्सुभ्यामित्यन्तोदात्तः । नन्दशब्दः पचाद्यचि व्युत्पादितः । उपज्ञोपक्रमान्तस्य तत्पुरुषस्य नपुंसकलिङ्गतोपज्ञोपक्रमं तदाद्याचिख्यासायामिति । छाया । इषुच्छायम् । इषुशब्द इषेः किच्चेत्युप्रत्ययान्तस्तत्र च धान्ये नित्विति वर्त्तते तेनाद्युदात्तः । धनुःशब्दोपि नब्विषयस्यानिसन्तस्येत्याद्युदात्त एव । इषूणां छायेति षष्ठीसमासः । छायाबाहुल्यइति नपुंसकलिङ्गता । नपुंसकइति किम् । कुड्यच्छाया ॥

सुखप्रिययोर्हिते ॥ १५ ॥

सुख प्रिय इत्येतयोरुत्तरपदयोर्हितवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । गमनसुखम् । वचनसुखम् । व्याहरणसुखम् । सुख । प्रिय । गमनप्रियम् । वचनप्रियम् । व्याहरणप्रियम् । समानाधिकरणसमासा एते । तत्र सुखप्रियशब्दौ तद्धेतावायत्यां प्रीतिकरे वर्तेते । तद्धि हितं यदायत्यां प्रीतिं करोति । गमनादिषु ल्युडन्तेषु लित्स्वरः । हितइति किम् । परमसुखम् । परमप्रियम् ॥

प्रीतौ च ॥ १६ ॥

प्रीतौ गम्यमानायां सुख प्रिय इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । ब्राह्मणसुखं पायसम् । छात्रप्रियोऽनध्यायः । कन्याप्रियो मृदङ्गः । सुखप्रिययोः प्रीत्यव्यभिचारादिह प्रीतिग्रहणं तदतिशयप्रतिपत्त्यर्थम् । ब्राह्मणच्छात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । कन्याशब्दः स्वरितान्तः । प्रीताविति किम् । राजसुखम् । राजप्रियम् ॥

स्वं स्वामिनि ॥ १७ ॥

स्वामिशब्द उत्तरपदे तत्पुरुषे समासे स्ववाचि पूर्वपदं प्रकृतिस्वरं भवति । गोस्वामी । अश्वस्वामी । धनस्वामी । अश्वधनगवां कथित एव स्वरः । स्वमिति किम् । परमस्वामी ॥

पत्यावैश्वर्ये ॥ १८ ॥

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं भवति । गृहपतिः । सेनापतिः । नरपतिः । धान्यपतिः । गेहे क इति प्रकृतिस्वरेणान्तोदात्तो गृहशब्दः । सह इनेन वर्त्ततइति बहुव्रीहौ प्रकृत्या पूर्वपदमिति सेनाशब्द आद्युदात्तः । नृ नये एतस्मात् ऋदोरबिति अप्प्रत्ययान्त आद्युदात्तो नरशब्दः । धान्यमन्तःस्वरितम् । ऐश्वर्यमिति किम् । ब्राह्मणो वृषलीपतिः । वृषल्या भर्त्तेत्यर्थः ॥

न भूवाक्चिद्दिधिषु ॥ १९ ॥

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे समासे भू वाक् चित् दिधिषू इत्येतानि पूर्वपदानि प्रकृतिस्वराणि न भवन्ति । पूर्वेण प्राप्तः स्वरः प्रतिषिध्यते । भूपतिः । वाक्पतिः । चित्पतिः । दिधिषूपतिः । षष्ठीसमासा एते समासस्वरेणान्तोदात्ता भवन्ति ॥

वा भुवनम् ॥ २० ॥

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे समासे भुवनशब्दः पूर्वपदं वा प्रकृतिस्वरं भवति । भुवनपतिः । २ । पूर्वपदप्रकृतिस्वरपक्षे आदिरुदात्तः । रञ्जेः क्युचिति वर्त्तमाने भूसूधूभ्रस्जिभ्यश्छन्दसीति क्युन्प्रत्ययान्तो भुवनशब्द आद्युदात्तो व्युत्पादितः । कथं भुवनपतिरादित्य इति । उणादयो बहुलमिति बहुलवचनाद्भाषायामपि प्रयुज्यते ॥

आशङ्काबाधनेदीयस्सु संभावने ॥ २१ ॥

प्रकृत्या पूर्वपदं तत्पुरुषइति वर्त्तते । आशङ्क आबाध नेदीयस् इत्येतेषूत्तरपदेषु संभावनवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । अस्तित्वाध्यवसायः संभावनम् । गमनाशङ्कं वर्त्तते । गमनमा-

शङ्क्यतइति संभाव्यते । वचनाशङ्कम् । व्याहरणाशङ्कम् । आबाध । गमनाबाधम् । वचनाबाधम् । व्याहरणाबाधम् । गमनं बाध्यतइति संभाव्यते । नेदीयस् । गमननेदीयः * । व्याहरणनेदीयः । गमनमतिनिकटतर†मिति संभाव्यते । संभावनइति किम् । परमनेदीयः । पूर्वपदानि ल्युडन्तान्युक्तस्वराणि ॥

पूर्वे भूतपूर्वे ॥ २२ ॥

पूर्वशब्दउत्तरपदे भूतपूर्ववाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । आढ्यो भूतपूर्वं आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्त्तते । तत्र विशेषणं विशेष्येणेति समासः । मयूरव्यंसकादिर्वा द्रष्टव्यः । दर्शनीयपूर्वः । सुकुमारपूर्वः । भूतपूर्वइति किम् । परमपूर्वः । उत्तमपूर्वः । अत्र परमश्चासौ पूर्वश्चेति समासो न तु परमो भूतपूर्व इति । तथा हि सत्युदाहरणमेव भवति ॥

सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये ॥ २३ ॥

सविध सनीड समर्याद सवेश सदेश इत्येतेषूत्तरपदेषु सामीप्यवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । मद्रसविधम् । गान्धारिसविधम् । काश्मीरसविधम् । मद्रसनीडम् । गान्धारिसनीडम् । काश्मीरसनीडम् । मद्रसमर्यादम् । गान्धारिसमर्यादम् । काश्मीरसमर्यादम् । मद्रसवेशम् । गान्धारिसवेशम् । काश्मीरसवेशम् । मद्रसदेशम् । गान्धारिसदेशम् । काश्मीरसदेशम् । पूर्वपदान्युक्तस्वराणि । सविधादीनां सह विधयेत्येवमादिका व्युत्पत्तिरेव केवलम् । समीपवाचिनस्त्वेते समुदायाः । मद्राणां सविधं समीपमित्यर्थः । सामीप्यइति किम् । सह मर्यादया वर्त्तते समर्यादं क्षेत्रम् । देवदत्तस्य समर्यादं देवदत्तसमर्यादम् । सविधादिष्विति किम् । देवदत्तसमया ॥

---

* वचननेदीय इति पुस्तकान्तरे ऽधिकम् ।

† अन्तिकतम-पा० २ ।

विस्पष्टादीनि गुणवचनेषु ॥ २४ ॥

विस्पष्टादीनि पूर्वपदानि गुणवचनेषूत्तरपदेषु प्रकृतिस्वराणि भवन्ति । विस्पष्टकटुकम् । विचित्रकटुकम् । व्यक्तकटुकम् । विस्पष्टलवणम् । विचित्रलवणम् । व्यक्तलवणम् । विस्पष्टं कटुकमिति विगृह्य सुप्सुपेति समासः । विस्पष्टादयो ह्यत्र प्रवृत्तिनिमित्तस्य विशेषणम् * । कट्वादिभिश्च शब्दैर्गुणवद्द्रव्यमभिधीयतइत्यसामानाधिकरण्यमतो नास्ति कर्मधारयः । विस्पष्टशब्दो गतिरनन्तर इत्याद्युदात्तः । विचित्रशब्दो ऽव्ययस्वरेण । विचित्तशब्दमन्ये पठन्ति । सो ऽपि बहुव्रीहिस्वरेणाद्युदात्त एव । व्यक्तशब्द उदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्येत्यादिस्वरितः । ये चात्रापरे पठ्यन्ते तत्र संपन्नशब्दस्याथादिस्वरेणान्तोदात्तः । पटुपण्डितशब्दौ प्रत्ययस्वरेण । कुशलशब्दः कृत्स्वरेणान्तोदात्तः । चपलशब्दश्चित्स्वरेणान्तोदात्तः । चुपेरच्चोपधाया इत्यत्र हि चिदिति वर्तते । निपुणशब्दस्याथादिस्वरेणान्तोदात्तः । पुणेरिगुपधलक्षणः कप्रत्ययोयम् । विस्पष्टादीनीति किम् । परमलवणम् । उत्तमलवणम् । गुणवचनेष्विति किम् । विस्पष्टब्राह्मणः । विस्पष्ट । विचित्र । व्यक्त । संपन्न । कटु । पण्डित । कुशल । चपल । निपुण ॥

श्रज्यावमकन्पापवत्सु भावे कर्मधारये ॥ २५ ॥

श्र ज्य अवम कन् इत्येतेषु पापशब्दवति चोत्तरपदे कर्मधारये समासे भाववाचि पूर्वपदं प्रकृतिस्वरं भवति । गमनश्रेष्ठम् । गमनश्रेयः । ज्य । वचनज्येष्ठम् । वचनज्यायः । अवम । गमनावमम् । वचनावमम् । कन् । गमनकनिष्ठम् । गमनकनीयः । पापवत् । गमनपापिष्ठम् । गमनपापीयः । ल्युडन्तान्येतानि पूर्वपदानि लित्स्वरेणाद्युदात्तानि । श्रज्यकनामादेशानां ग्रहणमिति सामर्थ्यात्तद्वदुत्तरपदं गृह्यते । आदिष्विति किम् । गमनशोभनम् । भावइति किम् । गम्यते ऽनेनेति गमनं तत् श्रेयो गमनश्रेयः । कर्मधारयइति किम् । गमनं श्रेयो गमनश्रेयः ॥

* न द्रव्यस्येत्यधिकं पुस्तकान्तरे ।

Digitized by Google

कुमारश्च ॥ २६ ॥

कुमारशब्दः पूर्वपदं कर्मधारये समासे प्रकृतिस्वरं भवति । कुमारश्रमणा । कुमारकुलटा । कुमारतापसी । कुमारशब्दोऽन्तोदात्तः । अत्र केचिल्लक्षणप्रतिपदोक्तपरिभाषया कुमारश्रमणादिभिरित्यत्रैव समासे स्वरमेतमिच्छन्ति । केचित्पुनरविशेषेण सर्वत्रैव कर्मधारये ॥

आदिः प्रत्येनसि ॥ २७ ॥

कर्मधारयइति वर्त्तते । प्रतिगत एनसा प्रतिगतमेनो वा यस्य सः प्रत्येनाः । तस्मिन्नुत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो भवति । कुमारप्रत्येनाः । उदात्त इत्येतदत्र सामर्थ्याद्वेदितव्यम् । पूर्वपदप्रकृतिस्वर एव ह्ययमादेरुपदिश्यते ॥

पूगेष्वन्यतरस्याम् ॥ २८ ॥

पूगा गणास्तद्वाचिन्युत्तरपदे कर्मधारये समासे कुमारस्यान्यतरस्यामादिरुदात्तो भवति । कुमारचातकाः । २ । कुमारलोहध्वजाः । २ । कुमारबलाहकाः । २ । कुमारजीमूताः । २ । चातकादयः पूगशब्दास्तेभ्यः पूगाञ्ञ्यो ग्रामणीपूर्वादिति ञ्यः प्रत्ययस्तस्य तद्राजस्य बहुष्विति लुक् । अत्र यदा ऽऽद्युदात्तत्वं न भवति तदा कुमारश्चेति पूर्वपदप्रकृतिस्वरत्वमेके कुर्वन्ति । ये तु तत्र प्रतिपदोक्तस्य ग्रहणमिच्छन्ति तेषां समासान्तोदात्तत्वमेव भवति ॥

इगन्तकालकपालभगालशरावेषु द्विगौ ॥ २९ ॥

इगन्तउत्तरपदे कालवाचिनि कपाल भगाल शराव इत्येतेषु च द्विगौ समासे पूर्वपदं प्रकृतिस्वरं भवति । इगन्त । पञ्चारत्निः । दशारत्निः । पञ्चारत्नयः प्रमाणमस्य दशारत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लोपः । इगन्त । काल । पञ्चमास्यः । दशमास्यः । पञ्च मासान्भृतो भूतो भावी वेति तद्धितार्थे द्विगोर्यप् । पञ्चवर्षः । दशवर्षः । वर्षाल्लुक् चेति ठञो लुक् । काल । कपाल । पञ्चकपालः । दशकपालः । कपाल । भगाल । पञ्चभगालः । दशभगालः ।

भगाल । शराव । पञ्चशरावः । दशशरावः । संस्कृतं भक्षा इति तद्धितार्थएते समासा द्विगोर्लुगनपत्यइति कृताएप्रत्ययलोपा द्रष्टव्याः । इगन्तादिष्विति किम् । पञ्चभिरश्वैः क्रीतः पञ्चाश्वः दशाश्वः । द्विगाविति किम् । परमारत्निः । परमशरावम् । पञ्चारत्न्यो दशारत्नय इति च यणगुणयोर्बहिरङ्गलक्षणयोरसिद्धत्वात् स्थानिवद्भावाद्वा द्विगुस्वर इगन्तलक्षणः प्रवर्त्तते ॥

बह्वन्यतरस्याम् ॥ ३० ॥

बहुशब्दः पूर्वपदमिगन्तादिषूत्तरपदेषु द्विगौ समासे ऽन्यतरस्यां प्रकृतिस्वरं भवति । पूर्वेण नित्ये प्राप्ते विकल्पः । बहुरत्निः । २ । बहुमास्यः । २ । बहुकपालः । २ । बहुभगालः । २ । बहुशरावः । २ । बहुशब्दोन्तोदात्तस्तस्य प्रकृतिस्वरे कृते यत्र यणादेशस्तत्रोदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्येत्येष स्वरो भवति ॥

दिष्टिवितस्त्योश्च ॥ ३१ ॥

दिष्टि वितस्ति इत्येतयोरुत्तरपदयोर्द्विगौ समासे पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति । पञ्चदिष्टिः । २ । पञ्चवितस्तिः । २ । दिष्टिवितस्ती प्रमाणे तेनात्र मात्रचो लुक् ॥

सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् ॥ ३२ ॥

सप्तम्यन्तं पूर्वपदं सिद्ध शुष्क पक्व बन्ध इत्येतेषूत्तरपदेषु प्रकृतिस्वरं भवति सा चेत्सप्तमी कालान्न भवति । सांकाश्यसिद्धः । काम्पिल्यसिद्धः । सांकाश्यकाम्पिल्यशब्दौ ण्यप्रत्ययान्तावन्तोदात्तौ । फिषि तु सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानामन्तः पूर्वं वेति पठ्यते । तत्र पक्षे मध्योदात्तावपि भवतः । शुष्क । ऊकशुष्कः । निधनशुष्कः । ऊकशब्दो बहुलवचनादवतेः ककप्रत्ययान्तोन्तोदात्तः । निधनशब्दो निधाञः क्युप्रत्यये मध्योदात्तः । पक्व । कुम्भीपक्वः । विलासीपक्वः * । भ्राष्ट्रपक्वः । कुम्भीविलासीशब्दौ ङीषन्तावन्तोदात्तौ । भ्राष्ट्रशब्दष्ट्रन्प्रत्ययान्त आद्यु-

* कलशीपक्व इति पा०२ । अयमेव पदमञ्जरीसंमतः ।

दात्तः । बन्ध । चक्रबन्धः । चारकबन्धः । चक्रशब्दोन्तोदात्तः । चारकशब्दो ण्वुलन्त आद्युदात्तः । अकालादिति किम् । पूर्वाह्णसिद्धः । अपराह्णसिद्धः । सप्तमीस्वरः कृत्स्वरेण बाधितः पुनरयं विधीयते * ॥

परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥ ३३ ॥

परि प्रति उप अप इत्येते पूर्वपदभूता वर्ज्यमानवाचिनि अहरवयववाचिनि रात्र्यवयववाचिनि चोत्तरपदे प्रकृतिस्वरा भवन्ति । परित्रिगर्त्तं वृष्टो देवः । परिसौवीरम् । परिसार्वसेनि । प्रति । प्रतिपूर्वाह्णम् । प्रत्यपराह्णम् । प्रतिपूर्वरात्रम् । प्रत्यपररात्रम् । उप । उपपूर्वाह्णम् । उपापराह्णम् । उपपूर्वरात्रम् । उपापररात्रम् । अप । अपत्रिगर्त्तं वृष्टो देवः । अपसौवीरम् । अपसार्वसेनि । निपाता आद्युदात्ता उपसर्गाश्चाभिवर्जमिति आद्युदात्तानि पूर्वपदानि । तत्पुरुषे बहुव्रीहौ च सिद्धस्वादव्ययीभावार्थोयमारम्भः । तत्रापपरी वर्जने वर्त्तेते इति तयोरेव वर्ज्यमानमुत्तरपदं नेतरयोः । अहोरात्रावयवा अपि वर्ज्यमाना एव तयोर्भवन्तीति न पृथगुदाह्रियते । वर्ज्यमानाहोरात्रावयवेष्विति किम् । प्रत्यग्नि शलभाः पतन्ति । परिवनमित्यत्र वनं समासइत्येतद्भवति ॥

राजन्यबहुवचनद्वन्द्वेन्धकवृष्णिषु ॥ ३४ ॥

राजन्यवाचिनां बहुवचनान्तानां यो द्वन्द्वो ऽन्धकवृष्णिषु वर्त्तते तत्र पूर्वपदं प्रकृतिस्वरं भवति । श्वाफल्कचैत्रकरोधकाः । शिनिवासुदेवाः । श्वाफल्कशब्दश्चैत्रकशब्दश्च ऋष्यन्धकवृष्णिकुरुभ्यश्चेति अणन्तावन्तोदात्तौ । शिनिशब्द आद्युदात्तः स तदपत्येष्वभेदेन वर्त्तते । राजन्यइति किम् । द्वैप्यहैमायनाः † । द्वीपे भवा इति द्वीपादनुसमुद्रं यञ् । हेमेरपत्यं युवा हैमायनाः । अन्धकवृष्णय एते न तु राजन्याः । राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम् । एते च नाभिषिक्तवंश्याः । बहुवचनग्रहणं किम् । संकर्षणवासुदेवौ । द्वन्द्वइति किम् । वृष्णीनां कुमारा, वृष्णिकुमाराः । अन्धकवृष्णिष्विति किम् । कुरुपञ्चालाः ॥

---

* प्रतिप्रसूयते । पा०२ । † द्वैप्यभैमायनाः पा०२ ।

संख्या ॥ ३५ ॥

द्वन्द्वसमासे संख्यावाचि पूर्वपदं प्रकृतिस्वरं भवति । एकादश । द्वादश । त्रयोदश । इणभीकापाशल्यतिमर्चिभ्यः कनिति निस्वादाद्युदात्त एकशब्दः । त्रेस्त्रयस् आदेशोन्तोदात्तो निपात्यते ॥

आचार्योपसर्जनश्चान्तेवासी ॥ ३६ ॥

आचार्योपसर्जनान्तेवासिनां यो द्वन्द्वस्तत्र पूर्वपदं प्रकृतिस्वरं भवति । आपिशलपाणिनीयाः । पाणिनीयरौढीयाः । रौढीयकाशकृत्स्नाः । अपिशलस्यापत्यमापिशलिराचार्यः । अत इञ् । तेन प्रोक्तमापिशलम् । इञश्चेत्यण् । तदधीयते येऽन्तेवासिनस्तेप्यापिशलाः, प्रोक्ताल्लुगिति तस्य तद्धितस्याध्येतरि विहितस्य लुक् क्रियते । आपिशलेर्वा छात्रा आपिशला इत्युभयथाप्याचार्योपसर्जनश्चान्तेवासी भवति । आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणार्थं सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायते । इह मा भूत् । पाणिनीयदेवदत्तौ । आचार्योपसर्जनइति किम् । छान्दसवैयाकरणाः । अन्तेवासीति किम् । आपिशलपाणिनीये शास्त्रे ॥

कार्तकौजपादयश्च ॥ ३७ ॥

कार्तकौजपादयो ये द्वन्द्वास्तेषु पूर्वपदं प्रकृतिस्वरं भवति । प्रकृतिस्वरपूर्वपदाः कार्तकौजपादयो भवन्ति । विभक्त्यन्तानां पाठो वचनविवक्षार्थः । चकारो द्वन्द्वाधिकारानुवृत्त्यर्थः । कार्तकौजपौ । कृतस्यापत्यं कुजपस्यापत्यम् इत्यणन्तावेतौ । सावर्णिमाण्डूकेयौ । सावर्णिरिञन्तः । आवन्त्यश्मकाः । अवन्तेरपत्यानि बहूनि तन्निवासो जनपदो ऽवन्तयः । तथा ऽश्मकाः । पैलश्यापर्णेयाः । युवद्वन्द्वोयम् । पीलाया अपत्यं पैलस्तस्यापत्यं युवेति अणो द्व्यच इति विहितस्य फिञः पैलादिभ्यश्चेति लुक् । श्यापर्णशब्दो बिदादिस्तस्यापत्यं स्त्री श्यापर्णी, तदपत्यं युवा श्यापर्णेयः । बहुवचनमतन्त्रं, तेन पैलश्यापर्णेयावित्यत्रापि भवति । कपिश्यापर्णेयाः । कपिरन्तोदात्तस्तस्यापत्यं बहुत्वे कपिबोधादाङ्गिरसइत्युत्पन्नस्य यञो यञञोश्चेति लुक्, तेनात्र बहुत्वमाश्रीयतएव ।

Digitized by Google

शैतिकाक्षपाञ्चालेयाः । शितिकाक्षो नाम ऋषिस्तस्यापत्यमिति ऋष्यण् तदपत्ये यूनि य इञ् तस्य यञिञोश्चेति यूनीति लुक् । पाञ्चालस्यापत्यं स्त्री पाञ्चाली तदपत्यं युवा पाञ्चालेयः । अत्रापि बहुवचनमविवक्षितमिति शैतिकाक्षपाञ्चालेयावित्यत्रापि भवति । कटुकस्यापत्यमिति अत इञ् तस्य बह्वच इञः प्राच्यभरतेष्विति बहुषु लुक् । वर्चलाया अपत्यं वार्चलेयः । शाकलशुनकाः । शकलस्यापत्यं शाकल्यस्तस्य छात्राः शाकलाः । कण्वादिभ्यो गोत्र इत्यण् । शुनकस्यापत्यमिति बिदादिभ्योऽञ् तस्य बहुषु लुक् । शाकलसणका इति केचित्पठन्ति । तेषां सणकशब्दादुत्पन्नस्येञो बह्वच इञः प्राच्यभरतेष्विति बहुषु लुक् । शुनकधात्रेयाः । धात्र्या अपत्यं, धात्रेयाः । सणकबाभ्रवाः । बभ्रोरपत्यं बाभ्रवः । आर्चाभिमौद्गलाः । ऋचाभेन प्रोक्तमधीयते आर्चाभिनः । वैशम्पायनान्तेवासित्वाद् णिनिः । मुद्गलः कण्वादिस्तदपत्यस्य छात्रा मौद्गलाः । कुन्तिसुराष्ट्राः । कुन्तेः सुराष्ट्रस्य चापत्येषु बहुषु तन्निवासे वा जनपदे द्वन्द्वो ऽयम् । कुन्तिचिन्तिशब्दावन्तोदात्तौ । चिन्तिसुराष्ट्राः । कुन्तिसुराष्ट्रवत् । तण्डवतण्डाः । पचाद्यच्प्रत्ययान्तावन्तोदात्तावेतौ गर्गादिषु पठ्येते । तत्रापत्यबहुत्वे यञो लुक् क्रियते । गर्गवत्साः । अत्रापि अपत्यबहुत्वे यञो लुक् । अविमत्तकामविद्धाः । अविमत्तशब्दो नञ्स्वरेणाद्युदात्तः । द्वयोरप्येतयोरपत्येषु बहुषु इञो बह्वच इञः प्राच्यभरतेष्विति लुक् क्रियते । बाभ्रवशालङ्कायनाः । बभ्रोरपत्यं बाभ्रवः । शलङ्कु शलङ्क चेति शालङ्कायनः । बाभ्रवदानच्युताः । दानच्युतशब्दादिञो बह्वच इति लुक् । कठकालापाः । कठेन प्रोक्तमधीयते कठाः । वैशम्पायनान्तेवासित्वाद् णिनिः । तस्य कठचरकाल्लुक् । कलापिना प्रोक्तमधीयते कालापाः । कलापिनोऽण् इत्यण्प्रत्ययस्तस्मिन् इनण्यनपत्य इति प्रकृतिभावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पीत्यादिनोपसंख्यानेन टिलोपः । कठकौथुमाः । कुथुमिना प्रोक्तमधीयते इति प्राग्दीव्यतो ऽण् । तत्र पूर्ववत् टिलोपः । कौथुमलौकाक्षाः । लोकाक्षेण प्रोक्तमधीयते लौकाक्षाः । लोकाक्षस्य वा ऽपत्यं लौकाक्षिः । तस्य छात्रा लौकाक्षाः । स्त्री-

कुमारम् । स्त्रीशब्दोऽन्तोदात्तः । मौदपैप्पलादाः । मुदस्यापत्यं मौदिः । तस्य छात्रा मौदाः । तथा पैप्पलादाः । मौदपैप्पलादा इति द्विः पठ्यते तस्य प्रयोजनं पक्षे समासान्तोदात्तत्वमेव यथा स्यादिति । वत्सजरत् । वत्सश्च जरच्च, वत्सशब्दोऽन्तोदात्तः । सौश्रुतपार्थवाः । सुश्रुतस्य पृथोश्च छात्राः । प्राग्दीव्यतोऽण् । जरामृत्यु । याज्यानुवाक्ये । यजेर्ण्यत् । यजयाचेति कुत्वाभावः । तित्स्वरितमित्यन्तस्वरितः । अनुवाक्येति वचेरनुपूर्वाद् ण्यत् । आचार्योपसर्जनान्तेवासिनामिह पाठः प्रपञ्चार्थः ॥

महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारत-हैलिहिलरौरवप्रवृद्धेषु ॥ ३८ ॥

प्रकृत्या पूर्वपदमिति वर्त्तते, द्वन्द्व इति निवृत्तम् । महानित्येतत्पूर्वपदं व्रीहि अपराह्ण गृष्टि इष्वास जाबाल भार भारत हैलिहिल रौरव प्रवृद्ध इत्येतेषूत्तरपदेषु प्रकृतिस्वरं भवति । महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः । महाजाबालः । महाभारः । महाभारतः । महाहैलिहिलः । महारौरवः । महाप्रवृद्धः । महच्छब्दोऽन्तोदात्तः । तस्य प्रतिपदोक्तो यः समासः सन्महत्परमोत्तमोत्कृष्टा इति तत्रैव स्वरस्तेनैषां षष्ठीसमासे ऽन्तोदात्त एव भवति । महतो व्रीहिः, महद्व्रीहिरिति । कर्मधारये निष्ठेत्ययमपि श्रेण्यादिसमासे विधिरिति प्रवृद्धशब्द इह पठ्यते ॥

क्षुल्लकश्च वैश्वदेवे ॥ ३९ ॥

क्षुल्लक इत्येतत्पूर्वपदं महांश्च वैश्वदेवउत्तरपदे प्रकृतिस्वरं भवति । क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः । तस्मादज्ञातादिषु प्रागिवात्के ऽन्तोदात्तः क्षुल्लकशब्दः ॥

उष्ट्रः सादिवाम्योः ॥ ४० ॥

उष्ट्रशब्दः पूर्वपदं सादिवाम्योरुत्तरपदयोः प्रकृतिस्वरं भवति । उष्ट्रसादि । उष्ट्रवामि । उष्ट्रशब्द उषेः ष्ट्रन्प्रत्ययान्त आद्युदात्तः । कर्मधारयोयं षष्ठीसमासो वा ॥

Digitized by Google

गोः सादसादिसारथिषु ॥ ४१ ॥

गोशब्दः पूर्वपदं साद सादि सारथि इत्येतेषूत्तरपदेषु प्रकृतिस्वरं भवति । गोः सादः, गोसादः । गां सादयतीति वा गोसादः । गोः सादिः, गोसादिः । गोसारथिः ॥

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ॥ ४२ ॥

कुरुगार्हपत रिक्तगुरु असूतजरती अश्लीलदृढरूपा पारेवडवा तैतिलकद्रू पण्यकम्बल इत्येते समासास्तेषां दासीभारादीनां च पूर्वपदं प्रकृतिस्वरं भवति । कुरूणां गार्हपतं, कुरुगार्हपतम् । कृग्रोरुश्चेति कुरुशब्दः कुप्रत्ययान्तोऽन्तोदात्तः ॥ कुरुवृज्योर्गार्हपत इति वक्तव्यम् ॥ * ॥ वृजीनां गार्हपतं, वृजिगार्हपतम् । वृजिशब्द आद्युदात्तः । रिक्तो गुरुः, रिक्तगुरुः । रिक्ते विभाषेति पूर्वपदमाद्युदात्तमन्तोदात्तं वा । असूता जरती, असूतजरती । अश्लीला दृढरूपा, अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीर्यस्यास्ति तत् श्लीलम् । सिध्मादेराकृतिगणत्वाल्लच् । कपिलकादित्वाच्च लत्वम् । अश्लीलदृढरूपेति हि संस्थानमात्रेण शोभना निःश्रीका लावण्यविरहितोच्यते । पारेवडवेव, पारेवडवा । निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारशब्दो घृतादित्वादन्तोदात्तः । तैतिलानां कद्रूः, तैतिलकद्रूः । तितिलिनोऽपत्यं छात्रो वा तैतिल इत्यणन्तः । पण्यकम्बलः । पण्यशब्दो यदन्तत्वादाद्युदात्तः । पण्यकम्बलः ॥ संज्ञायामिति वक्तव्यम् ॥ * ॥ अन्यत्र पणितव्ये कम्बले समासान्तोदात्तत्वमेव प्रतिपदोक्ते हि कृत्यानां समासे द्वितीया कृत्या इत्येष विहितः स्वरितः । दास्या भारो, दासीभारः । देवहूतिः । देवजूतिः । देवसूतिः । देवनीतिः । अन्तोदात्तं पूर्वपदम् । वसुनीतिः । वसुशब्द आद्युदात्तः । शृस्वृस्निहित्रप्यसिवसीत्यत्र हि धान्ये नित्विति वर्त्तते । ओषधिः । ओषो धीयतेऽस्यामिति कर्मण्यधिकरणे चेति किप्रत्ययः । ओषशब्दो घञन्तत्वादाद्युदात्तः । चन्द्रमाः । चन्द्रे मोसिरित्यसिप्रत्यया-

न्तोयम् । चन्द्रशब्दस्तु रक्प्रत्ययान्तत्वादन्तोदात्तः । यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न च विहितं स सर्वो दासीभारादिषु द्रष्टव्यः ॥

चतुर्थी तदर्थे ॥ ४३ ॥

चतुर्थ्यन्तं पूर्वपदं तदर्थउत्तरपदे तदभिधेयार्थे यत्तद्वाचिन्युत्तरपदे प्रकृतिस्वरं भवति । तदिति चतुर्थ्यन्तस्यार्थः परामृश्यते । यूपदारु । कुण्डलहिरण्यम् । यूपशब्द आद्युदात्तः । कुसुयुभ्यश्चेत्यत्र निदिति वर्त्तते । कुण्डलशब्दोऽपि वृषादिभ्यश्चिदिति कलप्रत्ययान्तोन्तोदात्तः । रथदारु । वल्लीहिरण्यम् । रथशब्द आद्युदात्तः । हनिकुषीत्यादिना क्थन्प्रत्ययः । वल्लीशब्दो ङीषः स्वरेणान्तोदात्तः । तदर्थइति किम् । कुबेरबलिः । प्रकृतिविकारभावे स्वरोयमिष्यते ॥

अर्थे ॥ ४४ ॥

चतुर्थीति वर्त्तते । अर्थशब्दउत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति । मात्रे इदं, मात्रर्थम् । देवतार्थम् । अतिथ्यर्थम् । मातृपितृशब्दावन्तोदात्तावुणादिषु निपातितौ । देवताशब्दो लित्स्वरेण मध्योदात्तः । अतिथिरित्यतेरिथिचितीथिन्प्रत्ययान्तः । तदर्थविशेषा एव दारुहिरण्यादयो भवन्ति न त्वर्थशब्दवाच्यं सामान्यमित्यतदर्थोर्थोयमारम्भः । के चित्पुनराहुः । ज्ञापकार्थमिदमेतदनेन ज्ञाप्यते पूर्वो विधिः प्रकृतिविकृत्योः समासे भवति । अश्वघासः । श्वश्रूसुरमित्यत्र सत्यपि तादर्थ्ये न भवति ॥

क्ते च ॥ ४५ ॥

क्तान्ते चोत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति । गोहितम् । अश्वहितम् । मनुष्यहितम् । गोरक्षितम् । अश्वरक्षितम् । वनं तापसरक्षितम् । अश्वशब्द आद्युदात्तो मनुष्यशब्दोन्तस्वरितः । परिशिष्टपूर्वपदमन्तोदात्तम् । गोभ्यो रक्षितमिति संप्रदाने चतुर्थी ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ द्वादशस्तबकावशेषः ॥

सहचरि चरितमिदं न कदाचिदस्माभिरधुना धुनाना संभ्रमं

Digitized by Google

भ्रमं च का नाम कुशला कुशलानामपि कुशलेऽस्मिन् न प्रवर्त्तताम् ॥ २८ ॥

न चरितं न ज्ञातम्· इदं कात्यायन्यर्चनव्रतं तथापि कुशला स्वार्थचतुरा का नाम भ्रमं भ्रान्तिं संभ्रममावेगं च धुनाना दूरीकुर्वती सती कुशलानामपि कुशले मङ्गलानामपि मङ्गलेऽस्मिन् कर्मणि न प्रवर्ततां, किंतु प्रवर्तत एव ॥ २८ ॥

किंच ।

किमेकैकशः किमुत युगपदर्चनीया कात्यायनी कात्यायनीरसता यथा न भवति तथैव विधीयतां धीयतां मुद्रां विधाय निश्चीयतां चेति कयाचिदुक्ते पुनरन्या ऊचुः ॥ ३० ॥

कस्य सुखस्य· अत्यायेन· अत्ययेन या नीरसता संमत्यभावहेतुकवैरस्यं सा यथा न भवति । धीयतां धिया बुद्ध्या यतां संयताम् ॥ ३० ॥

मिलित्वालि त्वादृशीभिरीदृशीभिरीश्वरी पूज्या न पुनरेकैकशोऽनेकशोऽनेकशोभा भविष्यतीति सकला एव सकला एवमतिमधुमधुरं कृष्णगुणगानमङ्गलमारभ्य सौरभ्यसौभाग्यकुसुमाञ्जलिं विकीर्य शुचितरसिकताः समभ्यर्च्य भगवदुमादेव्या मूर्तिं निर्मातुमारेभिरे ॥ ३१ ॥

हे· आलि त्वादृशीभिर्मिलित्वैवेश्वरी पूज्या । मिलने हेतुः, ईदृशीभिः परस्परसौहार्दवतीभिः । अतो नात्र वैरस्यं भावीति भावः । न· एकैकशः· एकैकया, पर्यायेणेत्यर्थः, विलम्बेन सर्वासां मुख्यकालालाभादिति भावः । अत एव· अनेकशोऽनेकाभिर्बह्वीभिः, अनेका शोभा भविष्यतीति । सकलाः पूजनशिल्पवत्यः ॥ ३१ ॥

आरम्भमात्र एव सा भगवती सिकतामयतामयमानेव स्वयमेव स्वयमेव मूर्तिमती यद्यजनिष्ट ॥ ३२ ॥

Digitized by Google

स्वयमेव सुष्ठु· अयं शुभावहं विधिं मयते पूजापरिवर्तनेन ददा-तीति सा तथा । "मेङ् प्रतिदाने" ॥ ३२ ॥

तदेव ता अहो अहोभिर्बहुलैरप्येवं न शक्नुवन्ति यन्निर्मातुं तदिदं क्षणेन क्षणेन सह सुसंपन्नमिति हृत्प्रसादसादनेन देवीप्रसादसादनं जातमिति मन्यमाना मानाधिकां चित्तवृत्तिमेव प्रमाणीचक्रुः ॥ ३३ ॥

क्षणेन सह· उत्सवेन सह । सादनं प्राप्तिः ॥ ३३ ॥

ततश्च । अभितोऽभितोषतस्तामेव देवीमुपसेवितुमनसो मनसोऽप्यगोचरेण भावेन भावेन वशंवदा वदावदत्वमपहाय वाग्यता यतात्मानो यमुनासलिलमाहृत्य पूजोपकरणानि करणानियम्यानि संनि-हितानि विधाय निधाय निधिमिव हृदये श्रीकृष्णं विधिवद्विहितपा-दधावनाचमना मनागालम्बितवसनासनाः समानमानसत्वेन सत्त्वेन मौनावस्थावस्थानेऽपि समानमानसालापाः समाननिर्वाह्यवाह्यव्यव-हाराश्च भगवतीमर्चयितुमारेभिरे ॥ ३४ ॥

भावेन प्रेम्णा,भावेन भा कान्तिस्तामवति रक्षतीति तेन, वशंवदाः परस्परं वशवर्तिन्यः । वदावदत्वं वचनप्रतिवचनादिकर्तृत्वम् । पूजोप-करणानि धूपनैवेद्यादीनि, करणेन वागिन्द्रियेणानियम्यानि वर्णयितुमश-क्यानि, संनिहितानि विधाय हस्तप्राप्तिदेशे स्थापयित्वेत्यर्थः, पूजास-माप्तिपर्यन्तमासनभङ्गस्यानौचित्यादिति भावः । मनागिति, प्रौढपादत्व-दोषनिरसनार्थं भूमिस्पृष्टचरणैकदेशा इत्यर्थः । सत्त्वेन सत्त्वगुणेन हेतुना मौनावस्थया· अवस्थितावपि ॥ ३४ ॥

तत्र प्रथमं प्रथमञ्जसाजसाधारण्येन तस्यामेव सैकत्यां कात्या-यनीमूर्तौ मनसा मनसैव सकलाः कलावत्यः समानमानसतयैकरू-पमेव तदा तदावाहनं विदधति स्म ॥ ३५ ॥

प्रथं ख्यातम् । अञ्जसा साक्षात् । अजसाधारण्येन· अजन्यवस्तुतु-ल्यत्वेन । सैकत्यामेव सिकताविकारभूतायामेव । अकृत्रिमतया नित्य-

सिद्धत्वमननेनेत्यर्थः। मनसा मनसैव, नतु मन्त्रवर्णान् स्पष्टमुच्चार्येति भावः ॥ ३५ ॥

यथा, इहागच्छागच्छ देवि संनिधानमिहाचर कृष्णस्य संनिधानं नः प्रापयस्व नमो नम इत्यावाह्य वाह्यवृत्तिरहिता अवहिता अवनता नताङ्ग्यः पुनस्तथैव विमलमासनमासनमयतोऽयतोषेण समुपनीय पनीयतमं पूर्ववन्मनसैव निवेदयामासुः।

आस्यतामिह भो देवि दिव्यमासनमिष्यताम्।
अस्माकमङ्कपर्यङ्कं कृष्णासनमुदीरय ॥ ३६ ॥

कृष्णसंनिधानं नोऽस्मान् प्रापयस्वेति, अजां ग्रामं प्रापयेतिवत् सम्प्रत्यर्थ एव पर्याप्तिः, ततश्च त्वमत्रैव कृष्णोऽप्यस्मासु संनिहितो भवत्वित्यर्थः, पूर्वस्य साधनत्वमुत्तरस्य फलत्वमिति। एवमग्रेऽपि। विमला मा शोभा तस्या आसनं स्थितिर्यत्र तथा भूतमासनम्। पनीयतमम्· अतिस्तव्यम्। "पण स्तुतौ," "पन च"ेति दन्त्यत्वमपि ॥ ३६ ॥

इत्यासनं सनन्दनीयादरमदरमोदेन समर्प्य स्वागतं पप्रच्छुः ॥ ३७ ॥

नन्दनीयेनाभिनन्द्येन· आदरेण सह वर्तमानं यथा स्यात्तथा। अदरमोदेन· अनल्पानन्देन ॥ ३७ ॥

स्वागतं तव हे देवि स्वगतं ते निवेद्यते।
कृपया कारयास्माकं स्वागतं कृष्णमन्तिके ॥ ३८ ॥

स्वगतम्· अप्रकाशितं यथा स्यात् तथा, चित्तवृत्त्यैव स्वागतं निवेद्यत इत्यर्थः। अस्माकमन्तिके कृष्णं सुष्ठु· आगतं कारय संपादय। यद्वा कृष्णं प्रयोज्यकर्तारम्· अस्माकं स्वागतं कारय, कृष्णोऽस्मान् स्वागतं पृच्छत्वित्यर्थः। अत एव वक्ष्यति, "स्वागतं वो महाभागा" इत्यादि ॥ ३८ ॥

इति स्वागतमस्वागतमहापरितोषेण पृष्ट्वा समुचितचिततनद्रव्यभव्यभर्मभाजनस्थमुपपाद्य पाद्यमपि तथैव निवेदयांचक्रिरे ॥ ३९ ॥

असुषु प्राणेषु· आगतो यो महान् परितोषस्तेन पृष्ट्वा । सम्यगुचितैश्चितैरङ्गीकृतैस्तत्तद्द्रव्यैः पाद्योपयोगिश्यामाकादिवस्तुभिर्भव्यं मङ्गलभूतं यद्धर्मभाजनं कनकपात्रं तत्रस्थम्·उपपाद्य कृत्वा, "पाद्यं पादाय वारिणी"त्यमरः ॥ ३९ ॥

उपपाद्यमिदं पाद्यं पादयोरभिवाद्ययोः ।

संपाद्यतामनाद्ये नः कृष्णस्याद्य समागमः ॥

कृष्णप्रस्वेदपाद्यं नः शिशिरीकुरुतामुरः ॥ ४० ॥

हे· अनाद्ये दुर्गे नोऽस्मभ्यं कृष्णस्य समागमः संपाद्यतां दीयताम् ॥ ४० ॥

इति पाद्यं निवेद्य वेद्यरहिता विधिवदाहृततदुपयुक्तयुक्ततमद्रव्यानर्घमर्घमर्घयामासुः ॥ ४१ ॥

वेद्येन ज्ञातुमर्हैया पूजाविध्यादिना रहिता अपि विधिवदिति विरोधः । यद्वा वेद्यरहिता ज्ञातुमशक्याः, अन्यैरज्ञेयस्वरूपा इति यावत् । तदुपयुक्तैरर्घोपयोगिभिर्दूर्वादिभिर्युक्ततमैः परमोचितैर्द्रव्यैर्निमित्तैः । अनर्घम्· अर्घो मूल्यं तच्छून्यम्, अर्घयामासुः· निवेदयामासुः ॥ ४१ ॥

यथा ।

अप्यर्घितोघैरर्घ्यो त्वं तुभ्यमर्घोऽयमर्घितः ।

महार्घः श्रीकृष्णसङ्गः क्रियतां स्वर्घ एव नः ॥ ४२ ॥

अर्घितोघैः पूजितसमूहैर्देवादिभिरपि· अर्घ्या पूज्या । अर्घितो निवेदितः । महार्घो बहुमूल्यः । स्वर्घः सुलभः ॥ ४२ ॥

इत्यर्घं निवेद्य कमनीयमाचमनीयमाचरितविधिविधानमर्पयामासुः ।

यथा ।

इदमाचमनीयं ते कमनीयमुपाहृतम् ।

कृष्णस्याचमनीयत्वमानयास्माकमाननम् ॥ ४३ ॥

कृष्णस्याचमनीयत्वं कृष्णेनास्वाद्यत्वम्, आनय प्रापय ॥ ४३ ॥

इत्याचमनीयं निवेद्य घृतदधिमधुमधुरं मधुपर्कमर्पयामासुः।

यथा।

मधुरो मधुपर्कस्ते मुखसंपर्कमार्पितः।

कुरु कृष्णाधरपुटीमधुपर्कक्षमा हि नः॥ ४४॥

कृष्णस्याधरपुट्या यन्मधु तस्य पर्के संमेलने क्षमा योग्या नोऽस्मान् कुरु। यद्वा, कृष्णस्याधरपुट्येव मधुपर्कस्तत्र तदास्वादने क्षमा योग्याः॥ ४४॥

इति मधुपर्कं निवेद्य वेद्यवलग्ना लग्ना इव संतोषसमाधौ समाधीतहृदयाः प्रेमरसेन पुनराचमनीयमुपकल्पयामासुः॥ ४५॥

वेदिवदवलग्नं मध्यदेशो यासां ताः। "वेदिः स्त्रियामङ्गुलिमुद्रायाम्"-मिति मेदिनी। "मध्यमं चावलग्नं च"इत्यमरः॥ ४५॥

यथा।

पुनराचमनीयं ते कमनीयमिदं पुनः।

पुनराचमनीयं भोः कृष्णस्याननमस्तु नः॥ ४६॥

पूर्वं कृष्णेनाचमनीयमस्मदाननमस्त्विति प्रार्थितम्, इदानीं पुनस्तदनन्तरं श्रीकृष्णाननं नोऽस्माकमस्माभिराचनीयमस्त्विति मत्यधरपानाभिलाषः॥ ४६॥

इति पुनराचमनीयमुपकल्प्य।

सौरभरभसवशीकृतगन्धवहं गन्धवहं विनापि विस्मापकत्वे सकलोहितमतिलोहितमतिलोभनीयं वलवद्वारिमणि मणिपुटके समुपपादितमभ्यङ्गयोग्यं तैलमग्रत उपनीय।

देवि दिव्यमिदं तैलमभ्यङ्गार्थमुरीकुरु।

अभ्यङ्गमङ्गं कृष्णस्य रङ्गादङ्गानि नः कुरु॥ ४७॥

गन्धवहं पवनं विना सौरभवेगेन वशीकृता गन्धवहा नासिका येन तत्, विस्मापकत्वे विस्मयोत्पादकत्वे सकलेरेव·ऊहितं तर्कितं, नासात्वगिन्द्रिययोरतिलोभनीयम् । बलवांश्चारिमा चारुत्वं यत्र तादृशे मणिसंपुटे ।

कृष्णस्य· अङ्गमङ्गमभि प्रतिगात्रं लक्षीकृत्य नोऽस्माकमङ्गानि कुरु, तद्गुरुःकपोलादिभिरस्माकं कुचगण्डादीनि योज्यन्तामित्यर्थः ॥ ४७ ॥

इत्यभ्यङ्गं निवेद्य निविडतरमुद्वर्तनीयमुद्वर्तनीयमपि गन्धचूर्णं तूर्णं तूपकल्पयामासुः ।

यथा ।

उद्वर्तनीयं ते दत्तं गन्धचूर्णमिदं मृदु ।
उद्वर्तनीयं नो दुःखं त्वया कृष्णाङ्गसङ्गतः ॥ ४८ ॥

निविडतराभिर्मुद्रिरानन्दैर्वर्तनीयं भवितव्यं यत्र तत् ।

कृष्णाङ्गसङ्गतः कृष्णस्याङ्गसङ्गं प्रापय्य नोऽस्माकं दुःखम्· उद्वर्तनीयम्· उत्पाटनीयम् ॥ ४८ ॥

अथ घनसारसारवासितं सुजातरूपजातरूपघटीसंभृतं स्नानीयमानीय मानतामुपपाद्य पूर्ववत् ॥ ४६ ॥

घनसारसारेण श्रेष्ठकर्पूरेण वासितं सुगन्धितं, सुजातं रूपं सौन्दर्यं यत्र तस्य जातरूपस्य कनकस्य घट्यां संभृतम् । पूर्ववदिति· उपकल्पयामासुरित्यस्यानुवृत्तिज्ञापनम् ॥ ४९ ॥

यथा ।

कर्पूरपूरसौरभ्यं देवि स्नानीयमर्पितम् ।
कृष्णाङ्गसङ्गसुधया कृपया स्नपयाशु नः ॥

अथ सुविहिताकुङ्कुमपरिपाटिकां शाटिकां शातकुम्भसूत्रकृतां कृताञ्जलिपुटं पुरस्कृत्य पूर्ववत् ॥ ५० ॥

सुष्ठु विहिता आकुञ्चनस्य सम्यक् कुञ्चितीकरणस्य परिपाटी यस्यां ताम् ॥ ५० ॥

हे देवि परिधेहीदं कनकांशुकमंशुकम् ।
कृष्णांशुकेनांशुकानि परिवर्तय नोऽम्बिके ॥ ५१ ॥

कनकानामंशवः किरणा यस्मिंस्तदंशुकं वस्त्रम् ॥ ५१ ॥

अथ नानामणिमयनिरामयनिरामणीय-
कमलंकारमलंकारयि*त्वा समानीतं पूर्ववत् ।
रत्नालङ्करणैरेभिर्भव भाविन्यलङ्कृता ।
कृष्णाङ्कपङ्कसुधया कारयास्मानलङ्कृताः ॥ ५२ ॥

नानामणिमयं च तत्, निरामयाणि निर्मलानि नितरां रामणीय-कानि रमणीयत्वानि यस्य तथा भूतं चेति तत्, अलङ्कारं कटककुण्डला-दिकम्, अत्यर्थं कारयित्वा, निपुणस्वर्णकारस्थाने इत्यर्थः ॥ ५२ ॥

अथ समुपचितकस्तूरीकस्तूरीकृतकर्पूरपूरः सरसतरागुरुगन्ध-सारगन्धसारः सदनुलेपपङ्कः पङ्कजनयनाभिराभिराभिमुख्यमानायि, तत इदमूचे च ।

अनुलेपनमेतत् ते देवि दिव्यमुपाहृतम् ।
कृष्णानुलेपसौरभ्यैः सुरभीकारयस्व नः ॥ ५३ ॥

आभिः पङ्कजनयनाभिः सदनुलेपपङ्को देव्या आभिमुख्यमानायि । कथंभूतः, समुपचिता कस्तूरी मृगमदो यत्र सः । तुकारो यमकार्थः । करीकृतोऽङ्गीकृतः कर्पूरपूरो येन सः । सरसतरैरगुरुभिर्गुरुः श्रेष्ठः । गन्ध-सारस्य चन्दनस्य गन्धेन सारः श्रेष्ठः ॥ ५३ ॥

अथ गन्धवहानन्दि गन्धवहानन्दितगन्धं गन्धं समुपनीय पनीयमूचुः ।

* अलंकारशब्दात् तत् करोतीति णिचि त्वा ।

गन्धैर्गन्धवहानन्दी देवि गन्धोऽयमर्पितः ।

कृष्णाङ्गगन्धेनास्माकमङ्गानि सुरभीकुरु ॥ ५४ ॥

गन्धवहां नासिकामानन्दयितुं सुखयितुं शीलं यस्य तथा भूतो गन्धवहेन पवनेन॰ आ सम्यक् प्रकारेण नन्दितः समृद्धीकृतो गन्धो यस्य स पनीयं प्रशंसार्हम् ॥ ५४ ॥

अथ वृन्दावनस्थषडृतुकालीनानि मधुपरागमधुपरागरञ्जीनि कुसुमानि पुरः संपाद्य ।

इदं वृन्दावनोद्भूतं प्रसूनं देवि गृह्यताम् ।

रदप्रसूनैः कृष्णस्य पूजिताः सन्तु नोऽधराः ॥ ५५ ॥

मधुपानां भ्रमराणां रागो यत्र तेन मधुना परागेण च रञ्जीनि रञ्जकानि ।

प्रसूनमिति जातावेकत्वम् । रदा दन्ता एव प्रसूनानि कुन्दपुष्पाणि तैः ॥ ५५ ॥

अथ सुरभितरकालागुरुगुरुतरगुग्गुलगुलुच्छामृणालप्रभृतिभृतिसुगन्धितं धूपधूममग्रत उपकल्प्य ।

सुगन्धिर्धूपधूमोऽयं धूपस्ते देवि कल्पितः ।

धूपिता भव नश्चित्तं धूपितं शीतलीकुरु ॥ ५६ ॥

गुलुच्छः स्तबकः, अमृणालं वीरणमूलम् । "मूलेऽस्योशीरमस्त्रियां", "लामज्जकं लघुलयममृणाल"मित्यमरः, तत्प्रभृतीनां तदादीनां वस्तूनां भृत्या धृत्या सुगन्धितम् । धुवनं धूस्तां पातीति धूपः, सकम्प इत्यर्थः । धूपिता भव दीप्तिमती भव । "धूप दीप्तौ" । नोऽस्माकं धूपितं चित्तं संतप्तं मनः । "तप धूप संताप" इति धातोः ॥ ५६ ॥

अथ प्राज्यप्राज्यकर्पूरवर्तिवर्तितं दीपमग्रे निधाय पूर्ववत् ।

कर्पूरवर्तिसुरभिर्देवि दीपोऽयमर्पितः ।

कृष्णकौस्तुभदीपेन दीप्तं नस्तादुरोगृहम् ॥ ५७ ॥

Digitized by Google

प्राज्यं प्रचुरं प्राज्यं प्रकृष्टघृतं यत्र तथा भूता या कर्पूरवर्तिस्तया वर्तितम्, उत्पादितमित्यर्थः ॥ ५७ ॥

अथ मधुरमधुरसरसितसितसिता।सितातापतण्डुलसार्द्रकससैन्धवधवलमुद्गमुद्ग।विदलकदलकनारिकेलकेलदमलपरिमलघनघनसारसरसतरापूपपूपशाष्कुलकुललसदखण्डखण्डलड्डुकवलमानमानसामोदकमोदकसौरभरभसनिरपायपायसपक्वान्नदधिपयःप्रभृति नैवेद्यमुपकल्प्य ।

निरवद्यं देवि हृद्यं नैवेद्यमुपयुज्यताम् ।
संपादयस्व कृष्णस्य नैवेद्यं नो नवं वयः ॥ ५८ ॥

मधुरा च सा मधुनो रसेन रसिता च सितसिता श्वेतशर्करा तया सिता बद्धा॰ अतातपतण्डुला अप्राप्तपाकतण्डुलाश्च, तथा सार्द्रकाण्यार्द्रकखण्डसहितानि ससैन्धवानि सलवणानि धवलवर्णानि मुद्गानि॰ आनन्दप्रापकाणि मुद्गविदलानि च, तथा कदलानि च, नारिकेलानि च, केलता॰ उत्सर्पता॰ अमलपरिमलेन घनस्य सान्द्रस्य घनसारस्य कर्पूरस्य यः सारः सारभागस्तेन सरसतरा अपूपाश्च, "केलृ गतौ" धातुः, पूः पावित्र्यं तां पान्तीति तानि शाष्कुलानि शष्कुलीसंबन्धीनि कुलानि वृन्दानि च, लसद्भिरखण्डैरखण्डितैः खण्डलड्डुकैर्वलमानानि प्रबलानि मानसामोदकानि चित्तहर्षकाणि मोदकानि च, सौरभस्य रभसैर्वेगैर्निरपायाः पायसाश्च, पक्वान्नानि च, दधिपयः प्रभृतीनि च, यत्र तत् ॥ ५८ ॥

इति नैवेद्यं निवेद्य ।

कात्यायनि महामाये महायोगिन्यधीश्वरि ।
नन्दगोपसुतं देवि पतिं मे कुरु ते नमः ॥ ५९ ॥

कात्यायनीति, श्लेषेण कस्य कृष्णाङ्गसङ्गात्मकसुखस्य॰ अति॰ अतिशयेन॰ आयनि हे प्रापयित्रि । तथा हे महामाये महस्य॰ उत्सवस्य॰ अमो निष्परिमाण आयो यतः॰ हे तथा भूते । महायोगिनीति, तेन

नन्दगोपसुतेन सह योगोऽपि त्वयैव शीघ्रं स्वयं संपाद्यो, न तु पित्रादिव्यवधानोपद्रवेण, कालविलम्बस्यासह्यत्वादिति भावः । अत एव कुर्विति पदम्, अन्यथा कारयेत्युपन्यस्तं स्यात् । अधीश्वरीति, तत्र सामर्थ्यद्योतनम् ॥ ५९ ॥

इति मन्त्रमुपांशु पांशुलताविरहेण विन्दुविसर्गविसर्गमतिवारं जेपुः ॥ ६० ॥

उपांशु यथा स्यात् तथा जेपुः ।
"शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् ।
किंचिच्छब्दं स्वयं विद्यादुपांशुः स प्रकीर्तितः" ॥

इत्यागमोक्तरीत्या पांशुलताविरहेण· उच्चारणे मुखविप्लुषामनुद्गमेन । विन्दुविसर्गाद्यैर्विशिष्टः सर्गः सृष्टिः सम्यगुच्चारणं यत्र तत् । अतिवारं बहुवारम् ॥ ६० ॥

जपित्वा तु यथेष्टमाचमनीयानन्तरं ताम्बूलपूलकमुपकल्प्य ।
सैलालवङ्गकर्पूरं ताम्बूलमिदमश्यताम् ।
कृष्णास्यताम्बूलरसैरधरा: सन्तु नोऽरुणा: ॥
इति ताम्बूलं समर्प्य नीराजयामासुः ।
यथा ।
नीराजयामि त्वां दीपस्तवकेन महेश्वरि ।
नीराजितानि कृष्णस्य त्विषाङ्गानि भवन्तु नः ॥ ६१ ॥
नीराजितानि निःशेषेण राजितानि दीप्तानि ॥ ६१ ॥

इति नीराज्य मनोराज्यराज्यभिलाषलाषकौशलशलत्तरलता या दण्डवन्निपत्य तुष्टुवुः ॥ ६२ ॥

मन एव राज्यं तत्र राजितुं शीलं यस्य तथा भूतो योऽभिलाषस्तेन लाषकौशलं शिल्पचातुर्यं, "लष शिल्पयोगे," तेनैव शलन्ती मिलन्ती या तरलता तया ॥ ६२ ॥

अम्ब हेरम्बमातस्त्वां स्तोतुं स्तोकमपीश्वरः ।
न त्वद्दीशो न प्रजेशो न वागीशोऽपरे कुतः ॥ ६३ ॥

त्वद्दीशो महादेवो माहात्म्येन, प्रजेशो ब्रह्मा· ऐश्वर्येण, वागीशो वाचस्पतिः पाण्डित्येन ॥ ६३ ॥

रसनादेव रसनाकण्डूखण्डनतः परम् ।
वयं तथापि स्तुमहेऽस्तु महेश्वरि ते कृपा ॥ ६४ ॥

रसनादेव· आस्वादादेव खण्डनतो हेतोस्ते तव कृपा· अस्तु ॥ ६४ ॥

प्रभविष्णोर्महाविष्णोर्योगशक्तिस्त्वमुत्तमा ।
भासि कर्तुमकर्तुं चान्यथा कर्तुमपीश्वरी ॥ ६५ ॥

योगशक्तिर्योगमायाख्या शक्तिः ॥ ६५ ॥

त्वमेव तुष्टिः पुष्टिश्च त्वं शान्तिः क्षान्तिरेव च ।
त्वमविद्या च विद्या च बन्धमोक्षकरी नृणाम् ॥
मातः सर्वाणि सर्वाणि जगन्ति त्वदपाङ्गतः ।
उन्मीलन्ति निमीलन्ति भवन्ति विभवन्ति च ॥ ६६ ॥

गौरीव सर्वान्तःपुरप्रधानभूतेति वासवदत्ताश्लेषदर्शनान्महादेववाची सर्वशब्दो दन्त्यादिरपि, ततश्च हे सर्वाणि शंभुपत्नि,उन्मीलन्ति जायन्ते, निमीलन्ति नश्यन्ति, भवन्ति सत्तां प्राप्नुवन्ति, विभवन्ति समृध्यन्ति ॥ ६६ ॥

सर्वमङ्गलमूर्धन्ये मूर्धन्येव दिवौकसाम् ।
तवाज्ञा च समज्ञा च राजहंसीव राजते ॥ ६७ ॥

समज्ञा कीर्त्तिः ॥ ६७ ॥

परात् परतरे कृष्णपरे परमवैष्णवि ।
परोपकारपरमे परमेश्वरि ते नमः ॥ ६८ ॥

कृष्ण ईश्वरः परः श्रेष्ठः सेव्यत्वेन यस्याः, वस्त्वर्थस्तु स्पष्ट एव ॥ ६८ ॥

मनो ज्ञासि मनोज्ञासि त्वं सर्वस्यैव देहिनः ।
देहि नः पतिरूपेण देवि गोपेन्द्रनन्दनम् ॥ ६८ ॥

मनोज्ञा श्रेष्ठा॰ असि, यतः सर्वस्यैव मनो जानासीति मनोज्ञा, अत एवास्मन्मनोरुच्यनुसारेणैवाभीष्टं संपादनीयमिति भावः । तथैव स्पष्टमाहुः, देहीति, त्वमेव स्वयं देहि न तु पित्रादयो ददन्त्विति, पतिं मे कुरु ते नम इति पूर्ववत् त्वद्दर्शनस्यास्यास्मदभिप्रेतेतत्फलकत्वे कथंचित् तैर्ज्ञाते कुमारीणामस्माकं लज्जा स्यादिति ते जानन्त्वपि नैवेति भावः । तथात्वानभिरुचिस्त्वासां श्रीराधादिसौभाग्यदृष्ट्या परकीयास्वेव कृष्णस्याभिरुच्याधिक्यसंभवानुमानादिति ज्ञेयम् ॥ ६९ ॥

इति स्तुत्वा चिरतरं रुचिरतरं रुच्यनुरूपं देवीं प्रणम्य यमुनायामेव विसर्जयामासुः, एवमेवमहरहरहतोत्कण्ठाः कण्ठाभरणीकृतकृष्णगुणगणाः क्रमेधमानमानवलिवलितया सपर्ययापर्ययाविनाभावेन भावेन भगवतीमम्बिकां प्रसादयन्त्यः सादयन्त्यश्च हृत् प्रसादं मासमेव तं कतिपयदिनावशिष्टं कारयामासुः ॥ ७० ॥

क्रमेण॰ एधमानो वर्धमानो मानः पूजा तथा वलिः पूजोपयोग्युपहारश्च ताभ्यां वलितया वर्धितया सपर्यया परिचर्यया, अपर्ययो विपर्ययाभावः साहजिक्यं तस्य न विनाभावो यत्र तेन, अतिस्थिरेणैव भावेनेत्यर्थः, कतिपयदिनावशिष्टं मासमेव व्याप्य॰ अम्बिकां प्रसादयन्त्यः, हृच्चित्तमपि सादयन्त्यस्तस्यै प्रापयन्त्यः सत्यः, तं प्रसितुं प्रसादम्॰ अम्बिकां कारयामासुः । तासां तादृशभक्त्या वशीभूतैव देवी प्रसादमकरोदित्यगयन्तवाक्यम् ॥ ७० ॥

नहि तथाविधविविधविशिष्टसिद्धसौभाग्यवतीनां योग्यवतीनां योगमायादिदेवतान्तराराधनधनसापेक्षा मनोरथसिद्धयः ॥ ७१ ॥

अत्र वस्तुतस्त्वदृष्टैवाशङ्कां परिहरन्नाह नहीति । योग्या नरलीलत्वेनोचिता वतियाचनं यासां ताः, "वनु याचने" क्तिवन्तः । देवतान्त-

राराधनमेव धनं तत्सापेता मनोरथसिद्धयो नहि, किंतु नित्यसिद्धश्रेय-सीभावानामेव तासां लोकवल्लीलेयमिति भावः ॥ ७१ ॥

तेन च तावतेव वतेवमसे भगवती सोभगवती परिश्रमेण वशंवदावदातहृदया दयालुतमतया मतया च सुप्रसन्नासन्नाभिमत-दायिनी प्रतिजनं मनसि प्रादुर्बभूव ॥ ७२ ॥

मतया-उचितया। आसवस्याभिमतस्य वाञ्छितस्य दायिनी ॥ ७२॥

प्रादुर्भूय भूयसादरेणैव-अयि शुभवत्यो भवत्यो भगवद्रतिदेवता देवतान्तरमाराधयितुं नार्हन्ति नहि लक्ष्मीका लक्ष्मीकामनया- अन्य-देवतामाराधयन्ति ॥ ७३ ॥

भगवद्रतेरपि देवताः, तत्प्राप्त्यर्थमन्यैर्देवादिभिरप्याराध्या इत्यर्थः। लक्ष्मीका लक्ष्म्या अपि एकं कामनासुखं यासु ताः, "विजिहीर्षे त्वया सार्धं गोपीरूपेति साब्रवी"दिति भागवतामृतधृतलक्ष्मीवचनात्, "इ खेदे पदषोर्को च कामदेवे त्वनव्ययम्," तथा"सुखशीर्षजलेषु क"मिति च विश्वः ॥ ७३ ॥

तथापि वः केवलवलमानोत्कण्ठाकण्ठाभरणमिदं ममापि य-शोभारभारचनमेवेदम्भो * दम्भोज्झितं मदुपसर्पणं तेनाचिरतयेव रुचि-रतयेव कृष्णासत्या भवितव्यम् ॥ ७४ ॥

यशोभारस्य भा शोभा तस्या रचनं, भो इति संबोधनं, दम्भो-ज्झितं निष्कपटम् ॥ ७४ ॥

अतः परं तपःकरणतो विरमतेति निगद्यैव स्वैासामन्तर-तस्तिरोबभूवेति तासामनुभवः समुत्पनीपद्यते स्म ॥ ७५ ॥

समुत्पनीपद्यते स्म- अतिशयेनोत्पन्नः ॥ ७५ ॥

तत्सात्त्वि वामाविभुणोह पस्पन्देऽपस्पन्देनेव सुहृदा हृदापि

* परसवर्णो लिपितोऽपि यमकसोष्ठवावबोधाय।

निरवसादं प्रसादं प्रगतेनाश्वास्यमानाः करतलगं रतलगं मनोरथफलं जातमिवेति मत्वापि ता मासप्रपूरमेवं करणीयमिति निरणैषुः ॥ ७६ ॥

तस्य तादृशानुभवस्य साक्षि सूचकं, वामाक्षिभुजोर्बीति प्राण्यङ्गत्वाद् द्वन्द्वैक्यम्, अपस्पन्देन· अपगतस्पन्देन निश्चलेन, अतिसुस्थिरेणेति यावत्, रतं श्रीकृष्णेन सह रमणं लगयति योजयतीति रतलगं, ताः कुमार्यः, मासं प्रपूरयित्वेति, "द्वितीयायां चे"ति णमुल्, निरणैषुर्निर्णयं कृतवत्यः ॥ ७६ ॥

अनन्तरं मासावसानदिने दिनेश उदितवति दितवति कमलिनीमुद्रां मुद्रामणीयकेन केनचिदावृतास्ताः पूर्वतोऽपि बहुगुणेन बहुगुणेन संभारेण भारेण देवीं पूजयित्वा ॥ ७७ ॥

कमलिन्या मुद्रां मुद्रितत्वं दितवति खण्डितवति, मुदामानन्दानां रामणीयकेन रमणीयत्वेन, बहुगुणेन शतसहस्रोर्ध्वसंख्यावता, बहुगुणेन चर्व्यचोष्यादित्वगुणयुक्तेन, भा कान्तिस्तां राति गृह्णातीति तेन ॥ ७७ ॥

जयित्वादतिशयप्रमोदाः प्रमोदारतया व्रतं समाप्य समाप्यमानतपःफलमिव स्वं स्वं जानत्यो नत्योत्कर्षहर्षवशात् परस्परमभिषेकार्थं कुतुकालिकालि कालिन्दीं जिगाहिषवः प्रागेव कात्यायन्या कात्यायन्यायप्रसादीकृतकृतकेतरचित्रपटपटलस्य जलाक्लिन्नीभावशङ्कया कयापि देशाचारचारवेण च तदेव पटपटलमनुकूले कूले निःक्षिप्य सलिले सलीलमवललम्बिरे ॥ ७८ ॥

प्रमा प्रकृष्टा शोभा तस्या उदारतया महत्त्वेन, यद्वा प्रमायां पूजासंभारप्रमाणे· औदार्येण नतु कार्पण्येन, नत्या परस्परं नमस्कारेण, उत्कर्षो हर्षश्च तद्वशात्, कुतुकानामालिः श्रेणिर्यासां ताः कुतुकालिका आलयः सख्यो यत्र तद्यथा भवत्येवं जिगाहिषवः, कात्यायन्या दुर्गया, कस्य सुखस्यातिशयो य आयो वृद्धिस्तत्र यो न्याय औचित्यं तेन प्रसादीकृतानां कृतकेतरमकृत्रिमं तन्त्वोत्थमेव चित्रं येषु तथा भूतानां पटानां

कौशेयवस्त्राणां पटलस्य समूहस्य, जले॰ आविलीभावस्य मालिन्यस्य शङ्कया देशाचारेण हेतुना चारवं चाक्त्वमेव तेन च हेतुनेति विमानाभावश्चोक्तः ॥ ७८ ॥

अवलम्ब्य परस्परपरमकौतूहलहलनलुलितललितलसन्मनसो दिनकरकरकरम्बिततया नातिशीतभीताः च्चणं विहरमाणाश्च राजन्ते स्म ॥ ७६ ॥

परस्परं परमकौतूहलेन हलनं कर्षणं "हल विलेखने" इत्यस्मात्, तेन लुलितं संघृष्टं ललितं लसत् कान्तियुक्तं मनो यासां ताः ॥ ७९ ॥

एतस्मिन्नेव दिवसे प्रागेव नियतविचारचारस्थलमुखाभिसरणारवदनाकुलखगकुलाकुलायमाने नभसि ॥ ८० ॥

प्रागेव पूर्वेद्दिन एव नियतो विचारः श्वोऽमुत्र चरिष्याम इत्येवंलक्षणो यत्र तथा भूतस्य चारस्थलस्य मुखेऽभिसरणे रवाकुलैरव्याकुलैः खगकुलैराकुलायमाने सति नभसि ॥ ८० ॥

दिवसमुखे मुखेन्दुसुधासुधावितमुरलीकोऽलीकोज्झितप्रणयेवेलादिभिः प्रियसखैर्वलवति निराबाधेऽनुधेनुगणं संचारसुखे ॥ ८१ ॥

तथा धेनुगणमनुलक्षीकृत्य संचारसुखे च बलवति सति ॥ ८१ ॥

योगेश्वरेश्वरो व्रतरतकन्यारतकन्यायलब्धप्रेमवश्योऽवश्योऽवश्योदास्यतत्तदुत्कण्ठाभरः कण्ठाभरणीकृततत्तद्गुणगणो गोचारणसुखं वयस्यगणसङ्कुलं च विहाय ह्यनावाधिविवर्धितापूर्वपूर्वरागाणां तासामुत्कलिकामुत्कलिकाविकाशोन्मुखीकरणाय ॥ ८२ ॥

व्रतरताभिः कन्याभी रतकात् प्रेष्ठनिष्ठरमणसुखाद्धेतोर्न्यायलब्धो यः प्रेमा तेन वश्यः । अवश्यः स्वतन्त्रोऽपि । अवश्यमेव॰ उदास्य उत्क्षेपयितुं दूरीकर्तुं योग्यस्तासां स उत्कण्ठाभारो येन सः, "लुम्पेदवश्यमः कृत्ये" इति मलोपः । उत्कलिका॰ उत्कण्ठा तत एव या मुद्रां कलिका स्वदर्शनेन जनिष्यमाणा आनन्दकोरकस्तस्या विकाशोन्मुखीकरणाय, तां विकसनोन्मुखाकर्तुमित्यर्थः ॥ ८२ ॥

संगानविगानविरहेण प्रादुर्भावावधि समुत्पन्नतत्त्वज्ञानैरिवान-न्दपृथुकैः पृथुकैः क्रीडाशालभञ्जिकाकृतिभी रम्याशयैः स खलु व्रज-राजकिशोरो बलसुबलसुदामादिभिरप्यलक्षितः कात्यायन्या भारला-घवं तासां सौभाग्यभारगौरवं स्वस्य वैदग्ध्यभारप्रकटनं करिष्यंस्तत्र एवालक्षितमाजगाम ॥ ८३ ॥

संगानं गुणदृष्टिर्विगानं दोषदर्शनम्। आनन्देन पृथुकैः प्रचुरैः पृथुकै-र्बालकैः, तेन स्वप्रेयसीनां तासां नग्नत्वे तैर्दृष्टेऽपि न क्षतिः, तत्रापि संगा-नेत्यादिविशेषणत्रयवैशिष्ट्ये नितरामेव। शालभञ्जिका पुत्तलिका॥ ८३ ॥

आगत्य चासौ कृष्णोऽपि रक्तो रक्तोऽपि न चलोहितो न चलो हितश्च चलोहितश्च हितपरोऽपि नहि तपरः ॥ ८४ ॥

रक्तः॰ तास्वनुरागी, कर्तरि निष्ठा। रक्तोऽपि रज्यते॰ अत्रेति रक्तः, अधिकरणे निष्ठा, तासामनुरागविषयोऽपीत्यर्थः। न चलम्॰ ऊहितं तर्को यस्य सः। न चलो न चञ्चलो हितः सुहृच्च। चलम्॰ उहितम्॰ अर्दनं यतः स चलोहितः। "ऊहिर् त्वर्दे॰ उहिर् तर्के" इति बोपदेवः। हितपरो-ऽपि॰ उपकारकोऽपि, नहि नैव तपरः, तपस्तापस्तं राति ददातीति। विरोधपक्षः स्पष्ट एव ॥ ८४ ॥

बद्ध्वा केशान् यमितपरिधिर्नूपुरे मूकयित्वा
व्रारं वारं परिजनकथां वारयन् भ्रूविजृम्भैः।
न्यञ्चत्कायश्चकितनयनो गोपयन्नङ्गमङ्गै-
र्गूढस्मेरो वसनमहरच्चोरिराभीरिकाणाम् ॥

आच्छाद्य गात्रैः सहसाम्बराणि
मूकीकृताशेषवयस्यवर्गः।
शनैःशनैर्नीपभुजाधिरूढ-
स्तदाभिमुख्यं हरिरुल्ललास ॥ ८५ ॥

Digitized by Google

यमितो बद्धा संयतीकृतः परिधिर्लम्बमानपरिधानवस्त्रं येन सः। तासामाभिमुख्यं यथा स्यात् तथेति, तसां प्रत्यङ्गदर्शनार्थं नर्मसंवादार्थं च ॥ ८५ ॥

तदनु ता नुताः सौभाग्यलक्ष्म्या सलिलादुत्तितीर्षवो निर्दुकूले कूले कृतालोका लोकातीताश्चकितमिदमातर्कयामासुः ॥ ८६ ॥

ताः कुमार्यः, नुताः स्तुताः ॥ ८६ ॥

अहो किमिदं केनापहृतमम्बरमम्बरमणिकरं विना करम्बिणा केनापि नाच भूयते ॥ ८७ ॥

अम्बरमणिः सूर्यस्तस्य करं किरणं विना, करम्बिणा संयोगिना ॥ ८७ ॥

भूयतेह केवलं के चलन्तीनां विहगराजीनां पदराजी तदहो कयापि देवतया बत यापितानि कुत्रापि नो वसनानि ॥ ८८ ॥

के जले वलन्तीनां प्रचलानां विहगराजीनां पदराजी चिह्नश्रेणी, इह प्रदेशे भूयता भुवि यतत इति "यत्नाद्यच्" ॥ ८८ ॥

यद् देवता एव धरणितलतलनाभावात् पदपदविलोकनाभावः ॥ ८९ ॥

तलनं प्रतिष्ठा, पदपदं चरणचिह्नम् ॥ ८९ ॥

इति चकितचञ्चलाञ्चलाचमभितोऽभितो विलोकमानानमाना-नाविधवितर्कं चिन्तयन्तीनामपाङ्गतरङ्गा मिहिरदुहितृपर्युपर्युत्फा-लफरफरायमाणशफरवधूश्रेणय इव मदमुदितचलदलिदलितविस्मापि-तकुवलयकुवलयदलानीव वा परितः परिरेतस्तारिदिशां मुखानि॥ ९० ॥

आनानाविधतर्कं विविधतर्कपर्यन्तम्। मदमुदितैश्चलद्भिरलिभिः कनीनिकास्थानीयैर्दलितानि संमर्दितानि विस्मापितभूमण्डलानि कुवलयदलानि नीलोत्पलपत्राणीव। परितस्तारिरे इति "स्तृञ् आच्छादने"-

व्याप्तवन्त इत्यर्थः । शफरवधूप्रेणय इति, प्रथममकस्मादतिचकितसंवि-
ग्नतया संपूर्णापाङ्गानामेवातिचापल्ये दृष्टान्तः । मदमुदितचलदलीति,
तदनन्तरं किंचिद्विचारपरतया तदंशतारकामात्रचापल्य· इति ॥ ९० ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य षष्ठः परिच्छेदः ॥

॥ द्रव्यवाचकनाम्नां विषये ॥

१५ ॥ तत्र प्रथमं तावत् पदार्थसृष्टौ सर्वेषामुत्पादनीयानां पदार्थानां प्रतिरूपकेषु व्यवस्थापितानां नियतानां केषां चित्स्वरूपाणां तेषु पदार्थेषु सत्त्वं सदैव स्वभावसिद्धमिति मन्तव्यम् एवंविधेषु वक्ष्यार्थेषु प्रायस्तं तं विषयमादौ किंचित् सुस्पष्टतरं व्याख्यायैव स सर्वथा स्वीकर्तुं युज्यते ॥

१६ ॥ द्वितीयतः, सजातीयानां सृष्टिः सर्वदा एकरूपा वर्तते न वेत्यप्यवश्यं ज्ञातव्यम् । विरुद्धजातीयेषु प्राणिषु परिदृश्यमानानां क्रूराकृतिमतामनियतानां च जननान्युक्तयोरुभयोरपि नियमयोरन्यतरस्य वा संदेहस्य कारणानि सन्ति ॥

१७ ॥ तृतीयतः, सर्वाणि विद्यमानानि वस्तूनि स्वस्वावयवविशेषवन्ति सन्तीत्यस्य निश्चयाद्विशेषजातिपदस्य शास्त्रीयार्थानुसारेण क्रूराकृतिपदेनास्माभिरभिधीयमाना वस्तुतो भिन्ना भिन्ना जातयः सन्ति न वेत्यपि निश्चेतव्यम् । किं चैवमपि तासु क्रूराकृतिसृष्टिषु केचन स्वपूर्वपूर्वपुरुषपरंपराक्रमायातजातिस्वरूपसहचरितांस्तज्जातिस्वरूपप्रभवांश्च गुणान् विरलानेव नैव वा धारयन्ति ॥

१८ ॥ द्रव्याणां शाब्दस्वरूपाणि निखिलगुणसमुदायरूपाणि न सन्ति ॥—तुरीयतः, ये पदार्था विशेषजातिभिर्विभिद्यन्ते, येषां च तथा

विविक्तानां नामान्यस्माभिरुपकल्प्यन्ते तेषां विज्ञानानि त्वात्मस्ववश्यमवधारणीयानि । परं त्वेषां चतुर्णां विषयाणां ज्ञानाभावात् तानि कल्पितानि पदार्थानामार्थस्वरूपाणि द्रव्याणां विशेषजातिभिर्विभेदनस्यास्मदृष्ट्या ऽकिंचित्कराणि ॥

१९ ॥ पञ्चमतः, तत्तदार्थस्वरूपेभ्यो निर्गच्छतां पदार्थगुणानां पर्याप्तानि मिश्रविज्ञानान्यादौ रचयित्वा ततस्तैस्ते ते पदार्थास्तत्तद्विशेषजातिषु विभजनीया इत्येकमेव साधनं कल्पयितुं शक्यते । परं त्वेतदुपयमपि कर्तुं न शक्यते । आर्थस्वरूपस्य स्वतो ज्ञायमानत्वाभावेन ततः प्रभूतानां तेनाविनाभूतानां च सर्वेषां गुणानां ज्ञानस्याशक्यत्वात् । यतस्तद्‌द्भूता गुणास्तेन स्वरूपेण सह तथा नित्यसहचरिताः सन्ति, येन तेषामेकतमस्य यस्य कस्याप्यभावे तदविनाभूतस्वरूपविशेषस्याप्यतया तत्तद्विशेषजातीयस्वाभावो नियमेनानुमातुं शक्यते । तथा हि । यावदस्माभिः सुवर्णस्यार्थं स्वरूपं स्वतो न ज्ञायते तेन च सा विशेषजातिर्न नियम्यते तावद् येषां धर्माणामन्यतमस्याभावे सति सुवर्णस्यार्थं स्वरूपं तेनाविनाभूतं सुवर्णं च न सिध्यति, एवंभूतानां सुवर्णस्यार्थं स्वरूपमाश्रितवतां धर्माणां वस्तुतः संख्यापि न ज्ञातुं शक्यते । अत्र सुवर्णपदेन धातुविशेषखण्डरूपेदानींतनव्यवहारगोचरा सम्राट्शिरोङ्किता स्वर्णमुद्राऽमयाभिप्रेयते । स्वर्णपदेनास्माभिः सर्वत्राभिधीयमानं मिश्रितविज्ञानमेव यदि तेन पदेनाचापि सुवर्णशब्दस्वरूपापरपर्यायमभिप्रेतमभविष्यत्तर्हीदमसंबद्धप्रलापायितमभविष्यत् । शब्दानां नानाविधार्थो दोषएव केवलं शब्दैकसमधिगम्या इति तत्प्रदर्शनं दुष्करं भवेत् ॥

२० ॥ एतावता ग्रन्थेनेतत्स्फुटं भवति । नामभिस्तत्तद्विशेषजातिषु द्रव्याणां विभेदनं न कथमपि तेषामार्थस्वरूपमपेक्षते, अपि त्वाभासस्वरूपभेदानुसारेण द्रव्याणि विशेषजातिषु याथार्थ्येन नियमयितुं व्यवस्थापयितुं च शक्यन्ते ॥

२१ ॥ (द्रव्याणां विशेषजातिषु व्यवस्थानं) मनुष्यकृतं तत्र प्रयुज्यते तादृशसूक्ष्मविज्ञानसंघाश्रितमेवास्ति॥—परंतु पूर्वोक्तस्वरूपेणापि प्रकृति

पदार्थानामार्थस्वरूपाणि न ज्ञायन्ते ऽस्माभिरित्येव सिद्ध्यति, तथापि जातिशब्दा आवश्यकाः । परीक्षया यावन्ति शुद्धविज्ञानानि विभ्रमानपदार्थाश्रितत्वेन मिश्रणीयानि संभवन्ति तावन्ति संघीकृत्य तेषां मिश्रितैकविज्ञानरूपेण रचनमेव तावदस्माभिः कर्तुं शक्यते । यद्यपीदं सतो द्रव्यस्यार्थं स्वरूपं न भवति, तथापि पदवाच्यासाधारणस्वरूपाभिवमस्ति तद् येन तेषां शाब्दस्वरूपस्य तत्त्वमधिगन्तुमर्हामः । तथाहि । घनद्रव्यस्य स्वरूपमस्ति विस्तार इत्यास्तां लौकिकः प्रवादः । यद्येवं तर्हि यस्य कस्यापि स्वरूपे तद्वस्तुसंबन्धित्वस्य भ्रमो ऽयुक्त एव स्यात् । स्यादेतत् । विस्तार एव पिण्डः, पिण्डो ऽपसरतीति विवक्षायां विस्तारो ऽपसरतीति कथनीयमिति । तदसंगतम् । एको विस्तारः स्वाघातेनापरं विस्तारं चालयतीति योग्यताविरहितवाक्यजन्यबोधस्य पिण्डः पिण्डान्तरं चालयतीतिवाक्यजबोधेन सर्वथा विरुद्धत्वात् । अस्मन्मते तु पदार्थस्य स्वरूपं तत्तत्पदबोध्यमखण्डं मिश्रविज्ञानमेव, द्रव्येषु स्वघटकानेकतत्तच्छुद्धविज्ञानाभिन्नं किं चन विसंकुलं द्रव्यं तेषां विज्ञानानां समागमस्य कारणमज्ञाताश्रयरूपं वा सर्वदा तद्घटकभागरूपमेवास्ति । अतश्च द्रव्यपिण्डस्य स्वरूपं न केवलं विस्तारो ऽपि तु विस्तृतं घनं वस्तु । तथा च पिण्ड आहन्ति चालयति वेति कथनमिव विस्तृतं घनं वस्तु तथाविधं वस्त्वन्तरं चालयत्याहन्ति वेति कथनमपि सकलानुमतं सुबोध्यं चास्ति । एवं मनुष्य इतिवद्विवेकशाली जीवः संभाषणव्यवहारयोग्यो ऽस्तीति सर्वानुमतमस्ति, परं तु विवेकशालिता संलापयोग्येति न कोपि कथयेत् । विवेकशालिताया मनुष्यपदवाच्याखिलस्वरूपत्वाभावात् ॥

२२ ॥ अस्मन्मते ऽवच्छेदकविज्ञानानि विशेषजातीनां परिच्छेदकानि सन्ति । अत्र मनुष्यस्यावच्छेदकविज्ञानमुदाह्रियते ॥—सन्ति जगति तथाविधाः प्राणिनो ये ऽस्मत्सदृशाकारवन्तोऽपि सलोमाः प्रज्ञासंभाषणाभ्यां रहिताश्च । एवमाकृत्या सर्वथा ऽस्मदनुरूपा अपि प्रज्ञाशून्याः के च न संलापासमर्था जडपुरुषा अस्मास्वप्युपलभ्यन्ते । प्रज्ञाकारभाववैरस्मदनुरूपा लोमवल्लाङ्गूलविशिष्टाश्च के चन जीवाः सन्तीत्यपि

लौकिकानां प्रवादः । अन्ये चैवंविधाः येषु पुरुषाः श्मश्रुरहिताः स्त्रियश्च केषु चित् सश्मश्रुकाः सन्ति । सर्वे मनुष्याः किं तथा सन्ति न वेति मनुष्यजातीयाः किं सर्वे तथेति च प्रश्नः शाब्दस्वरूपमधिकृत्यैव वर्तत इति तु स्फुटमेव । मनुष्यपदवाच्यासाधारणधर्माक्रान्तानामेव तत्पदाभिधेयविज्ञानानुरूपाणामेव वा मनुष्यत्वात् । काममाभ्यन्तरावयवसंस्थितेस्तत्तज्जीवानामाकारस्य च भेदेऽपि यद्ययं प्रश्नः कल्पितार्थस्वरूपमधिकृत्य क्रियेत तर्हि तस्य कोप्यंशो विभेदकविज्ञानविशेषघटको नास्तीत्युत्तरस्य दृढः संभवो न स्यात् । यत्र प्रज्ञाभाषणादिशक्तयो बाह्याकारा वा भिद्यन्ते तत्राभ्यन्तरसंस्थितिः सर्वथैकरूपा नास्तीति कल्पनातिरिक्तस्य कस्यापि हेतोरभावात् । वास्तविकाभ्यन्तरावयसंस्थितिगतः को विशेषः पदार्थभेदं साधयतीति तु नाशङ्कनीयम् । ज्ञातानामेवावच्छेदकविज्ञानानां विशेषजातिपरिच्छेदकत्वान्न तु तद्घटकाभ्यन्तरावयवसंस्थितेः । प्लवगानेडमूकयोर्बुद्धिभाषणसामर्थ्याभ्यां राहित्येनाकृत्या च साम्ये सति किं केवलं चर्मावरकलोमकृत एव भेदस्तयोराभ्यन्तरावयवसंस्थितिभेदस्य लिङ्गं भविष्यति? अस्मास्वपि किं बुद्धिभाषणसामर्थ्यराहित्यमनेडमूकसुबुद्धमनुष्ययोर्विशेषजातिभेदस्य वास्तविकावयवसंस्थितिविभेदस्य च लिङ्गं न भविष्यति? किंच यदि विशेषजातीनां भेदः पदार्थानामाभ्यन्तरसंस्थित्या रचनाविशेषैश्च सुदृढं व्यवस्थाप्येत तर्हीत्थमेवापरेष्वपि स्यादिति स्वीकुर्याम ॥

२३ ॥ विशेषजातय उत्पत्तिप्रकारैर्न भिद्यन्ते ॥—न कोप्येवं प्रतिजानीते यत् प्राणिषु स्त्रीपुंससंयोगेनोत्पादनशक्तिर्महीरुहेषु च बीजसहकृता सा कल्पितार्थविशेषजातीर्विभेदयतीति । यद्येवं स्यात्तर्हि पदार्थविशेषजातीनां भेदः प्राणिनां महीरुहाणां च विशेषजातिकृतभेदाद्विलक्षणो निर्वक्तुमशक्य एव स्यात् । (उत्पत्तिप्रकारेण जातिर्भिद्यते) एतावदेव कथनं तु प्रदर्शितजातिष्वेवापर्याप्तं किमुतान्येषामस्मदपरिचितजातिविशेषाणां विषये । यदि नार्यो वानरनिर्हितगर्भा भवेयुस्तर्हि तदुत्पन्नमपत्यमितिहासविशेषे वर्णितं किंजातीयं स्यादित्येवंविधानामपि प्रश्नानामुत्तरप्रव-

Digitized by Google

क्रमेणानुसरणीयत्वापातात् । किं च लोके वडवागर्दभसंयोगजानामश्वतराणां वडवाबलीवर्दसंयोगजन्मनां गुमाठाभिधजातिविशेषाणां चोत्पत्तेर्दर्शनादीदृशमिश्रजातीयप्राणिनामुत्पत्तिरसंभावनीया नास्तीत्येतस्य सुतर्क्यत्वात् । अहं स्वयमपि पुरा मार्जारमूषकसंयोगजातमुभयोः स्फुटचिह्नयुतं जीवविशेषमपश्यं, यत्र प्रकृतिस्तथाविधं जीवं सृजन्ती नैकतरजातीयप्रतिमूर्तिमात्रमनुसृतवत्यपि तु तत्प्राणिविशेषजातिद्वयं मिश्रितवतीति प्रतीयाय । लोके भूयो भूय उपलभ्यमानानां विकृतोत्पत्तिमतां जीवानां विमर्शे साधु क्रियमाणे तु पूर्वपूर्वपुरुषोत्पत्तिक्रमानुसारेण सर्वेषामपि जीवानां प्रभवस्य जातिनिर्णयो जीवजातिष्वपि दुष्करः स्यात् । किं च नियमतः पूर्वपूर्वोत्पत्तिक्रमाख्यातत्वेन परिचिन्तितं नामविशेषैकसमाधिगम्यमर्थस्वरूपं नष्टमेव स्यात् । परं तु यदि प्राणिनां महीरुहाणां च जातय उत्पत्त्यैव विवेचनीया भविष्यंस्तर्हि व्याघ्रोऽयमोषधिविशेषो वाऽयमिति ज्ञानायाद्यस्य मातापितृदर्शनपर्यन्तमपरस्य चोत्पादकबीजप्रसवितृमहीरुहदर्शनपर्यन्तमनुधावनमवश्यकरणीयमभविष्यत् ॥

२४ ॥ नापि भौतिकाकारैः ॥—एतावता सकलेन प्रबन्धेनेदं सुस्पष्टमभिहितं भवति । मनुष्याः स्वस्वेन्द्रियग्राह्यधर्मसमुदायैरेव भिन्नभिन्नद्रव्यजातिस्वरूपाणि रचयन्ति । किं च तेषां तत्तज्जातिषु व्यवस्थापने भूयिष्ठैर्मनुष्यैस्तेषामाभ्यन्तरावयवसंस्थितयो न विचार्यन्ते । अत्र शास्त्रीयपरिभाषाभ्यासिनो विहाय लोके नैव केनापि केऽपि भौतिकाकाराः कदाचिदप्यन्विष्टा अभूवन् । किं चैवमपि ये अर्थस्वरूपज्ञानपराङ्मुखा भौतिकाकारविमर्शपरिश्रमशून्याः केवलमिन्द्रियग्राह्यैरेव धर्मैः पदार्थानां परस्परं भेदं विज्ञायात्मानं संतोषयन्ति तेऽज्ञानिनो जनाः सूक्ष्मदर्शनशीलान् पदार्थाभ्यन्तरावयवसंस्थितिदर्शिनः सविस्रम्भं किमप्यतिगूढं स्वरूपं वदतो विदुषोऽपेक्ष्य प्रायो निपुणतरं पदार्थभेदैः परिचितास्तेषां व्यवहारैस्तान् साधुतरं विवेक्तुं शक्नुवन्तः प्रत्येकस्मात्पदार्थात् स्वस्वाभिप्रेतं सुष्ठुतरं जानन्ति ॥

२५ ॥ भेदकानि स्वरूपाणि मनसा परिकल्प्यन्ते ॥—द्रव्याणामार्थस्वरूपाणि तज्ज्ञिज्ञासुभिराविष्क्रियन्त इति कल्पयित्वापि सप्रमाणमेतच्चिन्तयितुं न शक्यते यत् साधारणानामप्रयोगेण पदार्थानां विशेषजातिषु परिगणनं तैराभ्यन्तराबाह्यलक्षणविशेषैरन्यैर्वा नियम्यते न पुनस्तेषां स्फुटेराकारैरिति । सर्वदेशेषु भाषाणां शास्त्रप्रचारात् चिरं पूर्वमेव व्यवस्थापितत्वात् । अतः शास्त्रिणो नैयायिका एव वा विविधमनुष्यजातिषु व्यवहृतानां जातिपदानां एकैकस्य स्वरूपस्याकाराणां च विमर्शाय पराक्रामन्त, परं तु तत्तत्पदार्थैरुपलभ्यमानप्रत्यक्षबाह्यधर्मैरेव पदार्थांस्तत्तज्जातिषु व्यवस्थाप्य तेन तेन नाम्ना व्यवहरन्तस्तानि न्यूनाधिकव्यक्तिबोधकानि पदानि सर्वासु भाषासु भूयशः शास्त्रानभिज्ञा एव विरचयन्ति । किं च तेषां पदार्थानामेकैकस्य निखिलजातेर्वा बोधनावसरेऽविद्यमानानपि तान् परान्प्रति बोधयन्ति ॥

२६ ॥ अत एव भूयिष्ठानि तानि नानाविधान्यनियतानि च सन्ति ॥—इत्थं च वयं द्रव्याणि तेषां शाब्दस्वरूपानुसारेणैवाभिलपामो जातिषु व्यवस्थापयामश्च न पुनरार्थस्वरूपानुसारेणेत्यस्य सुस्पष्टतया तानि स्वरूपाणि कथं केन च निर्मीयन्त इत्यपरमपि संप्रति विचार्यते । तत्र केनेत्यस्योत्तरं तु मनसैव न पुनः प्रकृत्येति सुस्पष्टमेव । तेषां प्रकृतिकार्यत्वे नानाजातीयमनुष्येषु भूयो ऽनुभूयमानानां बहुविधानां भेदानामसंभव एव स्यात् । यतः परीक्षायां कृतायां सर्वेषु मनुष्येषु न कस्या अपि द्रव्यविशेषजातेर्नापि सर्वासामस्माभिर्दृढपरिचितानां शाब्दं स्वरूपमेकविधमुपलभ्यते । किंच यदीदं प्रकृतिकार्यं स्यात्तर्हि मनुष्यपदेनाभिलप्यमानमवच्छेदकविज्ञानं तत्तन्मनुष्याणां भिन्नं भिन्नं भवितुमर्हतीति न संभाव्येत । किं च कस्य चिद्विवेकशालिजीवत्वं कस्य चित् पक्षरहितद्विपादाविस्तृतनखशालिजीवत्वं च मनुष्यपदबोध्यत्वेन तात्पर्यगोचरो न स्यात् । अस्ति चेतद् यो मनुष्यपदेनेन्द्रियस्वैरगतिभ्यां युतमाकारविशेषवन्तं पिण्डमभिलपति तद्दृष्ट्या मनुष्यविशेषजातेः स्वरूपमन्यादृशं, यश्च किंचिदधिकपरीक्षया तस्मिन् विवेकगुणमधिकं योजयति तद्दृष्ट्या स्वन्या-

दृशमेव तत्पदाभिधेयविशेषजातिस्वरूपम् । अत एव सेव व्यक्तिरेकस्य मतेन मनुष्यपदेनाभिलप्या भवति परस्य मते नेति वैचित्र्यमुपपद्यते । मन्ये मनुष्यविशेषजातेर्भेदकं स्वरूपं सुप्रसिद्धोयमूर्द्धदृष्टिमुखाकार इति तु न कोपि कथयति, तथापि भूयांसो मनुष्या उत्पत्तिमुपेत्याकृत्यैव प्राणिनां जातीर्निश्चिन्वन्तीति तु स्पष्टमेव । आकृत्या विसदृशा बहवो मनुष्यगर्भजा मनुष्यबाला इव विवेकशक्तियुता न सन्तीत्यज्ञात्वैव केवलं तेषां प्रायिकमनुष्यबालकाकारवैसादृश्येनैव मनुष्यजातीयत्वाभावं विनिश्चित्य संस्कारविशेषार्हाः सन्ति न वेत्यस्य विवादस्य बहुत्र प्रसिद्धत्वात् । केषां चित्सकलाभिमतमनुष्याकारवत्त्वेपि यावज्जीवं ते हस्तिमर्कटादिषूपलभ्यमानवैनयिकबुद्धिमन्तो न भवितुमर्हन्ति । किं च वैनयिकबुद्धिमद्भिर्व्यापारितास्ते इत्यपि न प्रकटयन्ति । एतदुक्तं भवति । बाह्याकार एव (मनुष्यत्वज्ञानायापेक्षितो) मनुष्यविशेषजातेरसाधारणं स्वरूपं न पुनर्वैनयिकबुद्धिशक्तिर्यदभावो (मनुष्येषु) उचितावसरविशेषे न केनापि ज्ञातुं शक्यते । पण्डिता अध्यात्मविदो नीतिज्ञाश्चावश्यमीदृशेष्ववसरविशेषेषु विवेकवत्प्राणीति स्वीयं साधु मनुष्यलक्षणं त्यक्त्वा तत्स्थाने मनुष्यविशेषजातेः किं चिदन्यदेव स्वरूपं कथयन्तु । अस्मिन्नवसरे ऽवधारणायोग्यान्युदाहरणानि श्रीमान् मेनेजाभिधमहाशयो ऽवोचत् । तथाहि । यदा श्रीमान् मार्टिनाभिधः केनदेशीयो मठाधिकारी समजनिष्ट तदा स आकारेणातितरां खर्व आसीद् येन विरूपं प्राणयन्तरमेव न मनुष्य इति जनप्रवादो ऽभूत् । किंचित्कालपर्यन्तं तावत् स उपनयनसंस्कारार्हो ऽस्ति नवेत्यपि विवादः प्रचरित आसीत् । वृत्तेपि तस्य संस्कारे चिरतत्परिचयशालिन एव जनास्तं मनुष्य इति व्यवजह्रुः । ईश्वरेण स तथा विषमाकृतिर्निर्मित इति स आमरणं लोकैर्दुराकृतिर्मठाधिकारीति दुर्नाम्नैवाभ्यधायि । मेनाजिइनामकग्रन्थे २७८ ऽष्टसप्तत्यधिकद्विशततमे त्रिंशदधिकचतुःशततमे च पृष्ठे वर्णितः कुमारः केवलमाकृतिविपर्यासेनैव मनुष्यजातिबाह्यकल्प आसीत् । तेनैव च सो ऽतिकृच्छ्रेण जिजीव । यदि तस्याकृतिः किंचिदेवाधिकं विकृता ऽभविष्यत्तर्हि अमनु-

ष्यजन्तश्चेव सोपि हत एवाभविष्यत् । एवं सत्यपि मुखाकृतैा किंचिदेव विपर्यस्तायां सत्यां वैनयिकबुद्धिशाली जीवस्तस्मिन्नास्तीति कथने न किमपि कारणं पश्यामः । किंचिदेव दीर्घं मुखं, चिपिटनासिका, विस्तृतवदनमन्ये वा दुराकृतिमदवयवाः कुतो न तादृशेनात्मना तादृशैरवयवैश्च घटिता भवेयुर्यैः स विरूपाकृतिमानपि भजनमन्दिराधिष्ठाता बभूव ॥ ॥ शेषमग्रे ॥

॥ रामानुजदर्शनम् ॥

॥ तत्त्वत्रयचुलुकम् ॥

॥ यतिपतिमतदीपिका ॥

॥ अथेश्वरो निरूप्यते ॥

सर्वेश्वरत्वं सर्वशेषित्वं सर्वकर्माराध्यत्वं सर्वफलप्रदत्वं सर्वकार्योत्पादकत्वं स्वज्ञानस्वेतरसमस्तद्रव्यशरीरित्वमित्यादीनि ईश्वरलक्षणानि अयमीश्वरः सूक्ष्मचिदचिद्विशिष्टवेषेण जगदुपादानकारणं संकल्पविशिष्टवेषेण निमित्तकारणं कालाद्यन्तर्य्यामिवेषेण सहकारिकारणं च कार्यरूपेण विकारयोग्यं वस्तूपादानं कार्य्यतया परिणामयितृनिमित्तं कार्य्योत्पत्त्युपकरणं वस्तु सहकारि यद्वा उत्तरोत्तरावस्थाविशिष्टस्वरूपापेक्षया तदनुगुणनियतपूर्वभाव्यवस्थाविशिष्टं तदुपादानं यथा घटत्वावस्थाविशिष्टमृद्द्रव्यापेक्षया पिण्डत्वावस्थाविशिष्टं तदेव द्रव्यं परिणामोन्मुख्यातिरिक्तेनाकारेणापेक्षितं कारणं निमित्तम् अस्मिन् पक्षे सहकारिणो निमित्तेऽन्तर्भावः एवं त्रिविधकारणपक्षे कारणद्वयपक्षे च कारणलक्षणलक्षितत्वादखिलजगत्कारणत्वं भगवतो नारायणस्यैव संभवति ॥

ननु कथं नारायणे कारणत्वपर्य्यवसानमिति चेदुच्यते न्यायसहकृतवेदान्तवाक्यविचारे एवं पर्य्यवस्यति तद्यथा आदैा तावत्प्रकृतेर्जगत्कारणत्वं नोपपद्यते ईक्षत्याद्यभावात् छान्दोग्ये तावत्सदाकाशप्राणशब्दवाच्यानां जगत्कारणत्वं प्रतीयते वाजसनेयके ब्रह्मशब्दवाच्यस्य कारणत्वं प्रतीयते सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामेकविषयत्वे प्रतिपादयि-

तथ्ये छागपशुन्यायेन सामान्यवाचकानां सदादिशब्दानां विशेषे ब्रह्मणि पर्यवसानं वक्तव्यम् एवमुक्तन्यायेन ब्रह्मशब्दस्य तैत्तिरीयोक्तात्मशब्दवाच्ये पर्य्यवसानम् आत्मशब्दवाच्यः कइत्याकाङ्क्षायां श्रुतिप्रसिद्ध इन्द्रो वा तथा प्रसिद्धोऽग्निर्वा उपास्यत्वेन प्रसिद्धः सूर्यो वा कारणत्वेनोक्तः सोमो वाऽभीष्टफलप्रदत्वेनोक्तः कुबेरो वा यमो वा वरुणो वेति विषये एतेषां कर्मवश्यत्वपरिच्छिन्नैश्वर्य्यत्वसंहार्य्यत्वश्रवणात् नैते जगत्कारणभूताः किंतु श्वेताश्वतरे शिवस्य कारणत्वं भासतइति भाति एवमथर्वशाखायां शिवशब्दवाच्यस्य ध्येयत्वं कारणत्वं भासते तथैवाथर्वशिरसि रुद्रशब्दवाच्यस्य सर्वात्मकतोच्यते तैत्तिरीये हिरण्यगर्भस्य जगत्कारणत्वं प्रतीयते अत्रापि सामान्यविशेषन्यायात् शिवशम्भुरुद्रादिशब्दानां हिरण्यगर्भे वाच्यविशेषे पर्य्यवसानं युज्यते शिवशब्दस्य शिवमस्तु सर्वजगतां शिवं कर्मास्तु पन्थानः सन्तु ते शिवा इत्यादिभिर्मङ्गलवाचकत्वम् रुद्रशब्दस्याग्निवाचकत्वम् एवं महेश्वरशंभ्वादिसामान्यशब्दा अपि अवयवशक्त्या चतुर्मुखे पर्य्यवस्यन्ति कारणवाचि शिवादिशब्दानां मुख्यवृत्त्या रुद्रपरत्वं वा किं न स्यादिति न शङ्कनीयं रुद्रस्य चतुर्मुखादुत्पत्तिश्रवणात् अनपहतपाप्मत्वश्रवणाच्च न रुद्रस्य कारणत्वं अतो हिरण्यगर्भप्रजापतिस्वयंभुवादिशब्दवाच्यचतुर्मुखे शिवादिशब्दाः पर्य्यवस्यन्ति एवमपि महोपनिषन्नारायणोपनिषत्सु बालोपनिषन्मैत्रायणीयपुरुषसूक्तनारायणानुवाकान्तर्य्यामिब्राह्मणादिषु नारायणस्यैव परमकारणत्वसर्वशब्दवाच्यत्वमोक्षप्रदत्वजगच्छरीरित्वादेः प्रतिपादनात्स्वयंभूहिरण्यगर्भप्रजापतिशब्दानां नारायणे पर्य्यवसानं युक्तमिति नारायणएवाखिलजगत्कारणं सर्वविद्यावेद्यश्च ननु अन्तरादित्यविद्या रुद्रपरेति शंका न कर्त्तव्या तस्या विष्णुपरत्वस्यैव बहुप्रमाणैः सिद्धत्वात् भगशब्दस्य सकारान्तत्वप्रतिपादनाच्च तर्हि दहरविद्यापरमाकाशशब्दवाच्यनारायणान्तर्य्यामितया रुद्रस्य प्रतिपादनाद्दहरविद्या रुद्रपरेति न शङ्कनीयं नारायणान्तर्वर्त्तिगुणजातस्यैवोपास्यत्वेन तत्राभिधानात् एवं सर्वविद्यास्वप्यूह्यम् अतः समस्तकल्याणगुणात्मकत्वाखिलहेयप्रत्यनीकत्वाभ्यां भिन्नं ताभ्यां विशिष्टपरं ब्रह्म जगत्कारणं तन्वद्वैतश्रुत्या ब्रह्मात्मैक्यमेव सत्यं

निर्गुणं च तदन्यत् ज्ञातृज्ञेयादिकं तस्मिन्नेव परिकल्पितं सर्वं मिथ्या ब्रह्म अविद्यया संसरति तत्त्वमसीत्यभेदज्ञानं निवर्त्तकं तस्मान्निर्विशेषचिन्मात्रे ब्रह्मणि वेदान्तानां तात्पर्य्यमिति मतान्तरस्थैः प्रतिपादनात्तत्कथं नारायणे तात्पर्य्यं तस्य समस्तकल्याणगुणाकरत्वादिकथनं चेति चेदुच्यते कारणत्वप्रतिपादकश्रुतिभिर्नारायणस्य कारणत्वे सिद्धे भेदाभेदश्रुत्योर्घटकश्रुत्या विषयभेदेनाऽविरोधे प्रतिपादिते निर्गुणत्वप्रतिपादकश्रुतीनां हेयगुणप्रतिषेधकत्वाद्ज्ञातृज्ञेयादिकल्पकाविद्याया एव अप्रामाणिकत्वात् ब्रह्मकार्यस्य सत्यत्वादविद्यया संसारे जीवगतदोषाणां ब्रह्मण्यपि संभवात् तन्निवर्त्तकान्तरस्य वक्तुमशक्यत्वाददोऽद्वैतवादस्यासंभवात् न निर्विशेषचिन्मात्रब्रह्मसिद्धिः अतो नारायणस्यैव जगत्कारणत्वमोक्षप्रदत्वादिगुणयोगः संभवतीति सविशेषमेव ब्रह्मसूक्ष्मचिदचिद्विशिष्टं ब्रह्मकारणं स्थूलचिदचिद्विशिष्टं ब्रह्मकार्यमिति कारणादनन्यत्कार्य्यमिति विशिष्टाद्वैतवेदान्तिनां संप्रदायः एवमीश्वराङ्गीकारान्निरीश्वरसाङ्ख्यमीमांसकादिमतनिरासः तस्यैवोपादानत्वस्वीकाराद्योगपाशुपतनैयायिकानां मतनिरासः तैर्निमित्तमात्रेश्वराङ्गीकारादीश्वरस्य कार्य्यं प्रत्युपादानत्वनिमित्तत्ववत्कर्तृत्वप्रेरकत्वनियन्तृत्वप्रकाशितृत्वसहकारित्वोदासीनत्वादिकमप्युपपद्यते बाल्ययौवनावस्थादयो दोषाः यथा शरीरगताः न तु शरीरिणि जीवे एवं चिदचिच्छरीरिणः परमात्मनोऽपीति न निर्विकारश्रुतिविरोधः नियमेनाधेयत्वविधेयत्वशेषत्वादेः शरीरलक्षणस्य जगति विद्यमानत्वाज्जगच्छरीरी ईश्वरः तद्गतदोषैरसंस्पृष्टश्च स चेश्वरो विभुस्वरूपः विभुत्वं नाम व्यापकत्वं तच्चेश्वरस्य त्रिधा स्वरूपतो धर्मभूतज्ञानतो विग्रहतश्च स चानन्त इत्युच्यते अनन्तो नाम त्रिविधपरिच्छेदरहितः त्रिविधपरिच्छेदस्तु देशतः कालतो वस्तुतः परिच्छेदः सत्यत्वज्ञानानन्दत्वामलत्वादयईश्वरस्य स्वरूपनिरूपकधर्माः ज्ञानशक्त्यादयो निरूपितस्वरूपविशेषकाधर्माः सर्वज्ञत्वसर्वशक्तित्वादयः सृष्ट्युपयुक्ताधर्माः वात्सल्यसौशील्यसौलभ्यादयः आश्रयणोपयुक्ताधर्म्माः कारुण्यादयो रक्षणोपयुक्तधर्माः एतेषां स्वरूपं बुद्धिपरिच्छेदे निरूपितमिति इह न प्रपञ्च्यते ॥

अयमीश्वरोऽण्डसृष्ट्यनन्तरं चतुर्मुखदक्षकालादिष्वन्तर्यामितया स्थित्वा सृष्टिं करोति विष्ण्ववतारकरूपेण मनुकालाद्यन्तर्यामिरूपेण च स्थित्वा रक्षको भवति रुद्रकालान्तकादीनाञ्चान्तर्यामितया संहारमपि करोति अतः सृष्टिस्थितिसंहारकर्त्ता च भवति एवं प्रकारईश्वरः परव्यूहविभवान्तर्याम्यर्चावतारकरूपेण पञ्चप्रकारः तत्र परो नाम त्रिपाद्विभूतौ कुमुदकुमुदाक्षपुण्डरीकवामनशङ्कुकर्णसर्वनेत्रसुमुखसुप्रतिष्ठितादिभिः दिव्यायुधभूषणपरिजनपरिच्छदान्वितैर्दिव्यनगरपालकैः परिरक्षितश्रीमद्वैकुण्ठाख्ये पुरे चण्डप्रचण्डसुभद्रजयविजयधातृविधातृप्रभृतिभिर्द्वारपालकैरुपेत श्रीमद्दिव्यालये श्रीमहामणिमण्डपे धर्माद्यष्टपादविरचितसिंहासने शेषपर्यङ्के दिव्यमङ्गलविग्रहविशिष्टश्चतुर्भुजः श्रीभूलीलासहितः शङ्खचक्रादिदिव्यायुधोपेतः श्रीमत्किरीटादिदिव्यभूषणभूषितः अनन्तगरुडविष्वक्सेनादिभिर्नित्यैस्सामगानपरैरन्यैर्मुक्तैश्चानुभूयमानः ज्ञानप्रशक्त्याद्यनन्तकल्याणगुणविशिष्टः परब्रह्मपरवासुदेवादिशब्दवाच्यो नारायणः ॥

व्यूहो नाम पर एव उपासनार्थं जगत्सृष्ट्याद्यर्थं च वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धभेदेन चतुर्द्धावस्थितः तत्र षड्गुणपरिपूर्णो वासुदेवः ज्ञानबलाभ्यां सङ्कर्षणः ऐश्वर्य्यवीर्य्याभ्यां प्रद्युम्नः शक्तितेजोभ्यामनिरुद्धः इति गुणविभागः एतेषु चतुर्षु प्रत्येकं त्रयस्त्रयोऽवतीर्णाः केशवादयो व्यूहान्तराणि द्वादशमासानां द्वादशादित्यानां चाधिदैवतानि ऊर्द्ध्वपुण्ड्रेषु तेषामेव स्थानं विधीयते तत्र कनकप्रभः केशवश्चतुश्चक्रधरः श्यामो नारायणश्चतुःशङ्खधरः मणिप्रभाभो माधवश्चतुर्गदाधरः चन्द्राभो गोविन्दश्चतुःशार्ङ्गधरः पद्मकिञ्जल्कसन्निभो विष्णुश्चतुर्हलधरः अब्जाभो मधुसूदनश्चतुर्मुसलधरः अग्निवर्णस्त्रिविक्रमश्चतुःखड्गधरः बालसूर्याभो वामनश्चतुर्वज्रधरः पुण्डरीकाभः श्रीधरश्चतुष्पट्टिशधरः तडित्प्रभो हृषीकेशश्चतुर्मुद्गरधरः सूर्याभः पद्मनाभः पञ्चायुधधरः इन्द्रगोपनिभो दामोदरश्चतुःपाशधरः ॥

विभवो नाम तत्तत्सजातीयरूपेणाविर्भावः स दशधा ते च मत्स्यादयोऽवतारविशेषाः ब्रह्मणे प्रमाणप्रदत्वार्थो मत्स्यावतारः अमृतोत्पादने मन्दरधराधारत्वेनावतीर्णः कूर्मावतारः भूमेरुद्धरणार्थमवतीर्णो वराहः

आश्रितसंरक्षणार्थं महाऽसुरयहस्तंभेऽवतीर्णो नृसिंहावतारः त्रिविक्रमो भूत्वा स्वपादारविन्दोद्भवेन जलेन जगत्पापहरणेन तद्रक्षणार्थावतीर्णो वामनः दुष्टक्षत्रियनिरसनार्थं परशुरामः शरणागतरक्षणधर्मस्थापनार्थं श्रीरामः प्रलंबादिनिरसनार्थं बलभद्रः मोक्षोपायदर्शनार्थं श्रीकृष्णः कलिनिर्मोचनार्थे कल्क्यवतारः एवमेकैकावतारेष्वनन्तप्रकाराः सन्ति षट्त्रिंशद्भेदभिन्नाः पद्मनाभादयोपि पुनर्दधिभक्तहयग्रीवनरनारायणादयोपि एवं मुख्यगौणपूर्णांशावेशाद्यवताराः बहुप्रकाराः तेषू पास्यानुपास्यविभागो द्रष्टव्यः अवताराणामिच्छैव हेतुः न कर्मप्रयोजने दुष्टविनाशपूर्वकं साधुपरित्राणमेव अन्तर्य्यामित्वं नाम स्वर्गनरकाद्यनुभवदशायामपि जीवात्मनः सुहृत्त्वेन योगिभिर्द्रष्टव्यतया हृदयप्रदेशावस्थितं रूपं जीवेन साकं विद्यमानोपि तद्गतदोषैरसंस्पृष्टो वर्त्तते ॥

अर्चावतारो नाम देशकालविप्रकर्षरहिताश्रिताभिमतद्रव्यादिकं शरीरतया स्वीकृत्य तस्मिन्नेव प्राकृतशरीरविशिष्टः सच्चार्चकपराधीनस्नानभोजनासनशयनस्थितिः सर्वसहिष्णुः परिपूर्णः गृहग्रामनगरप्रशस्तदेशशैलादिषु वर्त्तमानो मूर्त्तिविशेषः सच स्वयं व्यक्तदैवसैद्धमानुषभेदाच्चतुर्विधः एवमुक्तासु पञ्चावस्थास्वपि श्रीविशिष्टएव भगवान्वर्त्तते इति श्रुत्या प्रमाणासिद्धोर्थः तेन एकायनोक्तनिःश्रीकवादो निरस्तः एवमीश्वरो निरूपितः ॥

इति श्रीयतीन्द्रमतदीपिकायां ईश्वरनिरूपणं नाम नवमोऽवतारः ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER X.

THE VAIŚESHIKA OR AULÚKYA-DARŚANA.

(*Continued from page* 381.)

But it may here be asked what is the proof of duality, &c. being thus produced from *apekshábuddhi?* The great doctor

---

॥ सर्वदर्शनसङ्ग्रहः ॥

द्वित्वादेरपेक्षाबुद्धिजन्यत्वे किं प्रमाणम् अत्राहुराचार्य्याः अपेक्षा-

(Udayana) maintained that *apekshábuddhi* must be the producer of duality, &c., because duality is never found separated from it (?), while at the same time we cannot hold *apekshábuddhi* as the cause only of its being known, (and therefore it follows that it must be the cause of its being produced,)* just as contact is with regard to sound. We however maintain the same opinion by a different argument; duality, &c., cannot be held to be made known *(jnápya)* by that non-eternal intelligence whose object is two or more individual unities (i. e. *apekshábuddhi*), because these are qualities which reside in a plurality of subjects, (and not in any one individual) † as 'severalty' does; (and therefore, as *apekshábuddhi* is not their *jnápaka*, it must be their *janaka*).

Next we will describe the order of the successive destructions. From *apekshábuddhi* arises, simultaneously with the production of duality, the destruction of the knowledge of the genus of unity; next arises from the knowledge of the genus of duality, simultaneously with the knowledge of the quality duality, the destruction of *apekshábuddhi*, next from the destruction of *apek-*

* Every cause must be either *jnápaka* or *janaka; apekshábuddhi*, not being the former, must be the latter.

† *Apekshábuddhi* apprehends 'this is one,' 'this is one,' &c ;—but duality for instance does not reside in either of these, but in *both* together.

बुद्धेर्द्वित्वादेस्तत्पादिका भवितुमर्हति व्यञ्जकत्वानुपपत्तो तेनानुविधीयमानत्वात् शब्दं प्रति संयोगवदिति। वयन्तु ब्रूमः द्वित्वादिकमेकत्वद्वयविषयानित्यबुद्धिव्यङ्ग्यं न भवति अनेकाश्रितगुणत्वात् पृथक्त्वादिवदिति ।

निवृत्तिक्रमो निरूप्यते अपेक्षाबुद्धित एकत्वसामान्यज्ञानस्य द्वित्वोत्पत्तिसमकालं निवृत्तिः अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानात् द्वित्वगुणबुद्धिसमसमयं द्वित्वस्यापेक्षाबुद्धिनिवृत्तेर्द्रव्यबुद्धिसमकालगुणबुद्धेः द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालं द्रव्यबुद्धेस्तदनन्तरं संस्कारादिति । तथाच वयह श्लोकाः ।

आदावपेक्षाबुद्ध्या हि नश्येदेकत्वजातिधीः ।
द्वित्वोदयसमं पश्चात् सा च तज्जातिबुद्धितः ॥

shábuddhi, arises, simultaneously with the knowledge of the two substances, the destruction of the duality; next from the knowledge of the two substances, arises, simultaneously with the production of imagination *(sanskára)*, the destruction of the knowledge of the quality; and next from imagination arises the destruction of the knowledge of the substances.

The evidence for the destruction of one kind of knowledge by another, and for the destruction of another knowledge by imagination, is to be found in these very knowledges themselves which are the subjects of the discussion; since we may see that they *are* successively destroyed by the rise of others produced from them, knowledge, like sound, being a special quality of an all-pervading substance, and of momentary duration.* I may briefly add that when you have the knowledge of the genus of unity simultaneous with an action in one of the two things themselves producing that separation which is the opposite to the conjunction that produces the substance, in that case

* The Vaiśeshikas held that the jívátmá and space are each an all-pervading substance, but the individual portions of each have different special qualities; hence one man know what another is ignorant of, and one portion of ether has sound when another portion has not. Dr. Röer, in his version of the Bhāshā Parichheda has mistranslated an important Sūtra which bears on this point. It is said in Sūt. 26.

——अथाकाशशरीरिणां ।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥

which does not mean "the special qualities of ether and soul are limitation to space and momentary duration," but "the special qualities of ether and soul (i. e. sound, knowledge, &c.,) are limited to different portions and of momentary duration."

द्वित्वाख्यगुणधीकाले ततो द्वित्वं निवर्त्तते ।
अपेक्षाबुद्धिनाशेन द्रव्यधीजन्मकालतः ॥
गुणबुद्धिर्द्रव्यबुद्ध्या संस्कारोत्पत्तिकालतः ।
द्रव्यबुद्धिश्च संस्कारादिति नाशक्रमो मत इति ॥

बुद्धेर्बुद्ध्यन्तरविनाश्यत्वे संस्कारविनाश्यत्वे च प्रमाणं विवादाध्यासितानि ज्ञानानि उत्तरोत्तरकार्य्यविनाश्यानि क्षणिकविभुविशेषगुणत्वात् शब्दवत् । द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्म्मसमकालमेकत्वसा-

Digitized by Google

you have the subsequent destruction of duality produced by the destruction of its abiding place (the two things); but where you have this separate action taking place simultaneously with the rise of *apekshábuddhi*, there you have the destruction of duality produced by the united influence of both. *

* The author here mentions two other causes of the destruction of *dwitwa.*, beside that already given in line 3, (*apekshábuddhi-náśa*) viz. *áśrayanáśa*, and the united action of *both.*

1. Ekatwa-jnána, ...	Avayava-kriyá, ...	———
2. Apekshábuddhi, ...	Avayava-vibhága, ...	Avayava-kriyá.
3. Dwitwotpatti and ekatwa-jnána-náśa.	— Sanyoga-náśa, ...	Avayava-vibhága.
4. Dwitwatwajnána. ...	Dwitwádhárasya (i. e. avayavinah) náśa.	— Sanyoga-náśa.
5. Viśishta-buddhi & apekshábuddhi-náśa.	Dwitwa-náśa (i. e. of avayavin).	Adhára-náśa (of avayavin).
6. Dwitwa-náśa & dravya-buddhi.	———	Dwitwa-náśa.

The second and third columns represent what takes place, when, in the course of the six steps of *apekshábuddhi*, &c., one of the two halves is itself divided either at *the first* or the *second* moment. In the first case, the *dwitwa* of the whole is destroyed in the fifth moment, and therefore its only cause is its immediately preceding *dwitwádhára-náśa*, or, as Mádhava calls it, *áśrayanivṛitti*. In the second case, the *náśa* arrives at the same moment simultaneously by both columns (1) and (3), and hence it may be ascribed to the united action of two causes, *apekshábuddhi-náśa* and *ádhára-náśa*. Any *kriyá* which arose in one of the halves after the second moment would be unimportant, as the *náśa* of the *dwitwa* of the whole would take place by the original sequence in column (1) in the sixth moment; and in this way it would be too late to affect that result.

मान्यचिन्तया आश्रयनिवृत्तेरेव द्वित्वनिवृत्तिः कर्म्मसमकालमपेक्षाबुद्धिचिन्तनादुभाभ्यामिति संक्षेपः ।

अपेक्षाबुद्धिर्नाम विनाशकविनाशप्रतियोगिनी बुद्धिरिति बोद्धव्यम् ।

अथ द्व्यणुकनाशमारभ्य कतिभिः क्षणैः पुनरन्यद् द्व्यणुकमुत्पद्य रूपादिमद्भवतीति जिज्ञासायामुत्पत्तिप्रकारः कथ्यते । नोदनादिक्रमेण द्व्यणुकनाशः नष्टे द्व्यणुके परमाणावग्निसंयोगात् श्यामादीनां निवृत्तिः निवृत्तेषु श्यामादिषु पुनरन्यस्मादग्निसंयोगाद्रक्तादीनामुत्पत्तिः । उत्पन्नेषु रक्तादिषु अदृष्टवदात्मसंयोगात् परमाणौ द्रव्यारम्भणाय क्रिया तया

Apekshábuddhi is to be considered as that operation of the mind which is the counterentity to that emergent non-existence (i. e. destruction) which itself causes a subsequent destruction.*

Next we will inquire in how many moments, commencing with the destruction of the compound of two atoms (the *dwyanuka*), another compound of two atoms is produced, having form, &c. In the course of this investigation the mode of production will be explained. First, the compound of two atoms is gradually destroyed by the series of steps commencing with the contact of fire †; secondly from the conjunction of fire arises the destruction of the qualities, black, &c., in the single atom; thirdly, from another conjunction of fire arises the production of red, &c., in the atom; fourthly, from conjunction with soul possessing merit, arises an action ‡ in the atom for the production of a substance; fifthly, by that action is produced a separation of that atom from its former place; sixthly, there is produced thereby the destruction

* I. e. From the destruction of *apekshábuddhi* follows the destruction of *dwitwa;* but the other destructions previously described were followed by some production,—thus the knowledge of *dwitwatwa* arose from the destruction of *ekatwa-jnána*, &c.—I may remind the reader that in Hindu logic the counterentity to the non-existence of a thing is the thing itself.

† From the conjunction of fire is produced an action in the atoms of the jar; thence a separation of one atom from another; thence a destruction of the conjunction of atoms which made the black (or unbaked) jar; thence the destruction of the compound of two atoms.

‡ I. e. a kind of initiative tendency.

पूर्व्वदेशाद्विभागः विभागेन पूर्व्वदेशसंयोगनिवृत्तिः तस्मिन्निवृत्ते परमाण्वन्तरेण संयोगोत्पत्तिः संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकारम्भः आरब्धे द्व्यणुके कारणगुणादिभ्यः कार्य्यगुणादीनां रूपादीनामुत्पत्तिरिति यथाक्रमं नव क्षणाः । दशक्षणादिप्रकारान्तरं विस्तरभयान्नेह प्रतन्यते । इत्थं पीलुपाकप्रक्रिया पीठरपाकप्रक्रिया तु नैयायिकधीसम्मता ।

विभागजविभागो द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्च । तत्र प्रथमः कथ्यते कार्य्यव्याप्ते कारणे कर्म्मोत्पन्नं यदावयवान्तराद्विभागं विधत्ते न तदाकाशादिदेशाद्विभागः । यदा त्वाकाशादि-

of its conjunction with that former place; seventhly, is produced the conjunction with another atom; eighthly, from these two atoms arises the compound of two atoms; ninthly, from the qualities, &c., of the causes (i. e. the atoms) are produced form, colour, &c., the qualities of the effect (i. e. *dwyanuka*). Such is the order of the series of nine moments. The other two series,* that of the ten, and that of the eleven moments, are omitted for fear of prolixity. Such is the mode of production, if we hold (with the Vaiśeshikas) that the baking process takes place in the atoms of the jar.† The Naiyáyikas, however, maintain that the baking process takes place in the jar.

'Disjunction produced by disjunction' is twofold,—that produced by the disjunction of the intimate or material causes only, and

* These are explained at full length in the Siddhánta Muktávali, p. p. 104-5 In the first series, we have, 1. the destruction of the *dwyaṇuka* and simultaneously a disjunction from the old place produced by the disjunction (of the parts); 2. the destruction of the black colour in the *dwyaṇuka*, and the simultaneous destruction of the conjunction of the *dwyaṇuka* with that place; 3. the production of the red colour in the atoms, and the simultaneous conjunction with another place; 4. the cessation of the action in the atom produced by the original conjunction of fire. The remaining 5—10 agree with the 4—9 above.

† The Vaiśeshikas hold that when a jar is baked, the old black jar is *destroyed*, its several compounds of two atoms, &c., being destroyed; the action of the fire then produces the red colour in the separate atoms, and, joining these into new compounds, eventually produces a new red jar. The exceeding rapidity of the steps prevents the eye's detecting the change of the jars.—The followers of the Nyáya maintain that the fire penetrates into the different compounds of two or more atoms, and without any destruction of the old jar, produces its effects on these compounds, and thereby changes, not the jar, but its colour, &c., — it is still the same jar, — only it is red, not black.

देशाद्विभागः न तदावयवान्तरादिति स्थितिनियमः कर्म्मणो गगनवि-
भागाकर्तृत्वस्य द्रव्यारम्भकसंयोगविरोधिविभागारम्भकत्वेन धूमस्य धर्म-
ध्वजवर्गणेव व्यभिचारानुपलम्भात् ततश्चावयवकर्म्म चावयवान्तरादेव
विभागं करोति नाकाशादिदेशात् तस्माद्विभागाद्द्रव्यारम्भकसंयोगनिवृत्तिः।
ततः कारणाभावात् कार्य्याभाव इति न्यायादवयविनिवृत्तिः, निवृत्तेऽवय-
विनि तत्कारणयोरवयवयोर्वर्त्तमानो विभागः कार्य्यविनाशविशिष्टं कालं
स्वतन्त्रं वावयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्य्यसंयुक्तादाकाशदेशाद्विभा-

that produced by the disjunction of the intimate cause and the non-cause [i. e. the place.] We will first describe the former kind.

It is a fixed rule that when the action of breaking arises in the [material] cause which is inseparably connected with the effect, [i. e. in one of the two halves of the pot,] and produces a disjunction from the other half, there is not produced at that time a disjunction from the place or point of space occupied by the pot; and, again, when there is a disjunction from the point of space occupied by the pot, the disjunction from the other half is not contemporary with it, but has already taken place. For just as we never see smoke without its cause fire, so we never see that effect of the breaking in the pot which produces the disjunction from the point of space,* without having previously seen the origination of that disjunction of the halves which stops the conjunction whereby the pot was brought into being. Therefore the action of breaking in the parts produces the disjunction of one part from another, but not the disjunction from the point of space; next this disjunction of one part from another produces the destruction of that conjunction which had brought the pot into existence; and thence arises the destruction of the pot, according to the principle, *cessante causâ cessat effectum*. The pot being thus destroyed,—that disjunction, which resides in both the halves (which are the material or intimate causes of the pot,) during the time that is marked by the destruction of the pot, or perhaps

* In p. 109, l. 14 I read—गगणविभागकर्तृत्वस्य.

गमारभते न निष्क्रियस्य कारणाभावात् । द्वितीयस्तु हस्ते कर्म्मोत्पन्नम-वयवान्तराद्विभागं कुर्व्वत् आकाशादिदेशेभ्यो विभागानारभते कारणा-कारणविभागः कर्म्म यां दिशं प्रति कार्य्यारम्भाभिमुखं तामपेक्ष्य कार्य्या-कार्य्यविभागमारभते यथा हस्ताकाशविभागाच्छरीराकाशविभागः न चासौ शरीरक्रियाकार्य्यस्तदा तस्य निष्क्रियत्वात् नापि हस्तक्रियाकार्य्यः व्यधि-करणस्य कर्म्मणो विभागकर्तृत्वानुपपत्तेः अतः पारिशेष्यात् कारणाकार-णविभागस्य कारणत्वमङ्गीकरणीयम् ।

having reference only to one independent half, now initiates, in the case of that half where the breaking began, a disjunction from the point of space which had been connected with the pot; but not in the case of the other half, as there is no cause to produce it.*

But the second kind is as follows:—As action which arises in the hand, and causes a disjunction from that with which it was in contact, initiates a disjunction † from the points of space in which the original conjunction took place; and this is 'the disjunction of the intimate cause and the non-cause.' When the action in the hand produces an effect in relation to any points of space, it initiates also in the same direction a disjunction of the intimate effect and the non-effect, since the disjunction of the body (the intimate effect) and the points of space arises from the disjunction of the hand, and the points of space, (the hand being an intimate or material cause of the body, but the points of space being not a cause.) This second disjunction is not produced by the action of the body, because the body is supposed to be at the time inactive; nor is it produced by the action of the hand, be-

* The Siddhānta Mukt. thus describes the series of steps: 1. an action, as of breaking, in one of the halves; 2. the disjunction of the two halves; 3. the destruction of the conjunction which originally produced the pot; 4. the destruction of the pot; 5. by the disjunction of the two halves is produced a disjunction of the severed half from the old place; 6. the destruction of the conjunction with that old place; 7. the conjunction with the new place; 8. the cessation of the original impulse of fracture.—Here the second disjunction (viz. of the half of the pot and the place) is produced by the first disjunction of the halves, the material causes of the pot.

† The original has a plural *vibhāgān*, i. e. disjunctions from the several points.

यदवादि अन्धकारादो भावत्वं निषिध्यत इति तदसङ्गतं, तत्र चतुर्द्धा विवादसम्भवात्। तथाहि। द्रव्यं तम इति भाट्टाः वेदान्तिनश्च भणन्ति, आरोपितं नीलरूपमिति श्रीधराचार्य्याः, आलोकज्ञानाभाव इति प्राभाकरैकदेशिनः, आलोकाभाव इति नैयायिकादयः इति चेत्तत्र द्रव्यत्वपक्षो न घटते विकल्पानुपपत्तेः। द्रव्यं भवदन्धकारं द्रव्यान्तरमन्यद्वा। नाद्यः, यत्रान्तर्भावो ऽस्य तस्य यावन्तो गुणास्तावद्गुणकत्वप्रसङ्गात् न च तमसो द्रव्यबहिर्भाव इति साम्प्रतं निर्गुणस्य तस्य द्रव्यत्वासम्भवेन

cause it is impossible that an action residing in some other place [as the hand] should produce the effect of disjunction [in the body.] Therefore we conclude by exhaustion that we must accept the view—that it is the disjunction of the intimate cause and the non-cause* which causes the second disjunction of the body, and the point of space.

But an opponent may here reply that "what you formerly stated as to existence being denied of darkness, &c., is surely incongruous; for in fact there are no less than four different opinions maintained on this point,—thus *a.* the Bháṭṭa Mímánsakas and the Vedántins hold that darkness is a substance;—*b.* Śrídhara Áchárya† holds that the form of blue is imposed, (and thus darkness will be a quality;) *c.* some of the Prábhákara Mímánsakas hold that it is the absence of the cognition of light; *d.* the Naiyáyikas, &c. hold that it is the absence of light." In reply, we assert that as for the first alleged opinion (*a*), it is quite out of the question, as it is consistent with neither of the two possible alternatives; for if darkness is a substance, it must either be one of the nine well-known substances, earth, &c, ‡, or some different one. But it cannot be any one of the nine, since, under whichever one you would place it, all the qualities of that substance should certainly be found in it; nor

* I. e. the disjunction of the hand and the points of space.

† The author of a commentary on the Bhagavad Gítá.

‡ For द्रव्यादि, read पृथिव्यादि.

द्रव्यान्तरत्वस्य सुतरामसम्भवात् । ननु तमालश्यामलत्वेनोपलभ्यमानं तमः कथं निर्गुणं स्यादिति नीलं नभ इतिवत् भ्रान्तिरेवेत्यलं वृद्धवीवधया । अत एव नारोपितरूपं तमः अधिष्ठानप्रत्ययमन्तरेणारोपायोगात् बाह्यालोकसहकारिरहितस्य चक्षुषो रूपारोपे सामर्थ्यानुपलम्भाच्च । न चायमचाक्षुषः प्रत्ययः तदनुविधानस्यान्यथासिद्धत्वात् । न च विधिप्रत्ययवेद्यत्वायोगो भावे इति साम्प्रतं, प्रलयविनाशावधानादिषु व्यभिचारात् । अत एव नालोकज्ञानाभावः अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्य-

can you on the other hand assert that it is some substance different from these nine, since, being in itself distitute of qualities, it cannot properly be a substance at all, (the very definition of substance being 'that which is the substratum of qualities';) and therefore of course it cannot be a different substance from the nine. But you may ask, "how can you say that darkness is destitute of qualities, when it is perceived as possessed of the dark blue of the tamála blossom?" We reply that it is merely an error, as when men say that the (colourless) sky is blue. But enough of this onslaught on ancient sages.* *b.* Hence it follows that darkness cannot have its form imposed upon it, since you cannot have an imposition of form without supposing some substratum to receive it;† and, again, we cannot conceive the eye as capable of imposing a form when deprived of the concurrent cause, the external light. Nor can we accept that it is an impression independent of the eye, (i. e. produced by the internal sense, mind;) because the conjunction of the eye is not a superfluous but an indispensable condition to its being produced. Nor can you maintain that "absence or non-existence *(abháva)*‡ is incapable of being conveyed by tense affixes (and therefore, as we *do* use such phrases as *tenebrœ oriuntur*, darkness cannot be a mere non-existence;)" because your assertion is too broad as it would include such cases of non-existence, as a mundane

* I am not sure that it would not be better to read विद्धवेविधया 'twice slaying the slain' instead of वृद्धवोवधया.

† Unless you *see* the rope, you cannot mistake it for a serpent.

‡ In p. 110, last line read ऽ भावे.

त्वनियमेन मानसत्वप्रसङ्गात् । तस्मादालोकाभाव एव तमः । न चाभावे भावधर्म्माध्यारोपो दुरुपपादः दुःखाभावे सुखत्वारोपस्य संयोगाभावे विभागत्वाभिमानस्य च दृष्टत्वात् । नचालोकाभावस्य घटाद्यभाववद्रूपवदभावत्वेनालोकसापेक्षचक्षुर्जन्यज्ञानविषयत्वं स्यादित्येषितव्यं, यद्ग्रहे यदपेक्षं चक्षुस्तदभावग्रहेऽपि तदपेक्षत इति न्यायेनालोकग्रहे आलोकापेक्षाया

collapse, destruction, inattention, * &c., (and yet we all know that men do speak of any of these things as past, present, or future, and yet all are cases of *abhâva*.)—c. Hence darkness cannot be the absence of the cognition of light; since, by the well-known rule that that organ which perceives a certain object can also perceive its absence, it would follow that darkness would be perceived by the mind, (since it is the mind which perceives cognitions.†) Hence we conclude that the fourth or remaining opinion must be the true one, viz. that darkness is only the absence of light. And it need not be objected that it is very difficult to account for the attribution to non-existence of the qualities of existence,—for we all see that the quality happiness *is* attributed to the absence of pain, and the idea of separation is connected with the absence of conjunction. And you need not assert that "this absence of light must be the object of a cognition produced by the eye in dependence on light," because it is the absence of an object possessing form ‡ as we see in the case of a jar's absence because by the very rule on which you rely, viz. that that on which the eye depends to perceive an object it must also depend on to perceive that object's 'absence, it follows that as there is no dependence of the eye on light to perceive light, it need not depend thereon to perceive this light's absence. Nor need our opponent retort that the cognition of darkness (as the absence of light) necessitates the cognition of the place where the absence resides (and *this* will require light),

* Read in p. I10 last line अनवधानादिषु.

† The mind perceives *âloka-jnâna*, therefore it would perceive its absence, i. e. darkness, but this last is perceived by the *eye*.

‡ I. e. light possesses form.

अभावेन तदभावग्रहेऽपि तदपेक्षाया अभावात् । न चाधिकरणग्रहणावश्यम्भावः अभावप्रतीतावधिकरणग्रहणावश्यंभावानङ्गीकारादपरथा निश्शब्दः कोलाहल इति शब्दप्रध्वंसप्रत्ययो न स्यादिति अप्रामाणिकं तव वचनं परम् । तत्सर्वमभिसन्धाय भगवान् कणादः प्रणिनाय सूत्रं द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तम इति प्रत्ययवेद्यत्वेनापि निरूपितम् ।

Digitized by Google

as such an assertion is quite untenable, for we cannot admit that in order to have a conception of absence, it is necessary to have a conception of the place where the absence resides; else we could not have the perception of the cessation of sound, as is implied in such an expression as 'the tumult has ceased.'* Hence having examined all these difficulties, the venerable Kanáda uttered his aphorism (as an *ipse dixit* to settle the question;) "*dravya-guṇa-karma-nishpatti-vaidharmyát abhávas tamas*" (*Vaiś. sút.* v. 2. 19)—"darkness is really absence, since it is dissimilar to the production of substances, qualities or actions." The same thing has been also established by the argument that darkness is perceived by the eye † (without light, whereas all substances, if perceptible at all, require the presence of light as well as of the eye to be visible.)

Non-existence (*abháva*) is considered to be the seventh category, as established by negative proofs. It may be concisely defined as that which itself not having intimate relation, is *not* intimate relation ‡; and this is two-fold,—'universal non-existence' and 'reciprocal non-existence.' The former is again divided into 'antecedent,' 'emergent,' and 'absolute.' 'Antecedent' is that non-existence which, though without any beginning, is not everlasting; 'emergent' is that which, though having a beginning, is everlasting; 'absolute' is that non-existence which abides in its own

* Sound resides in the imperceptible ether, and cessation in the *dhwanśábháva* or 'emergent non-existence.'

† The reading *pratyayavedyatwena* seems supported by p. 110. last line, but it is difficult to trace the argument; I have therefore ventured hesitatingly to read **प्रत्यक्षवेद्यत्वेन** and would refer to the commentary (Vaiś sút. p. 250) *yadi hi níla-rúpavan nílam rúpamevavá tamah syát, váhyálokapragraham antareṇa chakshashá na grihyeta.*'

‡ Intimate relation also has no intimate relation.

अभावस्तु निषेधमुखप्रमाणगम्यः सप्तमो निरूप्यते । स चासमवायत्वे सत्यसमवायः संक्षेपतो द्विविधः संसर्गाभावान्योन्याभावभेदात् संसर्गाभावो ऽपि त्रिविधः प्राक्प्रध्वंसात्यन्ताभावभेदात् तत्रानित्यो ऽनादि-तमः प्रागभावः उत्पत्तिमानविनाशी प्रध्वंसः प्रतियोग्याश्रययो ऽभावो ऽत्यन्ताभावः अत्यन्ताभावव्यतिरिक्तत्वे सत्यनवधिरभावोऽन्योन्याभावः ।

counterentity *; 'reciprocal non-existence' is that, which, being different from 'absolute,' has yet no defined limit [i. e. no *terminus ad quem* or *terminus a quo*]

If you raise the objection that "'reciprocal non-existence' is really the same as 'absolute non-existence,'" we reply that this is indeed to lose one's way in the king's highroad; for 'reciprocal non-existence' is that negation whose counterentity is held to be identity as 'a jar is not cloth;' but 'absolute non-existence' is that negation whose counterentity is union, as 'there is no form in air.'—Nor need you here raise the objection that '*abhâva* can never be a means of producing any good to man,' for we maintain that it is his *summum bonum*, in the form of final beatitude, which is only another term for the absolute abolition of all pain, [and therefore comes under the category of *abhâva.*] E. B. C.

* I. e. the absolute absence of the jar is found in the jar, as of course the jar does not reside in the jar.

नन्वन्योन्याभाव एवात्यन्ताभाव इति चेत् अहो राजमार्गएव भ्रमः अन्योन्याभावो हि तादात्म्यप्रतियोगिकः प्रतिषेधः यथा घटः पटात्मा न भवतीति । संसर्गप्रतियोगिकः प्रतिषेधो ऽत्यन्ताभावः यथा वायौ रूपरसवन्धो नास्तीति । न चास्य पुरुषार्थोपयिकत्वं नास्तीत्याशङ्कनीयं दुःखात्यन्तोच्छेदापरपर्यायनिश्श्रेयसरूपत्वेन परमपुरुषार्थत्वात् ॥

इति सर्व्वदर्शनसंग्रहे औलुक्यदर्शनम् ।

STORIES ILLUSTRATIVE OF THE SANKHYA DOCTRINE.

SANKHYAPRAVACHANABHA'SHYA BOOK IV.

1.—APHORISM.

Like the prince, from the instruction in the truth.

COMMENTARY.

The sense is this that the discriminative knowledge is obtained, as it was by the prince from the instruction in truth.

साङ्ख्यप्रवचनभाष्यस्याख्यायिकाध्यायः ।

सूत्र० राजपुत्रवत्तत्वोपदेशात् ॥ १ ॥

भाष्य [शास्त्रसिद्धाख्यायिकाजातमुखेनेदानीं विवेकज्ञानसाधनानि प्रदर्शनीयानीत्येतदर्थं चतुर्थाध्याय आरभ्यते] पूर्वपादशेषसूत्रस्थविवेकोनुवर्त्तते ।

The story runs thus: 'There was a prince, who being born during an inauspicious conjunction of the stars called Gaṇḍa, was expelled from the city. He, being brought up by a barbarian, considered himself to be a barbarian too. One of his ministers, knowing him to be alive, went to him and said, 'Thou art a prince, not a barbarian." In this case as the prince at once gives up the idea of his being a barbarian, and resumes his real state of prince; just so a man being instructed by a kind preceptor that since he proceeded from the first creator who is mere intelligence he is a part of it, gives up the idea of his being a body and resumes his real state considering that he does not belong to this transitory world as differing from the Brahma, but is the Brahma itself, from his being a child of it. So it is said in the Puráṇa of Garuḍa: As from the one golden mountain the whole world becomes full of gold; just so, by God being evolved, the whole universe is evolved.

Again: as a Bráhmaṇa being possessed by some evil spirit, considers himself to be a Śúdra, and the evil spirit having been driven out resumes the conception of his being a Bráhmana; in the same manner, the soul being possessed by Máyá or illusion, thinks herself to be a body, and that illusion being dispelled, she comes to know that in reality she is a part of Brahma.

राजपुत्रस्येव तत्त्वोपदेशाद्विवेको जायत इत्यर्थः । अत्रेयमाख्यायिका । कश्चिद्राजपुत्रो गण्डर्क्षजन्मना पुरान्निःसारितः शबरेण केनचित्पोषितोऽहं शबर इत्यभिमन्यमान आस्ते तं जीवन्तं ज्ञात्वा कश्चिदमात्यः प्रबोधयति नत्वं शबरो राजपुत्रोऽसीति । स यथा झटित्येव चाण्डालाभिमानं त्यक्त्वा तात्त्विकं राजभावमेवालम्बते राजाहमस्मीति । एवमेवादिपुरुषात् परिपूर्णचिन्मात्रेणाभिव्यक्तादुत्पन्नस्त्वं तस्यांश इति कारुणिकोपदेशात्प्रकृत्यभिमानं त्यक्त्वा ब्रह्मपुत्रत्वादहमपि ब्रह्मैव नतु तद्विलक्षणः संसारीत्येवं स्वस्वरूपमेवालम्बते इत्यर्थः । तथा गारुडे-

यथैकहेममणिना सर्वं हेममयं जगत् ।
तथैव ज्ञातमीशेन ज्ञातेनाप्यखिलं भवेत् ॥
ग्रहाविष्टो द्विजःकश्चिच्छूद्रोऽहमिति मन्यते ।
ग्रहनाशात्पुनःस्वीयं ब्राह्मण्यं मन्यते यथा ॥
मायाविष्टस्तथाजीवो देहोऽहमिति मन्यते ।
मायानाशात्पुनः स्वीयं रूपं ब्रह्मास्मि मन्यते ॥

Now the author gives another story to show the possibility that even women and low-caste people can achieve their object, when overhearing the instruction given by a Bráhman to a Bráhman.

2.—APHORISM.

As the demon, [succeeds] in getting the instruction given to some other person.

COMMENTARY.

That means: While Srikrishna was giving his instruction to and for the sake of Arjuna, a demon standing by also received it and obtained the discriminative knowledge; just so any overhearer may obtain it.

That, if the discriminative knowledge is not got by instruction given once only, the instruction should be given repeatedly is what is stated by the next story.

3.—APHORISM.

Repetition [is wanted] because it is said that instructions were given repeatedly.

COMMENTARY.

The sense is this, that repetition even of instruction should be made; for it is well known that, in the Chhándogya Upanishad and other texts, Áruni and other teachers give their instructions again and again to Śvetaketu and other pupils.

The next Aphorism states the transitoriness of one's own body, by an example for the sake of obtaining freedom from attachment.

इति ॥१॥ स्त्रीशूद्रादयोऽपि ब्राह्मणेन ब्राह्मणस्योपदेशं श्रुत्वा कृतार्थाः स्युरित्येतदर्थमाख्यायिकान्तरं दर्शयति ।

सू० पिशाचवदन्यार्थोपदेशेऽपि ॥ २ ॥

भा० अर्जुनार्थं श्रीकृष्णेन तत्त्वोपदेशे क्रियमाणेऽपि समीपस्थस्य पिशाचस्य विवेकज्ञानं जातमेवमन्येषामपि भवेदित्यर्थः ॥ २ ॥ यदि च सकृदुपदेशाज्ज्ञानं न जायते तदोपदेशावृत्तिरपि कर्तव्येतीतिहासान्तरेणाह ।

सू० आवृत्तिरसकृदुपदेशात् ॥ ३ ॥

भा० उपदेशावृत्तिरपि कर्तव्या छान्दोग्यादौ श्वेतकेत्वादिकं प्रत्यारुणिप्रभृतीनामसकृदुपदेशेतिहासादित्यर्थः ॥ ३ ॥ वैराग्यार्थं निदर्शनपूर्वकमात्मसङ्घातस्य भङ्गुरत्वादिकं प्रतिपादयति ।

4.—APHORISM.

Since both are seen as in the case of father and son.

COMMENTARY.

The sense is this: When a man has inferred his own birth and death from the birth of his son and the death of his father, then freedom from worldly attachment results, which leads to discriminative knowledge, as it is said: One should infer one's own death and birth, respectively from those of one's father and son.

Now the author states the subsidiary means to the complete acquisition of philosophical knowledge, by examples given in stories, for the sake of one initiated into that knowledge, and free from attachment.

5.—APHORISM.

A man is happy and miserable, respectively by abandoning and by loss, like a hawk.

COMMENTARY.

That means: No one should gather property; for men become happy and miserable, severally by voluntarily abandoning and by involuntarily losing property like a hawk. To make it clear: a hawk, when with his prey, is often made miserable, by another hawk overcoming him and robbing him of his prey. But in case the hawk gives up the prey of his own accord, he escapes the misery. So it is said: A stronger eagle wanting food attacks another eagle that is carrying off its prey, then the weaker eagle gives up its prey at once and gains its ease.

सू० पितापुत्रवदुभयोर्दृष्टत्वात् ॥ ४ ॥

स्वस्य पितापुत्रयोरिवात्मनोऽपि मरणोत्पत्त्योर्दृष्टत्वादनुमितत्वाद्वैराग्येण विवेको भवतीत्यर्थः । तदुक्तम् ।

आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ।

इति ॥ ४ ॥ इतःपरमुत्पन्नज्ञानस्य विरक्तस्य च ज्ञाननिष्पत्त्यङ्गान्याख्यायिकोक्तदृष्टान्तैर्दर्शयति ।

सू० श्येनवत् सुखदुःखी त्यागवियोगाभ्याम् ॥ ५ ॥

परिग्रहो न कर्त्तव्यो यतो द्रव्याणां त्यागेन लोकः सुखी वियोगेन च दुःखी भवति श्येनवदित्यर्थः । श्येनो हि सामिषः केनाप्यपहृत्यामिषाद्वियोज्य दुःखी क्रियते स्वयं चेत् त्यजति तदा दुःखाद्विमुच्यते । तदुक्तम् ।

So also it is said by Manu: As a tree gives up the bank of a river, as a bird gives up its tree, just so a man abandoning his own body escapes as it were a dangerous monster.

6.—APHORISM.

Like the cast-off-skin of a snake.

COMMENTARY.

As a snake easily and contemptuously casts off its old skin; in the same manner a man striving after emancipation should contemptuously give up his own body which is old and has been enjoyed for a long time. So it is said: as a snake gives up its old skin.

That the body and other things once abandoned should not be retaken, is what is stated in the next Sútra.

7.—APHORISM.

Also, like a hand which is cut off.

COMMENTARY.

As no man again takes up his hand which has been cut off, just so no one should reclaim this body that has been once given up.

सामिषं कुररं जघ्नुर्बलिनोऽन्ये निरामिषाः ।
तदामिषं परित्यज्य स सुखं समविन्दत ॥

इति । तथा मनुनाप्युक्तम् ।

नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥

इति ॥ ५ ॥

सू० अहिनिर्ल्वयनीवत् ॥ ६ ॥

यथाहिर्जीर्णां त्वचं परित्यजत्यनायासेन हेयबुद्ध्या तथैव मुमुक्षुः प्रकृतिं बहुकालोपभुक्तां जीर्णां हेयबुद्ध्या त्यजेदित्यर्थः । तदुक्तम् । जीर्णां त्वचमिवोरग इति ॥ ६ ॥ त्यक्तं च प्रकृत्यादिकं पुनर्न स्वं कुर्यादित्याह ।

सू० छिन्नहस्तवद्वा ॥ ७ ॥

यथा छिन्नं हस्तं पुनः कोऽपि नादत्ते तथैवैतत् त्यक्तं पुनर्नाभिमन्येतेत्यर्थः । वाशब्दोऽप्यर्थे ॥ ७ ॥

8.—APHORISM.

Repeated thinking of an object which is not a means [to discriminative knowledge] produces bondage; as in the case of Bharata.

COMMENTARY.

That which is not an immediate means to discriminative knowledge, is mischievous, though it may be virtuous. The mind should not be made intent upon the observance of it; for, that, causing one to forget the knowledge leads to bondage, as in the case of Bharata. This means: As the protection of the poor and protectorless fawn, by the king, saint Bharata, though virtuous, caused his bondage. So we read in the Vishnupuráṇa concerning Bharata: His mind moving quickly when the fawn was moving so, and going far when she was going far, was fondly attached to that fawn.

9.—APHORISM.

In being together with many arises strife through passions, as in the case of the girl's bracelets.

COMMENTARY.

One should not associate with many; for in association with many the passions and other emotions being produced, a quarrel may spring up to destroy religious meditation; just as a sound of rattling proceeds from the mutual contact of the bracelets on the wrist of a girl.

KEŚAVA ŚÁSTRÍ.

सू० असाधनानुचिन्तनं बन्धाय भरतवत् ॥ ८ ॥

विवेकस्य यदन्तरङ्गसाधनं न भवति स चेद्धर्मोऽपि स्यात् तथापि तदनुचिन्तनं तदनुष्ठाने चित्तस्य तात्पर्य्यं न कर्तव्यं यतस्तद्बन्धाय भवति विवेकविस्मारकतया भरतवत् । यथा भरतस्य राजर्षेर्धर्म्यमपि दीनानाथहरिणशावकस्य पोषणमित्यर्थः । तथा च जडभरतं प्रकृत्य-विष्णुपुराणे ।

चपलं चपले तस्मिन् दूरगं दूरगामिनि ।
आसीच्चेतः समासक्तं तस्मिन् हरिणपोतके ॥ ८ ॥

सू० बहुभिर्योगे विरोधो रागादिभिः कुमारीशङ्खवत् ॥ ९ ॥

बहुभिः सङ्गो न कार्यः । बहुभिः सङ्गे हि रागाद्यभिव्यक्त्या कलहो भवति योगभ्रंशकः । यथा कुमारीहस्तशङ्खानामन्योऽन्यसङ्गेन झणत्कारो भवतीत्यर्थः ॥ ९ ॥

Digitized by Google

REGISTERED No. 2.

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 8. JANUARY 1st 1877. Vol. I.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

॥ काशिकायाः ॥

षष्ठाध्यायस्य द्वितीयः पादः ।

कर्मधारयेऽनिष्ठा ॥ ४६ ॥

कर्मधारये समासे क्तान्त उत्तरपदेऽनिष्ठान्तं पूर्वपदं प्रकृतिस्वरं भवति । श्रेणिकृताः । ऊककृताः । पूगकृताः । निधनकृताः । श्रेणिशब्द आद्युदात्तः । ऊकपूगशब्दावन्तोदात्तौ । निधनशब्दोयं मध्योदात्तः । कर्मधारय इति किम् । श्रेण्या कृतं श्रेणिकृतम् । अनिष्ठेति किम् । कृताकृतम् ॥

अहीने द्वितीया ॥ ४७ ॥

अहीनवाचिनि समासे क्तान्त उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरं भवति । कष्टश्रितः । त्रिशकलपतितः । ग्रामगतः । कष्टशब्दोऽन्तोदात्तः । त्रीणि शकलान्यस्येति, त्रिशकलः । बहुव्रीहिस्वरेणाद्युदात्तः । ग्रामशब्दो नित्स्वरेणाद्युदात्तः । अहीन इति किम् । कान्तारातीतः । योजनातीतः * ॥ द्वितीयानुपसर्ग इति वक्तव्यम् ॥ * ॥ इह मा भूत् । सुखप्राप्तः । दुःखप्राप्तः । सुखापन्नो दुःखापन्नः । अन्तस्याथेत्यस्यापवादोयम् ॥

तृतीया कर्मणि ॥ ४८ ॥

कर्मवाचिनि क्तान्त उत्तरपदे तृतीयान्तं पूर्वपदं प्रकृतिस्वरं भवति । अहिहतः । वज्रहतः † । महाराजहतः । नखनिर्भिन्ना । दात्रलूना । आङि श्रिहनिभ्यां ह्रस्वश्चेति अहिरन्तोदात्तो व्युत्पादितः । केचित्त्वाद्युदात्तमिच्छन्ति । वज्रो रक्प्रत्ययान्तः । महाराजष्टच्प्रत्ययान्तः । नास्य खमस्तीति बहुव्रीहौ नकुलनखेति नखशब्दो निपातितः । तेन नञ्सुभ्यामित्यन्तोदात्तः । दात्रशब्दो दाम्नीशसेति ष्ट्रन्प्रत्ययान्तः । कर्मणीति किम् । रथेन यातो रथयातः । गत्यर्थत्वात्कर्तरि क्तः ॥

---

* हीनं त्यक्तं विभक्तमित्यनर्थान्तरमित्यधिकं पुस्तकान्तरे ।

† रुद्रहतः । पा०२ ।

Digitized by Google

गतिरनन्तरः ॥ ४९ ॥

क्ते कर्मणीति वर्त्तते । कर्मवाचिनि क्तान्त उत्तरपदे गतिरनन्तरः पूर्वपदं प्रकृतिस्वरं भवति । प्रकृतः । प्रहृतः । अनन्तर इति किम् । अभ्युद्धृतः । समुद्धृतः । समुदाहृतः । व्यवहितस्य गतेरयं स्वरो न भवति । अनन्तरे पुनरिष्यते । कारकपूर्वस्य तु सति शिष्टत्वात् थाथादिस्वर एव भवति दूरादागत इति । अनन्तरग्रहणसामर्थ्यादेव कृद्ग्रहणे गतिकारकपूर्वस्यापीत्येतन्नाश्रीयते । कर्मणीत्येव । प्रकृतः कटं देवदत्तः । थाथादिस्वरापवादो योगः ॥

तादौ च निति कृत्यतौ ॥ ५० ॥

तकारादौ च तुशब्दवर्जिते निति कृति परतो गतिरनन्तरः प्रकृतिस्वरो भवति । प्रकर्त्ता । प्रकर्त्तुम् । प्रकृतिः । प्रकर्त्तेति तृचन्तः । कृत्स्वरबाधनार्थं वचनम् । तादाविति किम् । प्रजल्पाकः । नितीति किम् । प्रकर्त्ता । तृजन्तः । कृद्ग्रहणमुपदेशे तादर्थ्यम् । इहापि यथा स्यात्, प्रलपिता प्रलपितुमिति । अतुविति किम् । आगन्तुः ॥

तवै चान्तश्च युगपत् ॥ ५१ ॥

तवैप्रत्ययस्यान्त उदात्तो भवति गतिश्चानन्तरः प्रकृतिस्वर इति एतदुभयं युगपद्भवति । अन्वेतवै । परिस्तरितवै । परिपातवै । तस्मात्पिता नाभिचरितवै । उपसर्गा आद्युदात्ता अभिवर्जमित्यभिरन्तोदात्तः । कृत्स्वरापवादो योगः ॥

अनिगन्तोऽञ्चतौ वप्रत्यये ॥ ५२ ॥

अनिगन्तो गतिः प्रकृतिस्वरो भवत्यञ्चतौ वप्रत्यये परतः । प्राङ् । प्राञ्चौ । प्राञ्चः । स्वरितो वानुदात्ते पदादावित्ययमेकादेश उदात्तः स्वरितो वा । पराङ् । पराञ्चौ । पराञ्चः । अनिगन्त इति किम् । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । कृदुत्तरपदप्रकृतिस्वर इह भवति । वप्रत्यय इति किम् । उदञ्चनः । चोरनिगन्तोऽञ्चतौ वप्रत्यय इत्येष स्वरो भवति विप्रतिषेधेन । पराचः । पराचा ॥

न्यधी च ॥ ५३ ॥

नि अधि इत्येतौ चाञ्चतौ वप्रत्यये परतः प्रकृतिस्वरौ भवतः । न्यङ् । न्यञ्चौ । न्यञ्चः । उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्यञ्चतेरकारः स्वरितः । अध्यङ् । अध्यञ्चौ । अध्यञ्चः । अधीचः । अधीचा ॥

ईषदन्यतरस्याम् ॥ ५४ ॥

ईषदित्येतत्पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति । ईषत्कडारः । २ । ईषत्पिङ्गलः । २ । ईषदित्ययमन्तोदात्तः । ईषद्भेद इत्येवमादौ कृत्स्वर एव भवति ॥

हिरण्यपरिमाणं धने ॥ ५५ ॥

हिरण्यपरिमाणवाचि पूर्वपदं धनशब्द उत्तरपदे ऽन्यतरस्यां प्रकृतिस्वरं भवति । द्विसुवर्णधनम् । २ । द्वौ सुवर्णौ परिमाणमस्य द्विसुवर्णं तदेव धनमिति कर्मधारयः । बहुव्रीहावपि परत्वाद्विकल्प एव भवति । द्विसुवर्णधनः । २ । हिरण्यग्रहणं किम् । प्रस्थधनम् । परिमाणग्रहणं किम् । काञ्चनधनम् । धनइति किम् । निष्कमाला ॥

प्रथमो ऽचिरोपसंपत्तौ ॥ ५६ ॥

प्रथमशब्दः पूर्वपदमचिरोपसंपत्तौ गम्यमानायामन्यतरस्यां प्रकृतिस्वरं भवति । अचिरोपसंपत्तिरचिरोपश्लेषो ऽभिनवत्वम् । प्रथमवैयाकरणः । अभिनववैयाकरणः । संप्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दः प्रथेरमजिनि नित्त्वादन्तोदात्तः । अचिरोपसंपत्ताविति किम् । प्रथमवैयाकरणः । वैयाकरणानामाद्यो मुख्यो वा यः स नित्यमन्तोदात्त एव ॥

कतरकतमौ कर्मधारये ॥ ५७ ॥

कतरशब्दः कतमशब्दश्च पूर्वपदं कर्मधारये समासे ऽन्यतरस्यां प्रकृतिस्वरं भवति । कतरकठः । २ । कतमकठः* । २ । कर्मधारयग्रहणमुत्तरार्थमिह तु प्रतिपदोक्तत्वादेव सिद्धम् ॥

---

* कतमकलापः । पा० २ ।

आर्यो ब्राह्मणकुमारयोः ॥ ५८ ॥

आर्यशब्दः पूर्वपदं ब्राह्मणकुमारशब्दयोः कर्मधारये समासे ऽन्यतरस्यां प्रकृतिस्वरं भवति । आर्यब्राह्मणः । २ । आर्यकुमारः । २ । आर्यशब्दो यण्दन्तोन्तस्वरितः । आर्य इति किम् । परमब्राह्मणः । परमकुमारः । ब्राह्मणकुमारयोरिति किम् । आर्यक्षत्रियः । कर्मधारयइत्येव । आर्यस्य ब्राह्मणः, आर्यब्राह्मणः ॥

राजा च ॥ ५९ ॥

राजा च पूर्वपदं ब्राह्मणकुमारयोरुत्तरपदयोः कर्मधारये समासे ऽन्यतरस्यां प्रकृतिस्वरं भवति । राजब्राह्मणः । २ । राजकुमारः । २ । कर्मधारयइत्येव । राज्ञो ब्राह्मणो, राजब्राह्मणः । राजकुमारः । पृथग्योगकरणमुत्तरार्थम् ॥

षष्ठी प्रत्येनसि ॥ ६० ॥

राजेति वर्त्तते, ऽन्यतरस्यामिति च । षष्ठ्यन्तो राजशब्दः पूर्वपदं प्रत्येनस्युत्तरे ऽन्यतरस्यां प्रकृतिस्वरं भवति । राज्ञः प्रत्येनाः, राजप्रत्येनाः । षष्ठीति किम् । राजा चासौ प्रत्येनाश्च, राजप्रत्येनाः ॥

क्ते नित्यार्थे ॥ ६१ ॥

क्तान्तउत्तरपदे नित्यार्थे समासे पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति । नित्यप्रहसितः । २ । सततप्रहसितः । २ । काला इति द्वितीयासमासोयम् । नित्यशब्दस्त्यब्नेर्ध्रुवइति त्यबन्त आद्युदात्तः । सतत इति यदा भावे क्तस्तदा थाथादिस्वरेणान्तोदात्तः । नित्यार्थइति किम् । मुहूर्त्तप्रहसितः ॥

ग्रामः शिल्पिनि ॥ ६२ ॥

ग्रामशब्दः पूर्वपदं शिल्पिवाचिन्युत्तरपदे ऽन्यतरस्यां प्रकृतिस्वरं भवति । ग्रामनापितः । २ । ग्रामकुलालः । २ । ग्रामशब्द आद्युदात्तः । ग्राम इति किम् । परमनापितः । शिल्पिनीति किम् । ग्रामरथ्या ॥

Digitized by Google

राजा च प्रशंसायाम् ॥ ६३ ॥

राजशब्दः पूर्वपदं शिल्पिवाचिन्युत्तरपदे प्रशंसायां गम्यमानायामन्यतरस्यां प्रकृतिस्वरं भवति । राजनापितः । २ । राजकुलालः । २ । कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा । षष्ठीसमासे च राजयोग्यतया तस्य । राजेति किम् । परमनापितः । प्रशंसायामिति किम् । राजनापितः । शिल्पिनीत्येव । राजहस्ती ॥

आदिरुदात्तः ॥ ६४ ॥

आदिरुदात्त इत्येतदधिकृतमित उत्तरं यदुत्यामस्तत्र पूर्वपदस्यादिरुदात्तो भवतीत्येवं तद्वेदितव्यम् । वक्ष्यति सप्तमीहारिणौ धर्म्येऽहरणे इति । स्तूपेशाणः । मुकुटेकार्षापणम् । याज्ञिकाश्वः । वैयाकरणहस्ती । दृषदिमाषकः । आदिरिति प्रागन्ताधिकारात् । उदात्त इति प्रकृत्या भगालमिति यावत् ॥

सप्तमीहारिणौ धर्म्येऽहरणे ॥ ६५ ॥

सप्तम्यन्तं हारिवाचि च पूर्वपदं धर्म्यवाचिनि हरणशब्दादन्यस्मिन्नुत्तरपदे आद्युदात्तं भवति । हारीति देयं यः स्वीकरोति सोऽभिधीयते । धर्म्यमित्याचारनियतं देयमुच्यते, धर्मो ह्यनुवृत्त आचारस्तस्मादनपेतं तेन वा प्राप्यमिति । स्तूपेशाणः । मुकुटेकार्षापणम् । हलेद्विपदिका । हलेत्रिपदिका । दृषदिमाषकः । संज्ञायामिति सप्तमीसमासः,कारनाम्नि चेति विभक्तेरलुक् । हारिणि । याज्ञिकाश्वः । वैयाकरणहस्ती । मातुलाश्वः । पितृव्यगवः । क्व चिदयमाचारो व्यवस्थितस्तूपादिषु शाणादि दातव्यं याज्ञिकादीनामश्वादीति । धर्म्यइति किम् । स्तम्बेरमः । कर्मकरवर्द्धितकः * । अहरणइति किम् । वाडवहरणम् । वडवाया अयं वाडवः । तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते

* वर्द्धितको नाम मूले स्थूलो ऽग्रे सूक्ष्म ओदनपिण्डः स कर्मकराय दीयते ऽन्यथा कर्म न कुर्यादिति न त्वयं धर्म्य इति पदमञ्जरी ।

हरणमिति तदुच्यते । परोपि कृत्स्वरो हारिस्वरेण बाध्यते विप्रतिषेधेनेत्येतद्धरणग्रहणेनानेन ज्ञाप्यते, तेन वाडवहार्यमिति हारिस्वरः सिद्धो भवति ॥

युक्ते च ॥ ६६ ॥

युक्तवाचिनि च समासे पूर्वपदमाद्युदात्तं भवति । गोबल्लवः । अश्वबल्लवः । गोमणिन्दः । अश्वमणिन्दः । गोसंख्यः । अश्वसंख्यः । युक्त इति समाहितः कर्तव्ये तत्परो यः स उच्यते ॥

विभाषाऽध्यक्षे ॥ ६७ ॥

अध्यक्षशब्द उत्तरपदे विभाषा पूर्वपदमाद्युदात्तं भवति । गवाध्यक्षः । २ । अश्वाध्यक्षः । २ ॥

पापं च शिल्पिनि ॥ ६८ ॥

पापशब्दः शिल्पिवाचिन्युत्तरपदे विभाषाऽऽद्युदात्तो भवति पापनापितः । २ । पापकुलालः । २ । पापाणके कुत्सितैरिति प्रतिपदोक्तः पापशब्दस्य समानाधिकरणसमास इति षष्ठीसमासे न भवति । पापस्य नापितः, पापनापित इति ॥

गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ॥ ६९ ॥

गोत्रवाचिन्यन्तेवासिवाचिनि चोत्तरपदे माणवब्राह्मणयोश्च क्षेपवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । जङ्घावात्स्यः । यो जङ्घादानं ददान्यहमिति वात्स्यः संपद्यते स जङ्घावात्स्य इति क्षिप्यते । भार्यासौश्रुतः । सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः । वशाब्राह्मकृतेयः । ब्रह्मकृतशब्दः शुभ्रादिषु पठ्यते । गोत्र । अन्तेवासि । कुमारीदाक्षाः । कम्बलचारायणीयाः । घृतरौढीयाः । ओदनपाणिनीयाः । कुमार्यादिलाभकामा ये दाक्षादिभिः प्रोक्तानि शास्त्राण्यधीयते तच्छिष्यतां वा प्रतिपद्यन्ते तएवं क्षिप्यन्ते । माणव । भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवो भवति । माणव । ब्राह्मण । दासीब्राह्मणः । वृषलीब्राह्मणः । भयब्राह्मणः । यो भयेन ब्राह्मणः संपद्यते । अत्र यस्यान्यत्

समासलक्षणं नास्ति सुप्सुपेत्येव तत्र समासः कर्तव्यः । गोत्रादिष्विति किम् । दासीश्रोत्रियः । क्षेपइति किम् । महाब्राह्मणाः ॥

अङ्गानि मैरेये ॥ ७० ॥

मैरेयशब्द उत्तरपदे तदङ्गवाचीनि पूर्वपदान्याद्युदात्तानि भवन्ति । गुडमैरेयः । मधुमैरेयः । मद्यविशेषो मैरेयस्तस्य गुडविकारस्य गुडोऽङ्गं भवति मधुनो मधु । अङ्गानीति किम् । परममैरेयः । मैरेयइति किम् । पुष्पासवः । फलासवः ॥

भक्ताख्यास्तदर्थेषु ॥ ७१ ॥

भक्तमन्नं तदाख्यास्तद्वाचिनः शब्दास्तदर्थेषूत्तरपदेषु आद्युदात्ता भवन्ति । भिक्षाकंसः । श्राणाकंसः । भाजीकंसः । भिक्षादयोऽन्नवचनाः । भक्ताख्या इति किम् । समाशशालयः । समशनं समाश इति क्रियामात्रमुच्यते न द्रव्यम् । तदर्थेष्विति किम् । भिक्षाप्रियः । बहुव्रीहिरयमत्र पूर्वपदमन्तोदात्तम् ॥

गोबिडालसिंहसैन्धवेषूपमाने ॥ ७२ ॥

गवादिषूपमानवाचिषूत्तरपदेषु पूर्वपदमाद्युदात्तं भवति । धान्यगवः । हिरण्यगवः । भिक्षाबिडालः । तृणसिंहः । काष्ठसिंहः । सक्तुसैन्धवः । पानसैन्धवः । धान्यं गौरिवेति विगृह्य व्याघ्रादेराकृतिगणत्वाद् उपमितं व्याघ्रादिभिरिति समासः । उपमानार्थोऽपि यथासंभवं यथा प्रसिद्धं च योजयितव्यः । गवाकृत्या ऽवस्थितं* धान्यगवशब्देनोच्यते । उपमानइति किम् । परमसिंहः ॥

अके जीविकार्थे ॥ ७३ ॥

अकप्रत्ययान्त उत्तरपदे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । दन्तलेखकः । नखलेखकः । अवस्करशोधकः । रमणीयकारकः । दन्तलेखनादिभिर्येषां जीविका त एवमुच्यन्ते । नित्यं क्रीडाजीविकयोरिति

* संनिवेशितं पा० २ ।

समासः । अक इति किम् । रमणीयकर्त्ता । जीविकार्थ इति किम् । इक्षुभक्षिकां मे धारयसि ॥

प्राचां क्रीडायाम् ॥ ७४ ॥

प्राग्देशवर्त्तिनां या क्रीडा तद्वाचिनि समासे ऽकप्रत्ययान्तउत्तरपदे पूर्वपदमाद्युदात्तं भवति । उद्दालकपुष्पभञ्जिका । वीरणपुष्पप्रचायिका । शालभञ्जिका । तालभञ्जिका । संज्ञायामिति ण्वुल्, नित्यं क्रीडाजीविकयोरिति षष्ठीसमासः । प्राचामिति किम् । जीवपुत्त्रप्रचायिका । इयमुदीचां क्रीडा । क्रीडायामिति किम् । तव पुष्पप्रचायिका । पर्याये ण्वुच्प्रत्ययो भवति ॥

अणि नियुक्ते ॥ ७५ ॥

अणन्तउत्तरपदे नियुक्तवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । छत्त्रधारः । तूणीधारः । कमण्डलुग्राहः । भृङ्गारधारः । नियुक्तो ऽधिकृतः स च कस्मिंश्चित्कर्त्तव्ये तत्परो न भवतीति नियुक्तइत्यनेन सिध्यति *। नियुक्तइति किम् । काण्डलावः । शरलावः ॥

शिल्पिनि चाकृञः ॥ ७६ ॥

शिल्पिवाचिनि समासे ऽणन्तउत्तरपदे पूर्वपदमाद्युदात्तं भवति स चेदण् कृञो न भवति । तन्तुवायः । तुन्नवायः । वालवायः । शिल्पिनीति किम् । काण्डलावः । अकृञ इति किम् । कुम्भकारः । अयस्कारः ॥

संज्ञायां च ॥ ७७ ॥

संज्ञायां विषये ऽणन्तउत्तरपदे ऽकृञः पूर्वपदमाद्युदात्तं भवति । तन्तुवायो नाम कीटः । वालवायो नाम पर्वतः । अकृञ इत्येव । रथकारो नाम ब्राह्मणः ॥

गोतन्तियवं पाले ॥ ७८ ॥

गो तन्ति यव इत्येतानि पूर्वपदानि पालशब्दउत्तरपदे आद्युदा-

* नियुक्त इत्यनेन सिध्यतीत्यस्य स्थाने युक्त इत्यनेन न सिध्यतीति पा० २ ।

त्तानि भवन्ति । गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थ आरम्भः । गोतन्तियवमिति किम् । वत्सपालः । पालइति किम् । गोरक्षः ॥

णिनि ॥ ७९ ॥

णिनन्तउत्तरपदे पूर्वपदमाद्युदात्तं भवति । फलहारी । पर्णहारी ॥

उपमानं शब्दार्थप्रकृतावेव ॥ ८० ॥

उपमानवाचि पूर्वपदं शब्दार्थप्रकृतावेव णिनन्तउत्तरपदआद्युदात्तं भवति । पुष्पहारी । उपमानं नियम्यते । उष्ट्रक्रोशी । ध्वाङ्क्षरावी । खरनादी । उपमानग्रहणमस्य पूर्वस्य च योगस्य विषयविभागार्थम् । शब्दार्थप्रकृताविति किम् । वृकवञ्ची । वृकप्रेक्षी । प्रकृतिग्रहणं किम् । प्रकृतावेव यत्रोपसर्गनिरपेक्षा शब्दार्था भवति तत्रैव यथा स्यात् इह मा भूत् गर्दभोच्चारी कोकिलाभिव्याहारीति । एवकारकरणमुपमानावधारणार्थम् । शब्दार्थप्रकृतौ त्वनुपमानमुपमानं चाद्युदात्तं भवति । सिंहविनर्दी । पुष्कलजल्पी ॥

युक्तारोह्यादयश्च ॥ ८१ ॥

युक्तारोह्यादयः समासा आद्युदात्ता भवन्ति । युक्तारोही । आगतरोही । आगतयोधी । आगतवञ्ची । आगतनर्दी । आगतप्रहारी । एते णिनन्ता णिनीत्यस्यैवोदाहरणार्थं पठ्यन्ते । पूर्वोत्तरपदनियमार्था इति केचित् । इह मा भूत् वृक्षारोही युक्ताध्यायीति । आगतमत्स्या । क्षीरहोता । भगिनीभर्त्ता । याजकादित्वात् षष्ठीसमासावेतौ । ग्रामगोधुक् । अश्वत्रिरात्रः । गर्गत्रिरात्रः । व्युष्टत्रिरात्रः । शणपादः । समपादः । षष्ठीसमासा एते । एकशितिपात् । एकः शितिः पादोस्येति त्रिपदबहुव्रीहिः । तत्रैकशितिशब्दस्याद्वितार्थोत्तरपदइति तत्पुरुषसंज्ञस्तस्य निमित्तस्वरबलीयस्त्वात् अन्तोदात्तत्वं प्राप्तमित्याद्युदात्तत्वं विधीयते । एवमपि नार्थ एतेन, इगन्ते द्विगाविति सिद्धत्वात् । एवं तर्हि ज्ञापकार्थम्, एतज् ज्ञापयति शित्यन्तस्योत्तरपदे द्विगुस्वरो न भवतीति । तेन

Digitized by Google

द्विशतिपादिस्थच तिशब्द उदात्तो भवति । निमित्तस्वरबलीयस्त्वस्याप्ये-कशितिपात्स्वरवचनमेव ज्ञापकं वर्णयन्ति । पाचेसंमितादयश्च युक्तारो-ह्यादयस्ततस्तेऽप्याद्युदात्ता भवन्ति ॥

दीर्घकाशतुषभ्राष्ट्रवटं जे ॥ ८२ ॥

दीर्घान्तं पूर्वपदं काश तुष भ्राष्ट्र वट इत्येतानि च जउत्तरपदे आद्युदात्तानि भवन्ति । कुटीजः । शमीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥

अन्त्यात्पूर्वं बह्वचः ॥ ८३ ॥

जउत्तरपदे बह्वचः पूर्वपदस्यान्त्यात्पूर्वमुदात्तं भवति । उपसरजः । मन्दुरजः । आमलकीजः । वडवाजः । बह्वच इति किम् । दग्धजानि तृणानि ॥

ग्रामेऽनिवसन्तः ॥ ८४ ॥

ग्रामशब्द उत्तरपदे पूर्वपदमाद्युदात्तं भवति न चेन्निवसद्वाचि भवति । मल्लग्रामः । वणिग्ग्रामः । ग्रामशब्दोऽत्र समूहवाची । देव-ग्रामः । देवस्वामिक इत्यर्थः । अनिवसन्त इति किम् । दाक्षिग्रामः । माहकिग्रामः । दाक्ष्यादयो वसन्ति यस्मिन्ग्रामे स तेषामिति व्यपदिश्यते ॥

घोषादिषु च ॥ ८५ ॥

घोषादिषु चोत्तरपदेषु पूर्वपदमाद्युदात्तं भवति । दाक्षिघोषः । दाक्षिकटः । दाक्षिपल्वलः * । दाक्षिह्रदः । दाक्षिबदर । दाक्षिपिङ्गलः । दाक्षिपिशङ्गः । दाक्षिशालः । दाक्षिरक्षः । दाक्षिशिल्पी । दाक्ष्यश्वत्थः । कुन्दतृणम् । दाक्षिशाल्मली । आश्रममुनिः । शाल्मलिमुनिः । दाक्षिप्रेष्ठा । दाक्षिकूटः । यान्यत्र निवासनामधेयानि तेषु निवसद्वाचीन्यपि पूर्वप-दान्याद्युदात्तानि भवन्ति । अनिवसन्त इति नानुवर्तयन्ति केचित् । अपरे पुनरनुवर्तयन्ति ॥

---

* दाक्षिवल्लभः । पा० २ ।

छाच्यादयः शालायाम् ॥ ८६ ॥

शालायामुत्तरपदे छाच्यादय आद्युदात्ता भवन्ति । छात्रिशाला । ऐलिशाला । भाण्डिशाला । छात्रि । ऐलि । भाण्डि । व्याडि । आपिशलि । आखण्डि । आपारि । गोमि । यदा शालान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति तदापि तत्पुरुषे शालायां नपुंसकइत्येतस्मात्पूर्वविप्रतिषेधेन पूर्वपदमाद्युदात्तं भवति । छात्रिशालम् । ऐलिशालम् ॥

प्रस्थे ऽवृद्धमकर्क्यादीनाम् ॥ ८७ ॥

प्रस्थशब्दउत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं भवति । इन्द्रप्रस्थः । कुण्डप्रस्थः । ह्रदप्रस्थः । सुवर्णप्रस्थः । अवृद्धमिति किम् । दाक्षिप्रस्थः । माहकिप्रस्थः । अकर्क्यादीनामिति किम् । कर्कीप्रस्थः । मघीप्रस्थः । कर्की । मघी । मकरी । कर्कन्धू । शमी । करीर । कटुक । कुरल * । बदर ॥

मालादीनां च ॥ ८८ ॥

प्रस्थइति वर्त्तते । प्रस्थउत्तरपदे मालादीनामादिरुदात्तो भवति । मालाप्रस्थः । शालाप्रस्थः । माला । शाला । शोणा । द्राक्षा । क्षौमा । क्षामा । काञ्ची । एक । काम । वृद्धार्थ आरम्भः । एकशोणाशब्दयोरेङ् प्राचां देशइति वृद्धसंज्ञा ॥

अमहन्नवं नगरे ऽनुदीचाम् ॥ ८९ ॥

नगरशब्दउत्तरपदे महन्नवशब्दवर्जितं पूर्वपदमाद्युदात्तं भवति तच्चेदुदीचां न भवति । सुह्मनगरम् । पुण्ड्रनगरम् † । अमहन्नवमिति किम् । महानगरम् । नवनगरम् । अनुदीचामिति किम् । नान्दीनगरम् । कान्तीनगरम् ॥

अर्मे चावर्णं द्व्यच्त्र्यच् ॥ ९० ॥

अर्मशब्दउत्तरपदे द्व्यच् त्र्यच् पूर्वपदमवर्णान्तमाद्युदात्तं भवति ।

---

* कवल । पा॰२ ।

† विराटनगरमिति पुस्तकान्तरे ऽधिकम् ।

दत्तामंम् । गुप्तामंम् । कुक्कुटामंम् । वायसामंम् । अवर्णमिति किम् । बृहदमंम् । अचत्र्यजिति किम् । कपिञ्जलामंम् । अमहन्नवमित्येव । महामंम् । नवामंम् ॥

न भूताधिकसंजीवमद्राश्मकज्जलम् ॥ ९१ ॥

भूत अधिक संजीव मद्र अश्मन् कज्जल इत्येतानि पूर्वपदानि अमेशब्द उत्तरपदे नाद्युदात्तानि भवन्ति । भूतामंम् । अधिकामंम् । संजीवामंम् । मद्रामंम् । अश्मामंम् । मद्राश्मग्रहणं संघातविगृहीतार्थम् । मद्राश्मामंम् । कज्जलामंम् । समासान्तोदात्तत्वमेवात्र भवति ॥ आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् ॥ * ॥ दिवोदासाय गायत । वध्र्यश्वाय दाशुषे ॥

अन्तः ॥ ९२ ॥

अन्त इत्यधिकृतमित उत्तरं यदुद्द्यामस्तत्र पूर्वपदस्यान्त उदात्तो भवतीत्येवं वेदितव्यम् । वक्ष्यति सर्वं गुणकार्त्स्न्ये । सर्वश्वेतः । सर्वकृष्णः । प्रागुत्तरपदादिरित्येतस्मादयमधिकारो वेदितव्यः ॥

सर्वं गुणकार्त्स्न्ये ॥ ९३ ॥

सर्वशब्दः पूर्वपदं गुणकार्त्स्न्ये वर्त्तमानमन्तोदात्तं भवति । सर्वश्वेतः । सर्वकृष्णः । सर्वमहान् । सर्वमिति किम् । परमश्वेतः । आश्रयव्याप्त्या परमत्वं श्वेतत्वस्येति गुणकार्त्स्न्ये वर्त्तते । गुणग्रहणं किम् । सर्वसौवर्णः । सर्वराजतः । कार्त्स्न्य इति किम् । सर्वेषां श्वेततरः सर्वश्वेतः । गुणान्तरेण समासस्वरलोपश्च वक्तव्य इत्येवमत्र समासस्वरलोपश्च ॥

संज्ञायां गिरिनिकाययोः ॥ ९४ ॥

संज्ञायां विषये गिरि निकाय इत्येतयोरुत्तरपदयोः पूर्वपदमन्तोदात्तं भवति । अञ्जनागिरिः । भञ्जनागिरिः । निकाये । शापिण्डिनिकायः । मौण्डिनिकायः । चिखिल्लिनिकायः * । संज्ञायामिति किम् । परमगिरिः । ब्राह्मणनिकायः ॥

---

* चिक्कलिनिकायः । पा० २ ।

Digitized by Google

कुमार्यां वयसि ॥ ९५ ॥

कुमार्यामुत्तरपदे वयसि गम्यमाने पूर्वपदमन्तोदात्तं भवति । वृद्धकुमारी । जरत्कुमारी । कुमारीशब्दः पुंसा सहासंप्रयोगमात्रमुपप्रयुक्तो वृद्धादिभिर्वयोविशेषवचनैः समानाधिकरणो भवति । तच्च वय इह गृह्यते न कुमारत्वमेव । वयसीति किम् । परमकुमारी ॥

उदके ऽकेवले ॥ ९६ ॥

अकेवलं मिश्रं तद्वाचिनि समासे उदकशब्द उत्तरपदे पूर्वपदमन्तोदात्तं भवति । गुडमिश्रमुदकम् । गुडोदकम् । तिलोदकम् * । स्वरे कृते एकादेशः स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितो भवति । अकेवलइति किम् । शीतोदकम् । उष्णोदकम् ॥

द्विगौ क्रतौ ॥ ९७ ॥

द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वपदमन्तोदात्तं भवति । गर्गत्रिरात्रः । चारकत्रिरात्रः । कुसुरविन्दसप्तरात्रः । गर्गाणां त्रिरात्रः, गर्गत्रिरात्रः । द्विगाविति किम् । अतिरात्रः । अचश्चित्त्वादन्तोदात्तः । क्रताविति किम् । बिल्वसप्तरात्रः । बिल्वशतस्य बिल्वहोमस्य वा सप्तरात्रो, बिल्वसप्तरात्रः ॥

सभायां नपुंसके ॥ ९८ ॥

सभाशब्द उत्तरपदे नपुंसकलिङ्गे समासे पूर्वपदमन्तोदात्तं भवति । गोपालसभम् । पशुपालसभम् । स्त्रीसभम् । दासीसभम् । सभायामिति किम् । ब्राह्मणसभम् । नपुंसकमिति किम् । राजसभा । ब्राह्मणसभा । सभायां प्रतिपदोक्तमिह नपुंसकलिङ्गं गृह्यतइति रमणीयसभं ब्राह्मणकुलमित्यत्र न भवति ॥

पुरे प्राचाम् ॥ ९९ ॥

पुरशब्द उत्तरपदे प्राचां देशे पूर्वपदमन्तोदात्तं भवति । ललाट-

* तण्डुलोदकमित्यधिकं पुस्तकान्तरे ।

पुरम् । काञ्चीपुरम् । शिवदत्तपुरम् । कार्णिपुरम् । नाम्पुरम् । प्राचामिति किम् । शिवपुरम् ॥

अरिष्टगौडपूर्वे च ॥ १०० ॥

अरिष्ट गौड इत्येवंपूर्वे समासे पुरशब्द उत्तरपदे पूर्वपदमन्तोदात्तं भवति । अरिष्टपुरम् । गौडपुरम् । पूर्वग्रहणं किम् । इहापि यथा स्यात् । अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् ॥

न हास्तिनफलकमार्देयाः ॥ १०१ ॥

हास्तिन फलक मार्देय इत्येतानि पूर्वपदानि पुरशब्द उत्तरपदे नान्तोदात्तानि भवन्ति । पुरे प्राचामिति प्राप्तिः प्रतिषिध्यते । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । मृदोरपत्यं, मार्देयः । शुभ्रादित्वाद् ढक् ॥

कुसूलकूपकुम्भशालं बिले ॥ १०२ ॥

कुसूल कूप कुम्भ शाला इत्येतानि पूर्वपदानि बिलशब्द उत्तरपदे ऽन्तोदात्तानि भवन्ति । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालाबिलम् । कुसूलादिग्रहणं किम् । सर्पबिलम् । बिलइति किम् । कुसूलस्वामी ॥

दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ॥ १०३ ॥

दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि भवन्ति ग्रामजनपदाख्यानवाचिषूत्तरपदेषु चानराटशब्दे च । पूर्वेषुकामशमी । अपरेषुकामशमी । पूर्वकृष्णमृत्तिका । अपरकृष्णमृत्तिका । जनपद । पूर्वपञ्चालाः । अपरपञ्चालाः । आख्यान । पूर्वाधिरामम् * । पूर्वयायातम् । अपरयायातम् । अधिराममधिकृत्य कृतो ग्रन्थ आधिरामम् । तथा यायातम् । चानराट । पूर्वचानराटम् । अपरचानराटम् । शब्दग्रहणं कालवाचिनोपि दिक्शब्दस्य परिग्रहार्थम् ॥

* पूर्वाधिरामकमित्यधिकमन्यत्र ।

आचार्योपसर्जनश्चान्तेवासिनि ॥ १०४ ॥

आचार्योपसर्जनान्तेवासिवाचिन्युत्तरपदे दिक्शब्दा अन्तोदात्ता भवन्ति । पूर्वपाणिनीयाः । अपरपाणिनीयाः । पूर्वकाशकृत्स्नाः । अपरकाशकृत्स्नाः । आचार्योपसर्जन इति किम् । पूर्वशिष्याः । अन्तेवासिनीति किम् । पूर्वपाणिनीयं शास्त्रम् ॥

उत्तरपदवृद्धौ सर्वं च ॥ १०५ ॥

उत्तरपदस्येत्यधिकृत्य या विहिता वृद्धिस्तद्वत्युत्तरपदे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति । सर्वपाञ्चालकः । पूर्वपाञ्चालकः । उत्तरपाञ्चालकः । सुसर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिना जनपदलक्षणो वुञ्प्रत्ययः । सुसर्वार्धाज्जनपदस्य दिशो मद्राणामिति चोत्तरपदवृद्धिः । अधिकारलक्षणादिह न भवति सर्वभासः सर्वकारक इति ॥

बहुव्रीहौ विश्वं संज्ञायाम् ॥ १०६ ॥

बहुव्रीहौ समासे विश्वशब्दः पूर्वपदं संज्ञायां विषये ऽन्तोदात्तं भवति । विश्वदेवः । विश्वयशाः । विश्वमहान् । पूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं प्राप्तम् । बहुव्रीहाविति किम् । विश्वे च ते देवाः, विश्वदेवाः । संज्ञायामिति किम् । विश्वे देवा अस्य विश्वदेवः । विश्वामित्रो विश्वाजिन इत्यत्र संज्ञायां मित्राजिनयोरित्येतद्भवति परत्वात् । बहुव्रीहावित्येतदधिक्रियते प्रागव्ययीभावसंज्ञानात् ॥

उदराश्वेषुषु ॥ १०७ ॥

उदर अश्व इषु इत्येतेषूत्तरपदेषु बहुव्रीहौ समासे संज्ञायां विषये पूर्वपदमन्तोदात्तं भवति । वृकोदरः । दामोदरः । हर्यश्वः । यौवनाश्वः । सुवर्णपुङ्खेषुः । महेषुः ॥

क्षेपे ॥ १०८ ॥

क्षेपे गम्यमाने उदरादिषूत्तरपदेषु बहुव्रीहौ समासे संज्ञायां विषये

Digitized by Google

पूर्वपदमन्तोदात्तं भवति । कुण्डोदरः । घटोदरः । कटुकाश्वः । स्यन्दिताश्वः । अनिघातेषुः । चलाचलेषुः । अनुदरः सूदर इत्यत्र नञ्सुभ्यामित्येतद्भवति विप्रतिषेधेन ॥

नदी बन्धुनि ॥ १०९ ॥

बहुव्रीहौ समासे बन्धुन्युत्तरपदे नद्यन्तं पूर्वपदमन्तोदात्तं भवति । गार्गीबन्धुः । वात्सीबन्धुः । नदीति किम् । ब्रह्मबन्धुः । ब्रह्मशब्द आद्युदात्तः । बन्धुनीति किम् । गार्गीप्रियः ॥

निष्ठोपसर्गपूर्वमन्यतरस्याम् ॥ ११० ॥

बहुव्रीहौ समासे निष्ठान्तमुपसर्गपूर्वं पूर्वपदमन्यतरस्यामन्तोदात्तं भवति । प्रधौतमुखः । २ । प्रक्षालितपादः । २ । यदि मुखशब्दः स्वाङ्गवाची तदा पक्षे मुखं स्वाङ्गमित्येतद्भवति न चेत्पूर्वपदप्रकृतिस्वरत्वेन गतिरनन्तर इत्येतद्भवति । निष्ठेति किम् । प्रसेचकमुखः । उपसर्गपूर्वमिति किम् । शुष्कमुखः ॥

उत्तरपदादिः ॥ १११ ॥

उत्तरपदादिरित्येतदधिकृतम् । यदित ऊर्द्ध्वमनुक्रमिष्याम उत्तरपदस्यादिरुदात्ता भवतीत्येवं तद्वेदितव्यम् । वक्ष्यति कर्णो वर्णलक्षणात् । शुक्लकर्णः । कृष्णकर्णः । उत्तरपदस्येत्येतदा पादपरिसमाप्तेः । आदिरिति प्रकृत्या भगालमिति यावत् ॥

कर्णो वर्णलक्षणात् ॥ ११२ ॥

बहुव्रीहौ समासे वर्णवाचिनो लक्षणवाचिनश्च कर्णशब्दउत्तरपदमाद्युदात्तं भवति । शुक्लकर्णः । कृष्णकर्णः । लक्षणात् । दात्राकर्णः । शङ्कूकर्णः । कर्णे लक्षणस्येति दीर्घत्वम् । पशूनां विभागज्ञापनार्थं दात्रशङ्कुप्रतिरूपकं कर्णादिषु चिन्हं यत् क्रियते तदिह लक्षणं गृह्यते,तेन स्थूलकर्ण इत्यत्र न भवति । कर्ण इति किम् । श्वेतपादः । कूटशृङ्गः । वर्णलक्षणादिति किम् । शोभनकर्णः ॥

संज्ञौपम्ययोश्च ॥ ११३ ॥

संज्ञायामौपम्ये च यो बहुव्रीहिर्वर्त्तते तत्र कर्णशब्द उत्तरपदमाद्युदात्तं भवति संज्ञायाम् । कुञ्चिकर्णः । मणिकर्णः । औपम्ये । गोकर्णः । खरकर्णः ॥

कण्ठपृष्ठग्रीवाजङ्घं च ॥ ११४ ॥

कण्ठ पृष्ठ ग्रीवा जङ्घा इत्येतानि उत्तरपदानि बहुव्रीहौ समासे संज्ञौपम्ययोराद्युदात्तानि भवन्ति । कण्ठः संज्ञायाम् । शितिकण्ठः । नीलकण्ठः । औपम्ये । खरकण्ठः । उष्ट्रकण्ठः । पृष्ठः संज्ञायाम् । काण्डपृष्ठः । नाकपृष्ठः । औपम्ये । गोपृष्ठः । अजपृष्ठः । ग्रीवा संज्ञायाम् । सुग्रीवः । नीलग्रीवः । दशग्रीवः । औपम्ये । गोग्रीवः । अश्वग्रीवः । जङ्घा संज्ञायाम् । नाडीजङ्घः । तालजङ्घः । औपम्ये । गोजङ्घः । अश्वजङ्घः । एणीजङ्घः ॥

शृङ्गमवस्थायां च ॥ ११५ ॥

शृङ्गशब्द उत्तरपदमवस्थायां संज्ञौपम्ययोश्च बहुव्रीहौ आद्युदात्तं भवति । उद्गतशृङ्गः । द्व्यङ्गुलशृङ्गः । अङ्गुलशृङ्गः । अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषो ऽवस्था । संज्ञायाम् । ऋष्यशृङ्गः । औपम्ये । गोशृङ्गः । मेषशृङ्गः । अवस्थादिष्विति किम् । स्थूलशृङ्गः ॥

नञो ऽजरमरमित्रमृताः ॥ ११६ ॥

नञ उत्तरे जरमरमित्रमृता बहुव्रीहौ समासे आद्युदात्ता भवन्ति । अजरः । अमरः । अमित्रः । अमृतः * । नञ इति किम् । ब्राह्मणमित्रः । जरादय इति किम् । अशत्रुः । नञ्सुभ्यामिति उत्तरपदान्तोदात्तत्वमेवात्र भवति ॥

सोर्मनसी अलोमोषसी ॥ ११७ ॥

सोरुत्तरमनन्तमसन्तं च बहुव्रीहौ समासे आद्युदात्तं भवति लोमोषसीवर्ज्जयित्वा । सुकर्म्मा । सुधर्म्मा । सुप्रथिमा । असन्तम् ।

* मरशब्दो ऽच्प्रत्ययान्त इष्यते मरणं मर इति । पुस्तकान्तरे ऽधिकमत्र ।

Digitized by Google

सुपयाः । सुयशाः । सुस्रोताः । सुभस् । सुध्वत् । सोरिति किम् । कृतकर्मा । कृतयशाः । मनसी इति किम् । सुराजा । सुतक्षा । अलोमोषसी इति किम् । सुलोमा । सूषाः । अनिनस्मन्ग्रहणान्यर्थवता ऽनर्थकेन चेत्यनर्थकयोरपि मनसोरिह ग्रहणम् । नञ्सुभ्यामित्यस्यायमपवादः । कपि तु परत्वात् कपि पूर्वमित्येतद्भवति । सुकर्मकः । सुस्रोतस्कः ॥

क्रत्वादयश्च ॥ ११८ ॥

क्रत्वादयः सोरुत्तरे बहुव्रीहौ समासे आद्युदात्ता भवन्ति । सुक्रतुः । सुदृशीकः । क्रतु । दृशीक । प्रतीक । प्रपूर्ति । हव्य । भग ॥

आद्युदात्तं द्व्यच्छन्दसि ॥ ११९ ॥

यदाद्युदात्तं द्व्यच् उत्तरपदं बहुव्रीहौ समासे सोरुत्तरं तदाद्युदात्तमेव भवति छन्दसि विषये । स्वश्वास्त्वा सुरथामर्जयेम । नित्स्वरेणाश्वरथशब्दावाद्युदात्तौ । आद्युदात्तमिति किम् । या सुबाहुः स्वङ्गुरिः । बाहुशब्दः प्रत्ययस्वरेणान्तोदात्तः । द्व्यजिति किम् । सुगुरसत् । सुहिरण्यः । स्वश्वः । नञ्सुभ्यामित्यस्यायमपवादः ॥

वीरवीर्यौ च ॥ १२० ॥

वीर वीर्य इत्येतौ च शब्दौ सोरुत्तरौ बहुव्रीहौ समासे छन्दसि विषये आद्युदात्तौ भवतः । सुवीरेण ते । सुवीर्यस्य पतयः स्याम । वीर्यमिति यत्प्रत्ययान्तं तत्र यतो ऽनाव इति आद्युदात्तत्वं न भवतीत्येतदेव वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ॥

कूलतीरतूलमूलशालाक्षसममव्ययीभावे ॥ १२१ ॥

कूल तीर तूल मूल शाला अक्ष सम इत्येतानि उत्तरपदानि अव्ययीभावसमासे आद्युदात्तानि भवन्ति । परिकूलम् । उपकूलम् । परितीरम् । उपतीरम् । परितूलम् । उपतूलम् । परिमूलम् । उपमूलम् । परिशालम् । उपशालम् । उपाक्षम् । पर्यक्षम् । सुषमम् । विषमम् । निषमम् । दुःषमम् । तिष्ठद्गुप्रभृतिष्वेते पठ्यन्ते । कूलादिग्रहणं किम् । उप-

कुम्भम् । अव्ययीभावइति किम् । परमकूलम् । उत्तमकूलम् । पर्यादिभ्यः कूलादीनामाद्युदात्तत्वं विप्रतिषेधेन भवति । परिकूलम् । उपकूलम् ॥

कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ॥ १२२ ॥

कंस मन्थ शूर्प पाय्य काण्ड इत्येतान्युत्तरपदानि द्विगौ समासआद्युदात्तानि भवन्ति । द्विकंसः । त्रिकंसः । द्विमन्थः । त्रिमन्थः । द्विशूर्पः । त्रिशूर्पः । द्विपाय्यः । त्रिपाय्यः । द्विकाण्डः । त्रिकाण्डः । द्विगाविति किम् । परमकंसः । उत्तमकंसः ॥

तत्पुरुषे शालायां नपुंसके ॥ १२३ ॥

शालाशब्दान्ते तत्पुरुषे समासे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तं भवति । ब्राह्मणशालम् । क्षत्रियशालम् । विभाषा सेनासुराच्छायाशालानिशानामिति नपुंसकलिङ्गता । तत्पुरुषइति किम् । दृढशालं ब्राह्मणकुलम् । शालायामिति किम् । ब्राह्मणसेनम् । नपुंसक इति किम् । ब्राह्मणशाला ॥

कन्था च ॥ १२४ ॥

तत्पुरुषे समासे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तं भवति । सौशमिकन्थम् । आह्वरकन्थम् । चप्यकन्थम् । संज्ञायां कन्थोशीनरेष्विति नपुंसकलिङ्गता । षष्ठीसमासा एते । नपुंसकइत्येव । दाक्षिकन्था ॥

आदिश्चिहणादीनाम् ॥ १२५ ॥

कन्थान्ते तत्पुरुषे समासे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तो भवति । चिहणकन्थम् । मडरकन्थम् । मडुर इति के चित् पठन्ति । मडुरकन्थम् । चिहण । मडर । मडुर । वैतुल । पटत्क । वैडालिकर्णः । वैतालिकर्णिरित्यन्ये पठन्ति । कुक्कुट । चित्कण । चिक्कण इत्यपरे पठन्ति । आदिरिति वर्तमाने पुनरादिग्रहणं पूर्वपदाद्युदात्तार्थम् ॥

चेलखेटकटुककाण्डं गर्हायाम् ॥ १२६ ॥

चेल खेट कटुक काण्ड इत्येतान्युत्तरपदानि तत्पुरुषे समासे गर्हायां गम्यमानायामाद्युदात्तानि भवन्ति । पुत्रचेलम् । भार्याचेलम् ।

Digitized by Google

उपानत्खेटम् । नगरखेटम् । दधिकटुकम् । उदश्वित्कटुकम् । भूतकाण्डम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्रादीनां गर्हा । तत्र पुत्रश्चेलमिवेति विगृह्य व्याघ्रादेराकृतिगणत्वात् उपमितं व्याघ्रादिभिरिति समासः । गर्हायामिति किम् । परमचेलम् ॥

चीरमुपमानम् ॥ १२७ ॥

चीरमुत्तरपदमुपमानवाचि तत्पुरुषे समासे आद्युदात्तं भवति । वस्त्रं चीरमिव, वस्त्रचीरम् । पटचीरम् । कम्बलचीरम् । उपमानमिति किम् । परमचीरम् ॥

पललसूपशाकं मिश्रे ॥ १२८ ॥

पलल सूप शाक इत्येतान्युत्तरपदानि मिश्रवाचिनि तत्पुरुषे समासे आद्युदात्तानि भवन्ति । गुडपललम् । घृतपललम् । घृतसूपः । मूलकसूपः । घृतशाकम् । मुद्गशाकम् । गुडेन मिश्रं पललं, गुडपललम् । भक्ष्येण मिश्रीकरणमिति समासः । मिश्रइति किम् । परमपललम् ॥

कूलसूदस्थलकर्षाः संज्ञायाम् ॥ १२९ ॥

कूल सूद स्थल कर्ष इत्येतान्युत्तरपदानि तत्पुरुषे समासे संज्ञायां विषये आद्युदात्तानि भवन्ति । दाक्षिकूलम् । माहकिकूलम् । देवसूदम् । भाजीसूदम् । दाण्डायनस्थली । माहकिस्थली । दाक्षिकर्षः । ग्रामनामधेयान्येतानि । स्थलग्रहणेन लिङ्गविशिष्टत्वात्स्थलीशब्दोऽपि गृह्यते । जानपदकुण्डेत्यनेन ङीष् । संज्ञायामिति किम् । परमकूलम् ॥

अकर्मधारये राज्यम् ॥ १३० ॥

कर्मधारयवर्जिते तत्पुरुषे समासे राज्यमित्येतदुत्तरपदमाद्युदात्तं भवति । ब्राह्मणराज्यम् । क्षत्रियराज्यम् । अकर्मधारयइति किम् । परमराज्यम् । चेलराज्यादिस्वरादव्ययस्वरो भवति पूर्वविप्रतिषेधेन । कुचेलम् । कुराज्यम् ॥

वर्ग्यादयश्च ॥ १३१ ॥

वर्ग्य इत्येवमादीन्युत्तरपदानि अकर्मधारये तत्पुरुषे समासे आद्यु-

Digitized by Google

दात्तानि भवन्ति । वासुदेववर्य्यः । वासुदेवपत्त्यः । अर्जुनवर्य्यः । अर्जुनपत्यः । अकर्मधारयइत्येव । परमवर्य्यः । वर्य्यादयः प्रातिपदिकेषु न पठ्यन्ते । दिगादिषु तु वर्ग पूग गण पच इत्येवमादयो ये पठितास्तएव यत्प्रत्ययान्ता वर्य्यादय इह प्रतिपत्तव्याः ॥

पुत्रः पुम्भ्यः ॥ १३२ ॥

पुत्रशब्दः पुंशब्देभ्य उत्तरस्तत्पुरुषे आद्युदात्तो भवति । कौनटिपुत्रः । दामकपुत्रः । माहिषकपुत्रः । पुत्र इति किम् । कौनटिमातुलः । पुम्भ्य इति किम् । गार्गीपुत्रः । वात्सीपुत्रः ॥

नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ॥ १३३ ॥

आचार्य उपाध्यायः । राजा ईश्वरः । ऋत्विजो याजकाः । संयुक्ताः स्त्रीसंबन्धिनः श्यालादयः । ज्ञातयो मातृपितृसंबन्धिनो बान्धवाः । आचार्याद्याख्येभ्यः परः पुत्रशब्दो नाद्युदात्तो भवति । आख्याग्रहणात्स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं भवति । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्तपुत्रः । संबन्धिपुत्रः । श्यालपुत्रः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः । ऋतो विद्यायोनिसंबन्धे य इति षष्ठ्या अलुक् । पुत्रस्वरे प्रतिषिद्धे समासान्तोदात्तत्वमेव भवति ॥

चूर्णादीन्यप्राणिषष्ठ्याः ॥ १३४ ॥

उत्तरपदादिरिति वर्त्तते तत्पुरुषइति च । चूर्णादीन्युत्तरपदानि अप्राणिवाचिनः षष्ठ्यन्तात्पराणि तत्पुरुषे समासे आद्युदात्तानि भवन्ति । मुद्गचूर्णम् । मसूरचूर्णम् । अप्राणिषष्ठ्या इति किम् । मत्स्यचूर्णम् । षष्ठ्या इति किम् । परमचूर्णम् । चूर्ण । करिप । करिव । शाकिन । शाकट । द्राक्षा । तूस्त । कुन्दम । दलप । चमसी । चक्कन * । चौल चूर्णादीन्यप्राण्युपग्रहादिति सूत्रस्य पाठान्तरम् । तत्रोपग्रह इति षष्ठ्यन्तमेव पूर्वाचार्योपचारेण गृह्यते ॥

---

* चक्वनेत्यन्ये पठन्ति । इति पदमञ्जरी ।

षट् च काण्डादीनि ॥ १३५ ॥

षट् पूर्वोक्तानि काण्डादीन्युत्तरपदानि अप्राणिषष्ठ्या आद्युदात्तानि भवन्ति । काण्डं गर्हायामित्युक्तमगर्हायामपि भवति । दर्भकाण्डम् । शरकाण्डम् । चीरमुपमानमित्युक्तमनुपमानमपि भवति । दर्भचीरम् । कुशचीरम् । पललसूपशाकं मिश्रइत्युक्तममिश्रेपि भवति । तिलपललम् । मुद्गसूपः । मूलकशाकम् । कूलं संज्ञायामित्युक्तमसंज्ञायामपि भवति । नदीकूलम् । समुद्रकूलम् । षडिति किम् । राजसूदः * ॥

कुण्डं वनम् ॥ १३६ ॥

कुण्डशब्दोऽत्र कुण्डसादृश्येन वने वर्त्तते । कुण्डमित्येतदुत्तरपदं वनवाचि तत्पुरुषे समासे आद्युदात्तं भवति । दर्भकुण्डम् । शरकुण्डम् । वनमिति किम् । मृत्कुण्डम् ॥

* अप्राणिषष्ठ्या इति किम् । देवदत्तकाण्ड इत्यधिकं पुस्तकान्तरे ।

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ द्वादशस्तबकावशेषः ॥

ततश्चातिशयवैकल्येन वै कल्येन भूयत इति सकरुणारुणापाङ्गोपाङ्गोचरीभूता भूतापहारी हारी ताः कुलकुमारिकाः सुकुमारिकाः सुललितमधुमधुरविकस्वरस्वरस्वरपरिचितसुधासुधावितामुवाच वाचमतिरसपरिहासहासपेशलं हासयन्नपि पृथुपृथुकवयस्यगणमतिप्रियप्रियकतरुतरुणस्कन्धारोहरोहत्परभागोऽपरभागोऽजःपटलोद्गुनरविकिरणो व्रजराजयुवराजः ॥ ६१ ॥

अतिशयवैकल्येन वै निश्चितं कल्येन प्रबलेन ज्ञायत इति हेतोः, "कल्यौ सज्जनिरामया"वित्यमरः, ताः कुलकुमारिकाः प्रति व्रजराज-

* संधिः पूर्ववत् ।

युवराजो वाचमुवाचेत्यन्वयः। ताः कीदृशीः, अपां जलानां गोचरीभूताः, जलमध्यस्था इत्यर्थः। कामत्वे हेतुः, भुवः पृथिवीस्थमात्रस्यापि तापहारी, किमुत तासाम्। हारी हारवान्। वाचं कीदृशीं, सुललितां मधुतोऽपि मधुरो विकस्वरः स्वरो यस्यां तां, स्वः स्वर्गेऽपि अपरिचितया सुधया सुष्ठु धाविता क्षालितामिव। रोहत्परभागः- उत्पद्यमानशोभः। न परं भजते- अपरभाक्, स्वाधीन इत्यर्थः। यतः- ओजःपटलेन तेजोवृन्देन तिरस्कृतसूर्यकिरणः, इति तत्तद्गीतिकर्मणि देशाध्यक्षत्वादपि निर्भयत्वव्यञ्जनार्थम् ॥ ९१ ॥

भो भो माशङ्कनकननीयतापरां तापरां कुरुत मनोवृत्तिमात्मनीनामयमहमहं तां कुतुकरसमये समये व्याप्य कुर्वाणो लीलालोभवतीनां भवतीनां गतस्थान्यंशुकान्यंशुकानि निजहार ॥ ९२ ॥

आशङ्कनस्य- आशङ्काया या कननीयता दीप्तता तत्परां, "कनी दीप्तौ," अत एव तापरां तापप्रदां मनोवृत्तिं मा कुरुत, किन्तु- अयमहमहं तां भवतीनां वृत्तिम्- आत्मनीनाम् - आत्मने हितां कुर्वाणः कर्तुम्- अंशुकानि निजहार हृतवानस्मि। कीदृशानि गतानि स्थानानि येषां तथाभूता अंशवः किरणा येषां तानि ॥ ९२ ॥

निजहारमुपहारीकृत्य सरसमित एवागत्य यन्त्यनवसादेन मिलिता एकैकशोऽथवा निजनिजाम्बराणि समादध्वं मादध्वंसेन ॥ ९३ ॥

समादध्वं गृह्णीत, मादो मत्तता गर्वः- तस्य ध्वंसेन, ते विद्वांसेत्यर्थः ॥ ९३ ॥

अथ कात्यायनीव्रतमननैरिव फले दुष्पचे पचेलिमतामिवागत्य गलिते प्रकटसौरभरभसं तस्य रसमिव तत् कृष्णस्य सनोभव्याहरणं भव्याहरणं हरणमिव व्रतक्रमसमाप्तेः श्रवणपुटकेन पीत्वापीत्वा च व्रतपरिश्रमपारम् ॥ ९४ ॥

दुष्पचे· अन्यैर्दुःशक्यपाके । पचेलिमतां स्वयमेव पक्कतां, "कर्मकर्तरि केलिमरः" । तस्य फलस्य सलोभव्याहरणं लोभसूचकवाक्यं व्रतकर्मसमाप्तेर्भव्याहरणं मङ्गलव्यापकं हरणं यौतकवस्तु, "भावुकं भविकं भव्य"मित्यमरः, "हरणं यौतकद्रव्य"मिति मेदिनी। व्रतपरिश्रमस्य पारम्· इत्वा प्राप्य ॥ ९४ ॥

असमयसमयमानमाशालताविशालताविसौभाग्यफलमिव तमम्बरवरचोरमुपघ्नमुपघ्नन्य इव सकृद्दरकुड्मलितललितलक्ष्म पक्ष्मपतनचञ्चलाञ्चलाभिनीतमन्दाक्षमन्दावृतलक्ष्मीकेनापाङ्गेन ॥ ९५ ॥

तम्· अम्बरवरचोरम्· अपाङ्गेन· उपघ्नत्य इवेत्यपाङ्गस्यामर्षाभिनायकत्वमपि सूचितम् । तं कथंभूतमिव, असमयेऽपि सम्यक्· अयमानं स्वयमागच्छत् सौभाग्यरूपं फलमिव । तदपि कीदृशम्, आशैव लता तस्या विशालतायाः वीः प्रजननं यतस्तत्, "वी प्रजननकान्तिगतिषु" । उपघ्नम्· आश्रयम्, "उपघ्न आश्रये" इति पाणिनिसूत्रम् । अपाङ्गेन कीदृशेन, दरकुड्मलिताभ्याम्· ईषत् कुड्मलायमानाभ्यां ललितं लक्ष्म यत्र तद्यथा स्यात् तथा पक्ष्मपतनेन चञ्चलाभ्यामञ्चलाभ्यामभिनीतं यन्मन्दाक्षं लज्जा तेन मन्दा पुनःपुनरेवावृता· अप्रतिहता लक्ष्मीः शोभा यत्र तेन, "मन्दोऽभीक्ष्णे च मूर्खे चे"ति मेदिनी ॥ ९५ ॥

समुत्कर्षहर्षहठाकृष्टमनसोऽपि दारुदारुणाया तयैवापचपयापयाविततहर्षचिह्ना अप्रतिभाप्रतिभासमानसमानसाध्वसाः साध्वसाधितशीतभयमाकण्ठमेव सलिलमवललम्बिरेऽलंविरेमुश्च वणमुत्तरतः ॥ ९६ ॥

सम्यगुत्कर्षो यस्य तथा भूतेन हर्षेण हठादाकृष्टचित्ता अपि अप्रतिभया प्रतिभासमानं देदीप्यमानं समानं तुल्यं च साध्वसं यासां ताः, "भासृ दीप्तौ" प्रतिपूर्वः । साधु यथा स्यात् तथा· असाधितं अगणितं शीतभयं यत्र तद्यथा स्यात् तथा· अवलम्बितवत्यः । उत्तरतः प्रत्युत्तरदानादपि· अलम्· अतिशयेन विरेमुर्विरताः ॥ ९६ ॥

परस्परं पराञ्चिताननाः सत्योऽसत्योदर्कमिव तं व्याहारं विदत्यः सुदत्यः सुभगत्वमुत्तरं देहि त्वमुत्तरामिति निभृतमेवोचुर्नतु कापि कुतुकादुत्तरमदात् ॥ ९७ ॥

परस्परामिति "स्त्रीनपुंसकयोः सुप आम् वे"ति स्मृतिरित्याम् । पराञ्चितानना लज्जानतमुख्यः । न सत्य उदर्क उत्तरफलं यस्य तथा भूतं व्याहारं कथावाक्यम्, इति प्रत्युत्तरे दत्ते सति वस्त्रप्राप्त्यसंभावना । सुभगत्वेन सौभाग्येन हेतुना मुत्. आनन्दस्तया तरोऽभिभवो यत्र तद्यथा स्यात् तथा देहि । "तॄ तरेऽभिभवे प्लुप्या"मिति कल्पद्रुमः । निभृतमेव नीचैरेव परस्परामूचुः ॥ ९७ ॥

तदेवमभितः कृतचर्चिकतेषणां क्षणं निर्वचनरचनरम्यतमं तासां वदनकुलमवाचालचालचतुरचञ्चरीकं दरविकासं विन्दरविन्दवृन्दमिव मग्ननालं नालंचकार यमुनायाः किमु कमनीयताम् ॥ ९८ ॥

अवाचालौ चाले चलने चतुरौ चञ्चरीकौ भ्रमरौ यत्र तत्, दर * ईषद् विकासं विन्दत् प्राप्नुवद्. अरविन्दवृन्दमिव । अत्र चञ्चरीकयोर्निर्वचनत्वेनैव. अरविन्दवृन्दमपि निर्वचनमिति तादृशवदनकुलसाधर्म्यमप्यसिद्धम् । किमु न. अलंचकार, अपित्वलंचकारैव ॥ ९८ ॥

एवमनुत्तरमनुत्तरङ्गितदृशां चिरसमयरसमयतां व्रजदरसतामेवोत्पादयतीति पुरोगां रोगान्तरवदुपद्रवकरीमपत्रपामथ पारयित्वा ॥ ९९ ॥

न. उच्चैस्तरङ्गिता दृशो याभिस्तासाम् । एवमनुत्तरं प्रत्युत्तराभावः, चिरसमयं व्याप्य रसमयतां व्रजत् सत्, अरसतां सारस्याभावमेव वस्तुविचारत उत्पादयतीति हेतोर्हरिमभाषन्तेत्यन्वयः । ननु लज्जावतीनां कुलकुमारिकाणां कथमेतत् संभवेदित्यत आह, पुरोगाम्. अग्रवर्तिनीमपत्रपां लज्जां पारयित्वा समाप्य, "पार तीर कर्मसमाप्तौ" ॥ ९९ ॥

* दरशब्दस्येषदर्थकस्याव्ययत्वादत्र विभक्त्यभावः, दरमीषदिति कुत्रचिदुपलभ्यमानमसंगतमेवावगन्तव्यम् ।

Digitized by Google

मधुरतरतरलितपक्ष्मलक्ष्मीलक्ष्मीलदविक्लमलमतिसकलसकलसर-
सससंभ्रमविनयानुनयानुत्तमं नुत्तमन्दाक्षमतिदरहसितसितदन्तका-
न्तिकान्तिकलब्धमधुरमधुरिमाब्धिलहरि हरिमभाषन्त ॥ १०० ॥

मधुरतरं यथा स्यात् तथा तरलितैः पक्ष्मभिर्लक्ष्मीं शोभां लाति गृह्णाति तथा भूतं क्ष्मीलत् सनिमेषम्· अविक्लमलं यत्र तद्यथा स्यात् तथा, "मील क्ष्मील निमेषणे" । अतिसकलं सर्वमतिक्रान्तं, कया शोभयेत्यत आह, सकलं कला वैदग्धी तत्सूचकं सरसमक्षरं ससंभ्रमं संभ्रमसूचकं, विनयानुनयाभ्यां प्रश्रयप्रसादनाभ्याम्· अनुत्तमं श्रेष्ठं, नुत्तमन्दाक्षं प्रेरितलज्जं, तच्च तच्च यथा स्यात् तथा। तत्र वैदग्ध्यादिसूचनं महेच्छेत्यादिभिर्विशेषणैर्यथायथं ज्ञेयम् । अतिदर अत्यल्पेन हसितेन सितस्य दन्तस्य कान्तीनां कस्य जलस्यान्तिकलब्ध्या निकटप्राप्त्या तत्र प्रतिबिम्बितत्वात्· मधुरा मधुरिमाब्धिलहरी यत्र तद्यथा स्यात् तथा । अभाषन्त व्यक्तमब्रुवन् ॥ १०० ॥

आं जानीमहे महेच्छ त्वां गोकुलमहीमहेन्द्रस्य विततनयं तनयं प्रगुणगुणरत्नरत्नाकरं· करम्बितकरुणातरङ्गमवनीमङ्गलमङ्गलक्ष्मीभरेण वितन्वानं तन्वानन्दमय्या सकललोकलोचनरोचनरोचिषं ब्रजानन्दनं दक्षिणमक्षीणसमज्ञासमज्ञानमज्ञानहन्तारम् ॥ १०१ ॥

अङ्गलक्ष्मीभरेण· अवन्या मङ्गलं वितन्वानं विस्तारयन्तम् । आनन्दमय्या तन्वा देहेन ब्रजानन्दनम् । दक्षिणं सरलम् । अक्षीणया संपूर्णया समज्ञया कीर्त्या समं तुल्यमेव ज्ञानं शस्त्रशास्त्रादिपाण्डित्यं यस्य तम् । अज्ञानहन्तारम्, अन्यस्मै· अपि तादृशज्ञानदायकमित्यर्थः ॥ १०१ ॥

हन्तारं कथमनयमनय इममतिमहीयांसम् ॥ १०२ ॥

विततनयमित्यादिभिर्नवभिर्विशेषणैस्तत्तत्प्रतिरूपमतीतिं प्रगुणदूषणां शीतार्तकन्यास्वकारणं नग्निकादिदृष्टाक्षपमाङ्गल्यं कन्यागणकटुकटाक्षविषयीभावं दुःखदत्वम्· अदाक्षिण्यं दुष्कीर्तिम्· अविज्ञत्वम्· अज्ञानविस्तारं च क्रमेणाभिव्यज्यापि कोमलमुद्रया स्पष्टमप्याहुः । हन्त

खेदे॰ चरं शीघ्रम्॰ इमम्॰ अनयम्॰ अनीतिं कथं त्वम्॰ अनयः॰ गृहीत-
वानसि, "नीञो लङ्युत्तमपुरुषैकवचनम्। अनयं कीदृशम्, अतिमहीयांसम्॰
बृहत्तरम् ॥ १०२ ॥

महीयां संपादयति तत्रभवान् भवान् दुर्नीतिहानिं हा निन्द्य-
मिदमाचरितं चरितं किमहो ॥ १०३ ॥

महीयां मह्यै पृथिव्यै हितां दुर्नीतिहानिं भवान् संपादयति,
"तस्मै हित"मिति छः। हा पीडायां, निन्द्यं चरितमिदं किमहो कि-
मर्थमाचरितम् ॥ १०३ ॥

महोन्नतकुलकुमारिकामारिकादेवतेव तेवते वतेयं ते रीतिः॥१०४॥

ननु किमत्र निन्दनं संभावितं तत्राहुः कुलकुमारिका इति,
"अनुकम्पायां कः," महोवता व्रतोद्यापनोत्सवासक्ताः, अत एव॰ अनुकम्प्याः
कुलकुमारीर्मारयतीति सा देवतेव॰ इयं ते तव रीतिः॰ तेवते दीव्यति,
"तेवृ देवने," वतेति खेदे ॥ १०४ ॥

यदमूनि नः समीचीनानि चीनानि जहार हा रसिकतेयं तेऽयं न
जनयिष्यते परं त्वपयश एव ॥ १०५ ॥

चीनानि वस्त्राणि, हा॰ इति शोके, ते तव॰ इयं रसिकता॰ अयं
शुभावहविधिं न जनयिष्यते ॥ १०५ ॥

भो व्रजश्लाघ्य व्रज श्लाघ्यतां देहि तावदस्माकमम्बराणि
वराणि यन्तु विशदानि यशांसि ॥ १०६ ॥

श्लाघ्यतां श्लाघ्यत्वं व्रज॰ अब्रूहि ॥ १०६ ॥

अथ स पुनराह ताः पुनराहता व्रीडभारेण कुर्वन् ॥ १०७ ॥

ताः प्रति स श्रीकृष्ण आह, व्रीडभरेण लज्जातिशयेन॰ आहताः॰
प्राप्ताघातास्ताः कुर्वन्, कर्तुमित्यर्थः ॥ १०७ ॥

अयि नालीकमुख्यो नालीकमुख्योक्तिरहं कदाचन वचनमला-
मममयथार्थ एव व्यवहारो हारोऽस्य यद्व्याख्यातव्यः तथ्यायते
भणितिः ॥ १०८ ॥

नालीकमुख्यः॰ हे कमलमुख्यः, अलीकमुख्या मिथ्याप्रधाना॰ उक्तिर्यस्य तथाभूतो नाहं, वचनवतां जनानां कदाचित् क्वचिदयथार्थो मिथ्याभूत एव व्यवहारो भवति, कुतः, यतोऽयाथातथ्या मिथ्याभूतैव भणितिः॰ ह स्फुटम्॰ आरोपेण सत्यत्वारोपेणैव कदाचन तथ्यायते, ते मिथ्याभूतमपि स्ववचनं सत्यमिव प्रत्याययन्तीत्यर्थः ॥ १०८ ॥

मम तु वचनामृतमृतमेवेति सुप्रसिद्धमेवैतत् परिहासेनापि नापिहितं करोमि सत्यं विशेषतस्तु व्रतवतोभिर्भवतीभिर्भवति न भव्यः परीहासः सहसा सह साधुवादेन् यदुक्तमिहागत्य नीयन्तां वराण्यम्बराण्यस्त्रवेति तन्न कदापि मिथ्या भवितुमर्हति ॥ १०९ ॥

अपिहितम्॰ आच्छादितं न करोमि ॥ १०९ ॥

पुनर्निजगदुस्तापहर हन्त हन्तरधर्मस्य धर्मस्य किमहो पन्थानं नारोहसि हसितेनापि सन्तो नैवं निगदन्ति दन्तिवरगामिन् भवन्ति हि भवन्तः सहजदयालवो दयालवोऽपि किमस्मासु नास्ति परदुःखमननुभवतां भवताम् ॥ ११० ॥

हे॰ अधर्मस्य हन्तः ॥ ११० ॥

यदस्माकमतिहिममहिममयूखतनयाम्भोऽवगाहमानानां पृथुवेपथुमतीनां मतीनां वैकल्यं कल्यं भवतीति न विदाङ्कुर्वन्ति भवन्तः ॥ १११ ॥

अहिममयूखः सूर्यस्तत्तनया यमुना तस्या अम्भो जलमतिहिमं वैकल्यं व्याकुलत्वं कल्यं समर्थं न विदांकुर्वन्ति न जानन्ति, न विचारयन्तीत्यर्थः ॥ १११ ॥

तदहो वरमिह मिहिरदुहितरि हिमरिच्यमानाः सुमहिममहिमपयसि प्रियामहेऽयामहे श्याम हे न विवस्त्रा वस्त्रापहारिणामन्तिकमयं हि कुलजाकुलजातिस्वभावो भावोऽयं खलु ते दुष्टः ॥ ११२ ॥

हितेन रिच्यमाना वियुज्यमानाः, “रिच संपर्कवियोगयोः” । न॰ अयामहे न गच्छामः, “अय गतौ” । ते तव भावोऽभिप्रायः ॥ ११२ ॥

Digitized by Google

तद्विरम विरमविक्लवाक्लवान प्रणमामो मा मोहय वचसा च साधु-परिहासविशारद शारदशशिवाञ्छितास्यदास्य दास्य एव ते वय-मिमा मिमान इव नो मनो यद्या यद्याचापयसि तद्देव करवामहे महेश्वर्यमिदं हीयतां हीयतां धर्मशरणिः ॥ ११३ ॥

अविक्लवाक्लवान हे छववादिन्, वचसा च शाठ्येनापि मा मोहय, किं पुनः कर्मणा । शारदशशिनापि वाञ्छितम्, आस्यस्य मुखस्य दास्यं यस्य हे तथाभूत, इति तादृशमुखादमृतरूपं प्रियमेव वाक्यं निःसर्तुमर्ह-तीति भावः । नोऽस्माकं मनो मिमान इव, परिमातुं परीक्षितुमित्यर्थः, "हेतौ शानच्" । इदं वस्त्रादानरूपं महेश्वर्यं हीयतां त्यज्यताम्, "ओहाक् त्यागे" । हिनिश्चितम्, ईयताम्, अनुविधीयतां धर्मस्य शरणिर्मार्गः, "इङ् गतौ" ॥ ११३ ॥

रसपरिहासामृतस्य मा प्रहीयतां प्रहीयतां नोऽरुचीर चीरनिचयः शिशुभिरेव रेवणानर्हैः ॥ ११४ ॥

मा प्रहीयतां मा कूपायतां, "पुंस्येवान्धुः प्रहिः कूप" इत्यमरः, चीरनिचयः प्रहीयतां प्रेष्यतां, हे, अरुचीर, अस्माकमरुचिमरोचकमेव, ईरयसि, आचरसि, तत् किमर्थमिवेति भावः । शिशुभिरेव द्वारभूतैः, नतु स्वयमेवागत्येत्यर्थः, कुतः, रेवणानर्हैः, रेवणं शङ्का "रेवृ शङ्कायां" तदनर्हैः, शिशुत्वादेषु लज्जानुत्पत्त्या विश्वस्ता भवेम त्वयि तु नैव तथेति भावः ॥ ११४ ॥

इति सामभिरासामभिरामोक्तौ विरतायामन्याश्चतुरंमन्याश्च तुरङ्गवदना विक्लस्वरस्वरपरिवादिपरिवादिनीकलकण्ठस्वराः स्वराग-प्राकट्येन सप्रागल्भ्यमूचिरेऽचिरेण ॥ ११५ ॥

इति सामभिः प्रीतिलक्षणैरुपायैरभिरामायां रम्यायामुक्तौ वाचि विरतायां सत्याम्, अन्या भयप्रदर्शनरूपं भेदलक्षणमुपायमालम्बमाना ऊचिरे । चतुरङ्गवदनाश्चतुरङ्गसेनाप्रचिःशङ्कमुख्यः, श्लेषेण तुरङ्गवदनाः

Digitized by Google

मूर्त्ताः किंनर्य एवेत्यर्थः । विकस्वरं स्वरं परिवदितुं शीलमस्याः सा परिवादिनी वीणा तस्याः कल इव कण्ठस्वरो यासां ताः ॥ ११५ ॥

अहो कष्टं कष्टङ्कयतु धर्मपथं गोकुलनगरी गरीयसान्यायेनैवं ना कदापि नाकदापिहिता, अन्याये सति तदपसारार्थं सारार्थं यस्मै निवेदिष्यते स एवान्यायकारी का रीतिरभूदस्मिन् व्रजनगरे ॥ ११६ ॥

टङ्कयतु निर्बध्नातु निश्चिनोतु वा । गोकुलनगरी एवं गरीयसा अन्यायेन कदापि नापिहिता नाच्छादिता, "अभावे नह्यनो नापी" त्यमरः । कीदृशी, नाकं स्वर्गं द्यति तिरस्करोति, ततोऽपि सुन्दरीति भावः । यद्वा, नः अकं दुःखं ददातीति सा ॥ ११६ ॥

व्रजनगरेन्द्रनन्दन वसनानि चेन्न ददासि दासिकायमानाभ्यो नस्तदा व्रजराजाय जायमानयानयासूयया निवेदनीयम् ॥ ११७ ॥

जायमानया तवानयचेष्टितेन हेतुना अधुनैवोत्पद्यमानया ॥ ११७ ॥

पुनरसक्तो रसकौतुकी स्मितव्याजहारो व्याजहारोचितं किमपि ॥ ११८ ॥

असक्तो कृष्णः, ताभिरज्ञाताभिप्रायकत्वादज्ञातार्थोऽकच, स्मितमेव वक्षसि द्योतमानं सद् व्याजेन हारो यस्य सः, व्याजहार उवाच ॥ ११८ ॥

एतदयि दयितमुदितमुदितमुदितरथा कर्तुं नार्हथ ॥ ११९ ॥

अयीति संबोधने, एतद् दयितं प्रियम् उदितं वाक्यम् । कीदृशम्, उदितमुद् उदिता मुत् प्रीतिर्यतस्तत् । इतरथा कर्तुं प्रत्याख्यातुम् ॥ ११९ ॥

यदि भवत मम दास्यो मदास्योदितं वा करिष्यथ तदुचितमुपचितमुपधिरहितं हितं खल्विदं मम वचनं कथं न पाल्यते नहीश्वरस्य रस्यमरस्यं वा वचः खण्डयन्ति दास्योऽदास्यो वा कः पदार्थस्तासामीश्वराय ॥ १२० ॥

मद्दास्योदितं मन्मुखवाक्यम् । मद्दास्योऽद्देयः । "दास दाने" ॥१२०॥

तेनोभयथैवागत्य नीयतां वसनकुलं न कुलं कलङ्कनीयं नो चेदहं न ददानि कुपितेन किं राज्ञा वाज्ञा बाधिष्यते ॥ १२१ ॥

उभयथा स्वमुखस्वीकृतेन मद्दास्येन मद्वाक्यपरिपालनेन वा हेतुनेत्यर्थः, तेन राज्ञा भत्पित्रा मयि परमवत्सलेन किंवा बाधिष्यते, न बाधिष्यत एवेति । हे· अज्ञाः, एतदपि न जानीथेति भावः ॥ १२१ ॥

इति सनिर्बन्धं कृष्णस्य तदानीन्तनव्याहारं नव्या हारं हारं श्रवणपुटकेन केनचिच्चिरचितेन प्रणयेन नयसनाभिनाभिलषणीयदुर्लभजनभजनभाजनसभाजनसरसेन नातः परं हेलनीयं दुर्लभजनोदितं नो दितं च भवतीति विचारयता रयतारल्यवता वतान्तरेण कुपितामपि तामनुरक्तसखीमिव ह्रियं चानपेक्ष्य परस्परं निर्विवादसंवादसंबद्धहृदया युगपदेव ता देवता इव यमुनाजलाधिष्ठाच्यः कूलमनुकूलमनुसमुत्थातुमुपचक्रमिरे ॥ १२२ ॥

नव्या नवीना गोपकुमार्यः । हारं हारं हृत्वा हृत्वा, गृहीत्वा गृहीत्वेत्यर्थः । नयसनाभिना प्रेमसमुचितनीतिसोदरेण चिरचितेन बहुदिनसंचितेन अभिलषणीयं वाञ्छनीयं यद्दुर्लभजनस्य श्रीकृष्णस्य भजनं तद्भाजयतीति तच्च तत् सभाजनेन श्लाघया सरसं चेति तथा भूतेन प्रणयेन · हेतुना । दुर्लभजनस्य· उदितं वाक्यम्· अतः परं न हेलनीयं, नो नापि दितं खण्डितं च भवति, दास्यो भवेम तवोदितं च करवामेति स्वयमेवोक्तवतीनामस्माकमधुना योग्यप्रत्युत्तराभावादपीति भावः, इति विचारयता· अन्तरेण मनसा, अनुकूलं कूलं तटम्· अनुलक्षीकृत्य समुत्थातुम्· आरेभिरे । अन्तरेण कीदृशेन, रयः प्रेमवेगस्तेनैव तारल्यं चापल्यं तद्वता, चिरं धैर्यं कर्तुमशक्नुवतेत्यर्थः । वतेति विस्मये,लज्जातोऽपि प्रेमवेगस्य प्राबल्यद्योतनाय । अनुरक्तसखीमिवेति, उपेक्षितायास्तिरस्कृताया अपि तस्याः स्वत्यागासंभवात् ॥ १२२ ॥

तथा ।

स्कन्धद्वन्द्वादुरसि ललितैरायतैः केशपाशै-
रूरुस्तम्भावधि निपतितैश्छादयन्ती पुरोऽङ्गम् ।
बालामाला मिहिरदुहितुः प्रोत्ततारानुकूलं
गाढश्लिष्टा तिमिरनिकरैश्चन्द्रिकामण्डलीव ॥ १२३ ॥

ललितैर्मृदुलितैः । आयतैर्दीर्घैः । ऊरू एव स्तम्भौ स्थूणे तावभिव्याप्य, जानुपर्यन्तमित्यर्थः । पुरोऽङ्गम् अग्रगात्रम् । बालानां माला श्रेणी ॥ १२३ ॥

किंच ।

स्वीया श्रीर्नयनेषु यौतकतया नीलोत्पलैरर्पिता
हंसीभिर्व्यधितोपढौकनमिव प्रस्थानलीलायितम् ।
सौन्दर्यं च सुसौरभं च कमलैस्तासां मुखेष्वाहितं
कालिन्दीपयसः प्रयाणसमये पूर्णैव सर्वैः कृता ॥ १२४ ॥

सौन्दर्यं च सुसौरभं चेत्यत्र पूर्ववद् यौतकोपढौकनाद्युत्प्रेक्षणविशेषानुक्त्या भग्नप्रक्रमाख्यो दोषो नाशङ्कनीयः । पूर्वैरुभयैरेकैकवस्तुप्रदानात् तथोक्तिः, कमलैस्तु सौन्दर्यस्य सौरभस्य चकाराभ्यां मृदुत्वप्रफुल्लत्वयोश्च प्रदानात् सर्वस्वार्पणमिव कृतम् । सर्वस्वार्पणस्य तु यौतकदानत्वाव्यवहारात् तथानुक्तिरिति, व्याख्यानात् ॥ १२४ ॥

किंच ।

ह्रिया शीतेनापि व्यरचि चिरमाद्यं चरणयो-
र्मुदा वातेनापि व्यतनि तुहिनाढ्येन पुलकः ।
ह्रियोत्कण्ठेनापि प्रसभमविशेषं बलवता
समातेनेऽन्योन्यं स्फुटमगतिगत्योरिव रणः ॥ १२५ ॥

तुहिनाढ्येन हिमकणयुक्तेन वातेन ह्रिया लज्जया· औत्कण्ठ्येन च यथाक्रमम्·अगतिगत्योर्निमित्तयोरन्योन्यं रणः सम्यगातेने व्यस्तारि ।

अविशेषं वनवतेति द्वयोर्विशेषणं. तच्च प्रथममेव, आयत्यां तु· श्रोत्क-पठस्यैवाधिकवलत्वं गत्या ज्ञातमिति ज्ञेयम् ॥ १२५ ॥

किंच ।

किंचिद् दूरमुपेत्य हन्त सहसा व्रीडासखीतर्जना-
दन्योन्यं सरसोपहासपिशुनस्तासां वचोविग्रहः ।
त्वं याहि प्रथमं प्रयातु भवती याहि त्वमेकाकिनी
गच्छ त्वं व्रज तन्वि यातु भवतीत्येकान्तकान्तोऽभवत् ॥ १२६ ॥

किंचिद् दूरं नाभिदघ्नजलप्रदेशम् ॥ १२६ ॥

किंच ।

सौभाग्येन परस्परं बलवता तुल्येन तुल्यं तदा-
कृष्टानां नहि तत्र काचन ययौ नो कापि तस्थौ पथि ।
सर्वा एव नताननाः द्रुतहृदो मन्दाक्षमन्दोत्सवाः
किंचिच्च्यञ्चदुदञ्चदञ्चलदृशः कृच्छ्रेण तत्राययुः ॥ १२७ ॥

परस्परं तुल्येन समानेन बलवता सौभाग्येन तुल्यम्· अनुरूपमेव यथा स्यात् तथा तेन कृष्णेनाकृष्टानां तासां मध्ये काचन कापि न ययौ न तस्थौ च । किंच सर्वा एवेत्यादि । द्रुतहृतः प्रेमार्द्रीकृतमनसः ॥ १२७ ॥

एवं समीपमुपसन्नानां सन्नानां ह्रीभरेण कासांचित् पुरोगाणामङ्गै-रन्तरिताङ्गीर्नयनकोणेन समालक्ष्य सवैलक्ष्यसवैदग्ध्यं स रसिकशे-खरः खरतरमनोरागपरभागपरभाजनं जनं जनं प्रति प्रतिजगाद ॥ १२८ ॥

ह्रियो लज्जाया भरेण भारेण सन्नानां विषण्णानां पुरोगाणामग्र-गामिनीनां कासांचिदङ्गैरेवान्तरिताङ्गीराच्छादितगात्रीः, सवैलक्ष्यं सवि-स्मयं सवैदग्ध्यं च यथा स्यात् तथा. यमकानुरोधाद् द्वन्द्वैक्यम् । खरतरस्या-तितीक्ष्णस्य मनसोऽनुरागस्य परभागः सौन्दर्यं तस्य परभाजनं श्रेष्ठं पात्रम् ॥ १२८ ॥

कथमयि मयि कृतसाध्वसाः साध्वसारस्येन पुरःपश्चाद्भावेनानवस्थितावस्थिताः कथं वात्मानं गोपयितुमर्हिष्यथ, उन्नतद्रूपतद्रूपरि परितस्थुषा मया समया सकलाः कलावत्यो भद्रेणेव वीक्ष्यन्ते, तत् किमनयानयानुबन्धपरया प्रतारणया ॥ १२८ ॥

अनवस्थितमव्यवस्थितमवस्थितं स्थितिर्यासां ताः। उन्नतद्रूपस्यात्युच्चाकृतेस्तरोरुपरि, श्लेषेण· उन्नतं रूपं सौन्दर्यं तदेव तरुस्तस्योपरि, परितस्थुषा स्थितवता, सर्वसौन्दर्यगुणस्यापि चूडामणिनेत्यर्थः, तेन तासां प्रलोभनमयं स्वयं दौत्यं व्यञ्जितम्। समया निकटे· एव ॥ १२९ ॥

तदधुना साधुनासाध्वसेन श्रेणीभूय भूयसीं श्रियं दधत्योऽवस्थातुमर्हन्ति तथा कृते प्रकृते प्रयोजने वासोग्रहणेऽपि कौशल्यम् ॥ १३० ॥

असाध्वसेन निःसंकोचेन, तथा कृते तथावस्थाने कृते सति,कुशलस्य भावः कौशल्यं चातुर्यम्, अन्यथा व्यवहितगात्रीणां पश्चाद्वर्तित्वाद्वाससो ग्रहणे परिधाने च कृच्छ्रमेवेति भावः ॥ १३० ॥

को शल्यं तदेव यदन्तरङ्गजनरञ्जनकं न भवतीति मद्वचसा च साम्प्रतं वासो गृह्णीतेति तदा तदाकर्ण्य कर्णमतिरसायनं मतिरसाय नन्ददपि पुरोगतानां समानभावेन समानभावेन तदा तदाज्ञानुरूपमेव यथायथं श्रेणीभूय तस्थुः ॥ १३१ ॥

को पृथिव्यां तदेव शल्यं तद्वचः कर्णयो कर्णाभ्यां हितं मतेर्बुद्धे रसाय स्वादाय नन्ददपि समृद्धिमच्च, पुरोगतानां समानभावेन तुल्याकारत्वेन, मान आदरो भावः प्रेम ताभ्यां सहितेन ॥ १३१ ॥

तथा स्थितासु तासु सुप्रीतमना मनाग्विहस्य स्कन्धे निहिततत्तदम्बरः पीताम्बरः पीताखिलकुमारीवदन इव दृशा दृशामभिरामः पुनराह ता हता मन्दाक्षेण ॥ १३२ ॥

मन्दाक्षेण लज्जया हतास्ताः पुनराह ॥ १३२ ॥

अयि विरुद्धमेतत् ।

विस्रस्तकीर्णचिकुरत्वमिदं ह्यलक्ष्मी-
लक्ष्म व्रतस्थितजनस्य तु निन्द्यमुच्चैः ।
सामान्यलोकसविधेऽपि विमुक्तकेशा
नार्हन्ति गन्तुमनु मान्यजनं पुनः किम् ॥ १३३ ॥

मान्यजनम्· आदरणीयजनम्· अनु लक्षीकृत्य, तस्य निकट इत्यर्थः ॥ १३३ ॥

हन्त भोः सुकेश्यः के स्यन्ति स्वहितम्, अनिबद्धाः केशा नाकेशानामपि लक्ष्मीः क्ष्मीलयन्ति, तदयि वदननिन्दितराकेशाः केशान् बध्नीत ॥ १३४ ॥

के जनाः स्वस्य हितं स्यन्ति नाशयन्ति । नाकेशानां स्वर्गपती-नामपि । क्ष्मीलयन्ति मुद्रयन्ति । राकेशश्चन्द्रः ॥ १३४ ॥

इति समाश्रुत्य श्रुत्यतिरम्यं शमितातङ्कं तं कञ्जनयनस्य व्याहारं सकलाः सकलाकौशलं शलन्त्यस्त्रपाजलनिधौ निधौतभावाः समाकुञ्चितोरुचितोरुरामणीयकमधिधरणि रणितहंसककलहंसककलहानुरक्तरक्तचरणकमलपार्ष्णियुगलोपरि परिपातितजानुयुगलमुपविश्य ॥ १३५ ॥

सकलाकौशलमिति व्याहारविशेषणम् । त्रपाजलनिधौ शलन्त्यो गच्छन्त्यः, तत्रैव निधौतभावाः· अतिशयेन क्षालितस्वरूपाः, निमज्ज्योत्थिता इत्यर्थः । सम्यगाकुञ्चिताभ्याम्· ऊरुभ्यां चितम्· आनीतम्· उरु· अधिकं रामणीयकं यत्र तद् यथा स्यात् तथा, अधिधरणि धरण्यां, रणितो ध्वनियुक्तो हंसकः पादकटक एव कलहंसकस्तस्य कलहे· अनुरक्तयोरनुरागिणो रक्तयोररुणयोश्चरणकमलयोः पार्ष्णियुगलस्योपरि परिपातितं संहतजानुयुगलं यत्र तद्यथा स्यात् तथा, उपविश्य । अत्र केशबन्धने लज्जया श्रेणीभावमपहाय पुनरप्यपश्चाद्भावावस्थितिमङ्गीकुर्वा-

णानां तासां या अग्रवर्तिन्यः कुञ्चितनीचीनसंहतजानुयुगलोपरि निहितकफोणियुगलमुपविविशुस्तासामेव पार्ष्णियुगलोपरि पृष्ठवर्तिन्यस्तादृशजानुयुगलं निदधुरिति ज्ञेयम्, अन्यथा स्वस्वपार्ष्णियुगोपरि निहितजानुयुगत्वेन सुखासनतयोपवेशे जघनप्रान्तोद्घाटनं स्यात् ॥ १३५ ॥

चलवलयझङ्कारकारणकर्णामोदकराभ्यां कराभ्यामदरसमुन्नमिताभ्यां मदरसमुन्नमिताभ्यां दरविकसदुरसो रसोल्लसितमानसाः केशकलापं केशकलापपण्डिततया बबन्धुः ॥ १३६ ॥

चलानां वलयानां झङ्कार एव कारणं यस्य तथा भूतं कृष्णस्य कर्णयोरामोदं कुरुत इति ताभ्यां कराभ्याम्, अदर अनल्पं समुन्नमिताभ्यां, मदरसं हर्षरसम्· उन्नम्· आर्द्रम्· इताभ्यां, रोमाञ्चचिह्नेन प्राप्ताभ्यामित्यर्थः ॥ १३६ ॥

बन्धुरथ तासां पुनरपि निजगाद निजगादप्रतिपालनतस्तुतोष च तोषचपलः ॥ १३७ ॥

निजस्य गादो वचनं तस्य प्रतिपालनाद्धेतोस्तुष्टः, ततश्च तोषचपलः· आनन्देनास्थिरोऽभूत् ॥ १३७ ॥

हन्त भोः पुरतो मान्यस्य मान्यस्य समुपवेशोऽभिशोभितामुपैति भवत्यो यद्यपि न सामान्या मान्यायस्तदपि मदग्रतो वः समुपवेशनम् ॥ १३८ ॥

मान्यस्य· आदरणीयस्य पुरतः· अन्यस्य· अमान्यस्य· उपवेशो मा· अभिशोभितामुपैति न शोभते । मान्यायः· अन्यायः ॥ १३८ ॥

तदुत्तिष्ठन्तु तिष्ठन्तु च मच्छासनेऽच्छासनेऽस्मिन् नोपविश्यतामिति पुनरस्य रस्यतममुक्तं मुक्तं वदनचन्द्रमसः पीयूषमिव श्रवणनिर्व्यथनेन निर्व्यथनेन निपीय जातसाध्वसाः साध्वसाधुविचारविरहेणेव सहसा सहसादरतया जानूनि जानु निधाय परस्परासक्तकरकमलपिहितोरुमूलमामूलमालम्बमानावरोहरोहदतिरामणीयका मणीयकाननलता इव किंचिदानताः समुत्तस्थुः ॥ १३९ ॥

अस्मिन्· अच्छासने निर्मलासने । अव्यथानिर्व्यथनेन कर्णाच्छिद्रेण, "छिद्रं निर्व्यथनं रोक"मित्यमरः, व्यथनस्यात्यन्ताभावो निर्व्यथनं तेन निपीय । आमूलं मूलसमीपपर्यन्तम्, आ· ईषद्· लम्बमानाभ्यामवरोहाभ्यां रोहद्· उत्पद्यमानम्· अतिरामणीयकं यासां ताः । मणीया मणिमय्यः काननलता इव ॥ १३९ ॥

पुनरुवाच वाचमतिसरसां स रसाञ्चितमना मनाग्विहस्य,

हन्त भोः कुमार्यो मार्योपसेवनोचितं चितं वश्चरितं, न खलु व्रतपराः परास्तदुकूलतयानुकूलतयानुगम्य जलदुकूलतां कूलताडवितदृशः खेलितुमर्हन्ति ॥ १४० ॥

मेति निषेधे । आर्याणां शिष्टानाम्· उपसेवनोचितम्· अनुसरणयोग्यं वो युष्माकं चितं समुदितं चरितं न भवति । अनुकूलतया· आनुकूल्येन । जलदुकूलतां जलं दुकूलं यासां तथाभूतत्वम् । अनुगम्य प्राप्य ॥ १४० ॥

नग्नतया सलिलावतरणे तरणेर्दुहितरि सलिलदेवता वतातिशयहेलिता भवति ॥ १४१ ॥

तरणेर्दुहितरि यमुनायाम् ॥ १४१ ॥

देवताहेला हे लालसाविरोधिनी च तदिदमागो मा गोचरीभूतं वः ॥ १४२ ॥

हेला· अवज्ञा, हे· इति संबोधने, लालसा कामना, वो युष्माकम्, आगोऽपराधः, मा गोचरीभूतं न विषयीभूतम् ॥ १४२ ॥

व्रतफलफलनाय यदि वो दुर्लभाय लभायता भवतीच्छायास्तदा तदागःक्षपणाय पणायन्ताम्, अस्ति निरपाय उपाय उत्तमस्तत्र कश्चिदिति निशम्य शम्यवस्थामापन्नेन हृदा सुहृदा सुखदेन सह सहसा हरिणनयना व्यचीचरन् ॥ १४३ ॥

ननु तर्हि सम्प्रति किं विधेयं तत्राह। व्रतफलस्य फलनाय निष्पत्तये, "फल निष्पत्तौ"। कीदृशाय, दुर्लभाय। इच्छाया लभा लाभः आयता अधिका भवति, "लभेः षित्त्वादङ्", व्रतफलनिष्पत्त्यर्थं यदीच्छामधिकां प्राप्नुथेत्यर्थः। शमिनां शान्तानाम् अवस्थां प्राप्तेन, स्वप्रौढिनाशात् प्राप्तदैन्येनेत्यर्थः। हृदा मनसा सह व्यचीचरत्। परामर्शसुखदेन सुहृदा, अनार्जवत्यागादनुकूलप्रियसुहृद्रूपेणेत्यर्थः॥ १४३॥

यद्यज्जगाद तदिहाकरवाम वामः
किंवा परं वदति तन्नहि हन्त विद्मः।
नैव क्रियेत यदि तद्व्रतसाध्यबाधा-
भीतिं प्रदर्शयति हा किमिहाचरामः॥ १४४॥

वामः प्रतिकूलचेष्टितः कृष्णः। व्रतस्य साध्यं फलं तत्र बाधारूपां भीतिम्॥ १४४॥

इति क्षणमितरेतरेक्षणसक्षणसचकितं शङ्कापङ्कापङ्गुमनसो न सोढव्यमन्यत् सोढव्यं वा किमपीति संदिहाना हानादानव्यसनिन्यो बभूवुः॥ १४५॥

इतरेतरेक्षणं स्वपरविचारसंवेदनार्थं परस्परकृतदृष्टिकं, सक्षणं प्रेष्ठस्य तादृशाग्रहदृष्ट्या सोत्सवं, सचकितं हन्त किं भविष्यतीति सत्रस्तं, तच्च तच्चेति द्वन्द्वैक्यम्। शङ्केव पङ्कस्तेन आ सम्यक् पङ्गु प्रवृत्त्यसमर्थं मनो यासां ताः। हानादाने तदाज्ञायास्त्यागस्वीकाराविव व्यसने विपत्ती तद्वत्यो बभूवुः॥ १४५॥

तासां तादृशां दृशां कातय समालोक्य समालोक्यवदनश्रीमालिन्यान्मनोग्लानिं चानुमायामायामेवाश्रित्य स पुनराह॥ १४६॥

सममकुटिलम् आलोक्यं दर्शियोग्यं यद्वदनं तस्य श्रियः शोभाया मालिन्याद्धेतोः, "आलोको दर्शनाद्योता"वित्यमरः, "अर्हार्थे यत्"। अमायाम् अकैतवम्॥ १४६॥

॥ शेषमग्रे॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य षष्ठः परिच्छेदः ॥

२७ ॥ ननु कुत्र तर्हि मनुष्यत्वजातिर्यथार्थमव्यभिचरिता तिष्ठतीति ज्ञातव्यमिति चेत् परीक्षायां क्रियमाणायां न किमपि तादृशं वस्तु स्वभावसिद्धं नापि मनुष्येषु व्यवस्थापितं यत्तज्जात्याश्रयं तज्जातिज्ञापकं वा भवेत्। मनुष्यस्य यस्य कस्यापि वाऽन्यस्यार्थस्वरूपस्य ज्ञायमानत्वाभावेन स्वस्वपरिकल्पितानि शाब्दस्वरूपाणि तथाऽनियतानि सन्ति येन किंचिदेव विलक्षणाकृतिमन्तं सद्योजातं बालमधिकृत्यायं मनुष्योऽस्ति न वेति बहून् प्रतिप्रश्ने कृते सति प्रष्टा निःसंदेहं तेभ्यो नानाविधान्युत्तराणि लभ्येरन्। यैवेयं द्रव्यजातीर्नियमयामस्तानि शाब्दस्वरूपाणि मनुष्यैः स्वस्वेच्छानुसारेण निर्मितानि न भवेयुः किन्तु प्राकृतिकयथार्थपरिच्छेदकैरत्यन्तं सरूपाण्येव स्युर्यैः सर्वाणि द्रव्याणि तत्तज्जातिषु प्रकृत्यैव भिद्यन्ते इति यदि स्यात्तर्हि नेदं संभाव्येत,नापि लेसतसाभिधमहाशयनिर्मितग्रन्थे प्रथमाध्यायस्य तृतीयपरिच्छेदे मनुष्यशिराः शूकरकलेवर इति वर्णितस्य विरूपप्राणिनोऽन्येषां वा पशुमुखानां मनुष्यशरीराणां श्वाश्वादीनां कस्यां जातावन्तर्भाव इति निर्णयाय कोपि प्रयतेत। एषां जीवानामन्यतमो यदि वस्तुतो जीवन् भाषणसमर्थश्चाभविष्यत् तर्हि मनुष्यजातिज्ञानं विरूपप्राणिजातिज्ञानं वाऽधिकं दुःसाधतरमभविष्यत्। उपरितनार्धमनुष्याकृतिमधस्तनार्धशूकराकृतिं च जीवविशेषं व्यापादयन् व्यापादयिता किं मनुष्यघातीत्यभिधीयेत?। यथा कानिचिद्वर्षाणि व्यतीयुः फ्रांसदेशे ईदृशव्यक्तिविशेषविषये विवाद उपस्थित आसीदिति श्रूयते। तथा सपूर्वोक्तो भजनमन्दिराध्यक्षः संस्कारार्हत्वेनानुमतः पूर्णमनुष्यत्वलक्षणविशिष्ट आसीच्चवेति किमवश्यं विचारितमेस्यात्?। प्राणिविशेषजातीनां परिच्छेदकं त्वस्माकमत्यन्तमनियतं येनास्माभिः स्वस्वसंगृहीतमिश्रविज्ञानातिरिक्तं न किमपि विशेषजातिपरि-

च्छेदकमुपलभ्यते । इत्थमेतद्विषयस्य निःसंदिग्धत्वेपि मनुष्यपदवेदनीयः कोस्तीति निश्चितं ज्ञानमस्माकं नैवास्ति । एवमपि मन्ये, मनुष्यजातेर्नियतानि परिच्छेदकान्यस्माभिर्निश्चेतुं न शक्यन्ते । किं च शाब्दस्वरूपघटकानां शुद्धविज्ञानानां यथार्थसंख्यापि नियता साकल्येन न ज्ञायते ऽतस्तद्विषये महान्तः संदेहा उद्भवन्ति । किं चाद्य यावदुपलब्धानां मनुष्यलक्षणानां तज्जातीयप्राणिनिर्वचनानां वा मध्ये एकमपि तावदव्यभिचरितं यथार्थं च न भवति, अतो नैकस्यापि परीक्षकस्य जिज्ञासोः संतोषजनकं तद् भवति किमुत सर्वजनसंमतं सत्सर्वदा सर्वविधस्खलननिर्णयसमर्थं तथाविधोत्पत्तिमतां जीवानां जीवनमरणयोः संस्कारार्हत्वानर्हत्वयोश्च व्यवस्थापकं च भवेत् ॥

२८ ॥ तथापि तानि मिश्रभावाइव स्वैरिकाणि न सन्ति ॥—तेषां द्रव्यशाब्दस्वरूपाणामात्मकल्पितत्वेपि मिश्रभावस्वरूपणीव न स्वैरं परिकल्प्यन्ते । कस्यापि शाब्दस्वरूपस्य विरचनाय द्वयमेतदवश्यमपेक्ष्यते । तत्र प्रथमं तावत् तद्घटकानि विज्ञानानि तथैकीभूतानि स्युर्येनानेकविज्ञानसमष्टिरूपमेकं विज्ञानं भवेत् । द्वितीयतश्च तया विज्ञानव्यक्त्या तथा निश्चितया भाव्यं येन सा अन्यूनानतिप्रसक्तरूपा स्यात् । यदि द्वे मिश्रितावच्छेदकविज्ञाने स्वस्वघटकावयवानां संख्यया जातिभिर्वा भिद्येयातां तर्हि ते विभिन्ने एव द्वे स्वरूपे रचयेतां न पुनरेकमभिन्नम् । अनयोर्द्वयोराद्यस्य विषये द्रव्याणां मिश्रविज्ञानानां रचनावसरे मनः प्रकृतिमेव केवलामनुसरद् यानि च प्रकृत्या संभावितैक्यानि न सन्ति तथाविधानामेकमपि नैकत्र सह स्थापयति । न कोपि शशविषाणायितपदार्थकल्पनासमर्थाबोधकैः शब्दैर्भाषणं चाभिप्रयन् पुरुषो ऽश्वाकृत्या ऽजशब्दं योजयति, न वा त्रपुवर्णं सुवर्णस्य गौरवेणानुच्छिद्यमानद्रवत्वेन च संयोजयति येन तत् कस्यचिद्वास्तविकद्रव्यस्य मिश्रितं विज्ञानं भवेत् । मनुष्याः सर्वदा संमिलितान् सह व्यवस्थितान् कांश्चन धर्मान् दृष्ट्वा तेषु प्राकृतत्वमध्यवस्यन्ति । तथासंमिश्रितानि विज्ञानानि च विलोक्य तेषां मिश्रितैकद्रव्यविज्ञानानि रचयन्ति । यतः स्वेच्छानुसारेण मिश्रविज्ञानानि

रचयितुं स्वाभीष्टनामभिस्तानि व्यवहर्तुं शक्नुवन्तो ऽपि मनुष्या यदि वस्तुतो विद्यमानवस्तून्यधिकृत्य कथनावसरे तानि जानीयुस्तर्हि ते ऽवश्यं विविक्तपदार्थैः सरूपाण्येव स्वीयानि विज्ञानानि रचयेयुः। अन्यथा मनुष्याणां भाषा केवलदेशीयभाषावत् परान्प्रति बोधयितुमसमर्था स्यात्। किं च यदि तत्पदबोध्यविज्ञानानि वस्तुतो विद्यमानद्रव्यैः कथमपि सरूपाण्यनुरूपाणि च न भवेयुस्तर्हि तत्तन्मनुष्योदीरितानां शब्दानां तत्तद्व्यक्तितरं प्रति स्वार्थबोधनसामर्थ्याभावात् ते संवादोपयोगिनो जगति लोकव्यवहारसंपादकाश्च नैव भवेयुः॥

२९॥ (शब्दा) यद्यपि पर्याप्ता न सन्ति॥—द्वितीयतो, यद्यपि मानवीयं मनो द्रव्याणां मिश्रितविज्ञानस्य विरचने तादृशानि नैकत्र संघीकरोति, यानि वस्तुतः सहचरितानि सहचरितत्वेन कल्पितानि वा न सन्ति। अतश्च वस्तुनः स्वाभाविकमेव साहचर्यमनुकरोति, तथापि मनसा कल्प्यमाना संख्या तद्रचयितुः परिश्रमं बहुलावधानं च विना न संभवति। प्रायशो मनुष्याः प्रत्यक्षयाह्यैः परिस्फुटैरेव कतिपयैर्धर्मैः परितुष्यन्तो भूयिष्ठान् स्वपरिगृहीतधर्मैः सममेव दृढतया संबद्धानन्यान् धर्मान् परित्यजन्ति। प्रत्यक्षयाह्यद्रव्याणि सेन्द्रियाकारैर्निरिन्द्रियाकारैभेदेन द्विविधानि सन्ति। तत्र यानि बीजादुद्भवन्ति तानि सेन्द्रियशरीरकाणि प्रथमानि सन्ति। तेषु चाकार एव मुख्यो जातिनिर्णायको धर्मः स्वरूपपरिचायकस्य प्रधानभागो ऽस्ति। अतश्च महीरुहेषु प्राणिषु च तथाविधनियताकारकं विस्तारशालि घनद्रव्यमेव प्रायस्तत्तज्जातीः परिचाययति। कामं के चन तर्कशक्तिमान् प्राणीति स्वकृतं मनुष्यलक्षणं श्लाघन्तां, परं तु यदि भाषणशक्तियुतोपि प्रायिकमनुष्याकारेण विधुरः कश्चन प्राण्युपलभ्येत तर्हि स मनुष्यपदाभिलापमपि नार्हेत किं पुनस्तस्य विवेकवत्प्राणित्वस्य प्रत्याशा। किं च यथा किल पुरैकदा बालमाभिधस्य गर्दभः स्वामिना सह व्याहरत्तथैव यद्येवं विवेकपूर्वकं भाषमाणश्चेदपि स मनुष्यपदाभिलापार्हतया स्वसजातीयतया वा मन्ये नैव केनापि चिन्तितश्चासीत्। यथैव महीरुहेषु प्राणिषु चाकार एव तज्जातीयकत्वस्य

नियामक एवं भूयिष्ठेषु बीजानुपादानकेष्वपरेषु वर्ण एव प्रायः सजातीयत्वस्य निर्णायकं लिङ्गम्। इत्थं च यत्र सुवर्णस्य वर्णं पश्यामस्तत्र तद्घटितसमुदायघटका अपरे ऽपि धर्माः सन्तीति कल्पयितुमर्हामः। प्रायो ऽस्माभिर्द्वावेव परिस्फुटौ गुणौ परिगृह्येते। बहूनां विशेषजातीनामानुमानिकविज्ञानार्थमाकृतिः प्रश्चेत्येतदेव द्वयं परिगृह्यते। अत एव साधुपरिलिखिते चित्रपटे वयं दर्शनमात्रेणैव सिंहो ऽयं पाटलपुष्पमिदं सुवर्णमेतदिदं च कृष्णचषकमित्यादि कूचिकया तत्र परिलिखितैस्तत्तदाकारैर्वर्णैरेव च कथयितुं शक्नुमः॥

३०॥ तथापि लौकिकभाषणव्यवहाराय तउपयुज्यन्ते॥—यद्यपि संकीर्णस्थूलज्ञानाय भाषणविमर्शयोश्चापरिष्कृतरीतये चेदं सुष्ठूपयुज्यते, तथापि मनुष्याः पदबोध्यवस्तुजातिसंबद्धानां शुद्धविज्ञानानां वा यथार्थसंख्याया अभ्युपगमादेव व्यवहरन्ति। न चैतच्चित्रम्। यतो यानि शुद्धविज्ञानानि स्वभावत एव सततमपृथक्तया परस्परसंसृष्टानि सदेकस्मिन्नेवाधिकरणे सहचरितान्येवोपलभ्यन्ते तानि कानि कति चेतिज्ञानं दीर्घकालादरनैरन्तर्यचातुर्यपरीक्षायथार्थजिज्ञाभिरेव भवितुमर्हति। भूयिष्ठा मनुष्याः कालस्य प्रवृत्तेश्चाभावादेतत्कार्यनिर्वाहाय स्वल्पानामपि श्रमाणामकरणाद्वा कैश्चिदेव परिस्फुटैर्बाह्यैर्वस्तुधर्मैः परितुष्यन्तस्तैरेव च सांसारिकलोकव्यवहाराय तान् पृथक् पृथग् जातिरूपेण शीघ्रमेव विवेचयन्ति। इत्थं चाधिकपरीक्षणमकृत्वैव तेषु नामानि प्रयुञ्जते। तदर्थे च पूर्वं व्यवहृतान्येव नामानि परिगृह्णन्ति। यद्यपि लौकिकभाषणे ते शब्दाः स्फुटानां सहचरितानां केषां चिदेव धर्माणां लिङ्गतया साधु व्यवह्रियन्ते तथापि नियतार्थस्यापि कस्य चिदपि घटकानां शुद्धविज्ञानानां संख्या न तत्प्रयोक्तृभिर्ज्ञातुं शक्यते, किं पुनः स्वभावतः संगतानां तेषां सर्वेषाम्। एवं परापरजातिविषयमिदानीं यावदालोच्य परस्परभेदकविशेषानधिकृत्य सविस्तरं वर्णयित्वापि स्वल्पतराणामेवशब्दानां स्वरूपाण्यस्माभिर्व्यवस्थापितानीत्येवं यो विचारयिष्यति मन्ये स यान्यधिकृत्यैतावान् प्रवादस्तानि केवलं काल्पनिकानि सन्ति न कथमपि स्वभावसि-

द्धानीति सतर्कं तर्कयेदेव । यदर्थेषु सर्वे तत्तच्छब्दप्रयोक्तार एकमताः सन्ति तादृशार्थकानि कियन्ति द्रव्यनामानि न सन्तीति विचारको बाढ़मेवमनुमास्यति यद्. यद्यपि द्रव्याणां शाब्दानि स्वरूपाणि सर्वाणि प्राकृतवस्तुसमानाकाराण्येव प्रतीयन्ते तथापि भूयिष्ठानि तानि अत्यन्तमयथार्थानि सन्ति । तेषां मिश्रविज्ञानानां संघातस्य तत्तन्मनुष्येषु भिन्नभिन्नतया विशेषजातीनां परिच्छेदकानीमानि जगति प्राकृतस्य कस्यचित्संभवे ऽपि स्वाभाविकानि न सन्ति किंतु मनुष्यरचितान्येव । बहवो द्रव्यविशेषाः प्रकृत्या एवं रचिता येन तेषां परस्परसादृश्यस्य सत्त्वादेकजातीया भवन्तीति तु सत्यम् । नियतापरजातिरचनायाः पदार्थानां जातिवाचकपदेनाभिलापप्रयोजनकत्वाद् वस्तुविशेषजातीनां परिच्छेदकानि स्वभावसिद्धानीति, यद्येवं तर्हि विशेषजातिपरिच्छेदकानि प्राकृतवस्तुसमानाकाराणि सर्वथा न सन्तीति वा कथनं कथमौचितीमावहेत् । यतो लोकव्यवहारनिर्वाहाय जातिनाम्नामावश्यकत्वाद्वस्तुभेदाभेदज्ञापनसमर्थानां सर्वेषां धर्माणां साकल्येन ज्ञानमनादृत्यैव कैश्चिदेव स्फुटैर्धर्मैर्जातिरूपेण पदार्थान् पृथक्कुर्मो येन तद्विषयकान् विमर्शान् जातिपदैः सौकर्येण कर्तुं शक्नुमः । आत्मनि समुदितानां शुद्धविज्ञानानां ज्ञानादतिरिक्तस्य कस्यापि द्रव्यज्ञानस्याभावाद्बहुषु शुद्धविज्ञानेषु बहूनां तत्तद्वस्तुव्यक्तीनां वस्त्वन्तरैः सह परस्परमानुकूल्यस्य दर्शनाच्च विशेषविज्ञानरूपं समुदायं रचयित्वा तं साधारणनाम्ना व्यवहरामः । स्वविमर्शानां स्मृतेः संपत्तये परैः सह संभाषणव्यवहारसिद्ध्यर्थं च मिश्रितैकविज्ञानरूपेण सजातीयाः सर्वा व्यक्तीः स्वघटकशुद्धविज्ञानानां परिगणनमकृत्वैव लघुनैकेन नाम्ना बोधयामः । एवं सति दीर्घतरविवरणेन न वयं वृथैव बहुतरान् श्वासोच्छ्वासान् परित्यजामो नापि तावन्तं कालं यापयामः । येषां वस्तूनां नामान्यद्ययावन्नोपलब्धानि तेषां शब्दैर्बोधनाय लोका भूयांसं परिश्रमं सहन्ते इति च वयं पश्यामः ॥

३१ ॥ एकपदबोध्यानामपि विशेषजातीनां स्वरूपाण्यत्यन्तं भिन्नानि सन्ति ॥— परं तु काममासां द्रव्यविशेषजातीनां लौकिकसंभाषण-

निर्वाहकत्वेऽपि येन बहूनि व्यक्तिविज्ञानान्येकजातीयानि प्रतीयन्ते तादृशं मिश्रविज्ञानं त्रिभिन्नाः पुरुषा भिन्नं भिन्नमेव रचयन्ति । के चनाधिकयाथार्थ्येनापरे च न्यूनयाथार्थ्येन रचयन्तीति पर्यवसन्नम् । कुत्र चित्त्वेतन्मिश्रविज्ञानं बहुधर्मघटितं कुत्रचिच्च कतिपयधर्मघटितमतो यावद्धर्मघटितमात्मना रचितं तावद्धर्मविशिष्टं प्रतीयते । तथाहि । बालदृष्ट्या भास्वरपीतवर्णात्मकमेव सुवर्णम् । अपरे च तत्र गुरुत्वं द्रवत्वमाघातवर्धनीयतां च योजयन्ति । अन्ये च तस्मिन्गुणसमुदाये गुरुत्वादीनिव सुवर्णे उपलभ्यमानानन्यापि तेन पीतवर्णेन सह संयोजन्ति । यतः सर्वेष्वेवमादिषु गुणेषु तादृशनिखिलगुणकदम्बघटितद्रव्यविज्ञानघटकत्वस्य योग्यता सममेवास्ति । इत्थं च मनुष्याणां मध्ये के चन स्वस्वपरीक्षाकौशलतद्विषयनिरीक्षणानुसारेण कानि चिच्छुद्धविज्ञानानि परित्यजन्ति, अपरे चापराणि कतिपयानि तानि योजयन्तीति कृत्वा तेषां सर्वेषां भिन्नानि भिन्नान्येव सुवर्णस्वरूपाणि । इतोऽपि हेतोस्तानि तत्तत्पुरुषरचितानि न पुनः प्रकृतिकार्याणीति सिद्धम् ॥

॥ शेषोऽग्रे भविता ॥

॥ रामानुजदर्शनम् ॥

॥ तत्त्वत्रयचुलुकम् ॥

॥ यतिपतिमतदीपिका ॥

॥ एवं द्रव्यनिरूपणानन्तरं क्रमप्राप्तमद्रव्यं निरूप्यते ॥

संयोगरहितमद्रव्यं तदद्रव्यं च सत्त्वरजस्तमांसि शब्दस्पर्शरूपरसगंधाः संयोगः शक्तिरिति दशप्रकारमेव तत्र प्रकाशसुखलाघवादिनिदानमतीन्द्रियं शक्त्याद्यतिरिक्तमद्रव्यं सत्त्वं तद्विविधं शुद्धसत्त्वं मिश्रसत्त्वं चेति रजस्तमश्शून्यवर्त्तिसत्त्वं शुद्धसत्त्वं तन्नित्य*विभूतौ उपचारात्तत्प्रवर्त्तकेश्वरे च रजस्तमस्सहवर्त्तिसत्त्वं मिश्रसत्त्वं तत्त्रिगुणे तत्सं बन्धिनिजीवे चोपचा-

---

* अधः परिच्छिन्नसृष्टौ ।

रादिलिङ्गेयं, लोभप्रवृत्त्यादिनिदानमतीन्द्रियं शक्त्याद्यतिरिक्तमद्रव्यं रजः, प्रमादमोहादिनिमित्तमतीन्द्रियं शक्त्याद्यतिरिक्तमद्रव्यं तमः, त्रीण्यप्येतानि यावत्प्रकृतिव्याप्तानि प्रकृतिवश्यपुरुषसंबद्धान्यनित्यानि नित्यमनन्तानानि प्रलयदशायां समानि सृष्ट्यादौ विषमाणि सृष्टिस्थितिसंहारोपयुक्तानि ईश्वरसंकल्पादिसहकारिभेदात्परस्पराभिभवोद्भवकारीणीत्येतानि साधारणानि । सत्त्वगुणस्तु सम्यक्त्वज्ञानरूपसुखहेतुः मोक्षप्रदश्च, रजोगुणस्तु रागाद्यात्मकः कर्मसंगदुःखादिहेतुः स्वर्गाद्यामुष्मिकप्रदः, तमोगुणस्त्वज्ञानरूपः आलस्यादिहेतुः नरकप्रदश्च अतः सत्त्वादयो गुणा न द्रव्यरूपाः । अस्मदादिश्रोत्रग्राह्यः पंचभूतवर्त्तीशब्दः । स द्विविधः वर्णात्मको ऽवर्णात्मकश्चेति अ क च ट त प यादिविशिष्टपञ्चाशदक्षरात्मको वर्णात्मकः देवमनुष्यादीनां ताल्वादिव्यंग्यः, भेर्यादिजन्यो ऽवर्णात्मकः एवंभूतः शब्दः श्रोत्रेन्द्रियेण गृह्यते । ननु श्रुत्या शब्दस्य द्रव्यत्वं प्रतीयते ऽद्रव्यत्वं कथमिति चेन्न । अकारादेः प्रणवोपपादकत्वं वाच्यद्वारा संभवतीति परिहाराद् द्रव्यत्वमुपपद्यते । अस्मदादिस्पर्शनेन्द्रियग्राह्यमद्रव्यं स्पर्शः । स च त्रिविधः शीतोष्णानुभयात्मकभेदात् । अप्सु शीतस्पर्शः तेजस्युष्णस्पर्शः क्षितिपवनयोरनुष्णाशीतस्पर्शः । स च पुनर्द्विविधः पाकजो ऽपाकजश्चेति । पृथिव्यां पूर्वं इतरेषु त्रिष्वितरः तत्रामृतगरलतूलोपलगोब्राह्मणचांडालादिस्पर्शविशेषः इति स्पर्शः । अस्मदादिचक्षुरिन्द्रियैकग्राह्यविजातीयव्यावृत्तमद्रव्यं रूपं, तच्चतुर्धा श्वेतरक्तपीतकृष्णभेदात् । तत्र सलिलकलधौतशंखशुक्तिशशांकादीनां रूपविशेषाः श्वेतभेदाः, हुतवहजपादाडिमबंधुजीवविद्रुमपद्मरागादीनां तु रूपविशेषा रक्तभेदाः, कांचनहरितालहरिद्रादीनां रूपविशेषाः पीतभेदाः, मरकतमधुकरजलधरतिमिरतमालदूर्वादीनां कृष्णभेदाः । पीतमपि, रक्तावान्तरभेदं केचिदिच्छन्ति । श्रुत्यनुसारात्प्रकारान्तरेण द्विविधा भास्वराभास्वरभेदात् । तेजोगतं भास्वरं क्षितिसलिलगतं चाभास्वरमेवं चत्वार्य्येव रूपाणि, तेन चित्रं नाम पंचमं रूपमिति मतनिरासः । अत एव चित्ररसगंधादिस्पर्शानामपि निरासः । अस्मदादिजिह्वैकग्राह्यविजातीयेतरो रसः स षोढा मधुराम्ललवणकटुकषायतिक्तभेदात् ।

तत्र इक्षुक्षीरगुडादिरसाः मधुरभेदाः चूतचिंचामलकादिरसा आम्लाः सैंधवोषरविकाराः लवणभेदाः किंपाकनिंबादिरसाः कटुकभेदाः शुंठीमिरिचीसर्षपादिरसास्तिक्तभेदाः हरीतकीविभीतकचूतांकुरादिरसाः कषायभेदाः इति रसः । अस्मादादिघ्राणग्राह्यो विजातीयेतरोऽद्रव्यविशेषो गंधः । सद्विविधः सुरभिरसुरभिश्चेति, पाटीरमृगमदघुसृणचंपकादिगन्धाः सुरभिभेदाः अयं च गंधः पृथिव्येकवर्ती पाकभेदभिन्नः पवनसलिलादिषु गन्धोपलब्धिः पार्थिवसंसर्गाद् अपोदहतीति वदौपचारिकः। पंचीकरणप्रक्रियया सर्वभूतेषु सर्वगुणानां विद्यमानत्वेऽपि प्राधान्याभिप्रायेणोक्तमिति न विरोधः। पाकाद्गुणान्तरोत्पत्तिः स्वाश्रयनाशाभावादेवोत्पत्तेः पीलुपाकमतनिरासः । संयुक्तप्रत्ययनिमित्तं संयोगः स च सामान्यगुणः षड्द्रव्यवृत्तिः । अस्य च स्वाभावसादेश्यमुपलभ्यमानमंशभेदप्रयुक्ततया न विरोधावहं, स कार्याकार्यभेदाद् द्विविधः पूर्वः परिमितानाम् उभयप्रेरणात् यथा मेषयोर्मल्लयोर्व्वाक्वचिदन्यतरप्रेरणात् यथा। स्थाणुश्येनयोः संयोगः। केचित्संयोगजसंयोगमपि वर्णयन्ति हस्तपुस्तकसंयोगात्कायपुस्तकसंयोग इति तत्र हस्तसंयोगादेव कायसंयोगो हस्तस्य कायत्वात्, एतेन विभागजविभागो निरस्तः। विभागोपि संयोगाभाव एव न पृथग्गुणः अकार्यसंयोगाहस्तस्य कायत्वात्। एतेन विभागजविभागो निरस्तः। विभुद्रव्ययोः अजद्रव्यसंयोगः श्रुत्याङ्गीक्रियते अनुमानादप्यजसंयोगसिद्धिः यथा विभुद्रव्यं विभुद्रव्यसंयोगवत् द्रव्यत्वात् घटवत् विभुद्रव्यमीश्वरसंयुक्तं द्रव्यत्वात् घटवत् ईश्वरः कालादिसंयुक्तः द्रव्यत्वात् घटवत् इत्यादिभिर्विभुसंयोगसिद्धिः । अथ शक्तिः सर्वकारणानां कारणत्वनिर्वाहकः कश्चिद्द्रव्यविशेषः शक्तिः तर्क्कागमाभ्यां तत्सिद्धेः प्रतिबन्धकमणिमंत्रादिसंनिधौ स्वरूपसहकारिवैकल्याभावे ऽपि यदुपरोधाद्दहनो न दहति साह्यतीन्द्रियाशक्तिः अयस्कान्तादिषु तत्प्रसिद्धिः सा शक्तिः षड् द्रव्यवृत्तिः भगवच्चिष्ठत्वं पुराणरत्नादिषु प्रसिद्धं एवं सर्वत्र शक्तिर्नाम धर्मविशेषः सिद्धः। ननु चतुर्विंशतिप्रकारागुणा इत्युक्तत्वात्कथं दशैवेति निर्दिश्यत इति चेदुच्यते। जीवात्मविशेषगुणानां बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां षण्णां ज्ञानविततिरूपत्वेन ज्ञानां-

तर्भावस्योक्तत्वात् धर्माधर्मयोरपीश्वरप्रीत्यप्रीतिरूपत्वेनेश्वरज्ञानेन्तर्भावाद्भावनाख्यसंस्कारस्य ज्ञानविशेषरूपत्वात् वेगोत्पादकहेतोरेव वेगाख्यसंस्कारोपपत्तेः संयोगमादाय स्थितिस्थापकस्यापि संभवात् शब्दस्पर्शादिगन्धादीनां पञ्चानां प्रत्यक्षसिद्धत्वेनाङ्गीकारात् विभागपृथक्त्वयोरपि संयोगाभावमादायोपपत्तेः परत्वापरत्वयोर्देशकालसंयोगविशेषमादायोपपादयितुं शक्यत्वात्संख्यापरिमाणद्रवत्वस्नेहानां तत्तद्द्रव्यस्वरूपमादायोपपत्तेः गुरुत्वस्य शक्त्यन्तर्भावस्य वक्तुमुचितत्वाच्च दशैवेति सुष्ठूक्तं सत्त्वरजस्तमांसि प्रकृतिगुणाः तत्संबन्धजीवगुणाश्च सत्त्वरूपं ज्ञानं सात्त्विकः कालः इत्यादि प्रतीतिरुपाधिवशादौपचारिकीशब्दाद् यः पञ्चप्रकृतिकार्यपञ्चमहाभूतगुणत्वेन प्रसिद्धाः शुद्धसत्त्वं तु त्रिपादविभूत्यां तत्प्रवर्त्तकेश्वरे च संयोगशक्तिरूपौगुणौ षड्द्रव्यसाधारणाविति विवेकः इत्यद्रव्यं निरूपितम् ॥

एवं द्रविडभाष्य,न्यायतत्त्व,सिद्धित्रय,श्रीभाष्य,दीपसार,वेदार्थसंग्रह,भाष्य,विवरण,संगतिमाला,षडर्थसंक्षेप,श्रुतप्रकाशिका,तत्त्वरत्नाकरप्रज्ञापरित्राण,प्रमेयसंग्रह,न्यायकुलिश,न्यायसुदर्शन,नामयाथात्म्यनिर्णय,न्यायसार,तत्त्वदीपन,तत्वनिर्णय,सर्वार्थसिद्धि,न्यायपरिशुद्धि,न्यायसिद्धांजन,परमतभंग,तत्त्वत्रयचुलुक,तत्त्वत्रयनिरूपण,तत्त्वत्रयचंडमारुत,वेदान्तविजय,पाराशर्य्यविजयादिपूर्वाचार्यप्रबन्धानुसारेण ज्ञातव्यार्थान्संगृह्य बालबोधार्थं यतीन्द्रमतदीपिकाख्यशारीरकपरिभाषायामस्यान्ते प्रतिपादिताः अध्यात्मशास्त्राणां तत्त्वहितपुरुषार्थप्रतिपादकत्वात्तत्सारे ऽस्मिन्नपि प्रकृतिजीवेश्वरपरिच्छेदैस्तत्त्वस्य निरूपणाच्च तत्त्वोपायपुरुषार्था निरूपिता इति निरवद्यमेकं तत्त्वमिति प्रतिपादयन्ति सूरयः आत्मा ऽनात्मेति विभज्य द्वेधा निरूपयन्ति श्रुत्यनुसाराद्भोक्तृभोग्यनियन्तृत्वरूपतत्त्वत्रयमिति प्रतिपादयंत्याचार्य्याः । हेयं तस्य निवर्त्तकं उपादेयं तस्योपायं चतुर्द्धा विभज्यानुसंदधते केचिदाचार्याः प्राप्यं प्राप्तृप्राप्त्युपायः फलं विरोधीति पञ्चधा निरूपयन्ति अर्थं पञ्चधा निरूपयन्ति अर्थं पञ्चकमेव संबन्धेन साकं षोढापरिगणय्य वर्णयन्ति । एतेषां तत्तद्विभाजकधर्ममादायानुसंधानमुपपद्यते वस्तुतस्तु वेदान्तानां चिदचिद्विशिष्टाद्वैतमेकमेव ब्रह्मेति तात्पर्य्यं अत एव चिदचि-

द्विशिष्टं ब्रह्मैकमेवेति मत्वा भगवान्बादरायणः अथातो ब्रह्मजिज्ञासेति उपक्रम्य तमेव प्रकारं निरूपितवान् अनश्चिदचिद्विशिष्टो ब्रह्मशब्दवाच्यो विष्णवाख्यः परवासुदेवो नारायण एवैकं तत्त्वमिति विशिष्टाद्वैतवादिनां दर्शनमिति सिद्धम् ॥ इति त्रिविधविचित्रं मानमेयप्रकाशं घनगुरुवरदासेनोक्तमादाय शास्त्रात् ॥ यतिपतिमतिदीपं वेदवेदान्तसारं स भवति मतिमान्यः सत्कटाक्षैकलक्ष्यः ।

इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्य्यस्य प्रथमदासेन श्रीमद्वेङ्कटगिरिनाथपदकमलसेवापरायणस्वामिपुष्करिणीगोविन्दाचार्यसूनुना श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायामद्रव्यपरिच्छेदो नाम दशमोऽवतारः संपूर्णः ॥ सम्वत् १९३३ पौषकृष्णपक्षे भौमवासरे शुभम् ॥

समाप्तोऽयं ग्रन्थः ।

॥ आनन्दमन्दाकिनीकाव्यम् ॥

वाग्देवीचतुरास्य पञ्चवदना नित्यं सहस्राननो-
प्यच्चैर्यैर्च जडात्मतामुपगताः केन्येवराकाः सुराः ।
मर्त्याः स्वल्पधियः कथं नु कुशलास्तत्राप्यहं प्रज्ञया
हीनः किं करवाणि तां व्रजकुलोत्तंस प्रशंसां तव ॥ १ ॥

नित्यं ब्रह्मसुरेन्द्रशङ्करमुखैर्दत्तोपहारायते
निस्वादांस्तुषमिश्रतण्डुलकणान् विप्रः सुदामा ददौ ।
तद्वद्दैवनिरर्थकैः कतिपयैरुच्चावचैर्निर्मितां
वागीशप्रमुखस्तुतस्य भवतः कुर्या स्तुतिं निस्त्रपः ॥ २ ॥

शश्वद्ब्रह्मशिवेन्द्रदेवगुरुवाग्देवीफणीन्द्रादिभि-
स्तुत्यस्यापि हरे ममास्तु रचिता वाणी विनोदायते ।
चित्रालं कृतिशालिभिः सुललितैर्नित्यं कवीनां स्तवैः
संम्राजः समुपासितस्य शुकगीर्धत्ते प्रमोदं यथा ॥ ३ ॥

चित्राकारकिरीटकोटिविलसद्रत्नोद्यकान्तिच्छटा
संघट्टेन विचित्रमम्बरतलं कुर्वन् स्थितं मूर्द्धनि ।
जीयात्ते शिखिपिच्छमण्डनमिदं नीलाचलस्थायिनि
स्वर्णाद्रेः शिखरे पुरन्दरधनुर्व्यूहस्य शिक्षावहम् ॥ ४ ॥
यस्यादान्तनखांशुचिन्तनवशाद्ध्यानमध्यं तमो-
ध्यन्तं याति मुकुन्द तस्य भवतो ध्वान्तानि किं मूर्द्धनि ।
ज्ञात्वा त्वां दयितं समेत्य जलदाये केशाग्रमाश्रित्य-
स्तेवद्धा चपलाभयोः प्रणयकोधात्किरीटच्छलात् ॥ ५ ॥
त्वच्चक्षुः सवितुः सरोरुहरुचेः साम्राज्यमं गण्डयोः
भाले च प्रजनाथ नन्दनपदः ध्यानात्मकाः संततम् ।
निर्णीतं मुखनेत्रपङ्कजवनी माध्वीकपानाम्बु-
मोद्भ्रान्ता मधुपा भ्रमन्ति परितो यत्रालकव्याजतः ॥ ६ ॥
त्वद्भालेनिकषोपलेविलसिताकाश्मीरगौरोचना
संभूतस्तिलकः परीक्षणविधौ किं हेमरेखोद्गमः ।
चाञ्चल्यं चपलाविहाय जलदं किंवा समाश्रित्य ते
किंवा मारकतस्थले समुदितः कन्दर्पकृष्णाङ्कुरः ॥ ७ ॥
त्वद्भ्रूवल्लिमिषेण कार्मुकलता माकृष्य पुष्पायुधः
कृत्वा चम्पककोरकं च तिलकव्याजेन बाणं हरे ।
लक्ष्यं कुन्तलनीलकण्ठयुगलश्रीचन्द्रकं विध्यति
प्रायः षण्मुखवाहनाभ्यर्णितकले रोषे मनूर्वीस्थिताम् ॥ ८ ॥
निःशेषप्रमदामनोमननिजक्रीडामहामन्दिर-
क्रीडावक्षकपाटिकाविघटनप्रेमाकृतिः कुञ्चिका ।
दुर्मानग्रहिलत्रिलोकमहिलामानच्छिदाकर्तरी
शृङ्गारद्रुममञ्जरी स्फुरति किं गोविन्द ते भ्रूलता ॥ ९ ॥
नो कार्यं श्रुतिवर्त्मलङ्घितमिदं नालीकमुग्धाकृतिः
पर्यन्ताकलनं विधाय कलभस्यापाङ्गेन मार्ष्टं कथा ।

अन्तः कृष्णमुपास्य तद्रुचिमतां संभावना सर्वतः
कार्येत्यम्बुजलोचनाक्षियुगलं शीलं दधौ ते सताम् ॥ १० ॥
सौन्दर्यामृतदीर्घिके तव दृशौ पक्ष्मा वलिश्चेतयोः
कूलेकामकृषीवलेन रचिता शृङ्गारसस्योन्नतिः ।
दृग्भङ्गीर्निगदन्ति यास्तु विबुधास्त्यम्भसां वीचय-
स्ताः स्युर्गोपवधूहृदम्बुजवनीदोलायिता यत्नतः ॥ ११ ॥
दूरे ब्रह्मशिवेन्द्रपूर्वदिविषद्वृन्देनमस्कुर्वति
व्यावल्गद्भुजवालकोचलकुटच्द्युत्किरीटे हठात् ।
सावज्ञामधुमत्तसिन्धुरदृशां शोभाद्विषः सालसा-
दृक्पातास्तव नन्दवंशतिलकस्वान्ते सदा सन्तु मे ॥ १२ ॥
मुक्तेरप्यति दुर्लभा हिमगिरिप्रस्यन्दमन्दाकिनी
धारातोऽप्यति शीतलातिमसृणा चान्द्रान्मयूखादपि ।
वाञ्छा तोऽप्यति विस्तृता विषयिणां त्वत्पादचिन्तापरा
स्वांतादप्यति निर्मलामयि कृपादृष्टिस्तवास्तां हरे ॥ १३ ॥
कल्पान्ताग्निशिखोन्नतिर्दितिसुतव्राते प्रपन्ने जने
पीयूषद्रवसिन्धुवृष्टिरमरस्तोमे विभूत्यायतिः ।
सीमाप्रेमभरस्य गोपनिकरे कन्दर्पकाण्डाहति-
र्ब्रह्माण्डोदरसुन्दरी हृदि हरे जीयादृशोस्ते द्युतिः ॥ १४ ॥
निर्बन्धेन यदीन्द्रनीलमहसा सम्पादितौ दर्पणौ
ताभ्यां किं तुलना कपोलतलयोः संभाव्यते वानवा ।
एवं ज्ञातुमुपागते श्रुतिपथं नेत्रे चपा कुञ्चिते
सेयं द्वैधवतीत्वदीयवदनप्रान्तश्रियं पश्यति ॥ १५ ॥
त्वां पादाङ्गदकङ्कणाङ्गदशिरोलङ्कारहाराम्बरैः
संपूज्य प्रददौ सुतामथ मणिं रत्नाकरः कौस्तुभम् ।
आस्ये तस्य सुतः सुधांशुरखिलां कान्तिं यदा दत्तवान्
स्वाकारं व्यतरंस्तदेव मकराः किं कुण्डलां तस्तव ॥ १६ ॥

लावण्यामृतवाहिनी तव मुखस्येयं मनोज्ञाकृति-
स्तस्यामद्भुतबुद्बुदः समभवत्तत्रापि फेनोद्गमः ।
नासावंशगतं तमेव विशदं मुक्ताफलं ये विदु-
स्तेमन्या मधुसूदन त्वयि मनोवृत्त्येव धन्यायतः ॥ १७ ॥
नेत्राम्भोजमुखेन्दुभालतिलकैर्नित्यं विवादो यतः
सौन्दर्यार्थमिति प्रतीत्यविधिना सीमा कृता नासिका ।
तूणो वा कुसुमायुधस्य नृपतेर्यन्मल्लिकाकोरकः
काण्डस्तत्र च कास्ति मौक्तिकफलव्याजेन नन्दात्मजा ॥ १८ ॥
योऽहं ते पदपङ्कजद्युतिलवं प्राप्याभवं पल्लवः
कल्पद्रुम:रुहमस्तकाभरणतां यातश्च राधापते ।
तन्मां निन्दति बिम्बविद्रुमलता श्रीतस्करोऽयं श्रुता
वेवं जल्पितुमागते किशलये स्थाने धरो रागवान् ॥ १९ ॥
दृग्भृङ्गीस्फुरदिन्द्रनीलनिचयः पद्मानि कस्तूरिका
जिह्वेयं तव पद्मरागनिकरः शोणाधरो विद्रुमः ।
दन्तालीगजमौक्तिकानि मधुजिन्मन्दस्मितं चन्दनम्
पण्यस्थानमिदं मनोजवणिजो जाने ततस्ते मुखम् ॥ २० ॥
यारत्नावदनेन्दुमण्डलगतं माधुर्यमुच्चैस्तरा-
मासाद्येह सरस्वतीश्रितवतीसत्यं रसज्ञेवसा ।
यत्सप्तस्वरमण्डलानि बहुधा त्वत्कण्ठदेशाद्बहिः
प्रादुर्भूयमुदं श्रुतौ सुकृतिनां यच्छन्ति नन्दात्मज ॥ २१ ॥
साम्यं त्वद्वदनस्य वाञ्छति विधुर्दोषाकरो यद्यपि
विप्राप्यंशुनि पद्मरागशकलोद्दन्तच्छदं स्पर्द्धते ।
दृष्ट्वैवं कुशलः कुशेशयभवः क्लेशाद्यशोदात्मजा
व्यक्तं त्वच्चिबुकं तथैव विदधे यत्तुल्यता न क्वचित् ॥ २२ ॥
माधुर्ये नलवं मधूनि दधति द्राक्षा तु साक्षाद्विषम्
पीयूषाण्यपि यान्ति निंबसमतां के दुग्धखण्डादयः ।

प्रालेयानि न शीतलानि सरसं नो कोकिलाकूजितम्
नो धुर्वेशवतंस जातु जयति त्वद्वाग्विलासोदये ॥ २३ ॥

वेदाः स्वच्छन्दमयं वदन्ति भवतः स्वान्तं कथं तद्वृथा
कुर्वन्त्येव विवादमेव कुशला गोविन्दनन्दादयः ।
तस्यैवामृतपंकिलास्तव मुखादाविर्भवन्तो बहि-
र्ध्वान्तं यतिरयं निहन्ति किरणा मन्दस्मितव्याजतः ॥ २४ ॥

यन्नामस्मरणादपि प्रणयिनः प्रवीणारागाश्रया
यान्ति त्वत्परमं ब्रह्म शिवपदं यद् योगिनां दुर्लभम् ।
तस्याप्याननपङ्कजे तव जयत्युच्चैस्तरां रागिता
ये नाभीरकुलप्रदीप नवलं ताम्बूलमात्तां मुदे ॥ २५ ॥

पीयूषद्रवसारसारघमधुद्राणीत्ववज्ञीया धरा-
स्वादायार्कसुतातटे प्रितवती सद्वंशजातामृतः ।
तस्याधरेमुरलीमिषेण रसिका माधुर्यमुच्चैस्तरा-
मास्येन्दोरनुभूय गोकुलपते गीतामृतं मुञ्चति ॥ २६ ॥

साफल्यं श्रुतिसंपदां विजगतां प्रालेयधाराद्रवः
पीयूषद्रवमाधुरीपरिभवः क्षीरांबुधेः शोषणम् ।
ब्रह्मानन्दतिरस्कृतिः कुलवधूधैर्यास्त्रिवर्गाहतिः
कंसध्वंसन यस्य किं न भवतो वंशी निनादोदयः ॥ २७ ॥

धैर्यं धिक्कुरुते घनं विनुदते कोलं यशः प्रोज्झति
प्रत्येकं गुरुवर्गगञ्जनशतं विस्मारयत्यंजसा ।
साध्वीनामभिराकरोति भवनं भर्तुर्विधत्ते विषम्
किं किं नो विदधाति हन्त सुदृशां वंशीनिनादस्तव ॥ २८ ॥

लावण्यैरखिलैस्त्वदास्यमुकुरं निर्माय धाता चिरा-
न्मृष्टं मारकतं विधाय दधतः कण्ठस्थलव्याजतः ।
ध्यायं ध्यायमशेषवस्तुसुषमामाधाय रेखाचयम्
नूतेनास्ति बभूव नो न भविता सौन्दर्यमेतादृशम् ॥ २९ ॥

आशामातङ्गकरप्रसारिमहसा निःशेषधामभ्रुवा-
माशाभिस्त्रिदिवेशनिर्भरशुभैः कंसादिनाशप्रिय ।
प्रेम्णानन्दयशोदयोस्तनुजुषां निःसीमभाग्यैर्दृशाम्
सौभाग्यैर्व्रज सुभ्रुवां व्रजपते किं ते भ्रुवौ निर्मितौ ॥ ३० ॥
कंसस्यादलमभ्युदेति भवतः सर्वांगमेताद्दृशम्
साम्यं वा भवतां कथं जलरुहे सर्वेष्वमध्यस्थयोः ।
मत्तर्कः पुनरेव गोकुलपते त्रैलोक्यलक्ष्मीमतस्त्व-
त्साक्ष्योरिति ते वदन्ति कमलेषा यत्तदेकालया ॥ ३१ ॥
अङ्गुल्यस्तनवंहस्तयोर्मुरहरप्राप्येरसालां कुर
ङ्गाक्षीयत्यरितोऽङ्गुलीयकमिषात् स्निग्धा लवालावलिः ।
किंवा पञ्चशरप्रपञ्चजनपञ्चा पञ्चाङ्गुलाः पञ्चतो
त्तीर्णाः सत्फलिनः पृथग्भवतृधा पुष्यन्ति नैवात्सवान् ॥ ३२ ॥
भक्तानुग्रहकातरेण भवता कृत्वा नृसिंहाकृतिम्
रागान्धस्य पुरा हिरण्यकशिपोर्वक्षस्थली पाटिता ।
ते नाभूत्तवपाणिपङ्कजयुगे रागः स राधापते
गोपीनां कुचकुंकुमैर्द्विगुणितो नाद्यापि विश्राम्यति ॥ ३३ ॥
एतौ पञ्चशरत्विषावद्ययदृशः संभावयन्तौ भृशम्
दैत्यग्रामसमीरसंहृतिपरौ श्यामौ भुजङ्गोत्तमौ ।
तन्मौलिस्फुरितप्रशालिनी पुनरियं रत्नालिरुज्जृम्भते
यां प्राहुस्तव गोकुलेश नखनिश्श्रेणी करस्थांगनाः ॥ ३४ ॥
दोर्दण्डद्वयबन्धनानि विदधुर्नन्दोपनन्दादय-
स्तद्वन्त्युत्कटिशङ्कयाति च किल गोवर्द्धनोद्धारणे ।
तान्येवाप्रतिमप्रभानि हरितोविद्योत यन्त्यद्भुतम्
विद्वांसस्तवकं कणाङ्कदतया गोविन्दयज्जानते ॥ ३५ ॥
शृंगारद्रुमसारकं दृढनवप्रान्त्रैलोक्यसीमंतिनी
क्रीडामन्दिरमण्डनाय विधिनास्तंभौ प्रलम्बीकृतौ ।

तन्मध्ये पुनरिन्द्रनीलमणिभिः संपादिकावेदिका
तोबाहूमधुजिद्वदन्ति भवतो वक्षस्थलीं तामपि ॥ ३६ ॥
यद्वत्तः कमलाकरङ्कतलेमालंवतेभास्कर-
स्त्वच्चक्षुर्मुखपाणिपादकमले जातस्ततः शोणिमा ।
तन्मिषं पुनराकलय्यसघृतः कण्ठेत्वयाकौस्तुभ
व्याजेनेतिमुकुंदमादृषिजनेतर्कः समुज्जृम्भते ॥ ३७ ॥
आलोड्याखिलवेदशास्त्रजलधेस्तत्त्वं यदेकांततः
कृत्वा सङ्कलितं स्वकीयनिलयेक्षीराब्धिमध्येधृतम् ।
सर्वार्थप्रतिभासकं व्रजकुलालङ्कार तत्कौस्तुभ
व्याजाद्विस्मृतिशंकयेवभवताकण्ठे कृतं साम्प्रतम् ॥ ३८ ॥
यात्वां विष्णुपदं समाश्रितवतीनक्षत्रमालास्फुर-
द्दीप्तिर्यैरम्यमिदं कथं मुररिपो नक्तं दिवंद्योतते ।
आघ्रातं दयितं तवातनविधुं यांतीमिमां यामिनी
रोमश्रेणिमिषांवतो धृतवतीज्ञात्वासपत्नीमियम् ॥ ३९ ॥
यः पाशेनयशोदयानियमितोयेनापराधंविना
तस्मिन्नस्तिवलिस्त्रिधामयियुरः सोयं बलिध्वंसिनः
एवं चिंतनतत्परः कृशतरस्त्वन्मध्यदेशोभृशम्
याशोदेयसशोकमुद्गि रतितेरोमावलिव्याजतः ॥ ४० ॥
सृष्ट्यादौप्रकृतिर्गुणत्रयमयीयास्वीकृतासीत्त्वया
सेयं सत्वमयीसुखायजगतांहारां कृतिस्तेभुवि ।
गुञ्जादाममिषान्मुकुन्ददधती राजेन्द्रशोभाग्रहम्
नाभीसीम्नितमोमयी पुनरियंरोमावलीराजते ॥ ४१ ॥
सौन्दर्यामृतवारिधौ स्मरमहायादः समारम्भतः
संभूताभ्रमिरम्भसां सुललिताजातास्ततो वीचयः ।
तांजानेस्फुटमिन्द्रनील घटितश्रीसंपुटार्घद्युति
त्वन्नाभीमपितावलित्रयमिति श्यामाभि रामाकृते ॥ ४२ ॥

Digitized by Google

नीलाम्भोरुहवल्लिरुल्लसति तेनाभीसरस्यां ध्रुवम्
यच्छ्रीवत्समिषाद्बिभर्त्ति कुसुमं मालं च रोमावलीम् ।
यंवावत्सिकौस्तुभं बुधजनाजानन्तिनन्दात्मजा
प्रायः सोप्यनुराग एव भविताचैलोक्यवामभ्रुवाम् ॥ ४३ ॥
नीरूपोपिघनद्युतिर्मुनिमनोमात्रैकपात्रीकृतो
प्याभीरागुरुसंगतः सुखघनोप्यानंदितो बांधवैः ।
स्थानात्माप्यति मुग्धतामुपगतो वामभ्रुवां विभ्रमै-
रित्थं ते त्रिवलीमिषान्मुरहरत्रय्यस्ति विषार्पिता ॥ ४४ ॥
देव्यः पल्लवसंपदाविदधते सौभाग्यलक्ष्मीं श्रुतो
स्वच्छन्दं सुमनः फलानि विबुधा विन्दंति ते सेवया ।
वेदेनापि निगद्यसे मुरहरत्वद्ब्रह्मकल्पद्रुमः
प्रायः कल्पलता ततः श्रितवती त्वां वैजयन्तीच्छलात् ॥ ४५ ॥
विश्वानंदकदंबसंपदमति स्निग्धंतमालद्युतिं
दृष्ट्वानिर्भरविभ्रमाद्यदुपते त्वां संगता विद्युतः ।
त्वद्रूपामृतसिंधुसंगमवशात्प्राप्यांबरप्रच्यवं
चांचल्यात्किमु नंदनंदनभवत्पीतांबरं संदधुः ॥ ४६ ॥
कांचीतेघृतयोगसंपदभितोजाताविशाला कृति-
र्यावंतीमथुराध्वानं विदधतीपश्चादयोध्या भवत् ।
मायाद्वारवतीशिवाधिवसतिर्या काशिका दृश्यते
तच्चित्रं नवदामिमाधवयतस्त्वां सा सदा संश्रिता ॥ ४७ ॥
जानीमः सहजांत्वदंगमिलितामालोक्यपद्मालयां
तत्संगस्थितिभंगकातरतमो कल्पद्रुमैरावतो ।
आद्यः पल्लवसंपदं करपदे बिंबाधरे चापरः
शुण्डादण्डयुगंत बाहुयुगलेयेना दधेमाधव ॥ ४८ ॥
रंभास्तंभयुगंनतद्यदुपरिस्थूलंतवोरुद्वयं
तूणीरौ मकरध्वजस्य सुमनो मोदेन विद्मो वयम् ।

हाकुंभप्रभुकैटभोत्कटमदोर्किं कोठभारेहठान्निष्पि
ष्टोयत्कोटिकोटिर्वाठिनो तस्मिंस्थलेकोमले ॥ ४९ ॥
स्तंभद्वैतमिदं व्योमनिधिपुष्पागेहस्यमंदाकिनी
स्यंदामंदमरं द्विशोधिकमलद्वंद्वस्य नालायुगं ।
त्वज्जङ्घायुगलं विमुक्तिकलशीनिर्मोक्ष दंडद्व-
यं प्रपत्तिद्विपसंघ यंत्रणविधावालानयुग्मं भजे ॥ ५० ॥
विद्वांसोपि कथं कठोरकमठीपृष्ठेन तुल्यं वद-
न्तीदं त्वत्पदयुग्मं कथं नु कमलावक्षोजशैलेदधत् ।
धिङ्मन्दांवसुधामिदं मधुरिपोगोचारणं संचर-
न्याषाणां कुरकंटकादिपुराकाठाद्दृष्ट्वाविदीर्णानयत् ॥ ५१ ॥
यद्भक्त्योद्यमरीव येपिसमलाश्चावर्तनं विश्वतः
कृत्वाद्रिस्थिवयंभ्रमन्ति महितानादैर्मधुस्यंदिभिः ।
यच्च ब्रह्मशिवेंद्रवंदित पदद्वंद्वोपरिद्योतते
तत्कृष्णस्य पदांगुलद्वयमतः किं वर्ण्यतां मादृशैः ॥ ५२ ॥
येतेयत्कमलालयातलपद्मं भोजद्वयंसंगता
धातातवतनूपधानयुगलं गुल्फच्छलान्निर्ममे ।
किंवा मन्मथकाहलौ विरचितौतस्यामुदेकन्दुके
यायत्क्रीडतिपार्श्वकं कजतलेकृत्वासखीभिः सह ॥ ५३ ॥
यारक्ताद्दशलोकपाल मुकुटप्रांतत्विषः संततम्
कल्पक्ष्मारुहपुष्पसं मृतरजस्त्वत्पादमूले बभुः ।
तादीव्यन्नखरांचितां मुलितयाजानंति सत्यम्
जनाः स्वस्मिन्नेव सदाधरेण दधतेलेखायदूर्ध्वश्रियम् ॥ ५४ ॥
पीयूषद्युतिबिंबमंबरतले विद्योतमानं पुरः
प्रेक्ष्योत्फुल्लदृशा त्वयामुहुरिदं देहीति यद्याचितं ।
तन्मन्येतवपंकजेतदयामहच्चिह्नं यशोदार्थनं यत्त्व-
त्पादसरोजयोर्नखमयाणव्याजेन गीतांशवः ॥ ५५ ॥

सत्यं यद्विबुधा वदंति पदयोर्द्वंद्वं तवांभोरुहे
गोधूलीच्छलत: स्थितानि परितो हंसालिचेतां स्थलम् ।
पीत्वैतन्मकरंद बिंदुमसकृद्वृन्दावनी भूपते
मंजीरद्वयमंजुशिंजितमिषादंचंतियत्यद्भुतं ॥ ५६ ॥
आकृष्याखिलवस्तुत: प्रथमतो रागं मुनींद्रैस्तत:
कृत्वा मानसपंकजे तव पदद्वन्द्वं स तस्मिन् धृत: ।
येनास्मिन्नरविंदलोचनपुनस्तत्केसराणां द्युति-
स्तोमेनापि समंचित: समुदयत्युच्चैस्तमाशोणिमा ॥ ५७ ॥
हंसास्त्वामुपनीयमानससरो जन्मप्रदेशे नियम्
क्रीडंत: कमलालयेन भवता सार्द्धं प्रमोदं दधु: ।
सत्वं लोहितलोचनाधरपदद्योत: श्रितो हंसताम्
तत्संपर्कवशादिति व्रज कुलालंकार शंकामहे ॥ ५८ ॥
बुद्धात्मानितरांकिमुन्नततर: काठिन्यवान्निर्भयम्
किंवा केवलकोमलो भ्रमति चेत्किंचिन्मदीयं वदस् ।
धन्य: सोयमितीव लोकमखिलं संबोधयन्माधव-
त्वं धत्से पदयोर्यवं ध्वजवरं दंभोलिमंभोरुहम् ॥ ५९ ॥
त्वां नित्यं समुपास्यदास्य विधया स्थास्याम इत्याशया
ब्रह्मेंद्राद्यमरैस्त्वदीयपदयो: स्वीयाधृता: संपद: ।
नाराचं कुम्भनीरजाग्निलसच्छत्रध्वजाद्याकृतिम्
बिभ्राणा विजयश्रियं त्रिजगतां स तव चित्रायते ॥ ६० ॥
त्वत्पादांबुजसंगमात्त्रिजगतां वंद्यारविन्दालया-
स्थाने स्थानगुणाद्भवन्ति हि जना: प्राय:पदं संपदाम् ।
किं त्वेकं शतपत्रलोचनमहच्चित्रं यदस्मादध:
प्रतापुण्यतमा त्रिमुक्तिनगरीनि:श्रेणिका स्वर्धुनी ॥ ६१ ॥

यत्पादांबुनिधाय मूर्द्धनिचिता वासः शिवत्वं हठा-
त्प्राप्रोमथितकालकूटनिकरो मृत्युं जयत्वं ययौ ।
दिग्वासानृकपालमात्रविभवोप्यानंददेशानत म्
सत्वं नन्दसि यस्य मंदिरगतो नंदाय तस्मै नमः ॥ ६१ ॥
धूलीधूसरितं मुखं तव सरत्पर्णेंदुनिंदावह-
व्यालोलालककुंडलद्युतिचलन्नेत्रश्रियाप्रोल्लसत् ।
यालोक्यार्द्रविलोचनास्मितमुखी प्रस्पंदमानस्तनी
पाणिभ्यामवलंब्य चुंबितवती तां नंदजायां भजे ॥ ६३ ॥
पीत्वा स्तन्यविषं सहासु पवनैः संपातिते पूतना
देहे खे भवता जनार्दनतृणावर्त्ते च नीतेत्ययम् ।
राहून्मुक्तसुधामयूखसुषमायादृक्चकोरालिभि-
स्त्वद्वदनद्युतिभिः पुलकितास्ता गोपकन्यास्तुमः ॥ ६४ ॥
यद्बंधस्य विधित्सयापि विवशः कीनाशपाशैर्दृढम्
बद्धः सानुगपुत्रबांधवजनो दुर्योधनोंतं गतः ।
तं त्वां येन निबध्य नंददयिता वृंदारकैर्वंदिता
जाता नंदमयीमुकुंद महते भावाय तस्मै नमः ॥ ६५ ॥
निर्भिन्नेय मलार्जुनेति चकितास्तूर्णं गृहान्निर्गताः
पीत्वा दृक् चषकैस्त्वदक्षततनू रूपामृतं निर्वृताः ।
त्वामाधायविधाय नेत्रसलिलैः सिक्तं त्वरामाश्रिता
येवृंदावनमागताः कृतधियस्तान् गोपवृद्धान्स्तुमः ॥ ६६ ॥
कृत्वा कालियदं दशूकदमनं त्वय्यास्थिते तांडवम्
तस्योत्तब्धसमस्तमस्तकमणिस्तोमे समुत्तस्थुषि ।
येनालंभिविभातभास्करकरप्राग्भारसोभास्फुर-
द्रक्तांभोजयुगद्युतिः प्रतिपदं तत्तेङ्घ्रियुग्मं भजे ॥ ६७ ॥

उत्फुल्लैः परिपीय कर्णपुटकैर्वंशीनिनादामृतम्
स्तब्धग्रावगणामुदास्पदमकवलं प्रोद्भिन्नरोमांकुरम् ।
निस्पन्देनयनैरमंदमधुरं श्यामं मदृस्ताचकम्
येनोद्वीक्षितमंबुजेक्षणभजे तद्गो कदंबं तव ॥ ६८ ॥

जम्भारेः स्फुरदायुधस्य भवता दंभाद्रिविद्रावणम्
कृत्वा वामभुजेन सप्तदिवसान् येनो कृतः पर्वतः ।
सोस्तु स्निग्धतमालसारघटितस्तंभेकसंभावित-
प्रासादद्युतिनिंदकः प्रतिपदं भव्याय गोवर्द्धनः ॥ ६९ ॥

त्वद्बाहूधृतपर्वतोर्पितदृशः प्रेक्ष्य: प्रियायाः स्खल-
द्वासः पानपयोधरस्तिमितधरो दोस्तं भक्तं ये तव ।
शैले चंचलतांगते व्रजपते चासाकुले गोकुले
नंदे मंदमुखद्युतो जयति ते मंदाक्षमंदेक्षणम् ॥ ७० ॥

पो मंडं मदखंडनं बलभिदः किं ते हरे स्तूयते
कौमारं चरितं यतो विजयते व्यामोहनं ब्रह्मणः ।
किं स्तव्यं तव यौवनं त्रिपुरजिद्यद्बाणयुद्धेजितः
संमोहं गमितस्त्वया यदबला भावेपि नेषम्प्रिया ॥ ७१ ॥

पीते दावहुताशने निजजनप्राणेकहेतोस्त्वया
निस्पंदं पशुपौघपक्षिपशुभिः पेपीयमानेत्वयि ।
प्रेमार्द्राण्यति निर्मलानि द्विविधच्छ्रितानि सत्यं मुहु-
स्त्वद्गात्रे वितीर्य्यमाणकुसुमव्याजेन भांति प्रभो ॥ ७२ ॥

कंकेल्लिस्तवकं मुहुः कमलिनी कांतं प्रतीत्यागतम्
पर्य्यालोच्य विलोक्य धूमपटली गोधूलि बुध्याकुलः ।
उच्चैः कोकिलकूजितं च मुरलीनादंविदित्वा गृहा
त्वां या वीक्षितुमागताः पथि गता गोपांगनास्तास्तुमः ॥ ७३ ॥

सायान्हे समुदंचति श्रुतिपथं वंशीनिनादे हठा-
न्नेपथ्यस्य समापने सशपथैरालीजनैः प्रार्थिते ।
पाणिभ्यामवलंब्य नीविरसनो निर्गम्य तूर्णं बहि-
र्दृग्भ्यां ते मुखसौभगं चुलकितं याभिर्भजेताः सखीः ॥ ७४ ॥
पश्चाद्यासुरकेशिधेनुकबकारिष्टप्रलंबादयः
क्रोधाग्नौ भवता हतादिति सुतास्सन्तापिता देवताः ।
यस्मिं स्ते पदपंकजद्वयरजः पद्मोद्भवप्रार्थितम्
भेजुर्गोमृगपक्षिभूरुहलता वृन्दावनं तद्भजे ॥ ७५ ॥
देवेंद्रस्य पराभवं किमपरं व्यामोहनं ब्रह्मणः
संपत्स्यन्नपि वैभवं व्रजकुलोत्तंस प्रचेतास्तव ।
नंदं यत्पितरं जहार भवतः स्थाने जलात्मन्यवः
स्थानेतादृशिते बभूव नम नाकक्रोधस्य लेशोऽपि तत् ॥ ७६ ॥
मंजीरद्वयकं कणत्कलिलसत्कांचीघटा शिञ्जिते
वीणा वेणुमृदंगझर्झरकरोतालेद्विपंचुंचति ।
कामं पूर्णकलानिधौ विलसति भ्रश्यत्पटेस्वर्वधू-
वृन्देवर्षेति देवते सुमनसेरासस्तवास्तां मुदे ॥ ७७ ॥
नृत्यद्भूनयनोत्पलं स्मितमुखं स्विद्यत्कपोलस्थलम्
लीलाचंचलकुंडलं भुजलतां दोलत्क्वणत्कंकणम् ।
चद्यत्कंचुकबंधमुन्नतकुचं तिर्यक्क्रियं प्रस्खल-
न्नीविव्यंजितनाथशिञ्जितं जयति ते रासः प्रियाभिः सह ॥ ७८ ॥
आकुंचद्द्रुदमं क्वचिद्विलसिताम्भोजास्य शोभां क्वचि-
न्मंदस्मं दिविलोचनं क्वचिदलं दृक्चापलं कुत्रचित् ।
क्वाप्युद्गमद्यांर्धासंधुरगतं कुत्रापि विद्युल्लता
चांचल्यं समादधनं विजयते लास्यं प्रियाणां तव ॥ ७९ ॥

मध्यस्थेऽस्तमिते वपुः पुलकितं स्विद्यत्कपोलस्थलीम्
दोर्वल्लीमपि तावकांसमिलितां कम्प्राःकलाबिभ्रती ।
प्रोद्यद्घूर्णकलानिधानरुचिरे स्मेरे मुहुः सीत्कृते
राधाधन्यतमादधारवदने तांबूलकल्कं तव ॥ ८० ॥
यस्यां तुङ्गतरंगसंगमवशाम्दीताभुजंगभ्रमा-
दालिंगन्ति वरांगनास्तवजलक्रीडाजुषांगं हठात् ।
सानित्यं दलितेंद्रनीलनिकरश्रीतस्कराभास्कर-
स्यापत्यं तटिनीशिवं दिशतु मे गोपालभूपालज ॥ ८१ ॥
उत्फुल्लांबुजमाकलय्यदयिता स्मेराननं विभ्रम-
द्भृङ्गश्रेणिमनंगभंगुरदृशस्तस्याः कटाक्षच्छटाम् ।
शैवालं परिगृह्य कुंतलधिया द्राक्चुंबनायोद्यत-
स्त्वं यस्या हसितः प्रियाभिरभितस्तां भानुकन्यां भजे ॥ ८२ ॥
पुष्पं त्वय्यवचिन्वति प्रियतमा वृंदेनसाकंमुदा
वृंदारण्य महीरुहस्यनि करेकंपाकुलेनिर्भरम् ।
तस्मिन्वर्षति कौतुकेन कुसुमान्युच्चैः पुनर्दैवत
स्तोमेऽपि व्रज भूपते विजयते तैस्तोषितं ते वपुः ॥ ८३ ॥
कांताकोटिकलाकुलस्य भवतः संतोष्यराशेस्मर
वीणां कौतुकनिधाकरकरस्तोमे परं मुंचति ।
सातंकं समुपागतस्य सदना तूर्यांतंशयाने वने
कीरस्यापिगिराजयंतिपरितः पर्याकुलादृष्टयः ॥ ८४ ॥
उद्यन्नेव भवानिवन्नकभुवां सर्वापदांसंहतिम्
ध्वांतस्तोमममतमंतमनयत्कांतः सरोजन्मनां ।
सोल्लासानि वरोरुहाणि नयना नीकत्वदालोकने
लोकानां किल मंदुपंप्रतिलमास्यावस्य नायं नयः ॥ ८५ ॥

मिषेणोद्गतमस्विनीविनिहतां नाथत्वयापूतनाम्
व्याधूतामिव कैरवेष्वपिभवद्विद्वेषिवक्रद्युतिम् ।
आशां पश्य पुरंदरस्य दयितां रक्तांबरालंकृताम्
सिंदूरान्वितकुंभमंबरमणेर्बिंबं वहंतीं पुरः ॥ ८६ ॥

गीतज्ञाः कवयोनटा बहुकला शिल्पाःसुदक्षाःपरे
विप्रेंद्राः कुशपाणयोपिभवनद्वारेषु संत्यत्सुकाः ।
तल्पं मुंचददस्वलोचनफलं त्वं देह भाजामिति
प्रातर्वंदिगिरो जयंति भवतः संबोधने नित्यशः ॥ ८७ ॥

चिभिर्विशेषकम्

भानोर्मंडलमाविरस्ति पुरतो नाद्यापि निद्राहतिः
किं ते तातबलानुजेति जननी वाग्वीचिमाचामतः ।
अर्धोन्मीलितपाटलाक्षियुगलं पर्यस्तनीलालकम्
जृम्भारं भविशेषशोभिवदनांभोजं भजामस्तव ॥ ८८ ॥

मुंचतंशयनं भवंतमभितः संगम्य गोपांगना
स्तैलाभ्यञ्जनमंजनादिदधतीः संवीक्ष्य देव्यश्चिरम् ।
उत्क्रंत्यः सुमनोवराणि सुमनो भावांबरं संगताः
प्रायो गोपवधूलतास्तुमनसे वाक्यायसाम्यं दधुः ॥ ८९ ॥

प्रातर्भोजनमारचय्यविपिनं प्रस्था तु कामे त्वयि
प्रायो गोपवधूलता सुमिलितः कंदर्पदावानलः ।
यद्गोधूलिमिषादुदेति परितो धूमालिरभ्रंलिहा
तासामश्रुरसाः स्रवंति च मुहुर्दन्दह्यमानैंतरे ॥ ९० ॥

पंचास्ये चतुराननेदशशतीनेत्रादिपूर्वेगवा
मध्वन्यध्वनिलोकपालनिवहे भूमौलुठन्मूर्द्धनि ।
तद्व्याघ्राजिनभूषणादिभिरलं चस्ते समस्ते पशौ
गोपाः कोपवशाद्गृहीतलगुडाहाहारवां स्वमुदे ॥ ९१ ॥

तिग्मांशोस्तपति क्वचिज्जलमुचांस्तो मे जलं मुंचति
प्रेमार्द्रः प्रतनोति यः स्ववपुषा विघातपत्रं तव ।
सोयं भास्करकोटिभास्करमहः संभारपाटच्चरः
पारीन्द्रोसुरदंतिनां दिशतु मे भव्यं भुजंगांतकः ॥ ९२ ॥

मध्यान्हे यमुनातटे विटपिनां मूले वयस्यैः समम्
दध्यन्नान्युपभुज्यरज्यति पुनस्तत्क्रीडने च त्वयि ।
देवेंद्रास्त्रिपुरांतकः कमलभूरन्येव नोकालयाः
काकाकारजुषोमुहुः कवलयं त्युच्छिष्टमिष्टं तव ॥ ९३ ॥

निद्राणे त्वयि शीतले तरुतले तल्पेदलैः कल्पिते
संवीज्यांबुजपत्रमंदमरुता संवाहिते पादयोः ।
रुद्रब्रह्ममहेंद्रतर्जनविधौ गोपार्भकाणां कर-
व्याधूतानि जयन्ति भंगुरदृशोः कांतिश्च शोणायिता ॥ ९४ ॥

स्फूर्जन्तस्त पराशपुलस्त्यपुलहागस्त्याः स दुर्वासस
संत्युच्चैर्यशसः परोपि सपरं धन्योमुनिर्नारदः ।
यस्यत्वद्गुण गानमग्नमनसोव्यापादिते केशिनि-
प्रालेयाद्रिविनिःसृतासुरधुनी धारायते स्रावलिः ॥ ९५ ॥

लक्ष्माणिध्वजवज्रपंकज यवच्छत्रो र्ध्वरेखायुता
न्यालक्ष्यांबुरुहावते चरणयोः शोणीतले ह्यायय ।
ध्यायत्युत्पलकत्युदं चतिलुठत्याक्रंदति प्रीयते
कोन्योधन्यतमस्ततस्त्रि भुवने स्याद्गाधिनीनंदन ॥ ९६ ॥

धन्यं तस्य जनुस्तथैवपितरौ धन्यं तदीयं कुलम्
धन्या तेन वसुंधरा किमधिकं तेनैव धन्यं जगत् ।
यः कंसैकनिदेशवर्त्यपि भवत्पादांबुजालोकना
दक्रूरोप्रनिरुद्धं कंठकुहरः प्रेमाब्धमग्नो ऽजनि ॥ ९७ ॥

पर्यावृत्य पशूनशेषसखिभिः साकं त्वयास्वीकृते
गोपीलोचनपंकजालिनिचिते सायं गवामध्वनि ।
जीयासुर्दयितानेनेषु नितरां साकूतनृत्याकुला
कालिंदीसदृशःस्मितेन सुरसास्त्वच्चक्षुषोः कांतयः ॥ ९८ ॥

यो वाचो मनसोऽपि नैव विषयस्तत्त्वां विधायात्मजम्
याभ्यक्तस्नपनाशनप्रभृतिभिः संलालयत्यन्वहम् ।
नो दानेन नचेज्यया न तपसा नो सांख्ययोगादिभि-
र्यल्लभ्ये तदवाप्यगोपदयिता सास्तां यशोदा मुदे ॥ ९९ ॥

पूर्णेंद्राननपतेर्मनोरथशतैस्सार्द्धं प्रलंबारिणा
तल्पैर्निंदितदुग्धसिंधुसुषमा सारे त्वया स्वीकृते ।
संदष्टोष्ठमुदग्रमर्दितकरं तच्चिन्तरं शृण्वतः
कंसध्वंसमभीप्सितो जयति ते भ्रात्रा समं मंचिका ॥ १००

व्यासं प्राप्य सुवर्णभूधरपदं जाता गिरीशार्चिता
स्वच्छाहं स कविप्रिया कमलमुद् गाम्भीर्यमभ्यञ्चति ॥
सेयं कृष्णपदाब्जभक्तिवसुधा पातालमालम्बिता
संतापं मम सर्वतः प्रशमयत्वानंदमंदाकिनीम् ॥ १०१ ॥

ये पांडित्यकवित्वसूनुधरणी धर्मार्थकामाशिमा
दीक्षित्वेंद्वयदाप्रिमोक्षमथवा वांछंति भक्तिं हरेः
संभूतां मधुसूदनपदतः संतो भजंत्वादरा-
त्ते संसारदवाग्निदाहशमनीमानंदमंदाकिनीम् ॥ १०२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीधरसरस्वतीशिष्यश्रीमन्नं-
दनंदनपदद्वंद्वसमुदंचन्नखचंद्रचंद्रिका चयपानमत्तांचलचकोरश्रीमधुसू-
दनसरस्वती विरचिता ऽनंदमंदाकिनी समाप्ता ॥

REGISTERED No. 2.

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9 FEBRUARY 1st 1877. Vol. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

षष्ठाध्यायस्य द्वितीयः पादः ।

प्रकृत्या भगालम् ॥ १३७ ॥

भगालवाच्युत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति । कुम्भीभगालम् । कुम्भीकपालम् । कुम्भीनदालम् । भगालादयो मध्योदात्ताः । प्रकृत्येत्येतदधिकृतमन्त इति यावद्वेदितव्यम् ॥

शितेर्नित्याबह्वज्बहुव्रीहावभसत् ॥ १३८ ॥

शितेरुत्तरपदं नित्यं यदबह्वच् भसच्छब्दवर्जितं बहुव्रीहौ समासे तत्प्रकृतिस्वरं भवति । शितिपादः । शित्यंसः । शित्योष्ठः । पादशब्दो वृषादित्वादाद्युदात्तः । अंसोष्ठशब्दौ च प्रत्ययस्य नित्त्वात् । शितेरिति किम् । दर्शनीयपादः । नित्यग्रहणं किम् । शितिककुत् । ककुदस्यावस्थायां लोपो विधीयते । तत्रावस्थाया अन्यत्र शितिककुद इति बह्वजुत्तरपदं भवतीति नैव न नित्याबह्वच् । अबह्वजिति किम् । शितिललाटः । बहुव्रीहाविति किम् । शितेः पादः, शितिपादः । अभसदिति किम् । शितिभसत् । शितिशब्द आद्युदात्तः । पूर्वपदप्रकृतिस्वरापवादो योगः ॥

गतिकारकोपपदात्कृत् ॥ १३९ ॥

तत्पुरुष इति वर्तते न बहुव्रीहाविति । गतेः कारकादुपपदाच्च कृदन्तमुत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति । प्रकारकः । प्रकरणम् । प्रहारकः । प्रहरणम् । कारकात् । इध्मप्रव्रश्चनः । पलाशशातनः । श्मश्रुकल्पनः । उपपदात् । ईषत्करः । दुष्करः । सुकरः । सर्वत्रैवात्र लित्स्वरः । गतिकारकोपपदादिति किम् । देवदत्तस्य कारको, देवदत्तकारकः । देवदत्तस्येति शेषलक्षणा षष्ठी । कृद्ग्रहणं विस्पष्टार्थम् । प्रपचतितराम् । प्रपचतितमाम् । इत्यत्र तरबाद्यन्तेन समासे कृते पश्चादाम् । तत्र सति-

Digitized by Google

शिष्टत्वादाम एव स्वरो भवतीत्येके । प्रपचति । देश्याद्यर्थं तु छन्दुस्वं दृश्यतएव ॥

उभे वनस्पत्यादिषु युगपत् ॥ १४० ॥

प्रकृत्येति वर्त्तते । वनस्पत्यादिषु समासेषु उभे पूर्वोत्तरपदे युगपत् प्रकृतिस्वरे भवतः । वनस्पतिः । वनपतिशब्दावाद्युदात्तौ पारस्करप्रभृतित्वात् सुट् । बृहस्पतिः । बृहतां पतिः । तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्चेति सुट् तकारलोपश्च । बृहदित्येतदन्तोदात्तं निपातयन्ति । तस्य के चिदाद्युदात्तत्वं वर्णयन्ति । शचीपतिः । शचीशब्दः कृदिकारादक्तिन इति ङीषन्तत्वादन्तोदात्तः । के चित्तु शार्ङ्गरवादिषु पठन्ति तेषामाद्युदात्तः । तनूनपात् । तनोतेरौणादिक ऊप्रत्ययस्तेन तनू शब्दोऽन्तोदात्तः । न पाति न पालयति वा नपात् क्विबन्तः । नभ्राण्नपादित्यादिना ऽऽद्युदात्तो निपातितः । तन्वा नपात्, तनूनपात् । नराशंसः । नरा अस्मिन्नासीनाः शंसन्ति नरा एवं शंसन्तीति वा नराशंसः । नॄ नये । अबन्तो नरशब्द आद्युदात्तः । शंसशब्दोपि घञन्तः । अन्येषामपि दृश्यतइति दीर्घत्वम् । शुनःशेपः । शुनइव शेपो ऽस्येति बहुव्रीहिः । तत्र शेपपुच्छलाङ्गूलेषु शुनः संज्ञायामिति षष्ठ्या अलुक् । उभावाद्युदात्तौ । शण्डामर्कौ । शण्डमर्कशब्दौ घञन्तत्वादाद्युदात्तौ । तयोर्द्वन्द्वे ऽन्येषामपि दृश्यतइति दीर्घत्वम् । तृष्णावरूत्री । तृष्णाशब्द आद्युदात्तः । वरूत्रीशब्दो वसितादिसूत्रे निपातितोऽन्तोदात्तः । तत्र द्वन्द्वे दीर्घत्वं पूर्ववत् । बम्बाविश्ववयसौ । बम्बशब्दोऽन्तोदात्तः । विश्ववयःशब्दोपि बहुव्रीहौ विश्वं संज्ञायामिति विश्वशब्दोऽन्तोदात्तः । तयोर्द्वन्द्वे दीर्घत्वं पूर्ववत् । मर्मृत्युः । मरिति मृजो क्विप्प्रत्ययः । मृत्युशब्दोऽन्तोदात्तः । द्वन्द्वानामदेवताद्वन्द्वार्थो ऽनुदात्ताद्युत्तरपदार्थश्च वनस्पत्यादिषु पाठः ॥

देवताद्वन्द्वे च ॥ १४१ ॥

देवतावाचिनां यो द्वन्द्वस्तत्र युगपदुभे पूर्वोत्तरपदे प्रकृतिस्वरे भवतः । इन्द्रासोमौ । इन्द्रावरुणौ । इन्द्राबृहस्पती । अत्रेन्द्रा इति

इन्द्रशब्द आद्युदात्तो निपातितः । सोम इति मन्प्रत्ययान्तः * । वरुण उनन्प्रत्ययान्तस्तेनाद्युदात्तः । बृहस्पतिशब्दे वनस्पत्यादित्वाद् द्वावुदात्तौ, तेनेन्द्राबृहस्पती इत्यत्र त्रय उदात्ता भवन्ति । देवताग्रहणं किम् । प्लक्षन्यग्रोधौ । द्वन्द्वग्रहणं किम् । अग्निष्टोमः ॥

नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ॥ १४२ ॥

उत्तरपदेऽनुदात्तादौ पृथिवीरुद्रपूषमन्थिवर्जिते देवताद्वन्द्वे नोभे युगपत्प्रकृतिस्वरे भवतः । इन्द्राग्नी । इन्द्रवायू । अग्निवायुशब्दावन्तोदात्तौ । उत्तरपदग्रहणमनुदात्तादावित्युत्तरपदविशेषणं यथा स्याद् द्वन्द्वविशेषणं मा भूदिति । अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम् । अपृथिव्यादिष्विति किम् । द्यावापृथिव्यौ । द्यावाशब्द आद्युदात्तो निपातितः । पृथिवीशब्दो ङीष्प्रत्ययान्तत्वादन्तोदात्तः । रुद्र । सोमारुद्रौ । रोदेर्णिलुक् चेति रुद्रशब्दो रक्प्रत्ययान्तोन्तोदात्तः । पूषन् । इन्द्रापूषणौ । श्वन्नुक्षन्पूषन्निति पूषान्तोदात्तो निपात्यते । मन्थिन् । शुक्रामन्थिनौ । मन्थोस्यास्तीति मन्थी । इनन्तत्वादन्तोदात्तः । पृथिव्यादिषु तु उभे युगपत् प्रकृतिस्वरे भवत एव ॥

अन्तः ॥ १४३ ॥

अन्त इत्यधिकारो यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र समासस्योत्तरपदस्यान्त उदात्तो भवतीत्येवं तद्वेदितव्यम् । वक्ष्यति । थाथघञ्क्ताजबित्रकाणामिति । सुनीथः । अवभृथः ॥

थाथघञ्क्ताजबित्रकाणाम् ॥ १४४ ॥

थ अथ घञ् क्त अज् अप् इत्र क इत्येवमन्तानामुत्तरपदानां गतिकारकोपपदात्परेषामन्त उदात्तो भवति । सुनीथः । अवभृथः । हनिकुषिनीरमिकाशिभ्यः क्थन् इति अवे भृञ इति च क्थन्प्रत्ययान्तावेतौ । तत्र कृदुत्तरपदप्रकृतिस्वरत्वेनाद्युदात्तमुत्तरपदं स्यात् । अथ । आवसथः । उपवसथः । उपसर्गे वसेरित्यथप्रत्ययः । घञ् । प्रभेदः ।

* नित्वादाद्युदात्त इत्यधिकमन्यत्र ।

काष्ठभेदः । रज्जुभेदः । क्षै । दूरादागतः । विशुष्कः । आतपशुष्कः । अञ् । प्रजवः । प्रजयः । जयो निवामे जयः करणम् इति चाद्युदात्तौ जयजयशब्दौ प्रयोजयतः । अप् । प्रलवः । प्रसवः । इत्र । प्रलवित्रम् । प्रसवित्रम् । क । गोवृषः । खरीवृषः । गां वर्षति खरीं वर्षतीति मूलविभुजादित्वात्कप्रत्ययः । प्रवृषः । प्रदूषः । इगुपधादिति कप्रत्ययः । वृषादीनां चेति वृषशब्द आद्युदात्तः । गतिकारकोपपदादित्येव । सुस्तुतं भवता । अतिस्तुतं भवता । कर्मप्रवचनीये ऽव्ययस्वर एव भवति ॥

सूपमानात् क्तः ॥ १४५ ॥

सु इत्येतस्मादुपमानाच्च परं क्तान्तमुत्तरपदमन्तोदात्तं भवति । सुकृतम् । सुभुक्तम् । सुपीतम् । उपमानात् । वृकावलुप्तम् । शशप्लुतम् । सिंहविनर्दितम् । सुशब्दात् गतिरनन्तर इति प्राप्ते उपमानादपि तृतीया कर्मणीत्ययमपवादः । गतिकारकोपपदादित्येव । सुस्तुतं भवता ॥

संज्ञायामनाचितादीनाम् ॥ १४६ ॥

संज्ञायां विषये गतिकारकोपपदात् क्तान्तमुत्तरपदमन्तोदात्तं भवति आचितादीन्वर्जयित्वा । संभूतो रामायणः । उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः । संभूत इति प्राप्त्यर्थाद् भवतेः कर्मणि क्तः । गतिरनन्तर इत्यत्र हि कर्मणीत्यनुवर्त्तते तद्बाधनार्थं चेदम् । धनुष्खाता नदी । कुद्दालखातं नगरम् । हस्तिमृदिता भूमिः * । तृतीया कर्मणीति प्राप्तिरिह बाध्यते । अनाचितादीनामिति किम् । आचितम् । पर्याचितम् । आस्थापितम् । परिगृहीतम् । निरुक्तम् । प्रतिपन्नम् । प्रश्लिष्टम् । उपहतम् । उपस्थितम् ॥ संहिता ऽगवि ॥ संहिताशब्दो यदा गोरन्यस्य संज्ञा तदा ऽन्तोदात्तो न भवति । यदा तु गोः संज्ञा तदा ऽन्तोदात्त एव ॥

प्रवृद्धादीनां च ॥ १४७ ॥

प्रवृद्धादीनां च क्तान्तमुत्तरपदमन्तोदात्तं भवति । प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुक्ताः सक्तवः । आकर्ष ऽवहितः । अवहितो भोगेषु ।

* कृषिः । पा० २ ।

खट्वारूढः। कविशस्तः। यानादीनामत्र गणे पाठः प्रायो वृत्तिप्रदर्शनार्थो न विषयनियमार्थः। यानादिभ्योऽन्यत्रापि तेषामन्तोदात्तत्वं भवत्येव। न विषयनियमार्थ एवेत्येके। असंज्ञार्थोऽयमारम्भः। आकृतिगणश्च प्रवृद्धादिर्द्रष्टव्यः। तेन पुनरुत्स्यूतं वासो देयं, पुनर्निष्कृतो रथ इत्येवमादि सिद्धं भवति॥

कारकाद्दत्तश्रुतयोरेवाशिषि ॥ १४८॥

संज्ञायामिति वर्त्तते, क्त इति च। संज्ञायां विषये आशिषि गम्यमानायां कारकादुत्तरयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तो भवति। देवा एनं देयासुर्देवदत्तः। विष्णुरेनं श्रूयाद् विष्णुश्रुतः। कारकादिति किम्। कारकान्नियमो मा भूत्। संभूतो रामायणः। दत्तश्रुतयोरिति किम्। देवपालितः। एतस्मान्नियमादत्र संज्ञायामनाचितादीनामित्यन्तोदात्तत्वं न भवति तृतीया कर्मणीत्येवात्र भवति। एवकारकरणं किम्। [illegible]वधारणं यथा स्यात् दत्तश्रुतावधारणं मा भूत्। अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति। संश्रुतः। विश्रुतः। आशिषीति किम्। अनाशिषि नियमो मा भूत्। देवैः खाता देवखाता। कारकाद्दत्तश्रुतयोराशिष्येवेत्येवमत्र नियम इष्यते। तेनाहतो नदति देवदत्त इत्यत्र न भवति। देवदत्त इति कस्य चित् शङ्खस्य नाम। तत्र तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वमेव भवति॥

इत्थंभूतेन कृतमिति च ॥ १४९॥

इमं प्रकारमापन्न इत्थंभूतः। इत्थंभूतेन कृतमित्येतस्मिन्नर्थे यः समासो वर्त्तते तत्र क्तान्तमुत्तरपदमन्तोदात्तं भवति। सुप्तप्रलपितम्। उन्मत्तप्रलपितम्। प्रमत्तगीतम्। विपन्नश्रुतम्। कृतमिति क्रियासामान्ये करोतिर्वर्त्तते नाभूतप्रादुर्भाव एव तेन प्रलपिताद्यपि कृतं भवति। तृतीया कर्मणीत्यस्यायमपवादः। भावे तु यदा प्रलपितादयस्तदा थाथादिस्वरेणैव सिद्धमन्तोदात्तं भवति॥

अनो भावकर्मवचनः ॥ १५०॥

अनप्रत्ययान्तमुत्तरपदं भाववचनं कर्मवचनं च कारकात्परमन्तोदात्तं भवति । ओदनभोजनं सुखम् । पयःपानं सुखम् । चन्दनप्रियङ्गुकालेपनं सुखम् । कर्मवचन । राजभोजनाः शालयः । राजाच्छादनानि वासांसि । कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखमित्ययं योग उभयथा वर्ण्यते । कर्मण्युपपदे भावे ल्युट् भवति । कर्मण्यभिधेये ल्युड्भवतीति । तत्र पूर्वस्मिन्सूत्रार्थे भाववचनोदाहरणानि, उत्तरत्र कर्मवचनोदाहरणानि । अन इति किम् । हस्तहार्यमुदश्वित् । भावकर्मवचन इति किम् । दन्तधावनम् । करणे ल्युट् । कारकादित्येव । निदर्शनम् । अवलेखनम् । सर्वेषु प्रत्युदाहरणेषु प्रकृतिस्वरो भवति ॥

मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ॥ १५१ ॥

मन्नन्तं क्तिन्नन्तं व्याख्यान शयन आसन स्थान इत्येतानि याजकादयः क्रीतशब्दश्चोत्तरपदमन्तोदात्तं भवति । मन् । रथवर्त्म । शकटवर्त्म । क्तिन् । पाणिनिकृतिः । आपिशलिकृतिः । व्याख्यान । ऋगयनव्याख्यानम् । छन्दोव्याख्यानम् । शयन । राजशयनम् । ब्राह्मणशयनम् । आसन । राजासनम् । ब्राह्मणासनम् । स्थान । गोस्थानम् । अश्वस्थानम् । याजकादिः । ब्राह्मणयाजकः । क्षत्रिययाजकः । ब्राह्मणपूजकः । क्षत्रियपूजकः । याजकादयो ये याजकादिभिश्चेति षष्ठीसमासार्थाः पठ्यन्ते त एवेह गृह्यन्ते । क्रीत । गोक्रीतः । अश्वक्रीतः । कृत्स्वरापवादोऽयं योगः । क्रीतशब्दे तु तृतीया कर्मणीत्यस्यापवादः । व्याख्यानशयनासनस्थानानामभावकर्मार्थं ग्रहणम् । कारकादित्येव । प्रकृतिः । प्रहृतिः ॥

सप्तम्याः पुण्यम् ॥ १५२ ॥

सप्तम्यन्तात्परं पुण्यमित्येतदुत्तरपदमन्तोदात्तं भवति । अध्ययने पुण्यम्, अध्ययनपुण्यम् । वेदे पुण्यं, वेदपुण्यम् । सप्तमीति योगविभागात्समासः । तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरत्वं प्राप्तमित्यन्तोदात्तत्वं विधीयते । उणादीनां तु व्युत्पत्तिपक्षे कृत्स्वरेणाद्युदात्तः पुण्यशब्दः स्यादिति । सप्तम्या इति किम् । वेदेन पुण्यं, वेदपुण्यम् ॥

Digitized by Google

ऊनार्थकलहं तृतीयायाः ॥ १५३ ॥

ऊनार्थान्युत्तरपदानि कलहशब्दश्च तृतीयान्तात्पराण्यन्तोदात्तानि भवन्ति । माषोनम् । कार्षापणोनम् । माषविकलम् । कार्षापणविकलम् । कलह । असिकलहः । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादो योगः । अत्र केचिदर्थ इति स्वरूपग्रहणमिच्छन्ति । धान्येनार्थो धान्यार्थः । ऊनशब्देनैव त्वर्थनिर्द्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव तृतीयासमासपरिग्रहे सिद्धे तृतीयाग्रहणं विस्पष्टार्थम् ॥

मिश्रं चानुपसर्गमसंधौ ॥ १५४ ॥

तृतीयेति वर्त्तते । मिश्र इत्येतदुत्तरपदमनुपसर्गं तृतीयान्तात्परमन्तोदात्तं भवत्यसंधौ गम्यमाने । गुडमिश्राः । तिलमिश्राः । सर्पिर्मिश्राः । मिश्रमिति किम् । गुडधानाः । अनुपसर्गमिति किम् । गुडसंमिश्राः । इहानुपसर्गग्रहणं ज्ञापकमन्यत्र मिश्रग्रहणे सोपसर्गग्रहणस्य । तेन मिश्रश्लक्ष्णैरिति सोपसर्गणापि मिश्रशब्देन तृतीयासमासो भवति । असंधाविति किम् । ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः । संधिरिति हि पणबन्धेनैकार्थ्यमुच्यते । केचित्पुनराहुर्ह्यमाणे विशेषाप्रत्यासत्तिः संधिरिति । तत्र राजा ब्राह्मणैः सह देशप्रत्यासत्तावपि सत्यां मूर्त्तेर्विभागो गृह्यत इति ब्राह्मणमिश्रो राजेति प्रत्युदाह्रियते । उदाहरणेष्वविभागापत्तिरेव गुडमिश्रा इति ॥

नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः ॥ १५५ ॥

संपादि अर्ह हित अलम् इत्येवमर्था ये तद्धितास्तदन्तान्युत्तरपदानि नञो गुणप्रतिषेधे वर्त्तमानात्पराण्यन्तोदात्तानि भवन्ति । संपादि । कर्णवेष्टकाभ्यां संपादि, मुखं कार्णवेष्टकिकं, न कार्णवेष्टकिकम्, अकार्णवेष्टकिकम् । अर्ह । छेदमर्हति छैदिकः । न छैदिकोऽच्छैदिकः । हित । वत्सेभ्यो हितो वत्सीयो, न वत्सीयोऽवत्सीयः अलमर्थे । संतापाय प्रभवति सांतापिकः । न सांतापिकोऽसांतापिकः । नञ इति किम् । गार्द्दभरथमर्हति गार्द्दभरथिकः । विगार्द्दभरथिकः । गुणप्रतिषेध इति किम् ।

गार्द्भरथिकादन्यो ऽगार्द्भरथिकः । गुण इति तद्धितार्थप्रवृत्तिनिमित्तं संपादित्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते समासे तत्रायं विधिः । कर्णवेष्टकाभ्यां न संपादि मुखमिति । संपाद्यर्हहितालमर्था इति किम् । पाणिनीयमधीते पाणिनीयो न पाणिनीयो ऽपाणिनीयः । तद्धितार्थ इति किम् । कन्यां वोढुमर्हति कन्यावोढा न वोढा ऽवोढा । अर्हे कृत्यतृचश्चेति तृच् ॥

ययतोश्चातदर्थे ॥ १५६ ॥

य यत् इत्येतौ यौ तद्धितावतदर्थे वर्त्तेते तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयादन्त उदात्तो भवति । पाशानां समूहः पाश्या न पाश्या अपाश्या । अतृण्या । यत् । दन्तेषु भवं दन्त्यं न दन्त्यमदन्त्यम् । अकर्ण्यम् । अतदर्थ इति किम् । पादार्थमुदकं पाद्यम् । न पाद्यमपाद्यम् । तद्धिता इत्येव । अदेयम् । गुणप्रतिषेध इत्येव । दन्त्यादन्यददन्त्यम् । निरनुबन्धकैकानुबन्धकयोर्ययतोर्ग्रहणादिह न भवति । वामदेवाड्ड्यड्ड्यौ । वामदेव्यं न वामदेव्यमवामदेव्यमिति ॥

अचकावशक्तौ ॥ १५७ ॥

अच क इत्येवमन्तमशक्तौ गम्यमानायामुत्तरपदं नञः परमन्तोदात्तं भवति । अपचो यः पक्तुं न शक्नोति । अजयः । कः खल्वपि । अविक्षिपः । अविलिखः । अशक्ताविति किम् । अपचो दीक्षितः । अपचः परिव्राजकः * ॥

आक्रोशे च ॥ १५८ ॥

आक्रोशे च गम्यमाने नञ उत्तरमचकान्तमन्तोदात्तं भवति । अपचोयं जाल्मः । अपठोयं जाल्मः । पक्तुं पठितुं शक्तोप्येवमाक्रुश्यते । अविक्षिपः । अविलिखः ॥

संज्ञायाम् ॥ १५९ ॥

आक्रोशे गम्यमाने नञः परमुत्तरपदं संज्ञायां वर्त्तमानमन्तोदात्तं भवति । अदेवदत्तः । अयज्ञदत्तः । अविष्णुमित्रः ॥

* गुणप्रतिषेध इत्येव, अन्यो यः पचाद्यच इत्यधिकं पुस्तकान्तरे ।

कृत्योकेष्णुच्चार्वादयश्च ॥ १६० ॥

कृत्य उक इष्णुच् इत्येवमन्ताश्चार्वादयश्च नञ उत्तरेऽन्तोदात्ता भवन्ति । कृत्य । अकर्त्तव्यम् । अकरणीयम् । उक । अनागामुकम् । अनपलाषुकम् । इष्णुच् । अनलंकरिष्णुः । अनिराकरिष्णुः । इष्णुज्ग्रहणे कर्त्तरि भुवः खिष्णुजित्यस्य ट्रानुबन्धकस्यापि ग्रहणमिकारादेर्विधानसामर्थ्याद्भवति । अनाढ्यंभविष्णुः । असुभगंभविष्णुः । चार्वादयः । अचारुः । असाधुः । अयौधिकः । अवदान्यः । चारु । साधु । यौधिक । अनङ्गमेजय । अत्र द्वितीये नञ्समासेऽन्तोदात्तत्वम् । अनङ्गमेजयः । वदान्यः । अकस्मात् । अत्रापि द्वितीयेन समासेऽन्तोदात्तत्वम् ॥ वर्त्तमानवर्द्धमानत्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाः संज्ञायाम् ॥ एते वर्त्तमानादयः संज्ञायां द्रष्टव्याः ॥ विकारसदृशे व्यस्तसमस्ते ॥ अविकारः । असदृशः । अविकारसदृशः । गृहपति । गृहपतिकः ॥ राजाह्नोश्छन्दसि ॥ अराजा । अनहः । भाषायां नञ्स्वर एव भवति ॥

विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥ १६१ ॥

तृन्नन्न अन्न तीक्ष्ण शुचि इत्येतेषु नञ उत्तरेषु विभाषा ऽन्त उदात्तो भवति । अकर्त्ता । २ । अन्न । अनन्नम् । २ । तीक्ष्ण । अतीक्ष्णम् । २ । शुचि । अशुचिः । २ । पक्षे ऽव्ययस्वर एव भवति ॥

बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥ १६२ ॥

बहुव्रीहौ समासे इदम् एतद् तदित्येतेभ्य उत्तरस्य प्रथमशब्दस्य पूरणप्रत्ययान्तस्य च क्रियागणने वर्त्तमानस्यान्त उदात्तो भवति । इदं प्रथमं गमनं भोजनं वा स इदंप्रथमः । इदंद्वितीयः । इदंतृतीयः । एतत्प्रथमः । एतद्द्वितीयः । एतत्तृतीयः । तत्प्रथमः । तद्द्वितीयः । तत्तृतीयः । बहुव्रीहाविति किम् । अनेन प्रथम इदंप्रथमः । तृतीयेति योगविभागात्समासः । इदमेतत्तद्भ्य इति किम् । यत्प्रथमः । प्रथमपूरणयोरिति किम् । तानि बहून्यस्य तद्बहुः । क्रियागणन इति किम् । अयं प्रथम एषां

तदिदंप्रथमाः । द्रव्यगणनमेतत् । गणनइति किम् । अयं प्रथम एषामिदं-प्रथमाः । इदंप्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात् कपि पूर्वमन्तोदात्तं भवति । इदंप्रथमकाः । बहुव्रीहावित्येतदुनं समासइति प्रागेतस्मादधिकृतं वेदितव्यम् ॥

संख्यायाः स्तनः ॥ १९३ ॥

संख्यायाः परः स्तनशब्दो बहुव्रीहौ समासेन्तोदात्तो भवति । द्विस्तना । त्रिस्तना । चतुःस्तना । संख्याया इति किम् । दर्शनीयस्तना । स्तन इति किम् । द्विशिराः * ॥

विभाषा छन्दसि ॥ १९४ ॥

छन्दसि विषये बहुव्रीहौ समासे संख्यायाः परः स्तनशब्दो विभाषा ऽन्तोदात्तो भवति । द्विस्तनां कुर्याद्वामदेवः । द्विस्तनां करोति द्यावापृथिव्योर्दोहाय चतुःस्तनां करोति पशूनां दोहाय । चतुःस्तनां करोति ॥

संज्ञायां मित्राजिनयोः ॥ १९५ ॥

संज्ञायां विषये बहुव्रीहौ समासे मित्र अजिन इत्येतयोरुत्तरपदयोरन्त उदात्तो भवति । देवमित्रः । ब्रह्ममित्रः । वृकाजिनः । कूलाजिनः । कृष्णाजिनः । संज्ञायामिति किम् । प्रियमित्रः । महाजिनः ॥ ऋषिप्रतिषेधो मित्रे ॥ * ॥ विश्वामित्र ऋषिः ॥

व्यवायिनो ऽन्तरम् ॥ १९६ ॥

व्यवायी व्यवधाता । तद्वाचिनः परमन्तरं बहुव्रीहौ समासे ऽन्तोदात्तं भवति । वस्त्रान्तरः । पटान्तरः । कम्बलान्तरः । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः । वस्त्रव्यवधायक इत्यर्थः । व्यवायिन इति किम् । आत्मान्तरः । आत्मा स्वभावोन्तरोन्यो यस्यासावात्मान्तरः ॥

मुखं स्वाङ्गम् ॥ १९७ ॥

मुखमुत्तरपदं स्वाङ्गवाचि बहुव्रीहौ समासे ऽन्तोदात्तं भवति ।

---

* त्रिशिरा इत्यधिकमन्यत्र ।

गौरमुखः । भद्रमुखः । स्वाङ्गमिति किम् । दीर्घमुखा शाला । स्वाङ्गमद्र-वादिलक्षणमिह गृह्यते ॥

नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ॥ १६८ ॥

अव्यय दिक्शब्द गो महत् स्थूल मुष्टि पृथु वत्स इत्येतेभ्यः परं मुखं स्वाङ्गवाचि बहुव्रीहौ समासे नान्तोदात्तं भवति । अव्यय । उच्चै-र्मुखः । नीचैर्मुखः । दिक्शब्द । प्राङ्मुखः । प्रत्यङ्मुखः । गो । गोमुखः । महत् । महामुखः । स्थूल । स्थूलमुखः । मुष्टि । मुष्टिमुखः । पृथु । पृथुमुखः । वत्स । वत्समुखः । पूर्वपदप्रकृतिस्वरो यथायोगमेव भवति । गोमुष्टिवत्सपूर्वस्योपमानलक्षणो विकल्पः पूर्वविप्रतिषेधेन बाध्यते ॥

निष्ठोपमानादन्यतरस्याम् ॥ १६९ ॥

निष्ठान्तादुपमानवाचिनश्च मुखं स्वाङ्गमुत्तरपदमन्यतरस्यां बहु-व्रीहौ समासेऽन्तोदात्तं भवति । प्रक्षालितमुखः । यदैतदुत्तरपदान्तोदात्तत्वं न भवति तदा निष्ठोपसर्गपूर्वमन्यतरस्यामिति पक्षे पूर्वपदान्तोदात्तत्वं तदभावपक्षेऽपि पूर्वपदप्रकृतिस्वरत्वेन गतिस्वर इति । त्रीण्युदाहरणानि भवन्ति । उपमानात् । सिंहमुखः । २ । व्याघ्रमुखः ॥ २ ॥

जातिकालसुखादिभ्यो ऽनाच्छादनात्
क्तो ऽकृतमितप्रतिपन्नाः ॥ १७० ॥

जातिवाचिन आच्छादनवर्जितात् कालवाचिनः सुखादिभ्यश्च परं क्तान्तं कृतमितप्रतिपन्नान्वर्जयित्वा बहुव्रीहौ समासेऽन्तोदात्तं भवति । सारङ्गजग्धः । पलाण्डुभक्षितः । सुरापीतः । काल । मासजातः । संवत्स-रजातः । द्व्यहजातः । त्र्यहजातः । सुखादिभ्यः । सुखजातः । दुःखजातः । तृप्रजातः । जात्यादिभ्य इति किम् । पुत्रजातः । आहिताग्न्यादित्वा-त्परनिपातः । अनाच्छादनादिति किम् । वस्त्रच्छन्नः । वसनच्छन्नः । अकृतमितप्रतिपन्ना इति किम् । कुण्डकृतः । कुण्डमितः । कुण्डप्रति-पन्नः । एतेषु बहुव्रीहिषु निष्ठान्तस्य * पूर्वनिपातो न भवत्येवास्मादेव

* पूर्वनिपातो न भवतीत्यस्य स्थाने परनिपातो भवति । पा० २ ।

Digitized by Google

ज्ञापकात् । प्रत्युदाहरणेषु पूर्वपदप्रकृतिस्वरो योजयितव्यः । सुखादयस्तृतीयेऽध्याये पठ्यन्ते ॥

वा जाते ॥ १७१ ॥

जातशब्द उत्तरपदे वा ऽन्त उदात्तो भवति बहुव्रीहौ समासे जातिकालसुखादिभ्यः । दन्तजातः । २ । स्तनजातः । २ । कालात् । मासजातः । २ । संवत्सरजातः । २ । सुखादिभ्यः । सुखजातः । दुःखजातः ॥

नञ्सुभ्याम् ॥ १७२ ॥

नञ्सुभ्यां परमुत्तरपदं बहुव्रीहौ समासेऽन्तोदात्तं भवति । अयवो देशः । अव्रीहिः । अमाषः । सुयवः । सुव्रीहिः । सुमाषः । समासस्येतदन्तोदात्तत्वमिष्यते । समासान्ताश्चावयवा भवन्तीत्यनृचो बह्वृच इत्यत्र कृते समासान्ते नोदात्तत्वं भवति ॥

कपि पूर्वम् ॥ १७३ ॥

नञ्सुभ्यां कपि परतः पूर्वमन्तोदात्तं भवति । अकुमारीको देशः । अवृषलीकः । अब्रह्मबन्धुकः । सुकुमारीकः । सुवृषलीकः । सुब्रह्मबन्धुकः ॥

ह्रस्वान्ते ऽन्त्यात्पूर्वम् ॥ १७४ ॥

ह्रस्वो ऽन्तो यस्य तदिदं ह्रस्वान्तमुत्तरपदं समासो वा, तत्रान्त्यात्पूर्वमुदात्तं भवति कपि परतो नञ्सुभ्यां परं बहुव्रीहौ समासे । अयवको देशः । अव्रीहिकः । अमाषकः । सुयवकः । सुव्रीहिकः । सुमाषकः । पूर्वमिति वर्त्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमप्रतिपत्त्यर्थम् । ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं भवति न कपि पूर्वमिति । तेनाज्ञकः सुज्ञक इत्यत्र कबन्तस्यैवान्तोदात्तत्वं भवति ॥

बहोर्नञ्वदुत्तरपदभूम्नि ॥ १७५ ॥

उत्तरपदार्थबहुत्वे यो बहुशब्दो वर्त्तते तस्मान्नञ इव स्वरो भवति । नञ्सुभ्यामित्युक्तम् । बहोरपि तथा भवति । बहुयवो देशः । बहुव्रीहिः । बहुतिलः । कपि पूर्वमित्युक्तं बहोरपि तथा भवति । बहुकुमारीको देशः । बहुवृषलीकः । बहुब्रह्मबन्धुकः । ह्रस्वान्तेऽन्त्यात्पूर्वमित्युक्तं बहोरपि तथा

भवति । बहुयवक्रो देशः । बहुव्रीहिकः । बहुमाषकः । नञो जरमरमित्रमृता इत्युक्तं बहोरपि तथा भवति । बहुजरः । बहुमरः । बहुमित्रः । बहुमृतः । उत्तरपदभूम्नीति किम् । बहुषु मनो ऽस्य बहुमना अयम् ॥

न गुणादयो ऽवयवाः ॥ १७६ ॥

गुणादयो ऽवयववाचिनो बहोरुत्तरे बहुव्रीहौ नान्तोदात्ता भवन्ति । बहुगुणा रज्जुः । बह्वक्षरं पदम् । बहुच्छन्दो मानम् । बहुसूक्तः । बह्वध्यायः । गुणादिराकृतिगणो द्रष्टव्यः । अवयवा इति किम् । बहुगुणो ब्राह्मणः । अध्ययनश्रुतसदाचारादयो ऽत्र गुणाः ॥

उपसर्गात् स्वाङ्गं ध्रुवमपर्शु ॥ १७७ ॥

उपसर्गात् स्वाङ्गं ध्रुवं पर्शुवर्जितमन्तोदात्तं भवति बहुव्रीहौ समासे । प्रपृष्ठः । प्रोदरः । प्रललाटः । ध्रुवमित्येकरूपमुच्यते । ध्रुवमस्य शीतमिति यथा । सततं यस्य प्रगतं पृष्ठं भवति स प्रपृष्ठः । उपसर्गादिति किम् । दर्शनीयललाटः । स्वाङ्गमिति किम् । प्रशाखो वृक्षः । ध्रुवमिति किम् । उद्बाहुः क्रोशति । अपर्श्विति किम् । उत्पर्शु । विपर्शु ॥

वनं समासे ॥ १७८ ॥

समासमात्रे वनमित्येतदुत्तरपदमुपसर्गात्परमन्तोदात्तं भवति । प्रवणे यष्टव्यम् । निर्वणे प्रणिधीयते । प्रतिरन्तरिति वात्वम् । समासग्रहणं समासमात्रपरिग्रहार्थं बहुव्रीहावेव हि स्यात् ॥

अन्तः ॥ १७९ ॥

अन्तशब्दादुत्तरं वनमन्तोदात्तं भवति । अन्तर्वणो देशः । अनुपसर्गार्थं आरम्भः ॥

अन्तश्च ॥ १८० ॥

अन्तशब्दश्चोत्तरपदमुपसर्गादन्तोदात्तं भवति । प्रान्तः । पर्यन्तः । बहुव्रीहिरयं प्रादिसमासो वा ॥

न निविभ्याम् ॥ १८१ ॥

नि वि इत्येताभ्यामुत्तरोऽन्तशब्दो नान्तोदात्तो भवति । न्यन्तः ।

ऽन्तः । पूर्वपदप्रकृतिस्वरत्वे कृते यथादेशः । तत्रोदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति स्वरितो भवति ॥

परेरभितोभावि मण्डलम् ॥ १८२ ॥

परेरुत्तरमभितोभाविवचनं मण्डलं चान्तोदात्तं भवति । परिकूलम् । परितीरम् । परिमण्डलम् । बहुव्रीहिरयं प्रादिसमासो ऽव्ययीभावो वा । अव्ययीभावपक्षेपि हि परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेष्विति पूर्वपदप्रकृतिस्वरत्वं प्राप्तमनेन बाध्यते । अभित इत्युभयतः । अभितो भावो ऽस्यास्तीति तदभितोभावि । यच्चैवं स्वभावं कूलादि तदभितोभाविग्रहणेन गृह्यते ॥

प्रादस्वाङ्गं संज्ञायाम् ॥ १८३ ॥

प्रादुत्तरपदमस्वाङ्गवाचि संज्ञायां विषये ऽन्तोदात्तं भवति । प्रकोष्ठम् । प्रगण्डम् । प्रद्वारम् । अस्वाङ्गमिति किम् । प्रहस्तम् । प्रपदम् । संज्ञायामिति किम् । प्रपीठम् * ॥

निरुदकादीनि च ॥ १८४ ॥

निरुदकादीनि च शब्दरूपाण्यन्तोदात्तानि भवन्ति । निरुदकम् । निरुलपम् । निरुपलमित्यन्ये पठन्ति । निर्मशकम् । निर्मक्षिकम् । एषां प्रादिसमासो बहुव्रीहिर्वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । निष्कालकः । निष्क्रान्तः कालकादिति कन्प्रत्ययान्तेन कालशब्देन प्रादिसमासः । निष्कालिक इत्यन्ये पठन्ति । निष्पेषः । दुस्तरीपः । अवितृस्तृतन्त्रिभ्य ईः । तरीः । तां पातीति तरीपः । कुत्सितस्तरीपो दुस्तरीपः । निस्तरीप इति केचित्पठन्ति । अपरे निस्तरीक इति । ते तरीशब्दान्ते बहुव्रीहौ कपं कुर्वन्ति । निरजिनम् । उदजिनम् । उपाजिनम् ॥ परेर्हस्तपादकेशकर्षाः ॥ परिहस्तः । परिपादः । परिकेशः । परिकर्षः । निरुदकादिराकृतिगणः ॥

अभेर्मुखम् ॥ १८५ ॥

---

* प्राज्ञः । पा० ।

Digitized by Google

अभेरुत्तरं मुखमन्तोदात्तं भवति। अभिमुखः। बहुव्रीहिरयं प्रादिसमासो वा। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम्। उपसर्गात्स्वाङ्गमिति सिद्धे वचनमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च। अभिमुखा शाला॥

अपाच्च॥ १८६॥

अपाच्चोत्तरं मुखमन्तोदात्तं भवति। अपमुखः। अपमुखम्। अव्ययीभावेऽप्यत्र प्रयोजयति। तत्रापि हि परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेष्वित्युक्तम्। योगविभाग उत्तरार्थः॥

स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनाम नाम च॥ १८७॥

स्फिग पूत वीणा अञ्जस् अध्वन् कुक्षि इत्येतान्युत्तरपदानि सीरनामानि नामशब्दश्चापादुत्तराण्यन्तोदात्तानि भवन्ति। अपस्फिगम्। अपपूतम्। अपवीणम्। अपाञ्जः। अपाध्वा। उपसर्गादध्वन इति यदा समासान्तो नास्ति तदाऽनेनान्तोदात्तत्वं भवति। तस्मिन्हि सत्यच्प्रत्ययस्य चित्त्वादेव सिद्धम्। अनित्यश्च समासान्त इत्येतदेव ज्ञापकम्। अपकुक्षिः। अपसीरः। अपहलम्। अपलाङ्गलम्। अपनाम। सर्वत्र प्रादिसमासो बहुव्रीहिरव्ययीभावो वा। स्फिगपूतकुक्षीणां ग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च॥

अधेरुपरिस्थम्॥ १८८॥

अधेरुत्तरमुपरिस्थवाचि अन्तोदात्तं भवति। अधिदन्तः। अधिकर्णः। अधिकेशः। अध्यारूढो दन्त इति प्रादिसमासः। अध्यारूढो वदन्त इति समानाधिकरण उत्तरपदलोपी समासः। दन्तस्योपरि योऽन्यो दन्तो जायते स उच्यतेऽधिदन्त इति। उपरिस्थमिति किम्। अधिकरणम्॥

अनोरप्रधानकनीयसी॥ १८९॥

अनोरुत्तरमप्रधानवाचि कनीयश्चान्तोदात्तं भवति। अनुगतो ज्येष्ठमनुज्येष्ठः। अनुमध्यमः। पूर्वपदार्थप्रधानः प्रादिसमासोऽयम्। अनुगतः

Digitized by Google

कनीयाननुकनीयान् । बलरपदार्थप्रधानोयम् । प्रधानार्थे च कनीयोय-हणम् । अप्रधानकनीयसी इति किम् । अनुगतो ज्येष्ठो, ऽनुज्येष्ठः ॥

पुरुषश्चान्वादिष्टः ॥ १९० ॥

पुरुषशब्दो ऽन्वादिष्टवाची चानोह्मरोन्तोदात्तो भवति । अन्वादिष्टः पुरुषो ऽनुपुरुषः । अन्वादिष्टो ऽन्वाचितः कथितानुकथितो वा । अन्वादिष्ट इति किम् । अनुगतः पुरुषो ऽनुपुरुषः ॥

अतेरकृत्पदे ॥ १९१ ॥

अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तो भवति । अत्यङ्कुशो नागः । अतिकशोश्वः । पदशब्दः खल्वपि । अतिपदा शक्करी । अकृत्पदे इति किम् । अतिकारकः ॥ अतेर्धातुलोपइति वक्तव्यम् ॥ * ॥ इह मा भूत् । शोभनो गार्ग्यः । अतिगार्ग्यः । इह च यथा स्यात् । अतिक्रान्तः कारकादतिकारक इति ॥

नेरनिधाने ॥ १९२ ॥

नेः परमुत्तरपदमन्तोदात्तं भवति । निधानमप्रकाशता । निमूलम् । न्यक्षम् । नितृणम् । बहुव्रीहिरयं प्रादिसमासो वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । अनिधानइति किम् । निवाभूषलः । निदण्डः । निहितवाक्, निहितदण्ड इत्यर्थः । निशब्दो च निधानार्थे ब्रवीति । प्रादयो हि वृत्तिविषये ससाधनां क्रियामाहुः ॥

प्रतेरंश्वादयस्तत्पुरुषे ॥ १९३ ॥

प्रतेरंश्वादयस्तत्पुरुषे समासेन्तोदात्ता भवन्ति । प्रतिगतोंऽशुः, प्रत्यंशुः । प्रतिजनः । प्रतिराजा । राजशब्दः समासान्तस्यानित्यत्वाद्यदा टच् नास्ति तदा प्रयोजयति । तस्मिन्हि सति चित्त्वादेवान्तोदात्तत्वं सिद्धम् । अंशु । जन । राजन् । उष्ट्र । खेटक । अजिर । आर्द्रा । श्रवण । कृत्तिका । अर्द्ध । पुर । तत्पुरुषइति किम् । प्रतिगता अंशवोस्य प्रत्यंशुरयमुष्ट्रः ॥

उपाद् द्व्यजजिनमगौरादयः ॥ १९४ ॥

उपादुत्तरं द्व्यजजिनं चान्तोदात्तं भवति तत्पुरुषे समासे गौरादीन्वर्जयित्वा । उपगतो देव,मुपदेवः । उपसोमः । उपेन्द्रः । उपहोडः । अजिन । उपाजिनम् । अगौरादय इति किम् । उपगौरः । उपनैषः । गौर । नैष । तैल । लेट । लोट । जिह्वा । कृष्णा । कन्या । गुड । कल्प । पाद । तत्पुरुषइत्येव । उपगतः सोमोऽस्य, उपसोमः ॥

सोरवक्षेपणे ॥ १९५ ॥

सुशब्दात्परमुत्तरपदं तत्पुरुषे समासेऽन्तोदात्तं भवति अवक्षेपणे गम्यमाने । अवक्षेपणं निन्दा । इह खल्विदानीं सुस्थण्डिले सुस्फिताभ्यां सुप्रत्यवसितः । सुशब्दोऽत्र पूजायामेव । वाक्यार्थस्तु अवक्षेपणमसूयया तथाभिधानात् । सोरिति किम् । कुब्राह्मणाः । अवक्षेपणइति किम् । शोभनेषु तृणेषु सुतृणेषु ॥

विभाषोत्पुच्छे ॥ १९६ ॥

उत्पुच्छशब्दे तत्पुरुषे विभाषा ऽन्त उदात्तो भवति । उत्क्रान्तः पुच्छाद्, उत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयति उत्पुच्छयतेरच् उत्पुच्छस्तदा थाथादिसूत्रेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोयमिति सेयमुभयत्र विभाषा भवति । तत्पुरुषइत्येव । उदस्तं पुच्छमस्य, उत्पुच्छः ॥

द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ ॥ १९७ ॥

द्वि त्रि इत्येताभ्यामुत्तरेषु पाद् दत् मूर्द्धन् इत्येतेषूत्तरपदेषु यो बहुव्रीहिस्तत्र विभाषा ऽन्त उदात्तो भवति । द्वौ पादावस्य, द्विपात् । २ । त्रिपात् । २ । द्विदन् । २ । त्रिदन् । २ । द्विमूर्द्धा । २ । त्रिमूर्द्धा । २ । पादिति कृताकारलोपः पादशब्दो गृह्यते । ददिति कृतददादेशो दन्तशब्दः । मूर्द्धन्निति त्वकृतसमासान्तो नान्त एव मूर्द्धन्शब्दः । तस्यैतत्प्रयोजनमसत्यपि समासान्ते ऽन्तोदात्तत्वं यथा स्यात् । एतदेव ज्ञापकमनित्यः समासान्तो भवतीति । यदापि समासान्तः क्रियते तदापि बहुव्रीहेः कार्यित्वात् तदेकदेशत्वाच्च समासान्तस्यान्तोदात्तत्वं पक्षे भवत्येव ।

Digitized by Google

द्विमूर्द्धः । त्रिमूर्द्धः । द्वित्रिभ्यामिति किम् । कल्याणमूर्द्धा । पादादिष्विति किम् । द्विहस्तम् । बहुव्रीहाविति किम् । द्वयोर्मूर्द्धा, द्विमूर्द्धा ॥

सक्थं चाक्रान्तात् ॥ १९८ ॥

सक्थमिति कृतसमासान्तः सक्थिशब्दोऽत्र गृह्यते सोऽक्रान्तात्परो विभाषान्तोदात्तो भवति । गौरसक्थः । २ । श्लक्ष्णसक्थः । २ ॥ अक्रान्तादिति किम् । चक्रसक्थः । षचश्चित्वान्नित्यमन्तोदात्तत्वं भवति ॥

परादिश्छन्दसि बहुलम् ॥ १९९ ॥

छन्दसि विषये परादिरुदात्तो भवति बहुलम् । परशब्देनात्र सक्थशब्द एव गृह्यते । अञ्जिसक्थमालभेत । त्वाष्ट्रौ लोमसक्थौ । ऋजुबाहुः । वाक्पतिः । चित्पतिः ।

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः ।

परादिरुदाहृतः । परान्तः ॥ अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम् ॥ * ॥ त्रिचक्रेण । त्रिबन्धुरेण । त्रिवृता रथेन । पूर्वान्तः ॥ पूर्वपदान्तोदात्तप्रकरणे मरुद्वृद्धादीनां छन्दस्युपसंख्यानम् ॥ * ॥ मरुद्वृद्धः । पूर्वादिः ॥ पूर्वपदाद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् ॥ * ॥ दिवोदासाय सामगाय ते इत्येवमादि सर्वं संगृहीतं भवति ॥

इति काशिकायां वृत्तौ षष्ठाध्यायस्य द्वितीयः पादः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ द्वादशस्तबकावशेषः ॥

आशङ्काचकितचकोरकान्तिचोरैः
पश्यन्त्योऽक्षिभिरभितः परस्परास्यम् ।
किं बालाः कलयथ कर्कशान् वितर्कान्
श्रूयन्तां कलुषमुषोऽस्मदीयवाचः ॥ १४० ।

कलुषं व्रतवैगुण्यरूपं पापं मुष्णन्ति नाशयन्तीति ताः ॥ १४७ ॥

विनोदकं विनोदकं भवति किं पिपासायाः सायाह्नं च विना न भवति कोऽपि समयो निदाघवासरस्य रम्यस्तन्मदुपदेशो भवतीनां कार्यः ॥ १४८ ॥

उदकं जलं विना पिपासायास्तृष्णाया विनोदकं निरासकं किंचिदस्ति किं, नास्त्येव, यत्र पिपासा तत्रोदके प्रातिकूल्यमयुक्तमिव मयि स्पृहावतीनां भवतीनां व्रतिनीनां मद्रोधकृत्यानाचरणरूपं प्रातिकूल्यं मय्यनुचितमेवेति भावः ।

ननु कुलबालिकानां लज्जानिर्मूलनेनात्यन्तविडम्बनमेव सम्प्रति ते रोचकं, तत् कथं कर्तुं शक्यते, रोचकान्तरमुच्यतां यद्वयमनुतिष्ठेम, तत्राह, सायाह्नं विना निदाघवासरस्य कोऽपि समयोऽपराह्णादिर्न रम्यः, यथा तं विना कथमप्यूष्मा न निवर्तते तथैव भवतीनां प्रकटमेव सर्वाङ्गदर्शनं विना ममाग्रहो न निवर्तिष्यत एवेति भावः ॥ १४८ ॥

अंहःसंघक्षपणपणनो मह्यमेव प्रणामः
कल्याणानामपि जनयिता श्रद्धया कल्प्यमानः ।
ऊर्ध्वे मूर्ध्नामृजुतरतनूवल्लयो हन्त तस्मा-
दद्धा बद्धाञ्जलि विदधतां सुभ्रुवोऽस्मत्प्रणामम् ॥ १४९ ॥

एवं रहस्यं स्वचिकीर्षितमर्थमपदेशेनैव व्यञ्जनया बोधयित्वा प्रकटमप्यपराधरूपं मिषमालम्ब्य व्यवतिष्ठमान आह· अंह इति । अंहःसंघानां पापसमूहानां क्षपणमेव पणनं पणः फलं यस्य सः ।

किंच श्रद्धया कल्प्यमानः सन् कल्याणानां बहुतरमङ्गलस्वाभीष्टानामपि जनयिता· उत्पादको भवति । ततस्ताः पश्चात्प्रणामं विधित्सतीराशङ्क्य स्वाभीष्टाविरोधिनीं तत्परिपाटीं स्वयमभिमयेन शिक्षयन्नाह, मूर्ध्नां मस्तकानामूर्ध्वे सीमन्तप्रदेशे बद्धोऽञ्जलिर्यत्र तद्यथा स्यात् तथा· अस्मत्प्रणामं विदधतां कुर्वन्तु । सुभ्रुव इत्यस्य विशेष्यत्वात् प्रथमपुरुषः । तत्रापि कुञ्चिताङ्गत्वं संभाव्याह· ऋजुतरतनूवल्लय इति ॥ १४९ ॥

ततश्च ।

ह्रियं कृत्वा पश्चात् प्रियतमगिरोऽग्रे विदधती
स्वलावण्यं कृत्वा वसनमखिलाङ्गावरणकम् ।
ऋजूभूय स्थित्वा दरमुकुलिताक्षी करपुटीं
शिरोऽग्रे बिभ्राणा हरिणनयनाश्चैणिरनमत् ॥ १५० ॥

दरमुकुलिताक्षीति । हन्तास्माकमूरुमूलस्य कीदृशत्वं वा सत्वनेन दृष्टमभूदित्यालोकनार्थमतिलज्जयापि नेत्रयोः सम्यक्कूणाभावः ॥ १५० ॥

अथ यथानिदेशं विहिताचरणप्रपञ्चाः पञ्चालिका दारवीरिव नाट्यमाना नाट्यमानाशयः शयकुशेशयशयसकलवसनः स नम्रमुखीस्ताः प्रति प्रीतमना मनाग्विहसितसुधासुधावितावरः प्रत्येकमेव प्रणयरसोत्कटाक्षः कटाक्षकलया निरीक्ष्य निजगाद ॥ १५१ ॥

दारवीः काष्ठमयीः पञ्चालिकाः पुत्तलिका इव नाट्यमाना नृत्यं कार्यमाणाः । स कीदृशः, नाट्ये नर्तनायां मानो ज्ञानं यस्य तथाभूत आशयोऽन्तःकरणं यस्य सः, नर्तयितुं विचक्षणधीरित्यर्थः । शयः पाणिरेव कुशेशयं कमलं तत्र शेरत इति शयकुशेशयशयानि सकलवसनानि यस्य तथाभूतः, वस्त्राणि दातुं स्कन्धतो हस्ते दधान इत्यर्थः,"पञ्चशाखः शयः पाणि"रित्यमरः । प्रणयरसेनोत्कटमक्षमन्तःकरणं यस्य सः, प्रेमार्द्रचित्त इत्यर्थः ॥ १५१ ॥

प्रीतोऽहं वः साधुनाधुना निर्व्यलीकेन केनचिद्भावेन भावेन तद्गृह्णीयतां करकमलं नीयतां करकमलंकर्तुमुचितरागं वसनकुलं परिधीयतामुपरि धीयतामुचितचित्तपरितोषाणां मनोवृत्तिः ॥ १५२ ॥

भां शोभाम् अवति पुष्णातीति भावस्तेन । वसनकुलं नीयतां ततश्च परिधीयताम् । कथंभूतं, करकं दाडिमपुष्पमपि अलंकर्तुमुचितो राग आरुण्यं यस्य तत्, "समौ करकदाडिमा"वित्यमरः । उचितानां योग्यानां चित्तपरितोषाणां समूहानन्दानाम् उपरि मनोवृत्तिर्धीयताम् अर्प्यतां, निजभावोचितसुखसिन्धुमग्नचेतसो भवत इत्यर्थः ॥ १५२ ॥

Digitized by Google

इति निगद्य तथा समुन्नीतकरकमलाभ्यः कमलाभ्यधिकसौभगाभ्यो निजकरकमलेन प्रतिजनं तथा समीचीनानि चीनानि समर्पयामास यथा यथास्वमेव तदा तदापुर्ने खलु विपर्ययः पर्ययते स्म ॥ १५३ ॥

चीनानि वस्त्राणि तथा तेन प्रकारेण समर्पयामास यथा यथास्वं निजनिजमेव तद् वसनं प्रापुः प्राप्तवत्यः, विपर्ययः परि सर्वतोभावेन न·ययते स्म न प्राप्तोऽभूत् किंत्वेकांशेनैव, तत्र प्रथमं कञ्चुलिकां दत्त्वा तामेव ससंभ्रममन्तरीयतया परिहितवतीभ्योऽन्तरीयं शाटिकां च ददाविति भावः ॥ १५३ ॥

ततश्च ताः स्वं स्वं ललितांशुकमंशुकमङ्गलतामङ्गलतायां मूर्तिमत्यामिव संगमय्य मदनपताकिनीपताकिनीरजिनीराजय इव जयन्ति स्म ॥ १५४ ॥

ललिता अंशवः किरणा यस्य तद्· अंशुकं वस्त्रम्· अङ्गमेव लता सैव मङ्गलता मूर्तिमती तस्यां संगमय्य योजयित्वा जयन्ति स्म सर्वोत्कर्षं प्रापुः । मदनस्य कन्दर्पस्य पताकिनी सौभाग्यवती तत्प्रिया रतिस्तस्याः क्रीडार्थं पताकिन्यः पताकाधारिण्यः कमलिनीश्रेणय इव, "पताका वैजयन्त्यां च सौभाग्याङ्कध्वजेऽपि चे"ति विश्वः ॥ १५४ ॥

अथ श्रीकृष्णकरकमलपरिमलपरिपूर्णामोदानि पूर्णामोदा निवीय वसनानि सना निर्मलानि सादरदरमन्दानमन्दाततापविलोकनकनत्कनककमलाननास्तदङ्गसङ्गसद्भावभाविता इव पुलककुलकञ्चुकिततनवो नवोन्मीलदानन्दनिस्यन्दनिःस्पर्शपरिष्वङ्गमङ्गलमिवानुभवन्त्यः क्षणमवतस्थिरे स्थिरेण प्रणयभरेण ॥ १५५ ॥

पूर्णामोदाः पूर्णानन्दवत्यः । निवीय परिधाय । सना सदा निर्मलानि, "सना नित्ये" इत्यमरः । सादरं यथा स्यात् तथा दरमन्दानेण· ईषल्लज्जया मन्दम्· आततम्· ईषत् ततं यद्· अपविलोकनं संमुखदर्शनं

तेन कनत्· शोभमानं कनककमलतुल्यमाननं यासां ताः । तदङ्गसङ्गिवसनसङ्गादेव तदङ्गसङ्गस्य सद्भावेनेव भाविता वासिता इव । नवोन्मीलद्विरानन्दैर्निःस्पन्दः स्पन्दरहितो निःस्पर्शः स्पर्शविनाभूत एव परिष्वङ्गस्तद्रूपं मङ्गलम् ॥ १५५ ॥

स च न जुगोप गोपराजयुवराजो गाम्भीर्यं यदतः परं परमकोमलतामलताधौतहृदयः सदयः समुवाच ॥ १५६ ॥

परमकोमलतया या· अमलता नैर्मल्यं तया क्षालितमनाः ॥ १५६ ॥

अयं वः संकल्पः प्रथम इव कल्पद्रुमितिरुहः
प्ररोहः प्रागेव व्यजनि मम चित्तस्य विषयः ।
इदानीं तद्वृक्षे व्यरचि विविधेयं विरचना
परीक्षा च प्रेम्णो व्यतनि भवतीनां निरुपधेः ॥ १५७ ॥

कल्पक्षितिरुह इति, मदभीष्टस्यापि साधकत्वात्· मच्चित्तविषयः प्रागेव व्यजनि· अभूत् । इयं विरचना विविधहठनिदेशमयी । निरुपधेरुपाधिशून्यस्य ॥ १५७ ॥

यन्मदभिहितमभि हितमकारि हृदयं न क्वापि वामता मतासीद्वस्तदयं वो मनोरथः साधु नाधुनातनत्वमेति वासनासनातनत्वेन सह पूर्वपूर्वसिद्ध एव तदयं नित्यः सत्यः सरसश्च ॥ १५८ ॥

हृदयम्· अभि मन्मनोऽभिलक्षीकृत्य मदभिहितं हितमकारि, वो युष्माकं वामतापि· अमता· असंमता· अभूत्, तत एव हेतोरसौ मनोरथः साधु यथा स्यात् तथा· अधुनातनत्वं न प्राप्नोति, किंतु नित्यसिद्धत्वमेवेत्यर्थः । अयं मनोरथः सत्यो निष्कैतवः सरसः प्रेममयः ॥ १५८ ॥

साधारण्येन ममायं स्वभावः ।

तथाहि ।

* अकारीत्यन्तस्य वाक्यस्य स्थाने मदभिहितं मदुक्तं यदकारि, हृदयं च·अभि सर्वतोभावेन हितमकारीति पाठान्तरम् ।

स्थवीयस्यानन्दे मयि विनिहितं धौतहृदये-
र्न रागं रागत्वाश्रयमयि करोमि क्षणमपि ।
परंतु स्वानन्दामृतमयतया तं प्रविदधे
नहि स्वच्छन्दोजा भवति रसकूपोऽन्यरसभाक् ॥ १५६ ॥

स्थवीयसि परममहति· आनन्दे तत्स्वरूपे रागं स्पृहां काममिति यावत्, तं रागं स्वानन्दामृतमयतया मत्सुखामृततात्पर्यत्वेन विदधे करोमि,आश्रयसुखतात्पर्यकत्वेन काममयोऽपि रागो मयि निक्षिप्तश्चे-न्मल्लवणविषयसुखतात्पर्यकत्वेन प्रेममयतयैव फलतीत्यर्थः । स्वच्छन्दो-जाः स्वतन्त्रप्रभावो रसस्य पारदस्य कूपः· अन्यं रसं न भजत इति, यो-ऽन्यो रसस्तत्र निक्षिप्तो भवति स स्वरूपं विहाय तत्स्वरूपतां प्राप्नोति लवणाकरवदित्यर्थः ॥ १५९ ॥

भवतीनां तु स्वभावसिद्धानामद्धा नाम स्वभावोऽयं भावो यं श्रीरपि प्रार्थयते सामान्यानामपि मयि परमे रससिन्धौ कामाद्या नाङ्कुरायन्ते न क्वथिता नच भृष्टा यवादयो हन्त बीजन्ति ॥ १६० ॥

अद्धा साक्षात् । नाम प्राकाश्ये । भावः· दीप्तिधारी । यं स्वभावम् । बीजन्ति बीजानीवाचरन्ति ॥ १६० ॥

इति सरसतरतरलतालताकुसुममिव परिमलमलनमनोहरं प्रिय-तमवचनामृतमृतमेव मन्यमाना मानातीतहर्षोत्कर्षोत्कममनसो मन-सो द्रुतस्येव शीकरनिर्गममिवानन्दाश्रुकणनिस्यन्दमभिनयन्त्यो निरु-त्तरमेव किंचिदाकुञ्चितेक्षणं क्षणं तस्थुः ॥ १६१ ॥

सरसतरा या तरलता प्रेमार्द्रतया गाम्भीर्याभावः सैव लता तस्याः कुसुमम्· अङ्कुराङ्कुररूपफलकारणत्वात् । परिमलः कर्णरोचकत्वं तस्य मलनेन धारणेन मनोहरम् । ऋतं सत्यम् ॥ १६१ ॥

तदनुत्तमप्रणयकलाकलालापकण्ठीः कलकण्ठीरिव शिशिरसम-

यावसानसानन्दतया कण्ठगुम्फितकूजिता जितारिरथ पुनराललाप ॥ १६२ ॥

अनुत्तमप्रणयकलया कलं मधुरास्फुटमालपतीति स कण्ठो यासां ताः, कलकण्ठीः कोकिलस्त्रीः, कण्ठे गुम्फितं कूजितं याभिस्ताः, तेन· अयि वचनं किंस्विदाकर्णयसि किंचित् प्रत्युत्तरमयि देहि· अयि नाहमत्र प्रभवामि त्वमुत्कण्ठसे चेत् त्वमेव निःसंदेहं पृच्छेत्यादि तासां नीचैः परस्परसंकथनमपि संज्ञाबहुलं समभूदिति व्यञ्जितम् । जितारिः श्रीकृष्णः ॥ १६२ ॥

अयि व्रजत व्रजतलमागामिनीः क्षणदाः क्षणदाः समया मया सह रन्तव्यं सिद्धा एव भवत्यः स्तोभवत्यः स्तोकमपि मा भवन्तु· इति लब्धाश्वासाः श्वासानिलधूताधरकिसलयं सलयं दलदिन्दीवरवरवर्षणमिव कटाक्षापातपातपरंपरां तदुपरि परिकल्प्य कृच्छ्रेणेव व्रजं व्रजन्ति स्म ॥ १६३ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे वस्त्राहरणं नाम द्वादशः स्तबकः ॥ १२ ॥ :: ::

समया निकट एव, सलयं सश्लेषं, कटाक्षाणामापातपातस्तत्कालपातनं तस्य परंपराम्, "आपातस्तदात्वे पतनेऽपि चे"ति विश्वः ॥ १६३ ॥
इत्यानन्दवृन्दावनटीकायां सुखवर्तन्यां द्वादशस्तबकसंगमनम् ॥ १२ ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ त्रयोदशस्तबकारम्भः ॥

अथ भगवाननु गवाननुसंधानं क्षपितबहुकालोऽकालोपनतं किमपि मधुररसकोमलतालताफलमिवान्तरान्तरास्वाद्य पुनर्गोचारणकुतूहलिना हलिना सह सहजलीलालीलावण्यभाजां सहचराणामपि

सङ्गसंगत्वरत्वरतया सादरेण सोदरेण सोत्कर्षमानन्दितेन नन्दितः सहचरैरपि चाभिनन्दितो वनमध्यमवजगाहे ॥ १ ॥

चक्रे भक्तार्थनां भक्तार्थनां विच्छेद चाच्युतः ।
त्रयोदशे व्यधात् सायं प्रमदाः प्रमदाकुलाः ॥

गवाननुसंधानं गवामनुसंधानाभावम्· अनु लक्षीकृत्य क्षपितबहुकालः, वस्त्रहरणादिलीलावेशेन गोचारणमपि विस्मृत्य यापितबहुतण इत्यर्थः । अकाले· असमये संगवपूर्वाह्णद्वावपि· उपनतं मिलितम् । सहचराणां सङ्गे संगत्वरी संगमशीला त्वरा यस्य ततया· आनन्दितेन सोदरेण भ्रात्रा बलदेवेन नन्दितः ॥ १ ॥

अवगाह्य च सरसमधुरं मधुरञ्जिना वचसा च सादरं सोदरं सोऽयं वयस्यविशेषान् वयस्यविशेषानपि संबोधयति स्म ॥ २ ॥

सोदरं बलदेवं, सोऽयं श्रीकृष्णः, वयस्यविशेषान् सखिभेदान् । कीदृशान्, वयसि विशेषमप्राप्तान्, तुल्यवयस्कानित्यर्थः ॥ २ ॥

तत्रभवन् भवन्नार्यं रभसास्तोक स्तोककृष्ण· अये· उरुचिरांशो रुचिरांशो हन्त सकलसौभगश्रीदामन् श्रीदामन्· अयि प्रणयवसुबल सुबल भोः प्रेमयशोनिवहेऽर्जुन हेऽर्जुन हंहो प्रणयविशाल विशाल हन्त श्रीमन्नोजस्विन्नोजस्विन्· अङ्ग प्रणयगिरिदेवप्रस्थ देवप्रस्थ हन्त भो मनोरथरथवरूथप वरूथप दृश्यतां दृश्यतां गतेयं विपिनश्रीः ॥ ३ ॥

रभसे हर्षे· अस्तोक· अनल्प । उरवः प्रवीणाश्चिरं व्याप्य· अंशवः किरणाः केलियुद्धादौ यस्य हे तथाभूत, रुचिर सुन्दर, अंशो इति विशेष्यपदम् । सकलसौभगमेव श्रीयुक्तं दाम माला यस्य हे तादृश । प्रणय एव वसु धनं तेनैव बलत इति हे तथाभूत । प्रेमयशसां निवहे समूहे· अर्जुन हे शुक्लवर्ण, आतामधरामृत इतिवत् तव प्रेमयशः-समूहः शुक्लवर्ण इत्यर्थः, "वलक्षो धवलोऽर्जुन" इत्यमरः । अङ्गेति संबोधने । प्रणय एव गिरिदेवः पर्वतमुख्यः· तस्य प्रस्थरूप, "प्रस्थः

सानुरस्त्रिया" वित्यमरः । मनोरथ एव रथस्तस्य वरूथं कवचं पातीति तथा, "वरूथो रथगुप्तौ स्याद्वरूथं वर्मवेश्मनो"रिति विश्वः ॥ ३ ॥

यत्र द्रुमा विद्रुमाविशिष्टकिसलयाः सलया इव ॥ ४ ॥

विद्रुमैः प्रवालैरविशिष्टानि किसलयानि येषां ते, सलया इव परस्पराश्लेषवन्त इव, यद्वा पत्रचापल्यभ्रमरझङ्कारकोकिलरावैश्च नृत्यगीतवाद्यगततालधारिण इव, "लयो विनाशे संश्लेषे साम्ये तौर्यत्रिकस्य चे"ति विश्वः ॥ ४ ॥

येषां च सर्वापत्राणि पत्राणि, परितः संपरिवृताशाखाः शाखाः, विविधविहगविटपा विटपाः, वशीकृतसुमनसः सुमनसः, परुषापरुषापरुषाणि गुम्फलानि फलानि ॥ ५ ॥

सर्वापद्भ्यस्त्रायन्त इति "मूलविभुजादित्वात् कः" । सम्यक् परिवृता आशा दिशः क्षमाकाशं च याभिस्ताः । विविधा विहगाः पक्षिण एव विटाः षिङ्गास्तानपि पान्तीति तथा । सुमनसो देवाः । सुमनसः पुष्पाणि । परुषापरुषेति वीप्सा, प्रतिपर्वेत्यर्थः, "ग्रन्थिर्ना पर्वपरुषी" इत्यमरः, अपरुषाणि· अरूक्षाणि । गुम्फो ग्रन्थनं तं लान्तीति तानि ॥ ५ ॥

तिष्ठतु तावदेषां वृन्दावनतरूणां रामणीयकं सुरसामान्यानां सामान्यानां च तरूणां जन्म परमसाधीयः ॥ ६ ॥

शोभने रसैरा सम्यक्· मान्यानां माननीयानाम् ॥ ६ ॥

यतः पत्त्रैरेव शराः परसुखदा भवन्ति, सुमनोभिरेव साधवः, फलैरेव पुण्यकर्माणि, त्वग्भिरेव शार्दूलाः, समिद्भिरेव क्षत्रियाः, भस्मीभावेनेव पारदाः, तरवस्तु पत्त्रसुमनःफलत्वक्समिद्भस्मभिरेव, तत् खलु तरुजन्म सकलप्राणिसार्थसार्थकम् ॥ ७ ॥

पत्रैः पत्रैः शरा बाणाः परसुखदाः शत्रुसुखखण्डकाः । परसुखदा भवन्तीति सर्वत्रान्वेति, कर्माणीत्यत्र तु लिङ्गविपरिणामेनैव । परेषां सुखदायिनो भवन्तीति तत्र तत्रार्थः । सुमनोभिः शोभनैश्चित्तैः । फलैः

स्वर्गाद्यैः । स्वग्भिः स्वधर्मभिः । समिद्धिः साधुजनपालनार्थं युद्धैः । प्राणि-सार्थे प्राणिसमूहे विषये सार्थकं सप्रयोजनकं, किंतु याज्ञिकब्राह्मणजन्मैव निष्प्रयोजनमित्यचेतनलीलामभिप्रेत्य सूचना । वृथा अचेतनाः, विप्रा मद-ज्ञानादचेतनाः, किन्त्वेषां श्लाघयाकाङ्क्षे, धिक् तानेवेति सूचितम् ॥ ७ ॥

इत्यनुपममनोहरं निगदन्ननुगश्रीनोऽनुगश्रीनो धेनुगणावनवनलीलालसो लालसो वयस्यानां हेतो रुदन्यादन्यादकृतालसस्य सस्यदगतिहीनं गवां गणं मिहिरदुहितृरोधोऽरोधोदयं प्रापिपयिषुः पिपयिषुश्च परमां प्रीतिमन्तरेण चितिजन्मनामन्तरेण चितिजन्म नालोक्यभावैर्वयस्यैर्वयस्यैकरूप्यं मतेः सह सहसहसाग्रजोऽग्रजोषमुपससर्प ॥ ८ ॥

अनुगानां श्रीः कान्तिरिच्छा तस्या इनः प्रभुः । धेनुगणस्यावनं यत्र तथाभूतायां वनलीलायां रसो यस्य सः । उदन्यां पिपासां ददातीति स चासौ न्यादो नितरामदनं च तेन कृतस्य अलसस्य हेतोः सस्यदया सवेगया मत्या हीनं गवां गणं मिहिरदुहितुर्यमुनाया रोधः पुलिनं प्रापिपयिषुः प्रापयितुमिच्छुः । कीदृशं न रोधस्यावरणस्य उदयो यत्र तत् पिपयिषुर्जिगमिषुः, "पय गतौ" । चितिजन्मनां तरूणामन्तरेण मध्येन पथा, अन्तरेणेति तृतीयान्तम् । वयस्यैः सह । कीदृशैः, चितिर्जन्म चितौ प्रादुर्भावमन्तरेण विना नालोक्यो न आलोकयितुं शक्यो भावः स्वरूपं येषां तैः, अन्तरेणेत्यव्ययम् । ऐकरूप्यं तुल्याकारत्वम् । अग्रोऽधिको जोषः प्रीतिर्यत्र तद्यथा स्यात् तथा उपससर्प ॥ ८ ॥

स सर्पराजदमनो मनोज्ञचरितस्तरणितनयातटीगाः गाः पाययामास ॥ ६ ॥

ततः स कृष्णः सर्पराजस्य दमनः । तरणितनयायास्तटीं गच्छन्तीति ताः गा धेनूः ॥ ९ ॥

पयः पिबन्तीषु नैचिकीषु चिक्रीडुरपदवीदवीयसीनां विप्रभार्याणां

विप्रभार्याणां मनोरागं रागं तद्दूमूलमालम्ब्य कृतविश्रामः स उच्चैः शुशुभे ॥ १० ॥

विप्रभार्याणां रागं प्रेम चिकीर्षुर्ज्ञातुमिच्छुः, "ज्ञा ज्ञाने" । कथंभूतं, मनोरागं मनो लगयति लग्नं करोतीति तथा तम् । पद्व्या वर्त्मनो दवीयस्यो दूरतरा न तथाभूतानां, निकटवर्तिनीनामित्यर्थः । विशिष्टया प्रभया॰ आर्याणाम् ॥ १० ॥

शुभे तस्मिन् समये धेन्ववनविहारवनविहारक्रान्ताः प्रातरकृताहारा नीहारानीतम्लानिकमलवदनाः सर्वे एव सखायः समसशनायया नाययामासिरे म्लानिं यदि ॥ ११ ॥

नीहारेण हिमेन॰ आनीता ग्लानिर्यस्य तादृशकमलतुल्यवदनाः, अशनायया बुभुक्षया म्लानिं नाययामासिरे॰ आत्मनः प्रति प्रापयांबभूवुः ॥ ११ ॥

तदामी तद्दामीलन्मोदा इव श्रीरामदामोदरयोर्मद्दामोदरयोः सोदरयोर्द्रुतमभ्यासमभ्यासन्नाः सकातरतया जगदुः ॥ १२ ॥

तदामी तयैव बुभुक्षया हेतुना॰ आ सम्यक् प्रकारेण मीलन्मोदा इव॰ अनुद्गच्छदानन्दा इव । मदस्य कस्तूर्या आमोदं सौगन्ध्यं रातः॰ गृह्णीत इति तयोः । अभ्यासं निकटम् ॥ १२ ॥

जगदुनमतममहोऽभिराम राम महाबाहो नवाम्बुवाहकृष्ण कृष्ण महाभुज भुजगविषवदतिकरालया बुभुक्षयाक्षया जठरपिठरपिपीडयिषा नो व्यतनि ॥ १३ ॥

नवाम्बुवाह इव कृष्ण श्यामवर्ण । अक्षया क्षयरहिता, जठरमेव पिठरः स्थाली तस्य पिपीडयिषा पीडनेच्छा बुभुक्षया कर्त्र्या व्यतनि व्यस्तारि ॥ १३ ॥

तनिमानमपि नोपलभामहे निर्वृतेः, तदुपशमनमननमनुविधीयतां तत्रभवद्भ्यां भवद्भ्याम् ॥ १४ ॥

Digitized by Google

तनिमानमल्पत्वम् ॥ १४ ॥

इति कुन्दसुभगदत्सु गदत्सु कोमलमना मनाक् स्मितं विधाय समुपदिदेश देशकालोचितं चितं प्रणयेन ॥ १५ ॥

प्रणयेन चितं व्याप्तं पुञ्जीभूतं यथा स्यात् तथा ॥ १५ ॥

भो भो यद्येवं बुद्धाधामनुभवन्तो भवन्तो विमनायन्ते तदा तदाबाधाप्रशमनाय शमनायस्तं यदुच्यते तदाकलयन्तु ॥ १६ ॥

शं सुखम्, अनायस्तमायासशून्यम् ॥ १६ ॥

इत एत्राविदूरे दूरेक्षिणो महान्त उर्वीगीर्वाणा निर्वाणानिर्वचनीयश्रद्धालवोऽलवोद्दित्वरप्रभावा भावाधिक्येन सप्तमाङ्गिरसं नाम रसं नाम मूर्तिमन्तमन्तमिवारब्धवन्तः संततततबहुजनभोजनभोज्ज्वलयशसः शसनविमुखा ज्ञानदशमिनोऽज्ञानदशमिनो भवन्ति द्वितीयाश्रमिणः श्रमिणः ॥ १७ ॥

दूरेक्षिणो दूरदर्शिनः, निर्वाणैर्मुनिभिरप्यनिर्वचनीया या श्रद्धा तद्वन्तः, "तदन्तविधित्वाभ्युपगमाद्दालुच्," "निर्वाणो मुनिवह्न्यादा" वित्यमरः, अलवोऽनल्प उद्दित्वरः प्रभावो येषां ते, संततमेव ततं विस्तृतं यद्बहुजनानां भोजनं तस्य भा शोभा तयैव· उज्ज्वलानि यशांसि येषां ते, शसनं हिंसा तद्विमुखाः, इत्यभोज्यावचना निरस्ता, ज्ञानदशमिनो ज्ञानवृद्धाः, "वर्षीयान् दशमी ज्यायानि" त्यमरः, अज्ञानं द्यन्ति खण्डयन्तीत्यज्ञानदाश्च ते शमिनः शान्ताश्चेति ते, तथापि द्वितीयाश्रमिणो गृहस्थाः, श्रमिणो वैदिकक्रियाश्रमपराः ॥ १७ ॥

तानुपगम्य प्रणम्य प्रणयसाध्वसभक्तिपुरःसरं जनं जनमामन्त्र्य महामहिमवर्याणामार्याणामाह्वयं मम च गृहीत्वा हीत्वा नातिनिकटं प्रकटं प्रश्रयेण भक्त्यार्थि याचध्वम् ॥ १८ ॥

हीत्वा हि निश्चितम्· इत्वा गत्वा ॥ १८ ॥

या च ध्वंसकरी याञ्चा या न सा त्रपा च पालनीया निरपत्रपा हि स्वार्थसाधका भवन्ति ॥ १६ ॥

ध्वंसकरी नाशकर्त्री, त्रपा लज्जा सा, अत्र त्रिप्रयुह्ये ॥ १९ ॥

इति भगवतादिष्टा दिष्टातीताः प्रमुदितहृदया हृदयालवस्तन्मार्गमार्गणनिपुणाः कियद्दूरमुपव्रज्य व्रज्यजातालस्या लालस्यालाघवसत्वराश्च पुरः पुरश्च तेषां ददृशुराभीरदारकाः ॥ २० ॥

दिष्टातीताः शुभाशुभकर्मशून्याः, नित्यसिद्धा अपीत्यर्थः । मार्गणमन्वेषणम् । व्रज्ये गन्तव्ये जातालस्याः, अतः परं श्रमाद्गन्तुमलसा अभवन्नित्यर्थः । तदपि लालस्यं लालसा तस्य अलाघवेन अनल्पत्वेन हेतुना सत्वराश्च गमने त्वरावन्तश्च । पुरः अग्रे, पुरः पुराणि तेषां विप्राणां ददृशुः ॥ २० ॥

ततश्च प्राज्यप्राज्यगन्धिधूमध्वजधूमध्वजनिवहेन नयनानन्ददं तत्सौरभरभसेन घ्राणतर्पणं प्रकटतरतद्गन्धसमीरसमीरणस्पर्शामोदेन त्वगामोदकं साम विकस्वरस्वरमावहता गानेन श्रवणरसायनम् आशोभिष्यमाणशोभिष्यमाणभक्ष्यलिप्सया रसनारसनायकमित्येवमनेकेन्द्रियप्रियं यज्ञवाटं प्रविविशुः ॥ २१ ॥

यज्ञवाटं यज्ञस्थानं प्रविविशुः । कीदृशं, प्राज्यं प्रचुरं यत् प्राज्यं प्रकृष्टमाज्यं तद्गन्धिनस्तद्गन्धवतो धूमध्वजस्य यज्ञवह्नेर्धूमा एव ध्वजास्तेषां निवहेन । आशाम् उभिष्यमाणां पूरयिष्यमाणां च तत् कृष्णसभां प्राप्य शोभिष्यमाणां चेति, "उभ उम्भ पूरणे", तथाभूतं यद्भक्ष्यं तस्य लिप्सया प्राप्तीच्छया रसनायै जिह्वायै रसनायकं रसप्रापकं, प्राप्तेः पूर्वमपि स्वाददायकमित्यर्थः । अनेकेन्द्रियप्रियम् उक्तप्रकारेण नयनादिपञ्चेन्द्रियसुखदम् ॥ २१ ॥

प्रविश्य च रघुनायकमिव चेतायतारं कोशलापुरमिव विसरयूपारं भगीरथमिव समुन्नीतप्राग्वंशम् असमाप्तब्रह्मचर्य विप्रदारकमिव समेखलकुण्डलांसम् ॥ २२ ॥

प्रविश्य यज्ञागारं ददृशुः । त्रेतायां युगेऽवतारो यस्य तं, पक्षे त्रेताया अग्नित्रयस्यावतरणं संनिधानं यत्र तं, "दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः । अग्नित्रयमिदं त्रेते"त्यमरः । विशिष्टायाः संख्याः पारं पारवर्ति, पक्षे यूपान् इयर्ति प्राप्नुवन्तीति "कर्मण्यण्" यूपाराः, विसराः समूहाः यूपारा यूपसंबन्धिनो यत्र तं, यूपसमूहयुक्तमित्यर्थः । समुचीताः समुद्धृताः प्राग्वंशाः पूर्वपुरुषा येन तं, पक्षे समुच्चीकृतः प्राग्वंशो हविर्गृहप्राग्वर्ति यजमानगृहं यत्र तं, "प्राग्वंशः प्राग्घविर्गृहा"दित्यमरः । समेखलं मेखलासहितकुण्डलं मौञ्जीरज्जुरंसे स्कन्धे यस्य तं, "कुण्डलं कर्णभूषायां पाशेऽपि वलयेऽपि चे"ति मेदिनी, पक्षे मेखलासमेतं कुण्डं रान्ति गृह्णन्ति अंसा भागाः प्रदेशा यत्र तम् ॥ २२ ॥

रसिकजनहृदयमिव प्रविष्टरसं पूर्णनिमन्त्रणार्थपाकस्थलमिव प्राज्यस्थालीकं विरहिणीजननयनयुगलमिव सदाश्रवासं वर्षानदनदीकदम्बमिव विशालपूर्णपात्रम् ॥ २३ ॥

प्रविष्टो रसो यत्र तत्, पूर्णमन्यूनं, पक्षे प्रकृष्टेन विष्टरेण दर्भमुष्ट्या संपूर्णम् । प्राज्याः प्रचुराः स्थाल्यो भोजनपात्राणि यत्र तत्, पक्षे प्रकृष्टमाज्यं च स्थाली च कं च यत्र तम् । सदा अश्रूणां वासो यत्र तत्, पक्षे सदा श्रवाणाम् आसो ग्रहणं दीप्तिर्वा यत्र तम्, "अस गतिदीप्त्यादानेषु" । विशालं विस्तृतं पूर्णं भरितं च पात्रं नदीमध्यभागः स्थाल्यादिकं च यत्र तं, "पात्रं तदन्तर"मित्यमरः ॥ २३ ।

दुरीश्वरसद इव साधुमृदुलूखलमुषलं क्षत्रियकुलमिव समित्कुशलं महेशमिव सहोमं यज्ञागारम् ॥ २४ ॥

दुरीश्वरसदः दुष्टराजसभा । साधूनां मृदूनां च या लूश्छिदा तस्यां विषयभूतायां खला एव मुषलरूपा यत्र तत्, पक्षे साधु यथा स्यात् तथा मृद्गातीति साधुमृत् उलूखलमुषलं यत्र तम् । समित्कुशलं युद्धनिपुणं, पक्षे समिधः काष्ठानि कुशांश्च लाति गृह्णातीति तम् । सहोमम् उमासहितं, होमसहितं च ॥ २४ ॥

उपायचतुष्कमिव सामप्रधानं विलासिवक्षःस्थलमिव पदकक्रमकं मुनिकदम्बकमिव सुजटं तरुणीस्तनयुगलमिव सुसंहितं गानं दधानैरी-श्वरवरोपासकैरिव समयासमयज्ञैः कोदण्डैरिव प्रधनेज्याशीलैः समाकीर्णं ददृशुः ॥ २५ ॥

यज्ञागारं पुनः कथंभूतं, गानं दधानैः प्रधनेज्याशीलैः समाकीर्णम् । गानं विशिनष्टि· उपायेत्यादिचतुर्भिः । "भेदो दण्डः साम दानमित्युपायचतुष्टय"मित्यमरः, साम प्रीतिर्वेदविशेषश्च । पदकस्य निष्कस्य क्रमेण परिपाट्या कं सुखं यत्र तत्, पक्षे पदानां सुप्तिङन्तानां केन सुखेनैव क्रमो यत्र तत् । शोभना जटा लग्नकचः स्वरादिसंमेलनं च यत्र तत् "जट झट संघाते"सुसंहितं शोभनसंधियुक्तं, पक्षे शोभना संहिता यत्र तत् । समयमसमयं च जानन्तीति तैः, पक्षे समयेषु प्रातर्मध्याह्नादिषु· असमा यज्ञा येषां तैः । प्रधने संग्रामे ज्यां गुणं शीलयन्ति धारयन्तीति तैः, पक्षे प्रकृष्टधनाश्च ते· इज्याशीला याज्ञिकाश्चेति तैः, एतदेव विशेष्यपदम्, "इज्याशीलो यायजूक" इत्यमरः ॥ २५ ॥

दृष्ट्वा च निःसाध्वसमेव शनैः शनैः पुरत उपगम्य त उपगम्यमानहोमधूमधूनिसुरभिपवनतर्पितनासा नासादिततृप्रयोऽनुधरणि रणितवलयनूपुरं पुरंदराद्यादरणीया अपि दण्डवन्निपत्य बद्धाञ्जलयो जलयोगगम्भीरस्वरं स्वरङ्गनसंचारिण ऋषीनिव तपोमहसा महसारानिव मूर्तानिव जातवेदसो वेदसोदरतयादरतया यथार्थानुभवानिव मूर्तिमतो मूर्तिमतो भूमिदेवानामन्त्र्य निवेदयामासुः ॥ २६ ॥

ते· आभीरदारका दण्डवन्निपत्य भूमिदेवानामन्त्र्य निवेदयामासुः । उपगम्यमानस्य· उपलभ्यमानस्य होमधूमस्य धूनिः कम्पनं यतस्तथाभूतेन सुरभिणा पवनेन तर्पिता नासा येषां ते । जलयोगो मेघस्तस्येव गम्भीरः स्वरो यत्र तद्यथा स्यात् तथा । महसारानिव· उत्सवमुख्यानिव । जातवेदसो वह्नीन् । वेदस्य सोदरतया, वेदविप्रयोस्तुल्यस्थानोद्भवत्वात् ।

Digitized by Google

अदूरतया· अनल्पतया। यथार्थानुभवान् मूर्तिमत इव,यथार्थानुभवाति-शयवत इत्यर्थः। मूर्तिमतः कठोरतायुक्तान्, "मूर्तिः काठिन्यकाययो"-रित्यमरः ॥ २६ ॥

भो भो आर्यास्तत्रभवन्तो विदां कुर्वन्तु श्रीरामदामोदरयोः स-खायो वयमतिथयस्तिथय इव प्रतिपदाद्या उभयपक्षसमसंख्याः ॥ २० ॥

समसंख्यास्तुल्यसंख्याः, पक्षे सम्यगसंख्या इति बहुतरावदित्सां प्रवर्तयन्ति ॥ २७ ॥

तत्र तेन हि सकलगुणाभिरामेण रामेण समानमानससारेण सा-रेण रत्नसानुजेन वयमिह शुभवत्सु भवत्सु प्रहिताः ॥ २८ ॥

सकलगुणैरभिरामेण रामेण वयं प्रहिताः प्रेषिताः। ननु स एव किमिति नागतस्तत्राहुः, रत्नसानुः सुमेरुस्तज्जेन तद्भवेन सारेण स्थैर्येण समानो मानससारो धैर्यं यस्य तेन, इति तद्गुणोद्गारेण दातुः श्रद्धामुत्पा-दयन्ति ॥ २८ ॥

प्रहिता हि भवन्तः कृपाकूपाराः कूपारामादिपुण्यकर्माणो भो जनमात्रप्रिया भोजनमात्रप्रियान् प्राणिनः प्रीणयन्ति प्रायशो यशो-ऽवदाता दातारो ब्रह्मनिष्ठाः ॥ २६ ॥

प्रहिताः प्रकृष्टहिताः। कृपाया अकूपाराः समुद्राः। भो इति संबोधने। जनमात्रस्यैव प्रियाः। भोजनमदनम् ॥ २९ ॥

अद्य प्रातरकृताहारतयानारतया नानाविहारकलया च क्षुधितौ परिश्रान्तौ च तौ श्रीरामदामोदरौ क्षामोदरौ क्षान्त्वा क्षणमथान्नका-ङ्क्षिणौ भवतोऽवतो गार्हमेध्यमेध्यमन्नं क्षुदुपशमनार्थमन्नमयाचेतां तयोः सहसहचरगणयोः समुचितं समादरेणान्नं दातुमर्हन्ति ॥ ३० ॥

अनारतया· अविश्रामया नानाविहारकलया। क्षणं क्षान्त्वेति रत्नसानुजेन सारेणेत्युक्तप्रकारेणातिधृतिमतोरपि तयोः क्षुधया धृतिच्युतिं श्रावयित्वा दयां जनयन्ति। भवतो युष्मान्· अयाचेताम्। कीदृशान्,

Digitized by Google

गार्हमेध्यं गार्हस्थ्यमेव मेध्यं पवित्रं व्रतम्· अवतः पालयतः । परमादरेण चितं समूढम् ॥ ३० ॥

इति निवेदितवत्सु तेषु सवितानयज्ञानयज्ञा अपि बालवाक्तया वा लवाक्तया वा मूढतयागूढतया गूहितया भगवत्कृपया रहिततयाहिततया वा निरस्ततथाविधसुकृततया वा तत्र कृतानादरा नादराहित्येन मूका इव दारुणतावधिरा वधिरा इव भद्रमभद्रमथवा यदि न किंचिदूचिरे चिरेणापि ॥ ३१ ॥

वितानं विस्तारं यान्तीति तथाभूतैर्ज्ञानयज्ञैः सहिता अपि, यद्वा सवितानस्य यज्ञस्य याचकानादरेण योऽनयस्तज्ज्ञा अपि । बालवाक्तया बालवचनत्वेन हेतुना· अप्रामाण्यात् तत्र निवेदने कृतोऽनादरो यैस्ते । अगूढतया स्पष्टतयैव या मूढता तया वा । कीदृश्या, लवः पशुच्छेदस्तत्राक्तया संसक्तया वा, शसनविमुखा इति पूर्वत्र भगवदुक्तिस्तु याञ्चाप्रवर्तनार्थैवेत्यवसेयम् । गूहितया गुप्तयापि भगवत्कृपया रहिततया वा । अहितो दुर्हृत् तत्तया वा निरस्तमनुत्पन्नमेव· उत्पन्नविनष्टं वा तथाविधं सुकृतं येषां तत्तया वा, इति हेतुपञ्चकं विकल्पितम् । दारुणताया अवधिं सीमां रान्ति गृह्णन्तीति ते ॥ ३१ ॥

तदाभीरदायादा दायादानविरहेण विरसा रसायांताननतिजरजरठकाठिन्यमतीन् मत्वामत्वादुदन्मुखा इव दुःखपराः परावर्तिरे ॥ ३२ ॥

आभीरदायादा गोपबालकाः, "दायादौ सुतबान्धवा"वित्यमरः । अतिथित्वाद्दायतुल्यं यदादानं ग्रहणं तस्य विरहेण· अतिजरा अतिजीर्णा जरठस्येव काठिन्यं यस्यास्तायाभूता मतिर्येषां तान् मत्वा ज्ञात्वा । अमत्वात्· मा शोभा तद्रहितत्वात्, आशाभङ्गहेतोर्मालिन्यादित्यर्थः ॥ ३२ ॥

परागच्छतोऽपरागच्छतोथ: श्रीदामोदरो दरोदितस्मितमालोकयन्नाकारत एव रत एवमेषामकृतार्थतार्थतात्पर्यनिर्णये याज्ञिकच्छविप्राणां विप्राणां दयालुभावो नैव पुष्टो वपुष्टो निगत इवेति निरणैषीत् ॥ ३३ ॥

परावृत्य· आगच्छतस्तान्· आलोकयन् पश्यन्नेव विप्राणां दयालुभावो दयालुत्वं वपुष्टो देहतो न निर्गत इवेति निरणैषीत्· निर्णीतवान् । कीदृशः, अपराङ् न परास्तः· अच्छस्तोभो यस्य सः,तान् सरसीकर्तुं पुनश्च याञ्चायां प्रवर्तयितुं चेति भावः । आकारतः· आकारादेव· एषां गोपानाम्· अकृतार्थताकृपो योऽर्थस्तस्य तात्पर्यनिर्णये रतः । तदेवाह, याज्ञिकेत्यादि । याज्ञिकानां छविं रूपमात्रं न तु परानुग्रहरूपं स्वभावं घ्नन्ति पूरयन्तीति तेषाम् ॥ ३३ ॥

उपसृत्य च ते सर्वेमनुस्यमूचुः, भो राम रामणीयकस्य कस्यचित् परा कोटिरालोकिता, कठिनता न तादृशी कुत्रापि वर्तते,तेषां यादृशी दृशीचितास्माभिः,ते ब्राह्मणपुंगवाः पुंगवा एव, यदात्ममोदनमोदनमस्माभिर्भवन्नाम्ना याचितं, नाम्नायाचितं किमपि तैरुक्तम्, अस्तु दूरे दानप्रसङ्गः ॥ ३४ ॥

रामणीयकस्येति विवद्गुलवणया कथनम् । आत्मानं मोदयतीति· आत्ममोदनं यत्· अस्माभिर्भवन्नाम्ना त्वन्नामोल्लिख्य याचितं तत्र· आम्नायोचितं वेदशास्त्रसंगृहीतं तैः किमपि नोक्तम्, "आचितः संगृहीतेऽपि वृन्देऽपि स्यात् त्रिलिङ्गकः" इति मेदिनी । वेदशास्त्रसंगृहीतातिथिसंमाननधर्माज्ञानमेव तेषां पुंगवत्वप्रयोजकमिति भावः ॥ ३४ ॥

अपितु पचतभृञ्जता खादतपिवता· आगच्छतगच्छता गृहीतचलतेत्यादि भूयस्य एव वाचः श्रुताः ॥ ३५ ॥

पचतभृञ्जतेत्यादि,"आख्यातमाख्यातेन क्रियासातत्ये" इति समासः ॥ ३५ ॥

दृष्टाश्च तथा तथा व्यवहरन्तोऽभ्यहरन्तोऽभ्यगारमगाधबोधाः परःसहस्राः सह स्राविणः पुरुषा रुषा तत्र न गतमस्माभिरेषां विप्राणाममर्यादया दयालुतया च न स्थितं क्षणमपि व्रीडेव परमर्जिता जिता च निजाभिजात्यरीतिः ॥ ३६ ॥

तथा व्यवहरन्तो रसवतीषु पचनभर्जनादिकव्यापारवन्तः । अभ्यवहरन्तो भुञ्जानाः । अभ्यगारम् अगाराभ्यन्तरे । परःसहस्राः सहस्रतोऽप्युपरिसंख्याकाः । सह मिलित्वैव सहाविष्टा गमनागमनपराः । "चु गतौ" ॥ ३६ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य षष्ठः परिच्छेदः ॥

४२ ॥ यथा यथा ऽस्माकं विज्ञानान्यधिकसाधारणानि भवन्ति तथा तथा ऽधिकमपूर्णान्यांशिकानि च भवन्ति ॥—अपकृष्टतमविशेषजातीनां शाब्दस्वरूपस्य घटकानां व्यापकतमजातिरचकानां शुद्धविज्ञानानां संख्याया वैविध्येन तेषां संग्राहकस्य मानवमनसो ऽधीनतया एतदस्ति स्फुटतमं यत् तानि व्यापकतरजातिषु तथा ऽपूर्णांशिकमिश्रविज्ञानानि रचयन्ति, यद् न्यायशास्त्राचार्यैः परजातिपदेन परिभाष्यते । तानि च मिश्रविज्ञानानि बुद्धिपूर्वमपूर्णानि विरच्यन्ते । आपाततो दर्शनमात्रेणैवेदं प्रतीयते यद् वस्तुषूपलभ्यमानानां धर्माणां मध्ये बहवो बुद्धिपूर्वं जातिविज्ञानबाह्यतया परित्यज्यन्ते । यतो यथैव मनो बहुव्यक्तिसंग्राहकसामान्यविज्ञानरचनाय एकाधिकव्यक्त्यसंग्राहकाणि देशकालादिविज्ञानानि परित्यजति, तथैव भिन्नभिन्नजातिसंग्राहकस्य ततो ऽपि व्यापकतरस्य विज्ञानस्य रचनाय तांस्तान् व्यावर्तकान् धर्मान् परित्यज्यानेकापरजातिसाधारणविज्ञानानां नवीनमेव समुदायं रचयति । अनेनैव सौकर्येण मनुष्या नानादेशोद्भवस्वर्णमुद्रादिपीतद्रव्याणां विविधान् गणानेकेनैव नाम्ना बोधयन्ति, रचयन्ति च स्वर्णरजताद्यनेकद्रव्यजातिबोधकं साधारणतरं नाम । तत्तज्जातिविशेषनियतानां विशेषधर्माणां परित्यागेन जात्यन्तरसाधारणानां धर्माणां मिश्रितविज्ञानस्यावधारणेन च यच्च धातुरिति नाम प्रयुज्यते तत्रास्ति काचन परा जातिर्यस्याः स्वरूपं नानाजातीयद्रव्या

नुगतैः स्थिरत्वगुरुत्वविशेषद्रवत्वयोग्यताघातवर्धनीयतात्यैरेव धर्मैर्घटित-
मवच्छेदकविज्ञानरूपं सद् धातुपदबोध्यस्वर्णरजतादितत्तज्जातिविशे-
षमात्रविश्रान्तान् वर्णविशेषादीन् नान्तर्भावयति । एतदुक्तं भवति ।
द्रव्याणां सामान्यविज्ञानस्य रचनावसरे मनुष्याः प्राकृतानि प्रतिमानानि
याथार्थ्येन नानुसरन्ति । द्रवत्वयोग्यताघातवर्द्धनीयते इवाव्यभिचरितैर्धर्मा-
न्तरैर्विधुरस्य कस्याप्युक्तधर्मद्वयमात्रघटितस्य द्रव्यस्यानुलम्भात् । सामान्य-
ज्ञानरचनावसरे जातिवाचकैरनेकसंग्राहकलिङ्गैश्च शीघ्रार्थबोधनं भाषणसौ-
कर्यं च वास्तविकवस्तूनां तात्त्विकं स्वभावमपेक्ष्याधिकं मार्गयन्तो मनुष्या
विविधविज्ञानसंग्राहकाणां साधारणानां नाम्नां कोशेन संपादनीयमेवाव-
च्छेदकविज्ञानरचनाया मुख्यं फलमाचक्षते । इत्थं च सर्वस्यास्य परापर-
जातिनिर्माणस्येदमेव तत्त्वं यत् परा व्यापिका वा जातिः केवलं विशे-
षजातिघटकस्यांशिकं विज्ञानं, विशेषजातिश्च व्यक्तिविशेषउपलभ्यमान-
स्यांशिकविज्ञानरूपैवेति । अतो यदि वाजिप्राणिमनुष्यमहीरुहादयः स्वभा-
वत एवार्थस्वरूपेण परस्परं भिद्यन्ते इति कश्चन विचारयेत् तर्हि प्रकृतिरा-
र्थस्वरूपविषये स्वैरिणीभूत्वा मनुष्यस्यैकविधं प्राणिनामन्यादृशमश्वानां
त्वन्यादृशमेवेति विविधानि स्वरूपाणि विरच्य तानि सर्वाणि बुसाफलसूनामके
ऽश्वविशेषे ऽर्पयति । परं तु यदि वयं सर्वत्र परापरजातिविषये यदुत्क्रियते
तद् याथार्थ्येन विचारयेम तर्हि तत्र नवीनं न किमपि क्रियते ऽपि तु स्वस्वे-
रेषावसरैर्भूयसां पदार्थव्यक्तीनां बोधनाय समर्थानि न्यूनाधिकव्यक्तिसंग्राहक-
लिङ्गान्येव तेषां न्यूनाधिकविज्ञानबोधकत्वानुसारेण लाघवेन परान्प्रति
स्वाभिप्रायबोधनसौकर्याय रचयाम इत्येव केवलमुपलभ्येत । अस्माभिः
परीक्षणीयमिदमेवसर्वमस्ति यद् व्यापकतरार्थबोधकं पदं सर्वदा न्यून
मिश्रविज्ञानबोधकपदात्मकमस्ति । किं च सर्वा अपि व्यापकजातयः
केवलं स्वव्याप्यविशेषजातीनामांशिकविज्ञानरूपा एव । इत्थं चावच्छेद-
कसाधारणविज्ञानानां पूर्णताया विमर्शस्तु केवलं पदपदार्थयोर्व्यवस्था-
पितयत्किंचिन्नियतसंबन्धापेक्ष एव न पुनः स्वभावसिद्धवास्तविकपदा-
र्थापेक्ष इति ॥

Digitized by Google

३३ ॥ तदेतत्सर्वं भाषणफलोपयोगि ॥—अस्माकं विज्ञानानां परान् प्रति संप्रदानस्य लघिष्ठसुकरतमरीतिरूपं सर्वमेतद्भाषणस्य यथार्थोद्देशसंपत्तये क्रियते । यत इत्थं यो विस्तारघनत्वयोरवच्छेदकविज्ञानस्यानुसारिणः पदार्थान् अधिकृत्य भाषते स तादृशानखिलान् पदार्थान् बोधयितुमवश्यमेव द्रव्यं पिण्ड इति वा पदं प्रयुञ्जीत । यश्च ताभ्यां गुणाभ्यां प्राणेन्द्रियस्वैरगतिपदबोध्यानि धर्मान्तराणि योजयेत् सोऽवश्यं तद्विज्ञानसहचरितानि सर्वाणि विज्ञानानि बोधयितुं प्राणीति पदं प्रयुञ्जीत । किं च यो द्रव्यस्य मिश्रितं विज्ञानं प्राणगतेन्द्रियतर्कशक्तियुतमरचयत् सोऽवश्यमेव तादृशमिश्रविज्ञानानुरूपाखिलव्यक्तिबोधनाय संक्षिप्तमेकाक्षरं नृइति नाम प्रायुङ्क्त । इदमेव परापरजात्योर्मुख्यं कार्यं तच्च वस्तुविमर्शसमये ऽस्मज्ज्ञानागम्यानां परैः सह भाषणावरे ऽस्मत्प्रयुक्तशब्दाबोध्यानां च वास्तविकाकाराणामार्थस्वरूपाणां वा किमपि विमर्शमकृत्वैव मनुष्या अनुतिष्ठन्ति ॥

३४ ॥ क्यासिवरीनामकाः (पक्षिणः) उदाह्रियन्ते ॥—श्रीमतो जेम्साभिधमहाशयस्याङ्गणे दृष्टपूर्वं पक्षिजातिविशेषमधिकृत्य यदि केन चित् सह भाषणायोन्मुखो भवेयं तर्हि अवश्यमेव स पक्षिरासीत् त्रिचतुरपक्रमदैर्घ्योऽत्यः कृष्णधूसरकेशपक्षसदृशेन केन चिदावरणेनावृतो निष्पक्षोऽपि सन् पक्षस्थाने स्पेनदेशीयसंमार्जन्या अग्राणीवावलम्बमानाभिर्द्वित्रशाखाभिर्युतस्त्र्यङ्गुलदीर्घतरपादः पुच्छरहित इत्येवमेव वर्णनेन तं पक्षिणं परान् प्रति बोधयेयं, परैरप्येवमेवाहं बोधितो भवेयं, परं तु यदाहं क्यासुअरीति तस्य नामाज्ञासिषं तदेदानीं विशेषनामतया व्यवहारगोचरेण तेन पदेन मया पूर्वं कृताद्वर्णनादधिकं किमपि तज्जातीयजीवस्यावयवसंस्थितिविशेषमार्थस्वरूपं वा ऽज्ञात्वापि तन्नामज्ञानात्पूर्वंवदेव तत्पक्षिविशेषजातेः स्वरूपं ज्ञात्वैव यथैव बहव आङ्ग्ला मनुष्या आङ्ग्लदेशे प्रसिद्धतरपक्षिविशेषजातीनां हंसकारण्डवादिविशेषनाम्नां विषये ऽनुतिष्ठन्ति तथैवाहमपि पूर्वोक्तवर्णनउपदर्शितानां सर्वेषां विज्ञानानां बोधाय तमेव शब्दं प्रायुनजम् ॥

३५ ॥ मनुष्या जातीर्नियमयन्ति ॥—पूर्वोक्तवर्णनात्सुस्पष्टमेतदुक्तं भवति । मनुष्या वस्तूनां जाती रचयन्ति । यतो भिन्नभिन्नस्वरूपाणामेव भिन्नभिन्नविशेषजातिनिर्माणसाधनत्वेनेदं सुस्पष्टमभिहितं भवति यत् शाब्दस्वरूपात्मकावच्छेदकविज्ञाननिर्मातारस्तदनुसारेणैव परापरजाती रचयन्ति । यदि किमपि द्रव्यं निखिलस्वर्णगुणविशिष्टं सदपि घाघात-वर्धनीयत्वगुणविशिष्टं न भवेत् तर्हि निःसन्देहमिदं स्वर्णमस्ति नवेति संदिह्येत । अयं भावः । तादृशद्रव्ये स्वर्णविशेषजातीयत्वाभाव एव निश्चीयेतेति । स्वर्णत्वं हि स्वर्णपदाभिलप्यमानावच्छेदकविज्ञानेनैव परिच्छिद्यते । यो घाघातवर्धनीयतां स्वर्णपदाभिधेयशाब्दस्वरूपे न योजयति तद्दृष्ट्या उक्तधातुविशेषो यथार्थं स्वर्णं सुवर्णजातीयं वा भवेत् । यश्चाघातवर्धनीयतासहितं मिश्रविज्ञानविशेषं स्वर्णशाब्दरूपमभिप्रैति तद्दृष्ट्या न स धातुः स्वर्णजातीयो यथार्थं स्वर्णं वा । अत्यन्तसरूपगुणस-मुदायाघटितविभिन्नावच्छेदकविज्ञानद्वयस्य रचयितॄन् मनुष्यान्विहाय को ऽन्य एकपदबोध्यतां तज्जातिद्वयस्य कर्तुं शक्नुयात् ? । नापि यत्राघा-तवर्द्धनीतामात्रं विहाय सुवर्णस्य सर्वेगुणाः सन्ति तादृशं वस्तु वस्तुतः स्यादिति कल्पनामात्रम् । यतः स्वर्णकाराणां कथनानुसारेण स्वर्णमपि कदाचित् तथा कठिनतरं भवति येन काचवदिदमपि घनाघातं न सहते । पुरुषविशेषप्रयुक्तस्वर्णपदाभिलप्यमानमिश्रविज्ञानमधिकृत्याघात-वर्धनीयतात्यागपरिग्रहयोर्यदुक्तं तद्गुरुत्वस्थिरत्वादिष्वपरेष्वपि स्वर्णासा-धारणधर्मेषु स्वयमुन्नेयम् । यतो यस्यकस्यापि धर्मस्य परिग्रहे परित्यागेपि वा तत्सदैव तत्पदबोध्यं मिश्रविज्ञानं येन पदेन विशेषजातिरचकं तद् मिश्रविज्ञानमभिधीयते । यथैव द्रव्यखण्डविशेषस्तादृशविज्ञानानुरूपो ऽस्ति, तथैव जातिनाम तन्मिश्रविज्ञानेन संबद्धं भवति, तच्च विशेष-जात्या । इत्थं च यत्किमपि वस्तु यथार्थं सुवर्णं पूर्णधातुरूपं वास्ति । एतदुक्तं भवति । सर्वापि विशेषजातिनिर्णयस्तत्तन्मिश्रविज्ञाननिर्मातृमा-नवीयमनसो ऽधीन एवास्ति ॥

३६ ॥ प्रकृतिः सादृश्यं रचयति ॥—एवं तर्हि, संक्षेपतः इत्थं व्यव-

स्थितिः । प्रकृतिर्बहूनि व्यक्तिरूपाणि वस्तूनि कैश्चिदत्यन्तबाह्यैर्धर्मैः प्रायशश्च तदीयाभ्यन्तरसंस्थितिभिरपि परस्परं सदृशानि सृजति । परं तु नार्थैरेव स्वरूपैः परस्परं विशेषजातयो भिद्यन्ते । मनुष्या एव समयविशेषेषु कांश्चन धर्मान् सहचरितानुपलभ्य तैश्च प्रायशो बहूनां व्यक्तीनां साम्यं परीक्ष्य व्यापकलिङ्गसौकर्याय शब्दान् प्रयोक्तुं तादृशजातिरूपेण व्यवस्थापयन्ति यस्यां जातौ तत्तदवच्छेदकविज्ञानानुरूप्यानुसारेण लिङ्गितया ऽन्तर्भवन्ति, येनेदं नीलं, रक्तेयं सेना, मनुष्योऽयं, वानरोऽयमिति व्यवह्रियते । एतावदेव च निखिलं परापरजातीनां कृत्यम् ॥

३७ ॥ यद्यपि तत्तद्व्यक्तिनिर्माणावसरे प्रकृतिर्नवीना भिन्ना भिन्ना व्यक्तीर्न रचयति किं तु परस्परमत्यन्तं सरूपाः सजातीया एव तथापि मन्ये, मनुष्याणां जातिनिर्माणसाधनानि विशेषजातिपरिच्छेदकानि मनुष्यैरेवरचितानि इति तु सत्यमेव । भिन्नभिन्ननामभिर्विविक्तानां विशेषजातिस्वरूपाणां मनुष्यनिर्मितत्वस्य पदार्थेभ्यः परिगृहीतैः पदार्थाभ्यन्तरस्वरूपैः क्वाचित्कसाम्यस्य च प्रमाणप्रमितत्वात् । इत्थं चायं पदार्थानां जातिशो व्यवस्थापनस्य प्रकारो मनुष्यकार्यमेवेति याथार्थ्येन वक्तुं शक्यते ॥

३८ ॥ एकैकमवच्छेदकविज्ञानमस्त्यसाधारणं स्वरूपम् ॥—पूर्वोक्तग्रन्थस्यायं निर्गलितोऽर्थः । प्रत्येकमवच्छेदकविज्ञानं तद्बोधकं नाम च भिन्नां भिन्नां विशेषजातिं रचयत इति तु विलक्षणमेव प्रतीयते । यदि वस्तुत एवमेव स्यात्तर्हि क एतन्निवारयितुं शक्नुयात्? यतो यावत् कश्चन वस्तुविशेषजातीनां प्रकारान्तरेण परिच्छेदनं विवेचनं च न प्रदर्शयेत् तावदेतेन तथैवावस्थातव्यम् । किं च जातिपदं नास्माकमवच्छेदकविज्ञानानि बोधयति किं तु तेभ्यो भिन्नमेव किं चित् । हस्तिक्रीडाकुक्कुरयोरिव मृगयाकुक्कुरघनलोमकुक्कुरविशेषजात्योः कुतो नात्यन्तं विभेद इति तु न ज्ञातुं शक्नोमि । मृगयाकुक्कुरघनलोमकुक्कुरयोर्भिन्नभिन्नस्वरूपे अपेक्ष्य हस्तिक्रीडाकुक्कुरयोः स्वरूपविज्ञानयोरधिकस्य वैलक्षण्यस्याप्रतीतेः । सर्वस्यापि परस्परभेदसाधकस्य स्वरूपवैलक्षण्यस्य यस्य यस्य पृथक् पृथक् नामानि प्रयुज्यन्ते तादृशतत्तद्वस्तुविज्ञानसमुदायात्मकत्वात् ॥

३९ ॥ परापरजातीनां नामप्रयोग एव फलम् ॥—नामप्रयोगाय कियन्त्यः परापरजातयो रचयितव्याः कियन्ति च साधारणनामानि पदार्थानां कृते ऽवश्यकान्यपि विशेषजातिपूरणाय तत्तद्विशेषजातीयत्वस्य संपत्तये च सन्त्यावश्यकानीति हिमजले अधिकृत्य पूर्वप्रदर्शितादन्येनाप्युदाहरणेन विज्ञातं भविष्यति। योऽप्येकमेव नाम नादहस्तचालनाभ्यां हस्तचालनमात्रेण च कालं मापयतोर्घटीयन्त्रयोर्बोधाय प्रयुङ्क्ते तस्य ते उभे अपि यन्त्रे एकविशेषजातीये एव भवतः। परं तु य एकस्य यामघोषेति परस्य च बोधाय कालमापनीति च पदं प्रयुङ्क्ते तत्तन्नामाभिलप्ये भिन्ने मिश्रविज्ञाने च रचयति तस्य तु ते विभिन्ने एव विशेषजाती स्तः। यां घटीयन्त्रनिर्माता स्फुटं जानाति सा तु तयोर्द्वयोर्यन्त्रयोर्भिन्नैवास्तीति तु वक्ष्यति। किं चैवमपि यदा स पुरुष एकेनैव नाम्ना व्यवहरति तदा तस्य ते उभे अप्येकविशेषजातीये एव। आभ्यन्तरसंस्थितौ नवीनजातिनिर्माणसामर्थ्या अभावात्। केषां चिद्यन्त्राणां चतुश्चक्रघटितत्वेन परेषां च केषां चित्पञ्चचक्रघटितत्वेन च यन्त्रनिर्मातुस्तस्य भेदस्याकिंचित्करत्वात्। केषु च रज्जुवेष्टनाधारधातुखण्डसहिता रज्जुः केषु चिच्च न किमप्यस्तीति कृत्वा सर्वस्या अप्यस्याः संस्थितेरन्येषामपि बहूनां घटीयन्त्रसंस्थितिविशेषाणां ज्ञातुर्घटीयन्त्रनिर्मातुः किं तेषामेकतमं सर्वे वा ते विशेषास्तेषु घटीयन्त्रेषु परस्परवैलक्षण्यसंपादका भविष्यन्ति?। सर्वाण्यपि यन्त्राणि स्वातिरिक्तेभ्यः सर्वेभ्यः किं चित् किंचिदाभ्यन्तरसंस्थितिवैलक्षण्यवन्ति सन्तीति तु सत्यं, परं तु तस्य भेदकविशेषत्वं स्वरूपत्वं भवतु मा वा तथापि घटीयन्त्रपदाभिलप्यमानमिश्रविज्ञानमात्रसंबद्धमेव तदस्ति। यावत्तन्नामबोध्यविज्ञानघटकानि तानि सर्वाणि सन्ति, यावच्च तत्पदं साधारणपदमिव विशेषजात्यन्तरं नान्तर्भावयति तावत्तानि स्वरूपे भेदके विशेषे वा न किमपि भेदं जनयन्ति। परं तु यदि कश्चन घटीयन्त्रस्याभ्यन्तररचनायां यावतो विशेषान् जानाति तावद्भिर्लघुतरान् विभागान् कुर्यात्, तादृशेषु च यथार्थमिश्रविज्ञानानां व्यवहारसिद्धये नामान्यपि प्रयुञ्जीत तर्हि तत्तन्नामाभिलप्यमानविज्ञानवतां पुंसां तानि नवीनविशेषजातिरूपाण्येव भवेयुः।

Digitized by Google

किं च ते पुरुषा घटीयन्त्राणि तैर्भेदैर्बहुषु पृथग्जातिषु विभेदयितुं शक्नुयुः । ततश्च घटीयन्त्रमिति साधारणनामापि भवेत् । परं त्वेवमपि येषां बाह्याकारस्य स्थूलस्य ह्रस्वसूच्या होराद्योतनस्य च विज्ञानेभ्यो ऽतिरिक्तं विज्ञानं नास्ति, ये च घटीयन्त्राणां निर्माणप्रकारमाभ्यन्तरव्यापारांश्च न जानन्ति तेषां तु न कथमपि तानि विभिन्नविशेषजातिरूपाणि भवेयुः । यतस्तेषां सर्वाण्यपराणि नामानि एकरूपविज्ञानवाचकानि पर्यायरूपाणि भूत्वा घटीयन्त्रादतिरिक्तं विज्ञानं वस्त्वन्तरं वा न कथमपि बोधयेयुः । प्राकृतवस्तुष्वपि मन्ये इत्थमेवास्ति । मनुष्येषु भूतादिपरिवर्तितसत्त्वेषु चाभ्यन्तराणि चक्राणि आभ्यन्तररज्जवो वा विभिन्नाः सन्तीत्यत्र मन्ये न कोपि संधेत्स्यति । नापि वानरभूतादिपरिवर्त्तिताकारसत्त्वयोश्च यावान् आभ्यन्तररचनाकृतो भेदो ऽस्ति ततो ऽधिकं वैलक्षण्यं तयोरुपलप्स्यते । परं त्वेको भेदो भेदद्वयं वा तयोः स्वरूपं भेदको धर्मो वेति तु मनुष्यपदाभिधेयमिश्रविज्ञानानुसारित्वाननुसारित्वाभ्यामेवास्माभिर्ज्ञातव्यमस्ति । यतस्ताभ्यामेवैतन्निर्णयितुं शक्यते यत् तयोरेकः उभौ वा अनुभयं वा मनुष्यो ऽस्तीति ॥

॥ शेषो ऽग्रे भविता ॥

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

THIRD ADHYÁYA.

(Continued from page 322.)

अलजचित एतेनात्मा शिरः पुच्छं च व्याख्यातं पादावपोद्धृत्य । १५३

Thereby the átman, the head and the tail of the altar constructed in the shape of an alaja (a certain bird distinguished, as will appear from the following, by a peculiar conformation of the wings) are explained, while the feet are removed.

पादौ वर्जयित्वानन्तरोक्तेन कङ्कचितालक्षचित आत्मा शिरः पुच्छं च व्याख्यातम् । अस्य पादौ न भवत इत्युक्तं भवति । अलजो ऽपि वयोविशेषः । पञ्चमीनां पञ्चाशद् द्वे चात्मनि । पञ्चदश पुच्छे । शिरसि पञ्चोपदध्यादित्यर्थः । शेषकरणमपि पूर्ववत् । पक्षयोर्विशेषमाह ।

त्रिषष्टिर्दक्षिणे पक्ष उपदध्यात् । १५४

Sixty-three (pañchamís) are to be placed in the southern wing.

An oblong of ten aratnis = 240 aṅgulis length by six aratnis = 144 aratnis breadth is drawn; it contains 60 pañchamís, to which are to be added three pañchamís constituting the six pattras.

द्वितीयार्थे प्रथमा । सामर्थ्यात् षडरत्निव्यासं दशारत्निदीर्घमुदगायतं दीर्घचतुरस्रं कृत्वा पुरुषेण पक्षयोरपनाम इति वक्ष्यमाणत्वात् पुरुषेण नमनं कृत्वा पक्षाग्रे ऽरत्न्यर्धाभिः षट् पत्राणि कुर्यात् । एवं त्रिषष्टिः पञ्चम्यो भवन्ति ।

तथोत्तरे । १५५

The same is done in the northern wing.

त्रिषष्टिः पक्ष उपदध्यादित्येव ।

पुरुषेण पक्षयोरपनामः । १५६

The bending of the wings is to be done with a purusha = 120 aṅgulis.

It is managed in the same way as the bending of the wings of the śyena and the kaṅka.

व्याख्यातप्रायम् । आत्मशिरःपुच्छेषु द्वासप्ततिः पञ्चम्यः । पक्षयोः षड्विंशतिशतं पञ्चम्यः । तत्र पक्षयोरर्धाधिका दश दश पञ्चम्यो ऽतिरिच्यन्ते । तासां निरसनप्रकारमाह ।

अपरस्मादपनामात्प्राञ्चमरत्निं मित्वा तस्मिन्स्पन्द्यां नियम्यापरं पक्षपत्त्रापच्छेदमन्वायच्छेत् । १५७

Having measured from the western end of the bending of the wings one aratni. towards the east and having fastened (at a pole fixed on the end of that aratni) a cord, this cord is to be stretched in the direction of the western cutting-off of the feathers of the wings.

The cord is stretched from the mentioned pole along the hypotenuse of the triangle which forms the western pattra of the wing.

उभयत्रापरस्मान्निर्णामामूलादारभ्य प्राञ्चमरत्निं मित्वा तत्र शङ्कुं निहत्य तस्मिन्स्पन्द्यां प्रतिमुच्यापरपक्षपत्त्रापच्छेदमुभयत्र पश्चिमपत्त्रस्य कर्णरूपपार्श्वमानीमालम्बीकृत्य निपातयेत् ।

एवं पञ्च पञ्चम्यः सार्ध्या उद्धृता भवन्ति । १५८

In this manner (i. e, by cutting off the stripe situated between the cord and the western edge of the wing) five and a half pañchamís are deducted (from the area of the wing).

निर्णामबहिर्भूतपक्षांशे षड्भिः पत्त्रैः सह त्रयस्त्रिंशत्पञ्चम्यः । उक्तेन प्रकारेण षष्ठांशे निरस्त एकैकस्मिन्पक्षे पञ्च सार्ध्याः पञ्चम्यो निरस्ता भवन्ति । एवमेकादश निरस्ता भवन्ति । सार्धा दश पञ्चम्यो निरस्याः । तत्र पञ्चम्यर्ध्यायाः प्रक्षेपप्रकारमाह ।

पादेष्टकामपनाम उपधाय । १५९

Having placed a quarter-brick on (the western end of) each bending—

By cutting off the sixth part of the outer half of each wing, eleven pañchamís had been taken away from the area of the agni. The number of pañchamís would then amount to 187 only instead of 187½ (72 in átman, head and tail together, 57½ in each wing). The wanting half is supplied by the two quarter-bricks mentioned in the sútra.

उपदध्यादिति वक्ष्यमाणेन संबन्धः। पादेष्टकां निर्णाममूले उद्धृतदेशे कुटिलस्थाने दक्षिणपक्षे दक्षिणायामुत्तरपक्ष उदगग्राम्। एवमर्धेष्टका प्रक्षिप्ता भवति। अतः साध्या दश गता भवन्ति। अथोपधानम्।

तासां चतुरस्रपाद्याः साष्टमभागा अपोद्धृत्य शेषा यथायोगं यथासंख्यं यथाधर्मं चोपदध्यात्। १६०

—and having put aside out of among these (classes of bricks), the four-cornered quarter-bricks and those which are equal to the eighth part of a pañchamí the remaining classes of bricks are to be placed as it fits, etc.

तासां षण्णामिष्टकानां कङ्कचित्युक्तानां मध्ये चतुरस्रपाद्याः साष्टमभागा वर्जयित्वा तासां कङ्कचितिपादोपधानार्थत्वादिह पादयोरभावात्तासामभाव इति भावः। शेषाश्चतस्र इष्टकाः पञ्चम्यो ऽध्याः पाद्या अध्यर्धाश्च यथायोगमित्यादि व्याख्यातम्। न्यायमार्गेणोपधानस्य सुकरत्वाद्विस्तरेण नोक्तिः। तत्र चत्वारि करणानि। अरत्निरेकम्। तदध्यात्त्र्यायामिन्नेकम्। पाद्योभयतोत्त्र्यायामिन्नेकम्। पूर्वाक्ताध्यर्धैकम्। तत्र पञ्चम्यः षट्पञ्चाशच्चतुःशतम्। द्व्यधिकं शतद्वयमध्याः। षडधिकं शतं पाद्याः। षट्त्रिंशदधिकं शतद्वयमध्यर्धाः। चोडानाकसदः षडध्याः। चतस्रः पञ्चम्यः। प्रथमे प्रस्तारे शिरसो ऽग्रे बहिर्भे अध्ये। ततो ऽरत्निचतुष्टयम्। आत्मन्यर्धाष्टकमपच्छेदेषु। मध्ये ऽष्टचत्वारिंशदरत्नयः। पुच्छपार्श्वयोः षडध्याः। मध्ये द्वादशारत्नयः। पञ्चाध्या अङ्गुलानि। तत्र निर्णामाद्दक्षिणासु पञ्चसु पुरतस्तिस्रस्तिस्रो ऽध्यर्धाः पश्चादेकैकाध्या चतुरिष्टकाः पञ्च रीतयः। निर्णामादुत्तराः सर्वाः पञ्चम्यः पार्श्वेष्वध्याः। एवं सप्तेष्टकाः पञ्च रीतयः। तत्र निर्णामादुत्तरस्यामादिभूतामध्यां तदनन्तरां पञ्चमीं

चोद्धृत्याध्यर्धा निधेया । एवमुत्तरः पक्षः । पूर्वमेवोभयच निर्णामादौ पाद्ये उक्ते । तत्रात्मनि षट्पञ्चाशत् । शिरसि षट् । पुच्छे ऽष्टादश । पक्षयोर्विंशतिशतम् । अस्मिन्प्रस्तारे द्वादशशतं पञ्चम्यः । चतुःपञ्चाशदध्यर्धाः । द्वे पाद्ये । द्वात्रिंशदध्यर्धाः ।

अथापरः प्रस्तारः । शिरसो ऽग्रे प्राची पाद्या । पश्चादध्यर्धाद्वयम् । पार्श्वयोश्चतस्रश्चतस्रः पाद्याः । तासां पश्चाद्बहिरर्ध्ये । एवं त्रयोदश । ततः पश्चादर्ध्याभ्यां पार्श्वयोरुत्तमध्यर्धाद्वयम् । तत्पश्चात्पञ्चमीरीतयः सप्त पञ्चेष्टकाः । ततः पश्चात्पूर्ववदध्यर्धाद्वयम् । पार्श्वयोरर्ध्ये । पुच्छात्मसंधौ मध्ये पञ्चमी । उभयपार्श्वे । संधिरीतिशेषे पुच्छशेषे द्वे प्रागग्रे पाद्ये । एवं पञ्चेष्टका रीतिः । ततः पश्चात्पूर्ववदध्यर्धाद्वयमर्ध्ये च । ततो ऽध्यर्धाश्चतस्र एका रीतिः । ततः पुच्छाग्रे पञ्चदश पाद्याः । एवमात्मशिरः पुच्छेषु चतुरशीतिः । निर्णामाग्र एका पाद्या । ततः पश्चादरत्निचतुष्टयम् । ततः प्रत्यङ्मुख्यध्यर्धा । एवं षडिष्टका रीतिः । निर्णामादुत्तरतः पञ्च रीतय ऽध्यर्धाः चतुरिष्टकाः प्राच्यः । तत्रात्मसंधिरीत्यां पुरस्तादन्यतरच पाद्या । निर्णामाद्दक्षिणतश्चतुरिष्टकाश्चतस्रः प्राच्यः । तासु मध्ये द्वे द्वे पञ्चम्यौ । आद्यन्तयोर्द्वे द्वे अध्यर्धे । अथ पादेष्टके अर्धेष्टकामित्यादि पूर्ववत्पत्त्रेषु । एवमुत्तरः पक्षः । आत्मनि षट्चत्वारिंशत् । त्रयोदश शिरसि । पुच्छे पञ्चविंशतिः । एवं चतुरशीतिः । पक्षयोः षोडशशतम् । अस्मिन्प्रस्तारे षष्टिः पञ्चम्यः । विंशतिरर्ध्याः । पञ्चाशत्पाद्याः । सप्ततिरध्यर्धाः । अत्र कल्पोक्तो विधिरनुसंधेयः । तत्रैवमुक्तम् । अलजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकाम इति । एतस्यैव सतो ऽरत्निमात्रेण पक्षायामवर्णीयांसो

भवतः । तावन्मात्रेणापि पक्षौ वरीयांसौ । तौ प्रागपानतौ । परीणी-यांसौ भवतः । एकैकामेव सीतां कृषतीति । अथ चतुः सीतमिति तिस्रस्तिस्रः इत्यादिषु एकैकां कृषतीत्यर्थः । परीणीयांसाविति । अपनामात्तूर्णिमात उत्तरतश्च । पक्षमूलादणुतरौ भवत इत्यर्थः ।

प्रउगचितं चिन्वीत । १६१

He (the sacrificer) is to construct the altar of the form of a praüga.—The praüga is the triangle formed by the two chief side-beams of a cart which meet in front of the cart and the chief transversal beam in the fore-part of the cart (it may still be seen in the common Indian carts of our day).

शकटस्येषयोः संयोगप्रदेशः प्रउगः । तद्वच्चीयत इति प्रउग-चित् ।

यावानग्निः सारत्निप्रादेशस्तावत्प्रउगं कृत्वा तस्यापरस्याः क-रण्या द्वादशेनेष्टकास्तदर्धव्यासाः कारयेत् । १६२

Having made a praüga the area of which is equal to the seven fold agni together with the two aratnis and the prádeśa, bricks are to be made which are equal in length to the twelfth part of the praüga's western side while their breadth amounts to a half of the length.

The rule for turning a square into a praüga has been given in the first adhyáya.

A square is drawn of double the area of the saptavidha agni, two cords stretched from the middle of its eastern side to its two western corners and the two triangles to the south and north of the cords cut off.

चतुरस्रं प्रउगं चिकीर्षन्नित्यनेन प्रकारेण प्रउगं कुर्यात् । तत्र सारत्निप्रादेशस्य सप्तविधस्याग्नेः समचतुरस्रकरणी त्रीणि शतान्यष्टा-विंशतिश्चाङ्गुलय अर्धद्वाविंशाश्च तिलाः । तस्या द्विकरणी पादोन-पञ्चषष्टिचतुः शताङ्गुला द्विस्तावत्याश्चतुरस्रकृतायाः पञ्चदशपुरुषाया

भूमेः करणी । एवं चतुरश्रीकृतायाः पूर्वस्याः करण्या मध्याच्छ्रोणी प्रत्यालिखेत् । तच करणीद्वयोः पार्श्वमान्योः प्रमाणमर्धोनविंशति-पञ्चशताङ्गुलयः । तस्य प्रउगस्यापरस्याः करण्याः पादोनपञ्चषष्टि-चतुःशताङ्गुलायां द्वादशेन नवतिलोननवविंशदङ्गुलेन तदर्धेन द्वाविंशतितिलहीनविंशत्यङ्गुलव्यासेनेष्टकाः कारयेत् । तासां बृहत्य इति संज्ञा ।

तासामर्ध्याः पाद्याश्च । १६३

Then half-bricks and quarter-bricks (of the bṛihatís described in the preceding sútra) are to be made.

तासां बृहतीनामर्ध्या अक्ष्णयाभिन्नाः पाद्याश्चोभयविधा दीर्घ-पाद्याः शूलपाद्याश्च कारयेत् । द्व्यधिकनवतिचतुःशतं बृहत्यः । चतुरधिकं चतुःशतमर्ध्याः । शतं शूलपाद्याः । दीर्घपाद्याश्चतस्रः । चोडानाकसद अष्टावर्ध्या द्वे बृहत्यो । अथोपधानम् ।

तासां द्वे अर्धेष्टके बाह्यविशेषे चुबुक उपदध्यात् । १६४

From among these bricks two half-bricks, their hypotenuses turned towards the outside, are to be placed in the "chin" (the apex of the triangle, which is compared to a face turned upside down).

चुबके पूर्वस्मिन्नये । स्पष्टार्थं वचनम् । उत्तरेण सिद्धत्वात् ।

अर्ध्याश्चान्तयोः । १६५

And half-bricks on both edges (the southern and the northern side of the triangle).

चशब्दो ऽवधारणार्थः । अन्तयोर्दक्षिणोत्तरयोः । सामर्थ्यात् । पूर्वोपहिताभ्यां सह द्वादश ।

शेषमग्निं बृहतीभिः प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेत् । १६६

The rest of the agni is to be covered with bṛihatí bricks and the number to be made full with half-bricks.

अर्धेष्टकाभिरेव न पादेष्टकाभिः । तथैवमुपधानम् । प्राच्यश्चतुर्विंशतिरीतयः श्रोण्योर्बहिर्भे अर्ध्ये प्रागायते । तयोरभ्यन्तररीती द्व्यर्धके । तयोरभ्यन्तराः पुरोऽर्ध्यायुक्ता बृहतीरीतयः षोडश । ताः षोडशरीतिस्थाश्चतुरधिकं शतमिष्टकाः । तासामभ्यन्तरे द्वे रीती एकविंशाधिके । ततस्त्रयोविंशाधिके अग्निमध्यरीती । एवं द्विशतमिष्टकाः । अष्टाशीतिर्बृहत्यः । द्वादशशतमर्ध्याः ।

अपरस्मिन्प्रस्तारेऽपरस्मिन्ननीके सप्तचत्वारिंशत्पादेष्टका व्यतिषक्ता उपदध्यात् । १६७

In the second layer forty-seven quarter-bricks (śúlapádyás) are to be placed in the western front (of the praüga), joined with each other (i. e. the apices of the first, third, etc., turned towards the east, those of the second, fourth, etc., turned towards the west).

अपरस्मिन्ननीके अपरान्ते पादेष्टकाः । शूलपाद्या इतरासामसंभवात् । चतुर्विंशतिः प्रागग्राः ।

चुबुक एकाम् । १६८

One — śúlapádyá — is to be placed in the chin — the top — of the praüga.

शूलपाद्याम् ।

दीर्घे चेतरे चतस्रः स्वयमातृण्णावकाश उपदध्यात् । १६९

Two dírghapádyás and two others (i. e. two other pádyás i. e. two śúlapádyás), altogether four, are to be put on the place of the svayamátṛiṇṇá (the centre of the chiti).

दक्षिणत उत्तरतश्चाभ्यन्तराग्रे दीर्घपाद्ये । इतरे शूलपाद्ये प्राक्प्रत्यगग्रिके । नियमार्थं वचनम् ।

अर्ध्याः स्वान्तयोः । १७०

Half-bricks are to be placed on the two (the southern and the northern) edges of the praüga.

Digitized by Google

व्याख्यानम् ।

शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेत् । १०१

The rest of the agni is to be covered with bṛihatí-bricks turned towards the east and the number to be made full with half-bricks.

पूर्ववत् । तच्चैवमुपधानम् । पश्चिमार्धे शूलपाद्याः सप्तचत्वारिंशत् । पूर्वान्ते चैका । मध्य उदीच्य एकादश रीतयः । तासु सर्वासु पार्श्वयोरर्ध्याः । प्रागायताः । मध्यरीत्यां मध्यमामुद्धृत्य तस्याः स्थाने पूर्वोक्तपाद्याचतुष्टयम् । चतुर्थीपञ्चमीरीत्योः पार्श्वतस्तिस्रस्तिस्रो बृहतीरुद्धृत्य षट् षडर्ध्या निधेयाः । एवं द्विशतः प्रस्तारः । अस्मिन्प्रस्तारे चतुर्दशशतं बृहत्यः । चतुस्त्रिंशदर्ध्याः । पञ्चाशच्छूलपाद्याः । द्वे दीर्घपाद्ये । अत्र कल्पोक्तो विधिरनुसंधेयः । तच्चैवमुक्तम् । प्रउगचितं चिन्वीत भ्रातृव्यवानिति । स एतस्यैव सतः समुद्गृह्यांसौ प्रागायातयति स तथा विहृतो[1] भवति । न बहिर्वेदियूपः स्यादिति । समुद्गृह्येत्यंसौ संकोचयित्वेत्यर्थः ।

उभयतः प्रउगं चिन्वीतेति । १०२

He is to construct the altar in the form of a double praüga such is the tradition.

विज्ञायत इति शेषः ।

यावानग्निः सारत्निप्रादेशस्तावदुभयतः प्रउगं कृत्वा । १०३

Having made a double praüga equal in size to the (sevenfold) agni together with the two aratnis and the prádeśa.

An oblong is drawn the breadth of which (from the south towards the north) is equal to the side of that square which is

[1]. C. विमितो.

equal to the saptavidha agni while its length is the double of the breadth; cords are stretched from the middle of the eastern and western sides to the middle of the northern and southern sides and the triangles in the four corners cut off; the remaining part is the desired ubhayatah-praüga.

इष्टका: कुर्यादित्यध्याहार: । अर्धाष्टमपुरुषत्वेचकरणोक्तेन विधिनोभयत: प्रउगं कृत्वा । अयमत्र प्रकार: । सार्धसप्तविधत्वेचकरणीविस्तारं द्विगुणायामं दीर्घचतुरस्रं विहरेत् । तत्र त्रीणि शतान्यष्टाविंशतिश्चाङ्गुलय अर्धविंशाश्च तिलास्तिर्यङ्मानी । द्विगुणा पार्श्वमानी । एवं विहृत्य पूर्वापरयो: करण्योर्मध्याद्दक्षिणोत्तरयोर्मध्ये निपातयेत् । बहि: स्पन्द्यामपच्छिन्द्यात् । एवं कृते ऽर्धाधिकसप्तषष्टिशतत्रयमङ्गुल्य: करण्यो भवन्ति ।

नवमेन तिर्यङ्मान्या: प्रउगचितोक्ता विकारा: । १७४

The different kinds of bricks, which have been mentioned under the praügachiti, are to be made here with the ninth part of the breadth.

There are made bṛihatí-bricks, one side of which is equal to the ninth part of the breadth of the oblong described above, while the other side has the double length. Likewise there are made ardhyás and pádyás of theṣe bṛihatís.

इष्टकानामिति शेष: । तिर्यङ्मानी त्रीणि शतान्यष्टाविंशतिश्चाङ्गुलयो ऽर्धद्वाविंशाश्च तिला: । तस्या नवमभागेन प्रउगचितोक्ता विकारा: । नवमभागं द्वादशभागस्थानीयं कृत्वा नवमभागायामास्तदर्धव्यासा बृहत्य: । तासामर्ध्या उभयप्रकारा: पाद्याश्च कारयेदित्यर्थ: । तत्र बृहत्यो ऽष्टाविंशत्यधिकं षट्शतम् । षट्पञ्चाशत्त्रिशतमर्ध्या: । अष्टौ शूलपाद्या: । तथा दीर्घपाद्या: । चोडानाकसदश्च (?) द्रष्टव्या: ।

तयोपधानम् । १०५

The agni is covered with bricks in the same way as it is done in the praügachiti.

यथा प्रउगचित्युक्तम् । तत्र चुबुकयोर्द्वे द्वे अर्ध्ये इति द्रष्टव्यम् । अर्ध्याश्चान्तयोरित्यत्रान्तेषु चेति । शेषमग्निं बृहतीभिरित्यादि च । तत्रैवमुपधानम् । प्राच्यो ऽष्टादश रीतयः । तत्र दक्षिणस्यां स्रक्त्यामर्ध्याद्वयेनैका रीतिः । तस्यान्तर्गतरीत्या मध्ये द्वे बृहत्यौ । अन्तयोरर्ध्ये । सर्वत्र बृहत्यः प्राच्यः अर्ध्याश्च । सर्वत्रान्तेष्वर्ध्याः । तृतीया षडिष्टका । तुरीयाष्टेष्टका । पञ्चमी दशेष्टका । षष्ठी द्वादशेष्टका । तत्र मध्याद्दश बृहतीरुद्धृत्य विंशतिरर्ध्याः । सप्तमी चतुर्दशेष्टका । अष्टमी षोडशेष्टका । नवम्यष्टादशेष्टका । एवमुत्तरो विभागः । अस्मिन्प्रस्तारे चतुर्विंशतिशतं बृहत्यः । षट्सप्ततिरर्ध्याः ।

अपरस्मिन्प्रस्तारे चुबुकयोर्द्वे पादेष्टके उपदध्यात् । १०६

In the second layer two pádyás (śúlapádyás) are to be placed in the two ends of the agni.

शूलपाद्ये ।

संध्यन्तयोश्च दीर्घपाद्ये । १०७

And a dírghapádyá at each end of the joining line (the line in which the two praügas forming the ubhayatah — praüga meet).

प्रउगसंध्यन्तयोः दक्षिणोत्तरस्रक्त्योरित्यर्थः ।

दीर्घे चेतरे चतस्रः स्वयमातृण्णावकाश उपदध्यादर्ध्याश्चान्तयोः शेषमग्निं बृहतीभिः [1]प्रच्छादयेदर्धेष्टकाभिः संख्यां पूरयेत् । १०८

Four bricks, two dírghapádyás and two others (śúlapádyás) are to be placed on the spot of the svayamátrinná, ardhyás on

[1]. M. °तीभिः प्राचीभिः प्र°

the edges; the rest of the agni is to be covered with bṛihatí-bricks (turned towards the east) and the number to be made full with half-bricks.

पूर्वेण व्याख्यातम् । तत्रैवमुपधानम् । पूर्वपश्चिमयुक्तयोर्द्वे शूलपादे । मध्ये समुद्रयोर्दीर्घो रीतयः । सर्वेच प्रागायता इष्टकाः । मध्ये बृहत्यः । अन्तेष्वर्ध्याः । दक्षिणोत्तरप्रक्तयोर्दीर्घपादे । मध्यमायां रीत्यां मध्यमायाः स्थाने पूर्ववत्पाद्याः । चतसृषु दिक्षु चतसृष्वतस्रो बृहतीरुद्धृत्याष्टावष्टावर्ध्या निधेयाः । एवं द्विशतः प्रस्तारः । अस्मिन्प्रस्तारे ऽष्टाविंशतिशतं बृहत्यः । चतुः षष्टिरर्ध्याः । चतस्रः शूलपाद्याः । चतस्रो दीर्घपाद्याः । अथ कल्पोक्तो विधिरनुसंधेयः । तत्रैवमुक्तम् । उभयतः प्रउगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रति जनिष्यमाणानिति । एतस्यैव सतः समुद्रूह्यैव[1] श्रोणी प्रत्यायातयति स तथा विहृतो भवति यथा न बहिर्वेदियूपः स्यादिति ।

रथचक्रचितं चिन्वीतेति विज्ञायते । १७९

He is to construct the agni in the shape of a chariot-wheel; such is the tradition.

रथस्य चक्रमिव चीयत इति रथचक्रचित् । पूर्वेष्वाक्षेपवानुक्ते ऽपि श्रुतो गम्यमानायां विज्ञायत इति विशेषप्रतिपादनार्थमुक्तम् । अमुमेव प्रतिपादयति ।

द्वयानि तु खलु रथचक्राणि भवन्ति । १८०

There are indeed two kinds of chariot-wheels.

तुशब्दो ऽवधारणे । तत्र द्विप्रकाराणि लोके रथचक्राणि भवन्त्येव । कानि पुनस्तानि ।

[1]. C. समुद्रुह्य श्रो°

साराणि च प्रधियुक्तानि च । १८१

Namely those with spokes and those having pradhis (i. e. massive wheels consisting of a square piece to which four segments of a circle are attached).

सहारैर्वर्तन्त इति साराणि । प्रधियुक्तानि च । प्रधयो नाम चक्रस्यान्ताः । तद्युक्तानि च ।

अविशेषात्ते मन्यामहे ऽन्यतरस्याकृतिरिति । १८२

As no particular characteristic is mentioned, we adopt both; a description of the form of both (will be given).

ब्राह्मणे रथचक्रचितं चिन्वीतेत्यविशेषेण श्रूयते । तस्मादविशेषात्ते वयं मन्यामहे । अन्यतरस्याकृतिरिति । तस्मादुभयप्रकारं वक्ष्याम इत्यर्थः ।

अथाग्निं विमिमीते यावानग्निः सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वा तस्मिन्यावत्संभवेत्समचतुरस्रं कृत्वा । १८३

He measures the area for the agni; having made a circle equal in area to the agni together with the two aratnis and the prádeśa (i. e. to 7½ square-purushas) and having drawn in that circle a square as large as it can be.

तस्य करण्या द्वादशेनेष्टकाः कारयेदिति वक्ष्यमाणेन संबन्धः । विष्कम्भो मण्डलविधावेव प्रपञ्चितः । मध्ये शङ्कुं निहत्य पञ्चाशीतिशताङ्गुलेन चतुर्दशतिलयुक्तेन परिमण्डलं भ्रमयेत् । तस्य मध्ये विष्कम्भार्धद्विकरण्या सप्ततिलाधिकया द्विषष्टिशतद्वयाङ्गुलया समचतुरस्रं कुर्यात् । चतुरस्राद्बहिः चत्वारः प्रधयः ।

तस्य करण्या द्वादशेनेष्टकाः कारयेत् । १८४

With the twelfth part of the side of this square the bricks are to be made (i. e. bricks the side of which is equal to the twelfth part etc.)

द्वाविंशत्यङ्गुलेन पञ्चतिलोनेन समचतुरस्रकरणम् । चतुरस्रमध्ये चतुश्चत्वारिंशच्छ्लक्ष्णमिष्टकाः शेरते ।

तासाᳬ षट् प्रधावुपधाय शेषमष्टधा विभजेत् । १८५

Six of these are placed into each pradhi (i. e. each segment); the rest (of each pradhi) is divided into eight parts (and covered with eight bricks).

प्रधिमूलमध्ये षट् चतुरस्रा उपधाय तस्य प्रधेः शेषमष्टधा विभजेत् । उपहितानां षण्णां पार्श्वयोर्द्वे द्वे । मुखे चतस्र इति । त्रिकोणमाद्यम् । त्रितिलयुक्तं षड्विंशत्यङ्गुलमेकं फलकम् । सप्ततिलहीनत्रयस्त्रिंशदङ्गुलं द्वितीयम् । तिलत्रयहीनं द्विचत्वारिंशदङ्गुलं तृतीयं कर्णरूपम्[1] । यथा षट्तिलोनाङ्गुलः शरो भवति । द्वितीयस्य षड्विंशत्यङ्गुलं तिलत्रययुक्तमेकं तिर्यक्फलकम् । एकादशतिलयुक्तं द्विचत्वारिंशदङ्गुलं द्वितीयम् । सप्ततिलोनत्रयस्त्रिंशदङ्गुलमेकं पार्श्वम् । षट्त्रिंशदङ्गुलं षड्विंशतिलं पार्श्वान्तरम् । तद् धनुरिव नमयेद् यथा तिलत्रयोनाङ्गुलिः शरो भवति । तृतीयस्याः सार्धविंशत्यङ्गुलमेकं तिर्यक्फलकम् । त्रिंशदङ्गुलकं षोडशतिलहीनं द्वितीयम् । सप्ततिलोनत्रयस्त्रिंशदङ्गुलमेकं पार्श्वम् । चतुस्त्रिंशकं पार्श्वान्तरम् । तद् धनुराकारं नमयेद् यथा षड्विंशतितिलाः शरो भवति । चतुर्थस्य त्रिंशदङ्गुलं षोडशतिलहीनमेकं तिर्यक्फलकम् । सार्धद्वात्रिंशद् द्वितीयम् । सप्ततिलोनत्रयस्त्रिंशदङ्गुलमेकम् । चतुस्तिलोनं त्रयस्त्रिंशदङ्गुलं पार्श्वान्तरं धनुरिव नमयेत् । पञ्चविंशतितिलाः शरः । एतान्यव

1. There seems to be a lacuna after कर्णरूपम्, it not being stated that the hypotenuse of the triangle has to be curved in the form of a bow so as to fit into the periphery of the circle. The M. S. S. read : यथा षट्तिले त्रयोनाङ्गुलः ।

चत्वारि करणान्यन्यस्मिन्प्रध्यर्धे विपर्यासेन भवन्ति । एवमेव चत्वारः प्रधयः । अस्मिन्प्रस्तारे चतुरस्रस्रक्तीरवान्तरदेशान्प्रतिसंपादयेत् ।

अपरं प्रस्तारं तथोपदध्याद्यथा प्रध्यनीकेषु स्रक्तयो भवन्ति । १८६

The second layer is to be placed in that way, that the corners (of the large square) coincide with the centres of the segments (of the first layer). The second layer is therefore composed of exactly the same bricks as the first layer and the rule "bhedán varjayet" is complied with by simply shifting its position by one-eighth of the circumference of the circle.

पूर्वस्मिन्प्रस्तारो महदिषु प्रधयः । इह तेषु प्रध्यनीकेषु प्रधिमध्येषु चतस्रः स्रक्तयः । महादिषु स्रक्तय इत्यर्थः । एतावानेव भेदः पूर्वस्मात्प्रस्तारात् । एवं व्यत्यासेन पञ्च चितयः । इतिकरणः समाप्तिसूचकः ।

अथापरः । १८७

Now we shall describe the other kind of the rathachakrachit.

अनन्तरमपरप्रकारः साररथचक्रचिदुच्यत इत्यर्थः ।

पुरुषार्धात्पञ्चदशेनेष्टकाः समचतुरस्राः कारयेन्मानार्थाः । १८८

With the fifteenth part of half a purusha square bricks are to be made; they are used for measuring (for the measurement of the area of the chiti, not for the construction of the chiti itself).

पुरुषार्धात् । पुरुषक्षेत्रं चतुर्दश सहस्राणि चत्वारि शतान्यङ्गुलयः । तस्यार्धात् द्विशताधिकसप्तसहस्रात् पञ्चदशांशमशीत्यधिकचतुःशताङ्गुलं मूलं गृहीत्वा तेन भागेनेष्टकाः समचतुरस्राः कारयेत् । मानार्थाः । एताभिरिष्टकाभिरग्निमानं वक्ष्यति । तदर्थाः ।

नोपधानार्था: । तच पञ्चदशभागस्य करणीक्लृप्ति: । अशीत्यधिकचतु:-शतमङ्गुलीश्चतुस्त्रिंशत्तिलवर्गेण षट्पञ्चाशच्छताधिकसहस्रेण हत्वा तस्य मूलमानीय तिलवर्गमूलेन चतुस्त्रिंशधा विभज्य लब्धमेकविंश-तिरङ्गुलय एकविंशत्तिला: । तेनेष्टका: समचतुरस्रा: कारयेत् ।

तासां द्वे शते पञ्चविंशतिश्च सारत्निप्रादेश: सप्तविध: संप-द्यते । १८९

Two hundred and twenty-five of these bricks constitute the sevenfold Agni together with the two aratnis and the prádeśa.

तृतीयार्थे षष्ठी । अर्धपुरुषवेषे पञ्चदशेष्टका: शेरते । ता: पञ्चदशभिर्गुणिता: द्वे शते पञ्चविंशतिश्च भवन्ति ।

तास्वन्या: चतु:षष्टिमावपेत् । १९०

To these (two hundred and twenty-five bricks) sixty-four more are to be added.

तासु मानार्थासु । अन्या: तत्सदृशा उक्ताभ्यो ऽतिरिक्ता: चतु: षष्टिमिष्टका आवपेत् । संयोजयेत् । एवमग्निक्षेत्राधिकाभि: सह एकोननवतिशतद्वयं भवन्ति ।

ताभि: समचतुरस्रं करोति । १९१

With these bricks a square is to be formed.

ताभिरेकोननवतिशतद्वयसंख्याकाभि: ।

तस्य षोडशेष्टका पार्श्वमानी भवति । १९२

The side of this square comprises sixteen bricks.

पूर्वेषां चतुरस्राणां प्रदर्शनार्थमिदम् । अग्निक्षेत्रमध्यं परिगृह्य प्रथमं द्वाभ्यां द्वाभ्यां चतुरिष्टकं चतुरस्रं कृत्वा । ततस्त्रिभिस्त्रिभि-

नेवेष्टकम् । ततश्चतुर्भिश्चतुर्भिः षोडशेष्टकमित्यादि । षोडशभिः षट्पञ्चाशच्छतद्वयेष्टकं चतुरस्रं चाच कुर्यादित्यर्थः ।

चयस्त्रिंशदतिशिष्यन्ते । १६३

Thirty-three bricks still remain (after a square of sixteen by sixteen has been formed).

एवं षोडशेष्टकाभिः चतुरस्रे कृत एकोननवतिशतद्वयात् चय-स्त्रिंशदिष्टका अतिरिच्यन्ते ।

ताभिरन्तान्सर्वतः परिचिनुयात् । १६४

These are to be placed on all sides round the borders (of the square ; i. e. according to the commentary on the north side and east side of the square).

ताभिरतिशिष्टाभिरन्तानादित आरभ्य प्रदक्षिणमुपधीयमानत्वा-त्पर्यायापेक्षया बहुवचनम् । पूर्वोत्तरपार्श्वयोरित्यर्थः । पूर्वपार्श्व-मान्यां षोडश । उत्तरपार्श्वमान्यां षोडश । पूर्वोत्तरकोट्यां खण्ड-श्चेच एका । एवं चयस्त्रिंशत् ।

नाभिः षोडश मध्यमाः । १६५

The sixteen middle bricks form the nave of the wheel.

एवमुपहितानामिष्टकानां मध्यमाः । मध्यगताः । षोडशेष्टकाः चक्रस्य. नाभिर्भवति । तच प्रकारः । मध्ये षड्विंशत्यष्टकापार्श्वमानीकं पञ्चविंशेष्टकाचतुरस्रं परिगृह्य तस्य चतुरस्रस्यावान्तरदिक्षु स्रक्तिषु या इष्टकाः तासां मध्येषु शङ्कून्निहत्य स्पन्द्यया परितनोति । एवं षोड-शेष्टकं चतुरस्रं भवति । सा नाभिः ।

चतुःषष्टिरराश्चतुःषष्टिर्वेदिः १८६ ।

Sixty-four bricks form the spokes of the wheel, sixty-four the vedi (that means the empty interstices between the spokes).

शिष्टानामिष्टकानां चतुःषष्टिरिष्टकाश्चक्रस्याराः प्रसिद्धावयवा भवन्ति । वेदिरपि चतुःषष्टिरिष्टकाः । अराणामन्तरालभूमिर्वेदिसंज्ञकनामधेयत्वात् । तत्र स्तरणादयो धर्माः । अराणां वेद्याश्च सह अष्टाविंशतिशतमिष्टकाः । तत्र प्रकारः । चतुरस्रमध्ये त्रयोदशेष्टकापार्श्वमानीकं नवषष्टिशतेष्टकं चतुरस्रं परिगृह्य तस्य चतुरस्रस्य कोटिषु या इष्टकाश्चतस्रस्तासां मध्येषु शङ्कवः स्पन्द्ययावेष्टिता अष्टाविंशतिशतं भवन्ति ।

नेमिः शेषाः । १८७

The remaining bricks (one hundred and forty-five) form the felloe of the wheel.

शेषाः विनियुक्तविशिष्टाः पञ्चचत्वारिंशच्छतमिष्टका नेमिर्भवन्ति । रथचक्रस्य बाह्यावयवो नेमिः ।

नाभिमन्ततः परिलिखेत् । १८८

The nave is to be circumscribed at its borders with a circle (i. e. the square forming the nave is to be turned into a circle).

नाभिः षोडश मध्यमा इत्युक्तम् । तां नाभिमन्ततः सर्वतो लिखेत् । अक्ष्णयार्धमित्यादिना ।

नेमिमन्ततश्चान्तरतश्च परिलिख्य । १८९

After having circumscribed the felloe at its inner and outer edge—(i. e. after having turned the two squarés representing the inner and the outer edge of the felloe into circles).

अन्तत एकोननवतिशतद्वयेष्टकमग्निक्षेत्रम् । अक्ष्णयार्धमित्यादिना मण्डलं परिलिख्य । अन्तरतश्चतुश्चत्वारिंशच्छतपरिमितं चतुरस्रं च मण्डलीकृत्येत्यर्थः । एवमग्निक्षेत्रे त्रीणि मण्डलानि भवन्ति । तत्र ।

नेमिनाभ्योरन्तरालं द्वात्रिंशधा विभज्य विपर्यासं भागानुद्धरेत् । २००

One divides the area lying between nave and felloe into thirty-two parts and takes out the second, fourth, sixth, etc. parts.

मध्यमाद्यमण्डलयोर्मध्यवर्ति क्षेत्रं द्वात्रिंशधा विभज्य नाभेरारभ्यानेम्या द्वात्रिंशतं लेखा लिखित्वा विपर्यासमेकान्तरालं भागानुद्धरेत् ।

एवमावाप उद्धृतो भवति । २०१

In this manner the added part (i. e. the sixty-four bricks by which the square of 289 bricks exceeded the legitimate area of the saptavidha agni) is again removed.

तास्वन्याश्चतुःषष्टिमावपेदित्युक्तास्ता अपनीता भवन्ति । जातावेकवचनम् । अराणां च वेदेश्च तुल्यप्रमाणत्वादिति भावः । एवमराः षोडश भवन्ति । तावदन्तरालाः ।

नेमिं चतुःषष्टिं कृत्वा व्यवलिख्य मध्ये परिकृषेत् । २०२

Having divided the felloe into sixty-four parts and having drawn the separating lines, describe a circle in the middle (of the felloe).

Digitized by Google

नेमिप्रदेशमभ्यन्तरदेशादारभ्याबाह्यान्ताच्चतुःषष्टिं कृत्वा चतुःषष्टिभागान्समान्कृत्वा तत्र द्वितीये प्रस्तार अरा नेमिं प्रविशन्ति । तत्र भेदो यथा न भवति तथा ऽराणां पार्श्वदेशभागान्षोडशभागान् कृत्वैकैकं भागं समशश्चतुरो भागान्कृत्वा व्यवलिख्य व्यवधामालिख्य नेमिं मध्ये परिकृषेत् सर्वतः कृषेत् ।

ता अष्टाविंशतिशतं भवन्ति । २०३

Thus we get one hundred and twenty-eight (bricks placed in the felloe).

बाह्याश्चतुःषष्टिः । तासामेकं करणम् । अन्ततश्चतुःषष्टिः । तासामेकं करणम् ।

अरांश्चतुर्धा विभजेत् । २०४

Each spoke is to be divided into four parts.

अरांश्चतुर्धा विभज्य लेखाः कुर्यात् । तासां चत्वारि (करणानि ?) । ताश्चतुःषष्टिः ।

नाभिमष्टधा विभजेत् । २०५

The nave is to be divided into eight parts.

अत्रापि द्वितीयप्रस्तारानुगुणं विभागः । अरप्रदेशमध्येषु लेखा इत्यर्थः । तास्त्रिभुजाः । तासामेकं करणं बाह्यफलकं धनुर्वक्रम् । एवं सप्त करणानि । एष प्रथमः प्रस्तारः । एवं शतद्वयसंपत्तिः । तत्र मध्ये भेदो न परिहरणीयः । न स्रक्तिपार्श्वयोरित्युक्तम् ।

Digitized by Google

अपरस्मिन्प्रस्तारे । २०६

In the second layer.

उपधानमुच्यत इति शेषः ।

नाभिमन्ततश्चतुर्थवेलायां परिकृषेत् । २०७

—— a circle is to be described in the nave at the distance of a quarter from the edge.

अन्तत अरसंयोगदेशे चतुर्थवेलायां मध्यादारभ्य बाह्यतो नाभिचतुर्थमवशिष्य परिलिखेत् ।

नेमिमन्तरतः । २०८

(In the same manner a circle is to be described) in the felloe (at the distance of a quarter) from its inner edge.

अरसंयोगदेशे नेमिमभ्यन्तरतो नेमिप्रमाणचतुर्थभागे ऽतीते परिकृषेत् ।

नेमिमन्तरतश्चतुःषष्टिं कृत्वा व्यवलिखेत् । २०९

After having divided the felloe at its inner edge into sixty-four parts, draw the dividing lines.

नेम्यन्तरं परिकर्षणबाह्यभागं चतुःषष्टिं कृत्वेत्यादि । अथ प्रथमप्रस्तारलेखानां मध्येषु लेखास्तासामेकं करणम् ।

अराणां पञ्चधा विभाग आपरिकर्षणयोः । २१०

The spokes are divided into five parts, each up to the two circles (in nemi and nábhi).

I. e: the area of a spoke is considered to reach into the felloe and the nave up to the two circles which had been drawn in them at the distance of a quarter from the edge, and this whole area is divided into five parts.

अराणां भेदपरिहारेण पञ्चधा विभागः । आपरिकर्षणयोः । परिकर्षणशब्देन नेमिनाभ्युदरेषु प्रविष्टचतुर्थांशावुच्येते । ताभ्यामराणां भेदपरिहारेण पञ्चधा विभाग इत्यर्थः । ता अशीतिरिष्टकाः । तासां पञ्च करणानि ।

नेम्यामन्तरालेषु द्वे द्वे ॥ २११

Two bricks are placed in each of the interstices in the felloe.

अराणामन्तरालेषु वेदिप्रदेशसमीपे नेम्यां द्वे द्वे इष्टके । अराणां नेम्यां प्रविष्टत्वान्न नेमिचतुर्भागाः । वेदिविस्तारभूमयः संभवन्ति । तासामनूचीनां विभागः । तासामेकं करणम् । ता द्वात्रिंशत् ।

नाभ्यन्तरालेष्वेकैकाम् । २१२

One brick is to be placed in each of the interstices in the nave.

अराणां नाभौ प्रविष्टत्वान्नाभिचतुर्थांशा वेदिविस्तारभूमयः संभवन्ति । तेष्वेकामिष्टकाम् । ताः षोडश ।

यच्छेषं नाभेस्तदष्टधा विभजेत् । २१३

The remainder of the nave is to be divided into eight parts.

चतुर्थवेलायां परिकृषेदित्युक्तम् । तत अभ्यन्तरमित्यर्थः । तद्वेदपरिहारेणाष्टधा विभजेदित्यर्थः । तासामेकं करणम् । ता अष्टाविष्टकाः । एवं नव करणानि । नेम्यन्त एकम् । नेम्यन्तराल एकम् । अरेषु पञ्च । नाभ्यन्तराल एकम् । नाभिशेष एकम् । इष्टकास्तु नाभ्यामष्टौ । नाभ्यन्तरालेषु षोडश । अरेष्वशीतिः । नेम्यन्तरालेषु द्वात्रिंशत् । नेम्यन्तरेषु चतुःषष्टिः । एवं द्विशतपूर्तिः । एवमिष्टकाविभागे नव करणान्युक्तानि भवन्ति । सर्वेष भूमौ लिखित्वेष्टकाः कारयेत् ।

स एष षोडशकरणः सारो रथचक्रचित् । २१४

This is the construction in the shape of a wheel with spokes, which requires altogether sixteen different kinds of bricks.

उत्तरपटलो ऽपि द्रष्टव्यः । पूर्वेष सप्त । अपरस्मिन्नव । सुखग्रहणार्थं करणानां ग्रहणम् । अथ कल्पोक्तो विधिरनुसंधेयः । तत्रैवमुक्तम् । रथचक्रचितं चिन्वीत भ्रातृव्यवानिति विज्ञायते । आकृतिविकारस्य सशब्दसंयोगाद्यावानग्निः सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वा ऽनुशर्करमिष्टकाः परिचिनोति । अथान्तरतो ऽथान्तरत एव नव स्वयमातृण्णायाः । अथ स्वयमातृण्णाया मध्ये नाभिमिव करोति । तस्यानुदिशमवान्तरदिगन्तराणि च नेमिमिवेष्टका आयातयति । स एष रथचक्रचिद् भ्रातृव्यवतः परिकृष्यत इति । तत्र परिकर्षणं मण्डलकर्षणम् ।

REGISTERED No. 2.

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 10. MARCH 1st 1877. Vol. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

षष्ठाध्यायस्य तृतीयः पादः ।

अलुगुत्तरपदे ॥ १ ॥

अलुगिति च उत्तरपदे इति च एतदधिकृतं वेदितव्यम् । यदित ऊर्ध्वमनुक्रमिष्यामो ऽलुगुत्तरपदइत्येवं तद्वेदितव्यम् । वक्ष्यति पञ्चम्याः स्तोकादिभ्यः । स्तोकान्मुक्तः । अल्पान्मुक्तः । उत्तरपदइति किम् । निष्क्रान्तः स्तोकात्, निस्तोकः । अन्यार्थमिदमुत्तरपदग्रहणमिहाप्य-लुको निवृत्तिं करोतीत्येवमर्थं लक्षणप्रतिपदोक्तपरिभाषा नाश्रयितव्या । अलुगधिकारः प्रागानङः । उत्तरपदाधिकारः प्रागङ्गाधिकारात् ॥

पञ्चम्याः स्तोकादिभ्यः ॥ २ ॥

स्तोकान्तिकदूरार्थकृच्छ्राणि स्तोकादीनि तेभ्यः परस्याः पञ्चम्या उत्तरपदे ऽलुग्भवति । स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादागतः । अभ्याशादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । समासे कृते प्रातिपदिकत्वात्सुपो लुकि प्राप्ते प्रतिषेधः क्रियते । द्विवचनबहुव-चनान्तानां तु स्तोकादीनामनभिधानात्समास एव न भवति स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति । तेनात्र न कदा चिदप्येकपद्यमैकस्वर्यं च भवति ॥ ब्राह्मणाच्छंसिन उपसंख्यानम् ॥ * ॥ ब्राह्मणादादाय शंसतीति, ब्राह्मणाच्छंसीति ऋत्विग्विशेषस्य * रूढिरियम् । तस्य व्युत्पत्तिरसता सता वाक्यवार्थेन क्रियते ॥

ओजःसहोम्भस्तमसस्तृतीयायाः ॥ ३ ॥

ओजस् सहस् अम्भस् तमस् इत्येतेभ्य उत्तरस्यास्तृतीयाया अलुग्भवति उत्तरपदे । ओजसाकृतम् । सहसाकृतम् । अम्भसाकृतम् । तमसाकृतम् ॥ अञ्जस उपसंख्यानम् ॥ * ॥ अञ्जसाकृतम् ॥ पुंसानुजो

* विशेषस्य कस्य चिदिति पुस्तकान्तरे ऽधिकम् ।

जनुषान्ध इति वक्तव्यम् ॥ * ॥ पुंसानुजः । पुंसा हेतुनानुजः । जनुषान्धः । जनुषा हेतुना ऽन्धः । तृतीयेति योगविभागात्समासः । जनुरिति जन्मनो नामधेयम् * ॥

मनसः संज्ञायाम् ॥ ४ ॥

मनस उत्तरस्यास्तृतीयायाः संज्ञायामलुग्भवति । मनसादत्ता । मनसागुप्ता । मनसासंगता । संज्ञायामिति किम् । मनोदत्ता । मनोगुप्ता ॥

आज्ञायिनि च ॥ ५ ॥

आज्ञायिन्युत्तरपदे मनस उत्तरस्यास्तृतीयाया अलुग्भवति । मनसा ऽऽज्ञातुं शीलमस्य, मनसाज्ञायी ॥

आत्मनश्च पूरणे ॥ ६ ॥

आत्मन उत्तरस्यास्तृतीयायाः पूरणप्रत्ययान्तउत्तरपदे ऽलुग्भवति । आत्मनापञ्चमः । आत्मनाषष्ठः । तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया । तृतीयेति योगविभागात्समासः । आत्मना वा कृतः पञ्चम, आत्मनापञ्चमः । कथं जनार्दनस्त्वात्मचतुर्थ एवेति । बहुव्रीहिरयमात्मा चतुर्थो ऽस्यासावात्मचतुर्थः ॥

वैयाकरणाख्यायां चतुर्थ्याः ॥ ७ ॥

वैयाकरणस्याख्या वैयाकरणाख्या । आख्या संज्ञा । यया संज्ञया वैयाकरणा एव व्यवहरन्ति तस्यामात्मन उत्तरस्याश्चतुर्थ्या अलुग्भवति । आत्मनेपदम् । आत्मनेभाषा । तादर्थ्ये चतुर्थी । चतुर्थीति योगविभागात्समासः ॥

परस्य च ॥ ८ ॥

परस्य च या चतुर्थी तस्या वैयाकरणाख्यायामलुग्भवति । परस्मैपदम् । परस्मैभाषा ॥

हलदन्तात्सप्तम्याः संज्ञायाम् ॥ ९ ॥

---

* पुंसा हेतुनेत्यारभ्य नामधेयमित्यन्तोपपाठः पदमञ्जर्यां सत्त्वात्

हलन्तादद्न्ताच्चोत्तरस्याः सप्तम्याः संज्ञायामलुग्भवति । युधिष्ठिरः । त्वचिसारः । गविष्ठिर इत्यत्र गवियुधिभ्यां स्थिर इत्यत एव वचनादलुक् । अदन्तात् । अरण्येतिलकाः । अरण्येमाषकाः । वनेकिंशुकाः । वनेहरिद्रकाः । वनेबल्बजकाः । पूर्वाह्णेस्फोटकाः । कूपेपिशाचकाः । हलदन्तादिति किम् । नद्यां कुक्कुटिका, नदीकुक्कुटिका । भूम्यां पाशाः, भूमिपाशाः । संज्ञायामिति किम् । अक्षशौण्डः ॥ हृद्द्युभ्यां ङेः ॥ * ॥ हृद् दिव् इत्येताभ्यामुत्तरस्य ङेरलुक् भवति । हृदिस्पृक् । दिविस्पृक् ॥

कारनाम्नि च प्राचां हलादौ ॥ १० ॥

प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या अलुग्भवति । सूपेशाणः * । दृषदिमाषकः । हलेद्विपदिका । हलेत्रिपदिका । कारविशेषस्य संज्ञा एताः तत्र पूर्वेणैव सिद्धे नियमार्थमिदम् । एते च त्रयो नियमविकल्पा अत्रेष्यन्ते । कारनाम्न्येव प्राचामेव हलादावेवेति । कारनाम्नीति किम् । अभ्यर्हिते पशुः, अभ्यर्हितपशुः । कारादन्यस्यैतद्द्वयस्य नाम । प्राचामिति किम् । यूथेपशुः, यूथपशुः । हलादाविति किम् । अविकटे उरणः, अविकटोरणः । हलदन्तादित्येव । नद्यां दोहनी, नदीदोहनी ॥

मध्याद्गुरौ ॥ ११ ॥

मध्यादुत्तरस्याः सप्तम्या गुरावुत्तरपदे ऽलुग्भवति । मध्येगुरुः ॥ अन्ताच्चेति वक्तव्यम् ॥ * ॥ अन्तेगुरुः । सप्तमीति योगविभागात्समासः ॥

अमूर्द्धमस्तकात् स्वाङ्गादकामे ॥ १२ ॥

मूर्द्धमस्तकवर्जितात्स्वाङ्गादुत्तरस्याः सप्तम्या अकामउत्तरपदे ऽलुग्भवति । कण्ठे कालोस्य, कण्ठेकालः । उरसिलोमा । उदरेमणिः । अमूर्द्धमस्तकादिति किम् । मूर्द्धशिखः । मस्तकशिखः । अकाम इति किम् । मुखे कामो ऽस्य, मुखकामः । स्वाङ्गादिति किम् । अक्षशौण्डः । हलदन्तादित्येव । अङ्गुलित्राणः । जङ्घावलिः ॥

* मुकुटेकार्षापणमित्यधिकं पुस्तकान्तरे ।

बन्धे च विभाषा ॥ १३ ॥

बन्ध इति घञन्तो गृह्यते । तस्मिन्नुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या विभाषा ऽलुग्भवति । हस्तेबन्धः । हस्तबन्धः । चक्रेबन्धः । चक्रबन्धः । उभयत्र विभाषेयम् । स्वाङ्गाद्बहुव्रीहौ पूर्वेण नित्यमलुक् प्राप्नोति । तत्पुरुषे तु स्वाङ्गादस्वाङ्गाच्च नेन्सिद्धबध्नातिषु चेति प्रतिषेधः प्राप्नोति । हलदन्तादित्येव । गुप्तिबन्धः * ॥

तत्पुरुषे कृति बहुलम् ॥ १४ ॥

तत्पुरुषे समासे कृदन्त उत्तरपदे सप्तम्या बहुलमलुग्भवति । स्तम्बेरमः । कर्णेजपः । न च भवति कुरुचरो मद्रचरः ॥

प्रावृट्शरत्कालदिवां जे ॥ १५ ॥

प्रावृट् शरत् काल दिव् इत्येतेषां ज उत्तरपदे सप्तम्या अलुग्भवति । प्रावृषिजः । शरदिजः । कालेजः । दिविजः । पूर्वस्यैवायं प्रपञ्चः ॥

विभाषा वर्षक्षरशरवरात् ॥ १६ ॥

वर्ष क्षर शर वर इत्येतेभ्य उत्तरस्याः सप्तम्या ज उत्तरपदे विभाषा ऽलुग्भवति । वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । शरेजः । शरजः । वरेजः । वरजः ॥

घकालतनेषु कालनाम्नः ॥ १७ ॥

घसंज्ञके प्रत्यये कालशब्दे तनप्रत्यये च परतः कालनाम्न उत्तरस्याः सप्तम्या विभाषा ऽलुग्भवति । घ । पूर्वाह्णेतरे । पूर्वाह्णतरे । पूर्वाह्णेतमे । पूर्वाह्णतमे । काल । पूर्वाह्णेकाले । पूर्वाह्णकाले । तन । पूर्वाह्णेतने । पूर्वाह्णतने । कालनाम्न इति किम् । शुक्लतरे । शुक्लतमे । हलदन्तादित्येव । रात्रितरायाम् । उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नेष्यते । हृदयस्य हृल्लेखेति लेखग्रहणाल्लिङ्गात् । तेन घतनग्रहणे तदन्तग्रहणं न भवति । कालेति स्वरूपग्रहणम् ॥

---

* कारिकाबन्ध इत्यधिकमेकस्मिन् पुस्तके ।

अयवासवासिष्वकालात् ॥ १८ ॥

अय वास वासिन् इत्येतेषूत्तरपदेष्वकालवाचिन उत्तरस्याः सप्तम्या विभाषा ऽलुग्भवति। खेशयः। खशयः। ग्रामेवासः। ग्रामवासः। ग्रामेवासी। ग्रामवासी। अकालादिति किम्। पूर्वाह्णशयः। हलन्तादित्येव। भूमिशयः॥ अपो योनियन्मतुषु सप्तम्या अलुग्वक्तव्यः॥ * ॥ अप्सुयोनिः। अप्सव्यः। अप्सुमन्तौ। अप्सु भव इति दिगादित्वाद्यत्प्रत्ययः। सर्वत्र सप्तमीति योगविभागात्समासः॥

नेन्सिद्धबध्नातिषु च ॥ १९ ॥

इवन्ते सिद्धशब्दे बध्नातौ च परतः सप्तम्या अलुग्न भवति। स्थण्डिलशायी *। सिद्ध। सांकाश्यसिद्धः। काम्पिल्यसिद्धः। बध्नाति। चक्रबन्धकः। चरकबन्धकः। सप्तमीति योगविभागात्समासः। चक्रबन्ध इति के चिदुदाहरन्ति तत्पचाद्यजन्तं द्रष्टव्यम्। घञन्ते हि बन्धे च विभाषेत्युक्तम्॥

स्थे च भाषायाम् ॥ २० ॥

स्थे चोत्तरपदे भाषायां सप्तम्या अलुग्न भवति। समस्थः। विषमस्थः। कूटस्थः। पर्वतस्थः। भाषायामिति किम्। कृष्णोस्याखरेष्ठः। पूर्वपदादिति षत्वम्॥

षष्ठ्या आक्रोशे ॥ २१ ॥

आक्रोशे गम्यमाने उत्तरपदे षष्ठ्या अलुग्भवति। चौरस्यकुलम्। वृषलस्यकुलम्। आक्रोशइति किम्। ब्राह्मणकुलम्॥ षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु यथासंख्यमलुग्वक्तव्यः॥ * ॥ वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः॥ आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति चालुग्वक्तव्यः॥ * ॥ अमुष्यापत्यमामुष्यायणः। नडादित्वात् फक्। अमुष्य पुत्रस्य भाव, आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। तथा आमुष्यकु-

* स्थण्डिलवर्तीत्यधिकमन्यत्र पुस्तके।

लिकेति ॥ देवानां प्रिय इत्यत्र च षष्ठ्या अलुग् वक्तव्यः ॥ * ॥ देवानांप्रियः ॥ शेपपुच्छलाङ्गूलेषु शुनः संज्ञायां षष्ठ्या अलुग्वक्तव्यः ॥ * ॥ शुनःशेपः । शुनःपुच्छः । शुनोलाङ्गूलः ॥ दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः ॥ * ॥ दिवोदासाय गायति ॥

पुत्रे ऽन्यतरस्याम् ॥ २२ ॥

पुत्रशब्द उत्तरपदे आक्रोशे गम्यमाने ऽन्यतरस्यां षष्ठ्या अलुग्भवति । दास्याः पुत्रः, दासीपुत्रः । वृषल्याः पुत्रः, वृषलीपुत्रः । आक्रोशइत्येव । ब्राह्मणीपुत्रः ॥

ऋतो विद्यायोनिसंबन्धेभ्यः ॥ २३ ॥

ऋकारान्तेभ्यो विद्यासंबन्धवाचिभ्यो योनिसंबन्धवाचिभ्यश्चोत्तरस्याः षष्ठ्या अलुग्भवति । होतुरन्तेवासी । होतुःपुत्रः । पितुरन्तेवासी । पितुःपुत्रः । ऋत इति किम् । आचार्यपुत्रः । मातुलपुत्रः ॥ विद्यायोनिसंबन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम् ॥ विद्यायोनिसंबन्धवाचिन्येवोत्तरपदे यथा स्यादन्यत्र मा भूत् । होतृधनम् । पितृधनम् । होतृगृहम् । पितृगृहम् ॥

विभाषा स्वसृपत्योः ॥ २४ ॥

स्वसृ पति इत्येतयोरुत्तरपदयोर्ऋकारान्तेभ्यो विद्यायोनिसंबन्धवाचिभ्यो विभाषा ऽलुग्भवति । मातुःष्वसा । मातुःस्वसा । मातृष्वसा । पितुःष्वसा । पितुःस्वसा । पितृष्वसा । यदा लुक् तदा मातृपितृभ्यां स्वसेति नित्यं षत्वम् । यदा त्वलुक् तदा मातुःपितुर्भ्यामन्यतरस्यामिति विकल्पेन षत्वम् । दुहितुः पतिः । दुहितृपतिः । ननान्दुः पतिः । ननान्दृपतिः ॥

आनङ् ऋतो द्वन्द्वे ॥ २५ ॥

ऋकारान्तानां विद्यायोनिसंबन्धवाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति । होतापोतारौ । नेष्टोद्गातारौ । प्रशास्ताप्रतिहर्त्तारौ । योनिसंबन्धेभ्यः । मातापितरौ । याताननान्दरौ । नकारोच्चारणं रपरत्वनिवृत्त्यर्थम् । ऋत इति किम् । पितृपितामहौ । पुत्रइत्यनुवर्त्तते

ऋत इति च। तेन पुत्रशब्देऽप्युत्तरपदे ऋकारान्तस्यानङादेशो भवति। पितापुत्रौ। मातापुत्रौ॥

देवताद्वन्द्वे च॥ २६॥

देवतावाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति। इन्द्रावरुणौ। इन्द्रासोमौ। इन्द्राबृहस्पती। द्वन्द्व इति वर्त्तमाने पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यार्थम्। अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्व इति निपात्यते। तत्र ये लोके प्रसिद्धसाहचर्याः वेदे च सहभावेन ये निर्दिष्टास्तेषामिह ग्रहणं भवति। तेन ब्रह्मप्रजापती शिववैश्रवणावित्येवमादौ न भवति॥ उभयत्र वायोः प्रतिषेधो वक्तव्यः॥ *॥ अग्निवायू। वाय्वग्नी॥

ईदग्नेः सोमवरुणयोः॥ २७॥

सोम वरुण इत्येतयोर्देवताद्वन्द्वे ऽग्नेरीकारादेशो भवति। अग्नीषोमौ। अग्नीवरुणौ। अग्नेः स्तुत्स्तोमसोमा इति षत्वम्॥

इद्वृद्धौ॥ २८॥

कृतवृद्धावुत्तरपदे देवताद्वन्द्वे ऽग्नेरिकारादेशो भवति। आग्निवारुणीमनड्वाहीमालभेत। आग्निमारुतं कर्म्म क्रियते। अग्नीवरुणौ देवता ऽस्य अग्नीमरुतौ देवतास्येति तद्धितः। तत्र देवताद्वन्द्वे चेत्युभयपदवृद्धौ कृतायामानङ् ईत्वं च बाधितुमिकारः क्रियते। वृद्धाविति किम्। आग्नेन्द्रः। नेन्द्रस्य परस्येत्युत्तरपदवृद्धिः प्रतिषिध्यते॥ इद्वृद्धौ विष्णोः प्रतिषेधो वक्तव्यः॥ *॥ आग्नावैष्णवं चरुं निर्वपेत्॥

दिवो द्यावा॥ २९॥

दिवित्येतस्य द्यावा इत्ययमादेशो भवति देवताद्वन्द्वे उत्तरपदे। द्यावाक्षामा। द्यावाभूमी *॥

दिवसश्च पृथिव्याम्॥ ३०॥

पृथिव्यामुत्तरपदे देवताद्वन्द्वे दिवो दिवसित्ययमादेशो भवति चकाराद् द्यावा च। दिवस्पृथिव्यौ। द्यावापृथिव्यौ। अकारोच्चारणं

* द्यौश्च पृथिवी च द्यावापृथिव्यौ इत्यधिकं पुस्तकान्तरे।

सकारस्य विकाराभावप्रतिपत्त्यर्थम् । तेन इत्यादीनि न भवन्ति । कथं द्यावा चिदस्मै पृथिवी नमेते इति । कर्तव्योऽत्र यत्नः ॥

उषासोषसः ॥ ३१ ॥

उषस उषासा इत्ययमादेशो भवति देवताद्वन्द्वे उत्तरपदे । उषासासूर्यम् । उषासानक्ता ॥

मातरपितरावुदीचाम् ॥ ३२ ॥

मातरपितरावित्युदीचामाचार्याणां मतेनारङादेशो मातृशब्दस्य निपात्यते । मातरपितरौ । उदीचामिति किम् । मातापितरौ ॥

पितरामातरा च च्छन्दसि ॥ ३३ ॥

पितरामातरा इति छन्दसि निपात्यते । आ मा गन्तां पितरा मातरा च । पूर्वपदस्य आराङादेशो निपात्यते । उत्तरपदे तु सुपां सुलुगिति आकारादेशः । तत्र ऋतो ङिसर्वनामस्थानयोरिति गुणः । छन्दसि किम् । मातापितरौ ॥

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥ ३४ ॥

भाषितः पुमान्येन समानायामाकृतावेकस्मिन्प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दः, तदेतदेवं कथं भवति, भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते, तस्य प्रतिपादको यः शब्दः सोऽपि भाषितपुंस्कः । ऊङो ऽभावो ऽनूङ्, भाषितपुंस्कादनूङ् यस्मिन् स्त्रीशब्दे स भाषितपुंस्कादनूङ् स्त्रीशब्दः । बहुव्रीहिरयमलुग् निपातनात् पञ्चम्यास्तस्य भाषितपुंस्कादनूङः स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति समानाधिकरण उत्तरपदे स्त्रीलिङ्गे पूरणीप्रियादिवर्जिते । दर्शनीयभार्यः । श्लक्ष्णचूडः । दीर्घजङ्घः । स्त्रिया इति किम् । ग्रामणि ब्राह्मणकुलं दृष्टिरस्य, ग्रामणिदृष्टिः । भाषितपुंस्कादिति किम् । खट्वाभार्यः । समानायामाकृताविति किम् । द्रोणीभार्यः । कथं गर्भिभार्यः, प्रसूतभार्यः, प्रजातभार्य इति । कर्तव्योऽत्र यत्नः । अनूङ इति किम् । ब्रह्मबन्धूभार्यः । समानाधिकरण इति किम् ।

कल्याण्या माता, कल्याणीमाता । स्त्रियामिति किम् । कल्याणी प्रधानमेषां कल्याणीप्रधाना इमे । अपूरणीति किम् । कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीदशमाः । प्रधानपूरणीग्रहणं कर्तव्यमिह मा भूत्, कल्याणपञ्चमीकः पक्ष इति । अप् पूरणीप्रमाण्योरित्यत्रापि प्रधानपूरणीग्रहणमेवेत्यप्प्रत्ययो न भवति । अप्रियादिष्विति किम् । कल्याणीप्रियः । प्रिया । मनोज्ञा । कल्याणी । सुभगा । दुर्भगा । भक्तिः । सचिवा । अम्बा । कान्ता । क्षान्ता । समा । चपला । दुहिता । वामा ॥ दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वात् सिद्धमिति समाधेयम् ॥

तसिलादिष्वाकृत्वसुचः ॥ ३५ ॥

पञ्चम्यास्तसिलित्यतः प्रभृति संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति प्रागेतस्माद् ये प्रत्ययास्तेषु भाषितपुंस्कादनूङ्स्त्रियाः पुंवद्भवति । तस्याः शालायाः ततः । तस्यां तत्र । यस्या यतः । यस्यां यत्र । तसिलादिषु परिगणनं कर्तव्यम् । त्रतसौ । तरप्तमपौ । चरट्जातीयरौ । कल्पब्देश्यदेशीयरः । रूपप्पाशपौ । थम्थालौ । दार्हिलौ । तिल्थातिलौ ॥ शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः ॥ * ॥ बह्वीभ्यो देहि । अल्पाभ्यो देहि । बहुशो देहि । अल्पशो देहि ॥ त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः ॥ * ॥ पट्व्या भावः, पटुत्वम् । पटुता । गुणवचनस्येति किम् । कठ्या भावः, कठीत्वं, कठीता ॥ भस्याढे तद्धिते पुंवद्भावो वक्तव्यः ॥ * ॥ हस्तिनीनां समूहो, हास्तिकम् । अढइति किम् । श्यैनेयः । रौहिणेयः । कथमग्नायी देवता ऽस्य आग्नेयः स्थालीपाक इति । कर्तव्योऽत्र यत्नः ॥ ठक्छसोश्च पुंवद्भावो वक्तव्यः ॥ * ॥ भवत्याश्छात्रा भावत्काः । भवदीयाः ॥

क्यङ्मानिनोश्च ॥ ३६ ॥

क्यङि परतो मानिनि च स्त्रिया भाषितपुंस्कादनूङ् पुंवद्भवति । एनी । एतायते । श्येनी । श्येतायते । मानिनि । दर्शनीयमानी अय-

Digitized by Google

मस्याः । दर्शनीयमानिनीयमस्याः । मानिनो ग्रहणमस्त्र्यर्थमसमानाधिकरणार्थं च । इह तु दर्शनीयामात्मानं मन्यते दर्शनीयमानिनीति पूर्वेणैव सिद्धम् ॥

न कोपधायाः ॥ ३७ ॥

कोपधायाः स्त्रियाः पुंवद्भावो न भवति । पाचिकाभार्यः । कारिकाभार्यः । वृजिकाभार्यः । मद्रिकाभार्यः । मद्रिकाकल्पा । मद्रिकायते । वृजिकायते । मद्रिकामानिनी । वृजिकामानिनी । विलेपिकाया धर्म्यं वैलेपिकम् ॥ कोपधप्रतिषेधे तु तद्धितग्रहणं कर्त्तव्यम् ॥ * ॥ इह मा भूत्, पाकभार्यो भेकभार्य इति ॥

संज्ञापूरण्योश्च ॥ ३८ ॥

संज्ञायाः पूरण्याश्च स्त्रियाः पुंवद्भावो न भवति । दत्ताभार्यः । गुप्ताभार्यः । दत्तापाशा । गुप्तापाशा । दत्तायते । गुप्तायते । दत्तामानिनी । गुप्तामानिनी । पूरण्याः । पञ्चमीभार्यः । दशमीभार्यः । पञ्चमीपाशा । दशमीपाशा । पञ्चमीयते । दशमीयते । पञ्चमीमानिनी । दशमीमानिनी ॥

वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥ ३९ ॥

नेति वर्त्तते । वृद्धेर्निमित्तं यस्मिन् स वृद्धिनिमितस्तद्धितः स यदि रक्तेर्थे विकारे च न विहितः, तदन्तस्य स्त्रीशब्दस्य न पुंवद्भवति । स्रौघ्नीभार्यः । माथुरीभार्यः । स्रौघ्नीपाशा । माथुरीपाशा । स्रौघ्नीयते । माथुरीयते । स्रौघ्नीमानिनी । माथुरीमानिनी । वृद्धिनिमित्तस्येति किम् । मध्यमभार्यः । तद्धितस्येति किम् । काण्डलावभार्यः । बहुव्रीहिपरिग्रहः किमर्थः । तावद्भार्यः । यावद्भार्यः । अरक्तविकारइति किम् । कषायेण रक्ता काषायी, काषायी बृहतिका यस्य स काषायबृहतिकः । लोहस्य विकारो लौही, लौही ईषा यस्य रथस्य स लौहेषः * ॥

स्वाङ्गाच्चेतो ऽमानिनि ॥ ४० ॥

* स्वाङ्गादेव इति पुस्तकान्तरे ऽधिकम् ।

स्वाङ्गादुत्तरो य ईकारस्तदन्तायाः स्त्रिया न पुंवद्भवति अमानिनि परतः। दीर्घकेशीभार्यः। दीर्घकेशीपाशा। श्लक्ष्णकेशीपाशा। दीर्घकेशीयते। श्लक्ष्णकेशीयते। स्वाङ्गादिति किम्। पटुभार्यः। ईत इति किम्। अकेशभार्यः। अमानिनीति किम्। दीर्घकेशमानिनी॥

जातेश्च॥ ४१॥

जातेश्च स्त्रिया न पुंवद्भवति अमानिनि परतः। कठीभार्यः। बह्वृचीभार्यः। कठीपाशा। बह्वृचीपाशा। कठीयते। बह्वृचीयते। अमानिनीत्येव। कठमानिनी। बह्वृचमानिनी॥ अयं प्रतिषेध औपसंख्यानिकस्य पुंवद्भावस्य नेष्यते॥ हस्तिनीनां समूहो, हास्तिकम्।

पुंवत्कर्मधारयजातीयदेशीयेषु॥ ४२॥

कर्मधारये समासे जातीय देशीय इत्येतयोश्च प्रत्यययोर्भाषितपुंस्कादनूङ्स्त्रियाः पुंवद्भवति। प्रतिषेधार्थोयमारम्भः। न कोपधाया इत्युक्तं तत्रापि भवति। पाचकवृन्दारिका। पाचकजातीया। पाचकदेशीया। संज्ञापूरण्योश्चेत्युक्तं तत्रापि भवति। दत्तवृन्दारिका। दत्तजातीया। दत्तदेशीया। पूरण्याः। पञ्चमवृन्दारिका। पञ्चमजातीया। पञ्चमदेशीया। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे इत्युक्तं तत्रापि भवति। स्रौघ्नवृन्दारिका। स्रौघ्नजातीया। स्रौघ्नदेशीया। स्वाङ्गाच्चेतोऽमानिनीत्युक्तं तत्रापि भवति। श्लक्ष्णमुखवृन्दारिका। श्लक्ष्णमुखजातीया। श्लक्ष्णमुखदेशीया। जातेश्चेत्युक्तं तत्रापि भवति। कठवृन्दारिका। कठजातीया। कठदेशीया। भाषितपुंस्कादित्येव। खट्वावृन्दारिका। अनूङित्येव। ब्रह्मबन्धूवृन्दारिका॥ कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः॥ *॥ कुक्कुट्या अण्डं, कुक्कुटाण्डम्। मृग्याः पदं, मृगपदम्। मृग्याः क्षीरं, मृगक्षीरम्। काक्याः शावः, काकशावः। नवा ऽस्त्रीपूर्वपदस्य विवक्षितत्वात्। स्त्रीत्वेन विना पूर्वपदार्थोऽत्र जातिः सामान्येन विवक्षितः। पुंवद्भावात् ह्रस्वत्वं खित्घादिषु भवति विप्रतिषेधेन। खित्। कालिंमन्या। हरिणिमन्या। घादि। पट्वितरा। पट्वितमा।

पट्टिरूपा । पट्टिकल्पा । क । पट्टिका । मृट्टिका । इहेडविड् दरद् पृथु उषि-ज्जित्येते जनपदशब्दाः क्षत्रियवाचिनः । तत्र तद्राजप्रत्ययस्य स्त्रियामत-श्चेति लुकिकृते इडविट्वृन्दारिकेति विगृह्य समासः क्रियते । ततः पुंवद्भावेन ऐडविडादयः पुंशब्दाः क्रियन्ते । ऐडविडवृन्दारिका । औशिज-वृन्दारिका * ॥

घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योनेकाचो ह्रस्वः ॥ ४३ ॥

घ रूप कल्प चेलट् ब्रुव गोत्र मत हत इत्येतेषु परतो भाषित-पुंस्कात्परो यो ङीप्रत्ययस्तदन्तस्यानेकाचो ह्रस्वो भवति । घ । ब्राह्मणि-तरा । ब्राह्मणितमा । रूपप् । ब्राह्मणिरूपा । कल्पप् । ब्राह्मणिकल्पा । चेलट् । ब्राह्मणिचेली । ब्रुव । ब्राह्मणिब्रुवा । गोत्र । ब्राह्मणिगोत्रा । मत । ब्राह्मणिमता । हत । ब्राह्मणिहता । घरूपकल्पाः प्रत्ययाश्चेल-डादीन्युत्तरपदानि । ब्रुवइति ब्रवीतीति ब्रुवः पचाद्यचि वच्यादेशो गुणश्च निपातनाच्च भवति । ङ्य इति किम् । दत्तातरा । गुप्तातरा । अनेकाच इति किम् । नद्याः शेषस्यान्यतरस्यामिति वक्ष्यति । भाषितपुं-स्कादित्येव । आमलकीतरा । कुवलीतरा ॥

नद्याः शेषस्यान्यतरस्याम् ॥ ४४ ॥

नद्याः शेषस्य घादिषु परतो ह्रस्वो भवति अन्यतरस्याम् । कश्च शेषः । अङी च या नदी ङ्यन्तं च यदेकाच् । ब्रह्मबन्धूतरा । ब्रह्मबन्धुतरा । वीरबन्धूतरा । वीरबन्धुतरा । स्त्रितरा । स्त्रीतरा । स्त्रितमा । स्त्रीतमा ॥ कृन्नद्याः प्रतिषेधो वक्तव्यः ॥ * ॥ लक्ष्मीतरा । तन्त्रीतरा ॥

उगितश्च ॥ ४५ ॥

उगितश्च परस्या नद्या घादिषु अन्यतरस्यां ह्रस्वो भवति । श्रेयसितरा । श्रेयसीतरा । श्रेयस्तरा । विदुषितरा । विदुषीतरा । वि-दुष्टरा । पुंवद्भावोप्यत्र पक्षे वक्तव्यः । प्रकर्षयोगात्प्राक् स्त्रीत्वस्याविव-क्षितत्वाद्वा सिद्धम् ॥

---

* दारदवृन्दारिका । पार्थवृन्दारिकेत्यधिकं पुस्तकान्तरे ।

आन्महतः समानाधिकरणजातीययोः ॥ ४६ ॥

समानाधिकरण उत्तरपदे जातीये च प्रत्यये परतो महत आकारादेशो भवति । महादेवः । महाब्राह्मणः । महाबाहुः । महाबलः । जातीये । महाजातीयः । समानाधिकरणजातीययोरिति किम् । महतः पुत्रो महत्पुत्रः । लक्षणोक्तत्वादेवात्र न भविष्यतीति चेद् बहुव्रीहावपि न स्याद् महाबाहुरिति । तदर्थं समानाधिकरणग्रहणं वक्तव्यम् । अमहान् महान् संपन्नो महद्भूतश्चन्द्रमा इत्यत्र गौणत्वान् महदर्थस्य न भवत्यात्वम् ॥ महदात्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्वचनं चासमानाधिकरणार्थम् ॥ * ॥ महत्या घासः, महाघासः । महत्याः करः, महाकरः । महत्या विशिष्टः, महाविशिष्टः ॥ अष्टनः कपाले हविष्युपसंख्यानम् ॥ * ॥ अष्टाकपालं चरुं निर्वपेत् । हविषीति किम् । अष्टकपालं ब्राह्मणस्य ॥ गवि च युक्तेऽष्टन उपसंख्यानं कर्तव्यम् ॥ * ॥ अष्टागवेन शकटेन । युक्त इति किम् । अष्टगवं ब्राह्मणस्य । तपरकरणं विस्पष्टार्थम् ॥

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ॥ ४७ ॥

द्वि अष्टन् इत्येतयोराकारादेशो भवति संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः । द्वादश । द्वाविंशतिः । द्वात्रिंशत् । अष्टादश । अष्टाविंशतिः । अष्टात्रिंशत् । द्व्यष्टन इति किम् । पञ्चदश । संख्यायामिति किम् । द्वैमातुरः । आष्टमातुरः । अबहुव्रीह्यशीत्योरिति किम् । द्वित्राः । त्रिदशाः । द्व्यशीतिः ॥ प्राक् शतादिति वक्तव्यम् ॥ * ॥ इह मा भूत् । द्विशतम् । द्विसहस्रम् । अष्टशतम् । अष्टसहस्रम् ॥

त्रेस्त्रयः ॥ ४८ ॥

त्रि इत्येतस्य त्रयसित्ययमादेशो भवति संख्यायामबहुव्रीह्यशीत्योः । त्रयोदश । त्रयोविंशतिः । त्रयस्त्रिंशत् । संख्यायामित्येव । त्रैमातुरः । अबहुव्रीह्यशीत्योरित्येव । त्रिदशाः । त्र्यशीतिः । प्राक् शतादित्येव । त्रिशतम् । त्रिसहस्रम् ॥

विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥ ४९ ॥

चत्वारिंशत्प्रभृतौ संख्यायामुत्तरपदे ऽबहुव्रीह्यशीत्योः सर्वेषां द्व्यष्टन् त्रि इत्येतेषां यदुक्तं तद्विभाषा भवति । द्विचत्वारिंशत् । द्वाचत्वारिंशत् । त्रिपञ्चाशत् । त्रयःपञ्चाशत् । अष्टपञ्चाशत् । अष्टापञ्चाशत् * । प्राक् शतादित्येव । द्विशतम् । अष्टशतम् । त्रिशतम् † ॥

हृदयस्य हृल्लेखयदण्लासेषु ॥ ५० ॥

हृदयस्य हृदित्ययमादेशो भवति लेख यत् अण् लास इत्येतेषु परतः । हृदयं लिखतीति, हृल्लेखः । यत् । हृदयस्य प्रियं, हृद्यम् । अण् । हृदयस्येदं, हार्दम् । लास । हृदयस्य लासो, हृल्लासः । लेख इत्यणन्तस्य ग्रहणमिष्यते । घञि तु हृदयस्य लेखो हृदयलेख एतदेव । लेखग्रहणं ज्ञापकमुत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणस्य ॥

वा शोकष्यञ्रोगेषु ॥ ५१ ॥

शोक ष्यञ् रोग इत्येतेषु परतो हृदयस्य वा हृदित्ययमादेशो भवति । हृच्छोकः । हृदयशोकः । ष्यञ् । सौहार्द्यम् । सौहृदय्यम् । ब्राह्मणादित्वात् ष्यञ् । हृदादेशपक्षे हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः । रोग । हृद्रोगः । हृदयरोगः । हृदयशब्देन समानार्थो हृच्छब्दः प्रकृत्यन्तरमस्ति तेनैव सिद्धे विकल्पविधानं प्रपञ्चार्थम् ॥

पादस्य पदाज्यातिगोपहतेषु ॥ ५२ ॥

पादस्य पद इत्ययमादेशो भवति आजि आति ग उपहत इत्येतेषूत्तरपदेषु । पादाभ्यामजतीति, पदाजिः । पादाभ्यामततीति, पदातिः । अज्यतिभ्यां पादे चेत्यौणादिक इण्प्रत्ययः । तत्राजेर्वीभावो न भवत्यत एव निपातनात् । पादाभ्यां गच्छतीति, पदगः । पादेनोपहतः, पदोपहतः । पादशब्दो वृषादित्वादाद्युदात्तस्तस्य स्थाने पदा-

* अष्टचत्वारिंशत् । अष्टाचत्वारिंशत् । त्रिचत्वारिंशत् । त्रयश्चत्वारिंशत् । द्विपञ्चाशत् । द्वापञ्चाशत् । इत्यधिकं पुस्तकेषु बहुषु ।

† सर्वेषां ग्रहणं त्रयाणामपि यथा स्याद् इत्यधिकमन्यस्मिन्पुस्तके ।

Digitized by Google

देश उपदेशएवान्तोदात्तो निपात्यते, तेन पदोपहत इति तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वेनान्तोदात्तत्वं भवति । पदाजिः पदातिः पदग इत्येतेषु कृत्स्वरेण समासस्यैवान्तोदात्तत्वम् ॥

पद्यत्यतदर्थे ॥ ५३ ॥

यत्प्रत्यये परतः पादस्य पदित्ययमादेशो भवत्यतदर्थे । पादौ विध्यन्ति, पद्याः शर्कराः । पद्याः कण्टकाः । अतदर्थ इति किम् । पादार्थमुदकं पाद्यम् ॥ पद्भावे इके चरतावुपसंख्यानम् ॥ * ॥ पादाभ्यां चरति, पदिकः । पर्पादिभ्यः ष्ठन्निति पादशब्दात् ष्ठन्प्रत्ययः ॥ शरीरावयववचनस्य पादशब्दस्य ग्रहणमिह इष्यते ॥ तेन पणपादमाषशताद्यत् इत्यत्र पदादेशो न भवति । द्विपाद्यम् । त्रिपाद्यम् ॥

हिमकाषिहतिषु च ॥ ५४ ॥

हिम काषिन् हति इत्येतेषु पादशब्दस्य पदित्ययमादेशो भवति । हिम । पद्धिमम् । काषिन् । अथ पत्काषिणो यान्ति । हति । पद्धतिः ॥

ऋचः शे ॥ ५५ ॥

ऋक्संबन्धिनः पादशब्दस्य शे परतः पदित्ययमादेशो भवति । पच्छो गायत्रीं शंसति । पादंपादं शंसतीति संख्यैकवचनाच्च वीप्सायामिति शस्प्रत्ययः । ऋच इति किम् । पादशः कर्षापणं ददातीति ॥

वा घोषमिश्रशब्देषु ॥ ५६ ॥

घोष मिश्र शब्द इत्येतेषु चोत्तरपदेषु पादस्य वा पदित्ययमादेशो भवति । पद्घोषः । पादघोषः । पन्मिश्रः । पादमिश्रः । पच्छब्दः । पादशब्दः ॥ निष्के चेति वक्तव्यम् ॥ * ॥ पन्निष्कः । पादनिष्कः ॥

उदकस्योदः संज्ञायाम् ॥ ५७ ॥

उदकशब्दस्य संज्ञायां विषये उद इत्ययमादेशो भवति उत्तरपदे परतः । उदमेघो नाम यस्य औदमेघिः पुत्रः । उदवाहो नाम यस्य औदवाहिः पुत्रः । संज्ञायामिति किम् । उदकगिरिः ॥ संज्ञायामुत्तरपदस्य

Digitized by Google

उदकशब्दस्य उदादेशो भवतीति वक्तव्यम् ॥ * ॥ लोहितोदः । नीलो-
दः । क्षीरोदः ॥

पेषंवासवाहनधिषु च ॥ ५८ ॥

पेषं वास वाहन धि इत्येतेषु चोत्तरपदेषु उदकस्य उद इत्ययमा-
देशो भवति । उदपेषं पिनष्टि । स्नेहने पिष इति णमुल् । वास ।
उदकस्य वासः, उदवासः । वाहन । उदकस्य वाहनः, उदवाहनः ।
उदकं धीयते ऽस्मिन्नित्युदधिः ॥

एकहलादौ पूरयितव्ये ऽन्यतरस्याम् ॥ ५९ ॥

उदकस्योद इति वर्त्तते । एको ऽसहायः । तुल्यजातीयेनानन्त-
र्येण हलादिना हल् आदिर्यस्योत्तरपदस्य तदेकहलादिस्तस्मिन्नेकह-
लादौ पूरयितव्यवाचिन्यन्यतरस्यामुदकस्य उद इत्ययमादेशो भवति ।
उदकुम्भः । उदककुम्भः । उदपात्रम् । उदकपात्रम् । एकहलादाविति
किम् । उदकस्थालम् । पूरयितव्यइति किम् । उदकपर्वतः ॥

मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ॥ ६० ॥

मन्थ ओदन सक्तु बिन्दु वज्र भार हार वीवध गाह इत्येतेषूत्त-
रपदेषूदकस्य उद इत्ययमादेशो भवति अन्यतरस्याम् । उदकेन मन्थ,
उदमन्थः । उदकमन्थः । उदकेनौदन, उदौदनः । उदकौदनः । सक्तु ।
उदकेन सक्तुः, उदसक्तुः । उदकसक्तुः । बिन्दु । उदकस्यबिन्दुः, उद-
बिन्दुः । उदकबिन्दुः । वज्र । उदकस्य वज्रः, उदवज्रः । उदकवज्रः ।
भार । उदकं बिभर्त्तीति, उदभारः । उदकभारः । हार । उदकं हरतीति,
उदहारः । उदकहारः । वीवध । उदकस्य वीवध, उदवीवधः । उदक-
वीवधः । गाह । उदकं गाहतइति, उदगाहः । उदकगाहः ॥

इको ह्रस्वो ऽङ्यो गालवस्य ॥ ६१ ॥

इगन्तस्याङ्यन्तस्योत्तरपदे ह्रस्वो भवति गालवस्याचार्यस्यमतेना-
न्यतरस्याम् । ग्रामणिपुत्रः । ग्रामणीपुत्रः । ब्रह्मबन्धुपुत्रः । ब्रह्मबन्धूपुत्रः ।

Digitized by Google

इक इति किम् । खट्वापादः । मालापादः । अङ्य इति किम् । गार्गीपुत्रः । वात्सीपुत्रः । गालवग्रहणं पूजार्थम् । अन्यतरस्यामिति हि वर्त्तते । व्यवस्थितविभाषा चेयम् । तेनेह न भवति । कारीषगन्धीपतिरिति । इयङुवङ्भाविनामव्ययानां च न भवति । श्रीकुलम् । भ्रूकुलम् । काण्डीभूतम् । वृषलीभूतम् । भ्रूकुंसादीनां तु भवत्येव । भ्रुकुंसः । भ्रुकुटिः । अपर आह ॥ भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् ॥ * ॥ भ्रकुंसः । भ्रकुटिः ॥

एक तद्धिते च ॥ ६२ ॥

एकशब्दस्य तद्धिते उत्तरपदे ह्रस्वोभवति । एकस्या आगतमेकरूप्यम् । एकमयम् । एकस्या भाव, एकत्वम् । एकता । उत्तरपदे । एकस्याः क्षीरम्, एकक्षीरम् । एकदुग्धम् । लिङ्गविशिष्टस्य ग्रहणमेकशब्दह्रस्वत्वं प्रयोजयति । अत्राहि गृह्यमाणमत्र विशेष्यते न पुनरत्र गृह्यमाणेनेति ॥

ङ्यापोः संज्ञाछन्दसोर्बहुलम् ॥ ६३ ॥

ङ्यन्तस्याबन्तस्य च संज्ञाछन्दसोर्बहुलं ह्रस्वो भवति । ङ्यन्तस्य संज्ञायाम् । रेवतिपुत्रः । रोहिणिपुत्रः । भरणिपुत्रः । न च भवति । नान्दीकरः । नान्दीघोषः । नान्दीविशालः । ङ्यन्तस्य छन्दसि । कुमारिदारा । प्रर्वविदा । न च भवति । फाल्गुनी पौर्णमासी । जगतीछन्दः । आबन्तस्य संज्ञायाम् । शिलवहम् । शिलप्रस्थम् । न च भवति । लोमकागृहम् । लोमकाखण्डः । आबन्तस्य छन्दसि । अजक्षीरेण जुहोति । ऊर्णम्रदा पृथिवीं विश्वधायसम् । न च भवति । ऊर्णासूत्रेण कवयो वयन्ति ॥

त्वे च ॥ ६४ ॥

त्वप्रत्यये परतो ङ्यापोर्बहुलं ह्रस्वो भवति । तदजाया भाव अजत्वम् । अजात्वम् । तद्रोहिण्या भावो रोहिणित्वम् । रोहिणीत्वम् । संज्ञायामसंभवाच्छन्दस्येवोदाहरणानि भवन्ति ॥

Digitized by Google

इष्टकेषीकामालानां चिततूलभारिषु ॥ ६५ ॥

इष्टकेषीकामालानां चित तूल भारिन् इत्येतेषूत्तरपदेषु यथासंख्यं ह्रस्वो भवति । इष्टकचितम् । इषीकतूलम् । मालभारिणी कन्या । इष्टकादिभ्यस्तदन्तस्यापि ग्रहणं भवति । पक्केष्टकचितम् । मुञ्जेषीकतूलम् । उत्पलमालभारिणी कन्या ॥

खित्यनव्ययस्य ॥ ६६ ॥

खिदन्त उत्तरपदे ऽनव्ययस्य ह्रस्वो भवति । कालिंमन्या । हरिणिंमन्या । मुमा ह्रस्वो न बाध्यते । अन्यथा हि ह्रस्वशासनमनर्थकं स्यात् । अनव्ययस्येति किम् । दोषामन्यमहः । दिवामन्या रात्रिः । अनव्ययस्येत्येतदेवं ज्ञापकमिह खिदन्तग्रहणस्य ॥

अरुर्द्विषदजन्तस्य मुम् ॥ ६७ ॥

अरुस् द्विषत् इत्येतयोरजन्तानां च खिदन्त उत्तरपदे मुमागमो भवति अनव्ययस्य । अरुंतुदः । द्विषंतपः । अजन्तानाम् । कालिंमन्या । अरुर्द्विषदजन्तस्येति किम् । विद्वन्मन्या । अनव्ययस्येत्येव । दोषामन्यमहः । दिवामन्या रात्रिः । अन्तग्रहणं किम् । कृताजन्तकार्यप्रतिपत्त्यर्थम् । अतो ह्रस्वे कृते मुम्भवति ॥

इच एकाचोऽम्प्रत्ययवच्च ॥ ६८ ॥

इजन्तस्य एकाचः खिदन्त उत्तरपदे ऽमागमो भवति अम्प्रत्ययवच्च द्वितीयैकवचनवच्च स भवति । अमिति हि द्विरावर्त्तते । गांमन्यः । स्त्रींमन्यः । स्त्रियंमन्यः । श्रियंमन्यः । भुवंमन्यः । अम्प्रत्ययवच्चेत्यतिदेशादात्वपूर्वसवर्णगुणेयङुवङादेशा भवन्ति । इच इति किम् । त्वन्मन्यः । एकाच इति किम् । लेखाभ्रुंमन्यः । अथेह कथं भवितव्यम् । श्रियमात्मानं ब्राह्मणकुलं मन्यत इत्युपक्रम्य श्रिमन्यमिति भाष्ये स्थितम् । तत्रेदं भाष्यकारस्य दर्शनमत्र विषये परित्यक्तस्वलिङ्गः स्त्रीशब्दो ब्राह्मणकुले वर्त्तते यथा प्रष्ठादयः स्त्रियाम् । तत्र स्वमोर्नपुंसकादित्यमो लुग्भवति ॥

Digitized by Google

वाचंयमपुरंदरौ च ॥ ६९ ॥

वाचंयम पुरंदर इत्येतौ निपात्येते । वाचंयम आस्ते । पुरं दारयतीति पुरंदरः ॥

कारे सत्यागदस्य ॥ ७० ॥

कारशब्द उत्तरपदे सत्य अगद इत्येतयोर्मुमागमो भवति । सत्यं करोतीति सत्यस्य वा कारः सत्यंकारः । एवमगदंकारः ॥ अस्तुसत्यागदस्य कारइति वक्तव्यम् ॥ * ॥ अस्तुंकारः ॥ भक्षस्य छन्दसि कारे मुम् वक्तव्यः ॥ * ॥ भक्षं करोतीति भक्षस्य वा कारः, भक्षंकारः । छन्दसीति किम् । भक्षकारः ॥ धेनोर्भव्यायां मुम्वक्तव्यः ॥ * ॥ धेनुंभव्या ॥ लोकस्य पृणे मुम्वक्तव्यः ॥ * ॥ लोकंपृणा ॥ इत्ये ऽनभ्याशस्य मुम्वक्तव्यः ॥ * ॥ अनभ्याशमित्यः ॥ भ्राष्ट्राग्न्योरिन्धे मुम्वक्तव्यः ॥ * ॥ भ्राष्ट्रमिन्धः । अग्निमिन्धः ॥ गिले ऽगिलस्य मुम्वक्तव्यः ॥ * ॥ तिमिङ्गिलः । अगिलस्येति किम् । गिलगिलः ॥ गिलगिले चेति वक्तव्यम् ॥ * ॥ तिमिङ्गिलगिलः ॥ उष्णभद्रयोः करणे मुम्वक्तव्यः ॥ * ॥ उष्णंकरणम् । भद्रंकरणम् ॥ सूतोग्रराजभोजमेरुभ्य इत्येतेभ्य उत्तरस्य दुहितृशब्दस्य पुत्त्रडादेशो वा वक्तव्यः ॥ * ॥ सूतपुत्त्री । सूतदुहिता । उग्रपुत्त्री । उग्रदुहिता । राजपुत्त्री । राजदुहिता । भोजपुत्त्री । भोजदुहिता । मेरुपुत्त्री । मेरुदुहिता । केचित्तु शार्ङ्गरवादिषु पुत्त्रशब्दं पठन्ति तस्य पुत्त्रीति भवति । अन्यत्रापि हि दृश्यते । शैलपुत्त्रीति ॥

श्येनतिलस्य पाते ञे ॥ ७१ ॥

श्येन तिल इत्येतयोः पातशब्द उत्तरपदे ञप्रत्यये मुमागमो भवति । श्येनपातोऽस्यां क्रीडायां, श्येनंपाता । तैलंपाता । ञइति किम् । श्येनपातः ।

रात्रेः कृति विभाषा ॥ ७२ ॥

रात्रेः कृदन्त उत्तरपदे विभाषा मुमागमो भवति । रात्रिंचरः । रात्रिचरः । रात्रिमटः । रात्र्यटः । अप्राप्तविभाषेयम् । खिति कृति नित्यं भवति । रात्रिंमन्यः ॥

नलोपो नञः ॥ ७३ ॥

नञो नकारस्य लोपो भवत्युत्तरपदे । अब्राह्मणः । अवृषलः । असुरापः । असोमपः ॥ नञो नलोपो ऽवक्षेपे तिङ्युपसंख्यानम् ॥ अपचसि त्वं जाल्म । अकरोषि त्वं जाल्म ॥

तस्मान्नुडचि ॥ ७४ ॥

तस्माल्लुप्तनकाराव्नञः नुडागमो भवति अजादावुत्तरपदे । अनजः । अनश्वः । तस्मादिति किम् । नञ एव हि स्यात् । पूर्वान्ते हि ङमो ह्रस्वादचि ङमुण्नित्यमिति प्राप्नोति ॥

नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या ॥ ७५ ॥

नभ्राट् नपात् नवेदाः नासत्याः नमुचि नकुल नख नपुंसक नक्षत्र नक्र नाक इत्येतेषु नञ् प्रकृत्या भवति । न भ्राजतइति, नभ्राट् । भ्राजतेः क्विबन्तस्य नञ्समासः । न पातीति, नपात् । पातिः शत्रन्तः । न वेत्तीति, नवेदाः । वेत्तिरसुन्प्रत्ययान्तः । नासत्याः । सत्सु साधवः सत्याः न सत्याः असत्याः न असत्याः नासत्याः । न मुञ्चतीति, नमुचिः । मुचेरौणादिकः किप्रत्ययः । नास्य कुलमस्ति, नकुलः । नख । नास्य खमस्तीति, नखम् । नपुंसक । न स्त्री न पुमान्नपुंसकम् । स्त्रीपुंसयोः पुंसकभावो निपात्यते । नक्षत्र । न क्षरते क्षीयतइति वा, नक्षत्रम् । क्षियः क्षरतेर्वा क्षत्रमिति निपात्यते । नक्र । न क्रामतीति नक्रः । क्रमेर्डप्रत्ययो निपातनात् । नाक । नास्मिन्नकमिति नाकम् ॥

एकादिश्चैकस्य चादुक् ॥ ७६ ॥

एकादिश्च नञ्प्रकृत्या भवति एकशब्दस्यादुगागमो भवति । एकेन न विंशतिः एकान्नविंशतिः । एकान्नत्रिंशत् । तृतीयेति योगविभागात्समासः । पूर्वान्तोयमदुक् क्रियते । पदान्तलक्षणोऽनुनासिको विकल्पेन यथा स्यात् इति ॥

Digitized by Google

नगोऽप्राणिष्वन्यतरस्याम् ॥ ७७ ॥

नञ्प्रकृत्या भवति । नगा वृक्षाः । अगा वृक्षाः । नगाः पर्वताः । अगाः पर्वताः । न गच्छन्तीति नगाः । गमेर्डप्रत्ययः । अप्राणिष्विति किम् । अगो वृषलः शीतेन ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ त्रयोदशस्तबकावशेषः ॥

अहो वयस्य कृष्ण कृष्णवर्त्मनो धूमा एव यत् वयं पीतास्तदेव नो लाभः किं वदामो दामोदर यत् तावत् तावकं वचनं तदेव देवनिदेश इव नः शिरःशेखरीभवति खरीभवति न कदापि पीयूषयूषस्तेन हि भवद्वचसैव सेवमासादिता काचन व्रीडेति ॥ ३० ॥

कृष्णवर्त्मनो यज्ञाग्नेः । ननु मामेव संबोध्य दुःखोद्गारेण याच्ञाप्रवर्तकमद्वचनस्यैव दुःखदायित्वमधुना किमिति ख्यन्यते पूर्वमेव तत् किमित्यसंमतं नाक्षुद्रं तत्राहुः· यत् तावदित्यादि । तेन हि तत्प्रामाण्येनैवेत्यर्थः ॥ ३७ ॥

भूयश्च भूयश्चतुरतारतामुदारमुदारस्मितामुवाच वाचमसौ भगवान् सौभगवान् वल्लवेश्वरतनयो रतनयोदयमधुरम् ॥ ३८ ॥

भूयश्च पुनरपि वाचमुवाच । भूयस्या चतुरतया चातुर्येण रतां संसक्ताम्, उदारां मुदम्· इयर्ति व्यञ्जकत्वेन प्राप्नोतीति तथाभूतं स्मितं यस्यां ताम्· रतं प्रीतिर्नयो नीतिस्तयोरुदयेन मधुरं यथा स्यात् तथा ॥ ३८ ॥

भोभो मानवोढारो मा नवोढारोषेण विग्ना भवितुमर्हत न किं स्वार्थपराः स्वार्थपराहत्या हत्यामिव मन्यन्ते यदुचितमेव वो भो वोभोति मनोग्लानिः ॥ ३६ ॥

नवोढाया इव यो रोषः कारणाकारणविवेकशून्यस्तेन विग्ना

उद्विग्नाः । स्वार्थस्य पराहत्या परमताघातेन । वो युष्माकम् । भो इति संबोधने । बोभोति॰ अतिशयेन भवति ॥ ३९ ॥

तथा पुनरपि नरपिशुनतादोषदृष्टिस्तेषु न कार्या कार्यान्तरानुरोधरोधवशा हि तेषां मनोवृत्तयस्तेन हि ते न हिते वो भवितुमशक्नुवन् ॥ ४० ॥

नरेषु पिशुनतया या दोषदृष्टिः सा तेषु न कार्या । तेन हेतुना हि निश्चितं ते विप्रा वो युष्माकं हिते विषये भवितुं नाशक्नुवन् ॥ ४० ॥

अतः परं परं निरपायमुपायमुपदिशामि दिशामितयैवानयैव भवद्भिर्व्यवह्रियताम् ॥ ४१ ॥

अतः परमेतदनन्तरं, परमन्यम्, अमितया॰ अतुलया॰ अनयैव दिशा व्यवह्रियताम् ॥ ४१ ॥

सन्ति तव लब्धोदया दया इव शरीरिण्य आशु चिताः शुचिता इव मूर्तिमत्यः प्रमदा मदात्मकतासंपद इव धृताकृतयः ॥ ४२ ॥

ननु भवन्तु ता दयामय्यः किंतु स्त्रीत्वादशुचित्वं तासामाशङ्कमहीति तत्राह, आशु चिताः शीघ्रं वृन्दीभूताः शुद्धता इव । मदात्मकता मदर्पितमनस्कता ॥ ४२ ॥

मानव्योऽपि न मानव्यः प्रतीपदर्शिन्योऽपि न प्रतीपदर्शिन्यः क्षिप्रमोदा अपि अक्षिप्रमोदाः ॥ ४३ ॥

मानव्योऽपि मानुष्योऽपि, न मानव्यः, न मानस्य याचकावमाननलक्षणगर्वस्य वीः प्रजननं यासु ताः । प्रतीपदर्शिन्यः स्त्रियोऽपि, न प्रतीपदर्शिन्यः, मयि न प्रतिकूलं पश्यन्त्यः । क्षिप्रं शीघ्रं मत्रामश्रवणमात्रेणैव जनिष्यमाणो मोदो यासां ताः अक्षिप्रमोदाः, अक्ष्णां दृष्टनेत्राणां प्रमोदो याभ्यस्ताः ॥ ४३ ॥

शातप्रदा अपि अशातप्रदाः सकला अपि निष्कलाः॰ भूषिता अपि न भूषिताः प्रभार्या अपि विप्रभार्याः ॥ ४४ ॥

शातप्रदा यथेष्टमैत्यवितरणेन सुखदायिन्यः, अशातं सुखाधारूप-ममङ्गलं प्रकर्षेण घ्नन्तीति ताः, न तत्र याचनापेक्षापीति भावः। सकलाः कला वैदग्धी तत्सहिताः, आकारादेव युष्माकमभिप्रायं ज्ञास्यन्तीति भावः, न तत्र दारिद्र्यमपि शङ्कनीयं यतो निष्कं पदकम्- अष्टोत्तरशत-सुवर्णं च लान्ति गृह्णन्ति ददति चेति ताः,"साष्टे शते सुवर्णानां हेम्न्यु-रोभूषणे पले। दीनारेऽपि च निष्कोऽस्त्री"त्यमरः। अत एव न भुवि-उषिताः- उपविष्टाः, किंतु राज्य इव हेमपट्टादिष्वेवेत्यर्थः। तथापि विप्राणां भार्याः, अत एव प्रभयाः आर्याः श्रेष्ठाः ॥ ४४ ॥

पत्नीशालामुद्दिश्य मुद्दिश्यमानेन चेतसा तासामभ्यासन्नाः प्रसन्नाः प्रकामं मन्नाम्ना सर्वमोदनमोदनमर्थयध्वम् ॥ ४५ ॥

मुत् प्रीतिस्तयैव दिश्यमानेन प्रेर्यमाणेन। अभ्यासं निकटम्। सर्वमोदनं सर्वसुखदम् ॥ ४५ ॥

ताः किल वोऽलवोत्पन्नामाशां कल्पव्रततितिकल्पाः कल्पयि-ष्यन्ति परिपूर्णामेव ॥ ४६ ॥

वो युष्माकम्। अलवोत्पन्नाम्- अनल्पोत्पन्नाम् ॥ ४६ ॥

तदयि दयितमिदं प्रीतिमदुदितं मदुदितं समाश्रुत्य श्रुत्यर्थमिव मत्वा च पुनर्गन्तुमर्हन्ति भवन्तः ॥ ४७ ॥

दयितं युष्मत्प्रियं, प्रीतिमत् तासामपि प्रीतिदायि, उदितम्- उक्तं, मदुदितं मद्वाक्यम् ॥ ४७ ॥

इति तद्वचनवलतो नवलतोद्यानतः प्रमोदतरङ्गरङ्गभाजः संभूय भूय एव यज्ञवाटकवाटकमध्ये प्रविश्य पत्नीशालां विशालां विनीताः सन्तः समुपसर्पन्ति स्म ॥ ४८ ॥

संभूय मिलित्वा ॥ ४८ ॥

उपसृत्य च सततसंमाननभोगा नभोगा अपघना अपघनासक्त-चिरक्षणप्रभाः क्षणप्रभा इव ॥ ४९ ॥

क्षणप्रभा विद्युत इव, अपघने स्वाङ्गे· असक्ता न संसक्ता, पक्षे· आसक्ता समवेता एव चिरक्षणं व्याप्य प्रभा कान्तिर्यासां ताः, "अङ्गं प्रतीकोऽपघन" इत्यमरः। अपघना निर्मेघाः, पक्षे· अकठोराः, "घनः सान्द्रे दृढे चापी"ति मेदिनी। नभोगाः श्रावणमासगामिनीः, "श्रावणस्तु स्याच्चभा"इत्यमरः, पक्षे नञर्थकनकारेण कृष्णविरहाद्भोगहीना इत्यर्थः। ततेन विस्तृतेन संमानेन सम्यक् परिमाणेन सहिताश्च ता नभोगा आकाशगाश्चेति ताः, पक्षे सततं संमाननमेव भोगो धनं यासां ताः,"भोगः सुखे धने चाहेः शरीरफणयोरपी"ति मेदिनी ॥ ४९ ॥

अजलाशया नालीकिनीर्नालीकिनीरिव ॥ ५० ॥

नालीकिनीः कमलिनीरिव· अजलाशया जलाशयविनाभूताः, पक्षे· अजडाशयाः· नालीकिनीर्नाल्यां क्षुद्रमृणाले कं जलं तद्वतीः, पक्षे न· अलीकवतीः सत्यचरित्रा इत्यर्थः ॥ ५० ॥

अनारामा अनारामाभाः संचारिणीः कार्तस्वरवल्लीरिव ॥ ५१ ॥

कार्तस्वरवल्लीः कनकलताः संचारिणीर्जंगमाः, इत्युपमानविशेषणमेव स्वरूपेणाप्यभूतत्वव्यञ्जकम्। यद्यप्यपघना अजलाशया अनारामा इत्यादीन्यप्यभूतत्वव्यञ्जकानि तथापि तत्र तत्र स्वस्वयोग्याधिकरणेनैव विनाभूतत्वं विवक्षितं न तु स्वरूपेणेति, श्लेषेणोपमेयविशेषणान्यपि तानि स्युरिति, अनारामा आरामविनाभूताः, पक्षे न विद्यते· आ सम्यक्· रमणं कृष्णविरहाद्यासां ताः। अनारामाभा विरामशून्या आभाः कान्तयो यासां ताः ॥ ५१ ॥

अनिशा निशातास्चन्द्रमसश्चन्द्रिका इव ॥ ५२ ॥

अनिशा निशाविनाभूताः, निशाता नितरां तेजिताः,"निशितक्ष्णुतशातानि तेजिते" इत्यमरः, पक्षे· अनिशमेव न नितरां शातं सुखं कृष्णविरहाद्यासां ताः। एवं च क्षणप्रभाद्युपमानचतुष्टयेन क्रमेण कान्तिः· मार्दवसौरस्ये दुर्लभत्वम्· ह्लादकत्वं च वर्णितं, तदधिकरणानां घनादीनां चतुर्णां श्रीकृष्णोपमानत्वं च व्यञ्जितम् ॥ ५२ ॥

Digitized by Google

अदरहन्धतीरहन्धतीप्रभृतीनामपि यशो मूर्तिमतीः कीलाः कीलालयोनेरिव ॥ ५३ ॥

एवं स्वरूपमुपवर्ण्य तासां साध्वीत्वमपि वर्णयति· अदरेति, अदर अनल्पं हन्धतीः स्वयशसा·आवृण्वतीः । प्रभावं वर्णयति, कीलाः शिखाः । कीलालयोनेर्वह्नेः ॥ ५३ ॥

महसा महसारेण सस्नेहा अपि अस्नेहदीपिकावदुज्ज्वलन्तीर्दिव्यौषधीरिव ॥ ५४ ॥

सादृश्यं वर्णयति, महैस्त्सवैः सारेण स्थिरेण, महसा तेजसा ॥ ५४ ॥

ललितान्नसभासभाजनजनकरूपश्रियस्तत्कालोचितव्यापारवतीः पारवतीरिव लौकिकचमत्कारस्य रस्यतमवत्सलतालता इव मूर्तिमतीर्मतीर्हितभगवद्गतीः ॥ ५५ ॥

अवादिसामग्रीवितरणादिषु स्वातन्त्र्यमाह ललितान्नेति । ललितान्नसभास्थजनकर्तृकं यत् सभाजनं तस्य जनिका हेतुभूता रूपसंपत्तिर्यासां ताः, लौकिकचमत्कारस्य पारवतीः, सीमान्तवर्तिनीरित्यर्थः । बुभुक्षितजनमात्रापेक्षणाशक्तिमाह रस्यतमवत्सलतेति । मत्या बुद्ध्यैव· ईहिता भगवद्गतिर्याभिस्ताः ॥ ५५ ॥

क्षमाः क्षमातलमाश्रिता इव गुणगणशोभा गणशो भातीरिव ॥ ५६ ॥

कुपितपत्यादितर्जनसहनसामर्थ्यमाह क्षमा इति । अत एव गुणगणानां शोभा गणशः प्रतिगणं भातीरिव दीप्यमाना इव ॥ ५६ ॥

पवित्राः पवित्रावसथसंपत्तितिरस्कारिणीरमूरमूर्ता याज्ञिकपत्नीरवलोकयामासुः ॥ ५७ ॥

स्त्रीत्वादौत्पत्तिकाशौचस्य प्राप्तस्यापि राहित्यमाह पवित्रा इति, अत एव महार्घ्यत्वमाह, पविना वज्रेण त्रायत इति पवित्र इन्द्रस्तस्यावसथसंपत्तेरपि तिरस्कारिणीः, याज्ञिकसंबन्धेन प्रसक्तकाठिन्यं वारयति, अमूर्ता अकठिनाः ॥ ५७ ॥

अवलोक्य नमो वो द्विजवृषभदाराणामुदाराणामुदितमुदितकरुणेभ्योऽरुणेभ्योऽङ्घ्रिकमलेभ्यो निबोधत नो बोधतनोः श्रीकृष्णस्य सहचराणां निवेदितमित्युपक्रमसमकालमेव ॥ ५८ ॥

उदितं मुदितं प्रफुल्लत्वं येषां तानि च करुणानि दयालूनि च तेभ्यः, निबोधत· अवगच्छत, नोऽस्माकं निवेदितं, बोधतनोर्ज्ञानघनमूर्तेः ॥ ५८ ॥

कृष्णनाम्नानाम्नातेनापि प्रत्येकं कर्णाभ्यमितेन निखिलव्यापारतोऽपारतोद्यमाः केनाप्यनुपमोहनमोहनमन्त्रेणेव प्रकृष्टाकृष्टा हरिण्यो हरिण्यो वा युगपदेव ता देवता इव प्रेमरसोपनिषदामवनिसदामवदातमनसः क्षितिसुररमण्यः ससंभ्रमं भ्रमदीक्षणं क्षणं तेषामभिमुखानि मुखानि कृत्वा यद्यवतस्थिरे स्थिरेण मनसा ॥ ५९ ॥

अनाम्नातेनापि· अनभ्यस्तेनापि, सकृदेवोच्चरितेनेत्यर्थः, तथापि कर्णस्यापि· अभ्यन्तरे· अभिमुखे वा· अमितेन· अपरिमितेन सता,अपारतोद्यमा विरतोद्यमाः, अनुपमम्· ऊहनं विस्मयमूलकवितर्को यतस्तथाभूतेन मोहनमन्त्रेण· इव प्रकृष्टं यथा स्यात् तथा· आकृष्टा हरिण्यो मृग्यो हरिण्यो वा हेमप्रतिमा वा, "हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या" इत्यमरः, तेन जाड्यभावोदयः सूचितः, प्रेमरसा एव· उपनिषदस्तासां देवता अधिष्ठात्र्य इव । तासां कीदृशीनाम्, अवनिसदां भूमावपि प्रचरन्तीनामित्यर्थः, उपनिषदो हि सत्यलोकवर्तिन्य एव प्रसिद्धा इति । अवदातमनसः शुद्धचित्ताः । ससंभ्रमं यथा स्यात् तथा भ्रमन्ती पाकादिस्वस्वकृत्यतः परावर्तमाने ईक्षणे यत्र तद्यथा स्यात् तथा क्षणं व्याप्य । तेषां गोपबालकानाम् ॥ ५९ ॥

तदा तेऽपि समाश्वासाश्वासाद्यमानाभ्यागमगमकवदनश्रियो वाक्यशेषं समापयितुमारेभिरे ॥ ६० ॥

सम्यगाश्वासेन कर्त्रा· आशु शीघ्रम्· आसाद्यमानः प्राप्यमाणः स्वीक्रियमाणः· अभ्यागमः· आभिमुख्येनागमनसामर्थ्यं तद्व्यञ्जिका तद्व्यञ्जिका वदनश्रीर्मुखशोभा येषां ते * ॥ ६० ॥

भो भो भूदेव्यस्तत्रभवतीषु भवतीषु श्रीव्रजराजकुमारः कुमारः कुमारयन्नद्य प्रातरकृतभोजनतया जनतया सह क्षुधितोऽधितोऽस्मयाद्यामोदनार्थी मोदनार्थी चास्माकं सहचराणाम् ॥ ६१ ॥

कुमारः कौ पृथिव्यां मारः कन्दर्पतुल्यः, कुमारयन् क्रीडन्, अधित· अधारयत् ॥ ६१ ॥

स किल † प्रमोदवर्षी वर्षीयसा देवेनबलदेवेन बलदेवेन बलमानो निकट एव विराजमानो वर्तते ॥ ६२ ॥

वर्षीयसा ज्येष्ठेन, देवेनो देवेन्द्रस्तत्तुल्येन बलेन दीव्यतीति तथा तेन, बलदेवेन ॥ ६२ ॥

स तावद्गतिविश्रुतः श्रुतश्च भवतीभिरपि परंपरया परया वार्त्तयावार्त्तया ॥ ६३ ॥

वार्त्तया कथंभूतया· अवार्त्तया, महत्येत्यर्थः, यद्वा निरामयया, निर्विघ्नयेत्यर्थः,"वार्त्तं फल्गुन्यरोगे च"त्यमरः ॥ ६३ ॥

यः किल बाल एव पूतनामापूतनामानमकार्षीत् तृणावर्त्तमपि तृणावर्त्तमपि शवकं वकं महाव्यालं व्यालङ्घितजीवनं निर्विषं विषं च कालिन्द्याः ॥ ६४ ॥

पूतनां राक्षसीमपि· आ सम्यक् पूतं पवित्रीकृतं नामापि यस्यास्तथाभूतामकार्षीत्, स्तनमात्रदानप्रभावादिव मृतायाः अपि तस्या दग्धदेहस्याप्यगरुसौरभोद्गारादित्यप्रतर्क्यमाहात्म्यमुक्तम् । अतो किञ्च शौर्यमप्याहुः, तृणावर्त्तमसुरमपि तृणैरावृत्यतेऽसावर्त्तित तथाभूतं शवमित्यर्थः,

* सामर्थ्यं तद्गमकं तद्व्यञ्जकं यद्वदनं तेन तत्र वा श्रीः शोभा येषां ते इति पा० ।
† सकल इति पा० ।

अकार्षीदित्यस्य सर्वत्रानुवृत्तिः । शवकमपि शवकं कुत्सितशवम् । निर्विषं गरलशून्यं विषं जलम्, "विषं तु गरले तोये" इति विश्वः ॥ ६४ ॥

किं बहुना पल्लवेन, लवेन यस्य गुणगणामृतजलधिशीकराणां चराचरान्तरे सुरासुरादिवन्द्या अपि न तुलामर्हन्ति ॥ ६५ ॥

पल्लवेन विस्तारेण बहुना किम्, "पल्लवोऽस्त्री किशलये विटपे विस्तरे वने" इति मेदिनी । लवेन लेशेन ॥ ६५ ॥

इति तेषामुदितमुदितसुधासुधारायमाणमानयन्तीनां श्रवणसीमनि सीमन्तिनीनामासां मनोरथपथपरतरमभिलषणीयतमं तमञ्जसा स्वयमुपनतमिव महानिधिमहानिधिषणाधिरूढभावमहानि भावमहानि बहुलानि यदर्थं गमितानि तमासन्नमवगच्छन्तीनां सपदि द्रुतमिव चेतसा स्नातमिवाक्षियुगलेन कण्टकितमिव तनूलताभिर्लुप्तेव करणवृत्तिः परिवर्तितानीव जननानि· उद्वर्तितानीव सौभाग्यानि· अन्यानीव शरीराणि· उत्कण्ठामयः समयः· यथाश्रुतश्रीकृष्णरूपमयो नयनव्यापारः ॥ ६६ ॥

इति तेषाम्· उदितं वाक्यं श्रवणसीमनि· आनयन्तीनाम्· आसां सपदि तत्क्षण एव चेतसा द्रुतमिवेत्यादियोजना । उदितसुधायाः प्रकटीभूतामृतस्य शोभनधारातुल्यं तं कृष्णरूपं महानिधिम्· अञ्जसा शीघ्रं स्वयमेव· उपनतं प्राप्तमिव· अवगच्छन्तीनाम् । कीदृशं तम्, न विद्यते हानिर्यस्य तथाभूता धिषणाधिरूढा बुद्ध्यारूढो भावः सत्ता यस्य तम् । अहानि दिनानि बहुलानि यदर्थं गमितानि यापितानि । कथंभूतानि, भावो भावना स्मरणं तेनैव महः उत्सवो येषु न तु साक्षात्कारेण तानि । चेतसा द्रुतं द्रवीभूतमिव, ततश्च तद्द्रवेणेव स्नातमिवाक्षियुग्मेन, तत्स्नानेनेव हेतुना कण्टकितं तनूलताभिः, तत्कण्टकाघातेनेव लुप्ता· इन्द्रियवृत्तिः, तल्लोपेनेव परिवर्तितानि जन्मानि, जन्मपरिवर्तनेनेव तत्फलभूतसौभाग्यानि· उद्वर्तितानि, सौभाग्योद्वर्तनलाभेनेव· अन्यानि शरीराणि,

Digitized by Google

तादृशशरीरप्राप्त्यैव योग्यतया प्रियाभिसारार्थमुत्कण्ठामयः समयः, तदुत्कण्ठयैव पोषितेन गाढभावनाभिनिवेशेन श्रीकृष्णरूपमयो नयनव्यापारः, इत्येवंरूपा अप्युत्प्रेक्षा व्यञ्जनीयाः ॥ ६६ ॥

एवं यदि पुनस्तासामवस्थावस्थानं क्षणमुल्ललास तदामी व्रजकुमाराः सचमत्कारमितरेतरमालोकयन्तः समाशशङ्किरे ।

यथा ।

> आकर्ण्य नः सरभसोत्कलिकाप्रमोदं
> याञ्चागिरं युगपदेव तदैव देव्यः ।
> नैवालपन्ति न चलन्ति न लोकयन्ति
> हा हन्त हा ग्रहगृहीतदशां किमीयुः ॥ ६७ ॥

सरभसं सोत्कलिकं सप्रमोदं च यथा स्यात् तथा आकर्ण्य "द्वन्द्वात् परत्र पूर्वत्र वा श्रुतस्य प्रत्येकेनाभिसंबन्धात्" । आकर्ण्येति क्त्वाप्रत्ययेनोक्तस्यानन्तर्यस्य वारणार्थं तदैवेति, आकर्णनसमकालमेवेत्यर्थः, विनाप्यानन्तर्यं क्त्वाप्रत्ययस्य 'क्षणात्कृत्य पतति' 'संहृत्य हसती'त्यादिषु दृष्टत्वात्, पुनश्च युगपदेवेत्युक्तिराकर्णनस्यापि सर्वासामेव तुल्यकालत्वार्था ॥ ६७ ॥

किंच ।

> पारुष्यादवहेलया च गणितं नास्माकमभ्यर्थनं
> नोक्तं किंचन नैव दत्तमपि यद्विप्रैर्न तत् कौतुकम् ।
> श्रुत्वा सस्पृहमादरेण सुदृशो दातुं क्षमा नाभवन्
> दुर्वारोत्कलिकाकुलीकृतहृदस्तन्नाम चित्रं महत् ॥ ६८ ॥

दातुं क्षमाः समर्था नाभवन्, नैवालपन्तीत्यादिना व्यञ्जितजाड्यादेवेति भावः, तत्र हेतुर्दुर्वारेत्यादि, तेनोभयथाप्यस्माकमत्रप्राप्तिहानिरेवेति भावः ॥ ६८ ॥

अथवा ।

यद्धेतुतां व्रजति यत्र मनोविकारे
नासौ तदन्तरयितुं क्षमते विकारः ।
आलम्बनादिजनितो हि रसप्रकर्षो
नालम्बनाद्यननुभूतिमुरीकरोति ॥ ६६ ॥

अथवेति पुनरप्यनुमानेनार्थान्तरन्यासव्यञ्जितेन प्राप्त्याशां साधयन्ति । यद्धेतुस्तु यत्र मनोविकारे हेतुतां व्रजति स विकारस्तद् अन्तरयितुम् अन्तर्धापयितुं न क्षमते, यथा आलम्बनादीत्यादि, तेन श्रीकृष्णयात्राश्रवणजमिदमानन्दजाड्यं तत्प्रातिकूल्याय न प्रभवतीति प्राप्तिः संभवेदिति भावः ॥ ६९ ॥

इति कृतसमूहे समूहे कृष्णानुगतानां गतानां चापि तादृशीं दशां तासां व्यापारान्तरान्तरायशून्ये स्वानुकूलकूलनाभावेन भावेन सरसे मनसि सान्द्रानन्दनन्दकसंस्कारसंस्कारवशादनुत्तरेणैव शादनुत्तरेणैवमुत्कण्ठाभरेण कृष्णामोदनमोदनमपि व्यञ्जनानि व्यञ्जनानि निजनिजानुरागसंपदां समवधातुमेव भव्यापारो व्यापारो यदा समजनिष्ट ॥ ७० ॥

कृष्णानुगतानां गोपबालकानां समूहे इति कृतसमूहे एवं कृतसम्यग्वितर्के सति तादृशीं जाड्योत्थस्तम्भमयीं दशां गतानामपि तासाम् ओदनं व्यञ्जनानि सम्यगवधातुं यदा व्यापारः समजनिष्ट तदा पाकशालां प्रविश्य अवनीयसामग्रीसमुदयं कलधौतधौतभाजनेषु निधाय जनाननादृत्य बहिर्भवन्त्यस्ता नयनाञ्चलचलनचलनोपदेशं यथा स्यात् तथा कृष्णानुचराभिमुखमुखकमला यदि बभूवुस्तदा तेऽपि वर्त्मपिशुनतया पुरतः पुरतश्चलन्तो मुमुदिरे इत्यन्वयः । व्यापारान्तरमेव तादृशसुखस्यान्तरायस्तच्छून्ये मनसि भावेन प्रेम्णा सरसे । तेन कथंभूतेन, स्वस्यानुकूलो विषयालम्बनरूपः कृष्ण एव तस्य कूलनाभाव आवरणाभावो यत्र तेन, "कूल आवरणे" । अत एव तत्र सान्द्रानन्दस्य नन्दकः समृद्धिकारको यः संस्कारस्तस्य संस्कारवशात् उद्बोधरूपपरिष्कारवशात् अनुत्तरेणैव अव-

घनेनैव समवधातुम् । कुतः, एवमुत्कण्ठाभरेण· ईदृशोत्कण्ठातिशयेन । कीदृशेन, शादनुत्तरेण विच्छेददुःखोपशमकृतमेन, उत्कण्ठाभरस्यैव शीघ्रप्रियमेलनफलकत्वात्, "शद्लृ शातने" "नुद प्रेरणे" घसन्तक्विबन्तौ । व्यञ्जनानि शाकसूपादीनि, निजनिजानुरागसंपदां व्यञ्जनानि सूचकानि । भव्यापारः· भव्यं मङ्गलं तेन· अपारो व्यापारः ॥ ७० ॥

तदा विशालां पाकशालां पाककारिणीभिरभितः परिशोभितां प्रविश्य यथासमीहितं मिष्टमिष्टतममपिष्टपिष्टकमपूपपूपशष्कुलिकुलकलाकलितलालित्यं सौरभ्यसौरस्योपायसपायसपायसविकारम् ॥ ७१ ॥

अपिष्टा अखण्डिताः पिष्टका यत्र तम् । अपूपाश्च पूः पात्रिच्यं तां पान्तीति ताः शष्कुल्यश्च तेषां कुलस्य समूहस्य कलया शिल्पविन्यासेन कलितं लालित्यं यत्र तम् । सौरभ्यसौरस्ययोरुपायो यत्र तथाभूतः सपायसः सपरमान्नः पायसविकारो दुग्धविकारो मोदकादिर्यत्र तम् । "परमान्नं तु पायस" इत्यमरः ॥ ७१ ॥

चतुष्प्रकारमपि· अनन्तप्रभेदं षड्रसमपि नवनवरसम् ॥ ७२ ॥

चतुष्प्रकारं चर्व्यचोष्यलेह्यपेयरूपम् । नवनवा रसाः स्वादा यत्र तम् ॥ ७२ ॥

गोवर्धनमिव भगवदुपयोगिगन्धवहानन्दकन्दरामठम्, अलङ्कारग्रन्थनिर्णयमिव· अभिधालक्षणोत्तरव्यञ्जनानेकविधसौष्ठवम् ॥ ७३ ॥

भगवदुपयोगिना गन्धवहेन पवनेनानन्दो यत्र तथाभूताः कन्दरा एव मठा आलया यत्र तं· पक्षे तादृशगन्धं वहतीति तत्, अत एव· आनन्दकन्दं रामठं हिङ्गु यत्र तत्· "बाह्लीकं हिङ्गु रामठ" मित्यमरः । अभिधेति स्पष्टम्, पक्षे· अभिधालक्षणाभ्यां नामचिह्नाभ्यां प्रधानानां व्यञ्जनानां शाकसूपादीनाम्· अनेकविधं सौष्ठवं यत्र तम् ॥ ७३ ॥

स्वस्वमनोरथमिव सूपचितं दिव्यास्त्रमिव बहुशोभाजीराजितं स्वस्वानुरागपरिमलमिव सुरभितनानाशाकं गङ्गाप्रवाहमिव विलसत्काशीतलभावम् ॥ ७४ ।

सुष्ठु उपचितं सूपेश्चितं च। बहुशोभं च आज्ञो युक्तं इदं प्रेर्यमाणं च अजितं च तत्, पक्षे बहुशः बहुत्र बहुत्र भाजीभिः पक्वशाकादिसामग्रीभिर्दीप्तं, "जानपदकुण्ड"त्यादिना ङीष्। सुरभिता नानाविधा आशा यतस्तं, पक्षे स्पष्टम्। विलसन् काश्यास्तले भावः सत्ता यस्य तं, पक्षे विलसत् कं सुखं यतः स चासौ अशीतलभावश्चेति तम्॥ ७४॥

कलधौतधौतभाजनेषु स्फटिकपुटिकाटिकान्तिकन्दलीकन्दलीलेषु सकलमदनीयमदनीयसामग्रीसमुदयं समुदयन्वितमानसतया निधाय सितसूक्ष्मसिचयाञ्चलेनाञ्चलेनारचिताच्छादनम्॥ ७५॥

कलधौतानि स्वर्णमयानि धौतानि क्षालितानि च तेषु भाजनेषु। कीदृशेषु, स्फटिकपुटिकासु तदुपरिनिहितासु अटितुं प्रतिबिम्बतया गन्तुं शीलं यासां तथाभूतानां कान्तिकन्दलीनां कन्दा दृष्टसुखदा लीला येषु तेषु। सकला अपि मदनीया हर्षणीया येन तं, सकलानामपि मदनीयं हर्षो यत्र तमिति वा। समुत् सानन्दम्। अयन्वितमानसतया॥ ७५॥

पश्यत्सु परितोऽध्वराध्वरागकृतसभाजनेषु सभाजनेषु स्वकरकमलाहिततत्तद्भाजना जनाननादृत्य बहिर्भवन्त्यो विटपोदीर्णाभीष्टफला जंगमाः कल्पवल्ल्य इव धरणिसुरेन्द्रवामनयना नयनाञ्चलचलनचलनोपदेशं यदि कृष्णानुचराभिमुखमुखकमला बभूवुः॥ ७६॥

अध्वराध्वनि यज्ञपथे यो रागः प्रीतिस्तत्रैव कृतं सभाजनमादरो यैस्तेषु सभास्थितजनेषु पश्यत्सु। विटपेति कराग्रा पल्लवत्वं तत्रस्थाचभाजनानाम् अभीष्टफलत्वम्। नयनाञ्चलस्य चलनेनैव चलने गमने उपदेशो यत्र तद्यथा स्यात् तथा बभूवुः॥ ७६॥

तदा तेऽपि पुरतः पुरतश्चलन्तो वर्त्मपिशुनतयाशु नतया चेतोवृत्त्या च इत इत इति कलविकलविकस्वरमनोरमध्वानमध्वानमभिदर्शयन्तो मुमुदिरे॥ ७७॥

वर्त्मप्रिशुनतया वर्त्मसूचकत्वेन पुरतः पुरतश्चलन्तः । आशु शीघ्रं नतया नम्रया । कलोऽस्फुटस्तेन विकलः स्वच्छ इत्यर्थः, स चासौ विक-स्वरः प्रफुल्लो मनोरमो मधुरो ध्वानो यत्र तद्यथा स्यात् तथा, रत रत इति· अध्वानं मार्गम्· अग्रे चलन्तोऽप्यन्तरान्तरा· अभिमुखीभूय· अभिन-येन च दर्शयन्तः ॥ ७७ ॥

अथ करकमलगृहीतान्नस्थालीकास्थालीकारितसाहाय्यसौभाग्यासौ भाग्यातिरेकारेका द्विजवनिताराजी राजीविनीततिरिव विलसच्चलदला-विशालैकपत्त्रा धरणीविहारिणी हारिणी बभूव ॥ ७८ ॥

आस्थाः श्रीकृष्णविषयाः· अपेक्षा एव· आल्यः सख्यस्ताभिः कारितं साहाय्यं यस्य तथाभूतं सौभाग्यं यस्यां सा, "आस्था त्वालम्बनास्थानय-त्नापेक्षासु योषिती"ति मेदिनी । भाग्यातिरेकेणैव· अरेका निःशङ्का, "रेकृ शङ्कायाम्" । विलसच्चलदलेति, विविधवर्णव्यञ्जनयुक्तस्वर्णस्था-ल्यास्ताद्रूप्याकारत्वात् । हारिणी रम्या राजीविनीततिरिव बभूवेति सौ-न्दर्यसौरभ्यमार्दवपावित्र्यभगवदुपयोगित्वादीन्युक्तानि ॥ ७८ ॥

किंवा करतलगृहीतपुटपुटकिनीविशालतरैकपत्त्रपुटका करि-णीघटेव ॥ ७९ ॥

आसक्तिप्रागल्भ्ये प्रस्तुतां गमनशोभां चाह किंवेति, करतलेन गृहीतं पुटपुटकिन्याः कनककमलिन्या विशालतरम्· एकं पत्त्रपुटं यया सा ॥ ७९ ॥

राजमाना हृदयान्तरतरलायमानप्रणयभरभारेण स्तनजघन-भारेण पूर्णभाजनभारेण च दरनमदङ्गतया नमदङ्गतया * च हृदय-वृत्त्या लघु लघु चलन्ती पुरः पुरः परिलेक्ष्यमानमिव हृदयाधिनाथं दयाधिनाथं च तमेव जानती न तीव्रतरं गमनखेदं च विदांच-कार ॥ ८० ॥

* परसवर्णसंधिः प्राग्वत् ।

हृदयान्तरे मनोमध्ये वक्षोमध्ये च तरलायमानस्य· औत्कण्ठ्योत्कम्पतया चपलायमानस्य हारमध्यरत्नायमानस्य च प्रणयभरस्य भारेण, "तरलो हारमध्यग"इत्यमरः, दरनमदङ्गतया· ईषन्नम्रगात्रतया । नन्वादिमं भारद्वयं दुष्परिहरमेव पूर्णभाजनभारस्तु किंकरीकरे किमिति न निक्षिप्तस्तत्राह, न मदं गतया न गर्वं प्राप्तया हृदयवृत्त्या, तथा करणं हि गर्वप्रतिपादनमेव, भगवदुपसत्तौ तु "दासीशतान्यपि विभोर्विदधुः स्म दास्य"मिति रीत्या तदनौचित्यमेवेति । दयया· आधेर्मनःपीडाया नाशम्· उपतापकं, नाशकमिति यावत्, "नाथृ याच्ञोपतापैश्वर्याशीःषु" ॥ ८० ॥

किंच ।

स्तम्भश्चोत्कलिका च पङ्कजदृशां प्रस्थानलीलाक्रमे
मान्थर्यं च यदि त्वरां च युगपत् संस्पर्धया चक्रतुः ।
निर्धूतप्रतिभेव हन्त लपति स्मान्ते तदा मेखला
निक्वाणो न लघुर्बभूव न गुरुर्मञ्जीरयुग्मस्य च ॥ ८१ ॥

स्तम्भो हर्षात्थः· उत्कलिका· उत्कण्ठा च प्रेष्ठावलोकनस्पृहोत्था तयोर्युगपदुद्भूतयोर्मान्थर्यत्वरे क्रमेणानुभावौ परस्परघातिनौ बभूवतुः, तत्र मान्थर्येण त्वरायां बाध्यमानायां त्वरया च मान्थर्ये बाध्यमाने सत्यपि कदाचित् स्पर्धावशादिव मान्थर्यांशप्राधान्ये मेखला· अन्ते· अन्तप्रदेशे· एव निर्धूतप्रतिभेव लपति स्म, कदाचित् त्वरांशप्राधान्ये मञ्जीरयुग्मस्य निक्वाणो न लघुर्बभूव, किंतु मान्थर्यस्यास्त्येव सद्भाव इति गुरुरपि नैवेति ॥ ८१ ॥

एवं गच्छन्त्यः कतिचित् पदानि चित्पदानि वृन्दावनतरुलतानिकुरम्बाणि गोवृन्दानि चाग्रे विलोक्यैव निखिलगुणाभोगवता भगवता भवितव्यमिति मनसि विदधत्यो दधत्यो मतिमतिप्रमदमदललितानुरागदलितां दलिताञ्जनघनधाराधरकुवलयवलयतिरस्कारिमहोमहोज्ज्वलमतिनेदीयो विलोकयामासुः ॥ ८२ ॥

चित्पदानि चिन्मयवस्तूनि । अतिप्रमदः· अतिहर्षः· मदस्तदुत्था मत्तता ताभ्यां ललितेनानुरागेण दलितां जातदलां मतिं दधत्यः । अतिनेदीयोऽतिनिकटवर्ति ॥ ८२ ॥

तदिदमहो महोऽपि तासां नयनेषु कज्जलायितं कबरीषु कुवलयमालायितं श्रवणेषु तापिच्छगुच्छायितं पयोधरेषु नीलमणिहारायितं सर्वाङ्गेषु नीलनिचोलायितम् ॥ ८३ ॥

तासां नयनादिषु तन्महः कज्जलाद्यायितं सदेवाविरासीदित्युत्तरेणान्वयः । तथा तथा भावस्तासां स्पर्शोत्सुक्यावेशेन तत्र तत्र रोचकतया प्रेम्णा तथा तथा भानात् । तापिच्छस्तमालः ॥ ८३ ॥

ततश्च ।

लावण्योर्मीमिव वरभुजां सख्युरंसे दधानो
धुन्वन्नब्जं युवतिमतिवत् पाणिना दक्षिणेन ।
श्रीवत्साङ्कः कनकरसनो बर्हवान् वैजयन्ती-
गुञ्जाधातुस्तबकरचनः श्यामधामाविरासीत् ॥ ८४ ॥

एवं किंचिद्दूरतो निर्विशेषश्याममधाममात्रमपि परमरोचकत्वेनानुसंधाय निकटमभिसरन्तीनां तासां सविशेषस्वरूपसाक्षात्कारचमत्कारमाह लावण्येति, सख्युः सुबलस्य· अंसे वामभुजानिधानं संभोगविशेषोद्दीपनं तासां मोहनार्थं, कमलधूननं तु स्वमाधुर्यस्य रसाम्बुधिविवर्तत्वेन प्रत्यायनं तत्र पिपतिषूणां पुनरुत्तरणाभावज्ञापनार्थं, वैजयन्त्यादिवन्यवेशशोभानुभावनं तु स्वस्य निर्जनवृन्दावनवासासक्तत्वज्ञापनया निर्विरोधविलासविशेषलालसोत्थापकं, तदेतच्च सर्वं तासां सङ्गमनङ्गीचिकीर्षोरपि तस्य तासां मानससंभोगावेशवैशिष्ट्यजननार्थं, तच्च शीघ्रमेव देहान्तरप्रापणया· अत्रैव वृन्दावनप्रकाशविशेषे व्रजसुन्दरीणामिव स्वसाक्षात्संभोगप्रापकमेवेत्यवसेयम् ॥ ८४ ॥

ततश्च ततश्चटुलतया चन्द्रिकासितहसितहठाकृष्टनवसुधा-

सारो वसुधासारो लावण्यसार इव यद्येवमासामासादितनयमातिथि-भावो भावोद्भ्रान्तमनसां तदा तासामपि ॥ ८४ ॥

चटुलतया नागरिमोचितचापल्येन । नतो विस्मृतः । चन्द्रिकातो-ऽपि सितं बहुसितं तेन हठाकृष्टो नेत्रः सुधाया च सारो धारासंपातो येन सः । वसुधायां सारः श्रेष्ठः ॥ ८५ ॥

लीलालास्योद्यान इव नटः पञ्चबाणोऽपञ्चः
किंवा मूर्तः किमिह रसो मूर्तिमानाद्य एव ।
प्रेमानन्दः किमुत तनुमान् किं विलासः शरीरी-
त्येवंभूता मनसि कति नो हन्त तर्का जुघूर्णुः ॥ ८६ ॥

पञ्चव अपञ्च इति, हठादेव रससमर्पणशक्त्यनुभवात् । आद्यो रस इति, तत्समर्पकत्वेऽपि तदभिन्नत्वेनैव प्रतीतेः । प्रेमानन्द इति तथापि तत्सुखतात्पर्येणैव तच स्वाभाविकतादृशस्वप्रवृत्तिसुखोदयदर्श-नात् । विलास इति, ततो ऽनिष्पमाणस्यापि तादृशविलासस्य तदानी-मेव तत्तादात्म्येनैव साक्षात्कारात् । जुघूर्णुरिति, तथाभूततर्काणामपि प्र-त्येकं समस्तसाधर्म्यग्रहणासामर्थ्यात्, अपर्याप्तत्वमेवेति भावः ॥ ८६ ॥

एवं वितर्कयन्त्योऽसाध्वससाध्वसमसाहससाहसदनुरागग्रहग्रहण-निगृहीतमानसा मानसाराः ॥ ८७ ॥

असाध्वसेन निःसंकोचेन साधु उत्तमं यदसमसाहसम् अति-वृहत्तमसाहसं तेन हसन् प्रफुल्लोऽनुराग एव ग्रहस्तस्य ग्रहणेन निगृहीतं मानसं यासां ताः । यतो मानसाराः, मानो ज्ञानं रसानुभव इति या-वत् स एव सारो बलं यासां ताः । यद्वा मेति निषेधे, न सारा न, अपि-तु साराः, श्रेष्ठा एवेत्यर्थः ॥ ८७ ॥

क्रमेण ।

चित्ताद्बाह्यं गत इव पुनर्बाह्यतो वा प्रविश्य-
स्थितं चित्रं युगपदुदयी किंनु चित्ते बहिश्च ।

इत्थं तर्काकुलितमनसो मीलदुन्मीलदक्ष्णं
चित्ते साक्षादपि च तमथालोकयन्त्योऽभिसस्रुः ॥ ८८ ॥

किंच तासां तदानीं तद्भावेशोद्रेकेण इन्द्रियवृत्तयस्तन्मय्य एव बभूवुरित्याह, बहिरनुसंधाने चित्ताविल्यादिः प्रथमः, अन्तरनुसंधाने साक्षात इत्यादिर्द्वितीयः, क्रमेणेत्यस्य उभयत्रैव संबन्धः, विस्मयेनैकदैवो-भयत्रानुसंधाने चित्तमित्यादिस्तृतीयस्तर्कः । मीलन्ती चित्ते दर्शनार्थं-मुन्मीलन्ती बहिर्दर्शनार्थमक्षिणी यत्र तद्यथा स्यात् तथा । तृतीयतर्कोऽयमेव सत्यत्वनिश्चय इत्याह चित्त इत्यादि ॥ ८८ ॥

किंच ।

अन्नाद्युपायनविराजिकराम्बुजौघा-
स्त्वेतोऽभिलाषफलदा इव कल्पवल्लीः ।
दिव्यौषधिप्रततिकाननवज्ज्वलन्ती-
रालोक्य ताः सरभसं तदुपाव कृष्णः ॥ ८९ ॥

कल्पवल्लीरिव । तासां कान्तिसाधर्म्यस्यापि प्राप्तये दिव्यौषधीति ॥ ८९ ॥

हन्त स्वागतमास्यतां मृगदृशो धन्याः स्थ यूयं महान्
सद्भावो मयि वः स्वयं यत इतः प्राप्ता गृहीत्वोदनम् ।
एतत्प्रत्युपकर्तृतास्ति न मम स्वेनैव भावेन वः
संतोषः परिपुष्टिमेतु नितरामानृण्यमप्यस्तु मे ॥ ९० ॥

हन्तेति, आस्यतां, धन्याः स्थ । सद्भावो मयीत्यादि, यद्यपि तासामौत्सुक्यानुरूपमेव प्रथमतो वचनं तदपि एतत्प्रत्युपकर्तृतास्ति न ममेत्यस्य प्रकटार्थ एव प्रकटतात्पर्यात् प्रकटमस्वीकारसूचकमेव, वस्तुतस्तु तादृशकामोद्दीपनस्वरूपचेष्टादर्शनप्रदानेन आस्यतामिति स्वपार्श्वे अन्तः-प्रवेशप्रदानेन च सत्यवाक्यस्य तस्यान्तःस्वीकार एव व्यञ्जितः । केन युष्माकम् । स्वेनैव भावेनेति, ननु तदुचितेन मया करिष्यमाणेन भावेनेत्यर्थः,

वस्तुतस्तु मया तादृशस्य भावस्य प्राप्तुमेवाशक्यत्वा"च पारयेऽहं निरवद्यसंयुजा"मित्याद्युक्त्या गोपीष्विव युष्मास्वपि मम ऋणित्वमेवेति भावः ॥ ९० ॥

ततश्च ताः शरदमृतमयूखविगलदमृतविन्दुविन्दुमधुरकलविकस्वरस्वरपरिमलपरिमलनकर्णरमणीयं रमणीयं तात्पर्यपर्यवसानविरहेण सामान्यतो मान्यतोदारप्रणयप्रणयनपरमिव प्रमुदितमुदितमस्य निशम्य ॥ ९१ ॥

ततश्च ताः अस्य उदितं वचनं निशम्य नयनकमलस्य निर्व्ययनेन छिद्रेण तम् अन्तर्हृदि निवेश्य अनुरागसुमनोभरेण समर्चयांचक्रुः । उदितमेव स्वरूपतटस्थलक्षणाभ्यां क्रमेण विशिनष्टि, शरदमृतमयूखाच्छारदचन्द्राद्विगलतोऽमृतस्य विन्दुविन्दुतोऽपि मधुरं सुस्वादु च तत् कलः कोमलो विकस्वरः स्पष्टश्च यः स्वरः स एव परिमलस्तस्य परिमलनेन धारणेन कर्णरमणीयं चेति तत् । रमणीयं रमणीर्याति तदभीष्टदाने पर्याप्नोतीति तत् । नन्वेतत्प्रत्युपकर्तृतास्ति न ममेत्युक्तेः कथं रमण्यभीष्टदाने पर्याप्तिस्तत्राह तात्पर्येति, तत्तात्पर्यस्य तद्यात देवयजनमित्युत्तरवाक्यानुसारेणाभिहितार्थ एव यत् पर्यवसानं तस्य विरहेण तद्विनेत्यर्थः, किंतु आस्यतामित्यनुसारेण मान्यतया आदरणीयत्वेन य उदारः प्रणयस्तस्य प्रणयनपरं प्रकटनपरम्, अत एव प्रकृष्टं मुदितं यतस्तत् ॥ ९१ ॥

कृतार्थमन्या इव नयनकमलनिर्व्ययनेन तमन्तर्हृदि निवेश्य भुजलताभ्यां जलताभ्याञ्छितेन मनसा नमनसान्द्रेण * परिरभ्य सौरभ्यसौभगभृतानुरागसुमनोभरेण समर्चयांचक्रुः ॥ ९२ ॥

निर्व्ययनेन छिद्रेण । निर्व्ययनेन तत्प्राप्त्या गतव्ययेन मनसा परिरभ्य । कीदृशेन, जलता द्रवीभावस्तेन अभ्याञ्छितेन व्याप्तेन, "आञ्छि आयामे" । नमनं नम्रता तेन सान्द्रेण ॥ ९२ ॥

* मूले टीकायां च सार्द्रेण इति पा० ।

Digitized by Google

तदनु दनुजदमनो मनो मोहयन्निव निवरीवृत्यमानहृदयसंतापतापविचितसान्द्रानन्दा द्विजवरवधूरवधूतसकलकलनाः पुनरभावत ॥ ६३ ॥

निवरीवृत्यमानेन॰ अत्यन्तं निवर्तमानेन हृदयसंतापस्य मानसज्वरस्य तापेन हेतुना विचितः॰ उपचितः॰ विविधवृन्दीभूतो वा सान्द्र आनन्दो यासां ताः, अत एव॰ अवधूतं खण्डितं सकलकलनं सर्वव्यापारो यासां ताः ॥ ९३ ॥

तद्यात देवयजनं पतिदेवताभि-
र्युष्माभिरध्वरममी परिपारयन्तु ।
मन्मूर्तिमध्वरमयीमपि ये भजन्ति
मामेव तेऽपि कृतिनः परितोषयन्ति ॥ ६४ ॥

नच मत्प्रातिकूल्यारोपमात्रेण पतयस्ते हेलनीया इत्याह मन्मूर्तिमिति ॥ ९४ ॥

इति तदमृतमयूखबिम्बतोऽविलम्बलम्बमानकालकालकूटकूटमिव मधुरतरमनोहराच्छ्रीवदनादनास्वादनीयं कटुतरमालपितमालपीतवाससस्तस्य निशम्याशम्यासामाशा माशान्तिरप्यजनि ॥ ६५ ॥

कालो यमस्तद्रूपं कालकूटकूटमिव, "कृतान्तानेहसोः काल" इत्यमरः । आलवत् पीतवाससः, "आलं च हरितालके" इत्यमरः । तस्य कृष्णस्य कटुतरम्॰ आलपितं वचनं निशम्य श्रुत्वा॰ आसां यज्ञपत्नीनाम्॰ आशा॰ अशमि स्वयमेव॰ उपरता, नष्टेत्यर्थः, कर्मकर्तरि चिण् । ततश्च माशान्तिः शोभानाशोऽपि॰ अजनि॰ अभूत् ॥ ९५ ॥

यथा ।

दीर्घातिदीर्घतरसंभ्रवणानुचिन्ता-
संतानपल्लवितकोरकितप्रतानाम् ।

आशालतां विफलतामुपपादयन्ती
सा तस्य वाग्विजवधूर्विधुरीचकार ॥ ६६ ॥

दीर्घादप्यतिदीर्घतरैः सम्यक् अवबोधैः अनुचिन्ता निरन्तरभावना तस्याः संतानेन बाहुल्येन पूर्वमेव पल्लविता: संप्रत्यास्यतामित्याश्वासेन कोरकितश्च प्रतानो विस्तारो यस्यास्तथाभूतामपि ॥ ९६ ॥

अथ विधुरितवदनविधुरितवदनवरतमानन्दसंदोहं मन्यमानामानानादरादराहतहृदयेव हृदये वहन्ती गुरुखेदमधिकमवशगद्गदगदनकलस्वरं स्वरङ्गनाभ्येत्यिव विच्छाया ॥ ९७ ॥

विधुरितो वदनविधुर्यस्याः सा, अनवरतम् आनन्दसंदोहम् रतवत् गततुल्यं मन्यमाना, अमानः परिमाणरहितोऽनादरो यस्याः सा, अदर अनल्पम् आहतं प्राप्ताघातं हृदयं यस्याः सा, स्वरङ्गना स्वर्गनारी, विच्छाया छायारहिता कान्तिरहिता च ॥ ९७ ॥

सलिलकणभरमन्दाक्षं मन्दाक्षं च निर्वाप्य निर्वाप्यमाणदीपशिखेव मन्दप्रभा प्रभावैकनिबद्धदृष्टिः शुष्यमाणकाकुदा काकुदाशियवती निजगाद भूसुरनितम्बवतीवितति: ॥ ९८ ॥

सलिलानां कणभरैर्मन्दे अक्षिणी यत्र तद्यथा स्यात् तथा, प्रभावेन भावेन एकत्रैव निबद्धा दृष्टिर्यस्याः सा, चिन्तानुभावोऽयम्, शुष्यमाणं काकुदं तालु यस्याः सा, "तालु तु काकुद"मित्यमरः ॥ ९८ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरशोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य षष्ठः परिच्छेदः ॥

४० ॥ कृत्रिमवस्तूनां विशेषजातयः स्वाभाविकवस्तुजातीरपेक्ष्य न्यूनं संकीर्णा भवन्ति ॥— पूर्वोक्तवर्णनादिदं तर्कयितुं शक्यते यत् कृत्रि-

मवस्तुविशेषजातिषु स्वाभाविकवस्तुविशेषजातीरपेक्ष्य सांकर्यानिश्चये न्यूनतरे स्तः । कृत्रिमवस्तुनो मनुष्यजन्यतया निर्मातृविज्ञानगोचरत्वेन तद्विज्ञानस्य सुष्ठु ज्ञाततया च तस्य नाम न कथमपि विज्ञानान्तरबोधायोपकल्प्यते नापि यन्निश्चयेन ज्ञातुं सौकर्येणावधारयितुं च शक्यते तदतिरिक्तस्य कस्यापि स्वरूपस्य बोधाय प्रयुज्यते । यतो वर्तमानानां कृत्रिमवस्तुजातीनां स्वरूपं विज्ञानं वा प्रायशो दृश्यावयवघटितनियताकारादभिन्नमेव न तु ततो ऽन्यत् किमपि । कदाचिच्च निर्मात्रा द्रव्ये परिकल्पिता गतिरपि निर्मात्रभिप्रायानुसारेण तदाश्रिता भवति । नियततद्विज्ञानावधारणं ज्ञानशक्त्यगम्यं न भवति । यैरस्माकं ज्ञानगोचरव्यापाराश्रितभेदवत्स्वकृतवस्तुषु यावत् संभवति ततो न्यूनेन संदेहेन गूढत्वेनानेकार्थत्वेन च कृत्रिमवस्तुविशेषजात्यो विविच्यन्ते तादृशानां नाम्नामर्थस्य नियमनं च भवति ॥

४१ ॥ भिन्नभिन्नविशेषजातीयानि कृत्रिमाणि वस्तूनि ॥—कृत्रिमाणि वस्तूनि प्राकृतानीव भिन्नभिन्नविशेषजातीयानि सन्तीति यदि चिन्तयेयं तर्ह्यत्र विषये ऽवश्यं वक्तव्यः । यतस्तानि भिन्नभिन्नावच्छेदकविज्ञानैस्तद्बोधकैः प्राकृतद्रव्यनामानीव परस्परं भिन्नैः साधारणनामभिश्च सुस्पष्टं क्रमेण जातिषु परिगणितानि सन्तीति प्रतीयते । मत्स्यकुक्कुरयोरिवाग्नियन्त्रघटीयन्त्रयोरप्यसमवात्मसु भिन्नैरेव विज्ञानैः परात्मसु च भिन्नाभिः संज्ञाभिर्बोधितत्वेन परस्परं भिन्नविशेषजातीयत्वचिन्तनस्या ऽपरिहार्यत्वात् ॥

४२ ॥ द्रव्याणामेव व्यक्तिनामानि सन्ति ॥—द्रव्याण्यधिकृत्येदमपरमपि विचारणीयं यत् सर्वेषां तत्तदस्मद्विज्ञानजातीनां मध्ये द्रव्याणामेवैकव्यक्तिमात्रबोधकानि पदानि सन्ति । शुद्धविज्ञानेषु भावेषु संबन्धेषु च तेषामभावे प्रायस्तद्व्यक्तिबोधनावसरस्याभावात् । भूयिष्ठेभ्यो मिश्रभावेभ्यो ऽन्येषामपि उत्पत्तिक्षणे एव नश्वराणां क्रियाणां स्थिरसंबन्धघटितबोध्यमिश्रविज्ञानघटकशुद्धविज्ञानानामन्येषां क्रियावतां द्रव्याणामिव स्थिरत्वाभावात् ॥

४३ ॥ पदैर्व्यवहारे काठिन्यम् ॥—ग्रस्मिन् विषये चिरमेतावत् किं चिद्गूढतया च मदीयं विस्तृतं वर्णनं पाठकैः क्षन्तव्यमित्यवश्यं प्रार्थये । परं तु ग्रस्माभिरुपकल्पितैर्भेदकैर्विशेषैर्विधुराणां पदार्थानां विमर्शानां पदैः परात्मसूत्पादनं कथं दुष्करमिति विचारणीयमितीच्छामि । येषां नामानि यदि नोपकल्पयेयं तदा ते पदार्था न सन्तीति कथयेयम् । यदि च नामोपकल्पयेयं तर्हि तेनैव तान् पदार्थान् एकतरजातौ व्यवस्थाप्य तज्जातिविशेषस्य प्रायिकमवच्छेदकविज्ञानमात्मनि परिकल्प्य च स्वकार्यं निर्वाहयेयम् । यतः प्रायस्तत्पदाभिलप्यमानविज्ञानरूपस्य स्वीयाभ्यन्तरसंस्थित्यास्वाज्ञातार्थस्वरूपेण वा ऽन्येभ्यो वस्तुतो विविक्ततया स्वविमर्शाय मनुष्याणां प्रवर्तकस्य मनुष्यपदार्थस्य स्वात्मन्यवधारणमकृत्वैव मनुष्यविषयकसंभाषणं तुच्छमिव प्रतीयते । एवमपि यद्येतत्केवलं द्रव्याभिलापकैः साधारणनामभिर्न किमपि तादृशं वस्तु प्रतिपाद्यते इति ज्ञापनायैव स्यात् तर्हि वस्तुविशेषजातीः कल्पितार्थस्वरूपाणि चाधिकृत्य विवक्तुः पुरुषो ऽवश्यमेव स्वविमर्शानां प्रकृतिकार्यत्वं विचारयेद् परं तु ज्ञातैर्व्यवहृतैः पदैरेतत्करणस्यासंभवादुदाहरणप्रदर्शनेन विशेषनाम्नां विज्ञानानां च स्फुटतरविमर्शान्तरकरणमिदमनुमन्यताम् । किं च भावानां मिश्रविज्ञानानि कदा चित् पुरुषान्तरात्मसु मूलप्रतिमानैः कथं सरूपाणि भवन्ति । यद्वा । स्वपरिगृहीतनामभिः पुरुषान्तरैरप्येकरूप एवार्थो बोध्यते । कदाचिच्च मूलप्रतिमानानुरूपाणि कथमपि न भवन्तीत्यपि प्रदर्शयिष्यामि । मनः कथं स्वीयानि द्रव्यविज्ञानानि सर्वदा बाह्यद्रव्यैस्तद्वाचकपदार्थैर्वा प्रतिमानैरिव सरूपाण्येव रचयति, किं चास्माभिर्ज्ञातानां व्यवहृतानां च वस्तूनां विशेषजातीनां तत्संबद्धानां स्वरूपाणां च तत्त्वज्ञानादावुपकल्पितकालमपेक्ष्या ऽधिकालेन वर्णनीयमपि विवेचयिष्यामि ॥

४४ ॥ मिश्रभावानामुदाहरणानि ॥—कल्प्यतां तावदादिमः पुरुष (ईश्वरः) विदेशीयसुबुद्धिमद्वृद्धमनुष्यो ऽस्ति येन परितो वर्तमानानि सर्वाणि वस्तूनि नवीनानीवाज्ञातानि सन्ति येषां ज्ञानस्य करणभूताः शक्तयोऽपि सांप्रतिकलौकिकपुरुषस्येव तस्मिन्नपि तावत्य एव सन्ति न तु

Digitized by Google

ततो ऽधिका ऽतिलौकिका इति । स च स्वपुत्रं ल्यामेकनामानं प्रायिकस्थित्यपेक्षया ऽधिकं दुःखिनं ज्ञात्वा कल्पयति स्म, तस्य प्रेयसी पत्नी अदाहनाम्नी पुरुषान्तरेऽपि सिह्यतीति स (ल्यामेकनामा) शङ्कते इति । अथादिम इमान् स्वविमर्शान् स्वपत्न्यै ईव्हेव्यै प्रकाश्य अदाहनाम्न्या व्यभिचारनिरोधे सावधाना भवेति तामादिदेश । तस्मिंश्च ईव्हेव्या सह संवादे स नवीनौ द्वौ 'किनीह' 'नियाफ्' इतिशब्दौ प्रायुङ्क्त । अथ कियता चित्कालेनादिमस्य (वध्वा अपाविच्यशङ्काविषये) भ्रम आसीदिति प्रतीयाय । मनुष्यहत्यया ल्यामेकनामा दुःखी बभूवेत्यस्योपलब्धेः । एवमपि पत्न्या व्यभिचारिणीत्वस्य शङ्काया वाचकः किनीहशब्दः परश्च व्यभिचारकर्मणो वाचको नियाफ्शब्द इतीमौ द्वौ स्वस्वार्थौ न जहतः । एतदुक्तं भवति । मिश्रभावानां द्वे मिश्रविज्ञाने तद्वाचके नामनी च स्तः । स्वरूपतो विभिन्नक्रियाद्वयविशेषजातौ इतियावत् । ननु किनीहपदाभिलप्यमानमादिमपुरुषात्मगतं मिश्रविज्ञानं पूर्णमस्ति न वेति चेदस्त्येवेति तु स्फुटमेव । प्रतिमानमननुरुध्यैव किमपि वस्तु प्रतिमानतया ऽगृहीत्वैव स तन्मिश्रविज्ञानान्तर्भूतानि सर्वाणि शुद्धविज्ञानानि संक्षेपत एकेन पदेन परान्प्रति बोधयितुं यदृच्छयैवं संघीकृत्यान्येभ्यो व्यवच्छिद्य च यस्मिन्समुदाये क्रिनीह इति नाम तेन प्रयुक्तं तादृशशुद्धविज्ञानसमूहरूपत्वादिदं पूर्णविज्ञानरूपमस्तीत्यस्य निश्चितत्वात् । तस्य विज्ञानसमूहस्य स्वेच्छयैव निर्मितत्वात् स्वाभीष्टसकलशुद्धविज्ञानघटितत्वेन स्वप्रदर्श्यप्रतिमानान्तरनैरपेक्ष्येण च सर्वथेदमन्यूनानतिप्रसक्तं पूर्णमेवेति ॥

४५ ॥ किनीह नियाफ् इतीमौ शब्दौ क्रमशो लौकिकव्यवहारगोचरावभूतां ततश्च तयोरर्थावपि किंचित् परिवर्तितावास्ताम् । आदिमस्यापत्यानि स्वपितृसमज्ञानशक्त्यैव स्वाभीष्टानि मिश्रभावविज्ञानानि स्वात्मसु विरचय्य परेभ्यो व्यवच्छिद्य च तदर्थबोधकत्वेन स्वाभिमतान् शब्दान् व्यरचयताम् । परं तु नामव्यवहारस्य परैर्ज्ञातानां विज्ञानानां स्वस्मिन् विरचनरूपतया द्वयोः संभाषमाणयोः परस्परं प्रति स्वस्वविज्ञानप्रकाशनमिच्छतोः पुरुषयोरात्मगतस्यैकरूपविज्ञानस्य बोधक एक एव शब्दो

यत्र प्रयुज्यते तद्भिन्नत्र स्थलेषु पदव्यवहारः कर्तुं न शक्यते । यत एव येरा-हिमापत्यानां मिथ्यव्यवहारे प्रयुज्यमानौ किनोह्नियाफ् इति शब्दावनुपलब्धौ ते तौ निरर्थकशब्दाविति कल्पयितुं नाशक्नुवन् अपितु कस्मिंश्चिदर्थबोधकाविति कल्पनायत्या निगमयामासुः । यत्किंचिद्विज्ञानबोधकौ, यवद्धे-द्वर्कविज्ञानबोधकाविति यावत् । तयोः साधारणनामतया ते कयचिदेकविज्ञाने ताभ्यां नामभ्यां विविक्तयोर्विशेषजात्योः स्वरूपे अभूताम् । अतो यदि तैः पूर्वं व्यवस्थापिताः सर्वजनानुमता इव तौ शब्दौ प्रयुज्येतां तर्हि तैरन्यस्या तन्नामबोध्ये स्वात्मगोचरे विज्ञाने परात्मगोचरतस्यद्बोध्यविज्ञानानां प्रतिमानरूपतया ऽनुरूपे कल्पनीये भवेताम् । ततश्च तयोस्तादृशमिश्रभावविज्ञानयोरवश्यमपूर्णता प्रसज्येत । तयोर्विशेषतश्चानेकगुणविज्ञानसमूहात्मकविज्ञानानामेकरूपशब्दप्रयोक्त्रात्मगोचरविज्ञानैः सर्वथा सारूप्यस्य वक्तुमनर्हत्वात् । यद्यपि अज्ञातार्थशब्दार्थज्ञानोपायः प्रयोक्तारं प्रति तदर्थप्रश्नरूपः प्रायशः सुकरस्तथापि यदैव भाषारम्भसमये प्रतिपुरुषं किनोह नियाफ्शब्दयोः स्वैरिकलिङ्गतया विना व्याख्यानं तयोः पदयोरमुके विज्ञाने अर्थाविति परात्मगतं ज्ञानमसंभव्यासीत् तदैव येन सह संभाषणं कर्तुमिष्यते तदात्मगते स्पर्धाव्यभिचारपदबोध्ये विज्ञाने कीदृशे इति निश्चितज्ञानस्यासंभवात् ॥

४६ ॥ जेहाब इति पदबोध्यद्रव्याणामुदाहरणम् ॥—तेनैव प्रकारेण प्रथमप्रयुक्तानां द्रव्यनाम्नां विचारो ऽप्यधुना कर्तव्यः । आदिमापत्यानामेकतमः कदाचित् पर्वतेषु विहरंश्चक्षुषोराह्लादकरं चाकचिक्यविशिष्टं किमपि द्रव्यं दैवात्समुपलभ्य गृहं प्रति आदिमसकाशमानिनाय । स च किं चित्परीक्षया कठिनतरं भास्वरपीतरूपवद्गुरुतमं च तदुपालेभे । ततश्च प्रथमतस्त एव स्वर्णावृत्तितया तेन ज्ञाताः सर्वे धर्मा आसन् । स्वीयपरिमाणानुसारेण गुरुतमस्य विलक्षणभास्वरपीतरूपवतो द्रव्यस्य मिश्रविज्ञानं व्यवच्छेद्य प्रत्यक्षपाक्षिकेदृशधर्मवतां सर्वेषां द्रव्याणां बोधाय जेहाब इति पदं प्रायुङ्क्त । एतदुक्तं भवति । आदिमः पुरा यद्बोधाय किनोह नियाफ् इति शब्दौ प्रायुङ्क्त तादृशमिश्रभावविज्ञानरचनायां यदन्वतिष्ठत्

Digitized by Google

तत्तो ऽत्यन्तं विभिन्नयैव रीत्या प्रकृतस्थले ऽकरोत् । यतस्तत्र कल्पनयैव केवलं तानि विज्ञानानि संघीचकार न पुनः कस्माच्चित्सतो वस्तुनः परिगृहीतानि, ततश्च तादृशं वस्तु विद्यते न वेत्यविचार्यैव स्वकल्पितविज्ञानानुरूपाणि यानि यानि अभूवंस्तेषां सर्वेषां बोधनाय ते नामनी प्रायुङ्क्त, तत्र तु मदीया एवनैव प्रतिमानमासीत् । परं तु प्रकृतनवीनद्रव्यविज्ञाननिर्माणे ऽत्यन्तं विभिन्नामेव रीतिमनुसरति स्म । यत्र तु स्वभावसिद्धमेव प्रतिमानं तेनावधारितमस्तस्य तदभावेपि स्वगृहीततद्गुणानद्वारैव तस्य स्वात्मानं प्रदर्शनात् स न शुद्धविज्ञानानि मिश्रविज्ञानतां नयति, अपि तु तद्वस्तुनः प्रत्यक्षेण यानि सोऽवधारयति । अवधानपूर्वकं स स्वीयं विज्ञानं तत्प्रतिमानानुरूपमेव विरचय्य तादृशमनुरूपं विज्ञानमेव तेन पदेन बुध्यतामिति विवक्षति ॥

४७ ॥ आदिमेनेत्थं 'गेहाब्' इति नाम्ना बोधितस्यैतद्धातुखण्डस्य तेन पूर्वदृष्टात्सर्वस्माद्रव्यन्तं भिन्नतया, मन्ये, न कोपि विवदेत तस्य पृथग्विशेषजातित्वे, ऽसाधारणरूपवत्त्वे, तत्स्वरूपवतां सर्वेषां वस्तूनां वाचकस्य गेहाब्' इतिपदस्य तादृशविशेषजातेर्लिङ्गतायां च । परं तु प्रकृतगेहाब्पदवाच्यमादिमकल्पितं स्वरूपं केवलमेतावन्मात्रं यद् घने भास्वरं पीतमतिगुरु द्रव्यमिति । परं तु जिज्ञासवो मनुष्या नैषां गुणानां ज्ञानेन परितुष्यन्ति । यथा हि तस्मिन् द्रव्ये धर्मान्तरपरीक्षणायापि आदिमः प्रावर्ततेत्यपि कल्पयितुं शक्नोमि । आभ्यन्तरधर्मपरीक्षणाय स कठिनप्रस्तरेण तद्द्रव्यं संताडयन् अनायासेन खण्डशो ऽभिद्यमानस्याघातसहिष्णुतां च पश्यन् एतदाघातेन वक्रमेव भविष्यति न पुनः खण्डितमिति स्पष्टम्प्रतीयाय । किमिदानीं सूत्ररूपेण परिणमनीयतामपि पूर्वविज्ञानेन सह संयोज्य गेहाबपदवाच्यविशेषजातेः स्वरूपस्य घटकः स धर्मो न कृतः? । इतो ऽधिकपरीक्षणेन द्रवयोग्यता स्थिरत्वं च तयोः अवभ्येते । उक्तविधा पूर्वोक्तगुणा इव किं तावपि गुणौ गेहाब्पदवाच्यमिश्रविज्ञानघटकौ कर्तुं न शक्येते? नेति चेदेकस्य तद्घटकत्वे ऽपरस्य च तद्घटकत्वे किं कारणमिति वक्तव्यं स्यात् । तेषां गुणानां तद्घटक-

स्यावश्यकत्वे तु तेनैव कारणेन तस्मिन्द्रव्ये परीक्षया सिद्धैर्ज्ञास्यमानैश्च सर्वैर्धर्मान्तरैरपि जेहावपदाभिधेयमिश्रविज्ञानघटकावयवैर्भाव्यमतश्च तादृशाखिलधर्मविज्ञानघटितमेव मिश्रविज्ञानं तत्पदवाच्यविशेषजातेः स्वरूपं भवेद् । इत्थं च तेषां धर्माणामानन्त्यादेवं प्रकारेण तत्प्रतिमानानुरूप्यमनुसृत्य विरचितं विज्ञानं सर्वदा ऽपूर्णमेव स्यादिति सिद्धम् ॥

४८ ॥ तेषां विज्ञानान्यपूर्णानि तत एव च नानाविधानि ॥—परं त्वेतावदेव न पर्याप्तम् । एतदप्युक्तं भवति । भिन्नभिन्नपुरुषैः प्रयुक्तानि द्रव्यवाचकानि पदानि न केवलं वस्तुतो विभिन्नार्थकानि सन्त्यपि तु भिन्नार्थकत्वेन कल्पितान्यपि येन संभाषणव्यवहारस्य संकीर्णता ऽत्यन्तं स्यात् । यतो यत्र कुत्रापि द्रव्ये येन केनाप्याविष्कृतः स स सर्वोपि धर्मः स्वार्थबोधकसाधारणपदेनाभिधीयमानमिश्रविज्ञानस्यावश्यकावयवत्वेन कल्पितः स्यात् तर्हि मनुष्यैरेतदप्यवश्यं कल्पनीयं स्यादेक एव शब्दो भिन्नमनुष्यान् प्रति विभिन्नानि वस्तूनि बोधयतीति । यत एकपदवाच्यद्रव्येषु भिन्नभिन्नमनुष्याः परैर्ज्ञातान् बहून् धर्मान् आविष्कर्तुं शक्नुवन्तो ऽपि न कथमपि तेषु संदेग्धुमर्हन्ति ॥

४९ ॥ अत एव तेषां विशेषजातीर्नियमयितुमार्थस्वरूपाणि कल्प्यन्ते ॥—अत एवैतद्दूषणपरिहाराय प्रत्येकविशेषजातिसंबद्धमार्थं स्वरूपं कल्पयन्ति, यस्मात्ते सर्वे गुणा उद्भवन्ति स्ववाच्यविशेषजातीनां तानि तानि नामानि च लभ्यन्ते । परं तु तेषां द्रव्यगतार्थस्वरूपविज्ञानाभावात् तन्नाम्नां च तत्तदुक्तविज्ञानातिरिक्तार्थबोधकत्वाभावाच्चानेन प्रयत्नेनैतदेव संसाधनीयं यत् किमस्त्यार्थं स्वरूपमित्यज्ञात्वैव तदार्थस्वरूपविशिष्टस्य वस्तुनः स्थाने तन्नाम्नः स्थापनम् । एतच्च यदा मनुष्या वस्तूनां विशेषजातीरधिकृत्य भाषन्ते, ता जातीः स्वभावसिद्धा आर्थस्वरूपैः परस्परं विविक्ताश्च सन्तीति कल्पयित्वा ऽनुतिष्ठन्ति ॥

५० ॥ तत्कल्पनमप्यपार्थकम् ॥—अत्रेदं विचार्यताम् । यदा सर्वं स्वर्णमनुच्छिद्यमानद्रवत्वाधिकरणमिति विधीयते तदा द्रवत्वाधिकरणता लक्षणघटका, स्वर्णपदाभिधेयशाब्दस्वरूपघटका वेति तस्यार्थः । ततश्च

स्वर्णमस्ति तथाविधमिति विधानं केवलं स्वर्णपदार्थघटितमेव भवति । अनुच्छिद्यमानद्रवत्वाधिकरणतायाः सुवर्णलक्षणानवयवत्वात् तद्द्रव्यस्यैवेयं गुण इत्यर्थो वा तस्य वाक्यस्य । एतदुक्तं भवति । स्वभावसिद्धवस्तुविशेषजात्यर्थस्वरूपवद्द्रव्यस्यानापन्नः सुवर्णशब्दो ऽस्तीति । अनेनार्थस्थाने पदसंनिवेशनप्रकारेणैतत्तथा संकीर्णार्थकमनियतार्थकं च भवति, येन स्वर्णमस्त्यनुच्छिद्यमानद्रवत्वाधिकरणमितिवाक्यस्य यथाकथंचिदार्थस्वरूपविधायकत्वेपि प्रयोगविशेषे सर्वदैतस्य याथार्थ्यमेव न भवति ततश्चेदं यथार्थोपयोगि निश्चितं च न भवति । सर्वं सुवर्णं सुवर्णस्यार्थस्वरूपवद्वा सर्वमस्ति अनुच्छिद्यमानद्रवत्वाधिकरणमिति वाक्यस्य सर्वत्र सर्वदा याथार्थ्ये ऽपि किमस्ति सुवर्णं किं वा नास्तीत्यस्यास्मिन्नर्थे ज्ञानाभावे तस्यानुपयुक्तत्वात् । स्वर्णस्यार्थस्वरूपस्याज्ञाने किं धातुखण्डं तत्स्वरूपवदस्ति ततश्च यथार्थं स्वर्णं तद् भवति न वेति ज्ञानस्यासंभवात् ॥

५१ ॥ निगमनम् ॥—तदयं निर्गलितोर्थः । आदिमः पुरुष आदौ मिश्रभावानां किमपि मिश्रविज्ञानं पराणि प्रतिमानान्यननुरुध्यैव केवलं स्वविमर्शाननुरुध्य येन स्वातन्त्र्येणारचयत् तेनैव स्वातन्त्र्येण सर्वे मनुष्याः सर्वदा तानि तानि मिश्रविज्ञानानि रचयन्ति । किं च यथैवानापत्त्या स स्वीयानि द्रव्यविज्ञानानि स्वभावसिद्धप्रतिमानरूपबाह्यवस्तूनामनुरूपाणि करोति स्म तथैवानापत्त्या मनुष्या अपि तथानुतिष्ठन्ति । यदि नैसर्गिक्येव तस्य तथा करणे प्रवृत्तिर्न पुनः प्रयत्नपूर्विकेति चेदुच्येत, हन्त तर्हि मनुष्याणामपि तथैवास्तु । कस्य चिद्विज्ञानस्य बोधनाय नवीनपदप्रयोगे यथा तस्य स्वैरिकता तथैव सदा सर्वेषामपि । यदि तादृशं स्थलं कल्प्येत चेद् विशेषतो भाषानिर्मातारस्तथैवानुतिष्ठन्तीति प्रतीयेत । परं त्वियान्विशेषः । लोकैः स्वव्यवहारसंपत्तये यत्र पूर्वमेव भाषा व्यवस्थाप्यते तादृशस्थलेषु शब्दानामर्था अत्यन्तमवधानेन विरलमेव परिवर्तनीया भवन्ति । स्वस्वविज्ञानवाचकानां पदानां पूर्वमेव मनुष्यैरवधारणाद् ज्ञातनाम्नां नियतेष्वेव विज्ञानेषु सार्वजनिकप्रयोगस्यौचित्यावधारणाच्च तेषामन्यथा प्रयोगस्य केवलमुपहासमात्रैकफलत्वात् । नवीनवि-

ज्ञानवान् पुरुषः कदाचित् तेषां बोधनाय नवीनान् शब्दान् रचयेत् तथापि मनुष्यास्तथाकरणं साहसमिति चिन्तयन्ति । लोकव्यवहारे तदर्थबोधकतया ते प्रचरिता भविष्यन्ति न वेत्यत्र तु सन्देह एव । परं तु परैः सह संभाषणे तु कस्या अपि भाषाया ग्रामीणशब्देन बोध्यमानं विज्ञानं तेन ज्ञातेनोचितेन चार्थेनावश्यमनुरूपमेव विधेयम्, अथ वा यदर्थे य शब्दः प्रयुज्यते सोऽर्थस्तं प्रति ज्ञापनीय इति तु विस्तरेण पूर्वमवोचाम ॥

॥ इति षष्ठः परिच्छेदः समाप्तः ॥

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

THIRD ADHYÁYA.

(Continued from page 578.)

द्रोणचितं चिन्वीतेति विज्ञायते । २१५

He is to construct the agni in the form of a trough ; such is the tradition.

द्रोणाकारमिव चिन्वीतेति विज्ञायते ।

द्वयानि तु खलु द्रोणानि । २१६

But there are two kinds of troughs.

भवन्ति । द्वयानि द्विप्रकाराणि लोके प्रसिद्धानि ।

चतुरस्राणि परिमण्डलानि च । २१७

Namely square-shaped troughs and round ones.

त्सरुमन्ति चतुरस्राणि । परिमण्डलान्योष्ठवन्ति ।

अविशेषात्ते मन्यामहे ऽन्यतरस्याकृतिरिति । २१८

As (in the bráhmana) no particular characteristic is mentioned; we adopt both; a description of the form of both (will be given).

एतत्सर्वं रथचक्रे व्याख्यातम् ।

अथाग्निं विमिमीते चतुरस्र आत्मा भवति । २१९

Then he measures out the agnikshetra of this chiti; its âtman is square-shaped.

तस्याग्नेः समचतुरस्र आत्मा भवति ।

तस्य त्रयः पुरुषास्त्रिभागोनाः पार्श्वमानी भवति । २२०

The side of this square is 2⅔ purushas long.

तस्यात्मनस्त्रयः पुरुषास्त्रिभागोनाः । द्वौ पुरुषौ तृतीयस्तृतीयभागहीनः पुरुषः । न प्रत्येकम् । एवं त्रिभागोनास्त्रयः पुरुषाः । विंशत्यधिकशतद्वयाङ्गुला पार्श्वमानी भवति ।

पश्चात्त्सरुर्भवति । २२१

At the west side of this square a handle is to be made.

पश्चात्पुच्छस्थाने त्सरुर्भवति ।

तस्यार्धपुरुषो दशाङ्गुलानि प्राची । २२२

Its length from the east towards the west amounts to half a purusha and ten angulis (= 70 angulis).

तस्य त्सरोः । अर्धपुरुषः षष्टिरङ्गुलयो दशाङ्गुलानि च । एवं सप्ततिरङ्गुलयः प्राची भवति ।

त्रिभागोनः पुरुष उदीचीति[1] । २२३

Its breadth from the south towards the north amounts to two-thirds of a purusha (= 80 angulis.)

अशीतिरङ्गुलय उदीची भवति । आत्मपश्चिमपार्श्वमान्या दक्षिणत उत्तरतश्चोभयत्र पुरुषमात्रमवशिष्य मध्यतो ऽशीत्यङ्गुलदक्षिणोत्तरं सप्तत्यङ्गुलायतं (दीर्घचतुरस्रं?) पश्चात्त्सरुर्भवतीत्यर्थः । इतिकरणो मानसमाप्त्यर्थः ।

1. All Mss. उदीची, but see the commentary.

एवं सारत्निप्रादेशः सप्तविधः संपद्यते । २२४

In this manner the sevenfold agni together with the two aratnis and the prádeśa is brought about.

The átman contains 7½ square purushas, the handle ½.

अस्याग्नेः षष्ठीनां प्रथमकरणत्वात्ताभिः संपत्तिरुच्यते । आत्मनि षट्पञ्चाशच्छतद्वयं षष्ठ्यः शेरते । त्सरौ चतुर्दश । एवं सारत्निप्रादेशः सप्तविधः सप्ततिशतद्वयं षष्ठ्यः संपद्यन्ते । अथेष्टकानां विकाराः ।

तस्येष्टकाः कारयेत्पुरुषस्य षष्ठ्यस्ता एवैकतोऽध्यर्धास्तासामर्ध्यास्तिर्यग्भेदाः पुरुषस्य चतुर्थ्य इति । २२५

The following bricks are to be made for this chiti: 1. square-bricks of 20 aṅgulis 2. oblong bricks of 20 aṅg. by 30 aṅg 3. oblong bricks of 20 aṅg. by 10 aṅg. (made by dividing a brick of the first-mentioned class into two oblongs; the word tiryagbhedáh excludes the division by a diagonal) 4. square bricks of 30 aṅgulis.

षष्ठ्यो विंशत्यङ्गुलाः । ता एवैकतोऽध्यर्धाः त्रिंशदङ्गुलपार्श्वमान्यः । तासामर्ध्यास्तिर्यग्भेदाः विंशत्यङ्गुलिपार्श्वमानीका दशाङ्गुलतिर्यङ्मानीकाः । चतुर्थ्यस्त्रिंशदङ्गुलाः । तत्र द्विचत्वारिंशत् षष्ठ्यः । द्विपञ्चाशत्सप्तशतमध्यर्धाः । द्विषष्टिशतमर्ध्याः । चत्वारिंशच्चतुर्थ्यः । तत्र षोडशानामेकसद अष्टावध्यर्धाः । द्वे अर्ध्ये । इतिकरणः करणसमाप्तिसूचनः ।

तासां त्सरुश्रोण्यन्तरालयोः षट् षट् षष्ठीरुपधाय शेषमग्निं बृहतीभिः प्रच्छादयेत् । २२६

From among these bricks six of the first class are placed on each side of the handle up to the west-corners of the átman; the rest of the agni is covered with bricks of the second class.

अध्यर्धाभिः प्राचीभिः प्रागायताभिः प्रच्छादयेत् । षोडश हीयन्ते । तत्र ।

अर्धेष्टकाभिः संख्यां पूरयेत् । २२७

Then the number of 200 bricks is to be made full with bricks of the third class.

भेदपरिहारेणोभयस्मिन्पार्श्वे चतस्रश्चतस्रो ऽध्यर्धा उद्धृत्य द्वादश द्वादश अर्ध्या निधेयाः । एवमुपधाने भेदसंभवं मत्वा ऽन्यथोपधानमाहुः । तत्र त्सरुद्वये चतस्रो ऽर्धेष्टका उदगायताः । ततश्चतस्रः षष्ठ्यः । ततश्चतस्रो रीत्यः प्रत्येकं द्वादशाध्यर्धेष्टकाः प्रागायताः । त्सरुद्वयोपर्यन्तयोर्द्वादश द्वादश प्रागायता अर्ध्याः । ततः पार्श्वद्वये प्रागायताभिरध्यर्धाभिः षड् रीत्यो दशेष्टकाः । एवं द्विशतः प्रस्तारः । अस्मिन्प्रस्तारे चतस्रः षष्ठ्यः । अष्टषष्टिशतमध्यर्धाः । अष्टाविंशतिरर्ध्याः ।

अपरस्मिन्प्रस्तारे दक्षिणेऽंसे ऽध्यर्धामुदीचीमुपदध्यात् । २२८

In the second layer a brick of the second class, turned towards the north, is to be placed in the south-east corner of the âtman.

आत्मनो दक्षिणेऽंऽस उदीचीमुदगायताम् ।

तथोत्तरे । २२९

The same is to be done in the north-west corner.

अध्यर्धामुदीचीमित्येव ।

पूर्वस्मिन्ननीके षड्भागीया उपदध्यात् । २३०

On the eastern edge of the âtman (between the two bricks mentioned in S. 228—229.) bricks of the first class are to be placed.

आत्मपूर्वान्ते अंसयोः पूर्वोपहिताध्यर्धयोर्मध्ये । अर्थात्तयोर्दश षड्भागीयाः ।

दक्षिणोत्तरयोश्चतुर्भागीयाः । २३१

Bricks of the fourth class are to be placed on the south edge and the north-edge.

अनीकानुवृत्तेर्दक्षिणोत्तरयोरनीकयोः । अर्थात्तूश दश चतुर्भागीयाः ।

त्सरोः पुरस्तात्पार्श्वयोर्द्वे चतुर्भागीये उपदध्यात् । २३२

On the east-side of the handle on both sides two bricks of the fourth class are to be placed.

त्सरोः पूर्वान्ते द्वयोः पार्श्वयोरेकैका चतुर्भागीया ।

तयोरवस्तादभितो द्वे द्वे अध्यर्धे विषूची । २३३

To the west of these two, place on both sides two bricks of the second class, turned away from each other.

तयोरुपहितयोश्चतुर्भागीययोः पश्चादभितः पार्श्वयोर्द्वे द्वे अध्यर्धे विषूची । दक्षिणोत्तरायते उपदध्यात् ।

तयोरवस्तान्मध्यदेशे षष्ठ्यौ प्राच्यौ । २३४

To the west of these two (bricks mentioned in S. 232) in the middle (of the handle) place two bricks of the first kind, the one to the east of the other.

तयोः पूर्वोक्तचतुर्थ्योः पश्चाद्भूतप्रदेशे मध्यदेशे त्सरुमध्यदेशे प्राच्यौ प्रागपवर्गं त्सरुमध्यपश्चिमान्तादारभ्य षष्ठीद्वयमुपदध्यादित्यर्थः ।

शेषमग्निं बृहतीभिः प्रच्छादयेत् । २३५

The remainder of the agni is to be covered with bricks of the second kind.

त्सरुणि चतुर्थ्योर्मध्य एका बृहती । श्रोण्योर्द्वे । एवं त्सरौ नवेष्टकाः । आत्मनि त्रिंशच्छतमध्यर्धाः प्राच्यः । न्यूनाः षड्विंशतिः ।

अर्धेष्टकाभिः संख्यां पूरयेत् । २३६

The number of 200 bricks is to be made full with bricks of the third class.

Digitized by Google

आत्मनि पुरस्ताद्भागे मध्ये वा चयोदश बृहतीरुद्धृत्यैकोनचत्वारिंशदर्ध्या निधेयाः । अस्मिन्प्रस्तारे भेदपरिहारं दुःशकं[1] मत्वाऽन्यथोपधानमाहुः । त्सरौ पूर्ववन्नवेष्टकम् । आत्मनि दक्षिणत उत्तरतश्च दश दश चतुर्थ्यः । अंसयोर्द्वे अध्यर्धे उदीची । आत्ममध्ये प्राच्यस्त्रयोदश रीतयः । तास्वेकैकस्यामादितो नव नवाध्यर्धाः प्रागायताः । तत एकैकार्धेष्टकोदीची । तत एकैका षष्ठी । ततो द्वे द्वे अर्धेष्टके तिरश्च्यौ । एवं चयोदशेष्टकास्त्रयोदश रीतयः । एवं द्विशतः प्रस्तारः । अस्मिन्प्रस्तारे पञ्चदश षष्ठ्यः । चतुर्विंशतिशतमध्यर्धाः । एकोनचत्वारिंशदर्ध्याः । द्वाविंशतिश्चतुर्थ्यः ।

अथापरः । २३७

The description of the second kind of the droṇachit (the parimaṇḍala droṇachit) follows.

अनन्तरमपरो द्रोणचिदुच्यते ।

पुरुषस्य षोडशीभिर्विंशशतं सारत्निप्रादेशः सप्तविधः संपद्यते । २३८

One hundred and twenty bricks, the area of one of which amounts to the sixteenth part of a square-purusha, compose the sevenfold agni together with the two aratnis and the prádeśa.

षोडशीभिः सर्वतस्त्रिंशदङ्गुलाभिर्विंशत्यधिकं शतम् ।

तासामेकामपोद्धृत्य शेषाः परिमण्डलं करोति । २३९

From these (120 bricks) one is deducted and the remainder turned into a circle.

Actually these bricks had not to be made; they are here introduced only for expressing the measure of the agni in a con-

[1]. A. B. दुःशंकं C. दुष्कं ।

venient manner. From a square, the area of which amounted to 7½ square-purushas, a small square of 900 square-aṅgulis was deducted (according to the rule for samachaturasranirhára) and the resulting square turned into a circle.

तासां षोडशीनां मध्ये एकां षोडशीमपोद्धृत्य शेषा एकोनविंशत्यधिकं शतं षोडशी: परिमण्डलं करोति । तत्र सारत्निप्रादेशस्य सप्तविधस्याग्ने: क्षेत्रं लक्षमष्टौ सहस्राण्यङ्गुलय: । तस्मात्षोडशीपरिमितं नवशताङ्गुलक्षेत्रमुद्धृत्य शिष्टं लक्षं सप्त सहस्राणि शतं च । तस्य मूलमानीय नवतिलसहितसप्तविंशत्यङ्गुलसहितशतत्रयाङ्गुलप्रमाणेन समचतुरस्रं कृत्वाक्ष्णयार्धमित्यादिना मण्डलं करोतीत्यर्थ: ।

तत्पूर्वेण रथचक्रचिता व्याख्यातम् । २४०

This has been already explained under the first rathachakrachit.

तत् द्रोणचित उपधानं पूर्वेण प्रधियुक्तेन रथचक्रचिता व्याख्यातम् । तस्मिन्यावत्संभवेत्तावत्समचतुरस्रमित्यादि । तदुत्कर्तव्यम् । परिमण्डलकरणे विशेषमाह ।

षोडशीं पुरस्ताद्विशय उपधाय तया सह मण्डलं परिलिखेत् । २४१

(Before the square is turned into a circle) the one shoḍaśí—brick (which had been deducted from the large square) is placed so as to touch the middle of the east side (of the large square); the circle is then described with it (i. e. through it; in consequence the circle into which the large square is turned cuts off a part of the shoḍaśí).

अपोद्धृतां षोडशीं चतुरस्रस्य पुरस्ताद्विशय उपधाय तया सह मण्डलं परिलिखेत् । तत्र मण्डलकरणे द्वाविंशतितिलसहितचतुरशीतिशताङ्गुलो विष्कम्भार्ध: । तेन मण्डलकरणे विशय उपहितषोडशीमध्ये तिलसहितैकविंशत्यङ्गुलप्रमाणं मण्डलं प्रवर्तते ।

यदवस्तादपच्छिन्नं तत्पुरस्तादुपदध्यात् । २४२

What is cut off from the shoḍaśí on its west side is to be placed on its east side.—The shoḍaśí in its modified shape forms then the oshṭha—the spout—of the droṇa.

यन्मण्डलादवस्तात् पश्चान्मण्डलान्तर्भूतं षोडश्यपच्छिन्नं तन्मण्डलाद्बहिर्भूतषोडशीखण्डस्य पुरस्तात् त्रिंशदङ्गुलपार्श्वसंगतमुपदध्यात् । एवमुपहिते षोडशी खण्डद्वयात्मिका परिमण्डलाया मण्डलसंधौ धनुर्वक्रा भवति ।

प्रधीनां सप्तधा विभागः । २४३

(In the circle forming the átman of the droṇachiti a large square had been drawn similar to that of the rathachakrachit and covered with 144 bricks.) The segments of the circle (which are situated round the large square) are divided into seven parts each. (i. e. those parts of the segments which remain after six bricks have been placed in each segment).

मण्डलमध्ये चतुस्तिलाधिकैकषष्टिशतद्वयाङ्गुलेन समचतुरस्रं कृत्वा तस्य करण्या द्वादशेनेष्टकाः कृत्वा मध्ये चतुश्चत्वारिंशच्छतमिष्टका उपधाय तासां षट् प्रधावुपधाय शेषमष्टधेत्यत्र सप्तधा विभागः । ततः प्रधिमूलमध्य उपहितानां षण्णां पार्श्वेषु द्वे द्वे मुखेषु तिस्रस्तिस्रः ।

प्रधिमध्यमाः प्रक्रमव्यासा भवन्ति । २४४

Those bricks which are situated in the middle of each segment have a breadth of thirty aṅgulis. (the remaining space is to be divided equally among the bricks on both sides).

द्वितीये प्रस्तारे प्रधिमध्यमामेष्टा उपधायेति वक्ष्यमाणत्वात् प्रथमे प्रस्तारे महादिशु सत्तयः ।

चतुरश्राणामर्धाभिः संख्यां पूरयेत् । २४५

Finally the number of 200 bricks is made full by substituting (four) half-bricks for (two) square-bricks.

आत्मनि चतुश्चत्वारिंशच्छतम् । प्रधिमूलेषु चतुर्विंशतिः । ओष्ठे द्वे इष्टके । एवं न्यूनशतद्वयं भवति । तत्र पश्चात्पुरस्ताच्चतुरस्रस्रक्तिगतयोश्चतुरस्रयोरन्ययाभेदः ।

अपरस्मिन्प्रस्तारे । २४६

In the second layer—

विधिर्वक्ष्यते ।

प्रधिमध्यमामोष्ठ उपधाय यदवस्तात्तद् द्वेधा विभजेत् । २४७

(thẹ bricks of the átman are to be arranged iu that way that the four corners of the square point to the north-east, north-west, etc., while they had pointed to the east, west, etc., in the first layer). The brick in the middle of the (eastern) pradhi (which lies to the west of the oshṭha) has to be placed in the oshṭha; the place to the west of it (which had become empty by its removal) has to be divided into two parts (to be covered with two bricks).

In this manner a bheda in the oshṭha is prevented.

ओष्ठस्य प्रक्रमविस्तारत्वात् तया पूर्यते । प्रधिमध्यमायाः प्रक्रमादधिकं तिलोनाङ्गुलिचयं मण्डले प्रविशति । तस्मादोष्ठसंधौ भेदाभावः । यदवस्तात्तद् द्वेधा विभजेत् । प्रधिमध्यमायाः पश्चाच्चतुरस्राणां पुरस्ताद्यत् शेषं प्रक्रमपरिमितं तद् द्वेधाविशेषात्समं विभजेत् । अत्रापि चतुरस्राश्चतुश्चत्वारिंशच्छतम् । प्रधिमूलेषु चतुर्विंशतिः । प्रधिष्वष्टाविंशतिः । ओष्ठ एका । तामभितः पश्चाद् द्वेधाभेदेन संगतैका । एवं न्यूनशतद्वयम् । दक्षिणोत्तरस्रक्तिगतयोश्चतुरस्रेष्टकयोः पूर्ववद्भेदः । एवं द्विशतसंपत्तिः । अयमत्र प्रकारः । अग्निक्षेत्रमध्ये शङ्कुं निहत्य द्वाविंशतितिलसहितचतुरशीतिशताङ्गुलया रज्ज्वा मण्डलं परिलिख्य मण्डलमध्यशङ्कोः पुरस्तात् त्रिंशदङ्गुले विंशतितिलोनचतुरशीतिशताङ्गुले शङ्कू निहत्य द्वयोः पौरस्त्यशङ्कोः

पुरस्तात्प्रक्रमप्रमाणं चतुरस्रमोष्ठार्थं विहृत्य नाभेः पौरस्त्यमध्यमे शङ्कौ पाशं नियम्य विष्कम्भार्धेनोष्ठचतुरस्रस्योत्तरांसमारभ्यादक्षिणांसात्परिलिखेत् ।

(The radius of the circle which forms the átman of the droṇa is 184 aṅg. 22 til. The práchí—the west-east diameter of the circle—is drawn and a pole fixed at the distance of 183 aṅg. 14 til. to the east from the pole marking the centre of the circle. A line drawn through this point parallel to the north-south diameter of the circle will meet the periphery on both sides of the east—west diameter at the distance of 15 aṅgulis. On this line of 30 aṅgulis length a square is constructed for the oshṭha. A second pole is fixed at 30 aṅgulis distance from the centre of the circle and a cord of the length of the radius tied to it with one end. This cord is stretched towards the north-east corner of the small square representing the oshṭha and drawn from there towards the south-east corner. In this way a small segment of a circle is added to the square on its east side and this added segment is equal to the segment cut off from the western part of the square by the large circle.)

मण्डलमध्ये चतुस्तिलोनैकषष्टिशतद्वयाङ्गुलप्रमाणेन महादिक्षु यथा स्रक्त्यस्तथा चतुरस्रं कृत्वा तस्य करण्या द्वादशेन षड्विंशतितिलसहितेनैकविंशत्यङ्गुलेन प्रमाणेनेष्टकाः कुर्यात् । प्रथेष्टकानां चत्वारि करणानि । आद्यं प्रध्यन्तं त्रिकोणम् । तस्य मण्डलमध्यचतुरस्रसंहितं पार्श्वं द्वादशतिलोनं त्रयस्त्रिंशदङ्गुलम् । षड्विंशत्यङ्गुलमन्यत्पार्श्वम् । सपञ्चविंशतितिलमेकचत्वारिंशदङ्गुलं तृतीयं कर्णरूपं धनुरिव भवेत् । षट्तिलयुक्ताङ्गुलिः शरः । द्वितीयस्यापि पार्श्वद्वयं पूर्ववदेव । द्विचत्वारिंशदङ्गुलं साष्टतिलं तृतीयम् । षट्त्रिंशत्सषोडशतिलं पार्श्वान्तरं कर्णरूपं धनुरिव भवेत् । त्रिंशत्तिलाः शरः । तृतीयस्य प्रधिसंगतं पार्श्वं सदशतिलं पञ्चाशदङ्गुलम् । सार्ध-

विंशत्यङ्गुलमेकं पार्श्वम् । सपञ्चविंशतितिलमेकत्रिंशदङ्गुलं पार्श्वान्तरम् । अष्टादशतिलमेकपञ्चाशदङ्गुलं चतुर्थं करणरूपं धनुरिव भवेत् । सप्ततिलोनमङ्गुलिद्वयं शरः । प्रधिमध्यमाया व्यासो द्वात्रिंशदङ्गुलम् । सपञ्चविंशतितिलमेकत्रिंशदङ्गुलं पार्श्वद्वयम् । बाह्यफलकं धनुराकारम् । द्विचत्वारिंशत्तिलाः शरः । ओष्ठेष्टकयोः प्रथमप्रस्तारार्थे करणद्वयम् । तयोः प्रथमस्य तिलहीननवाङ्गुलं पार्श्वद्वयम् । त्रिंशदङ्गुलमितरत्पार्श्वद्वयम् । तयोः पश्चिमफलकमन्तर्वक्रम् । द्विचत्वारिंशत्तिलाः शरः । यथैवमिष्टकारूपं सोष्ठमण्डलसंधौ उपधेया (?)[1] ओष्ठेष्टकयोर्द्वितीयस्याः सैकतिलमेकविंशत्यङ्गुलं पार्श्वद्वयम् । इतरद् द्वयं त्रिंशदङ्गुलम् । तस्य बाह्यफलकं धनुरिव भवेत् । द्विचत्वारिंशत्तिलाः शरः । यथैवमिष्टकारूपं सोष्ठाग्र उपधेया । द्वितीयप्रस्तारे प्रधिमध्यमस्थानेष्टकयोरेकैकं करणम् । त्रिंशदङ्गुलं पार्श्वद्वयम् । पञ्चदशाङ्गुलं पार्श्वद्वयम् । ते ओष्ठ उपहितप्रधिमध्यमायाः पश्चादुपधेये । संख्यापूरणार्थमस्यायाभेदेन चतुरस्रार्धेष्टकार्थमेकं करणम् । तस्या द्वे पार्श्वे चतुरस्रवत्पञ्चदशतिलं त्रिंशदङ्गुलम् । तृतीयं कर्णरूपम् । एवं नव करणानि । प्रथमे प्रस्तारे चतुरस्रगताश्चतुश्चत्वारिंशच्छतम् । प्रधिमूलगताश्चतुर्विंशतिः । प्रधिगता अष्टाविंशतिः । ओष्ठार्थयोरिष्टकयोर्ह्रस्वेष्टकां मण्डलसंधावुपदध्यात् । बृहतीं तस्याः पुरस्तात् । पश्चात्पुरस्ताच्च चतुरस्रपङ्क्तिगते उद्धृत्य द्वे द्वे अर्धेष्टके । एवं द्विशतः प्रस्तारः । द्वितीये ऽपि प्रस्तारे पूर्ववत्प्रधिवर्जमेवोपधानम् । अथावान्तरदिक्षु स्रक्तयः । पूर्वस्मिन्प्रधौ मध्यमामुद्धृत्योष्ठे प्राग् धनुर्वक्रामुपदध्यात् । तस्याः पश्चात्प्रधिमध्यमस्थाने द्वितीयप्रस्तारार्थकरणेष्टके उपधेये । मण्डलमध्यचतुरस्रस्रक्त्योर्दक्षिणोत्तरतश्च द्वे चतुरस्रे उद्धृत्य द्वे द्वे अर्धेष्टके । एवमपरः प्रस्तारः ।

1. A. B. यदयमिष्टकारूपं अर्धंसामंडल° C. यथैव—यथैव° wanting.

स एष नवकरणो द्रोणचित्परिमण्डलः । २४८

This is the circular construction in the shape of a trough which requires nine different kinds of bricks.

स्पष्टार्थं वचनम् । कूर्मस्यान्ते तनुपुरीषमुपदध्यान्मध्ये बहुलं एतदेव द्रोणे विपरीतमिति वक्ष्यमाणं प्रस्मर्तव्यम्[1] । अत्र कल्पोक्तो विधिरनुसंधेयः । तत्रैवमुक्तम् । द्रोणचितं चिन्वीत अन्नकाम इत्ये-तस्यैव सतो चिमात्रस्य प्रागोष्ठमिव निरूहति । अथ मध्ये निम्नमिवे-ष्टकाया आयातयति । स एष द्रोणचिदन्नकामस्य परिकृष्यत इति ।

समूह्यपरिचाय्यो पूर्वेण रथचक्रचिता व्याख्यातो । २४९

The samúhya-construction and the parichâyya-construction are explained by the former construction in the shape of a wheel.

These two chitis are, as far as their outline is concerned, equal to the rathachakrachiti without spokes, i. e. they are circles of 7½ square-purushas area.

यावानग्निरित्यादि परिमण्डलान्तं कुर्यात् । समूह्यस्य विशेषः ।

समूह्यस्य दिक्षु चात्वालान् खातयित्वा तेभ्यः पुरीषं समूह्यो-पदध्यात् । २५०

Having dug pits to the east, west, etc. of the place to be occupied by the samúhya one is to take earth out of these pits and to place it on the area of the samúhya (instead of the usual bricks ; "purísham samúhya" explains the name of the chiti).

नान्या सर्वचात्वालेषु धर्मप्राप्तिः । शालामुखीयमहावेद्योरन्तरा पश्चिमचात्वालः । एवं चात्वालेभ्यः पुरीषं समूह्य गृहीत्वा इष्टका-स्थानेषूपदध्यात् । यावत्संभवेत्तावच्चतुरस्रमित्यादि शुष्केष्टकान्यायेन । अग्निक्षेत्रे तत्रैवोपधेया इष्टका सर्वा लिखित्वोपधानकाले तैस्तैर्मन्त्रै-स्तेषु तेषु स्थानेषु पुरीषमुपदध्यात् । अपरस्मिन्प्रस्तारे प्रध्यनीके-

1 C. ° माणं च स्म ° A. B. ° णं न प्रस्म °

Digitized by Google

ष्वित्यादि तुल्यम् । आनुदश्यं पञ्चचितीकर्मिति च । तत्र कल्पोक्तो विधिरप्यनुसंधातव्यः । तत्रैवमुक्तम् । समूह्यं चिन्वीत पशुकाम इति विज्ञायते । पुष्करपर्णं कूर्मं हिरण्मयं पुरुषं स्रुचावि[1]त्येतल्लक्ष्माणीत्याचक्षते । कृतत[2] एवैतद्‌पो पुरीष्य[3]स्यैवेष्टका आयातयति । आ-स्वयमातृण्णायाः अथाभितः स्वयमातृण्णा इष्टकाः परिचिनोति स एष समूह्यः पशुकामस्य[4] प[रि]कृष्यत इति । पुष्करपर्णादीनामुपधानस्थानेषु तत्तद्रूपेण चिह्नानि कुर्यादित्यर्थः ।

परिचाय्ये इष्टकानां देशभेदः । २५१

In the parichâyya-construction there is a difference (from the rathachakra) in the position of the bricks.

इष्टकानां स्थानभेदो न रथचक्रचिद्वत् । तस्मिन्यावत्संभवेदित्यादि कर्तव्यमित्यर्थः । देशभेदं स्वयमेवाह ।

तं सर्वाभिः प्रदक्षिणं परिचिनुयात् । २५२

The area of the parichâyya is to be covered by placing all bricks in circles towards the right-hand side.

The bricks are to be placed in concentric circles (see the Commentary).

तमग्निं सर्वाभिरिष्टकाभिः प्रदक्षिणं सर्वतश्चिनुयात् । छन्दश्चिदध्याये ऽप्युक्तम् । परिचाय्यचितं चिन्वीत ग्रामकाम इति । अनुशर्करमन्तः शर्करामिष्टकां परिचिनोति । अथान्तरतो ऽथान्तरत एवमेव करोति । स एष परिचाय्यो ग्रामकामस्य परिगृह्यत इति । तत्रानुशर्करमिति सावित्राग्निवत् परिमण्डलाकारमग्निक्षेत्रं विहृत्यो-

1. A. B. ° वं मचावि ° C. ° वं मदादि °

2. C. कुत.

3. A. B. ° दप्यो पुरुष्य °

4. C. ° मस्येति.

पदध्यादित्यर्थः । परिकृष्यत इति । द्वादश सीताः परिमण्डलाः कर्षणीया इत्यर्थः । अयमत्र प्रकारः । अग्निक्षेत्रे समान्तरालानि षण्मण्डलानि कृत्वा नाभिमष्टधा विभजेत् । नाभिमण्डलादारभ्य द्वितीयतृतीयमण्डले प्रत्येकं षोडशधा विभजेत् । चतुर्थे द्वात्रिंशधा विभजेत् । पञ्चमषष्ठमण्डले प्रत्येकं चतुःषष्टिमिष्टकाः कुर्यात् । एवं द्विशतपूर्तिः । प्रतिमण्डलं करणभेदः । एवं षट् करणानि । अपरस्मिन्प्रस्तारे पूर्वोक्तमण्डलमध्येषु मध्यवर्जितेषु परिलिखेत् । एवमत्रापि षण्मण्डलानि संपद्यन्ते । पूर्वप्रस्तारवदेव यथा भेदो न भवति तथा विभागः । मध्यममष्टधा पूर्वलेखान्तरालेषु विभजेत् । द्वितीयतृतीयमण्डले षोडशके । द्वात्रिंशकं चतुर्थम् । पञ्चमषष्ठे चतुःषष्टिद्वयम् । सर्वत्र भेदपरिहारेण लेखनीयाः । एवं द्विशतः प्रस्तारः । अत्रापि षट् करणानि । स एष द्वादशकरणः परिमण्डलः परिचाय्यचित् ।

श्मशानचितं चिन्वीतेति विज्ञायते । सर्वमग्निं चतुरस्रान्प[1]ञ्चदश भागान्कृत्वा । २५३

He is to construct the śmaśána-chiti; after having divided the whole agnikshetra into fifteen square parts.—

(See Journal Asiatic Society of Bengal, 1875, Part I. p. 265 pp.)

सर्वमग्निक्षेत्रं पञ्चदशधा विभज्य समचतुरस्रान्कृत्वा । किम् ।

तेषामाख्यातमुपधानम् । २५४

The arrangement of these fifteen squares has already been taught. (In the preceeding chapters of Baudháyanas kalpasútra; see the Commentary).

कल्पे छन्दश्चिदध्याये तेषां चतुरस्रीकृतानां पञ्चदशधा विभक्तानां भागानामुपधानविनियोगः तैः क्षेत्रक्रियेत्यर्थः । आख्यातमुक्तम् । तत्रैवानुसंधेयमित्यर्थः । श्मशानचितं चिन्वीत यः का-

[1]. A. B. C. M. ° स्रानत्य °

मयेत पितृलोकं चाध्युयामिति षट् प्राञ्चः पुरुषास्त्रयः पुरस्तात्तिर्यञ्चो तौ द्वौ स आत्मेति । तत्र पुरुषशब्देन पञ्चदशधा विभक्ता भागा उच्यन्ते । अस्यायमर्थः । अग्निक्षेत्रं सर्वं लक्षमष्टौ सहस्राण्यङ्गुलयः । ताः पञ्चदशधा विभज्य लब्धं सप्त सहस्राणि द्वे शते चाङ्गुलयः । तस्य भागस्य समचतुरश्रकरणी षट्तिलोनपञ्चाशीत्यङ्गुला । एवं पुरुषशब्दितैर्भागैः षट् प्राञ्चः पुरुषाः । षड्भागप्रमाणायामा इत्यर्थः । स च षट्विंशतितिलोनदशाधिकपञ्चशताङ्गुलयः । त्रयः पुरस्तात्पार्श्वे तिर्यञ्चो दक्षिणोत्तराः । सार्धपञ्चाशच्छतद्वयाङ्गुलयः पुरस्तात्तिर्यगित्यर्थः । द्वौ पश्चात्तिर्यञ्चौ । द्वादशतिलोनसप्ततिशताङ्गुलयः । पश्चात्तिर्यगित्यर्थः । स आत्मा । ईदृग्विशिष्टरूप आत्मा । नान्यदङ्गमस्तीत्यर्थः । एवं कल्पोक्तप्रकारेण चयनकरणमुक्तम् । इदानीमिष्टकोपधानविधिरुच्यते ।

त्रिभिर्भागैर्भागार्धव्यासं दीर्घचतुरश्रं विहृत्य पूर्वस्याः करण्या अर्धाच्छ्रोणी प्रत्यालिख्यान्तावुद्धरेत् । २५५

With three of these parts (with three times the length of the side of one of the above mentioned fifteen parts) construct. an oblong of the breadth of one part; draw from the middle of the east-side of this oblong lines towards the two west-corners and cut off the two side-pieces.

After the removal of these two pieces there remains a praüga

त्रिभिर्भागैरायामभूतैर्भागार्धव्यासं सार्धचतुःपञ्चाशच्छतद्वयाङ्गुलायामं सचतुर्दशतिलद्विचत्वारिंशदङ्गुलव्यासं दीर्घं चतुरश्रं विहृत्य पूर्वस्यास्तिर्यङ्मान्या मध्यादारभ्य श्रोणी प्रत्यालिख्य प्रउगाकारं कृत्वान्तावुद्धरेत् ।

तस्य दशधा विभागः । २५६

This praüga is divided into ten parts (praügas and ubhayatah praügas; any other division would require a detailed description of the different parts; see the Commentary).

कर्तव्य इति शेषः । तस्य प्रउगस्य प्रउगाकारा उभयतः प्रउगाकारा इष्टका यथा भवन्ति तथा दशधा विभागः । अन्यथाऽविभागे करणबहुत्वं स्यात् । तथैवं विभागः । प्रउगपृष्ठ्यनीके समान्तराणि पञ्च चिह्नानि कृत्वा चतुरो विभागान्कृत्वा प्रउगपार्श्वयोरपि तथा कृत्वा पृष्ठ्यनीकप्रथमचिह्नादारभ्य इतरपार्श्वप्रथमचिह्नं प्रत्यालिखेत् । एवं द्वितीयचिह्नादारभ्य पार्श्वद्वितीयम् । एवं तृतीयचिह्नादारभ्य तथा तृतीयम् । तथा तृतीयचिह्नादारभ्य इतरपार्श्वप्रथमचिह्नं प्रत्यालिखेत् । एवमितरयोः । एवं विभक्ते पृष्ठ्यनीकस्थाः प्रउगाकाराश्चतस्र इष्टकाः । ततस्तिस्र उभयतः प्रउगाकृतयः । ततो द्वे । तत एका चुबुकान्ता । एवं षडुभयतः प्रउगाः । चतस्रः प्रउगाः । एवं दशेष्टका एकस्मिन्प्रउगे भवन्ति ।

तानि विंशतिः सर्वोऽग्निः संपद्यते । २५६

Twenty such (triangles as described in S. 255) form the whole agni.

One of these triangles is the half of an oblong the area of which is equal to the tenth part of the whole agni.

हंसमुखीश्चतस्रश्चतसृभिः पादेष्टकाभिः संयोजयेत् । तत्तिर्यक् स्वयमातृण्णावकाश उपदध्यादिति तथा बहिर्देशेष्टकं प्रउगमापाद्याग्निरेव उपहितानि विंशतिं प्रउगानि सर्वोऽग्निः संगृह्णीयादिति । अथात्मनि मध्ये दक्षिणोत्तरां लेखामालिख्य पूर्वार्धे प्रत्यग्रयाणि षट् प्रागग्राणि पञ्च । पश्चिमार्धे प्रत्यग्रयाणि पञ्च प्रागग्राणि चत्वारि । एवं विंशतिः । एवं शतद्वयसंपत्तिः । अयमत्र प्रकारः । अग्निक्षेत्रं तिलद्वयोननवपञ्चशताङ्गुलायामं सार्धचतुःपञ्चाशच्छतद्वयाङ्गुलपुरस्ताद्व्यासं द्वादशतिलोनसप्ततिशताङ्गुलपश्चिमतिर्यङ्मानीकमेकतोऽग्निमद्दीर्घचतुरस्रं विहृत्येष्टकाः कुर्यात् । तत्र द्वे करणे प्रउगमुभयतः-

प्रउगमिति । प्रउगस्य पृष्ठ्यनीकं दशाङ्गुलं सार्धविंशतितिलम् । उभे पार्श्वे सार्धविंशतितिले त्रिषष्ट्यङ्गुले । ते द्वे पृष्ठ्यनीकप्रदेशाभ्यां संगते उभयतः प्रउगम् । प्रथमेन करणेनाशीतिरिष्टका: । द्वितीयेन विंशशतम् । उपधाने पूर्वस्मिन्ननीके चतुर्विंशतिः प्रउगेष्टकाः प्रत्यगग्राः । ततः पश्चादुभयतः प्रउगास्त्रयोविंशतिः । ततः पश्चाद् द्वाविंशतिः । तत एकविंशतिः । ततः पश्चात्प्रागग्रा विंशतिः प्रउगाः । ततः पश्चाच्च विंशतिः प्रत्यगग्राः । तत उभयतः प्रउगा एकोनविंशतिः । ततः पश्चादष्टादश । ततः सप्तदश । तत अपरस्मिन्ननीके प्रागग्राः षोडश प्रउगाः । एवमुदीच्यो दश रीतयः । द्विशतः प्रस्तारः ।

अपरस्मिन्प्रस्तारे । २५८

In the second layer—

विधिर्वक्ष्यते ।

प्रउगमध्ये ऽनूचीनं विभजेत् । २५९

(Two) triangles are to be divided lengthways (to be bisected by a perpendicular from the top to the base).

The triangle meant by the sútra is one of the five large triangles, into which the whole agnikshetra may be divided.

अग्निक्षेत्रे भागप्रमाणव्यासानि षड्भागप्रमाणायतानि पञ्च महाप्रउगानि शेरते । तत्र प्रत्यगग्राणि त्रीणि । प्रागग्रे द्वे । तेषां महाप्रउगानां प्रउगद्वयमिह विवक्षितम् । अनूचीनमिति प्रउगविशेषणम् । षड्भागायतमित्यर्थः । दक्षिणतः प्रत्यगग्रस्थितप्रउगमध्ये भागप्रमाणपृष्ठ्यनीकमध्यादारभ्यापश्चिमसूत्रमाग्रादालिखेत्[1] । एवमुत्तरस्मिन्नपि पार्श्वे स्थितं विभजेत् । ते द्वे पार्श्वयोरुपधायेति वक्ष्यमाणत्वात् । प्रउगमिति च तस्येति च जात्येकवचनम् ।

---

[1]. A. B. C. °रभ्य प°

REGISTERED No. 2.

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 11. APRIL 2ND 1877. VOL. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सहस्य सः संज्ञायाम् ॥ ७८ ॥

सहशब्दस्य स इत्ययमादेशो भवति संज्ञायां विषये । साश्वत्थम् । सपलाशम् । सशिंशपम् । संज्ञायामिति किम् । सहयुध्वा । सहकृत्वा । सादेश उदात्तो निपात्यते । उदात्तानुदात्तवतो हि सहशब्दस्यान्तर्यतः स्वरितः स्यात् । स च निपातनस्वरः पूर्वपदप्रकृतिस्वरत्वं यत्र तत्र उपयुज्यते । अन्यत्र समासान्तोदात्तत्वेन बाध्यतएव । सेष्टि, सपशुबन्धमिति ॥

अव्ययीभावे चाकाले ॥ ७९ ॥

ग्रन्थान्ते ऽधिके च वर्त्तमानस्य सहशब्दस्य स इत्ययमादेशो भवति । सकलं ज्योतिषमधीते । समुहूर्तम् । ससंग्रहं व्याकरणमधीयते । कलान्तं मुहूर्त्तान्तं संग्रहान्तमिति अन्तवचनइत्यव्ययीभावः समासः । तत्राव्ययीभावे चाकालइति कालवाचिन्युत्तरपदे सभावो न प्राप्नोतीत्ययमारम्भः । अधिके । सद्रोणा खारी । समाषः कार्षापणः । सकाकिणीको माषः ॥

द्वितीये चानुपाख्ये ॥ ८० ॥

द्वयोः सहयुक्तयोरप्रधानो यः स द्वितीयः । उपाख्यायते प्रत्यक्षत उपलभ्यते यः स उपाख्यः, उपाख्यादन्यो ऽनुपाख्यो ऽनुमेयस्तस्मिन् द्वितीये ऽनुपाख्ये सहस्य स इत्ययमादेशो भवति । साग्निः कपोतः । सपिशाचा वात्या । सराक्षसीका शाला । अग्न्यादयः साक्षादनुपलभ्यमानाः कपोतादिभिरनुमीयमानास्तदुपाख्या भवन्ति ॥

अव्ययीभावे चाकाले ॥ ८१ ॥

अव्ययीभावे च समासे ऽकालवाचिन्युत्तरपदे सहस्य स इत्ययमादेशो भवति । सचक्रं धेहि । सधुरं प्राज । अकालइति किम् । सहपूर्वाह्णम् ॥

Digitized by Google

वोपसर्जनस्य ॥ ८२ ॥

उपसर्जनसर्वावयवः समास उपसर्जनं, यस्य सर्वे ऽवयवा उपसर्जनीभूताः स सर्वोपसर्जनो बहुव्रीहिर्गृह्यते । तदवयवस्य सहशब्दस्य वा स इत्ययमादेशो भवति । सपुत्रः । सहपुत्रः । सच्छात्रः । सहच्छात्रः । उपसर्ज्जनस्येति किम् । सहयुध्वा । सहकृत्वा । सहकृत्वप्रियः प्रियसहकृत्वेतिबहुव्रीहौ यदुत्तरपदं तत्परः सहशब्दो न भवतीति सभावो न भवति ॥

प्रकृत्याशिष्यगोवत्सहलेषु ॥ ८३ ॥

प्रकृत्या सहशब्दो भवति आशिषि विषये ऽगोवत्सहलेषु । स्वस्ति देवदत्ताय सहपुत्राय सहच्छात्राय सहामात्याय । अगोवत्सहलेष्विति किम् । स्वस्ति भवते सहगवे । सगवे । सहवत्साय । सवत्साय । सहलाय । सहहलाय । वोपसर्जनस्येति पक्षे भवत्येव सभावः ॥

समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु ॥ ८४ ॥

स इति वर्त्तते । समानस्य स इत्ययमादेशो भवति छन्दसि विषये मूर्द्धन् प्रभृति उदर्क इत्येतान्युत्तरपदानि वर्ज्जयित्वा । अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्यः । समानो गर्भः सगर्भः, तत्र भवः सगर्भ्यः । सगर्भसयूथसनुताद्यदिति यत् प्रत्ययः । अमूर्द्धप्रभृत्युदर्केष्विति किम् । समानमूर्द्धा । समानप्रभृतयः । समानोदर्काः । समानस्येति योगविभाग इष्टप्रसिद्ध्यर्थः क्रियते । तेन सपक्षः, साधर्म्यं, सजातीय, इत्येवमादयः सिद्धा भवन्ति ॥

ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ॥ ८५ ॥

ज्योतिस् जनपद रात्रि नाभि नामन् गोत्र रूप स्थान वर्ण वयस् वचन बन्धु इत्येतेषूत्तरपदेषु समानस्य स इत्ययमादेशो भवति । सज्योतिः । सजनपदः । सरात्रिः । सनाभिः । सनामा । सगोत्रः । सरूपः । सस्थानः । सवर्णः । सवयाः । सवचनः । सबन्धुः ॥

चरणे ब्रह्मचारिणि ॥ ८६ ॥

चरणे गम्यमाने ब्रह्मचारिण्युत्तरपदे समानस्य स इत्ययमादेशो भवति । समानो ब्रह्मचारी, सब्रह्मचारी । ब्रह्म वेदस्तदध्ययनार्थं यद्व्रतं तदपि ब्रह्म तच्चरतीति ब्रह्मचारी । समानस्तस्यैव ब्रह्मणः समानत्वादित्ययमर्थो भवति । समाने ब्रह्मणि व्रतचारी सब्रह्मचारीति ॥

तीर्थे ये ॥ ८७ ॥

तीर्थशब्दउत्तरपदे यत्प्रत्ययपरे परतः समानस्य स इत्ययमादेशो भवति । सतीर्थ्यः । समानतीर्थे वासीति यत्प्रत्ययः ॥

विभाषोदरे ॥ ८८ ॥

उदरशब्दउत्तरपदे यत्प्रत्ययान्ते समानस्य विभाषा स इत्ययमादेशो भवति । सोदर्यः । समानोदर्यः । समानोदरे शयित ओ चोदात्त इति यत् ॥

दृग्दृशवतुषु ॥ ८९ ॥

दृक् दृश वतु इत्येतेषु परतः समानस्य स इत्ययमादेशो भवति । सदृक् । सदृशः । त्यदादिषु दृशो ऽनालोचने कञ्चेत्यत्र समानान्ययोश्चेतिवक्तव्यमिति कञ्क्विनौ प्रत्ययौ क्रियेते ॥ दृक्षे चेति वक्तव्यम् ॥ * ॥ सदृक्षः ॥ दृशेः क्सप्रत्ययोपि तत्रैव वक्तव्यः ॥ * ॥ वतुग्रहणमुत्तरार्थम् ॥

इदंकिमोरीश्की ॥ ९० ॥

इदं किम् इत्येतयोरीश् की इत्येतौ यथासंख्यमादेशौ भवतो दृग्दृशवतुषु । ईदृक् । ईदृशः । इयान् । कीदृक् । कीदृशः । कियान् । किमिदंभ्यां वो घ इति वतुप् ॥ दृक्षे चेति वक्तव्यम् ॥ * ॥ ईदृक्षः । कीदृक्षः ॥

आ सर्वनाम्नः ॥ ९१ ॥

सर्वनाम्न आकारादेशो भवति दृग्दृशवतुषु । तादृक् । तादृशः । तावान् । यादृक् । यादृशः । यावान् ॥ दृक्षे चेति वक्तव्यम् ॥ * ॥ तादृक्षः । यादृक्षः ॥

Digitized by Google

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ॥ ९२ ॥

विष्वक् देव इत्येतयोः सर्वनाम्नश्च टेरद्रीत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्तउत्तरपदे। विष्वगञ्चतीति विष्वद्र्यङ्। देवद्र्यङ्। सर्वनाम्नः। तद्र्यङ्। यद्र्यङ्। अद्रिसध्र्योरन्तोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थम्। तत्र यणादेशे कृते उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येष स्वरो भवति। विष्वग्देवयोरिति किम्। अश्वाची। अञ्चताविति किम्। विष्वग्युक्। वप्रत्यय इति किम्। विष्वगञ्चनम्। वप्रत्ययग्रहणमन्यत्र धातुग्रहणे तदादिविधिप्रतिपत्त्यर्थम्। तेनायस्कृतमयस्कार इत्यत्रातः कृकमिकंसकुम्भपात्रेति सत्वं भवति ॥ छन्दसि स्त्रियां बहुलमिति वक्तव्यम् ॥ * ॥ विश्वाची च घृताची चेत्यत्र न भवति। कद्रीचीत्यत्र तु भवत्येव * ॥

समः समि ॥ ९३ ॥

समित्येतस्य समि इत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्तउत्तरपदे। सम्यक्। सम्यञ्चौ। सम्यञ्चः ॥

तिरसस्तिर्यलोपे ॥ ९४ ॥

तिरस् इत्येतस्य तिरि इत्ययमादेशो भवत्यञ्चतौ वप्रत्ययान्तउत्तरपदे ऽलोपे। यदा ऽस्य लोपो न भवति। तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। अलोपइति किम्। तिरश्चा। तिरश्चे। अच इत्यकारलोपः ॥

सहस्य सध्रिः ॥ ९५ ॥

सहेत्यस्य सध्रिरित्ययमादेशो भवत्यञ्चतौ वप्रत्ययान्तउत्तरपदे। सध्र्यङ्। सध्र्यञ्चौ। सध्र्यञ्चः। सध्रीचः। सध्रीचा ॥

सध मादस्थयोश्छन्दसि ॥ ९६ ॥

छन्दसि विषये माद स्थ इत्येतयोरुत्तरपदयोः सहस्य सध इत्ययमादेशो भवति। सधमादो द्युम्न एकास्ताः। सधस्थाः ॥

द्व्यन्तरुपसर्गेभ्यो ऽप ईत् ॥ ९७ ॥

द्वि अन्तरित्येताभ्यामुपसर्गाच्चोत्तरस्याबित्येतस्य ईकारादेशो भव-

* क्वचिदन्यत्रापि भवति। विश्वद्राणा। इत्यधिकमेकस्मिन्पुस्तके।

Digitized by Google

ति । द्वीपः । अन्तरीपः । उपसर्गात् । नीपम् । वीपम् । समीपम् ॥ समाप ईत्वे प्रतिषेधो वक्तव्यः ॥ * ॥ समापं नाम देवयजनम् । अपर आह ॥ ईत्वमनवर्णादिति वक्तव्यम् ॥ * ॥ इह मा भूत् । प्रापम् । परापम् । अपशब्दं प्रति क्रियायोगाभावात् उपसर्गग्रहणं प्राद्युपलक्षणार्थम् ।

ऊदनोर्देशे ॥ ९८ ॥

अनोरुत्तरस्याप ऊकारादेशो भवति देशाभिधाने । अनूपो देशः । देशइति किम् । अन्वीपम् । दीर्घोच्चारणमवग्रहार्थम् । अनु ऊपो ऽनूप इति ॥

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु ॥ ९९ ॥

अषष्ठीस्थस्य अतृतीयास्थस्य चान्यशब्दस्य दुगागमो भवति आशिस् आशा आस्था आस्थित उत्सुक ऊति कारक राग छ इत्येतेषु परतः । अन्या आशीः, अन्यदाशीः । अन्या आशा अन्यदाशा । अन्या आस्था, अन्यदास्था । अन्य आस्थितः । अन्यदास्थितः । अन्य उत्सुकः, अन्यदुत्सुकः । अन्या ऊतिः, अन्यदूतिः । अन्यः कारकः, अन्यत्कारकः । अन्यो रागः, अन्यद्रागः । अन्यस्मिन् भवः, अन्यदीयः गहादिष्वन्यशब्दो द्रष्टव्यः । अषष्ठ्यतृतीयास्थस्येति किम् । अन्यस्य आशीः, अन्याशीः । अन्येन आस्थितः, अन्यास्थितः ॥

दुगागमो ऽविशेषेण वक्तव्यः कारकच्छयोः ।
षष्ठीतृतीययोरिष्ट आशीरादिषु सप्तसु ॥

अन्यस्य कारक,मन्यत्कारकम् । अन्यस्येदमन्यदीयम् । अस्य च द्विर्नञ्ग्रहणं लिङ्गम् ॥

अर्थे विभाषा ॥ १०० ॥

अर्थशब्दउत्तरपदे अन्यस्य विभाषा दुगागमो भवति । अन्यदर्थः । अन्यार्थः ॥

कोः कत्तत्पुरुषे ऽचि ॥ १०१ ॥

कु इत्येतस्य कदित्ययमादेशो भवति तत्पुरुषे समासे ऽजादावु-

त्तरपदे । कदजः । कदश्वः । कदुष्ट्रः । कदन्नम् । तत्पुरुषइति किम् । कूष्ट्रो राजा । अचीति किम् । कुब्राह्मणः । कुपुरुषः ॥ कद्भावे त्रावुपसंख्यानम् ॥ * ॥ कुत्सितास्त्रयः, कत्त्रयः ॥

रथवदयोश्च ॥ १०२ ॥

रथ वद इत्येतयोश्चोत्तरपदयोः कोः कदित्ययमादेशो भवति । कद्रथः । कद्वदः ॥

तृणे च जातौ ॥ १०३ ॥

तृणशब्दउत्तरपदे जातावभिधेयायां कोः कदादेशो भवति । कत्तृणा नाम जातिः । जाताविति किम् । कुत्सितानि तृणानि कुतृणानि ॥

का पथ्यक्षयोः ॥ १०४ ॥

पथिन् अक्ष इत्येतयोरुत्तरपदयोः कोः का इत्ययमादेशो भवति । कापथः । काक्षः ॥

ईषदर्थे ॥ १०५ ॥

ईषदर्थे वर्त्तमानस्य कोः का इत्ययमादेशो भवति । कामधुरम् । कालवणम् । काम्लम् । अजादावपि परत्वात् कादेश एव भवति । कोष्णम् ॥

विभाषा पुरुषे ॥ १०६ ॥

पुरुषशब्दउत्तरपदे विभाषा कोः का इत्ययमादेशो भवति । कापुरुषः । कुपुरुषः । अप्राप्तविभाषेयम् । ईषदर्थे तु पूर्वविप्रतिषेधेन नित्यं का भवति । ईषत्पुरुषः, कापुरुषः ॥

कवञ्चोष्णे ॥ १०७ ॥

उष्णशब्दउत्तरपदे कोः कवमित्ययमादेशो भवति का च विभाषा । कवोष्णम् । कदुष्णम् ॥

पथि च च्छन्दसि ॥ १०८ ॥

पथिशब्दउत्तरपदे छन्दसि विषये कोः कव का इत्येतावादेशौ भवतो विभाषा । कवपथः । कापथः । कुपथः ॥

Digitized by Google

पृषोदरादीनि यथोपदिष्टम् ॥ १०९ ॥

पृषोदरादीनि शब्दरूपाणि येषु लोपागमवर्णविकाराः शास्त्रेण न विहिता दृश्यन्ते च तानि यथोपदिष्टानि साधूनि भवन्ति । यानि यथोपदिष्टानि शिष्टैरुच्चारितानि प्रयुक्तानि तथैवानुगन्तव्यानि । पृषद् उदरं यस्य, पृषोदरम् । पृषद् उद्वानं यस्य, पृषोद्वानम् । अत्र तकारलोपो भवति । वारिवाहको, बलाहकः । पूर्वशब्दस्य बशब्द आदेश उत्तरपदादेश्च ल-त्वम् । जीवनस्य मूतो, जीमूतः । वनशब्दस्य लोपः । शवानां शयनं, श्मशानम् । शवशब्दस्य श्मादेशः । शयनशब्दस्यापि शानशब्द आदेशः । ऊर्ध्वं खमस्येति, उलूखलम् । ऊर्ध्वखशब्दयोरुलू खल इत्येतावादेशौ भवतः । पिशिताशः, पिशाचः । पिशिताशशब्दयोर्यथायोगं पिशाचशब्दावादेशौ । बृवन्तोऽस्यां सीदन्तीति, बृसी । सदेरधिकरणे डट् प्रत्ययः । बृवच्छब्दस्य चोपपदस्य बृशब्द आदेशो भवति । मह्यां रौतीति, मयूरः । रौतेरचि टिलोपः । महीशब्दस्य मयूभावः । एवमन्येपि अश्वत्थकपित्थप्रभृतयो यथायोगमनुगन्तव्याः ॥ दिक्शब्देभ्य उत्तरस्य तीरस्य तारभावो वा भवति ॥ दक्षिणतीरम् । दक्षिणतारम् । उत्तरतीरम् । उत्तरतारम् ॥ वाचो वादे डत्वं च लभावश्चोत्तरपदस्येञि प्रत्यये भवति ॥ वाचं वदतीति, वाग्वादः । तस्यापत्य वाड्वालिः ॥ षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं च भवति ॥ षड् दन्ता अस्य षोडन् । षट् च दश च षोडश ॥ धासु वा षष उत्वं भवति उत्तरपदादेश्च ष्टुत्वम् ॥ षोढा षड्धा कुरु । बहुवचननिर्देशो नानाधिकरणवाचिनो धाशब्दस्य प्रतिपत्त्यर्थः । इह मा भूत् । षट् दधाति धयति वा षड्धेति ॥ दुरो दाशनाशदभध्येषूत्वं वक्तव्यमुत्तरपदा-देश्च ष्टुत्वम् ॥ कृच्छ्रेण दाश्यते नाश्यते दभ्यते च यः स दूडाशः । दूणाशः । दूडभः । दम्भेः खल्वनुनासिकलोपो निपातनात् । दुष्टं ध्यायतीति, दूढ्यः । दुःशब्दोपपदस्य ध्यायतेरातश्चोपसर्ग इति कप्रत्ययः ॥ स्वरो रोहतौ छन्द-स्युत्वं वक्तव्यम् ॥ जायएहि स्वो रोहाव ॥ पीवोपवसनादीनां च लोपो वक्तव्यः ॥ पीवोपवसनानां पयोपवसनानाम् ॥

Digitized by Google

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ॥ ११० ॥

संख्या वि साय इत्येवंपूर्वस्याह्नशब्दस्य स्थाने अहनित्ययमादेशो भवत्यन्यतरस्यां ङौ परतः । द्वयोरह्नोर्भवः, द्व्यह्नः । त्र्यह्नः । द्व्यह्नि । द्व्यहनि । त्र्यह्नि । त्र्यहनि । द्व्यह्ने । त्र्यह्ने । व्यपगतमहः, व्यह्नः । व्यह्नि । व्यहनि । व्यह्ने । सायमह्नः सायाह्नः । सायाह्नि । सायाहनि । सायाह्ने । एकदेशिसमासः । पूर्वादिभ्यो ऽन्यस्यापि भवतीत्येतदेव विसायपूर्वस्याह्नस्य ग्रहणं ज्ञापकम् । तेन मध्यमह्नो मध्याह्न इत्यपि भवति । संख्याविसायपूर्वस्येति किम् । पूर्वाह्णे । अपराह्णे ॥

ढ्रलोपे पूर्वस्य दीर्घो ऽणः ॥ १११ ॥

ढकाररेफयोर्लोपो यस्मिन् स ढ्रलोपः, तत्र पूर्वस्याणो दीर्घो भवति । लीढम् । मीढम् । उपगूढम् । रलोपे । नीरक्तम् । अग्नीरथः । इन्दूरथः । पुनारक्तं वासः । प्रातारात्रक्रयः । पूर्वग्रहणमनुत्तरपदे ऽपि पूर्वमात्रस्य दीर्घार्थम् । अण इति किम् । आवृढम् * ॥

सहिवहोरोदवर्णस्य ॥ ११२ ॥

सहि वहि इत्येतयोरवर्णस्योकार आदेशो भवति ढ्रलोपे । सोढा । सोढुम् । सोढव्यम् । वोढा । वोढुम् । वोढव्यम् । अवर्णस्येति किम् ॥ ऊढः । ऊढवान् । वर्णग्रहणं किम् । क्तायामपि वृद्धौ यथा स्यात् । उदवोढाम् । उदवोढुम् । तादपि परस्तपरस्तपरत्वाद्दाकारस्य ग्रहणं न स्यात् ॥

साढ्यै साढ्वा साढेति निगमे ॥ ११३ ॥

साढ्यै साढ्वा साढा इति निगमे निपात्यन्ते । साढ्यै समन्तात् । साढ्वा शत्रून् । सहेः क्त्वाप्रत्यये ओत्वाभावः । पक्षे क्त्वाप्रत्ययस्य धे भावः । साढेति तृचि रूपमेतत् । निगमइति किम् । सोढ्वा सोढेति भाषायाम् ॥

* आवृढम् । आवृढमिति पुस्तकान्तरे ऽधिकम् ।

Digitized by Google

संहितायाम् ॥ ११४ ॥

संहितायामित्ययमधिकारः। यदित ऊर्द्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद्वेदितव्यम्। वक्ष्यति। द्व्यचोतस्तिङ इति। विद्मा हि त्वा सत्पतिं शूर गोनाम्। संहितायामिति किम्। विद्म, हि, त्वा, सत्पतिं, शूर, गोनाम् ॥

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ॥ ११५ ॥

कर्णशब्दे उत्तरपदे लक्षणवाचिनो दीर्घो भवति विष्ट अष्टन् पञ्चन् मणि भिन्न छिन्न छिद्र स्रुव स्वस्तिक इत्येतान्वर्जयित्वा। दात्राकर्णः। द्विगुणाकर्णः। त्रिगुणाकर्णः। द्व्यङ्गुलाकर्णः। त्र्यङ्गुलाकर्णः। यत्पशूनां स्वामिविशेषसंबन्धज्ञापनार्थं दात्राकारादि क्रियते तदिह लक्षणं गृह्यते। लक्षणस्येति किम्। शोभनकर्णः। अविष्टादीनामिति किम्। विष्टकर्णः। अष्टकर्णः। पञ्चकर्णः। मणिकर्णः। भिन्नकर्णः। छिन्नकर्णः। छिद्रकर्णः। स्रुवकर्णः। स्वस्तिककर्णः ॥

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ ११६ ॥

नहि वृति वृषि व्यधि रुचि सहि तनि इत्येतेषु क्विप्रत्ययान्तेषूत्तरपदेषु पूर्वपदस्य दीर्घो भवति संहितायां विषये। नहि। उपानत्। परीणत्। वृति। नीवृत्। उपावृत्। वृषि। प्रावृट्। उपावृट्। व्यधि। धर्मावित्। हृदयावित्। श्वावित्। रुचि। नीरुक्। अभीरुक्। सहि। ऋतीषट्। तनि। तरीतत् ॥ गमः क्वाविति गमादीनामिष्यते ॥ गतस्तनोतेरप्यनुनासिकलोपः। क्वाविति किम्। परिणहनम् ॥

वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् ॥ ११७ ॥

वन गिरि इत्येतयोरुत्तरपदयोर्यथासंख्यं कोटरादीनां किंशुलकादीनां च दीर्घो भवति संज्ञायां विषये। वने कोटरादीनाम्। कोटरावणम्। मिश्रकावणम्। सिध्रकावणम्। सारिकावणम्। गिरौ किंशुलकादीनाम्। किंशुलकागिरिः। अञ्जनागिरिः। कोटरकिंशुलकादीनामिति

किम् । असिपत्रवनम् । कृष्णगिरिः । कोटर । मिश्रक । पुरक । सिध्रक । शारिक । कोटरादिः । किंशुलक । साल्वक । अञ्जन । भञ्जन । लोहित । कुक्कुट । किंशुलकादिः ॥

वले ॥ ११८ ॥

वले परतः पूर्वस्य दीर्घो भवति । आसुतीवलः । कृषीवलः । दन्तावलः । रजःकृष्यासुतिपर्षदो वलच् इति वलच्प्रत्ययो गृह्यते ॥ अनुत्साहभ्रातृपितृणामित्येव ॥ उत्साहवलः । भ्रातृवलः ॥ पितृवलः ॥ *

मतौ बह्वचो ऽनजिरादीनाम् ॥ ११९ ॥

मतौ परतो बह्वचो ऽजिरादिवर्जितस्य दीर्घो भवति संज्ञायां विषये । उदुम्बरावती । मशकावती । वीरणावती । पुष्करावती । अमरावती । नद्यां मतुबिति मतुप्प्रत्ययः । संज्ञायामिति मतोर्वत्वम् । बह्वच इति किम् । व्रीहिमती । अनजिरादीनामिति किम् । अजिरवती ॥ खदिरवती । पुलिनवती । हंसकारण्डववती । चक्रवाकवती । संज्ञायामित्येव । वलयवती ॥

शरादीनां च ॥ १२० ॥

शरादीनां च मतौ दीर्घो भवति संज्ञायां विषये । शरावती । वंशावती । शर । वंश । धूम । अहि । कपि । मणि । मुनि । शुचि । हनु । संज्ञायामिति मतोर्वत्वम् । यवादित्वाद् व्रीह्यादिभ्यो न भवति ॥

इको वहे ऽपीलोः ॥ १२१ ॥

इगन्तस्य पूर्वपदस्य पीलुवर्जितस्य वहउत्तरपदे दीर्घो भवति । ऋषीवहम् । कपीवहम् । मुनीवहम् । इक इति किम् । पिण्डवहम् । अपीलोरिति किम् । पीलुवहम् ॥ अपील्वादीनामिति वक्तव्यम् ॥ * ॥ इह मा भूत् । दारुवहम् ॥

उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥ १२२ ॥

उपसर्गस्य घञन्तउत्तरपदे ऽमनुष्ये ऽभिधेये बहुलं दीर्घो भवति ।

---

* अनुत्साहेत्यादि पितृवल इत्यन्तमेकस्मिन्पुस्तके नास्ति ।

नीक्लेदः । वीमार्गः । अपामार्गः । न च भवति । प्रसेवः । प्रसारः ॥ सादकारयोः कृत्रिमे दीर्घो भवति ॥ प्रासादः । प्राकारः । कृत्रिमइति किम् । प्रसादः । प्रकारः ॥ वेशादिषु विभाषा दीर्घो भवति ॥ प्रतिवेशः । प्रतीवेशः । प्रतिरोधः । प्रतीरोधः । अमनुष्यइति किम् । निषादो मनुष्यः ॥

इकः काशे ॥ १२३ ॥

इगन्तस्योपसर्गस्य काशशब्दउत्तरपदे दीर्घो भवति । नीकाशः । वीकाशः । अनूकाशः । पचाद्यच्प्रत्ययान्तोयं काशशब्दः । इक इति किम् । प्रकाशः ॥

दस्ति ॥ १२४ ॥

दा इत्येतस्य यस्तकारादिरादेशस्तस्मिन्परत इगन्तस्योपसर्गस्य दीर्घो भवति । नीत्तम् । वीत्तम् । परीत्तम् । अच उपसर्गात्त इत्यन्तस्य यद्यपि तकारः क्रियते तथापि चर्त्वस्याश्रयात्सिद्धत्वमिति तकारादि-र्भवति । इक इत्येव । प्रत्तम् । अवत्तम् । द इति किम् । वितीर्णम् । नितीर्णम् । तीति किम् । सुदत्तम् ॥

अष्टनः संज्ञायाम् ॥ १२५ ॥

अष्टनित्येतस्योत्तरपदे संज्ञायां दीर्घो भवति । अष्टावक्रः । अष्टाबन्धुरः । अष्टापदम् । संज्ञायामिति किम् । अष्टपुत्रः । अष्टभार्यः ॥

छन्दसि च ॥ १२६ ॥

छन्दसि विषये ऽष्टन उत्तरपदे दीर्घो भवति । आग्नेयमष्टाकपालं निर्वपेत् । अष्टाहिरण्या दक्षिणा । अष्टापदी देवता सुमती । अष्टौ पादावस्या इति बहुव्रीहौ पादस्य लोपे कृते पादोन्यतरस्यामिति ङीप् ॥ गवि च युक्ते भाषायामष्टनो दीर्घो भवतीति वक्तव्यम् ॥ * ॥ अष्टागवं शकटम् ॥

चितेः कपि ॥ १२७ ॥

चितिशब्दस्य कपि परतो दीर्घो भवति । एकचितीकः । द्विचितीकः । त्रिचितीकः ॥

विश्वस्य वसुराटोः ॥ १२८ ॥

विश्वशब्दस्य वसु राडित्येतयोरुत्तरपदयोर्दीर्घ आदेशो भवति। विश्वावसुः। विश्वाराट्। राडिति विकारनिर्देशो यत्रास्यैतद्रूपं तत्रैव यथा स्यात्। इह न भवति। विश्वराजौ। विश्वराजः॥

नरे संज्ञायाम् ॥ १२९ ॥

नरशब्द उत्तरपदे संज्ञायां विषये विश्वस्य दीर्घो भवति। विश्वानरो नाम यस्य वैश्वानरिः पुत्रः। संज्ञायामिति किम्। विश्वे नरा यस्य स विश्वनरः॥

मित्रे चर्षौ ॥ १३० ॥

मित्रे चोत्तरपदे ऋषावभिधेये विश्वस्य दीर्घो भवति। विश्वामित्रो नाम ऋषिः। ऋषाविति किम्। विश्वमित्रो माणवकः॥

मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥ १३१ ॥

मन्त्रविषये सोम अश्व इन्द्रिय विश्वदेव्य इत्येतेषां मतुप्प्रत्यये परतो दीर्घो भवति। सोमावती। अश्वावती। इन्द्रियावती। विश्वदेव्यावती॥

ओषधेश्च विभक्तावप्रथमायाम् ॥ १३२ ॥

मन्त्र इति वर्त्तते। ओषधिशब्दस्य विभक्तावप्रथमायां परतो दीर्घो भवति। ओषधीभिरपीपतत्। नमः पृथिव्यै नम ओषधीभ्यः। विभक्ताविति किम्। ओषधिपते। अप्रथमायामिति किम्। स्थिरेयमस्त्वोषधिः॥

ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ॥ १३३ ॥

ऋचि विषये तु नु घ मक्षु तङ् कु त्र उरुष्य इत्येषां दीर्घो भवति। आ तू न इन्द्र वृत्रहन्। नु। नूकरणे। घ। उत वा घा स्यालात्। मक्षु। मक्षू गोमन्तमीमहे। तङ्। भरता जातवेदसम्। तङिति थादेशस्य ङित्वपक्षे ग्रहणं, तेनेह न भवति। शृणोत ग्रावाणः। कु। कूमनः। त्र। अत्रा गौः। उरुष्य। उरुष्या णो अग्नेः॥

इकः सुञि ॥ १३४ ॥

सुञ् निपातो गृह्यते । इगन्तस्य सुञि परतो मन्त्रविषये दीर्घो भवति । अभी षु णः सखीनाम् । ऊर्ध्व ऊ षु ण ऊतये । सुञ इति षत्वम् । नश्च धातुस्थोरुषुभ्य इति णत्वम् ॥

द्व्यचोतस्तिङः ॥ १३५ ॥

ऋचीति वर्त्तते । द्व्यचस्तिङन्तस्यात ऋग्विषये दीर्घो भवति । विद्मा हि त्वा सत्पतिं शूर गोनाम् । विद्मा स तस्य पितरम् । द्व्यच इति किम् । देवा भवत वाजिनः । अत इति किम् । आ देवान्वक्षि यक्षि च ॥

निपातस्य च ॥ १३६ ॥

ऋचीत्येव । निपातस्य च ऋग्विषये दीर्घ आदेशो भवति । एवा ते । अच्छा ते ॥

अन्येषामपि दृश्यते ॥ १३७ ॥

अन्येषामपि दीर्घो दृश्यते स शिष्टप्रयोगादनुगन्तव्यः । यस्य दीर्घत्वं न विहितं दृश्यते च प्रयोगे तदनेन कर्त्तव्यम् । केशाकेशि । कचाकचि । जलाषाट् । नारकः पूरुषः ॥ शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु ॥ * ॥ श्वादन्तः । श्वादंष्ट्रः । श्वाकर्णः । श्वाकुन्दः । श्वावराहः । श्वापुच्छः । श्वापदः ॥

चौ ॥ १३८ ॥

चौ परतः पूर्वपदस्य दीर्घो भवति । चाविल्यञ्चतिर्लुप्तनकाराकारो गृह्यते । दधीचः पश्य । दधीचा । दधीचे । मधूचः पश्य । मधूचा । मधूचे । अन्तरङ्गोऽपि हि यणादेशो दीर्घविधानसामर्थ्यान्न प्रवर्त्तते ॥

संप्रसारणस्य ॥ १३९ ॥

उत्तरपदइति वर्त्तते । संप्रसारणान्तस्य पूर्वपदस्योत्तरपदे दीर्घो भवति । कारीषगन्धीपुत्रः । कारीषगन्धीपतिः । कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । करीषस्येव गन्धोऽस्य । कुमुदस्येव गन्धोऽस्य । अल्पा-

ख्यायामुपमानाच्चेति इकारः समासान्तः । करीषगन्धेरपत्यं कुमुदगन्धेरपत्यं, कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । इको ह्रस्वो ऽङ्यो गालवस्येत्येतच्च भवति । व्यवस्थितविभाषा हि सा । अकृतएव दीर्घत्वे ह्रस्वाभावपक्षे कृतार्थेनापि दीर्घेण पक्षान्तरे परत्वाद् ह्रस्वो बाध्यते । पुनः प्रसङ्गविज्ञानं च न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

॥ इति काशिकायां वृत्तौ षष्ठस्याध्यायस्य तृतीयः पादः ॥

॥ अथ षष्ठाध्यायस्य चतुर्थः पादः ॥

अङ्गस्य ॥ १ ॥

अधिकारोयमा सप्तमाध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामो ऽङ्गस्येत्येवं तद्वेदितव्यम् । वक्ष्यति । हलः । हूतः । जीनः । संवीतः । अङ्गस्येति किम् । निरुतम् । दुरुतम् । नामि दीर्घः । अग्नीनाम् । वायूनाम् । अङ्गस्येति किम् । क्रिमिणां पश्य । पामनां पश्य । अतो भिस ऐस् । वृक्षैः । प्लक्षैः । अङ्गस्येति किम् । ब्राह्मणभिस्सा । ओदनभिस्सा । अङ्गाधिकारः कृतोन्यार्थो नामि दीर्घत्वादावपि व्यवस्थापयतीति तदर्थमर्थवद्ग्रहणपरिभाषा नाश्रयितव्या भवति । अङ्गस्येति संबन्धसामान्ये षष्ठी यथायोगं विशेषेष्ववतिष्ठते । अथ वा प्रातिपदिकार्थमात्रमविवक्षितविभक्त्यर्थमधिक्रियते । तदुत्तरत्र यथायोगं विपरिणम्यते । ततोकारान्तादङ्गाद् भिस ऐसित्येवमादावपि सम्यक् संपन्नं भवति ॥

हलः ॥ २ ॥

अङ्गावयवाद्धलो यदुत्तरं संप्रसारणं तदन्तस्याङ्गस्य दीर्घो भवति । हूतः । जीनः । संवीतः । हल इति किम् । उतः । उतवान् । अङ्गावयवादिति किम् । निरुतम् । तदन्तस्येति किम् । विद्धः । विचितः । अण इत्येव । तृतीयः । तृतीयेति वा निपातनादत्र दीर्घाभावः । अङ्गग्रहणमावर्तयितव्यं, हल्विशेषणार्थम्, अङ्गकार्यप्रतिपत्त्यर्थं च ॥

नामि ॥ ३ ॥

नामीत्येतत्षष्ठीबहुवचनमागतनुट्कं गृह्यते। तस्मिन्परतोऽणो दीर्घो भवति। अग्नीनाम्। वायूनाम्। कर्तॄणाम्। हर्तॄणाम्। अथा इत्येतदत्र निवृत्तम्। आगतनुट्कग्रहणमुत्तरार्थम्, कृते च नुटि दीर्घप्रतिपत्त्यर्थम्। अन्यथा हि नुडेव न स्यात्।

नामि दीर्घं आमि चेत्स्यात्कृते दीर्घे न नुड् भवेत्।

वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्म्मणाम्॥

न तिसृचतसृ ॥ ४ ॥

तिसृ चतसृ इत्येतयोर्नामि दीर्घो न भवति। तिसृणाम्। चतसृणाम्। इदमेव नामीति दीर्घप्रतिषेधवचनं ज्ञापकमचि र ऋत इत्येतस्मात्पूर्वविप्रतिषेधेन नुडागमो भवतीति॥

छन्दस्युभयथा ॥ ५ ॥

छन्दसि विषये तिसृचतस्रोर्नामि परत उभयथा दृश्यते, दीर्घश्चादीर्घश्च। तिसृणां मध्यंदिने तिसॄणां मध्यंदिने। चतसृणां मध्यंदिने चतसॄणां मध्यंदिने॥

नृ च ॥ ६ ॥

नृ इत्येतस्य नामि परत उभयथा भवति। त्वं नृणां नृपते। त्वं नॄणां नृपते। के चिदत्र छन्दसीति नानुवर्त्तयन्ति। तेन भाषायामपि विकल्पो भवति॥

नोपधायाः ॥ ७ ॥

नान्तस्याङ्गस्योपधाया नामि परतो दीर्घो भवति। पञ्चानाम्। सप्तानाम्। नवानाम्। दशानाम्। न इति किम्। चतुर्णाम्। नामीत्येव। चर्म्मणाम्॥

सर्वनामस्थाने चासंबुद्धौ ॥ ८ ॥

सर्वनामस्थाने च परतोऽसंबुद्धौ नोपधाया दीर्घो भवति। राजा। राजानौ। राजानः। राजानम्। राजानौ। सामानि तिष्ठन्ति। सामानि

पश्य । सर्वनामस्थानइति किम् । राजनि । सामनि । असंबुद्धाविति किम् । हे राजन् । हे तक्षन् ॥

वा षपूर्वस्य निगमे ॥ ९ ॥

षपूर्वस्याचो नोपधाया निगमविषये सर्वनामस्थाने परतो ऽसंबुद्धौ वा दीर्घो भवति । स तक्षाणं तिष्ठन्तमब्रवीत् । स तक्षणं तिष्ठन्तमब्रवीत् । ऋभुक्षाणमिन्द्रम् । ऋभुक्षणमिन्द्रम् । निगमइति किम् । तक्षा । तक्षाणौ । तक्षाणः ॥

सान्तमहतः संयोगस्य ॥ १० ॥

सकारान्तस्य संयोगस्य यो नकारः महतश्च तस्योपधाया दीर्घो भवति सर्वनामस्थाने परतः संबुद्धौ । श्रेयान् । श्रेयांसौ । श्रेयांसः । श्रेयांसि । पयांसि । यशांसि । महतः खल्वपि । महान् । महान्तौ । महान्तः । असंबुद्धाविति किम् । हे श्रेयन् । हे महन् ॥

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥११॥

अप् इत्येतस्य तृजन्तस्य स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तृ इत्येतेषां चाङ्गानामुपधाया दीर्घो भवति सर्वनामस्थाने परतो ऽसंबुद्धौ । अप् । आपः । बह्वाम्पि तडागानीति केचिदिच्छन्ति । तत्र समासान्तो विधिरनित्य इति समासान्तो न क्रियते । नित्यमपि च नुममकृत्वा दीर्घत्वमिष्यते । तृन् । कर्त्तारौ कटान् । वदितारौ जनापवादान् । कर्त्तारः । तृच् । कर्त्तारौ कटस्य । कर्त्तारः । हर्त्तारौ भारस्य, हर्त्तारः । स्वसृ । स्वसा । स्वसारौ । स्वसारः । नप्तृ । नप्ता । नप्तारौ । नप्तारः । नेष्टृ । नेष्टारौ । नेष्टारः । त्वष्टृ । त्वष्टारौ । त्वष्टारः । क्षत्तृ । क्षत्तारौ । क्षत्तारः । होतृ । होतारौ । होतारः । पोतृ । पोतारौ । पोतारः । प्रशास्तृ । प्रशास्तारौ । प्रशास्तारः । नप्त्रादीनां ग्रहणमव्युत्पत्तिपक्षे विध्यर्थम् । व्युत्पत्तिपक्षे नियमार्थम् । एवंभूतानामन्येषां संज्ञाशब्दानां दीर्घो मा भूदिति । पितरौ । पितरः । मातरौ । मातरः । असंबुद्धाविति किम् । हेकर्त्तः । हेस्वसः ॥

इन्हन्पूषार्यम्णां शौ ॥ १२ ॥

इन् हन् पूषन् अर्यमन् इत्येवमन्तानामङ्गानां शौ परत उपधाया दीर्घो भवति । बहुदण्डीनि । बहुच्छत्रीणि । बहुवृत्रहाणि । बहुभ्रूणहाणि । बहुपूषाणि । बह्वर्यमाणि । सिद्धे सत्यारम्भो नियमार्थः । इन्हन्पूषार्यम्णामुपधायाः शावेव दीर्घो भवति नान्यत्र । दण्डिनौ । छत्रिणौ । वृत्रहणौ । पूषणौ । अर्यमणौ ॥

दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान् ।
शौ नियमं पुनरेव विदध्याद् भ्रूणहनीति तथास्य न दुष्येत् ॥
शास्सि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाप्यसमीक्ष्य ।
दीर्घविधेरुपधानियमान्मे हन्तियिदीर्घविधौ च न दोषः ॥
सुट्यपि वा प्रकृते ऽनवकाशः शौ नियमो ऽप्रकृतप्रतिषेधे ।
यस्य हि शौ नियमः सुटि नैतत्तेन न तत्र भवेद्विनियम्यम् ॥

हन्तेरनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वं यत् तदपि नियमेन बाध्यते । वृत्रहणि । भ्रूणहनीति । कथम् । योगविभागः क्रियते । इन्हन्पूषार्यम्णाम् । सर्वनामस्थानएव दीर्घो भवति, नान्यत्रेति । ततः शाविति द्वितीयो नियमः, शावेव सर्वनामस्थाने दीर्घो भवति नान्यत्रेति । सर्वस्योपधालक्षणस्य दीर्घस्य नियमेन निवृत्तिः क्रियते । यस्तु न उपधालक्षणः, स भवत्येव । वृत्रहायते । भ्रूणहायते । अथ वा ऽनुवर्त्तमानेपि सर्वनामस्थानग्रहणे सामर्थ्यादयमविशेषेण नियमः । शिशब्दो हि सर्वनामस्थानं नपुंसकस्य, न च तस्यान्यत्सर्वनामस्थानमस्तीत्यविशेषेण नियमः । तत्र तु नपुंसकस्येत्येतन्नाश्रीयते । तेनानपुंसकस्यापि दीर्घो न भवति । सर्वनामस्थानसंज्ञाविधाने तु नपुंसकस्य व्यापारोऽस्तीति तत्र नियमः क्रियमाणो नपुंसकस्य स्यात् ॥

सौ च ॥ १३ ॥

सावसंबुद्धौ परत इन्हन्पूषार्यम्णामुपधाया दीर्घो भवति । दण्डी । वृत्रहा । पूषा । अर्यमा । असंबुद्धाविति किम् । हे दण्डिन् । हे वृत्रहन् । हे पूषन् । हे अर्यमन् ॥

Digitized by Google

अत्वसन्तस्य चाधातोः ॥ १४ ॥

अतु असु इत्येवमन्तस्य अधातोरुपधायाः सावसंबुद्धौ परतो दीर्घो भवति। डवतु। भवान्। क्तवतु। कृतवान्। मतुप्। गोमान्। यवमान्। अत्र कृते दीर्घे नुमागमः कर्त्तव्यः। यदि हि परत्वान्नित्यत्वाच्च नुम् स्यात्, दीर्घस्य निमित्तमनुपधा विहन्येत। असन्तस्य। सुपयाः। सुयशाः। सुस्रोताः। अधातोरिति किम्। पिण्डं ग्रसतीति पिण्डग्रः। चर्म्म वस्त इति चर्म्मवः। अनर्थकोऽप्यस्शब्दो गृह्यते। अनिनस्मन्ग्रहणानि अर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति। अत्वग्रहणमुपदेशप्रयोगैकदेशस्यात्वन्तस्य परिग्रहार्थम्। अन्यथा मतुपो ग्रहणं न स्यात् उपदेशे रूपनिर्ग्रहहेतो नायमत्वन्त इति। असंबुद्धावित्येव। हे गोमन्। हे सुपयः॥

अनुनासिकस्य क्विझलोः क्ङिति ॥ १५ ॥

अनुनासिकान्तस्याङ्गस्य उपधाया दीर्घो भवति क्विप्रत्यये परतो झलादौ च क्ङिति। प्रशान्। प्रतान्। झलादौ किम्। शान्तः। शान्तवान्। शान्त्वा। शान्तिः। ङिति खल्वपि। शंशान्तः। तन्तान्तः। यङ्लुगन्तादयं तस्। अनुनासिकस्येति किम्। ओदनपक्। पक्वः। पक्ववान्। क्विझलोरिति किम्। गम्यते। रम्यते। क्ङितीति किम्। गन्ता। रन्ता॥

अज्झनगमां सनि ॥ १६ ॥

अजन्तानामङ्गानां हनिगम्योश्च सनि झलादौ परे दीर्घो भवति। अजन्तानाम्। चिचीषति। तुष्टूषति। चिकीर्षति। जिहीर्षति। हन्। जिघांसति। गम्। अधिजिगांसते॥ गमेरिङादेशस्येति वक्तव्यम्॥ * ॥ इह मा भूत्। संजिगंसते वत्सो मात्रेति। स्वर्गं लोकं समजिगांसदिति छन्दसि यद्यपि गमादेशस्यापि दीर्घत्वं दृश्यते, तदन्येषामपि दृश्यत इत्यनेन भवति। अथ वा ह्रस्वत्वं च कर्त्तव्यम्। सनि दीर्घो भवतीत्येतावदेव सूत्रं कर्त्तव्यं, तत्रास्य इकारमात्रस्य विशेषणे सति सिद्धमजन्तस्य दीर्घत्वं, तत् क्रियते प्रवृत्तिभेदेन गमेरपि विशेषणार्थम्। अज-

न्तस्याङ्गस्य दीर्घो भवति । यथादेशस्य असिद्धत्वात्, ततो न भवत्यस्य पम-वृमेरिहादेशस्येति ॥

तनोतेर्विभाषा ॥ १७ ॥

तनोतेरङ्गस्य सनि झलादौ विभाषा दीर्घो भवति । तितांसति । तितंसति । झलीत्येव । सितनिषति । सनीवन्तर्द्धेत्यादि तनोतेरुपसंख्यानमा-दिट्‌काकमो भवति विकल्पेन ॥

क्रमश्च क्त्वि ॥ १८ ॥

क्रम उपधाया विभाषा दीर्घो भवति क्त्वाप्रत्यये झलादौ परतः । क्रान्त्वा । क्रान्त्वा । झलीत्येव । क्रमित्वा । प्रक्रम्य उपक्रम्येति बहिरङ्गोऽपि ल्यबादेशोऽन्तरङ्गानपि विधीन्बाधत इति पूर्वमेव दीर्घत्वं न प्रवर्तते ॥

च्छ्वोः शूडनुनासिके च ॥ १९ ॥

छ इत्येतस्य सतुक्कस्य वकारस्य च स्थाने यथासंख्यं श् ऊठ् इत्ये-तावादेशौ भवतः, अनुनासिकादौ प्रत्यये परतः क्वौ झलादौ च क्ङिति । प्रश्नः । विश्नः । अन्तरङ्गत्वाच् छे चेति तुकि कृते सतुक्कस्य शादेशः । वकारस्य ऊठ् । स्योनः । सिवेरौणादिके नप्रत्यये लघूपधगुणात् पूर्वमूठ् क्रियते । तच कृतेऽन्तरङ्गत्वाद् यणादेशो नानाश्रयत्वात् च न वार्णादाङ्गं बलीयो भवति । क्वौ छस्य । शब्दप्राट् । क्विब् वचीत्यादिनौणादिकः क्विप् दी-र्घश्च । गोविट् । वकारस्य । अक्षद्यूः । हिरण्यद्यूः । असिद्धं बहिरङ्ग-मन्तरङ्ग इति नाजानन्तर्य इति प्रतिषिध्यते । झलादौ छस्य । पृष्टः । पृष्ट-वान् । पृष्ट्वा । वकारस्य । द्यूतः । द्यूतवान् । द्यूत्वा । क्ङितीत्येव । द्युभ्याम् । द्युभिः । के चिदत्र क्ङितीति नानुवर्त्तयन्ति । कथं द्युभ्यां द्युभिरिति, ऊठि कृते दिव उदिति तपरत्वान् मात्राकालो भविष्यति । छशां ष इत्यत्र छग्रहणं न कर्त्तव्यम् । अनेनैव हि सर्वत्र शकारो विधीयते । ऊठ-मित्यकरणमित्येवमक्षूढत्सु इति विशेषणार्थम् । वाह ऊठित्यत्रापि ठिदेव ॥

ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥ २० ॥

ज्वर त्वर स्रिवि अव मव इत्येतेषामङ्गानां वकारस्य उपधायाश्च

स्थाने ऊडित्ययमादेशो भवति क्वौ परतो ऽनुनासिके झलादौ च क्ङिति। जूः। जुरौ। जुरः। जूर्त्तिः। त्वर। तूः। तुरौ। तुरः। तूर्त्तिः। श्रिवि। श्रूः। श्रुवौ। श्रुवः। श्रूतः। श्रूतवान्। श्रूतिः। अव्। ऊः। उवौ। उवः। ऊतिः। मव। मूः। मुवौ। मुवः। मूतः। मूतवान्। मूतिः। छ्वरत्वरोरुपधा वकारात् परा, श्रिव्यवमवां पूर्वा॥

राल्लोपः॥ २१॥

रेफादुत्तरयोश्छ्वोर्लोपो भवति क्वौ परतो झलादौ क्ङिति च परतः। मुर्छा। मूः। मुरौ। मुरः। मूर्त्तः। मूर्त्तवान्। मूर्त्तिः। न ध्याख्यापॄमूर्छिमदामिति निष्ठानत्वाभावः। हुर्छा। हूः। हुरौ। हुरः। हूर्णः। हूर्णवान्। हूर्त्तिः। राल्लोपे सतुक्कस्य छस्याभावत्केवलो गृह्यते। वकारस्य। तुर्वी। तूः। तुरौ। तुरः। तूर्णः। तूर्णवान्। तूर्त्तिः। धुर्वी। धूः। धुरौ। धुरः। धूर्णः। धूर्णवान्। धूर्त्तिः॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य॥

॥ त्रयोदशस्तबकशेषः॥

अलमलमतिमात्रं कर्कशेनामुना ते
वचनविलसितेन प्राणिमात्रप्रियस्य।
नहि पुरुषरत्नानामेष पन्थाः सुभव्यो
यदहह परमर्मच्छेदिवाग्वज्रमोक्षः॥ ९९॥

सुभव्यः सुमङ्गलः॥ ९९॥

अवधेहि वधेहितं मुञ्च मादृशां मा दृशां नः सुखमपाकुरु॥ १००॥

मादृशां मद्विधानां वधे मारणे ईहितम् इच्छां मुञ्च। ननु कोऽत्र वधोऽयमतस्तत्राहुः, नोऽस्माकं दृशां नेत्राणां सुखं मा अपाकुरु, त्वद्दर्शनं विना मरिष्याम एवेति भावः॥ १००॥

घटतां वा कथमिदम् ।

न शिखरिशिखरेभ्यो निर्गताः शैवलिन्यः
पुनरपि विनिवृत्ता हन्त तानाश्रयन्ते ।
अपितु समुपसीदन्त्येव रत्नाकरान्त-
र्न भवति निरपेक्षस्तासु रत्नाकरोऽपि ॥ १०१ ॥

शैवलिन्यो नद्यः । तान् शिखरिणः ॥ १०१ ॥

निष्किंचनप्रिय किंचन प्रियमस्माकं न भवन्तमन्तरेण कथमथ मथन मुरस्य रस्यतामेतु नः पुनरगारगमनम् ॥ १०२ ॥

हे मुरस्य मथन ॥ १०२ ॥

यतः ।

न घनतरतमोऽन्तर्भ्रान्तिविभ्रान्तमार्गा
जहति सुकृतपाकात् प्राप्तमालोकमुच्चैः ।
न विधिविलसितेनायत्नमासादिताया
विदधति जनुषान्धा दिव्यदृष्टेरुपेक्षाम् ॥ १०३ ॥

न घनेत्यप्रस्तुतप्रशंसया कृष्णविरहस्य तमस्त्वं तद्व्याकुलतायाश्च भ्रान्तित्वं सदुपायस्य मार्गत्वं कृष्णस्य त्वालोकत्वमारोपितम् । तत्र च कथंचिद्दूरताक्रूपदृष्टिबलादालोकनैरपेक्ष्येऽपि यत् किंचिद्गमनसामर्थ्ये संभवेदपीत्यन्यथैव पुनराहुर्न विधीति, विधिविलसितेन भाग्यवैभवेन· एव कर्त्रा· आसादितायाः प्रापिताया दिव्यदृष्टेरुपेक्षां जनुषान्धा जन्मान्धा न कुर्वन्तीति. स्वेषां तु मूलत एव तद्विरहनिर्धूतधैर्याणां जन्मान्धत्वं, ततश्च दिव्यदृष्टित्वं कृष्णस्य । यद्वा, तद्रूपगन्धशब्दाद्यननुभवित्वं स्वेषामन्धत्वं, तत्पार्श्वस्थितेर्दिव्यदृष्टित्वम् ॥ १०३ ॥

हन्त हन्तरघस्य तव वचनमिदं न मिदं जनयति नयतिलक तव संश्रवःश्रवस्तु श्रवणपुटे जागरूकमेवास्ते ॥ १०४ ॥

हे· अघस्य हन्तः, मिदं स्नेहं, संश्रवसां यशसां श्रवः श्रवणाम् ॥ १०४ ॥

तदनुस्मर स्मरसहस्रसहस्रवणकारिरूपसौन्दर्य निशामय यदनु वदामो दर दामोदर मदरम्भनमपाकृत्य ॥ १०५ ॥

स्मरसहस्रस्य सहस्रसंजसः स्रवणं श्चोतनं कर्तुं शीलमस्य तादृशं रूपसौन्दर्यं यस्य हे तथाभूत । पूर्वस्य सहस्रशब्दस्य "अनचि चे"ति सकारद्वित्वेन परस्य तु "शर शरी"ति सत्वेन त्रिसकारत्वम् । दर· ईषदेव यत्· अनु पश्चात्· वदामः । किं कृत्वा, मदरम्भनं [illegible]नम्· अपाकृत्य, दूरीकृत्य, गर्वं त्यक्त्वेत्यर्थः ॥ १०५ ॥

सकृदपि भजते यो यस्तवास्मीति वक्ति
त्यजसि न तमितीयं पाल्यतां स्वप्रतिज्ञा ।
प्रकटकटु कठोरैः कर्मभिः कण्टकाभे·
·गृहगहनमपास्योपास्य दास्यो भवामः ॥ १०६ ॥

सकृदपीत्यैश्वर्यज्ञानमासां माथुरत्वादस्त्येव किंतु भगवत्कृपासिद्धानां तयैव समर्थात्सरत्युदयाम्माधुर्यज्ञानाच्छन्नमेव । यद्वा "श्रीयत्पदाम्बुजरजश्चकमे" इत्यादिवन्माधुर्यानुशीलनविमर्दोत्थत्वाद्विरहादावैश्वर्यज्ञानस्य माधुर्यावरकत्वं [illegible]व्याख्यानदृष्ट्या· अवसेयमिति । प्रकटकटु इति गृहगहनमित्यस्य विशेषणम् ॥ १०६ ॥

किंच ।

संगृह्णन्तु न नः कदापि पतयो मुञ्चन्तु वा बान्धवाः
कामं वोपहसन्तु हन्त सुजना निन्दन्तु वा दुर्जनाः ।
स्वीकुर्वन्तु न मातरो न पितरो न भ्रातरो न प्रजा·
स्त्वत्पादाम्बुजसेवया वपुरिदं निर्वापयिष्यामहे ॥ १०७ ॥

निर्वापयिष्यामहे समार्पयिष्यामः ॥ १०७ ॥

तदेवं देव निवेदयामो दया मोपेक्षणीयापेक्षणीया नो मनोरथ· पूर्तिः ॥१०८ ॥

दया कृपा मा· उपेक्षितुं योग्या ॥ १०८ ॥

तथाहि ।

अङ्गीकुरुष्व कतमाधव नः प्रपन्नाः
संमोदयस्व मदयस्व दयस्व देव ।
पादारविन्ददलदोलनविप्रकीर्णे
निर्माल्यमाल्यमुरसा शिरसा वहामः ॥ १०६ ॥

संमोदयस्व प्रथममङ्गीकारेणैव संहृष्टाः कुरु, मदयस्व ततः स्वविलाससीधुवृष्ट्या मत्ताः कुरु, एवं दयस्वेति, ननु सत्यं मच्चिकीर्षितमेव स्वमर्थयध्वे, स्वचिकीर्षितमपि ब्रूतेति. तत्राहुः पादारविन्देति ॥ १०९ ॥

तदा तदाकर्णने कर्णनेयमाधुरीधुरीणवचनानां नानाङ्गरङ्गरञ्जिपुलकावलीनां लीनान्तरीणभावविशेषाणामपीणामपि मुखमालोक्य मधुरतरसितस्मितस्नपिताधरदलं रदलक्षितशिखरोऽखरोस्रसहस्रसहजमधुराननो निजगाद श्रीदामोदरः ॥ ११० ॥

कर्णयोर्नेयं नेतुं योग्यं माधुरीधुरीणं वचनं यासां तासां तदाकर्णने प्रार्थनाश्रवणे सति निजगाद । नानाङ्गेषु रङ्गरञ्जिनी रङ्गे कृष्णस्यापि रञ्जनशीला पुलकावली यासां तासाम् । आन्तरीणो भावः शृङ्गारमयः । रदैर्दन्तैर्लङ्घितानि तिरस्कृतानि शिखराणि येन सः, "शिखरं पक्वदाडिमबीजाभमाणिक्ये शिखरेऽपि चे"ति विश्वः । अखरमतीक्ष्णमुस्रसहस्रं किरणसहस्रं यस्य स चन्द्र इव सहजमधुरमाननं यस्य सः, "किरणोस्रमयूखांशु"इत्यमरः ॥ ११० ॥

अयि समाकर्णयत कर्णयतमानमोदा मोदारेण हठेन वो भूयतां न बोभूयतां च खेदः, अवधातुमर्हन्ति सुभवत्यो भवत्यो मदालपितम् ॥ १११ ॥

कर्णयोर्यतमानः स्यातुं प्रयत्नवान् मोदो यासां तथाभूताः सत्य एवाकर्णयत, कर्णयोरानन्दं निवेश्यैव शृणुत, ननु प्रस्तुतं खेदं धृत्वेत्यर्थः । उदारेण महता हठेन वो युष्माकं मा भूयतां, तथा खेदश्च न बोभूयतां न भृशः पुनर्भवतु ॥ १११ ॥

अघवकीर्तनचिन्तनचातुरी
कृतधियां यदि चाहतरायते ।
अपि पुरश्चरतो हि तदेषणा-
न्मम वशीकृतये कृतिनी भवेत् ॥ ११२ ॥

हि निश्चितं, पुरश्चरतोऽपि मम·अग्रवर्तिन ईक्षणाद्दर्शनात् सका-
शादपि ॥ ११२ ॥

तदयि यात निरन्तरमात्मना
कुरुत मेऽनुगतिं गतिकोविदाः ।
मदनुधावनधूनितबन्धना
भुवनबान्धवमेष्यथ मां ध्रुवम् ॥ ११३ ॥

एष्यथ प्राप्स्यथ ॥ ११३ ॥

किंच ।

न त्वादृशां नृजनुषां भवतीह देहे
योग्यो ममायमतिमङ्गलमङ्गसङ्गः ।
भावाभिधेन वपुषा रमयध्वमन्त-
र्यद्वो मयापि सुदृढं मनसोपगूढम् ॥ ११४ ॥

त्वादृशां ब्राह्मणजातिमात्राणां, तत्र दोषभागिन्यो वयं भवामः·
ओमिति चेत् तत्राह, अतिमङ्गलं यथा स्यात् तथा न भवति, गोपजातेर्मम
ब्रह्मण्यतया· ख्यातिस्यातस्य विप्रपत्नीसंभोगः प्रायो लोकैर्विगीयेतैव, ततश्च
तेषाममङ्गलं दुर्वारमेव स्यादित्यभिप्रायः, यद्वपुः, वो युष्माकम् ॥ ११४ ॥

किंच ।

विद्विष्यन्ति भवादृशीर्न पतयो मय्येकतानात्मनो
येनानेन मयात्मना पतिसुतभ्रात्रादयोऽतिप्रियाः ।
तस्मिन्नर्पितचित्तवृत्तिषु जनः को द्वेषमीहिष्यते
हित्वैकान् मदुपेक्षितानिति गताशङ्कं गृहे गम्यताम् ॥ ११५ ॥

Digitized by Google

ननु पत्यादिकृतमर्यादामुल्लङ्घ्यागता भवतीस्त्यक्ता एव· अस्माच्च पुनस्ते ग्रहीष्यन्तीति तत्राह विदुष्यन्तीति । येन मया· आत्मना किंचिदंशमात्रेणैवात्मरूपेण सता· एव पत्यादयः प्रियाः·तस्मिन् परिपूर्णात्मनि मयि ॥ ११५ ॥

इत्येवमशेषविशेषविविधवाचोयुक्तिवाचो युक्तिमस्य श्रवणपुटके निधाय निधाय पीयूषमिव वचनं तदलङ्घनं तदलङ्घनं* युक्तमेवेति मत्वा परमसमुत्काः समुत्का मनो दत्त्वा कामनोदत्वादिदोषमविगणय्य तद्रूपलावण्यमादाय दायलब्धमिव समुचितविनिमयात् ॥ ११६ ॥

तादृशवचोयुक्त्यैव वाग्यस्य तस्यास्य युक्तं भावाभिधेनेत्यादिना प्राप्त्युपायं "वाग्दिक्पश्यन्तो युक्तिदण्डहरेष्वि"ति लुक्, तद्वचनं पीयूषमिव निधाय पीत्वा "धेट् पाने" तस्य धर्मस्य· अलङ्घनं· कृष्णाकर्तृकं तत्· मङ्गलमयम्· अलम्· अतिशयेन युक्तमेव· इति घनं सान्द्रं यथा स्यात् तथा मत्वा परमसमुत्का अपि समुत्का मुत्सहिताः सत्यो मनो दत्त्वा तस्मै स्वचेतः प्रदाय दायलब्धमिव तस्य रूपलावण्यमादाय गृहीत्वा । किंच, तस्य कामनोदत्वादिदोषं कन्दर्पप्रेरकत्वादिकं वैगुण्यम्· आदिशब्दाद्विषयान्तरवैमुख्याधानं च· अविगणय्य ॥ ११६ ॥

तेनैव हृदये पूरिते बहिरुदितान् हृद्यानिव कण्टकान् कण्टकान् सुखप्रकोपघनेष्वपघनेष्वविरतमादधत्यो निरर्गलगलद्रव: स्रवद्खेदस्वेदसलिलपृषताः पृषताक्ष्यः कृच्छ्रेणैव पुरं प्रति निववृतिरे ॥ ११७ ॥

तेनैव तद्रूपलावण्येनैव सुखस्य प्रकोपेन प्राबल्येन घनेषु निबिडेषु· अपघनेषु· अङ्गेषु कण्टकान् रोमाञ्चान्· आदधत्यः । हृद्यान् हृदयभवान्· कण्टकान्· औत्कण्ठ्यरूपसूच्यग्राणिव, "सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टक" इत्यमरः । स्रवन्तः· अखेदेनैव स्वेदसलिलस्य पृषता बिन्दवो यासु ताः पृषताक्ष्यो मृगाक्ष्यः ॥ ११७ ॥

* परसवर्णः प्राप्तत्

अथ तत्र पुरा पुरामन्तरेषु निरन्तुरोधरोधनपरान् धर्मधन-
परान् धर्मविघ्नवोऽयमिति भ्रमविभ्रमविह्वलविधानवनिगीर्वाणान्
बाणानिव विषदिग्धानविगणय्य बहिर्भूतासु तासु या काचन विप्र-
वधूरवधूतभर्तृनिरोधा भवितुं न शशाक ॥ ११८ ॥

सिंहावलोकनन्यायेन पूर्वकथान्तरारम्भे अथशब्दः । अवनिगीर्वाणान् भूदेवान् ॥ ११८ ॥

सा किल यथाश्रुति श्रुतिपथोपगतव्रजराजयुवराजयुवरूपला-
वण्यस्फुरणरणरणकनिर्धूतान्तःकरणा करणान्तरशून्या तमिव साक्षा-
दयितं दयितं विलोकयन्तीव तेनैव बहिः स्फुरतेव कृतोपदेशा देशा-
द्देशान्तरमिव यियासुः कृतशुभमुहूर्ता ॥ ११९ ॥

यथाश्रुति गोपबालकवाक्यश्रवणानुसारेण कर्णपथोपगतस्य व्रज-
राजयुवराजस्य नन्दकुमारस्य प्रबलरूपलावण्यस्फुरणेन रणरणकं प्रेमात्म-
ककामचिन्ता तेन निर्धूतं वृत्तिरहितीकृतम् अन्तःकरणं यस्याः सा,
अत एव करणान्तरशून्या बहिर्व्यापाररहिता । साक्षात् प्रत्यक्षमेव
अयितं प्राप्तम् । तेनैव दयितेनैव कृत उपदेशः सर्वपरित्यागेनैव वृन्दा-
वने मया सह सुखं रमस्वेत्याकारको यस्यै सा ॥ ११९ ॥

मुहूर्तादेव व्रजलोकान्तरकान्तरतिरङ्गे संजिगमिषुः प्रबलरति-
मत्तया मत्तया तत्स्फुरणरणरणकमुखीनया नयासादितमुचितमपि तम-
पिधेयं तत्स्वरूपभावं निरस्य रस्यतमं तदङ्गसङ्गसंगमकमानन्दघन-
मघघनमपरिवर्तिनमाप्तितापि तासामग्रतोऽग्रतोमेव तदङ्गसङ्गरङ्गिणी
समजनीति न तच्चित्रम् ॥ १२० ॥

व्रजलोकस्य अन्तरे मध्य इव कान्तेन सह रतिरङ्गे संजिगमिषुः
सङ्गार्थिनी, प्रबला या रतिमत्ता प्रेम तयैव कर्त्र्या नयासादितं नीत्या
प्रापितं यत्प्राणाशादानेन कारितस्वीकारमित्यर्थः, तादृशमुचितं योग्य-
मपि अपिधेयम् अनाच्छाद्यं तिरोधापयितुमयोग्यमपि तं प्रविष्टुं तत्स्व-

रूपभावं तत्स्वरूपत्वं विप्रयोगेत्वमित्यर्थः, निरस्य दूरीकृत्य । रस्यतप्रम्- अपरिवर्तितं पुनःपरिवर्तनशून्यम्- अपघनमङ्गं प्रापिता । तासां निष्क्रान्त- वतीनामप्ययतः । प्रवृत्तरतिमत्तया कथंभूतया, मत्तया ममत्वेन तस्य कृष्णस्य स्फुरणमेवोत्कण्ठादैन्यनिर्वेदादितीव्रास्वसंमर्दमयत्वाद्रणो युद्धं तत्र संमुखीनया, तत्तदाघातप्राप्तावपि स्थिरयेत्यर्थः । अयतोऽवेद्य अच्छा- नन्देन ॥ १२० ॥

नहि तादृगनुरागजननीनां जनीनां गुरुपराधीनं पराधीनं जीव- नम् ॥ १२१ ॥

तादृशोऽनुरागस्य जनिरुत्पत्तिर्यासु तासां जनीनां स्त्रीणां, "जनी सीमन्तिनीवध्वो"रिति मेदिनी । परः श्रीकृष्णस्तदधीनं जीवनं, नहि गुरूणां पराधीनं भवति । अतो गुर्वनुरोधेन तस्या जीवनं कथं स्थातुम- र्हतीति भावः ॥ १२१ ॥

निखिलेऽभगवति भगवति स्वभावजा भावजागरूकता हि भाविनीनां भाविनो नान्तरायैर्विहन्यते ॥ १२२ ॥

ननु गुरुनिरोधोऽस्याः साक्षाद्भगवद्दर्शने साक्षादन्तरायरूपोऽभूदे- वेति तत्राह निखिलेति, स्वभावजा स्वाभाविकी, भावस्य जागरूकता, भाविनी जनिष्यमाणा, भाविनीनां वनितानाम् ॥ १२२ ॥

येन खलु नखलुलितललितलताखण्डमिव तत्कालकालतापत्ति वपुरेव पुरोऽवर्तत ॥ १२३ ॥

येनान्तरायविघाताभावेन हेतुना नखेन लुलितं मर्दितं ललितं लताखण्डमिव-इति, यथा लतायाः खण्डमात्रस्य भङ्गे लतानाशो न सि- ध्यति समयान्तरे च तादृशखण्डस्योद्गमोऽपि भवति तथा तत्काल एव कालतायाः कालधर्मस्य पञ्चत्वस्य- आपत्तिः प्राप्तिर्यस्य तत् । "स्यात् पञ्चता कालधर्म"इत्यमरः ॥ १२३ ॥

जीवनरहितः स हितः स्वभावो भावो भागवद्गुरुसदृशसकले परे कालेऽरेऽनुप्रविष्टो ज्ञानकन्यानवमन्यायेन तत्त्वाद्यधर्मधर्मयेवामा-

मिनीषु यामिनीषु यास्यति भगवदानन्दहेतुतामेव किमशक्यं भगवद्भक्तेर्भगवतश्च ॥ १२४ ॥

स भावो हितः, स्वां भाम् अवतीति सः, वरे श्रेष्ठे भगवत्स्वीकारोचिते कलेवरेऽनुप्रविष्टः । कीदृशे, भगवदङ्गसङ्गेन सरसाः कला यत्र तस्मिन् । व्रजकन्यानां रसारम्भे अन्तर्गृहनिरुद्धानां व्रजस्य समूहस्य कं तत्प्राप्तिसुखं तन्न्यायेन तादृशरीत्या ॥ १२४ ॥

ततश्च निविडयोगधारणाकारणाकालशरीरपरित्यजनां परमयोगिनामपि नाम पिहितं विदधानं सकृदनुशीलितकृष्णगुणगुणनाजनितरागतरागततदवलुलोकिषाभङ्गभङ्गमात्रसाधनेन सा धनेन तदनुधावनधावनधूनितविविधबन्धना धवं धनादिकमपि तृणीकृत्य निमेषमात्रेण यत् तनुत्यागं विदधे ॥ १२५ ॥

सकृदेवानुशीलितानां कृष्णगुणानां गुणना अभ्यासस्तया जनितो रागतरो महानुरागस्तत्र समुद्भायमाणे तदवलुलोकिषैव भङ्गस्तरङ्गस्तस्य भङ्गमात्रं व्याघातमात्रमेव साधनं तेन धनेन धनरूपेण सा विप्रवधूस्तनुत्यागं विदधे । कथंभूतं, तथा शरीरपरित्यजनां परमयोगिनामपि नाम ख्यातिं पिहितमाच्छन्नं विदधानं कुर्वाणम् । तदनुधावनं कृष्णानुसंधानं तत्र धावनमतिशैघ्र्यं तेनैव खण्डितविविधबन्धना ॥ १२५ ॥

तदवलोक्य सचमत्कारमाकारमालिन्यभृता निभृतानिर्वचनीयनिर्वेदवेदनपटुना द्विजसमुदयेन समुदयेन मुहुरनुतेपे ॥ १२६ ॥

द्विजानां समुदयेन समूहेन । समुदयेन तस्या मृतिदर्शनात्मुदामानन्दानामयो नाशस्तत्सहितेन, "इ गतौ"वित्यस्मात् । अनुतेपे अन्वतप्यत ॥ १२६ ॥

यथा ।

धिग्दाक्ष्यं धिगुदारतां धिगधिकां विद्यां धिगात्मज्ञतां
धिक् शीलं च धिगध्वरादिरचनां धिक् पौरुषं धिग्धियम् ।

धिग्ध्यानासनधारणादिकमहो धिङ्मन्त्रतन्त्रव्रतं
श्रीकृष्णप्रणयेन हीनमनसां धिग्जन्म धिग्जीवितम् ॥ १२७ ॥

उदारतां दानशीलत्वम् ॥ १२७ ॥

न शौचं नो वेदाध्ययनजपहोमाद्यधिकृति-
र्न संस्कारो नात्मश्रवणमननादिव्यवहृतिः ।
प्रसङ्गेन प्राप्ते हरिगुणगणे कर्णविवरं
तथाप्यासामीदृग्व्यवसितिरहो प्रेममहिमा ॥ १२८ ॥

प्रेममहिमेति, प्रेम्णः शौचाद्यनपेक्षत्वेन स्वतन्त्रतया माहात्म्यं, शौचादीनां तु तं विना धिक्कारदायित्वमिति भावः ॥ १२८ ॥

यतः, अमन्दा मन्दाक्षहानिरवधीरिताः सनाभयो भयोपेक्षया पराजिता गुरुगुरुता चपलतापलता गाढोत्कण्ठ्येन निराकृता रङ्गव-तीरङ्गवती चेतोवृत्तिस्तृणमिव पत्यपत्यसुहृदनुरोधः कृष्णानुग्रहग्रह-ग्रस्तमन्तःकरणं च तासामालोकि मालोकितं कुत्रापि तथाविधं वि-विधं विविधम् ॥ १२९ ॥

प्रेम्णोऽनुभावानाहुरमन्देति । मन्दाक्षहानिः कुलवधूत्वाद्बुस्त्य-ज्ञाया अपि लज्जायास्त्यागः । सनाभयो ज्ञातयः । पराजिता तिरस्कृता गुरुगुरुता गुरुगौरवम् । चपलतायाश्च अपलता अनल्पप्रमाणता । रङ्ग-वतीनां युवतीनां यो रङ्गः कलाकौतुकं तद्वती चेतोवृत्तिर्निराकृता ॥ १२९ ॥

पुनरियं सविस्मया सा गोष्ठी विप्राणां विप्राणां तामव-लोक्य ॥ १३० ॥

विप्राणां विगतप्राणां तां विरुद्धाम् ॥ १३० ॥

अहो अस्याः पुनः किमाख्येयम् ।

यतः ।

षट्चक्रक्रमभेदखेदपटवो योगेन योगीश्वराः
कृच्छ्रेणैव वशीकृतानिलजवा मुञ्चन्ति जीवाशयम् ।

एषा तु प्रियदर्शनाभिलषितप्रस्थानबाधावशा-

द्योगीन्द्रैरपि दुर्गमं पदमगात् प्रेम्णोऽद्भुतः प्रक्रमः ॥ १३१ ॥

जीवाशयं शरीरम्। प्रियेति भगवतः कृष्णस्य परमात्मत्वनिर्धारः, परमात्मतायां च प्रियत्वोक्तिस्तात् तदसङ्गेऽपि सिद्धान्ततो न दोष इति तेषां परामर्शः सूचितः ॥ १३१ ॥

अस्माकं वा दौरात्म्यं, किमाचक्ष्महे ।

यतः ।

दृष्टापि ते भगवतोऽनुचरा न दृष्टाः

श्रुत्वापि भावितममुष्य न च श्रुतं तत् ।

तद्विदमेव मन्यामहे ।

आसां प्रसादविषये ह्यपि धीमतां न-

स्तेनैव किं व्यरचि नो मनसो विमोहः ॥ १३२ ॥

अमुष्य भगवतः । तेनैव भगवतैव ॥ १३२ ॥

इति विलपत्सु निरालपत्सु निराविलेन निर्वेदेन वेदेन भूषितेषु भूषितेषु भूसुरवरेषु कियता समयेन समयेनवरप्रसादपूर्णाः पत्न्य-श्च समाजग्मुः ॥ १३३ ॥

विलपत्सु क्रन्दत्सु, पक्षान्तरे च निराविलेन निर्मलेन निर्वेदेन निरालपत्सु आलापरहितेषु सत्सु, वेदेन वेदशास्त्रज्ञानेन भूषितेषु अलङ्कृतेषु, भुवि पृथिव्याम् उषितेषु, समया निकट एव इनवरस्य प्रभुवरस्य भगवतः प्रसादेन पूर्णाः ॥ १३३ ॥

ततश्च ते भगवदवलोकनानन्दनन्दन्तःकरणतया कृतया-कृतकया श्रियापूर्वमहसोऽपरिमितगुणान् गुणान् दधतीरिवान्यादृशो दृशोरुभयेनाभयेनापीतपीतवसनरूपलावण्यामृतशीकरानिताक्तोद्गम-नोढा मनोहारिणीः स्तोत्रानुकूलस्वभावानमुन्निरक्षन्त ॥ १३४ ॥

ततश्च ते भूसुरवरास्ता निरीक्ष्य धनाद्याप्तितृप्ता इव· अभिजग्मुः । ताः कथंभूताः, भगवदालोकनानन्देन वल्गन्ति समुच्छ्वसन्ति· अन्तःकरणानि यासां तत्तया निष्पादितया· अद्भुतकया· अकृत्रिमया श्रिया शोभया· अपूर्वमहसः· अद्भुतकान्तीः । हर्षाश्रुलवानां लवणिमानं लावण्यम्· उद्गिरन्तीः । तत्रोत्प्रेक्षार्थं दृशोरुभयेन नेत्रयोर्द्वयेन· अभयेन· निःसंकोचेन· या सम्यक् पीतानां पीतवसनस्य कृष्णस्य रूपलावण्यामृतानामिव शीकरनिकरस्य नितान्तमुद्गमनमित्येवंरूप ऊहस्तर्को यासु ताः । दृशोर्द्वयेनेत्यस्य विशेषणं मनोहारिणेति ॥ १३४ ॥

पूर्वाभ्यासाभ्यासादितनिजनिजसदनवेशा नवेशानुभवविकस्वरहृदया दया इव मूर्तिमतीर्मतीरिवाविरतिरतिमतीरतिमतीयत्ताकृसुकृता विनिवृत्ता विवृताखिलबन्धना धनाद्याप्तितृप्ता इव महाप्रमोदं वहन्त्यो हन्तोद्दारमतयो दारमतयोऽपि तासु सुकृतवरा वरारोहास्ता निरीक्ष्य भावरहस्यमुत्थाय पूर्वतोऽपि सर्वतोऽपि समुल्लासितं संभ्रममाचरन्तोऽभिजग्मुः ॥ १३५ ॥

सदनवेशो गृहे प्रवेशः । मूर्तिमतीरित्यस्य काकाक्षिगोलकन्यायेनोभयत्र संबन्धः । विरतिशून्या या रतिरनुरागस्तद्वत्यो या मतयो बुद्धयः, ता एव मूर्तिधारिणीरित्यर्थः । अतिक्रान्ता मतीयत्ता ज्ञानमर्यादा यैस्तथाभूतानि सुकृतानि यासां ताः । विनिवृत्ताः पुनरप्यागता इत्यर्थः । हन्तेति विस्मये । उद्दारमतयस्तासां दर्शनमात्रादेव भक्तिं प्राप्य अप्रतिमेवमात्र इत्यर्थः । अत एव तासु दारमतयोऽपि भार्याबुद्धिमन्तोऽपि । भावरहस्यं अनुरागसंकोचभक्तिसहितं यथा स्यात् तथा· उत्थाय· अभ्युत्थाय । सर्वतोऽपि गुरुविप्राग्निवेदादिभ्योऽपि समुल्लासितं समुद्भासितम् ॥ १३५ ॥

नैतच्चित्रम्, एवमेव श्रीकृष्णानुरक्तजनसमालोकनप्रभावः प्रभावबहुलतां व्यनक्ति ॥ १३६ ॥

प्रभावबहुलतां प्रेमशोभाबाहुल्यम् ॥ १३६ ॥

ताश्च श्रीकृष्णालोकनकनत्कनकनिधिलाभायमानमानसोल्लासभाजोऽपि श्रीकृष्णानवलोकशोकशोशुष्यमाणतया समुज्झितजीवनाया विलोकेन लोके नह्यस्याः समाना समाना सौभगवती काचिदपीह यतोऽस्माकमपि पुरतः पुरतो नवगोपुरतोऽनवगोचरीकृतेन तेन सह तदङ्गसङ्गसमुचितमङ्गलाङ्गलावण्यसारसारस्येन विहरतीयं तद्वयमधन्या धन्या खल्वियमिति भाषमाणा मुहूर्त्तमवस्थान्तरावस्थानमासेदुः ॥ १३७ ॥

श्रीकृष्णालोकनमेव कनत् कनकं दीप्यमानसुवर्णं तदेव निधिस्तस्य लाभेन·आयमानम्·आगच्छन्तं मानसोल्लासं भजन्त इति तास्तथाभूता अपि । समुज्झितजीवनायाः पतिनिरोधवशात् संत्यक्तप्राणाया विलोकेन, तां दृष्ट्वेत्यर्थः । इह लोके· अस्याः समाना तुल्या समाना माननीया काचिन्नास्ति । यतो नवगोपुरतः· नवीनपुरद्वारात् पुरतः· अग्रत एव तेन श्रीकृष्णेन सह·इयं विहरति । किंतु· अस्माकमपि निरोधमुल्लङ्घ्य साक्षात् तं दृष्टवतीनामप्यग्रत एव । वयं तु बहुकालानन्तरमेव तं प्राप्स्याम इति भावः । तेन कीदृशेन, अनवगोचरीकृतेन नेदानीमेव मिलितेन, किंतु प्रतिजन्मैवेति भावः ॥ १३७ ॥

अथ श्रीकृष्णोऽपि स्वभावस्वभावत्वो द्विजसुतनुतनुत्यागसमज्ञासमज्ञानंकोमलहृदयो दयोत्तर*संरलतालतापाशबद्ध इव सर्वप्रस्तुतप्रस्तुतभोजनेऽप्यलभमानो रुचिमिति तदनुकूलकूलरहिततरतितरङ्गिणीरङ्गिणीमिच्छामुरीकृत्य कृत्यकोविदो विदो निराविलविलसद्विलासिनीजनसभासभाजितामेव तां कारयित्वा †विलसद्रागे द्रागेव निजाङ्गसङ्गे समुपयोगिनीं संयोगिनीं संभाव्य ततः परमेव परमे बलदेवेन सह सहचरगणस्य तदोदनभोजनमोदने मोदनेता भवन् स्वयमपि बुभुजे ॥ १३८ ॥

---

* तरलता इति पा०

† विसरद्रागे इति पा० ।

स्वस्मिन् यो भावस्तस्य स्वभावं निसर्गं प्राप्नोतीति सः, त्रिजगत्-नोर्विप्रपत्त्यास्तनुत्यागरूपा या समत्ता कीर्त्तिस्तस्याः समं साधु यथा स्यात् तथा यद् ज्ञानं, क्वचित् तत्र निवृत्तापि भविष्यत्यवश्यमित्यस्य-वशेन वा सार्वज्ञ्यशक्त्या वा सहसा स्फुरणं, तेन कोमलहृदयः । सर्वैः प्रकर्षेण स्तुतं प्रस्तुतं यद् भोजनं तत्रापि इति हेतोस्तस्याः अनुकूला रुच्यनुसारिणी कूलरहिता अपरिमेया या रतितरङ्गिणी प्रेमनदी तस्यां रङ्गिणीं रङ्गवतीं स्वेच्छाम् उरीकृत्य । ततश्च विलसन् रामो यत्र तादृशे निजाङ्गसङ्गे निमित्ते सम्यगुपयोगवतीं तां संयोगिनीं संभाव्य प्राप्त-संयोगां निर्धार्य । ततः परमेव, सुस्थचित्तः सचित्ति भावः । परमे उत्तमे ओदनभोजनस्य मोदने अनुमोदने जाते सति । मोदनेन भवन् हर्ष-ग्राही सन् ॥ १३८ ॥

सहजसुरसं तदतिरसं तदतिशयानुरागरसवत्तया कृष्णस्य प्र-मास्वाद्यमासीत् ॥ १३९ ॥

सहजसुरसं स्वभावतः सुस्वादु तत् ओदनम् अतिरसजनितरसं यथा स्यात् तथा आस्वाद्यमभूत् । तासां यज्ञपत्नीनामतिशयानुरागेण रसवत्तया रसवैशिष्ट्येन । यद्वा तास्वतिरागेण रसिकतमस्य कृष्णस्य ॥ १३९ ॥

एवं सरसहासपरिहासपरितोषकलया सकलया सह सहचरस-भया सभया सर्वैदग्ध्य सग्धि समापनानन्तरमनन्तरमणोऽह्नाय परा-ह्नाय परासन्नं दिवसमालोक्य गोविन्दोनिचयसमभिहारविहारविशेषेण मुरलीरवव्याजया जयाय लब्धसुधया सुधया व्रजमृगमृगयान्गुरयेव तहलतिकातिक्रान्तत्रिभङ्गनाङ्गनानाविकारमिवार्पयन् निर्वापयन् निर्वा-धमेव व्रजवनितानितान्तदिवसकृतसंतापं व्रजपुराभिमुखो भवति स्म ॥ १४० ॥

सहचरसभया सह । कीदृश्या, सभया भा कान्तिस्तत्सहितया । सग्धिः सह भोजनम् । अह्नाय शीघ्रम् । परागतं च तदहश्चेति पराह्नस्तस्मै पराह्नाय । समभिहार एकीकरणम् । मुरलीरवो व्याजश्छलं यस्यास्तया

सुधया, सयाय॰ उत्कर्षप्राप्तं लक्ष्मसुधया, पृथिव्यामप्यवतीर्णयेत्यर्थः, खगानां मृगाणां च मृगयासंबन्धिन्या वागुरया जालेनेव, तदभिलंतिका-भिसारिकान्ता इव एवाङ्गनास्तासामङ्गेषु नानाविकारं, मकरन्दमुकु-लादिव्याजेनाम्रपुलकादि(मित्यर्थः ॥ १४० ॥

तथाहि ।

गोधूलीधूम्रकम्रालकलउटनिकस्तिर्यगुष्णीषबन्ध-
प्रेङ्खोलत्कोङ्किरातस्तबकनवकलं बर्हिवर्हं दधानः ।
आवल्गत्कुण्डलश्रीर्दिनकरकिरणक्रान्तकर्णोत्पलान्त-
निर्यत्किञ्जल्कलेशच्छुरितलघुतरस्विन्नगण्डान्तलक्ष्मीः ॥ १४१ ॥

तिर्यगुष्णीषबन्धे प्रेङ्खोलता चलता कोङ्किरातस्तबकेन॰ अशोकगुच्छेन नवा नवीना कला शिल्पविशेषो यस्य तादृशं बर्हिवर्हं मयूरपुच्छम् । दिनकरस्य किरणैः क्रान्तस्य कर्णोत्पलस्य॰ अन्तर्निर्यत्॰ अभ्यन्तरतो नि-र्गच्छत् यः किञ्जल्कस्तस्य लेशेन छुरितं च तत्॰ लघुतरं यथा स्यात् तथा स्विन्नं च यद्गण्डान्तं तेनापि लक्ष्मीः शोभा यस्य सः ॥ १४१ ॥

किंच ।

मन्दप्रस्थानलीलामदमधुररणन्मञ्जमञ्जीरनाद-
श्रेणीसंवाद्यमानश्रुतिमृदुमुरलीस्वाननिष्णातकर्णः ।
अग्रे कृत्वाग्रजातं सहचरनिकरं पृष्ठतः पार्श्वयोश्च
प्रेमानन्दस्तनूमानिव नयनवतां स व्रजं प्राविवेश ॥ १४२ ॥

तादृशमञ्जीरनादश्रेण्या सह संवाद्यमानाभिः संवादं कार्यमा-णाभिः श्रुतिभिः षड्जादिसंबन्धिनीभिर्मृदुः कोमलो यो मुरलीस्वान-स्तत्र निष्णातो दोषास्पृष्टगुणतारतम्यज्ञाननिपुणौ कर्णावेव यस्य सः । एतच्च परमकलावतीषु स्वप्रेयसीषु चमत्कारातिशयाधानार्थम् ॥ १४२ ॥

किंच ।

श्रीकृष्णागमनोत्सवस्य कथनं सायाह्न एवायतः
संधत्ते तदनन्तरं बहुतरीकुर्वन्ति गोधूलयः ।

सत्यं सत्यमितीव तट्टूठमरीकुर्वन्ति धेनुस्वना-
स्तत्रैवावसरे मनो मृगदृशां मुष्णाति वेणुस्वनः ॥ १४३ ॥

तत्रैवावसरे मुष्णातीति, स्वस्वलोचनेन्द्रियमेव संतर्पयितुं व्यग्राणां तासां मनोरथं प्रति त्वसावधानतामालक्ष्येति भावः ॥ १४३ ॥

एवमनुभूयमानोत्कण्ठारसकलमहो सकलमहो विखाना कुमुद्वतीव मुद्वतीवर्त्म विहाय हायनसहस्रमिव क्षणमेकमभिमन्यमाना मानान्तरानपेक्षितमहारागा मयूखमालिमालिन्यसमागममागमयन्तं समयमपेक्ष्य प्रियगोकुलचन्द्रसमालोकनाशया नाशयामास ह्रीमुद्रा मुद्रामणीयकभागाभीरभीरुराजी ॥ १४४ ॥

मयूखमालिनि सूर्ये मालिन्यसमागमम्· आगमयन्तं प्रापयन्तं समयम्· अपेक्ष्य· आभीरभीरुराजी कुमुद्वतीव, प्रियं गोकुलं किरणसमूहो यस्य तथाभूतस्य चन्द्रस्य, पक्षे प्रियश्चासौ गोकुलचन्द्रः कृष्णश्च तस्य सम्यगालोकनाशया ह्रियो लज्जा एव मुद्रा मुद्रणानि ता नाशयामास । यतो मुदां सम्प्रत्यानन्दानां रामणीयकं भजत इति सा । पूर्व कथंभूता, अहो आश्चर्यम्· अनुभूयमाना· उत्कण्ठारसस्य कला अंशा यत्र तथाभूतं सकलमहः सर्वं दिनं व्याप्य विखाना । मुद्वतीनाम्· आनन्दवतीनां वर्त्म मार्गं विहाय त्यक्त्वा, दुःखवतीनां वर्त्म· आश्रित्येति भावः । मानान्तरम्· अन्यज्ञानम् ॥ १४४ ॥

राजीवबन्धो समभिपद्य वारुणीभावमरुणीभावमपि लब्ध्वा निपतति सति· अकृतगगनावतारासु तारासु तारान्तराणीव हर्म्याङ्गनगगने स्म ताः समुज्जिहते स्म तेन विगतेतिकर्तव्यताकाः पताकाः परमसौभाग्यसंपद इव ॥ १४५ ॥

ततश्च राजीवानां परमपवित्राणामपि बन्धौ सूर्ये वारुण्यां मदिरायां भावं प्राप्तिं पानाभिप्रायं वा, पक्षे वारुण्यां पश्चिमायां दिशि

* अंशो—इति पा० ।

Digitized by Google

भावं सताम् अभिपश्य प्राप्य । नु इति गगनैकचराः प्राक्तनं सूर्यास्तमनादिर्भावात्पूर्वमेव याभिस्तथाभूतासु सतीषु तारासु । ता आभीरभीरवः । विगता इतिकर्तव्यता यासां तथाभूताः सत्यः समुज्जिहते स्म सम्यगुद्गतवत्यः । इह स्फुटं, तेन तादृशसमुदयेन हेतुना परमसौभाग्यसंपदः पताका इव ॥ १४५ ॥

चपलतरचिल्लीलताचिल्लीलतातरङ्गनिकरैरलमम्बरमम्बरमणिदुहितृवीचिनिचयैरुचितं चितं विदधत्य इव ॥ १४६ ॥

ततश्च अमूस्तत्रैवावतस्थिरे । किं कुर्वत्यः, चपलतरे चिल्ल्यौ भ्रुवावेव लते तयोश्चिल्लीलता चिन्मयलीलत्वं तस्यास्तरङ्गाणां निकरैः समूहैः अलमत्यर्थम् अम्बरमाकाशम् अम्बरमणिदुहितुर्यमुनाया वीचिनिचयैः उचितं यथा स्यात् तथा चितम् आच्छन्नं विदधत्य इव, "चितं छन्ने चिते त्रिष्वि"ति मेदिनी ॥ १४६ ॥

तदन्तरान्तरा च चंचलैरपाङ्गैर्नयननिमीलनोन्मीलनोन्मीलितधवलिमनीलिमनीराजितैः कुमुदकुवलयवलयवलनामिव विरचयन्त्यो वदनमण्डलेषु दृग्भारम्भारञ्जितदशनरुचिरुचिरैः किञ्जल्कराजिराजिराजीववनपटिमानं सृजन्त्य इव ॥ १४७ ॥

तदन्तरान्तरा च तथाभूताम्बरस्य मध्ये मध्ये तु नयनयोर्निमीलनोन्मीलनाभ्यां च प्रतिद्वयं पृथक् पृथगुन्मीलिताभ्याम् उद्गताभ्यां धवलिमनीलिमभ्यां निःशेषेण राजितैरपाङ्गैः क्रमेण कुमुदकुवलयानां श्वेतनीलोत्पलानां वलयवलनां मण्डलघटनाम् । किञ्जल्कानां राजिभिः श्रेणिभिः राजिनो राजमानस्य राजीववनस्य पटिमानं नैरुज्यम्, "पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवद्"इति मेदिनी । एवं श्रीकृष्णमुखचन्द्रोदयादुत्पन्नानां प्रफुल्लत्वं युक्तमेव, कमलानामपि प्रफुल्लत्वेन नीरोगत्वं त्वाश्चर्यमिति भावः ॥ १४७ ॥

दूरादेव श्रीकृष्णाननिस्तन्द्रचन्द्रचटुलिमानमानयन्त्य इव

सविधं विविधं विचित्रचित्तचमत्कारकारणं रणं कुसुमशरासनस्येव यन्मनोगतं तदेव हि बहिरिव प्रकाशयन्त्योऽमूरंचतश्चिरे ॥ १४८ ॥

अन्यदप्याश्चर्यमाह । मौञ्जव्यस्याननमेव निस्तन्द्रश्चन्द्रस्तस्य चटुलिमानं सौन्दर्यं सविधं स्वनिकटम् आनयन्त्य इव, तादृशचित्ती-तरङ्गैश्चपलापाङ्गैः सतृष्णवदनमण्डलैश्च तैस्तैः पुनः पुनः प्रेषितैरिवेति भावः । किमर्थं, मनोगतं कुसुमशरासनस्य रण सकलं युद्धं स्थितं तदेव हि निश्चितं बहिरपि प्रकाशयन्त्यः प्रकाशयितुम् ॥ १४८ ॥

स्थिरेणानुरागेण दत्ताश्वासाश्वासाद्यमानप्रणादावणादाविर्भव-शादतिसमुपचीयमानमानसाभिलाषविशेषा काचन निशाभिमुखमुख-कमलमिव तं मन्वाना मद्वालयमयमवश्यमेष्यतीति सप्रमोदमालि-जनवदनमीक्षते स्म ॥ १४९ ॥

अत एव तासु मध्ये काचन, आशु शीघ्रम् आसाद्यमानायाः सम्बद्धाया रजन्याः वशे उत्सवे यद्वाविस्मयमानुकूल्यं तद्वशात् ॥ १४९ ॥

काचन धृतिमुक्ता मुक्तालतां करपुटपुटकयुगलेनाधृत्य कातर-तरतरलनयनं सखीजनमामन्त्र्य निगदति स्म ॥ १५० ॥

धृतिमुक्ता धैर्यरहिता । आधृत्येति, सख्यै मुक्तालतामुत्कोचत्वेन दातुमिति भावः ॥ १५० ॥

हन्त कुन्ददन्ति दन्तिवरमन्दगामी यावदयमपरस्या रस्याया भवनं नोपसरति तावदिहानीयतां नीयतां ममेयमेकावली कलीयांश्च प्रणामोऽयं यदि मे जीवितमविकलमपि कर्तुमभिलषति भवती तद्वा मा परं विलम्ब्यतां लम्बतां त्वरितमिति ॥ १५१ ॥

मे जीवितं जीवनमपि अविकलं रक्षितं कर्तुं यदीच्छति । तत्कालं हर्म्यपृष्ठतोऽवतरतु ॥ १५२ ॥

काचन हे सखि किं करिष्यन्ति गुरवो रवोपरताननेन किमपि व्रीडापीडापीयं सह्यते चल तावल्लतावद् वेष्टयामो मनोरथकल्पतरु-

तत्क्षणमिमं मिमङ्क्षुर्वो वयमानन्दाम्बुनिधौ निधौतसंतापाः सखि व्रज व्रजराजगृहमेव यामो यामोऽयं शुभ एव जातः ॥ १५२ ॥

चल गच्छ । मिमङ्क्षवः· मग्ना भवितुमिच्छन्त्यः । यामो गच्छामः, कोनचिच्छलेनेत्यर्थवशात् । यामः प्रहरः ॥ १५२ ॥

इत्येवमादिकया दिशादिशाबल्येन भावानामसंबद्धालापरतासू-परतासूद्दामर्निखिलकरणवृत्तिभ्यः कृष्णैकताननतया समुत्कण्ठया कण्ठयापितजीवितासु तासु ॥ १५३ ॥

एवमादिकया दिशा । भावानां त्रिविधसंचारिणाम्· आदिहन्य-त्तिश्च शाबल्यं संमर्दश्च यथा मदालयमयमवश्यमेष्यतीत्यत्र स्वाभिमुख्य-हेतुपरामर्शाविश्चयान्तवितर्कादयः· यथा च किं करिष्यन्ति गुरव इतीछ्ला-भातृवैया गुरुहेलनं· ततश्च किमपि व्रीडापीडा सञ्जात इत्युक्तयैव सूचि-तेन हन्त कुलवधूरहं सायमुद्गतेव कथं वा बहिर्निर्गच्छामीति वाक्येन व्रीडया तस्य संमर्दनं·पुनश्चलन तावल्लतावद्वृष्टयाम इत्यौत्सुक्येन तस्या अपि संमर्दः· इत्येवं गर्वादिभावशाबल्यं तेन· असंबद्धः· विशिष्टवैदग्ध्यचातुर्या-दिशून्य आलापस्तत्र रतासु सतीषु । अत एव करणवृत्तिभ्य इन्द्रियव्या-पारेभ्य उपरतासु । यतः कृष्णैकताननतया या समुत्कण्ठा तया, "एकता-नोऽनन्यवृत्ति" रित्यमरः ॥ १५३ ॥

तदनुरागरसोत्कटाः कटाक्षलक्ष्मीर्निक्षिपन्निपन्नमोदो मनसा रमयन्निव सारमयन्निव निवहीभूतभूतलाविदितप्रणयामृतस्य मृतस्य संजीवनो वनोद्देशत उपेयिवान् ॥ १५४ ॥

अनुरागरसेन· उत्कटाः कटाक्षसंपत्तीस्ता निक्षिपन्नेव, अक्ष्णोः पक्षः प्राप्तः परिवर्तनेन मोदो येन सः, मनसा ताः प्रेरयन्नी रमयन्निव, ततश्च ताभिर्दक्षिणात्वेन कल्पितमिव निवहीभूतस्य भूतले· अविदितस्य काव्यवृष्टश्रुतस्य प्रणयामृतस्य सारम्· अर्पयन्निव प्रापुर्वन्निव, अत एव मृतस्य संजीवनः ॥ १५४ ॥

Digitized by Google

गाढोत्कण्ठाभरकण्ठाभरणतां प्राप्तमधिकमधिकमनीयतमं मनोरथं सफलयन्निव प्रत्येकमुखसंमुखसंवीक्षणक्षणालक्षणक्षणनिर्वृतो वृतोऽनुचरगणेन कृष्णोऽपि निजभवनमाससाद ॥ १५५ ॥

प्रत्येकं मुखानां संमुख एव यत् सम्यग्वीक्षणं तेन यत् क्षतलक्षणामुत्सवचिह्नं प्रफुल्लत्वपुलकितत्वादि तेनैव क्षणं व्याप्य निर्वृतो मनोरथं सफलयन्निव । कीदृशं, गाढेन उत्कण्ठाभरेण कण्ठस्येवाभरणतां प्राप्तम् । अद्य सस्मितानि सकटाक्षाणि प्रेयसीमुखानि क्रिमानोक्षिष्ये इत्यादिमनोरथवाक्यस्य मुहुरावृत्त्या कण्ठस्थीकृतत्वात् ॥ १५५ ॥

सा दयितावलिरपि चेतसा चेतसाफल्यभृता भृतातिशयानन्दं तस्य सङ्गेनेव गता केवलं विपुलपुलकायेन कायेन जगृहे गृहेऽवस्थानम् ॥ १५६ ॥

चेतसा मनसा । कीदृशेन, चेतस्य ज्ञानस्य यत् साफल्यं श्रीकृष्णमाधुर्यैकनिष्ठत्वं तद्बिभर्तीति तथा तेन, “चिती संज्ञाने” घञन्तः । तस्य कृष्णस्य सङ्गेनेव भृतः पुष्टश्चासावतिशयानन्दश्चेति तं गता प्राप्ता, केवलं कायेनेव । कीदृशेन, विपुलपुलकानाम् आयो वृद्धिर्यत्र तेन कर्त्रा । जगृहे गृहीतम् ॥ १५६ ॥

अथ निजनिजगृहं गतेषु वयस्यसंचयेषु वयस्यसंचयेषु निर्जलसजलजलधरसहोदरौ सहोदरौ श्रीरामदामोदरौ मेदुरौ जनकजननीजननीरन्ध्रनयनानन्दसुधासारेण सारेण च लावण्यमधुरिम्णोः ॥ १५७ ॥

वयस्यसंचयेषु सखिसमूहेषु, वयसि न सम्यक् चयोऽतिवृद्धिर्येषां तथाभूतेषु, कुमारप्रायेष्वित्यर्थः । सहोदरौ तुल्यौ, सहोदरौ भ्रातरौ । जनकजननीजनेषु नीरन्ध्रेण निबिडेन नयनेषु आनन्दसुधाया आसारेण । लावण्यं च मधुरिमा च तयोः सारेण सारभागेन च मोददायिनौ ॥ १५७ ॥

पूर्वपूर्वेद्युर्दिवसवदम्बाभ्यां समोदकदम्बाभ्यां समोदकनिर्धौते रेणुनिकरे करेणुकलभाविव नीरजस्कौ मार्जितसमार्जितसमीचीनमयो-

आम्रौ परिधापितहितवसनानुलेपनाभरणभूषितौ भूषितौ चन्द्राविव यथासमयं रसमयं रम्यमाहारमभ्यवहृत्य निजनिजगृहेऽधिपरार्ध्यशयनं शयनं कुरुतः स्म ॥ १५८ ॥

मोदस्य कदम्बेन वृन्देन सहिताभ्याम् । समेन कालोचितेन, यद्वा सुवासितत्वादिना प्रमाणेन वा समेन तुल्येन॰ उदकेन निर्धौते क्षालिते रेणुनिकरे सति । आर्द्रौ मार्दितौ च ततः सम्यगार्जित उपार्जितः समी॰चीनायाः शोभाया भरो याभ्यां तौ च तथा तौ । परिधापितैर्हितैर्गात्रा॰नुरूपैर्वसनादिभिर्भूषितौ मण्डितौ । भुवि पृथिव्यामुषितौ कृतवासौ । अधिपरार्ध्यशयनं परार्ध्यमूल्ययोः शय्ययोः ॥ १५८ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे यज्ञपत्नीजनानुग्रहो नाम त्रयोदशः स्तवकः ॥ १३ ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यां त्रयोदशस्तवकसंगमनम् ॥ १३ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

॥ सप्तमः परिच्छेदः ॥

१ ॥ अवयवा वाक्यानि वा न्यायावयवान्वा संयोजयन्ति ।—आत्ममतविज्ञाननामभ्यो ऽन्येऽपि बहवः सन्ति ये वाक्यानां विज्ञानानां वा ऽऽत्मकल्पितस्य परस्परसंबन्धस्य बोधाय प्रयुज्यन्ते, अन्यान् प्रति स्वीयाशयप्रकाशनावसरे मनो न केवलं स्वगोचरविज्ञानानां लिङ्गान्येवापेक्षते ऽपि तु तस्मिन्नेवावसरे तद्विज्ञानसंबद्धानां स्वाभ्यन्तरव्यापारविशेषाणां प्रदर्शनायान्यानपि कांश्चन शब्दान् । एतच्च चतुर्भिः प्रकारैर्मनसा क्रियते । तथाहि । अस्ति नास्तीति द्वौ शब्दौ विधिनिषेधयोरात्मनः साक्षि-

चिकेलिङ्गे स्तः । याभ्यां विना शब्देषु याथार्थ्यमयाथार्थ्यं वा नोपपद्यते तादृशं विधिनिषेधबोधकयोरन्यतरं विहाय मनो ऽन्यान् प्रति स्वाभिप्रायाविष्करणाय न केवलं वाक्यावयवान्संयोजयति, अपि तु पूर्वापरसंबद्धसंलापसिद्धये बहुभिः ससंबन्धिकैः स्वाश्रितैरवान्तरवाक्यैर्गर्भितानि समस्तानि वाक्यानि परस्परं योजयति ।

२ ॥ सुभाषणविद्याप्येतत्रात्मिकेव ।—ते शब्दाः सर्वत्र ‘वाक्यावयवा’ इत्यभिधीयन्ते ये मन एकस्मिन्नविशृङ्खलिते तर्के संलापे वा संयोज्यमानेष्वनेकेषु विधिषु निषेधेषु च स्वयमुपकल्पितं संबन्धमाविष्करोति । तेषां (वाक्यावयवानां) यथोचितप्रयोगरूपमेव च (ग्रन्थकाराणां) सुलेखस्य रमणीयत्वं स्पष्टार्थप्रकाशकत्वं चास्ति । कस्य चिदर्थस्य साधु निरूपणाय मनुष्यात्मसु विविक्तानि विज्ञानानि सन्तीत्येव नालं नापि मनुष्यो विज्ञानविशेषाणां परस्परमानुकूल्यं प्रातिकूल्यं वा विचारयतीत्यपि न पर्याप्तम्, अपि तु मनुष्येणावश्यं स्वीयतर्काणां विमर्शानां च परस्पराश्रितत्वं विचारणीयम् । इमानुपायभूतान् विवेककृतान् विमर्शान् साधु आविष्कर्तुं संबन्धस्य परिच्छेदस्य पृथग्भावस्य विरोधस्य वस्तुनिर्भरतादीनां च बोधकाः शब्दा अवश्यं पुरुषेण संग्राह्याः । एष्वेकस्याप्यभावे श्रोतुर्बोध एव न स्यात्प्रत्युत केवलं भ्रम एव स्यात् । अतश्च ये वस्तुनः स्वयं केषामपि विज्ञानानां नामानि भवन्ति तएव शब्दा भाषणे ऽनन्यथासिद्धाः परमोपयोगिनश्च सन्ति, मनुष्याणां साधु स्वाभिप्रायाविष्काराय चात्यन्तमुपयुज्यन्ते ॥

३ ॥ मनः स्वीयविमर्शेषु कं संबन्धमुपकल्पयतीति शब्दाः प्रकाशयन्ति ॥—अनपेक्षितविषया इवायमपि व्याकरणस्य भागो बाहुल्येनोपेक्षितः । मनुष्यैः प्रायः क्रमेण विभक्तयो लिङ्गानि अर्थविशेषकालविशेषबोधका लकारास्तथादयः प्रत्ययाश्च सौकर्येण लिखितुं शक्यन्ते । एवमादिषु चातिशयितं प्रयोगचातुर्यं प्रकाश्यते । किं च कासु चिद्भाषासु ते ऽवयवा अतिशयितयाथार्थ्याभासेन पृथक् प्रकरणेषु परिगणिताः । यद्यपि निपातोपसर्गादीनां नामानि व्याकरणे सुव्यवहृतानि, तद्बोध्या अवयवास्तु तेषामवा-

न्तरवर्गेषु सुनिपुणं परिगणितास्तथापि अवयवानां यथोचितप्रयोगाणां तद्बोध्यार्थविशेषाणामर्थविशेषे निर्भरस्य च प्रदर्शनमभिलष्यता ऽवश्यं स्वविमर्शानां गाढविचारस्य किं चित्क्रमं स्वीकृत्य भाषाया स्वमनसस्तास्ता अवस्थाः सुनैपुण्येन परीक्षणीयाः ॥

४ ॥ शब्दानामर्थविवेचनं कोशेष्विव सदृशतमार्थबोधकभाषान्तरीयशब्दैरर्थप्रतिपादनेनैव केवलेन न भवितुमर्हति । पदप्रतिपाद्यानामर्थज्ञानस्य सर्वासु सममेव काठिन्यात् । सर्वेषां शब्दानां मनसो व्यापारविशेषाणामिङ्गितविशेषाणां च लिङ्गतया तेषां यथार्थपरिचयाय नानाविधा आशया अवस्थाः पर्याया नियमा अपवादा अन्ये च मनसो विमर्शा येषां नामानि नितान्तं विरलं नैव वोपलभ्यन्ते ते गाढविचारपूर्वकमभ्यसनीयाः । भूयिष्ठास्तेषां प्रकाराः प्रायः सर्वासु विद्यमानभाषावयवेभ्योऽन्यन्तमधिकाः सन्ति, अतश्च भूयांसोऽवयवा विपर्यस्तार्थबोधकाः कुत्रचिच्च सर्वथा विरुद्धार्थप्रतिपादकाः सन्ति । यथा हि युरुदीयभाषायामेकाक्षरः कश्चन शब्दोऽस्ति यस्य सम्प्रति यावदर्थाः परिगणिता इति स्मरामि पञ्चाशतोऽधिकं वर्तन्त इति तु निश्चितम् ॥

५ ॥ परिगृह्यतां तावदत्रोदाहरणायाङ्गलभाषीयो 'बट्' इति शब्दः । —आङ्गलभाषायां 'बट्' शब्दसदृशः सुपरिचितोऽपरः शब्दो नास्ति । यश्चैनं शब्दं वियोजकमव्ययं कथयति, यश्च पुनः परं स्वेनदव्ययसमुदायार्थबोधकस्य फ्रेञ्चभाषीय'मेस्' इत्यस्य रोमीय'सेड्'शब्दस्य च पर्यायशब्दमेनं ब्रूते, स पूर्णतयाऽयं शब्दो मया व्याख्यात इति मनुते । परंतु मनसा एतेनैकाक्षरशब्देन संयोजितेषु नानाविधवाक्येषु वाक्यावयवेषु वा कल्पितान् विविधसंबन्धानयं बोधयतीति तु निश्चितमेव ।

प्रथमं तावद् "बट् टु से नोमोर्" इति वाक्ये ऽलमधिककथनेनेत्यर्थके बट् इति शब्दः प्रस्तुतविषयस्य निःशेषवर्णनात्पूर्वमेव मनसस्तस्मात्कथनाद् विरामं ज्ञापयति । द्वितीयतश्च "द्वावेव महीरुहावपश्यमि"त्यर्थके "ऐ सा बट् टू प्ल्यांट्स्" इति वाक्ये ऽयं शब्दो मनो ऽन्यनिखिलनैरपेक्ष्येण प्रकृतवाक्यबोध्यमहीरुहव्यक्तिद्वये

एव चक्षुरिन्द्रियं त्ययच्छदिति प्रदर्शयति । तृतीयतः "भवद्भिस्तूयते, (प्रायो मनुष्यैरीश्वरः सत्यधर्मं प्रवर्तयेदिति धियैव स स्तूयते) परंतु ईश्वरो मां सत्यधर्मं प्रवर्तयतामिति धियं मा त्वं दीधर इत्यर्थके "you pray; but it is not that God would bring you to the true religion" इति वाक्ये बट्शब्दः प्रायो मनुष्यैरित्यादिस्तूयतइत्यन्तमवान्तरवाक्यमध्याहार्यमिति द्योतयति । (यद्यपि स किंचिद्विरुद्धः प्रतीयते) तथापीदं स भवदीयपक्षानुकूलमेव कथयेदित्यर्थके "But that he would confirm you in your own" इति वाक्ये बट्शब्दः प्रकृतवाक्यात्पूर्ववाक्यस्य विरुद्धार्थकतां स्फुटमभिदधाति । पञ्चमतश्च, सर्वप्राणिनः सेन्द्रियाः, श्वापि प्राणीत्यर्थके "all animals have sense, but a dog is animal." इति वाक्ययुग्मे ऽप्यर्थको बट्शब्दो न केवलमुत्तरवाक्यं पूर्वेण योजयति अपितु तस्य तर्कीयोपनयवाक्यतां द्योतयति ॥

६ ॥ अयं विषयोऽत्र किं चिदेव विचारितः ।–(बट्) अयंशब्दो यत्र यत्रोपलभ्यते तत्र सर्वत्रास्य शब्दस्य यावदर्थविशेषपरीक्षा यदि मयैव करणीया स्यात्तर्हि निःसंदेहमेतस्य प्रदर्शितातिरिक्ता अन्येपि भूयिष्ठा अर्थाः संयोजिता भवेयुः । एवं यदि कश्चनापरोपि कुर्यात्तर्हि मन्ये यत्र यत्रैव प्रयुज्यते तत्र सर्वत्र वैयाकरणैः प्रयुक्तं संयोजकाव्ययमित्येतस्य नाम यथोचितं न स्यात् । परं तु एवंविधानां लिङ्गानां निःशेषतया व्याख्यानमत्र कर्तुं नेष्यते । एकमेवैनं शब्दमधिकृत्य प्रदर्शितान्युदाहरणानि भाषणे ऽन्येषामपि शब्दानामुचितप्रयोगाणामर्थविशेषे निर्भरविशेषाणां च चिन्तनस्य सरणिं प्रदर्शयेयुः प्रवर्तयेयुश्चास्मात् भाषणे मनसां बहूनां व्यापाराणामवधारणाय । अनेनावधारणस्य चिन्तनस्य वा व्यापारैर्नानाविधमनोव्यापाराणां व्यापारान्तरैः सहैतृशाव्ययादिद्वारा संयोजनस्य रीतिरुपलभ्येत ॥

तेषां च वाक्यावयवानां केचन भूयो भूयः केचनापरे कदाचित्कदाचित्स्वघटितवाक्यस्याखिलमर्थं द्योतयन्ति ।

॥ इति सप्तमः परिच्छेदः ॥

॥ अथाष्टमः परिच्छेदः ॥

॥ धर्मधर्मिवाचकशब्दान् अधिकृत्य ॥

१ ॥ धर्मवाचकाः परस्परं विशेष्यविशेषणभावयोजका न भवितुमर्हन्ति । कुतश्चेतद् ।—शब्देष्ववधारणपूर्वकं विचार्यमाणेषु सत्सु भाषीयाः प्रायिकाः शब्दा अस्मद्विज्ञानानां स्वभावं प्रकाशयेयुः । पूर्वप्रदर्शितरीत्या मनः स्वीयविज्ञानानि तथा व्यवच्छेत्तुं शक्नोति येन पदार्थजातिविवेचनसमर्थानि साधारणान्यसाधारणानि स्वरूपाणि तानि भवन्ति । अथ प्रत्येकं धर्मविज्ञानं तथा व्यवच्छिन्नमस्ति येन कयोरपि द्वयोस्तयोरेकं धर्मान्तरविज्ञानादभिन्नं न भवितुमर्हति, मनश्च तयोर्भेदं साक्षात्स्वीकरोति अतश्च वाक्येषु न किमपि विज्ञानं स्वीयैरशेषविशेषैर्विज्ञानान्तरं भवितुमर्हति । एतच्च भाषाया यथोचितप्रयोगे दृश्यते यत्र द्वयोर्धर्मविज्ञानयोः परस्परमुद्देश्यविधेयभावाभाव एवानुमन्यते । यतो हि प्राणित्व,मनुष्यत्व,विवेकित्व,गौरश्वेतत्वादिधर्माणां कामं परस्परं संबद्धत्वेपि, मनुष्योस्ति प्राणी विवेकी गौरो वेतिवाक्यानां कामं निश्चितत्वेपि च मनुष्यत्वमस्ति प्राणित्वं विवेकित्वं गौरत्वं वेत्यादिवाक्यश्रवणमात्रेणैव सर्वोप्येषां वाक्यानामयाथार्थ्यं निश्चिनोति । अस्ति चैतत्सर्वानुमतसिद्धान्त इव स्फुटम् । एवं सति सर्वाणि विधानानि धर्मिण्येव सन्ति । तच्च विधानं नैकं धर्मविज्ञानं धर्मविज्ञानान्तरमस्तीति किं त्वेकं धर्मविज्ञानं धर्मविज्ञानान्तरेण संगतमिति यानि च धर्मविज्ञानानि द्रव्येषु जातिविशेषरूपाणि तदतिरिक्तेषु च सर्वेषु संबन्धविशेषरूपाणि च सन्ति । किं च द्रव्येषु प्रायः शक्तिविशेषरूपाणि तानि । यथा । अयं मनुष्योऽस्ति गौर इति वाक्यं मनुष्यवृत्त्यसाधारणधर्मवति पदार्थे गौरत्वरूपो धर्मोऽस्तीति बोधयति । स च गौरत्वसाधारणधर्मः साधारणविषयविवेचनपटुचक्षुष्मति पुरुषे गौरत्वविज्ञानोत्पादयित्री शक्तिरेव न तु ततोऽतिरिक्तं किमपि । अन्यच्च । मनुष्यो स्ति बुद्धिमानिति वाक्यं यत्र मनुष्यत्वं तत्र बुद्धिमत्त्वमिति बोधयति । मनुष्यत्वसमानाधिकरणा तर्कप्रसवित्री शक्तिरिति यावत् ।

Digitized by Google

२ ॥ धर्मा अस्मद्विज्ञानानां भेदं प्रदर्शयन्ति ॥—धर्मधर्मिवाचकस्वरूपतो ऽयं नाम्नां भेदो ऽस्माकं विज्ञानानां भेदमपि ज्ञापयति । साधु विमर्शे क्रियमाणे ऽस्माकं साधारणविज्ञानेषु धर्मिवाचकनामस्विवावच्छेदकधर्माः सन्तीत्युपलभ्येत । धर्मधर्मिवाचकयोराद्यं विशेषणमपरं विशेष्यमिति वैयाकरणैः परिभाष्यते । यथा श्वैत्यं, श्वेतो, माधुर्यं मधुरः । इयमेव व्यवस्था भावविज्ञानेषु संबन्धविज्ञानेषु च । यथा न्यायो, न्यायी, सादृश्यं सदृश इति । मनुष्यगतसंबन्धबोधकानां धर्मिवाचकानां कतिपयानि नामानि प्राधान्येन विशेष्यबोधकानि सन्तीत्येषापि व्यवस्थैतद्भेदमूलिकैव । यथा । पितृत्वं पिता इत्यत्र । एतत्कारणमपि सुस्पष्टमेव । परं तु द्रव्यवाचकेषु धर्मवाचकानि कतिपयान्येव नैव वा स्युः । यतो यद्यपि शास्त्रिभिः प्राणित्वं मनुष्यत्वं भौतिकत्वमित्यादयः के चन धर्मवाचकाः शब्दा ऊहितास्तथापि येषां धर्मवाचकत्वसंपादनस्य प्रयासेन शास्त्रिण उपहसिता माभूवंस्तथाविधनामानि स्वल्पिष्ठानि सन्ति । शास्त्रिभिः प्रसभं स्वस्वशिष्यप्रशिष्यमुखैः प्रसिद्धिं नीतान्यपि कानि चित्तथाविधानि नामानि नाद्यापि साधारणजनव्यवहारे परिगृहीतानि नापि सकलजनाभिरुचिमावहन्ति । तादृशधर्मविज्ञानबोधकशब्दानामनुपलम्भेन द्रव्याणामार्थविज्ञानानि नैवोपलभ्यन्त इति सर्वेषां निश्चयमनुकरोमीति पूर्वोक्तवर्णनेन प्रतीये । निःसंदेहं च तेषामेवमेव निश्चयो भवेद् यदि ते स्वीयशब्दाज्ञानानुभवेन परीक्षायै सोत्साहा भवेयुः । यतश्च यद्यपि लोके प्रस्तरात् सुवर्णस्य, काष्ठाद्धातोश्च विवेचकानि विज्ञानान्युपलभ्यन्ते तथापि तादृशद्रव्यस्वरूपविज्ञानानि न स्वात्मगोचराणि क्रियन्ते तादृशद्रव्यासाधारणार्थस्वरूपबोधनसमर्थानां प्रस्तरत्वं, सुवर्णत्वं, काष्ठत्वं धातुत्वमित्यादिशब्दानां साधकमेव प्रयोगमात्रमनुतिष्ठन्ति । किं च वस्तुतो द्रव्याकारेणैवायं सिद्धान्तस्तेनैव च यानि प्रथममात्मनि प्रतिबिम्बितानि भूत्वा ततः प्राणित्वं मनुष्यत्वमित्यादिशब्दैः परिचीयन्ते तानि विज्ञानान्यसमवत्त्वमनु न कदापि धनमतां तथा विकासः । एवं सत्यपि ते शब्दास्तेषां शास्त्रिणां स्वकल्पितधर्मवाचकत्वप्रयत्न निष्फल-

मेव व्यवह्रियन्ते बुद्धिमद्भिर्लौकिकैर्मनुष्यैस्तु नैव व्यवह्रियन्ते । वस्तुतस्तु मनुष्यत्वापरपर्यायो 'ह्युम्यानिटि' इत्ययं शब्दो रोमदेशीयेषु व्यवहृतोऽपि स भिन्नार्थक एव न पुनः कस्य चिद्‌द्रव्यस्यावच्छेदकविज्ञानं बोधयति किं तु मनुष्यगतस्य दयारूपस्य भावविशेषस्य नाम एतस्य धर्मबोधकं दयालुपर्यायं 'ह्युमेनुस्' इति न तु मनुष्यापरपर्यायं 'होमो' इति ॥

॥ इत्यष्टमः परिच्छेदः ॥

॥ अथ नवमः परिच्छेदः ॥

॥ शब्दानां यथार्थस्वार्थबोधनासामर्थ्यविषये ॥

१ ॥ लेखेन वाचा च स्वाभिप्रायप्रकाशनाय शब्दाः प्रयुज्यन्ते ॥—एतावता प्रबन्धेन पूर्वपरिच्छेदेषु वर्णितावेतदुक्तं भवति । कथं भषायां शब्दार्थयोर्नैयत्यव्यभिचारकृतमपूर्णत्वं शब्दशक्तिस्वभावादेव च भूयिष्ठानां शब्दानामर्थेषु सन्देहानियमौ चापरिहार्याः सन्ति । शब्दानां पूर्णत्वापूर्णत्वयोः परीक्षायै प्रथमं तावत् तेषां फलव्यवहारयोर्विचार आवश्यकः । तेषां स्वे द्वेश्यसंपादनयोग्यतातारतम्यानुसारेण पूर्णत्वस्यावगमात् । लेखने भाषणे चेति द्विधा हि शब्दा उपयुज्यन्ते इति तु तत्तदवसरविशेषेषु भूयो भूयः पूर्वमवोचाम ॥

२ ॥ सर्वे ऽपि शब्दा लेखने उपयुज्यन्ते ॥—तयोरुपयोगयोरा द्यमधिकृत्य किं चिदुच्यते । अवसरविशेषे स्मरणसाहाय्यार्थं स्वविमर्शानां लेखनाय स्वगतभाषणमिव सर्वे शब्दा उपयोक्ष्यन्ते । यतः शब्दा विज्ञानानां साधारणानि स्वैरिकाणि च लिङ्गानि सन्तीति कृत्वा मनुष्यः स्वं प्रति स्वविज्ञानाविष्कारणाय स्वेच्छया शब्दान् प्रयोक्तुमर्हति । तत्र च तेषामर्थव्यभिचारित्वमपि न भवेद् यदि वक्ता पुनः पुनरेकरूपविज्ञानाविष्कारणाय तमेव शब्दं प्रयुञ्जीत । तदानीं तस्य पुरुषस्य तदर्थज्ञाने भ्रमसंभवाभावात् । अत एव तत्रार्थाव्यभिचरितत्वलक्षणं पूर्णत्वमुचितप्रयोगस्य भाषाया भवति ॥

३ ॥ (परेषां बोधाय) शब्दानां वाचिकः प्रयोगो लौकिकः शास्त्रीयश्च भवति ॥—द्वितीयतो, वाचिके शब्दप्रयोगे ऽपि पदानां द्विधा प्रयोगो ऽस्ति । लौकिकः शास्त्रीयश्च । तत्र प्रथमं तावल्लौकिकप्रयोगपदेन मनुष्याणां समाजेषु परस्परं लौकिकसंभाषणवाणिज्यव्यवहारादिसांसारिकसाधारणव्यवहारस्य साधकं विमर्शानां विज्ञापनानां च पदैराविष्करणमत्राभिप्रेयते । द्वितीयतश्च शब्दानां शास्त्रीयः प्रयोग इत्यनेन तेषां तादृशः प्रयोगो ऽभिप्रेयते यो हि वस्तूनां यथार्थज्ञानसाधनाय यथार्थज्ञानाय प्रयतमानं मनो यल्लाभेन सिद्धार्थं स्यात् तादृशस्य कस्यचिदसंदिग्धस्य तत्त्वस्य सामान्यवाक्यैराविष्करणाय च प्रभवति । व्यक्ततमौ चेमौ द्वौ प्रयोगौ । न्यूनयाथार्थ्यसमेतं शब्दप्राचुर्यमाद्य एवोपयोक्ष्यते न तु द्वितीये इत्यनुपदमेव स्फुटीभविष्यति ॥

४ ॥ शब्दानामपूर्णत्वं हि तेषां संदिग्धार्थकत्वम् ॥—संभाषणे भाषाया मुख्यं फलमर्थावबोधो ऽतो यदा कोपि शब्दः स्वेनाविष्क्रियमाणं वक्त्रात्मगोचरं विज्ञानं श्रोतुरात्मनि नोपस्थापयति तदा न लौकिके नापि शास्त्रीये संवादे शब्दः स्वीयं तत्फलं साधु साधयति । अथ शब्दानामस्मदीयविज्ञानैः सह नैसर्गिकसंबन्धस्याभावात् तदर्थानां च मानवीयस्वैरिककल्पनाधीनत्वात् शब्दानां संदिग्धार्थकत्वरूपायाः प्रस्तूयमानाया अपूर्णतायाः कारणं यत्किंचिद्विज्ञानबोधनासामर्थ्यं क्वचिदधिकमन्यत्र च न्यूनमस्तीत्येतदपेक्षया ऽधिकं तद्वाच्यविज्ञानान्येव । एवं तात्पर्येण सर्वेषां सममेव पूर्णताप्रसङ्गात् । एवं सत्यन्यामपेक्ष्याधिकं केषां चिच्छब्दानामर्थेषु संदेहस्यानैयत्यस्य च कारणं तद्वाच्यविज्ञानानां वैचित्र्यमेवेति सिद्धम् ॥

५ ॥ तेषामपूर्णतायाः कारणानि ॥—शब्दानामर्थस्य स्वाभाविकत्वाभावेन परस्परं प्रति स्वस्वाभिप्रायमाविष्कर्तुमिच्छद्भिः कयापि भाषया परैः सह सुबोध्यं बिभावुभिरवश्यं तत्तच्छब्दवाच्यविज्ञानं दृढाभ्यासपुरःसरमवधारणीयम् । परंतु वक्ष्यमाणस्थलेष्वेतद्दुष्करमस्ति । तथा हि । प्रथमं तावद् यत्र शब्दवाच्यानि विज्ञानान्यत्यन्तं विसंकुलानि भू-

पिण्डानां विज्ञानानां सह संयोगेन निर्मितानि च भवन्ति । द्वितीयतश्च यत्र शब्दवाच्यविज्ञानानां नैसर्गिकस्य नियतस्य च संबन्धस्याभावात् तेषां नैसर्गिकं नियतं प्रतिमानं कुत्रापि नास्ति येन तानि परिशोधितानि सुनितानि च भवेयुः । तृतीयतो येन सह पदार्थस्तुलनीयस्तत्प्रतिमानं यदा दुर्बोधं भवति । चतुर्थतश्च पदस्यार्थो वस्तुन आर्थे स्वरूपं च सर्वथैकरूपे न भवतः । इमे एव दोषा बहूनां सुबोधशब्दानामर्थेष्वप्यापद्यन्ते । ये शब्दाः कथंमपि सुबोधार्था न भवन्ति, यथा तत्तच्चक्षुर्विज्ञानग्राहकेन्द्रियशक्तिविकलं पुरुषं प्रति तानि तानि नामानि यथा ऽन्धं प्रति रूपनामानि यथा वा बधिरं प्रति ध्वनिवाचकानि, तेषामेवंविधानां शब्दानां वर्णनमप्यनावश्यकमिति नेह तन्यते । प्रदर्शितेषु सर्वेषु स्थलेषु शब्दानामपूर्णतोपलभ्यते, या नानाजातीयविज्ञानतात्पर्येण स्थलेषु शब्दानां प्रयोगविशेषेषु वक्ष्यते । परीक्ष्यमाणेषु च शब्देषु मिश्रभावनामसु संदेहो द्वाभ्यामाद्याभ्यां कारणाभ्यां जायते द्रव्यनामसु च विशेषतो ऽन्त्येन कारणद्वयेनेति वक्ष्यति ॥

६ ॥ मिश्रभावनामानि स्ववाच्यविज्ञानानामत्यन्तं विसंकुलतया संदिग्धार्थकानि भवन्ति ॥— इमानि मिश्रविज्ञानानि प्रायो बहुविज्ञानघटितानि अन्यत एव तेषु संदेह उत्पद्यते । शब्दानां स्वाभिप्रायाभिव्यक्तिरूपफलनिर्वाहकत्वस्य संपत्तये तेषां श्रोत्रात्मनि वक्त्रात्मसमवेतविज्ञानोपस्थापकत्वमवश्यमपेक्षितव्यम् । अन्यथा शब्दानन्योन्यं श्रावयन्तोऽपि मनुष्याः स्वस्य विमर्शानां तैः शब्दैरनाविष्करणेनेतरेतरं प्रति स्वस्वात्मगोचरविज्ञानज्ञापनरूपं मिथः संवादस्य फलं साधयितुं न शक्नुवन्ति । परंतु विज्ञानाकरघटितस्य मिश्रविज्ञानान्तरघटितस्य च विज्ञानविशेषस्य बोधाय यदा शब्दः प्रयुज्यते तदा चेत् किमपि वैलक्षण्याल्लोकव्यवहारे एकविधविज्ञानज्ञापनाय यथार्थविज्ञानावधारणं मनुष्याणां दुष्करं स्यात् । इत्थं चैकपुरुषीयविज्ञानस्य पुरुषान्तरीयेण तेन सह साकल्याभावसम्भावनायामस्य स्वसंवादसाधनस्य मिश्रविज्ञानस्य सकलमाकुलत्वात् तस्मादेवेदं नीतिशास्त्रीयशब्दा इव बहुविज्ञानघटितानि मिश्रविज्ञानवाचकानि प्रतिपुरुषं यथार्थमेकरूपमेवार्थं न बोधयन्ति ॥

७ ॥ प्रतिमानाभावाच्च ॥—यत्साकल्येन मिश्रभावनाम्नामर्थाः प्रमाणीकरणीयास्तादृशप्रतिमानानामभावात् तानि नामानि नानाविधार्थानि संदिग्धार्थकानि च भवन्ति । स्वाभिमतसंवादफलसाधनपरायणानामिच्छानुसारेणैकत्र समाविष्टानां विज्ञानानां समुदायरूपाणि स्वैकमात्रज्ञानसाधनसमर्थानि च सन्ति, यैर्न कस्यापि वस्तुतो विद्यमानस्य वस्तुनो ऽनुकरणमभिप्रेयते ऽपितु स्वकल्पिताकारैः प्रतिमानैर्वा स्वरूपाणां पदार्थानां ज्ञापनं जातितो व्यवस्थापनं च । यः खलु प्रथमं, वञ्चनं परिहास उपहास इत्यादीनि पदानि लोकव्यवहारे प्रचारयति स स्वप्रयुक्तपदैर्न बोधनीयानि विज्ञानानि योग्यानि बुद्ध्वा संयोजयति । ये पुनर्नवीना भाववाचकाः शब्दाः संप्रति कस्यामपि भाषायां प्रचार्यन्ते तेष्विव प्राचीनव्यवहृतनाम्नामपि प्राथमिकव्यवहारगोचरीकरणसमये सैव व्यवस्था ऽऽसीत् । अतश्च यदा तादृशा मिश्रसमुदायाः संसारे क्वापि नोपलभ्यन्ते यदा वा स्वीयतादृशविज्ञानसमुदायानां प्रमाणीकरणाय तथाविधानि प्रतिमानानि न क्वाप्युपलभ्यन्ते तदा यादृच्छिकविज्ञानसमुदायवाचकानि नामानि संदिग्धार्थकान्येव भवेयुः । यश्चार्थो मनुष्यहत्या देवस्वापहरणमित्यादिपदैरभिधीयते न तस्य कदाचिदपि स्वभावसिद्धप्रतिमानानुरूपं कल्पयितुं शक्यते । भूयसां तद्विज्ञानघटकावयवानां तस्यामेव क्रियायामनुपलब्धेः । मनुष्यहननविज्ञानावयवस्य हन्त्रात्मनो ऽध्यवसायस्य देवस्वापहारविज्ञानावयवस्य पवित्रवस्तुसंबन्धरूपस्य वा तयोः कर्मणोरन्यतरस्य कर्तुर्बाह्यदृश्यक्रियया सहानन्यथासिद्धस्य कस्यापि संबन्धस्याभावात् । किं च सर्वस्या अपि हननसाधकपरिदृश्यमानक्रियायाः शस्त्रादिभिः सहाङ्गैः संयोगादिरूपाया हननपदाभिधेयतादृशमिश्रविज्ञानघटकैर्विज्ञानान्तरैः सहापि कश्चन संबन्धो नास्ति । तेषामेकपदबोध्यत्वातिरिक्तस्य कस्यापि परस्परसंबन्धस्याभावेन विनैव कंचन नियमं प्रतिमानं वा यथा कथंचित्तेषां परस्परं संबन्धे सति तादृशस्वैरविज्ञानेष्वात्मनो ज्ञानानां नियमनाय कस्यापि क्लृप्तस्य नियामकस्याभावेन तत्तन्मनुष्यात्मसु तादृशस्वैरसमुदायवाचकपदैरभिधीयमानो ऽर्थो ऽवश्यं बहुत्र भिद्येत ॥

॥ शेषो ऽग्रे भविता ॥

Digitized by Google

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

THIRD ADHYÁYA.

(Continued from page 642.)

तस्य षड्धा विभागः । २६०

These (two triangles lying on the south side and the north side of the agnikshetra) are to be divided into six parts each.

तस्य प्रउगावयवस्य षड्धा षोढानूचीनं विभागः कार्यः । तत्र प्रकारः । प्रत्यगग्रं षड्भागायतं महाप्रउगार्धं तिर्यक् त्रिधा विभजेत् । तत्र पूर्वखण्डस्य पूर्वतिर्यङ्मान्यां समान्तराले द्वे चिह्ने कृत्वा प्रथमचिह्नादारभ्यार्जवेनापरतिर्यङ्मानीं प्रत्यालिखेत् । एवं द्वितीयचिह्नादारभ्य । एवं मध्यखण्डस्य पूर्वान्तमध्यादारभ्यार्जवेनापरान्ताल्लिखेत् । एवं विभक्ते प्रथमे खण्डे बाह्यपार्श्वत अर्धप्रउगाकारैकेष्टका । मध्यतो द्वे दीर्घचतुरश्रे । मध्यमखण्डस्य बाह्यत एका प्रउगार्धा । अन्तरत एका दीर्घचतुरश्रा । अपरो भागः प्रउगार्धरूप एव । एवं षड्धा विभागः । एवमुत्तरतः । ता द्वादशेष्टकाः । तासु प्रउगार्धाकाराः षट् । दीर्घेष्टकाकाराः षट् ।

ते द्वे पार्श्वयोरुपदध्यात् । २६१

These two (triangles divided into six parts each) are to be placed on the two sides (the south side and the north side of the agni).

ते षड्धा विभक्ते द्वे प्रउगार्धे पार्श्वयोः । षड्भागायामप्रमाणस्य द्विभागप्रमाणतिर्यङ्मानीकस्य चतुरश्रस्य पार्श्वयोर्दक्षिणोत्तरयोः प्रत्यगग्रे बहिर्भूतकर्णपार्श्वे उपदध्यात् । एवं द्वादशेष्टका उपहिता भवन्ति । एवमुपहितयोः प्रउगार्धयोर्मध्यभूतचतुरश्रस्योपधानविधिः ।

भागतृतीयायामाश्चतुर्थव्यासाः कारयेत् । २६२

Bricks are to be made as long as the third part (of the side of one of the fifteen squares composing the agnikshetra) and as broad as the fourth part.

इष्टका इति शेषः । भागस्य षट्तिलोनपञ्चाशीत्यङ्गुलप्र·· णास्य तृतीयो नवतिलाष्टाविंशत्यङ्गुलायामः । चतुर्थव्यासाः । सप्ततिलैक-विंशत्यङ्गुलव्यासाः कारयेत् । ता बृहतीसंज्ञिताः ।

तासामर्ध्यास्तिर्यग्भेदाः । २६३

And other bricks equal to one-half of the bricks of the first class, produced by dividing the latter by a horizontal line.

आयामस्य मध्ये भिन्नाः सप्ततिलैकविंशतिदीर्घाः (°शत्यङ्गुलदी-र्घाः ?) सार्धचतुस्तिलचतुर्दशाङ्गुलव्यासा अर्धेष्टकाः कार्या इत्यर्थः ।

ता अन्तयोरुपधाय शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छाद-येत् । २६४

Having placed these (bricks of the second class) on the east and west end of the agni, the remaining space is to be covered with large bricks of the first description, turned towards the east.

ता अर्धेष्टका दक्षिणोत्तरायता अन्तयोः पूर्वापरयोरिष्टका अष्टा-वष्टावुपधाय शेषमग्निं बृहतीभिरित्यादि तुल्यम् ।

अर्धेष्टकाभिः संख्यां पूरयेत् । २६५

The number of two hundred is to be made full with ardhyá-bricks.

पार्श्वयोरुपहितप्रउगार्धयोर्द्वादशेष्टकाः । मध्यभूतचतुरस्रापरा-न्तयोः । (°रस्रपूर्वा° ?) षोडशार्धेष्टकाः । मध्ये षट्त्रिंशच्छतं बृहत्यः प्रागायताः । एवं चतुःषष्टिः शतमिष्टकाः । षट्त्रिंशन्न्यूना भवन्ति । श्रोण्यंसेषु नव नव बृहतीश्चतुरस्रकृता उद्धृत्याष्टादशाष्टादशार्ध्या

निधेयाः । एवं द्विशतः प्रस्तारः । द्वितीयप्रस्तारे चत्वारि करणानि । प्रउगार्धानामेकं करणम् । तस्य तिर्यङ्मानी सपञ्चतिलचतुर्दशाङ्गुला । साष्टतिलसप्ततिशताङ्गुला कर्णरूपा बाह्यपार्श्वमानी । सद्वाविंशतितिला नवषष्टिशताङ्गुलाभ्यन्तरर्जुपार्श्वमानी । अनेन षडिष्टकाः । दीर्घचतुरस्राणां द्वितीयम् । तस्य प्रउगार्धतिर्यङ्मान्येव तिर्यङ्मानी । तस्यैवाभ्यन्तरपार्श्वमान्येव पार्श्वमानी । अनेनापि षडिष्टकाः । बृहतीनां तृतीयम् । सनवतिलाष्टाविंशत्यङ्गुला पार्श्वमानी । ससप्ततिलैकविंशत्यङ्गुला तिर्यङ्मानी । अनेन शतमिष्टकाः । अर्धेष्टकानां चतुर्थम् । सार्धचतुस्तिलचतुर्दशाङ्गुला तिर्यङ्मानी । सप्ततिलैकविंशत्यङ्गुला पार्श्वमानी । अनेन करणेनाष्टाशीतिरिष्टकाः । उपधाने पूर्वस्मिन्ननीके पार्श्वयोर्द्वे प्रत्यगये बाह्यकर्णपार्श्वप्रउगार्धे । तयोरभ्यन्तरतः प्रागायते द्वे द्वे दीर्घचतुरस्रे । तासां पश्चात्पूर्ववद् द्वे प्रउगार्धे । तयोरन्तरत एकैका दीर्घचतुरस्रा । तयोर्युगलयोः पश्चाद् द्वे प्रत्यगये प्रउगार्धे । एवं द्वादशेष्टकाः । मध्यचतुरस्रस्य पूर्वापरयोरनीकयोरुदगायता अष्टावष्टावर्धेष्टकाः । तयोरन्तरेऽष्टाभिरष्टाभिः प्रागायताभिर्बृहतीभिरुदीच्यः सप्तदश रीतयः । तत्र श्रोण्यंसेषु बृहतीनां नवचतुष्कमुद्धृत्य द्वासप्ततिरर्ध्या निधेयाः । एवं द्विशतः प्रस्तारः । अत्र कल्पोक्तो विधिरनुसंधातव्यः । तत्रैवमुक्तम् । तस्य मात्रा यदि ग्रीवदघ्नं पुरस्तान्नाभिदघ्नं पश्चात् । यदि नाभिदघ्नं पुरस्ताज्जानुदघ्नं पश्चात् । यदि जानुदघ्नं पुरस्ताद् गुल्फदघ्नं पश्चात् । यदि गुल्फदघ्नं पुरस्तात्समं भूमेः पश्चात् । स एष श्मशानचित्पितृलोककामस्येति । हस्तिपृष्ठवच्चिन्वीतेति तस्यार्थः । तदेवाह ।

ऊर्ध्वप्रमाणमग्नेः पञ्चमेन वर्धयेत् । २६६

The height of the agni has to be increased by one-fifth (=$5\frac{1}{5}$th angulis).

उच्छ्रयप्रमाणमग्नेः श्मशानचित ऊर्ध्वप्रमाणां रज्जुं नीत्वा पञ्चधा संभुज्य षष्ठं भागं प्रक्षिपेत् । श्मशानचितो द्विसाहस्रत्रिसाहस्रावपि भवतः । यदि सौवद्घ्नमित्यादिदर्शनात् । साहस्र एकेष्टकोच्छ्रायप्रमाणम् । द्विसाहस्र इष्टकाद्वयोच्छ्रायप्रमाणम् । त्रिसाहस्र इष्टकात्रयोच्छ्रायप्रमाणम् ।

तत्सर्वं त्रेधा विभज्य द्वयोर्भागयोश्चतुर्थेन नवमेन वा चतुर्दशेन वेष्टकाः कारयेत् । २९७

Divide all this — the height including the added fifth part — into three parts and make bricks with the fourth or the ninth or the fourteenth part of two of these three parts (with the fourth part in the sáhasra, with the ninth in the dvisháhasra, with the fourteenth in the trisháhasra agni).

प्रक्षिप्तेन सह त्रेधा संभुज्यैकमवशिष्य शिष्टयोश्चतुर्थेन भागेनोर्ध्वप्रमाणभूतेन पञ्चमीं नवमेन दशमीं चतुर्दशेन पञ्चदशीं च कारयेत् । वाशब्दश्चशब्दार्थे । उत्तरस्मिन्नपि वाक्ये तथा ।

ताभिश्चतस्रो वा नव वा चतुर्दश वा चितीरुपधाय शेषमवाञ्चमक्ष्णयापच्छिन्द्यात् । अर्धमुद्धरेत् । २९८

Having made with these bricks either four or nine or fifteen layers, (according to the number of layers of the agni to be constructed) the remaining part of the height (amounting to one-third of the whole) is to be cut into two in a downward direction following the diagonal and one-half of it to be removed.

ताभिश्चतुर्थेन नवमेन चतुर्दशेनेत्युक्ताभिश्चतस्रः साहस्रे नव द्विसाहस्रे चतुर्दश त्रिसाहस्रे चितीः प्रस्तारानुपधाय शेषं तृतीयं भागमवाञ्चं पश्चात्प्रवणमक्ष्णयापच्छिन्द्यात् । अर्धं तस्य भागस्योद्धरेत् । एवं प्रक्षेप उद्धृतो भवति । तत्र प्रयोगः । इदमुपधानमार्गेण कचित्प्रस्तार्यं पूर्वस्मिन्नन्ते ऊर्ध्वप्रमाणान्ते रज्जुं नियम्य प्रस्तारस्य

पश्चिमान्तं पश्चात्स्यन्द्याया इतरान्तं स्यन्द्यायाः पार्श्वे निधायानुस्यन्द्यं प्रस्तारमद्व्यायापच्छिन्द्यात् । इष्टकानामेव लक्षणमुक्तम् । उच्छ्रायप्रमाणौ द्वौ दण्डौ प्रस्तारायामप्रमाणयोरधरोत्तरयोरूर्ध्वौ स्थापयित्वा पूर्वस्य दण्डस्य शिरसि पाशं प्रतिमुच्य पश्चिमस्य दण्डस्यापरमन्तं निधाय पश्चिमदण्डाभावे ऽपि समायां भूम्यां प्रस्तारायामान्तं निधाय तेनेदृशं कृत्वा[1] (?) इष्टकारूपाणि विनक्ष्यं कारयेत् । गणितनिपुणानामेतत्सुकरम् । इतरेषामशक्यमेव ।

तस्य नित्यो विभागो यथायोगमिष्टकानां[2] ह्रासवृद्धी । २६९

The division of it (the remainder or fifth layer) is exact (it is divided into two equal parts); the lesser and larger measure of the bricks is to be taken so as to fit (the exigencies of the case).

भवत इति शेषः । यथा युज्यते तथेष्टकानां ह्रासवृद्धी । अन्यथा वक्तुमशक्यत्वादेवमुक्तम् महतः प्रस्तारस्योर्ध्वप्रमाण एव विशेषः इतरेषां प्रस्ताराणां यथापूर्वमेव । अथ केचिद्वदन्ति इष्टकानां संपादयितुमशक्यत्वादिष्टकानां रूपेण मृदमेव प्रक्षिपन्ति । तदपि युक्तमयुक्तमिति विचारणीयं सूरिभिः ।

कूर्मचितं चिन्वीत यः कामयेत ब्रह्मलोकमभिजयेयमिति । २७०

He who wishes "may I conquer the world of Brahman" is to construct the agni in the shape of a tortoise; such is the tradition.

छन्दश्चिदध्याये तथैव कूर्मचिदिति ब्राह्मण इत्युक्तमिह विज्ञायत इति शाखान्तरब्राह्मणं दर्शितम् । एतस्मादेव गम्यते स्वशाखायां ब्राह्मणाभावोन्यत्रा'म्नाय इत्युक्तं भवति । ब्रह्मलोकं हिरण्यगर्भलोकम् ।

1. So in C; A. B. ° धाय तनयं कृत्वा

2. A—C. °वोष्टका°

द्वयाः खलु कूर्मा भवन्ति वक्राङ्गाश्च परिमण्डलाश्च । २०१

There are two kinds of tortoises, such with angular limbs and round ones.

वक्राङ्गानि कुटिलाङ्गानि येषां ते वक्राङ्गाः । एवं परिमण्डलाङ्गाः ।

अविशेषात्तु मन्यामहे ऽन्यतरस्याकृतिरिति । २०२

As no particular characteristic is mentioned, we adopt both; a description of the form of both (follows).

व्याख्यातमेतद्रथचक्रचितौ ।

अथाग्निं विमिमीते चतुरस्र आत्मा भवति तस्य दश प्रक्रमाः पार्श्वमानी भवति । २०३

For this chiti now the agnikshetra is measured out; the átman is a square; its side is three hundred aṅgulis long.

दशप्रक्रमप्रमाणेन चतुरस्रं कुर्यादित्यर्थः ।

तस्य द्वाभ्यां द्वाभ्यां प्रक्रमाभ्यां स्रक्तीनामपच्छेदः । २०४

The corners of this square are to be cut off with sixty aṅgulis each.

तस्यात्मनः कोणांशानां द्वाभ्यां द्वाभ्यां स्रक्तीनामपच्छेदः कर्तव्यः । एवं कोणांशेभ्यो ऽष्टौ चतुर्थ्यो निरस्ता भवन्ति ।

पूर्वस्मिन्ननीके प्रक्रमप्रमाणानि चत्वारि चतुरस्राणि कृत्वा तेषां ये अन्त्ये ते अक्ष्णयापच्छिन्द्यात् । २०५

Having made at (the middle of) the east side (of the átman) four squares of thirty aṅgulis (side), one is to divide the two outmost of them by the diagonal (and to remove half of each square).

पूर्वस्मिन्पार्श्वे पार्श्वयोः प्रक्रमद्वयमवशिष्य मध्य आत्मनो बहिस्तिर्यङ्क्षु प्रक्रमप्रमाणानि चत्वारि चतुरस्राण्यनीकसंलग्नानि कृत्वा

तेषां ये मध्यमे चतुरश्रे ते पञ्चदशायापच्छिन्द्यात् । आग्नेयानदले न्यसेत् ।

एवं दक्षिणत एवं पश्चादेवमुत्तरत: । २७६

The same is to be done on the south side, the west side and the north side.

चतुरश्रकरणाद्यपच्छेदान्तो विधि: सर्वेष्वित्यर्थ: ।

स आत्मा । २७७

This (the parts described above) forms the átman.

एवमात्मनि चतुरधिकं शतं चतुष्प्य: ।

शिर: पञ्चपदायाममर्धपुरुषव्यासम् । २७८

The head is seventy-five angulis long, sixty angulis broad.

एवं पञ्च चतुष्प्य: । तत्र ।

तस्यांसौ प्रक्रमेणापच्छिन्द्यात् । २७९

The two east corners of the head are to be cut off with thirty angulis each.

एवमपच्छिन्ने परिशिष्टाश्चतस्रश्चतुष्प्यो भवन्ति ।

स्रक्त्यपच्छेदे पादानुन्नयेत् । २८०

There where the corners have been cut off (from the square forming the middle part of the átman) the feet are to be lengthened out.

स्रक्तीनामपच्छेदे आत्मस्रक्तीनामपच्छेदे । जातावेकवचनम् । अपच्छेदेषु पादानुन्नयेत् । बहि: कुर्यात् । अवान्तरदिक्षु पादान्कुर्यादित्यर्थ: ।

तस्य द्विपदाक्ष्णया तिरश्ची तद्द्विगुणायाममनूची । २८१

The breadth of it (of one foot; the words apply in the first place to the south-east foot) is equal to the diagonal of a

square, the side of which is thirty aṅgulis (= two padas) long ($\sqrt{1800}$ aṅg); this doubled is the length.

तस्य पादस्य द्विपदाक्ष्णया चतुर्थ्यक्ष्णया सार्धचतुर्दशतिलसहितद्विचत्वारिंशदङ्गुला तिरश्ची । तद्द्विगुणं पञ्चतिलोनपञ्चाशीत्यङ्गुलमनूची आयामः । दक्षिणपूर्वप्रत्यपच्छेदमध्यतश्चतुर्थ्यक्ष्णयायामार्धं तिर्यङ्मानं परिगृह्य कोणदिशं प्रति तद्द्विगुणायामं पादार्थे दीर्घचतुरस्रं कुर्यादित्यर्थः । एवं चतस्रश्चतुर्थ्यः । तत्र ।

तस्य द्विपदाक्ष्णया पूर्वमंसमपच्छिन्द्यात् । २८२

Of this (oblong) the eastern corner (The aṅsau of this oblong are turned towards the east and south, not as usually towards the north-east and south-east) is to be cut off with the diagonal of a square, the side of which is thirty aṅgulis long.

This is done by drawing a line from the middle of the north-east side towards the south-corner.

पूर्वपार्श्वस्य मध्ये चिह्नं कृत्वापरांसाल्लिखेत् । एवमेका चतुर्थी निरस्ता भवति । तिस्रो ऽवशिष्यन्ते ।

एतेनेतरेषां पादानामपच्छेदा व्याख्याताः २८३

Thereby the cutting off (of a corner of each) of the there other feet is explained.

अपच्छेदशब्देन करणमपि विवक्षितम् । अन्यथा ऽपच्छेदासंभवात् ।

अपरयोः पादयोरपरावंसावपच्छिन्द्यात् । २८४

In the two western feet the western-corners are to be cut off.

अपरपार्श्वस्य मध्ये लक्षणं कृत्वापूर्वांसाल्लिखेत् । एवं पादेषु द्वादश चतुर्थ्यः ।

एवं सारत्निप्रादेशः सप्तविधः संपद्यते । २८५

In this manner the seven-fold agni together with the two aratnis and the prádeśa is brought about.

आत्मनि चतुःशतं चतुर्थ्यः । शिरसि चतस्रश्चतुर्थ्यः । पादेषु द्वादश । एवं विंशशतं चतुर्थ्यः ।

तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थ्यस्तासामर्ध्याः पाद्याश्च । २८६

For this chiti are to be made square bricks of thirty aṅgulis side; bricks equal to a half and bricks equal to a quarter of those first mentioned (made by drawing the diagonals).

नित्यमक्षयापच्छेदनमनादेश इति ह्युक्तम् ।

अध्यर्धापाद्यां चतुर्भिः परिगृह्णीयात्प्रक्रमेण द्वाभ्यां पदाभ्यां पदसविशेषेणेति । २८७

A brick the area of which amounts to the fourth part of the area of a brick equal to one chaturthí and a half (the chaturthí is a square of 30 aṅgulis side) is to be enclosed with four sides, one 30 aṅgulis long, two 15 aṅgulis long and one equal to the saviśesha of 15.

अर्धाधिकां पादेष्टकां चतुर्भिः फलकैः कुर्यात् । प्रक्रमेणोत्तरं फलकम् । द्वाभ्यां पदाभ्यां पश्चिमदक्षिणफलके पदप्रमाणे इत्यर्थः । पदसविशेषेण तिलोनैकविंशत्यङ्गुलेन । पूर्वं कर्णरूपमित्यर्थः ।

ते यथा दीर्घसंश्लिष्टे स्यातां तथैकां कारयेत् । २८८

Then one brick is to be formed by joining two of these (bricks mentioned in the preceding sútra) with their long sides.

व्याख्यातमिदम् । एकामपरामित्यर्थः ।

द्विपदाक्षयार्धेन समचतुरश्रामेकाम् । २८९

A square brick is to be made with half the diagonal of a square, the side of which is two padas long.

Digitized by Google

तिलाधिकैकविंश[1]त्यङ्गुलेन समचतुरस्रामेकाम् । एवं षट् करणानि । तत्राष्टाचत्वारिंशच्छतद्वयं चतुर्थ्यः । पञ्चशतं षट् सप्ततिश्चार्ध्याः । शतं पाद्याः । अष्टावध्यर्धपाद्याः । तथा हंसमुख्यः । षष्टिः समचतुरस्राः सार्ध्याः । षोडशानाकसदो द्वे पाद्ये अध्यार्द्धयं षट् चतुर्थ्यः । एवं पञ्चसहस्रमिष्टकाः ।

उपधाने शिरसोऽग्रे चतुरस्रामुपदध्यात् । २६०

In placing the bricks, a square brick is to be placed in the top of the head.

यथा महादिषु चतुरस्रेष्टकापङ्क्तयो भवन्ति तथोपदध्यात् ।

हंसमुख्यावपरस्तात् । २६१

Two haṅsamukhís to the west of it.

पश्चात्प्रागग्रे हंसमुख्यावुपदध्यात् । शिरसि पश्चाद्भागे प्रक्रमप्रमाणमवशिष्य परिशिष्टदेशे प्रागग्रे हंसमुख्यावित्यर्थः ।

पञ्च पञ्च चतुरस्रा द्वे द्वे पादेष्टके इति पादेषूपदध्यात् । २६२

In each foot five square bricks and two quarter-bricks are to be placed.

पादाग्रापच्छेदाद्दक्षायासंगतदीर्घपार्श्वे द्वे द्वे पादेष्टके । शिष्टपादशेषेषु त्रिभिस्त्रिभिश्चतुरस्राभिरेकैका रीतिः । द्वाभ्यां द्वाभ्यामपरा । एवं पादेष्वष्टौ पाद्याः । विंशतिश्चतुरस्राः ।

यद्यदपच्छिन्नं तस्मिन्नर्धेष्टकाश्चोपदध्यात् । २६३

Wherever a piece has been cut off (from the agnikshetra) there half-bricks are to be placed.

चावधारणे । यद्यदवच्छिन्नं शेषमनीकपार्श्वेभ्यात्मापच्छेदेषु च अर्धेष्टका एवोपदध्यात् । एवमनीकपार्श्वेष्वष्टावर्ध्याः आत्मापच्छेदेषु चाष्टौ ।

1. C. तिलोनैकविं

शेषमग्निं चतुर्भागीयाभि: प्रच्छादयेत् । २६४

The remaining part of the agni is to be covered with chaturthís.

एवं प्रच्छादिते पञ्चपञ्चाशदिष्टका न्यूना भवन्ति । तत्र ।

अर्धेष्टकाभि: संख्यां पूरयेत् । २६५

The number (of two hundred bricks) is to be made full with half-bricks (substituted for chaturthís).

तत्राग्निधर्माविरोधेन पूरणस्येष्टत्वात् दक्षिणोत्तरपार्श्वयो: सप्तविंशति: सप्तविंशतिश्चतुर्थ्य अर्धेष्टकारूपेण भेद्या: । तत्र दक्षिणपार्श्वस्था: प्रागुत्तरसविशेषा: । विपरीता उत्तरपार्श्वस्था: । शिरसि सूत्रोक्तां चतुरस्रेष्टकामुद्धृत्यान्तर्दीर्घपार्श्वे पादेष्टके निदध्यात् । एवं सूत्रभङ्गेनाप्यग्निधर्माविरोध आपाद्य: सर्वत्र । तत्रैवमुपधानम् । पादवर्जं शिरसा सह द्वादश रीतय: । दक्षिणमनीकम् । मध्ये द्वे चतुर्थ्यौ । अभितो द्वे अर्ध्ये । द्वितीयस्यां मध्ये षट् चतुर्थ्य: पार्श्वयोर्द्वे अर्ध्ये । तृतीयस्यामादितोऽर्ध्या ततश्चतुर्थी ततो द्वादशार्ध्यास्तत एका चतुर्थी ततोऽर्ध्या च । चतुर्थ्यामादितो द्वे चतुर्थ्यौ ततश्चतुर्दशार्ध्यास्तत एका चतुर्थी । पञ्चम्यामाद्यन्तयोरर्ध्ये मध्ये चतुर्थरीतिवत् । षष्ठ्यामादितस्तिस्रश्चतुर्थ्यस्ततश्चतुर्दशार्ध्यास्ततस्तिस्रश्चतुर्थ्यस्तत एका हंसमुखी प्रागग्रा तत उत्तरपूर्वकोट्या सह दक्षिणायान्तर्भेका पाद्या । एवमुत्तरं पार्श्वम् । दक्षिणपार्श्वस्था अर्ध्या: प्रागुदक्सविशेषा: । विपरीता इतरा: । पादेषु चतुरस्रभूतांशेषु चतस्रश्चतुरस्रा: । केदांशेषु मध्यत एकैका चतुरस्रा । शेषेषु पादेष्टके । एवं पादेष्वष्टाविंशति: । शिरसि पञ्च । आत्मनि सप्तषष्टिशतम् । अस्मिन्प्रस्तारे चतुश्चत्वारिंशच्चतुर्थ्य: । चतुर्विंशतिशतमर्ध्या: । दश पाद्या: । द्वे हंसमुख्यौ । विंशतिश्चतुरस्राध्या: ।

Noteworthy is the remark of the commentator about the unavoidable division of the square brick in the top of the head into two triangular bricks which has to take place against the direction contained in S. 290 (sútrabhangena), because without this division it would be impossible to place two hundred bricks and at the same time not to destroy the symmetry — the paśudharmatva — of the agni.

अपरस्मिन्प्रस्तारे शिरसो ऽग्रे हंसमुखीमुपदध्यात्पादेष्टके अभितः । २६६

In the second layer place a haṅsamukhí-brick in the top of the head, a quarter-brick on each side of it.

दक्षिणतो दक्षिणाग्रान्तर्भो । विपरीतोत्तरा ।

तयोरवस्तादभितो द्वे द्वे अध्यर्धपाद्ये विषूची । २६७

To the west of each of these two (quarter-bricks) on both sides two bricks, which are equal to the quarter of an adhyardhá, turned towards different directions (the tops of two being turned towards the east, those of the two others towards the west).

तयोः पादेष्टकयोः पश्चाद् द्वे द्वे अध्यर्धपाद्ये विषूची । विपरीताग्रे । द्वन्द्वयोः पूर्वे प्रागग्रे बहिर्दीर्घपार्श्वे । पश्चिमे प्रत्यगग्रे अन्तर्दीर्घपार्श्वे ।

तयोरवस्तादभितश्छेदसंहिते द्वे पादेष्टके । २६८

To the west of these on each side a (triangular) quarter-brick connected with the cut (i. e. situated in such a way that one of its sides coincides with the edge of the agni).

तयोरध्यर्धपाद्याद्विकयोः पश्चाच्छेदसंधावर्धे प्रागग्रे प्रत्यगग्रे द्वे पादेष्टके ।

द्वे द्वे द्विपदे तिस्रस्तिस्रो ऽर्धेष्टका अत्र पादेषूपदध्यात् । २६९

In every foot two dvipadá-bricks and three half-bricks are to be placed (the half of one dvipadá in each foot extends into the átman).

द्विपदाद्वन्द्वस्यैकैकस्मिन्पाद उपधानासंभवात्तामध्याद् द्विकानामभ्यन्तराः पादात्मनोः संधिषु भवन्ति । अवान्तरदिक्षु यथा चतुर्थीनां सक्तयो भवन्ति तथाभ्यन्तराः संधावुपधेयाः । बहिर्भूता अपि पूर्वापरहितपङ्क्तिभिः संसृष्टा एवोपधेयाः । द्विकानां मध्येषु सक्तिसंसृष्टाये बहिर्दीर्घपार्श्वे द्वे द्वे अर्धेष्टके । पादानां मध्येष्वेकैकार्धेष्टका । एवं पादेष्वष्टौ चतुर्थ्यः । द्वादशार्ध्याः । एवं विंशतिः ।

यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् । ३००

Where something had been cut off (i. e. on the edge of the agnikshetra) half-bricks and quarter-bricks are to be placed.

यत्र यत्रार्धेष्टकाः संभवन्ति तत्र तत्रार्धेष्टका एव । अन्यत्र पादेष्टकाः । अनीकेषु पार्श्वस्थार्ध्यानामात्मनश्च संधावष्टावर्ध्याः । तिसृष्वनीकेषु पञ्च पञ्च पाद्याः । अर्ध्यानां पादान्तानां चान्तरालेषु षोडश पाद्या इत्यर्थः ।

शेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत् । ३०१

The remaining part of the agni is to be covered with chaturthí-bricks.

एवं प्रच्छादित एकचत्वारिंशदिष्टका न्यूना भवन्ति । तत्र ।

अर्धेष्टकाभिः संख्यां पूरयेत् । ३०२

And finally the number (of 200 bricks) is to be made full with half-bricks.

अर्धेष्टकाभिरेव न पादेष्टकाभिः । तत्रैवमुपधानम् । पादवर्जं शिरसा सह प्राच्यस्त्रयोदश रीतयः । तत्र दक्षिणस्यामनीकाग्रे पञ्च पाद्याः । तासां तिस्रो ऽन्तर्दीर्घा द्वे बहिर्दीर्घे । द्वितीयस्यामादितः पादमूलपूर्वसंधिमारभ्य दक्षिणायान्तर्दीर्घपार्श्वा पाद्या । तस्याः पुरस्ताद्बहिर्दीर्घोदगग्रैका पाद्या । तस्याः पुरस्तात्प्राग्दक्षिणबाह्यदी-

ध्यंकर्णोऽभ्यन्तरप्रागुदगयार्ध्यैका ततस्तिस्रश्चतुर्थ्यः तासां पुरस्तात्प्रागुदग्दीर्घपार्श्वाभ्यन्तरप्रत्यग्दक्षिणायैकार्ध्या । तस्याः पुरस्ताद् बहिर्दीर्घोदगयैका पाद्या । तस्याः पुरस्ताद्दक्षिणायान्तर्दीर्घपार्श्वैका पाद्या । एवं नवेष्टका द्वितीया । तृतीयस्यामादितः पादमूले बाह्यकर्णैकार्ध्या । तस्याः पुरस्तात् पादात्मसंधावेका चतुर्थी । तस्याः पुरस्तात्सप्त चतुर्थ्यः । पूर्वसंधावेका चतुर्थी । तस्याः पुरस्ताद् बाह्यकर्णैकार्ध्या । एवमेकादशेष्टका तृतीया । चतुर्थ्यामादितः प्रत्यगया पाद्या । तस्या उत्तरतः प्रागया बहिर्भा । तयोः पुरस्तान्नव चतुर्थ्यः । ततः प्रागया पाद्या । तस्या उत्तरतः प्रत्यगया बहिर्भा पाद्या । एवं त्रयोदशेष्टका चतुर्थी रीतिः । पञ्चम्यामादितोऽनीकात्मसंधौ बहिःकर्णा प्रागुदगयैकार्ध्या । ततो नव चतुर्थ्यः । ततः प्रत्यगुदगया बाह्यकर्णार्ध्या । एवमेकादश पञ्चमी रीतिः । षष्ठ्यामादितः प्रत्यगया पाद्या । तस्या उत्तरतः प्रागया पाद्या । तयोः पुरस्तादेकादश चतुर्थ्यः । ततः प्रागया पाद्या ततोऽनीकशिरसोः संधौ प्रत्यगयार्ध्यर्धापाद्या दीर्घा । तस्याः पुरस्ताद्विपरीता । तस्याः पुरस्ताद्दक्षिणायान्तर्भा पाद्या । एवं सप्तदशेष्टका षष्ठी रीतिः । मध्यरीत्यामादितः प्रत्यगया पाद्या । ततस्त्रयोदश चतुर्थ्यः । ततो हंसमुखी प्रागया । एवं पञ्चदश । दक्षिणपक्षवदुत्तरः पक्षः । पादेषूपहितशिष्टेषु द्वे द्वे अर्ध्ये । एकैका चतुर्थी । एवं चतस्रश्चतुर्थ्यः । अष्टावर्ध्याः । एकचत्वारिंशदूनाः । तृतीयादिषु चतसृषु पञ्च पञ्च चतुर्थीरुद्धृत्य चत्वारिंशदर्ध्या दक्षिणोत्तरसविशेषा उपधेयाः । एवमुत्तरस्मिन्पार्श्वे विपरीतसविशेषाः । शिरस्येकां चतुर्थीमुद्धृत्य द्वे अर्ध्ये उपधेये । अस्मिन्प्रस्तारेऽष्टपञ्चाशच्चतुर्थ्यः । द्व्यधिकशतमर्ध्याः ।

पञ्चविंशत्याद्याः । चतस्रो ऽध्यर्धाषाढाः । एका हंसमुखी । शिरसि द्वादशेष्टकाः । पादेषु विंशतिः । आत्मन्यष्टषष्टिशतम् ।

अथापरः । ३०३

The second kind of the construction in the form of a tortoise follows.

अपरः कूर्मचिदुच्यत इति शेषः ।

पुरुषस्य षोडशीभिर्विंशशतं सारत्निप्रादेशः सप्तविधः संपद्यते । ३०४

One hundred and twenty bricks, of which one is equal to the sixteenth part of a purusha, constitute the seven-fold agni with the two aratnis and the prádeśa.

व्याख्यातमेतन्मण्डलद्रोणचयने ।

तासां पञ्च षोडशीरपोद्धृत्य शेषाः परिमण्डलं करोति । ३०५

Five of those are to be laid aside; the remaining ones to be formed into a circle,

तासां षोडशीनां पञ्च षोडशीरपोद्धृत्य शेषाः षोडशीः परिमण्डलं करोति । तत्र समस्तमग्निक्षेत्रं लक्षमष्टौ सहस्राण्यङ्गुलयः । तस्मात्पञ्चानां षोडशीनां क्षेत्रं चत्वारि सहस्राणि पञ्च शतानि चाङ्गुलानि पृथक्कृत्य लब्धं लक्षं सहस्रत्रयं पञ्च शतानि । तस्य मूलं त्रीणि शतान्येकविंशतिश्चाङ्गुलयः पञ्चविंशतितिलाश्च । सा चतुरश्रकरणी । तया समचतुरश्रं कृत्वा चतुरश्रं मण्डलमित्यादिना सार्धैकाशीतिशताङ्गुलेन विष्कम्भार्धेन परिमण्डलं करोति ।

तदुत्तरेण द्रोणचिता व्याख्यातम् । ३०६

This (i. e. how to make the circle, etc.) has been explained under the second kind of the dronachit.

तत्कूर्मचिदुपधानमुत्तरेण परिमण्डलद्रोणचिता व्याख्यातम् । तत्र विशेषमाह ।

REGISTERED No. 2.

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12. MAY 1st 1877. Vol. I.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

असिद्धवदत्रा भात् ॥ २२ ॥

असिद्धवदित्ययमधिकारो यदित ऊर्ध्वमनुक्रमिष्याम आ अध्यायपरिसमाप्तेस्तद् असिद्धवद्वेदितव्यम् । आ भादिति विषयनिर्देशः । आ भसंशब्दनाद् यदुच्यते तत्र कर्त्तव्ये, ऽत्रेति समानाश्रयत्वप्रतिपत्त्यर्थम् । तच्चेदत्र यत्र भवति तदा भाद् शास्त्रीयं विधीयते तदाश्रयमेव भवति । व्याश्रयं तु नासिद्धवद्भवतीत्यर्थः । असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं च । एधि शाधीत्यत्र एत्वशाभावयोः कृतयोर्झल्लक्षणं धित्वं न प्राप्नोति, असिद्धत्वाद्भवति । आगहि जहीत्यत्रानुनासिकलोपे जभावे च अतो हेरिति लुक् प्राप्नोति, असिद्धत्वान्न भवति । आ भादिति किम् । अभाजि । रागः । अत उपधाया इति वृद्धौ कर्त्तव्यायां नलोपो नासिद्धो भवति । अत्रग्रहणं किम् । पपुषः पश्य । चिच्युषः पश्य । लुलुवुषः पश्य । वसुसंप्रसारणमालोपे यणादेशे उवङादेशे च कर्त्तव्ये नासिद्धं भवति । आलोपादीनि वसौ, वस्वन्तस्य विभक्तौ संप्रसारणमिति समानाश्रयत्वं नास्ति । असिद्धं बहिरङ्गमन्तरङ्ग इति एतदप्यत्र न भवति । किं कारणम् । एषा हि परिभाषा आ भाच्छास्त्रीया । तस्यां प्रवर्त्तमानायां वसुसंप्रसारणादीनामा भाच्छास्त्रीयाणामेवासिद्धत्वादन्तरङ्गबहिरङ्गयोः युगपत्समुपस्थापनं नास्तीति परिभाषा न प्रवर्तते ॥ वुग्युटावुवङ्यणोः सिद्धौ भवत इति वक्तव्यम् ॥ * ॥ वुग् उवङादेशे । बभूव । बभूवतुः । बभूवुः । युट् यणादेशे । उपदिदीये । उपदिदीयाते । उपदिदीयिरे । आ भादित्ययमभिविधावाङ् । तेन भाधिकारे ऽप्यसिद्धवद्भवति ॥

श्नान्नलोपः ॥ २३ ॥

श्नादिति श्नमयमुत्सृष्टमकारो गृह्यते । तत उत्तरस्य नकारस्य लोपो भवति । अनक्ति । भनक्ति । हिनस्ति । नकारग्रहणं किम् ।

यज्वानाम् । यज्वानाम् । सुपि चेति परत्वात् कृते ऽपि दीर्घत्वे स्थानिवद्भावाद्वलोपः स्यादेव । विश्नानां प्रश्नानामित्यत्र लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्ययं न भवति ॥

अनिदितां हल उपधायाः क्ङिति ॥ २४ ॥

अनिदितामङ्गानां हलन्तानामुपधाया नकारस्य लोपो भवति क्ङिति प्रत्यये परतः । स्रस्तः । ध्वस्तः । स्रस्यते । ध्वस्यते । सनीस्रस्यते । दनीध्वस्यते । अनिदितामिति किम् । नन्द्यते । नानन्द्यते । हल इति किम् । नीयते । नेनीयते । उपधाया इति किम् । नह्यते । नानह्यते । क्ङितीति किम् । स्रंसिता । ध्वंसिता ॥ अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानं कर्त्तव्यम् ॥ * ॥ विलगितः । विकपितः । उपतापशरीरविकारयोरिति किम् । विलङ्गितः । विकम्पितः ॥ रञ्जेर्णौ मृगरमण उपसंख्यानं कर्त्तव्यम् ॥ * ॥ रजयति मृगान् । जनीजृष्क्नसुरञ्जोऽमन्ताश्चेति मित्त्वादुपधाह्रस्वत्वम् । मृगरमण इति किम् । रञ्जयति वस्त्राणि ॥ घिनुणि च रञ्जेरुपसंख्यानं कर्तव्यम् ॥ * ॥ रागी । त्यजरजभजेति निपातनाद्वा सिद्धम् ॥ रजकरजनरजःसूपसंख्यानं कर्त्तव्यम् ॥ * ॥ रजकः । रजनम् । रजः ॥

दंशसञ्जस्वञ्जां शपि ॥ २५ ॥

दंश सञ्ज स्वञ्ज इत्येतेषामङ्गानां शपि परत उपधाया नकारस्य लोपो भवति । दशति । सजति । परिष्वजते ॥

रञ्जेश्च ॥ २६ ॥

रञ्जेश्च शपि परत उपधाया नकारस्य लोपो भवति । रजति । रजतः । रजन्ति । पृथग्योगकरणमुत्तरार्थम् ॥

घञि च भावकरणयोः ॥ २७ ॥

भावकरणवाचिनि घञि परतो रञ्जेरुपधाया नकारस्य लोपो भवति । भावे । आश्चर्यो रागः । विचित्रो रागः । करणे । रज्यते ऽनेनेति, रागः । भावकरणयोरिति किम् । रजन्ति तस्मिन्निति रङ्गः ॥

स्यदो जवे ॥ २८ ॥

जवे ऽभिधेये स्यद इति घञि निपात्यते । स्यन्देर्नलोपो वृद्ध्यभावश्च । इक्प्रकरणाच्च धातुलोप इति प्रतिषेधो नास्ति । गोस्यदः । अश्वस्यदः । जव इति किम् । तैलस्यन्दः । घृतस्यन्दः ॥

अवोदैधौद्मप्रश्रथहिमश्रथाः ॥ २९ ॥

अवोद एध ओद्म प्रश्रथ हिमश्रथ इत्येते निपात्यन्ते । अवोद इत्युन्देरवपूर्वस्य घञि नलोपो निपात्यते । अवोदः । एध इति इन्धेर्घञि नलोपो गुणश्च निपात्यते । न धातुलोप आर्द्धधातुक इति हि प्रतिषेधः स्यात् । ओद्म इति उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्च निपात्यते । ओद्मः । प्रश्रथ इति प्रपूर्वस्य श्रन्थेर्घञि नलोपो वृद्ध्यभावश्च निपात्यते हिमश्रथ इति हिमपूर्वस्य श्रन्थेर्घञ्येव निपातनम् । हिमश्रथः ॥

नाञ्चेः पूजायाम् ॥ ३० ॥

अञ्चेः पूजायामर्थे नकारस्य लोपो न भवति । अञ्चिता अस्य गुरवः । अञ्चितमिव शिरो वहति । अञ्चेः पूजायामिति इडागमः । पूजायामिति किम् । उदक्तमुदकं कूपात् । उद्धृतमित्यर्थः । यस्य विभाषेतीट्प्रतिषेधः ॥

क्त्वि स्कन्दिस्यन्दोः ॥ ३१ ॥

क्त्वाप्रत्यये परतः स्कन्द स्यन्द इत्येतयोर्नकारलोपो न भवति । स्कन्त्वा । स्यन्त्वा । स्यन्देरूदित्त्वात्पक्षे इडागमः । स्यन्दित्वा । तत्र यदा इडागमस्तदा न क्त्वा सेडिति कित्त्वप्रतिषेधादेव नलोपाभावः ॥

जान्तनशां विभाषा ॥ ३२ ॥

जान्तानामङ्गानां नशेश्च क्त्वाप्रत्यये परतो विभाषा नकारलोपो न भवति । रङ्क्त्वा । रक्त्वा । भङ्क्त्वा । भक्त्वा । नशः । नष्ट्वा । नंष्ट्वा । इट्पक्षे नशित्वा * ॥

* इदं बहुषु पुस्तकेषु नास्ति ।

भञ्जेश्च चिणि ॥ ३३ ॥

भञ्जेश्च चिणि परतो विभाषा नकारलोपो भवति । अभाजि । अभञ्जि । अप्राप्तोयं नलोपः पक्षे विधीयते । ततो नेति नानुवर्त्तते ॥

शास इदङ्हलोः ॥ ३४ ॥

शास उपधाया इकारादेशो भवति अङि परतो हलादौ च क्ङिति । अन्वशिषत् । अन्वशिषताम् । अन्वशिषन् । हलादौ क्ङिति । शिष्टः । शिष्टवान् । ङिति । तौ शिष्टः । वयं शिष्मः । इत्वे कृते शासिवसिघसीनां चेति षत्वम् । अङ्हलोरिति किम् । शासति । शशासतुः । शशासुः * ॥ क्वौ च शास इत्वं भवतीति वक्तव्यम् ॥ * ॥ आर्यान् शास्तीति, आर्यशीः । मित्रशीः ॥ यस्मात् शासेरङ्विहितः शासु अनुशिष्टाविति तस्यैवेदं ग्रहणमिष्यते ॥ आङः शासु इच्छायामिति अस्य न भवति । आशास्ते । आशास्यमानः ॥ क्विप्प्रत्यये तु तस्यापि भवतीति वक्तव्यम् ॥ * ॥ आशीः । आशिषौ । आशिषः । त्रियाशीःप्रैषेषु तिङाकाङ्क्षमिति निपातनाद्वा सिद्धम् ॥

शा हौ ॥ ३५ ॥

शासो हौ परतः शा इत्ययमादेशो भवति । अनुशाधि । प्रशाधि । उपधाया इति निवृत्तं ततः शास इति स्थानेयोगा षष्ठी भवति । क्ङितीत्येतदपि निवृत्तम् । तेन यदा वा छन्दसीति पित्त्वं हिशब्दस्य तदाप्यादेशो भवत्येव । शाधीत्यानुदात्तमपि छन्दसि दृश्यते ॥

हन्तेर्जः ॥ ३६ ॥

हन्तेर्धातोर्ज इत्ययमादेशो भवति हौ परतः । जहि शत्रून् ॥

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ॥ ३७ ॥

अनुदात्तोपदेशानामङ्गानां वनतेस्तनोत्यादीनां चानुनासिकलोपो भवति झलादौ क्ङिति प्रत्यये परतः । यमु । यत्वा । यतः । यतवान् ।

* क्ङितीति किम् । शास्ति इत्यधिकमेकस्मिन्पुस्तके ।

Digitized by Google

यतिः । रमु । रत्वा । रतः । रतवान् । रतिः । अनुदात्तोपदेशा अनुनासिकान्ता यमिरमिनमिगमिहनिमन्यतयः । वनति । वतिः । तनिनो रूपमेतत् । क्तिचि तु न क्तिचि दीर्घश्चेति भवति । अन्यत्र झलादावपि इटा भवितव्यम् । तनोत्यादयः । ततः । ततवान् * । सनोतेरात्वं वक्ष्यति । क्षणु । क्षतः । क्षतवान् । ऋणु । ऋतः । ऋतवान् । तृणु । तृतः । तृतवान् । घृणु । घृतः । घृतवान् । वनु । वतः । वतवान् । मनु । मतः । मतवान् । ङ्गिति । अतत । अतथाः । अनुदात्तोपदेशवनतितनोत्यादीनामिति किम् । शान्तः । शान्तवान् । तान्तः । तान्तवान् । दान्तः । दान्तवान् । अनुनासिकस्येति किम् । पक्वः । पक्ववान् । झलीति किम् । गम्यते । रम्यते । क्ङितीति किम् । यन्ता । यन्तव्यम् । उपदेशग्रहणं किम् । इह च यथा स्यात् । गतिः । इह च मा भूत् । शान्तः । शान्तवानिति ॥

वा ल्यपि ॥ ३८ ॥

ल्यपि परतो ऽनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो वा भवति । व्यवस्थितविभाषा चेयं, तेन मकारान्तानां विकल्पो भवति । अन्यत्र नित्यमेव लोपः । प्रयत्य । प्रयम्य । प्ररत्य । प्ररम्य । प्रणत्य । प्रणम्य । आगत्य । आगम्य । आहत्य । प्रमत्य । प्रवत्य । प्रतत्य ॥

न क्तिचि दीर्घश्च ॥ ३९ ॥

क्तिचि परतो ऽनुदात्तोपदेशादीनामनुनासिकलोपो दीर्घश्च न भवति । यन्तिः । वन्तिः । तन्तिः । अनुनासिकलोपे प्रतिषिद्धे ऽनुनासिकस्य क्विझलोः क्ङितीति दीर्घः प्राप्नोति सोऽपि प्रतिषिध्यते ॥

गमः क्वौ ॥ ४० ॥

गमः क्वौ परतो ऽनुनासिकलोपो भवति । अङ्गगत् । कलिङ्गगत् । अध्वगतो हरयः ॥ गमादीनामिति वक्तव्यम् ॥ * ॥ इहापि यथा स्यात् । संयत् । परीतत् ॥ ऊङ् च गमादीनामिति वक्तव्यम् ॥ * ॥ अग्रेगूः । अग्रेभ्रूः ॥

---

* तत्वा ततिरित्यधिकमेकस्मिन्पुस्तके ।

विड्वनोरनुनासिकस्यात् ॥ ४१ ॥

विटि वनि च प्रत्यये परतो ऽनुनासिकान्तस्याङ्गस्याकार आदेशो भवति । अब्जाः । गोजाः । ऋतजाः । अद्रिजाः । गोषा इन्द्रो नृषा असि । कूपखाः । शतखाः । सहस्रखाः । दधिक्राः । अग्रेगा उन्नेतॄणाम् । जनसनखनक्रमगमो विडिति विट् प्रत्ययः । सनोतेरन इति षत्वम् । गोषा इन्द्रो नृषा असीत्यत्र । वन् । विजावा । अग्रेजावा । अन्येभ्योऽपि दृश्यन्त इति वनिप् प्रत्ययः । अनुनासिकस्येति वर्तमाने पुनरनुनासिकग्रहणमननुनासिकमात्रपरिग्रहार्थम् । अन्यथा ह्यनुदात्तोपदेशवनतितनोत्यादीनामेव स्यात् ॥

जनसनखनां सञ्झलोः ॥ ४२ ॥

झलिति चानुवर्तते । जन सन खन इत्येतेषामङ्गानां सनि झलादौ क्ङिति झलादौ प्रत्यये परत आकार आदेशो भवति । जन् । जातः । जातवान् । जातिः । सन् । सनि । सिषासति । सातः । सातवान् । सातिः । खन् । खातः । खातवान् । खातिः । झल्ग्रहणं सन्विशेषणार्थं किमर्थमनुवर्त्यते, इह मा भूत् । जिजनिषति । सिसनिषति । चिखनिषति । सनोतेः सनीवन्तर्द्धेति पक्षे इडागमः । तदिह सनोत्यर्थमेव सन्ग्रहणम् । अत्र झलादौ क्ङिति सनोतेर्विप्रतिषेधाद् आत्त्वमनुनासिकलोपं बाधते । घुमास्थागापाजहातिसां हलीति इत्वग्रहणं ज्ञापकमस्मिन्नसिद्धप्रकरणे विप्रतिषेधो भवतीति ॥

ये विभाषा ॥ ४३ ॥

यकारादौ क्ङिति प्रत्यये परतो जनसनखनामाकार आदेशो भवति विभाषा । जायते । जन्यते । जाजायते । जञ्जन्यते । सायते । सन्यते । सासायते । संसन्यते । खायते । खन्यते । चाखायते । चङ्खन्यते । जनेः श्यनि ज्ञाजनोर्जा इति नित्यं जादेशो भवति ॥

तनोतेर्यकि ॥ ४४ ॥

तनोतेर्यकि परतो विभाषा आकार आदेशो भवति । तायते । तन्यते । यकीति किम् । तन्तन्यते ॥

Digitized by Google

सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥ ४५ ॥

सनोतेरङ्गस्य क्तिचि प्रत्यये परत आकार आदेशो भवति लोपश्चास्यान्यतरस्याम् । सातिः । सन्तिः । सतिः । अन्यतरस्यांग्रहणं विस्पष्टार्थम् । येसंबद्धं हि विभाषाग्रहणमिह निवृत्तमित्याशङ्क्येत ॥

आर्द्धधातुके ॥ ४६ ॥

आर्द्धधातुकइत्यधिकारो न ल्यपीति प्रागेतस्माद्यदित ऊर्ध्वमनुक्रमिष्याम आर्द्धधातुकइत्येवं तद्वेदितव्यम् । वक्ष्यति । अतो लोपः । चिकीर्षिता । जिहीर्षिता । आर्द्धधातुकइति किम् । भवति । भवतः । अदिप्रभृतिभ्यः शपो लुग्वचनं प्रत्ययलोपलक्षणप्रतिषेधार्थं स्यादित्येतच्च ज्ञापकं शपो लोपाभावस्य । यस्य हलः । बेभिदिता । बेभिदितुम् । बेभिदितव्यम् । आर्द्धधातुकइति किम् । बेभिद्यते । णेरनिटि । कारणा । हारणा । आर्द्धधातुकइति किम् । कारयति । हारयति । आतो लोपः । ययतुः । ययुः । ववतुः । ववुः । आर्द्धधातुकइति किम् । यान्ति । वान्ति । घुमास्थागापाजहातिसां हलि । दीयते । धीयते । आर्द्धधातुकइति किम् । अदाताम् । अधाताम् । वान्यस्य संयोगादेः । ग्लेयात् । ग्लायात् । आर्द्धधातुकइति किम् । ग्लायात् । आशीर्लिङोन्यत्र न भवति । स्यसिच्सीयुट्तासिषु भावकर्म्मणोरुपदेशे ऽज्झनग्रहदृशां वा चिण्वदिट् च । कारिषीष्ट । हारिषीष्ट । आर्द्धधातुकइति किम् । क्रियेत । ह्रियेत । यगन्तस्याजन्तत्वाच्चिण्वद्भावे सति वृद्धिः स्यात्, ततश्च युक् प्रसज्येत ।

अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम् ।
आल्लोप ईत्वमेत्वं च चिण्वद्भावश्च सीयुटि ॥

भ्रस्जो रोपधयोरमन्यतरस्याम् ॥ ४७ ॥

भ्रस्जो रेफस्योपधायाश्च रमन्यतरस्यां भवति । रोपधयोरिति स्थानषष्ठीनिर्द्देशादुपधा रेफश्च निवर्त्तते । मित्त्वाच्चायमचोन्त्यात्परो भवति । भ्रष्टा । भर्ष्टा । भ्रष्टुम् । भर्ष्टुम् । भ्रष्टव्यम् । भर्ष्टव्यम् । भ्रज्जनम् ।

Digitized by Google

भर्ज्जनम् । भृष्टः भृष्टवान् इत्यत्र पूर्वविप्रतिषेधेन संप्रसारणं भवति । उपदेशइत्येव । बरीभृज्ज्यते ॥

अतो लोपः ॥ ४८ ॥

अकारान्तस्यार्द्धधातुके लोपो भवति । चिकीर्षिता । चिकीर्षितुम् । चिकीर्षितव्यम् । धिनुतः । कृणुतः । अत इति किम् । चेता । स्तोता । तपरकरणं किम् । याता । वाता । आर्द्धधातुकइति किम् । वृक्षत्वम् । वृक्षता ॥ वृद्धिदीर्घाभ्यामतो लोपः पूर्वविप्रतिषेधेन ॥ * ॥ चिकीर्षकः । जिहीर्षकः । चिकीर्ष्यते । जिहीर्ष्यते ॥

यस्य हलः ॥ ४९ ॥

हल उत्तरस्य यशब्दस्यार्द्धधातुके लोपो भवति । बेभिदिता । बेभिदितुम् । बेभिदितव्यम् । यस्येति संघातग्रहणमेतत् । तत्रालोन्त्यस्येत्येतन्न भवत्यतो लोप इत्यनेनैव तस्य सिद्धत्वात् । हल इति वा पञ्चमीनिर्द्दिष्टत्वादादेः परस्येति यकारोनेन लुप्यते । संघातग्रहणं किम् । ईर्ष्यिता । मव्यिता । हल इति किम् । लोलूयिता । पोपूयिता ॥

क्यस्य विभाषा ॥ ५० ॥

क्यस्य हल उत्तरस्य विभाषा लोपो भवति आर्द्धधातुके । समिध्यिता । समिधिता । दृषद्यिता । दृषदिता । समिधमात्मन इच्छति, समिध इवाचरति, इति वा क्यच्क्यङो यथायोगं कर्तव्यौ ॥

णेरनिटि ॥ ५१ ॥

अनिडादावार्द्धधातुके णेर्लोपो भवति । इयङ्यण्गुणवृद्धिदीर्घाणामपवादः । अततक्षत् । अररक्षत् । आशिशत् । आटिटत् । कारणा । हारणा । कारकः । हारकः । कार्यते । हार्यते । ज्ञीप्सति । अनिटीति किम् । कारयिता । हारयिता ॥

निष्ठायां सेटि ॥ ५२ ॥

निष्ठायां सेटि परतो णेर्लोपो भवति । कारितम् । हारितम् । गणितम् । लक्षितम् । सेटीति किम् । संज्ञपितः पशुः । इड्ग्रहणसामर्थ्या-

दिह पूर्वथापि न भवति । सनीवन्तर्द्धेति श्रपेरिटि विकल्पिते यस्य विभाषेति निष्ठायां प्रतिषेधः । अथ पुनरेकाच इति तत्रानुवर्त्तते तदा नित्य-मत्र भवितव्यमेवेडागमेनेति । स्रेड्ग्रहणमनर्थकं तत् क्रियते कालावधार-णार्थम् इडागमे कृते णिलोपो यथा स्यात् । अकृते हि तत्र णिलोपे सति कारितमित्यत्र एकाच उपदेशे ऽनुदात्तादितीटः प्रतिषेधः प्रसज्येत ॥

जनिता मन्त्रे ॥ ५३ ॥

जनितेति मन्त्रविषये इडादौ णिलोपो निपात्यते । यो नः पिता जनिता । मन्त्र इति किम् । जनयिता ॥

शमिता यज्ञे ॥ ५४ ॥

यज्ञकर्म्मणि शमितेति इडादौ णिलोपो निपात्यते । शृतं हविः शमितः । वृचि संबुद्ध्यन्तमेतत् । यज्ञ इति किम् । शृतं हविः शमयितः ॥

अयामन्ताल्वाय्येत्न्विष्णुषु ॥ ५५ ॥

आम् अन्त आलु आय्य इत्नु इष्णु इत्येतेषु परतो णेरयादेशो भवति । कारयांचकार । हारयांचकार । अन्त । गण्डयन्तः । मण्डयन्तः । आलु । स्पृहयालुः । आय्य । स्पृहयाय्यः । गृहयाय्यः । इत्नु । स्तनयित्नुः । इष्णु । पोषयिष्णवः * । नेति वक्तव्ये अयादेशवचनमुत्तरार्थम् ॥

ल्यपि लघुपूर्वात् ॥ ५६ ॥

ल्यपि परतो लघुपूर्वादुत्तरस्य णेरयादेशो भवति । प्रशमय्य गतः । संदमय्य गतः । प्रबेभिदय्य गतः । प्रगणय्य गतः । ह्रस्वयलोपाल्लोपा-नामसिद्धत्वं न भवत्यसमानाश्रयत्वात् । ह्रस्वादयो हि णौ ल्यपि णेरया-देशो भवति । लघुपूर्वादिति किम् । प्रपात्य गतः ॥

विभाषा ऽऽपः ॥ ५७ ॥

आप उत्तरस्य णेर्ल्यपि परतो विभाषा ऽयादेशो भवति । प्रापय्य गतः । प्राप्य गतः । इङादेशस्य नात्रविकल्पत्वाच भवति । अध्याप्य गतः ॥

---

* पारयिष्णव इत्यधिकं पुस्तकान्तरे ।

युप्लुवोर्दीर्घश्छन्दसि ॥ ५८ ॥

यु प्लु इत्येतयोर्ल्यपि परतश्छन्दसि विषये दीर्घो भवति । दान्त्यनुपूर्वं वियूय । यत्रा यो दक्षिणा परिप्लूय । छन्दसीति किम् । संयुत्य । आप्लुत्य ॥

क्षियः ॥ ५९ ॥

क्षियश्च दीर्घो भवति ल्यपि परतः । प्रक्षीय ॥

निष्ठायामण्यदर्थे ॥ ६० ॥

ण्यतः कृत्यस्यार्थौ भावकर्म्मणी ताभ्यामन्यत्र या निष्ठा तस्यां क्षियो दीर्घो भवति । आक्षीणः । प्रक्षीणः । परिक्षीणः । अकर्म्मकत्वात् क्षियः कर्त्तरि क्तः । प्रक्षीणमिदं देवदत्तस्येति क्तो ऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य इत्यधिकरणे क्तः । अण्यदर्थ इति किम् । अक्षितमसि मामेक्षेष्ठाः । क्षितमिति भावे दीर्घाभावात् क्षियो दीर्घादिति निष्ठानत्वमपि न भवति ॥

वा ऽऽक्रोशदैन्ययोः ॥ ६१ ॥

आक्रोशे गम्यमाने दैन्ये च क्षियो निष्ठायामण्यदर्थे वा दीर्घो भवति । क्षितायुरेधि । क्षीणायुरेधि । दैन्ये । क्षितकः । क्षीणकः । क्षितोयं तपस्वी । क्षीणोयं तपस्वी ॥

स्यसिच्सीयुट्तासिषु भावकर्म्मणोरुपदेशे ऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ ६२ ॥

स्य सिच् सीयुट् तासि इत्येतेषु भावकर्म्मविषयेषु परत उपदेशे ऽजन्तानामङ्गानां हन् ग्रह दृश् इत्येतेषां च चिण्वत्कार्यं भवति वा । यदा चिण्वत् तदा इडागमो भवति । कस्य । स्यसिच्सीयुट्तासीनामेवेति वेदितव्यम् । ते हि प्रकृताः । अङ्गस्य तु तत्सन्निधानाच्च क्रियते । कानि पुनरस्य योगस्य प्रयोजनानि ॥

Digitized by Google

चिण्वद् वृद्धिर्युक्च हन्तेश्च घत्वं
दीर्घश्चोक्तो यो मितां वा चिणीति ।
इट् चासिद्धस्तेन मे लुप्यते णि-
र्नित्यश्चायं वल्निमित्तोविघाती ॥

अजन्तानां तावत् । चायिष्यते । चेष्यते । अचायिष्यत । अचेष्यत । दायिष्यते । दास्यते । अदायिष्यत । अदास्यत । शामिष्यते । शमिष्यते । शमयिष्यते । अशामिष्यत । अशमिष्यत । अशमयिष्यत । हन् । घानिष्यते । हानिष्यते । अघानिष्यत । अहनिष्यत । ग्रह । ग्राहिष्यते । ग्रहीष्यते । अग्राहिष्यत । अग्रहीष्यत । ग्रहो ऽलिटि दीर्घ इति प्रकृत-स्येटो दीर्घत्वम् । दृश् । दर्शिष्यते । द्रक्ष्यते । अदर्शिष्यत । अद्रक्ष्यत । सिच्यजन्तानाम् । अचायिषाताम् । अचेषाताम् । अदायिषाताम् । अदिषाताम् । अशामिषाताम् । अशमिषाताम् । हन् । अघानिषाताम् । अवधिषाताम् । अहसाताम् । ग्रह । अग्राहिषाताम् । अग्रहिषाताम् । अग्रहीषाताम् । दृश । अदर्शिषाताम् । अदृक्षाताम् । सीयुटि । अजन्ता-नाम् । चायिषीष्ट । चेषीष्ट । दायिषीष्ट । दासीष्ट । शामिषीष्ट । शमि-षीष्ट । हन् । घानिषीष्ट । वधिषीष्ट । ग्रह । ग्राहिषीष्ट । ग्रहिषीष्ट । दृश् । दर्शि-षीष्ट । दृक्षीष्ट । तासावजन्तानाम् । चायिता । चेता । दायिता । दाता । शामिता । शमिता । हन् । घानिता । हन्ता । ग्रह । ग्राहिता । ग्रहीता । दृश् । दर्शिता । द्रष्टा । स्यसिच्सीयुट्तासिष्विति किम् । चेतव्यम् । दातव्यम् । भावकर्म्मणोरिति किम् । चेष्यति । दास्यति । उपदेशइति किम् । कारिष्यतइति गुणे कृते रपरत्वे च न प्राप्नोति । उपदेशग्रहणाद् भवति । अज्झनग्रहदृशामिति किम् । पठिष्यते । अङ्गाधिकारविहितं कार्यमिहातिदिश्यते । तेन हनिणिङामादेशा न भवन्ति । हनिष्यते । घानिष्यते । एष्यते । आयिष्यते । अध्येष्यते । अध्यायिष्यते । हनो वध लिङि लुङि च इणो गा लुङि विभाषा लुङ्लृङोरित्येते विधयो न भवन्ति ॥

दीङो युडचि क्ङिति ॥ ६३ ॥

दीङो युडागमो भवति अजादौ क्ङिति प्रत्यये परतः । उपदि-

Digitized by Google

दीये। उपविदीयाते। उपदिदीयिरे। दीङ इति पञ्चमीनिर्देशादजादेर्युडागमो भवति। विधानसामर्थ्याच्च एरनेकाच इति यणादेशे कर्तव्ये तस्यासिद्धत्वं न भवति। अचीति किम्। उपदेदीयते। क्ङितीति किम्। उपदानम्॥

आतो लोप इटि च॥ ६४॥

इडादावार्द्धधातुके क्ङिति चाकारान्तस्याङ्गस्य लोपो भवति। इटि। पपिथ। तस्थिथ। क्ङिति। पपतुः। पपुः। तस्थतुः। तस्थुः। गोदः। कम्बलदः। ङिति। प्रदा। प्रधा। आर्द्धधातुकइत्येव। यान्ति। वान्ति व्यत्यरे। व्यत्यले। रातेर्लातेश्च लङि इटि रूपम्। अचीत्येव। ग्लायते। दासीय॥

ईद्यति॥ ६५॥

ईकार आदेशो भवति आकारान्तस्याङ्गस्य यति परतः। देयम्। धेयम्। हेयम्। स्तेयम्॥

घुमास्थागापाजहातिसां हलि॥ ६६॥

घुसंज्ञकानामङ्गानां मा स्था गा पा जहाति सा इत्येतेषां हलादौ क्ङिति प्रत्यये परत ईकारादेशो भवति। दीयते। धीयते। देदीयते। देधीयते। मीयते। मेमीयते। स्थीयते। तेष्ठीयते। गीयते। जेगीयते। अध्यगीष्ट। अध्यगीषाताम्। अध्यगीषत। पीयते। पेपीयते। पातेरिह ग्रहणं नास्ति लुग्विकरणत्वात्। पायतइत्येव तस्य भवति। हीयते। जेहीयते। जहातेरिह निर्देशाद् जिहीतेर्ग्रहणं न भवति। हायते। षो ऽन्तकर्म्मणि। अवसीयते। अवसेसीयते। हलीति किम्। ददतुः। ददुः। आतो लोपाद्धि परत्वादीत्वं स्यात्। एतदेव हलग्रहणं ज्ञापकमस्मिन् प्रकरणे विप्रतिषेधेनासिद्धत्वं भवति। क्ङितीत्येव। दाता। धाता॥

एर्लिङि॥ ६७॥

घुमास्थागापाजहातिसामङ्गानां लिङि परत एकारादेशो भवति। देयात्। मेयात्। धेयात्। स्थेयात्। गेयात्। पेयात्। अवसेयात्। क्ङितीत्येव। दासीष्ट। धासीष्ट॥

Digitized by Google

वा ऽन्यस्य संयोगादेः ॥ ६८ ॥

घ्वादिभ्यो ऽन्यस्य संयोगादेराकारान्तस्य वा एकारादेशो भवति लिङि परतः । ग्लेयात् । ग्लायात् । म्लेयात् । म्लायात् । अन्यस्येति किम् । स्थेयात् । संयोगादेरिति किम् । यायात् । क्ङितीत्येव । ग्लासीष्ट । अङ्गस्येत्येव । निर्वायात् ॥

न ल्यपि ॥ ६९ ॥

ल्यपि प्रत्यये परतो घुमास्थागापाजहातिसां यदुक्तं तन्न । प्रदाय । प्रधाय । प्रमाय । प्रस्थाय । प्रगाय । प्रपाय । प्रहाय । अवसाय ॥

मयतेरिदन्यतरस्याम् ॥ ७० ॥

मयतेरिकारादेशो भवति ल्यपि परतः । अपमित्य । अपमाय ॥

लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥ ७१ ॥

लुङ् लङ् लृङ् इत्येतेषु परतोऽङ्गस्याडागमो भवति, उदात्तश्च स भवति । लुङ् । अकार्षीत् । अहार्षीत् । लङ् । अकरोत् । अहरत् । लृङ् । अकरिष्यत् । अहरिष्यत् ॥

आडजादीनाम् ॥ ७२ ॥

आडागमो भवत्यजादीनां लुङ्लङ्लृङ्क्षु परत उदात्तश्च स भवति । ऐक्षिष्ट । ऐहिष्ट । औब्जीत् । औम्भीत् । लङ् । ऐक्षत । ऐहत । औब्जत् । औम्भत् । लृङ् । ऐक्षिष्यत । ऐहिष्यत । औब्जिष्यत् । औम्भिष्यत् । इह ऐज्यत औप्यत औह्यतेति लङि कृते लावस्थायामडागमादन्तरङ्गत्वाल्लादेशः क्रियते तत्र कृते विकरणो नित्यत्वादडागमं बाधते शब्दान्तरप्राप्तेरडागमस्यानित्यत्वं, कृते हि विकरणेऽन्यस्याङ्गस्य तेन भवितव्यम्, अकृते तु धातुमात्रस्य शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति । ननु शब्दान्तरादिति विकरणो नित्यः । विकरणे कृते संप्रसारणमडागमाविनित्यत्वादेव भवति संप्रसारणे च कृते ऽजाद्यङ्गं जातमिति आडजादीनामित्याडागमः ॥

छन्दस्यपि दृश्यते ॥ ७३ ॥

छन्दसि विषये आडागमो दृश्यते । यत्र हि विहितस्ततोऽन्यत्रापि दृश्यते । आडजादीनामित्युक्तमनजादीनामपि दृश्यते । सुरुचो वेन आवः । आनक् । आयुनक् । आवरिति वृञो लुङि मन्त्रे घसह्वरेति च्लेर्लुकि कृते च भवति । तथा आनगिति नशेः । आयुनगिति युजेर्लङि ॥

न माङ्योगे ॥ ७४ ॥

माङ्योगे लुङ्लङ्लृङ्क्षु यदुक्तं तन्न भवति । मा भवान् कार्षीत् । मा भवान् हार्षीत् । मा स्म करोत् । मा स्म हरत् । मा भवानीहिष्ट । मा भवानीक्षिष्ट । मा स्म भवानीहत । मा स्म भवानीक्षत ॥

बहुलं छन्दस्यमाङ्योगेऽपि ॥ ७५ ॥

छन्दसि विषये माङ्योगेऽपि बहुलमडाटौ भवतः । अमाङ्योगेपि न भवतः । अमाङ्योगे तावत् । जनिष्ठा उग्रः काममूनयीत् । काममर्दयीत् । माङ्योगेपि भवतः । मा वः क्षेत्रे परबीजान्यवाप्सुः । मा अभित्थाः । मा आवः ॥

इरयो रे ॥ ७६ ॥

इरे इत्येतस्य छन्दसि विषये बहुलं रे इत्ययमादेशो भवति । गर्भं प्रथमं दध्र आपः । या ऽस्य परिदध्रे । धाञो रेभावस्यासिद्धत्वादातो लोपो भवति । न च भवति । परमाया धियोऽग्निकर्म्माणि चक्रिरे । अत्र रेशब्दस्य सेटां धातूनामिटि कृते पुनारेभावः क्रियते तदर्थमिरयोरित्ययं द्विवचननिर्द्देशः ॥

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ ७७ ॥

श्नुप्रत्ययान्तस्याङ्गस्य धातोरिवर्णोवर्णान्तस्य भ्रु इत्येतस्य इयङ् उवङ् इत्येतावादेशौ भवतोऽचि परतः । आप्नुवन्ति । राध्नुवन्ति । शक्नुवन्ति । धातोः । चिक्षियतुः । चिक्षियुः । लुलुवतुः । लुलुवुः । नियौ । नियः । लुवौ । लुवः । भ्रुवौ । भ्रुवः । अचीति किम् । आप्नुयात् । शक्नुयात् । राध्नुयात् । श्नुधातुभ्रुवामिति किम् । लक्ष्म्यै । वध्वै । य्वोरिति

Digitized by Google

किम् । चयतुः । चयुः । इयङुवङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन । चयनम् । चायकः । लवनम् । लावकः ॥ इयङुवङ्प्रकरणे तन्वादीनां छन्दसि बहुलमुपसंख्यानं कर्त्तव्यम् ॥ * ॥ तन्वं पुषेम । तनुवं पुषेम । विषुवं पुषेम । स्वर्गो लोकः । सुवर्गो लोकः । त्र्यम्बकं यजामहे । त्रियम्बकं यजामहे ॥

अभ्यासस्यासवर्णे ॥ ७८ ॥

अभ्यासस्येवर्णोवर्णान्तस्यासवर्णे ऽचि परत इयङ् उवङ् इत्येतावादेशौ भवतः । इयेष । उवोष । इयर्त्ति । असवर्णइति किम् । ईषतुः । ईषुः । ऊषतुः । ऊषुः । अचीत्येव । इयाय । उवाप ॥

स्त्रियाः ॥ ७९ ॥

स्त्री इत्येतस्याजादौ प्रत्यये परत इयङादेशो भवति । स्त्री । स्त्रियौ । स्त्रियः । स्त्रीणामित्यत्र परत्वान्नुडागमः । पृथग्योगकरणमुत्तरार्थम् ॥

वा ऽम्शसोः ॥ ८० ॥

अमि शसि परतः स्त्रिया वा इयङादेशो भवति । स्त्रीं पश्य । स्त्रियं पश्य । स्त्रीः पश्य । स्त्रियः पश्य ॥

इणो यण् ॥ ८१ ॥

इणोऽङ्गस्य यणादेशो भवति अचि परतः । यन्ति । यन्तु । आयन् । इयङादेशापवादोयम् । मध्येपवादाः पूर्वान्विधीन्बाधन्तइति गुणवृद्धिभ्यां परत्वाद् बाध्यते । अयनम् । आयकः ॥

एरनेकाचो ऽसंयोगपूर्वस्य ॥ ८२ ॥

धातोरिति वर्त्तते तेन संयोगो विशेष्यते । धातोरवयवः संयोगः पूर्वो यस्मादिवर्णात्र भवति असावसंयोगपूर्वस्तदन्तस्याङ्गस्यानेकाचो ऽचि परतो यणादेशो भवति । निन्यतुः । निन्युः । उन्न्यौ । उन्न्यः । ग्रामण्यौ । ग्रामण्यः । एरिति किम् । असंयोगपूर्वग्रहणमिवर्णविशेषणं यथा स्याद् अङ्गविशेषणं मा भूदिति । लुलुवतुः, लुलुवुः । इत्येतस्वोः सुधीति नियमा-

इपि सिध्यति । अनेकाच इति किम् । नियौ । नियः । असंयोगपूर्वस्येति किम् । यवक्रियौ । यवक्रियः । धातुना संयोगविशेषणं किम् । इहापि स्यात् । उन्न्यौ । उन्न्य इति ॥ गतिकारकाभ्यामन्यपूर्वस्य नेष्यते ॥ परमनियौ । परमनिय इति ॥

ओः सुपि ॥ ८३ ॥

धात्ववयवः संयोगः पूर्वो यस्मादुवर्णाच्च भवति तदन्तस्याङ्गस्यानेकाचोऽजादौ सुपि परतो यणादेशो भवति । खलप्वौ । खलप्वः । शतस्वौ । शतस्वः । सकृल्ल्वौ । सकृल्ल्वः । सुपीति किम् । लुलुवतुः । लुलुवुः । अनेकाच इत्येव । लुवौ । लुवः । असंयोगपूर्वस्येत्येव । कटप्रुवौ । कटप्रुवः । गतिकारकाभ्यामन्यपूर्वस्य नेष्यत इत्येव । परमलुवौ । परमलुवः ॥

वर्षाभ्वश्च ॥ ८४ ॥

वर्षाभू इत्येतस्याजादौ सुपि परतो यणादेशो भवति । वर्षाभ्वौ । वर्षाभ्वः ॥ पुनर्भ्वश्चेति वक्तव्यम् ॥ * ॥ पुनर्भ्वौ । पुनर्भ्वः ॥ कारापूर्वस्यापीष्यते ॥ काराभ्वौ । काराभ्वः ॥

न भूसुधियोः ॥ ८५ ॥

भू सुधी इत्येतयोर्यणादेशो न भवति । प्रतिभुवौ । प्रतिभुवः । सुधियौ । सुधियः ॥

छन्दस्युभयथा ॥ ८६ ॥

छन्दसि विषये भू सुधी इत्येतयोरुभयथा दृश्यते । वनेषु चित्रं विभ्वं विशे । विशे विभुवम् । सुध्यो हव्यमग्ने । सुधियो हव्यमग्ने ॥

हुश्नुवोः सार्वधातुके ॥ ८७ ॥

हु इत्येतस्याङ्गस्य श्नुप्रत्ययान्तस्यानेकाचोऽसंयोगपूर्वस्याजादौ सार्वधातुके परतो यणादेशो भवति । जुह्वति । जुह्वतु । अजुह्वुः । सुन्वन्ति । सुन्वन्तु । असुन्वन् । हुश्नुवोरिति किम् । योयुवति । रोरुवति । एवमेव हुश्नुग्रहणं ज्ञापकं भाषायामपि यङ्लुगस्तीति । छन्दसि छन्दस्यु-

अयमित्याद्युधातुरूपत्वादेव यणादेशस्याप्रसङ्गः । न च यङ्लुगन्तादन्यत् प्रत्युदाहरणमुवर्णान्तमनेकाजसंयोगपूर्वं सार्वधातुके विद्यते । सार्वधातुक इति किम् । जुहुवतुः । जुहुवुः । असंयोगपूर्वस्येत्येव । आप्नुवन्ति । राध्नुवन्ति ॥

भुवो वुग्लुङ्लिटोः ॥ ८८ ॥

भुवो वुगागमो भवति लुङि लिटि चाजादौ परतः । अभूवन् । अभूवम् । लिट् । बभूव । बभूवतुः । बभूवुः ॥

ऊदुपधाया गोहः ॥ ८९ ॥

गोहेः ऽङ्गस्य उपधाया ऊकारादेशो भवति अजादौ प्रत्यये परतः । निगूहति । निगूहकः । साधुनिगूही । निगूहम् । निगूहन्ति । गूहो वर्त्तते । उपधाया इति किम् । अन्त्यस्य मा भूत् । गोह इति विकृतग्रहणं विषयार्थम् * । यत्रास्यैतद्रूपं तत्रैव यथा स्यादिह मा भूत् । निजुगुहतुः । निजुगुहुः । अयादेशप्रतिषेधार्थं च के चिदिच्छन्ति । निगूह्य गत इत्यूत्वस्यासिद्धत्वाद् ल्यपि लघुपूर्वादित्ययादेशः स्यात् । व्याश्रयत्वादेवासिद्धत्वमत्र नास्ति । णावूत्वं ण्यन्तस्य च ल्यप्ययादेश इति । अचीत्येव । निगोढा । निगोढुम् ॥

दोषो णौ ॥ ९० ॥

दोष उपधाया ऊकार आदेशो भवति णौ परतः । दूषयति । दूषयतः । दूषयन्ति । विकृतग्रहणं प्रक्रमाभेदार्थम् । पूर्वत्र हि गोह इत्युक्तम् † । णाविति किम् । दोषो वर्त्तते ॥

वा चित्तविरागे ॥ ९१ ॥

चित्तविकारार्थे दोष उपधाया वा ऊकारादेशो भवति णौ परतः । चित्तं दूषयति । चित्तं दोषयति । प्रज्ञां दूषयति । प्रज्ञां दोषयति ॥

* विषयनियमार्थमिति क्व चित्पाठः ।

† णावूत्वस्यैव संभवादित्यधिकमेकस्मिन् पुस्तके ।

मितां ह्रस्वः ॥ ९२ ॥

मितो धातवो घटादयो मित इत्येवमादयो ये प्रतिपादितास्तेषामुपधाया ह्रस्वो भवति णौ परतः। घटयति। व्यथयति। जनयति। रजयति। शमयति। ज्ञपयति। केचिदत्र वेत्यनुवर्त्तयन्ति सा च व्यवस्थितविभाषा, तेन उत्क्रामयति संक्रामयतीत्येवमादि सिद्धं भवति ॥

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥ ९३ ॥

चिण्परे णमुल्परे च णौ परतो मितामङ्गानामुपधाया दीर्घो भवति अन्यतरस्याम्। अशमि। अशामि। अतमि। अतामि। शमंशमम्। शामंशामम्। तमंतमम्। तामंतामम्। दीर्घग्रहणं किं, न ह्रस्वविकल्प एव विधीयते। नैवं शक्यं, शमयन्तं प्रयुङ्क्त इति द्वितीये णिचि ह्रस्वविकल्पो न स्यात्। णिलोपस्य स्थानिवद्भावात्, दीर्घविधौ त्वजादेशो न स्थानिवत्। शमयन्तं प्रयुक्तवान्। अशमि। अशामि। शमंशमम्। शामंशामम्। शंशमयतेः, अशंशमि। अशंशामि। शंशमम्। शंशामम्। योसौ णौ णिर्लुप्यते यङ्कारश्च तयोर्दीर्घविधौ आदेशो न स्थानिवद्भवतीति अस्थानिवद्भावाद्दीर्घः सिद्धो भवति, ह्रस्वविकल्पे तु विधीयमाने स्थानिवद्भावः स्यात्। णिज्यन्ते यङ्यन्ते त्वसिद्धिरेव। व्याश्रयत्वादसिद्धत्वमपि नास्ति। णौ हि णियङोर्लोपः चिण्णमुल्परे णावङ्गस्य दीर्घत्वम् ॥

खचि ह्रस्वः ॥ ९४ ॥

खच्परे णौ परतो ह्रस्वो भवत्यङ्गस्योपधायाः। द्विषंतपः। परंतपः। पुरंदरः ॥

ह्लादो निष्ठायाम् ॥ ९५ ॥

ह्लादोऽङ्गस्योपधाया ह्रस्वो भवति निष्ठायां परतः। प्रह्लन्नः। प्रह्लन्नवान्। निष्ठायामिति किम्। प्रह्लादयति। ह्लाद इति योगविभागः क्रियते। क्तिन्यपि यथा स्यात्। प्रह्लत्तिरिति * ॥

* ह्लाद इति योगविभाग—इत्यारभ्य प्रह्लत्तिरित्यन्तः पाठो बहुषु पुस्तकेषु नास्ति।

Digitized by Google

छादेर्घेऽद्व्युपसर्गस्य ॥ ९६ ॥

छादेरद्व्युपसर्गस्य घप्रत्यये परत उपधाया ह्रस्वो भवति । उरश्छदः । प्रच्छदः । दन्तच्छदः । णिलोपस्यासिद्धत्वं स्थानिवद्भावो वा वचनसमर्थ्यादत्र न भवतीति ह्रस्वभाविन्युपधा भवति । अद्व्युपसर्गस्येति किम् । समुपच्छादः ॥ अद्विप्रभृत्युपसर्गस्येति वक्तव्यम् ॥ * ॥ समुपातिच्छादः । उत्तरा हि संख्या पूर्वसंख्याकृतं व्यपदेशं निवर्त्तयति । नहि त्रिपुत्रो द्विपुत्र इति व्यपदिश्यते ॥

इस्मन्त्रन्क्विषु च ॥ ९७ ॥

इस् मन् त्रन् क्वि इत्येतेषु परतश्छादेरुपधाया ह्रस्वो भवति । छदिः । छद्म । छत्रम् । धामच्छत् । उपच्छत् ॥

गमहनजनखनघसां लोपः क्ङित्यनङि ॥ ९८ ॥

गम हन जन खन घस इत्येतेषामङ्गानामुपधाया लोपो भवत्यजादौ प्रत्यये क्ङित्यनङि परतः । जग्मतुः । जग्मुः । जघ्नतुः । जघ्नुः । जज्ञे । जज्ञाते । जज्ञिरे । चख्नतुः । चख्नुः । जक्षतुः । जक्षुः । अक्षन्नमीमदन्त पितरः । क्ङितीति किम् । गमनम् । हननम् । अनङीति किम् । अगमत् । अघसत् । अचीत्येव । गम्यते । हन्यते ॥

तनिपत्योश्छन्दसि ॥ ९९ ॥

तनि पति इत्येतयोश्छन्दसि विषये उपधाया लोपो भवति अजादौ क्ङिति प्रत्यये परतः । वितत्निरे कवयः । शकुना इव पप्तिम । छन्दसीति किम् । वितेनिरे पेतिम ॥

घसिभसोर्हलि च ॥ १०० ॥

घसि भस इत्येतयोश्छन्दसि उपधाया लोपो भवति हलादावजादौ च क्ङिति प्रत्यये परतः । सग्धिश्च मे सपीतिश्च मे । बब्धां ते हरी धानाः । सग्धिरित्यत्र क्तिनि बहुलं छन्दसीति घस्लादेशे उपधाया लोपे च कृते झलो झलीति सकारलोपः । धत्वन्तकारस्य जश्त्वं घका-

रस्य । ततः समाना पि ः सध्विरिति समासे कृते समानस्य सभावः । बब्धामिति भसेर्लोटि तामि कृते द्विर्वचने कृते उपधालोपसलोपघत्वज-श्त्वानि कर्तव्यानि । द्विर्वचनात् परत्वान्नित्यत्वाच्च उपधालोपः प्राप्नोति कान्तसत्वात् स तथा न क्रियते । घसादौ । बप्सति । कृन्तीत्येव । संभूत् बभस्ति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ चतुर्दशस्तबकारम्भः ॥

अथ विभातायां विभावर्यां विभावर्यां सहचरमण्डलीमादाया-नुगवीनो नवीनो नट इव ललिताकल्पः कल्पद्रुम इवानुगतसंक-ल्पकल्पकः पूर्वपूर्वे दनवद्गनविनोदाय नोदाय खगमृगतरुवीरुधां विरहदुःखस्य च यदि स्म व्रजति व्रजतिलकनन्दनः ॥ १ ॥

चतुर्दशे वटुभंगे सार्वज्ञ्यं जगतीव्रजे ।
व्रजेन्द्रसूनुः कान्ताभिस्तेने तेन मधूत्सवम् ॥
ग्रीष्मवर्षाशरत्पूर्वहेमन्ता वर्णिताः क्रमात् ।
तत्तल्लीलाश्च शिशिरो नार्मसिद्धेरिह स्तुतः ॥
वृन्दावने सदा सत्त्वात् प्राधान्यात् केलिवर्धनात् ।
मधुस्तूत्कर्षयामासे तन्महानल्पवर्णनैः ॥

ललिताकल्पः समीचीनवेषः । खगादीनां विरहदुःखस्य नोदाय दूरीकरणाय ॥ १ ॥

तदा तदाप्ततमसहचरः स तावदेव भूदेवभूरतिपीनाव टुर्वटुः कुसुमासवो नाम यदृच्छयाच्छया मनोवृत्त्या सकलसौभाग्यलक्ष्मीसंपु-टभेदनं पुटभेदनं तद्गोकुलाख्यं भ्रमन्नेक एव देवतो वतोत्तमस्थविरा-भिराभिराभीरीभिरीक्षितः सादरमाहूतश्च कुतुकादुपससाद ॥ २ ॥

भूदेवभूर्विप्रतनयः । अतिपीनावटुः पुष्टग्रीवः । सकलानां सर्वेषा-मेव सौभाग्यलक्ष्म्याः संपुटं भिनत्ति स्वसौभाग्यश्रिया चूर्णयतीति तत्, यद्वा सकलमेव सौभाग्यलक्ष्म्याः संपुटं भिनत्ति उद्घाट्य प्रदर्शयतीति तत्, पुट-भेदनं पत्तनम् । वत हर्षे । उत्तमस्थविराभिः श्रीकृष्णप्रेयसीनां श्व-श्रूभिः ॥ २ ॥

आसन्नः सन्नतिसन्नतिपरं ताभिरथ निजगदे ॥ ३ ॥

निजगदे· उक्तः ॥ ३ ॥

जगदेकललितमेधमेधमानप्रतिभ प्रतिभयरहितं भवन्तं जानी-मः कृष्णस्य प्रियनर्मसहचरम् ॥ ४ ॥

जगति मध्ये· एका मुख्या ललिता रम्या मेधा धारणावती बुद्धि-र्यस्य तथाभूतम् । अत एव· एधमाना वर्धमाना प्रतिभा यस्य हे तथाभू-त । ततश्च प्रतिभयरहितं निःसाध्वसम् ॥ ४ ॥

तदेवं पृच्छामो भवता किमधीतं धीतंसद्रूपम् ॥ ५ ॥

धियो बुद्धेस्तंसद्रूपं भूषणाभूतं, "तसि· अलङ्कारे" ॥ ५ ॥

आह स हसन्नेव, भो भो मया महाज्योतिषा ज्योतिषागमा-वेवाधीतौ धीतौवरकृता! किमन्येन शास्त्रेण ॥ ६ ॥

महाज्योतिषा· अतितेजस्विना । ज्योतिषं च· आगमश्च तौ, "ज्योतिषं ज्योतिषं चापी"ति द्विरूपकोषात् । धियो बुद्धेस्तौवरकृता वैरस्यकारिणा, "तूवरस्तु कषायोऽस्त्री"त्यमरः, तूवरस्य भावस्तौवरम् ॥ ६ ॥

ता निजगदुर्जगदुत्तम को नयोऽनयोः प्रतिपाद्यभूतः प्रभूतः प्रथयस्व तमस्मभ्यम् ॥ ७ ॥

अनयोः शास्त्रयोः को नयः का नीतिः ॥ ७ ॥

स उवाच वाचमतिसरसां हंहो व्रजपुरपुरन्ध्रीप्रधानाः प्रधाना हि ज्योतिःप्रभावाः प्रभावाहिनः ॥ ८ ॥

तत्रापि ज्योतिषो ज्योतिःशास्त्रस्य प्रभावाः प्रधाना मुख्याः । यद्यपि प्रधानशब्दस्य "क्लीबे प्रधान"मित्यमरवृष्ट्या· आविष्टलिङ्गत्वं तथापि तट्टीकायां बोपालितदृष्ट्या पुंस्त्वस्यापि प्रतिपादनात्· "ज्वरः प्रधानो रोगाणां" "प्रधाना हरितो मुद्गा" इति वैद्यकदर्शनात् "त्वं सर्वेषां मम गुणनिधे बान्धवानां प्रधान" इत्युद्भवसंदेशदर्शनाच्च वाच्यलिङ्गत्वमपि साधितम् । प्रभा कान्तिस्तद्वाहिनस्तद्युक्ता इत्यर्थः ॥ ८ ॥

तथाहि,

इह भूमध्ये भूमध्येयं भद्राभद्रभूतं भूतं शुभाशुभवत् भवत् कुशलाकुशलभावि भावि सर्वं ज्योतिःपाठेन ज्ञायते ॥ ९ ॥

इह भूमध्ये, जगतीत्यर्थः । भूम्ना बाहुल्येन ध्येयं भावनार्हं भद्राभद्ररूपं वस्तु । भूतम्· अतीतम् । एवं भवत्· वर्तमानम् । कुशलाकुशले भवितुं शीलमस्य तत् । भावि भविष्यत् ॥ ९ ॥

आगमगमकं तु देवताराधनतः कर्तुमकर्तुमन्यथा कर्तुं च क्षमकत्वमिति ॥ १० ॥

आगमगमकम्· आगमलक्षणम् ॥ १० ॥

ता अचिरेऽचिरेण भो निर्मलच्छन्नं ते यामो यामोऽयं समीचीन एव तदच किंचित् पृच्छामोऽच्छामोदकानि मोदकानि ते दातव्यानि ॥ ११ ॥

यामः प्रहरः । तत् तस्मात् । अच्छानि निर्मलानि च तानि· आमोदकानि सुखदानि चेति तानि ॥ ११ ॥

तदस्माकमनुयोगो यो गोकुले प्रष्टव्यो न भवति स शुभवति भवति प्रकाश्यते ॥ १२ ॥

तत् तस्मात् अनुयोगः प्रश्नः, "प्रश्नोऽनुयोगः पृच्छा चे"त्यमरः, प्रष्टव्यः प्रष्टुं शक्यो न भवति, स्वहृच्छिद्रप्रकाशशङ्कयेति भावः ॥ १२ ॥

तस्योत्तरं दीयतां दीयतां च नो मनःसंदेहो देहो विद्या वा द्यावापृथिव्योः केन हि न हिताय परेषां क्रियते ॥ १३ ॥

हीयतां सम्भाव्यताम् । द्यावापृथिव्योः स्वर्गमर्त्यलोकयोर्मध्ये केन वा अनेन परेषां हितार्थं देहो विक्रया वा न क्रियते, अपितु क्रियत एव ॥ १३ ॥

सहासं स जगाद गा दत्स्व चेद्भद्रतरास्तदास्तदारुणभावोऽरुणभावोध: खल्वहं सकलमेव वक्तुमीशेऽमी शेरते हि मयि सर्वज्ञतादय: सर्वे एव प्रभावा त्रिप्रभावादविरुद्धाः ॥ १४ ॥

भद्रतराः गाः बहुदुग्धवतीर्धेनूः । अस्तदारुणभावः त्यक्तक्रोधः । अरुणस्य सूर्यस्य भाः ज्योतींषि ताभिरेव बुध्यते लग्नक्रमेण भद्राभद्रं जानातीति सः । तथा वक्तुमीशे शक्नोमि । कुतः, अमी सर्वज्ञतादयः प्रभावा मयि हि निश्चितमेव शेरते, गुप्ता वर्तन्त इत्यर्थः ॥ १४ ॥

रेणुस्ता रेणुस्तावदिदं गवादि वसु वसुधायां किमदेयं ते यदि नः समीहितं वक्तुमर्हसि ॥ १५ ॥

ता आभीर्यः रेणुर्जगुः, रभसादुच्चैरूचुरित्यर्थः, "रण ध्वन शब्दे" । इदं गवादिकं वसु धनं रेणुस्तावत्, रजःसदृशमित्यर्थः, दातुं पुनः किमशक्यमिति भावः ॥ १५ ॥

स पुनराह न रा हरणीयो मे किंतु प्रतिष्ठाप्रतिष्ठापनमेव ममोद्दिष्टं तत् पृच्छ्यतां भोः पृच्छ्यताम् ॥ १६ ॥

रा इति धनं न हरणीयः न मम ग्राह्यः, किंतु प्रतिष्ठायाः ख्यातेरेव प्रतिष्ठापनं, लोकैर्गवादिदानं तु तस्या ज्ञापकमेव । अत एव प्रथममहं गाः प्रार्थितवानस्मीति भावः ॥ १६ ॥

निजगदुस्ता निजगदुस्तापजननं किमपि अस्माकं स्मारकटकव्रजपुरवसतीनां सतीनां न किमपि कण्टकतुल्यं किंत्वेक एव मानसामयो न सामयोग्यः ॥ १७ ॥

निजगं निजगतं दुष्टतापजननम् । मानसामयो मनस्तापः, न सामयोग्यः न सान्त्वनार्हः ॥ १७ ॥

यत् खलु नो वधूराजी राजीविनीसमापि मापि कतमा नः सुखाय बभूव ॥ १८ ॥

मापि कतमा कतमापि न ॥ १८ ॥

यतोऽमूर्विवाहदिनावधि वधिरा इव भर्तृनामश्रवणेऽपि, अपि तदीयबन्धावन्धा एव, किं पुनस्तेषामवलोके, लोके क्व दृष्टमीदृशं पतिवैरस्यम् ॥ १६ ॥

तदीयबन्धौ श्वदेवरादौ अपि अन्धा एव ॥ १९ ॥

यदुद्वाप्यासां पतिष्वभिमानोऽपि नो जातो नो जातोत्कट-मेवमेव दुःखम् ॥ २० ॥

नोऽस्माकं दुःखम् एवमेव । कीदृशं, जातं च तत् उत्कटं चेति, तद् यदैव जातं तदैव वर्धितमित्यर्थः ॥ २० ॥

तदस्य कः प्रतीकार इति विचारय चारय निजं यशो दिक्षु विदिक्षु विशेषेणेति ॥ २१ ॥

चारय प्रचरितं कुरु ॥ २१ ॥

एतदधिगत्य कृत्रिममौनी ममौ नीरतया मनसि तन्निदानमिव कुसुमासवः ॥ २२ ॥

कृत्रिमं मौनं यस्यास्तीति सः, नीरतया नितराम् इरा सरस्वती यस्य तत्तया, तन्निदानं ममौ अमितवान् । इवेति सर्वत्र ता एव तथा प्रत्यापयति, वस्तुतस्तु सर्वं कृत्रिममेवेति सूचयति ॥ २२ ॥

चिरं विचार्याचार्याकारं चाभिनीय सविषादमिव दमिवदतिनि-गृहीतमना मनाक् शुष्कं विहस्य पुनरुवाच वाचस्पतिमेधावी धावी कुतुकमये वर्त्मनि ॥ २३ ॥

दमिवद् दान्त इव अतिनिगृहीतमनाः स्थिरचित्तः ॥ २३ ॥

अयि शुभंयुवरा युवराजकृष्णस्य गोचरोऽयमुदन्तो मुदन्तोचितो मे भविष्यति ॥ २४ ॥

शुभंयुषु शुभवतीषु वराः श्रेष्ठा युवराजस्य कृष्णस्य मन्त्रियसखस्य गोचरः सन्नयम्· उदन्तो वृतान्तो मे मम मुदामानन्दानाम्· अन्ते नाशे· उचितो योग्यो भविष्यति, या एव मां मिथ्यापरिवादेन दूषयन्ति तास्वेव वृद्धाभीरेषु मन्त्रियसखो भूत्वापि सर्वज्ञतया सर्वं भद्राभद्रमुक्त्वा हितमुपदिशतीति मयि कृष्णो दुर्मनायिष्यते· इति ॥ २४ ॥

तेनायं संगोप्यो गोप्योऽवश्यमेव ॥ २५ ॥

तेन हेतुना· अयम्· उदन्तो वृतान्तः संगोप्यः संगोपयितुमर्हः. हे गोप्यः ॥ २५ ॥

वक्ष्यामि सिद्धफलमेकं फलमेकं समानयत. इति तथानीतं फलमादाय वर्णं विभाव्य विभाव्ययसुदुर्दर्शः पुनर्निजगाद ॥ २६ ॥

सिद्धं फलं पतिवैमुख्यरूपं यस्मात् तत् कारणं वक्ष्यामि । कीदृशम्, एकं मुख्यम् । विभायाः कान्तेरव्ययेन व्ययाभावेन हेतुना सुदुर्दर्शः ॥ २६ ॥

भोभो आर्या लौकिकालौकिकान्येवात्र दूषणानि दृश्यन्ते, लौकिकानि कानि च लग्नालग्नानि यैः किल पतिविपक्षताक्षता क्रियते, अलौकिकानि तावदवधारयत रयत एव ॥ २७ ॥

लौकिकानि स्वभाववैरूप्येण सौरूप्यकौरूप्याभ्यां च· परोक्षकत्वानि, लौकिकानि लोकप्रसिद्धानि तानि लग्नेषु ज्योतिःशास्त्रोक्तेषु न लग्नानि प्रत्यक्षनिदानकत्वात्, किं तद्गणनयेति भावः । रयतो वेगतः ॥ २७ ॥

काचिदत्र प्रतियोगिनी योगिनी योगिनीराजितपदारविन्दा रविन्दार*यितुमपि समर्था योगमाया विवाहं कारयित्वा कौतुकवती कौतु कवतीतरेषु तदभिज्ञतो विवाहमिति पुनरासां नराणाम्प्रतं पतिविद्वेषं च जनयामास ॥ २८ ॥

* परसवर्णः प्राग्वत् ।

प्रतियोगिनी युष्मत्प्रतिकूला योगिनी । नन्वेवं चेत् सा मान्विभी- श्चत्यैः सहेलमेव विनाश्या तत्राह, योगिनीराजितेति । भवतु तथापि भवता॰ अतितेजस्विना॰ असौ पराभाव्या॰ इति तत्राह, रविमपि वारयितुं समर्था, योगेन॰ उपायेन माया यस्याः सा । कौ तु पृथिव्यां तु तदभि- जनस्तन्मायाभिजाटितरेषु॰ अज्ञजनेषु विवाहं कथति कीर्तयति । पुनरिति हेतोरेव॰ आसां॰ नरेषु॰ असाम्प्रतम्॰ अयोग्यम् ॥ २८ ॥

स्वभावतः पुनरिमा न मानव्यः. तेनाशु तस्या महतीह तीव्रतरा प्रीतिरत एव मानवामानवानां संगतिरसाम्प्रतं साम्प्रतं त्विति स्वयमेव मतिभेदं कारयित्वा रयित्वाच्च तस्य स्पर्शादिकं च न कार- यति रयतिग्मा सा खलु योगिनी ॥ २६ ॥

तस्या योगिन्याः॰ असाम्प्रतमयोग्यम् । तस्य मतिभेदस्य रयित्वात् तेजस्वित्वात् स्पर्शादिकमपि पतीनाम् । रयेण वेगेन तिग्मा तीक्ष्णा, दुर्वारेत्यर्थः ॥ २९ ॥

तदाशु भवतीभिर्वधूतावधूता क्रियताम् ॥ ३० ॥

वधूता वधूभावः । अवधूता खण्डिता ॥ ३० ॥

किंतु निकाममता ममता तु कर्तव्या तया तु वः क्षेमं विधा- स्यते ॥ ३१ ॥

नाप्यलं, तर्ह्येताभिरित्युदासितव्यमित्याह किंत्विति । तया तु योगिन्या तु क्षेमं पुत्रारोग्यधनादिकम् । अन्यथा तु विनाशयिष्यत इति भावः ॥ ३१ ॥

अपिच, यदि वः पुत्राशाशाशाविसारिणी भवितुमर्हति तदासां स्पर्शोऽपि यथा न भवति तथा कार्यं नहि कृष्णभुजगा बलावला- कृष्टाः सुखं जनयन्ति ॥ ३२ ॥

यदि वो युष्माकं पुत्राणामाशा धनादिवाञ्छा, अत्र गोकुलनगरे॰ आशाविसारिणी सर्वदिग्व्यापिनी, अतिसमृद्धिमतीति यावत्, अन्यथा त्वाशा न फलिष्यतीति भावः ॥ ३२ ॥

अस्ति भाग्यं वः सुतानां यदासां तेभ्यः स्पर्शोऽपि जातः ॥ ३३ ॥

तेभ्यो युष्मत्सुतेभ्यः स्पर्शोऽपि, संप्रदानमपि, "विश्राणनं वितरणं स्पर्शनं प्रतिपादन"मित्यमरः, आसां दानात्मकस्पर्श एव स्वेषु भाग्यव्यञ्जकः। संयोगात्मकस्पर्शस्तु कृष्णभुजंगस्त्रीणां साक्षान्मारक एवेति भावः। अत एव भीत्या श्रीराधादिप्रतिच्छायास्पर्शोऽपि रासादिरात्रिषु तत्पतिभिर्न क्रियते स्मेत्यवसेयम् ॥ ३३ ॥

अथ ताः सविषादवैकल्यं वै कल्यं पुनरूचुः। अयि मूर्तप्रमाण माणवक भवतः कथा मानवकथा नेयं किंतु सर्वज्ञतेवेयं ते ॥ ३४ ॥

वै निश्चितं कल्यं निरामयं यथा स्यात् तथोचुः ॥ ३४ ॥

त्वया परमज्योतिषा ज्योतिषाध्ययनप्रभावो दर्शितः, आगमाध्ययनस्य च महीमहीयान् प्रभावो दर्श्यतां, कस्या देवताया बतायासकृतेनाराधनेन धनेन योगिनीकृतविलसितं विलसितं भवति, तदप्युपदिश्यतां दिश्यतां च तदाराधनविधिरिति ॥ ३५ ॥

महीमहीयान् मह्यां भूतले महत्तमः। बत खेदे। आयामो यत्नस्तेन कृतेन। विलसितं चेष्टितम्। विले गर्ते सितं बद्धं भवति, विलुप्तं भवतीत्यर्थः ॥ ३५ ॥

स उवाच।

अस्त्युपायो निरपायो निरवकरः कोऽपि कोपिन्यास्तस्याः कोपशमनाय दैवतान्तरोपासनासनाथः। ता अथ सप्रमोदं प्रमोदन्तमिव तं व्याहारं हारं मत्वा निजगदुर्निजगदुःखहानिकृते कृतेनाभिलाषेण ॥ ३६ ॥

प्रमोदन्तमिव प्रहृष्टा मा संपत्तिस्तस्या उदन्तं प्राप्ते वृत्तान्तमिव ॥ ३६ ॥

ब्रह्मचटोऽवटोनमोऽसि गुणरत्नानां यथार्थभावेन त्वां पृच्छामः, कासौ देवता वनास्या वा किं नाम नाम कीदृशी वा तदुपासना सनानाभावं कथयितुमर्हसि, स सहर्षमवदत्, अवधत्त भो महाभागा महाभागाः ॥ ३७ ॥

अवटोनमोऽसि अवटगर्तोऽसि, "गर्तावटौ भुवि श्वभ्रे" इत्यमरः । सनानाभावं नानाभिप्रायसहितं यथा स्यात् तथा कथयितुम् । महान् भागो भाग्यं यासां ताः । अत एव महतीम् आभां गच्छन्तीति ताः । यद्वा महत्या आभया गायन्ति गानवद्गच्छन्तीति महाभागाः, सामपाशब्दवत्, स इत्यस्य विशेषणम् ॥ ३७ ॥

अस्ति किल कश्चनातिकालः कालकुमारो नाम मारो नाम मूर्तिमानिह वृन्दावने कुञ्जदेवता देवतावृन्दमहनीया योगिनी च नीचसादृश्यं यतो भजते सोपासिता सितापाङ्गीनां कामं निकामं निर्वाहयति ॥ ३८ ॥

अतिकालः अतिश्यामलः कालातीतश्च । कालस्य कुमारः, पक्षे कालः श्यामलश्चासौ कुमारो युवराजश्चेति स तथा । नाम प्राकाश्ये । कामम् अभीष्टं कन्दर्पं च । निकामं यथेष्टम् ॥ ३८ ॥

सा चेत् प्रसीदति सीदति न तदा जनः कोऽपि कोपितां वा यद्येति तदा न सपिनाकोऽपि कोऽपि रक्षितुमीष्टे ॥ ३९ ॥

यदि वा कोपितां क्रुद्धत्वम् एति प्राप्नोति, यदि कस्मैचित् कुप्यतीत्यर्थः । सपिनाकोऽपि पिनाकसहितो रुद्रोऽपि ॥ ३९ ॥

तथाहि ।

कुञ्जो कुञ्जे विहरति न केनापि संलक्ष्यतेऽसौ
ध्यानादाविर्भवति भजतामेकभावव्रतानाम् ।
पूजा त्वस्याः समयनियमापेक्षिणी दुष्करैका
पुण्यात्मानः परमकृतिनः केवलं कुर्वते ताम् ॥ ४० ॥

समयेषु वक्ष्यमाणेषु नियमानेव वक्ष्यमाणान्· अपेक्षितुं शीलं यस्याः सा । एका मुख्या ॥ ४० ॥

दुष्करत्वं चावधत्त ।

परार्ध्यमणिभूषणोत्तमविलेपचेलान्वितैः
स्वयं कुसुमसंचयावचयनाय गम्याटवी ।
तदेकहृदयैरनाकलितलोकलज्जैर्वृथा
वचोरचनवर्जितैर्नियतमेव भाव्यं जनैः ॥ ४१ ॥

अटवी स्वयमेव गम्या गन्तव्या, नात्र प्रतिनिधिकल्पनं युक्तमिति भावः । तत्र नियमानाह तदेकेति ॥ ४१ ॥

एवं च वञ्चनविमुखतयाभिमुखतयाभिलाषपुरःसरं सुसंपादिते पूजोपचारे साचारे साधीयसि ॥ ४२ ॥

वञ्चनविमुखतया वित्तशाठ्यराहित्येन, अभिमुखतया तत्सांमुख्येन ॥ ४२ ॥

कुञ्जे कुञ्जे तमथ मुदिताः पुष्पधूपप्रदीपै-
र्नैवेद्यैश्च प्रियसुरभिभिः पूजयेयुस्त्रसंध्यम् ।
पूजोपान्ते नवकिशलयप्रस्तरप्रस्तदेहा
बन्धुव्रातैरपि सह निशां जागरेण क्षिपेयुः ॥ ४३ ॥

तं कालकुमारम् । प्रस्तरं शय्या ॥ ४३ ॥

एवं प्रातः प्रातर्मध्याह्नपूजे धर्मम् ॥ ४४ ॥

धर्मे प्रातः पूरयतः, "प्रा पूर्तौ" प्रथमपुरुषद्विवचनान्तः ॥ ४४ ॥

साधयति सर्वजनं सिद्धव्यवसायं सायंपूजा निखिलाभिलाषवरदा वरदापूजा चेति ॥ ४५ ॥

सायंपूजा कर्त्री साधयति करोति । वरदा· उत्सवदायिनी, वरदापूजा रात्रिपूजा ॥ ४५ ॥

वर्णितोऽयं त्रिकालपूजामहिमानुमहि मानुषे लोके लोके नातः परं व्रतम् ॥ ४६ ॥

त्रिकालेति, प्रातर्मध्याह्नयोरपि धर्मपूरकत्वेन फलसाम्यद्वैक्यमभिप्रेत्योक्तं, ततश्च प्रातरशक्तौ मध्याह्ने पूजा अवश्यमेव कार्येति भावः, फलानामुत्तरोत्तरप्राधान्यात् । सर्वाशक्तौ रात्रिपूजा त्वावश्यक्येवेत्यपि द्योतितम् । मानुषे लोके अतः परं व्रतं न लोके न पश्यामि, "लोकृ दर्शने" उत्तमपुरुषैकवचनान्तः । कीदृशम्, अनुमहि अनुगता भवति मही यस्मात् तत्, महीपदेन तत्रस्थाः सर्वजना लक्षिताः ॥ ४६ ॥

अस्याश्च देवतायाः सर्वातिरेका मन्त्राः कामन्त्राणकारिणो बहव एव सन्ति तेषु प्रधानतमोऽष्टादशाक्षरोऽक्षरोपमः कोऽप्यस्ति यदि वो भो बोभोति श्रद्धाविशेषस्तदा तमपि वर्णयिष्यामः ॥ ४७ ॥

कामं यथेष्टम् । अक्षरोपमः ब्रह्मोपमः । वो युष्माकम् । भो इति संबोधने । बोभोति अतिशयेन भवति ॥ ४७ ॥

ताभिरभिव्याहारि हारि वचः, हे बालाचार्य विना मन्त्रेण कथमुपासना सनाथा भवतु ॥ ४८ ॥

अभिव्याहारि स्पष्टमुक्तम् ॥ ४८ ॥

तत्रभवता भवता सोऽस्मभ्यमुपदिश्यतां दिश्यतां प्रयातु ते यशः ॥ ४९ ॥

स मन्त्रः दिश्यतां प्रयातु सर्वदिग्वर्तित्वं प्राप्नोतु, दिक्षु भवं विद्यमानं दिश्यं तस्य भावो दिश्यता ताम् ॥ ४९ ॥

अस्माभिरुपदेष्टव्य एष्टव्य एष वधूभ्य इति ॥ ५० ॥

एष मन्त्रः कथंभूतः सन्, एष्टव्यः इच्छाविषयीकरिष्यमाणः सन्, अर्थात् ताभिर्वधूभिरेव ॥ ५० ॥

• परसवर्णः प्राग्वत्

वाढं, तत् साम्प्रतं साम्प्रतं प्रीयतां सैव भगवती काचन देवतेति मङ्गलमङ्गलम्नं कृत्वा स च सचमत्कारमुपदिदेश देशकालोचितं तमेव मन्त्रराजम् ॥ ५१ ॥

वाढमित्यभ्युपगमे । तत् तस्मात् साम्प्रतं युक्तमेव, साम्प्रतमिदानीम् । मङ्गलं स्वस्तिवाचनादिकम्· अङ्गलग्नम्· अङ्गसमेतं कृत्वा, साङ्गमेव मङ्गलमाचर्येत्यर्थः । स च कुसुमासवः ॥ ५१ ॥

यथा, अचिन्त्यमहसे कुब्जदेवतायै रसात्मने स्वाहा, इत्युपदिश्य पुनराह, यत्रमस्याः सरहस्यं रहस्यङ्गुप्ता कथितमुपासनाकाण्डं प्रकाण्डं प्रथममनेनसानेन साधु समाराधितया तया देवतया प्रतिकूला कूलाप्लाविनी सरिदिव सा त्वरया त्वरया भविष्यति योगिनीति प्रकटतमागमद्वयाभ्यासमर्यादार्या दाक्षिण्यं च ॥ ५२ ॥

रहसि विविक्ते स्थाने·अनेन·उपासनाकाण्डेन साधु यथा स्यात् तथा समाराधितया तया कुब्जचर्या देवतया हेतुना सा योगिनी तु· त्वरया वेगरहिता भविष्यति त्वरया शैघ्र्येणैव, का·इव, कूलाप्लाविनी स· रिदिव, कात्स्न्र्येन निःसारयितुं तु सा दुःशकैवेति भावः । वेगराहित्ये च नद्या इव स्थितयापि तया न किंचिदसामञ्जस्यमिति तद्द्वयमपि निः· शेषेण न निवर्ति·मिति सर्वकालमेव तासां स्वस्वबधूजनवनप्रस्थापनार्थं गूढचातुर्यमस्य । नदीदृष्टान्तेन च मदुक्तेतत्प्रतीकाराकरणे तु प्रतिदिनमेव वर्धमानवेगा सा युष्मत्कुलमेव सर्वमुन्मूलयिष्यतीति भयमुत्पाद्य तादृशपूजनायामपि ताः शीघ्रं प्रवर्तिताः । आगमद्वयस्य गणनाशास्त्रस्य च उपासनाशास्त्रस्य च· अभ्यासमर्यादा प्रकटिता, हे· आर्या दाक्षिण्यं च युष्मासु स्वानुकूल्यं च प्रकटितमिति । अथैतत्प्रकरणस्येदं तत्त्वम् । यद्यपि श्रीराधादीनां वनाभिसरणादौ तत्तत्प्रतिच्छायानिर्माणेन तत्पतिश्वश्रवादिसमाधानं योगमाययैव सुशकमेवास्ति, तथापि तासां स्वगुरुजनसमाधानाभावभावनायां सत्यां कुब्जादिविहारस्वाच्छन्द्यं न संभवेत् । नच तयैव तासां तदानीं सा भावना नोत्पादयितव्येति वाच्यं, तासां

स्वेषु परकीयात्वदृष्टौ वर्तमानायां तद्भावनानुदयासंभवात् । न च तथा दृष्टिरपि तदानीं तथैव लोप्येति वाच्यं, तस्या उज्ज्वलनीलमणावुक्तयुक्त्या रसोद्रेकावहत्वेन लोपानर्हात् । ततश्च कदाचिन्मधुपानोद्रेकादिहेतुभी रात्रिंदिवमेव विलासवृद्ध्या गोष्ठगमने विस्मारिते सति कदाचिच्च मुरलीनादोन्मादितानां तासां वनगमने कृष्णाङ्गसङ्गहेतुकाभिसारत्वेन गुरुभिर्वितर्क्यते सति च योगमायायास्तत्तत्प्रतिच्छायाभिस्तत्समाधानमावश्यकमेव, उपायान्तरासंभवादिति ॥ ५२ ॥

इति निगद्यानवद्या नवसुधायमाना गिरो झटिति निष्क्रान्ते कुतुकपटौ कपटोज्ज्वल्यकृति वटौ ताः किल तस्य वाचो वाचोयुक्तिपटुताजुषो जुषोपपन्नाः कृत्वा समुपगृह्य गृह्यकृत्यविमुखाः वणमवस्थाय भवनमध्यमध्यवस्थाय च स्वस्ववधूः स्ववधूतमात्सर्यमाहूय हूयमानदहनशिखा इव ज्वलन्तीरथ समुपदिशन्ति स्म ॥ ५३ ॥

जुषा प्रीत्या· उपपन्ना उपयुक्ताः कृत्वा । गृह्यकृत्यं गृहसंबन्धि कर्म । सुष्ठु· अवधूतं खण्डितं मात्सर्यं यत्र तद्यथा स्यात् तथा· आहूय । हूयमानस्य पात्यमानघृतधारस्य दहनस्य । ततश्च तस्य दक्षिणात्वेन बहुगोहिरण्याम्बरभक्ष्यादीनि ताः प्रेषयामासुरिति ज्ञेयम् ॥ ५३ ॥

अयि जन्यो जन्योत्तमा भवत्यो गुणशीलौदार्यद्वार्यमाणसुरसुरमणीगर्वतया धन्या एव ॥ ५४ ॥

अयि जन्यः· हे वध्वः, "समाः स्नुषाजनीवध्व" इत्यमरः, जन्या जन्मना· उत्तमा एव यूयम्, सदभिजाता इत्यर्थः । इति स्वनियोगग्रहणे श्रद्धामुत्पादयन्ति ॥ ५४ ॥

किंतु दूषणमपीदं महीयो महीयोगे यन्न दृश्यते कुत्रापि यत् खलु भर्तृवैमुख्यं मुख्यं नारीणां नारीणां चेतद्भवतु कदापि ॥ ५५ ॥

दूषणमपीदं दृश्यते,किं तत्, यत्· नारीणां भर्तृवैमुख्यं तन्मुख्यमेव दूषणं, न स्वल्पमित्यर्थः । एतत्· न· अरीणां न शत्रूणामप्यस्तु,तेष्वपी-दृशदोषाशंसा न युक्ता कर्तुमिति भावः ॥ ५५ ॥

Digitized by Google

तदेतद्दूषणोपशमनायासन्नशमनायासन्न * कथमुपायं चिन्तयथ ॥ ५६ ॥

तत् तस्मात्· एतद्दूषणोपशमनाय· उपायं कथं न चिन्तयथ । कीदृशम्, आसन्नमेव शं सुखं यतस्तम् । अनायासमायासरहितम् ॥ ५६ ॥

श्रूयताम् ।

सौभाग्यप्रतिबन्धरन्धनकृते भर्तुर्मुदे भर्तरि
श्रद्धाप्रीतिविवृद्धये गुरुजनस्यानन्दसंपत्तये ।
श्रीवृन्दावनमध्यमध्यनुपमा कुञ्जेचरी देवता
काप्यास्तेऽखिलकामदा मुहुरियं युष्माभिराराध्यताम् ॥ ५७ ॥

सौभाग्येत्यादि फलं कुसुमासवेनानुक्तमपि स्वमत्यनुसारेणैव तासां रुच्युत्पादनार्थमुक्तम् । योगिनीकृतोपद्रवशान्तिस्तु तासां भीरुत्वमालक्ष्य तस्या अपि भयेन प्रकटं नोद्घाटिता । अत्र वास्तवार्थस्तु भर्तुः कृष्णस्य, अगुरुजनस्य· अनुवर्तिलोकस्य ॥ ५७ ॥

वध्वस्ततो ध्वस्ततोषा इव साशङ्कमात्मगतं वितर्कयामासुः ॥ ५८ ॥

ध्वस्ततोषा इति, कुञ्जेचर्या देवतायास्ताभिरकस्मात् प्रस्तावात् कृष्णाङ्गसङ्गविलासव्यक्तिसंभावनया ॥ ५८ ॥

एता नः किमु परीक्षन्ते किमु परीक्षन्ते वा कमप्यर्थं, तावदधुना धुनाना इव हृदयं किमपि तूष्णीमेव तिष्ठामो, यावददूरामूरा-मूलमेव कथयन्ति ॥ ५९ ॥

किंवा· अस्मान्मुरारि कमप्यर्थं किंचिद्वस्तुप्रयोजनं वा· ईक्षन्ते पर्यालोचयन्ति, यावदमूः· अदूर सर्वमेव ॥ ५९ ॥

इति तासु स्थितासु स्थिरतया पुनरपि हिता नरपिहितापह्नितापदेशा देशाचारलब्धं तदेव व्रतमामूलतः कथयामासुः ॥ ६० ॥

* परसवर्णो लिखितोऽपि समानाकृतिताबोधनाय ।

तासु वधूषु छन्ना छन्नरूपाः, अत एव नरेषु पिहितम् आच्छादितम् अपहितं योगिनीछलनवैगुण्यम् अपदेशेन छलेन याभिस्ताः, नटस्थजनैः पृष्टास्ता धनादिकामनया देवपूजां वधूः कारयाम इति ब्रुवन्ति स्मेत्यर्थः । देशाचारलब्धमिति वधूभिरेव, तज्ज्ञानोपादानस्य प्रश्नशङ्कया कुसुमासवेन स्वसंगोपनार्थमुक्तत्वात् ॥ ६० ॥

आकर्ण्य कर्णयमिव तं कमपि रसायनं प्रयोगमिव कुसुमासवस्य कृतिरस्येयमहो महोत्सवकरी नः समपादीति मनसि वर्णं विभाव्य विभाव्यतिषङ्गसरसवदना रसवदनायासं ताः किमपि निजगदुः ॥ ६१ ॥

विभायाः कान्तेर्व्यतिषङ्गेण परस्परमेलनेन सरसवदनाः, तासां मध्ये एकस्याः स्वाभिप्रायानुरूपतो दीप्त्या वदनसारस्येन अन्यस्या अपि तथैव वदनसारस्यं जातमित्यर्थः । किमपि रसवत् रसयुक्तवचो निजगदुः ॥ ६१ ॥

आर्याः का नाम नार्यो नार्योदितमध्वानमध्वानमनुसरन्ति ॥ ६२ ॥

का नार्यो वध्वः आर्याभिः श्वश्रूभिरुदितं कथितम् अध्वानं मार्गम् अध्वानं निःशब्दं यथा स्यात् तथा न अनुसरन्ति, अपि तु सर्वा एव ॥ ६२ ॥

तदनुष्ठीयतां तीव्रतरं व्रतरंहोऽनुष्ठाय वपुःकार्श्यं विदधामो[1] धामोदरे किं वृथा समयं नयामो न यामो नः सार्थको याति प्रियसौभगाय गायमाना प्रयत्नं का न भवति ॥ ६३ ॥

धामोदरे गृहाभ्यन्तरे । नयामः यापयामः । न यामोऽपि न प्रहरोऽपि । प्रियं यत् सौभगं सौभाग्यं तस्मै तदर्थं, श्लेषेण प्रिये श्रीकृष्णे विषये तस्माद्वा यत् सौभगं तस्मै प्रयत्नं गायमानेति, “वयसि चानशन्तम्,” गानवदुच्चैः पृच्छन्ती का न भवतीत्यर्थः ॥ ६३ ॥

१ विदधाम उ इति छित्त्वा प्रयोगोपपत्तिः कर्तव्या ।

एवं वधूजनेनाङ्गीकृते गुरुजनवचनवृन्दावने वृन्दावने कुसुमावचयनाय नासीद्यदि विप्रतिपन्नता ॥ ६४ ॥

वचनवृन्दस्यावने पालने ॥ ६४ ॥

प्रतिपन्नतारल्या तदा अनुवासरमेव रमेव नानाविग्रहग्रहणतत्परा परानन्देन सा वधूततिरवधूततिरस्कारा गुरुपुरस्कारा गुरुपुरतो बहिर्भूय भूयसा परिजनेन सह सहमाना मनोरथवेगं रथवेगं च जित्वा सत्वरेण सत्त्वरेण मनसा वृन्दावनमध्यमध्यवस्थाय ॥ ६५ ॥

रमा इव नानाविग्रहग्रहणतत्परा, एकैव लक्ष्मीर्नानादेहधारिणीवेत्युत्प्रेक्ष्यमाणा इत्यर्थः । एतच्च नरलीलत्वेन तदाननलोकसंभावनयैव वर्णनं न तु वस्तुनः, सिद्धान्तोपयोगित्वेन रूपगुणादिभिरपि रमातोऽप्यासां परमोत्कर्षादिति । गुरुभिरपि पुरस्कारो यस्याः सा । सत्त्वरेण सत्त्वगुणयुक्तेन भावयुक्तेन वा मनसा, "सत्त्वं गुणे पिशाचादौ बलेऽपि द्रव्यभावयोः" रिति मेदिनी ॥ ६५ ॥

कुसुमान्यवचिन्वती न्वतीव कौतुकेन का नु केनचिद्वन्यवनवनविहारिणो हारिणो भगवतः कृष्णस्यावलोकनकनत्कामा कामाह्लादधुरां नाससाद ॥ ६६ ॥

नु इति विकल्पे, अन्यदा किंचित् कुर्वतीत्यर्थः । कौ नु पृथिव्यां तु, केनचित् अतीव कौतुकेन, काम् आह्लादधुराम् आनन्दातिशयं न प्राप, अपितु सर्वामेव ॥ ६६ ॥

अथ सा च कुमारिकामाला कामालाघवलाघवधकारिणस्तस्याश्वासवाचमपेक्षमाणाक्षमाणामतिविलम्बसहनेऽप्रवृत्तीनामुद्वेजनजनकेन केनचिदुत्कण्ठाभरेण कण्ठाभरेण कण्ठलमना मनागिव विम्लानवदना म्लानवदनाकुलकुलमर्यादाभिर्जननीभिरभ्यभाषत ॥ ६७ ॥

कामस्य अलाघवेन गौरवेण हेतुना लाघवस्य धैर्यादिसामर्थ्यस्य वधकारिणो नाशकर्तुः "राघृ लाघृ सामर्थ्ये" तस्य कृष्णस्य उत्कण्ठाभरेण

कण्ठयुक्तमनाः । कीदृशेन, कण्ठम् आविर्भाव बाष्पेण पूरयतीति तेन । पुनः कीदृशेन,अतिविलम्बसहने अक्षमाणाम् असमर्थानाम् अवद्वत्तीनां चित्तवृत्तीनाम् उद्वेजनस्य उद्वेगस्य जनकेन । म्लानवत् म्लानाभिरिव, कन्यानां मुखम्लानिदृष्ट्या तद्दुःखेनैव दुःखिनाभिरिवेत्यर्थः । तथाप्यना-कुलेति, तदुल्लङ्घनं कर्तुं सहसा अशक्नुवतीभिरित्यर्थः ॥ ६७ ॥

अयि दुहितरो हितरोपणार्थं यदार्यापरिचयो भवतीनां बभूव भूवलयचमत्कारी का रीतिस्तस्य समजनीति नीतिमद्वचनम्रवणान-न्तरं तरङ्गवती नाम तासां कापि धात्रेयी निजगाद ॥ ६८ ॥

आर्यापरिचयो देवीप्रत्यादेशः ॥ ६८ ॥

हंहो गृहेश्वर्यः, एतदवधीयतां तदवधीयतां दिवसानामन्त-रेऽन्तरेण भवादृशीनां पृच्छामिच्छा मिथः कथनाय कथमासां भवतु, कुलकन्याकुलकन्याय एषः, संप्रति लब्धानुज्ञा नु वानसमं कथयि-ष्यन्ति ॥ ६६ ॥

तदवधि तत्प्रत्यादेशदिनमारभ्य इयताम् एतावतां दिवसानां गतानाम् अन्तरे मध्ये भवादृशीनां पृच्छां प्रश्नमन्तरेण आसां मिथः परस्परं युष्मान् श्रावयितुं तत्कथनाय इच्छा कथं भवतु । नन्वत्र को दोषस्तत्राह, कुलकन्यानां कुलकस्य वृन्दस्य न्याय एवैषः, मातापित्रा-दिगुरुसंनिधौ स्वयमेव स्वाभीष्टपतिप्राप्त्यर्थकवस्तूद्घाटने महत्येव लज्जे-ति ॥ ६९ ॥

यद्यनुमन्यध्वे तदा मया समयासन्नया सन्नयादेव कथ्यते ॥ ७० ॥

सन्नयात् सन्नीतिमालम्ब्य ॥ ७० ॥

आराधिता हि सा योगमायागमाग्रा सर्वदैवतैः सर्वदैव तैः प्रत्यादिदेश देशकालोचितं किमपि ॥ ७१ ॥

सर्वदैव सर्वस्मिन्नेव काले तैः प्रसिद्धैः सर्वदैवतैः आगमः आगम्य आयो गतिर्यस्याः सा ॥ ७१ ॥

कश्चित् प्रभावी प्रभावीचीनीचीकृतसकलमहा महामहिमा हि मादृशामपि न गोचरो गोचरो भवन्नल्पेनैव दिनेन दिनेन इव कमलिनीनामलिनीनामिव महाली महालीलो भवतीनां धवो भविता ॥ ७२ ॥

कश्चित् प्रभावी भवतीनां धवः पतिर्भविता भविष्यति । प्रभानां वीचीभिस्तरङ्गैर्नीचीकृतानि सकलानामपि महांसि तेजांसि येन सः । हि यतो महान् महिमा माहात्म्यं यस्य सः । कमलिनीनां दिनेनो दिनप्रभुः सूर्य इव । तत्रासाज्ञात्यमनिकटवर्तित्वमपरस्परसापेक्षोल्लासत्वं चालोक्यान्यथोपमिमीते, अलिनीनां भ्रमरीणामिव महाली महाभ्रमरः ॥ ७२ ॥

सोभविता यस्या सङ्गेन हे परमा रमातोऽपि युष्माकमुष्माकमुत्तमं प्रथयन् सौभाग्यभास्करस्य ॥ ७३ ॥

यस्य सङ्गेन रमातोऽपि लक्ष्मीतोऽपि युष्माकं सौभाग्यभास्करस्य उष्मा प्रतापो सोभविता अतिशयेन भविष्यति । किं कुर्वन्, कं सुखमुत्तमं प्रथयन् ज्ञापयन् ॥ ७३ ॥

किंत्वस्य पतिकामानुव्रतस्य व्रतस्य काचिदुत्तरा क्रिया क्रियाजीवनमय्यापि मय्यापितविश्वासाभिः कर्तव्याचोभवतीभिर्भवतीभिः ॥ ७४ ॥

उत्तरा क्रिया कथंभूता क्रियाणां सर्वासामेव जीवनमयी साफल्यदायिनी । आपि स्वयमेव आलभ्य प्राप्येत्यर्थः । सा भवतीभिः कर्तव्या । मयि आपितः प्रापितो विश्वासो याभिस्ताभिः । युष्मासु मम विश्वासो जातः, अतः प्रीत्या स्वयमेव कथयामीति भावः । अतोभो धैर्यं तद्वतीभिः ॥ ७४ ॥

सा चावधीयतां धीयतां विधाय श्रद्धामद्धा मन्नियोगेन भो निरुपमगुणवृन्दा वृन्दावनदेवता वृन्दा नाम दानामन्दा मत्स्वरूपा

स्वरूपातिक्रमणा काचिदस्ति सा वोऽभिमतसिद्धये भाविनीति नीति-वशाद्वृन्दावनानुगमनं कति दिनानि ना निवर्तनीयम् ॥ ७५ ॥

धियो बुद्धेर्यतं यमोऽभ्यासस्तत्परमो यस्यां तां श्रद्धां विधाय । दाने वाञ्छितदाने अमन्दा परमसमर्था, स्वरूपेण स्वभावेन अतिक्रमणा । ना इत्यव्ययं निषेधवाचकं, न निवर्तनीयमित्यर्थः ॥ ७५ ॥

इदं हि सिद्धवनं तपःफलोपगमस्य फलोपगमस्य सकलाभिलाषसंपादकत्वम् ॥ ७६ ॥

हि निश्चितम्, इदं सिद्धं सिद्धस्वरूपं सिद्धानां वा वनम् । कथंभूतं, तपःफलोपगं तपसां फलेनैव हेतुना उपगच्छति मिलतीति तत्, बहुतपःफलप्राप्यमित्यर्थः । अत एवास्य सिद्धवनस्य यः फलोपगमः फललाभस्तस्य सकलाभिलाषसंपादकत्वं, नित्यं वर्तत इत्यर्थः ॥ ७६ ॥

अस्योपसत्त्यां सत्यां समीहितसिद्धिरचिरेणैव भाविनीति तदनुमन्यध्वमन्यध्वनिनिरसनपुरःसरं पुरः सरंहसो निष्क्रम्य यथाहरहो वनमध्यमवस्थाय तदुदितकर्मशेषं समापयन्ति ॥ ७७ ॥

उपसत्तिरनुवृत्तिः । तत् तस्मात् अनुमन्यध्वम् अनुमतिं दत्त, यथा अन्यध्वनित्यागपूर्वकं पुरोऽग्रे सरंहसः सवेगाः सन्तः ॥ ७७ ॥

इति तदस्याः सप्रमुदितमुदितमाकर्ण्य तथा निदेशजननीभिर्जननीभिर्यदि विस्मिये ॥ ७८ ॥

अस्या धात्रेय्यास्तत् उदितं वाक्यम् । निदेशजननीभिर्निदेशकर्त्रीभिः । विस्मिये इति, ईषद्धास्यं संमतिद्योतकम् ॥ ७८ ॥

तदा तदनुमता मतान्तरनिरासेन निराबाधन्यायधन्या धन्यादयो वृन्दावनपरिसरणं ताः कुर्वन्ति ॥ ७९ ॥

निराबाधो निर्बाधो न्याय उक्तप्रकारस्तेन हेतुना धन्याः ॥ ७९ ॥

तदा तुर्याणामूढानामूढानामनूढानां च सम एव वृन्दाव-

नचारिचारिमचातुरीतुरीये कौतुके सति विरराम शिशिरसमयो रसमयो वहन्नश्वासवाद ॥ ८० ॥

अमूढानां परमबुद्धिमतीनां कौतुके समे तुल्ये सति । कथंभूते, वृन्दावनचारिणी वृन्दावनप्रवेशोपयिकी चारिमा चारुतया या चातुरी तया तुरीये अतिश्रेष्ठे, कनिष्ठमध्यमोत्तमातिश्रेष्ठानां मध्ये चतुर्थे इत्यर्थः । यद्वा ऊढानां पुष्पावचयच्छद्ममय्या चातुर्या कौतुकं प्रथमं, ततोऽनूढानां कात्यायन्यर्चनप्रथामय्या वस्त्राहरणादिमयं द्वितीयं, ततः पुनरप्यूढानां श्वश्रूणामनुमत्या कुञ्जेश्वरदेवताराधनमय्या तृतीयं, तदनन्तरमिदानीमनूढानां वृन्दापूजनच्छद्ममय्या चतुर्थम्, इति कौतुकस्यास्य तुरीयत्वं साधितम् । साम्यं च द्वयोरपामेव, युगपदेकचैव कृष्णसङ्गलक्षणस्तुल्यत्वात् ॥ ८० ॥

यथा ।

गतः शिशिरवारणो गलितकुन्ददन्तो जरां
सकेसररदोद्गमः सुरभिसिंहशावोऽभवत् ।
हिमे व्रजति दक्षिणे मरुति वाति कालस्य नु-
र्नसोरिव विराजते श्वसितमारुतव्यत्ययः ॥ ८१ ॥

शिशिर एव वारणो हस्ती जरां गतः प्राप्तः । सुरभिर्वसन्तः । हिमे व्रजति सति दक्षिणे मरुति वाति चलति सति । कालस्य कालात्मकस्य नुः पुरुषस्य नसोर्नासिकयोः ॥ ८१ ॥

किंच ।

अपि प्रौढां गर्भे प्रसुवति लताल्यो न कलिकां
कुहूकण्ठः कण्ठे कलयति कलं न प्रथयते ।
चकार प्रस्थानं त्यजति मलयं नापि पवनः
प्रतीवन्ते यान्तं युगपदिव सर्वे हिमऋतुम् ॥ ८२ ॥

प्रथमं वयःसंधिमिव शिशिरवसन्तसंधिं वर्णयति· अपीत्यादिभिः । प्रस्थानम्· उत्तरदेशं प्रति गमनम् ॥ ८२ ॥

आसन्नप्रसवतया लताङ्गनानां
रोलम्बीसुहृदबलावलिः प्रसज्य ।
उद्वेगं मुहुरिव कुर्वती समन्ता-
दापृच्छां मृदुकलहूंकृतेः करोति ॥ ८३ ॥

रोलम्ब्य एव सुहृदबला मित्रस्त्रियस्तासामावलिः ॥ ८३ ॥

किंच ।

रसाले सालम्बो नवमुकुलसंधानकलया
पिको दत्ताश्वासः किमपि महता तत्सुरभिणा ।
कुहूरित्यालापं सपदि गुफितं कण्ठकुहरे
श्रुतौ दर्शत्रासादिव लपति दीर्घव्यवहितम् ॥ ८४ ॥

कण्ठकुहरे कुहूरिति सदीर्घमालापं गुफितं ग्रथितमपि श्रुतौ शब्दश्रुतिक्रमे तु दीर्घव्यवहितं सहृस्वं यथा स्यात् तथा लपति· उच्चारयति । तत्र हेतुमुत्प्रेक्षते, दर्शस्य· अमावस्यायास्त्रासादिव, कुहूरिति दीर्घश्रुत्या सहसा· अमावास्यायाः प्राप्तौ प्रतीतायाम्· ओषधीशनाशशोकेनेव रसालवृक्षेण स्वमुकुलानि नोत्क्रमयिष्यन्त इति शङ्कत इवेत्यर्थः, चन्द्रिकाबहुलपक्ष एवाम्रमुकुलोद्गम इति लोकप्रसिद्धेः । "सा नष्टेन्दुकला कुहू"रित्यमरः ॥ ८४ ॥

एवमुपनतेन तेन कुसुमसुरभिणा सुरभिणालंकृतेऽहनि हनिष्यमाणहिममहिममर्मणि स्नातमिव विपिनेन· उल्लसितमिव तरुभिः· उद्वर्तितमिव लताभिः· उत्कण्ठितमिव विहगैः· हसितमिव दिग्वधूभिः· अनुलिप्तमिव चन्द्रिकाचन्दनेन रजनीभिः· अङ्कुरितमिव चन्दनानिलेन संचरितमिव परिमलेन गुम्फितेव गोष्ठी मधुव्रतैः पुलकि-

तमिव माकन्दैः, जागरितमिव माधवीभिः, किं बहुना परिवर्तित-मिव वपुर्मनसिजेन ॥ ८५ ॥

इनिष्यमाणम्, अद्य श्वो वा विनाश्यमानं हिमस्य महिम्नो मर्म यत्र तथाभूतेऽहनि ॥ ८५ ॥

इत्येवं यद्यपि स्फुरदृतुषट्कषट्कलाकमनीयप्रदेशं वृन्दावनं तथापि क्रीडासमयानुरूपरूपतया क्वचित् क्रमेणाक्रमेणापि क्वचन नव-नवतया वन याच्यमानेव तेषामनुवृत्तिः ॥ ८६ ॥

स्फुरतः ऋतुषट्कस्य षड्भिरेव कलाभिः रञ्जकस्वस्वशिल्पैः कमनीयाः प्रदेशा यस्य तथाभूतमेव वृन्दावनं, तथापि भगवतो नरलील-तया माधुर्यविशेषार्थं क्रीडानां समयानुरूपमेव रूपं येषां तत्तया तेषाम् ऋतूनां क्वचित् क्रमेणानुवृत्तिर्याच्यमानेव स्यात्, हेमन्तानन्तरमेव शिशि-रस्य तत एव वसन्तस्य इत्येवम्, क्वचन अक्रमेणापि, यथा प्रावृष्यपि वसन्तसमृद्धिर्विदग्धमाधवे भगवदिच्छावशादुक्ता, क्वचन नवनवतयेति, यथा प्रथमग्रीष्मानन्तरमेव प्रथमवर्षा तत एव प्रथमशरदित्येवम् ॥ ८६ ॥

अथ प्रथमप्रथमनुरागमावहन्तीनां गोकुलकुलललनानां ललनानां परिपूर्तये कापि वसन्तोत्सवलीलावली वलीयसी विरचनीया ॥ ८७ ॥

अत एव प्रथमा प्रथा ख्यातिर्यस्य तादृशमनुरागं वहन्तीनां कुल-ललनानां कुलाङ्गनानां या ललना वाञ्छास्तासां परिपूर्तये, "लल ईप्सा-यां" युजन्तो ल्युडन्तो वा ॥ ८७ ॥

इति मनसि विचारयतो रयतो लब्धप्रमोदस्य प्रमोदस्यमा-नप्रणयिजनहृद्व्यस्य निखिलसौभगवतो भगवतो व्रजराजयुवराज-स्याशयं विदित्वा वनदेवता एव ता एवमभिनवसुरभिसुरभितमपि वनं स्वस्वकौशलशलदतिचारिमचारिमशिल्पकल्पनाकल्पनानावि-धत्वभूषितं भूषितं सकलसौभाग्यमेकीकृतमिव विदधति स्म ॥ ८८ ॥

प्रकृष्टा मा शोभा तया· उद्वस्यमानः· उत्क्षिप्यमाणाः प्रणयिजनानां हृद्बाणो येन तस्य । अभिनवेन सुरभिणा वसन्तेन सुरभितं सुगन्धीकृत-मपि वनं, स्वैः स्वैः कौशलैः स्खलन्ति मिलन्ति· अतिचारिमचारीणि· अति-चारुत्वगामीनि यानि महाशिल्पानि तेषां कल्पनाभिराकल्पस्य वेशस्य यथानाविधत्वं तेन भूषितं मण्डितं, भूषितं भुवि पृथिव्याम्· उषितं स्थितम् ॥ ८८ ॥

तथा च ।

लाङ्गूलैश्चमरीचयेन विपिनक्षोणीतलं मार्जितं
कस्तूरीहरिणीगणेन विदधे स्वैः स्वैर्मदैर्वासितम् ।
पुष्पाणां मकरन्दबिन्दुनिकरैः सिक्तं द्रुमाणां कुलैः
संगीतानि वितेनिरेऽलिनिवहैर्लास्यानि वीरुद्व्रजैः ॥

एवं सति ।

अद्य प्राङ्मधुवासरे मधुमदक्रीडाविशेषालसः
श्यामः श्यामलयन् दिशः स्वमहसां पूरेण दूरेरिणा ।
माधुर्यामृतशीकरोत्करकिरा तन्वापि वर्षाभ्रमं
तन्वानोऽपि विधास्यतीह परितो नूनं वसन्तोत्सवम् ॥ ८९ ॥

दूरेरिणा दूरम्· ईरितुं व्याप्तुं शीलमस्य तेन ॥ ८९ ॥

इति मुहुरनुरथ्यं तथ्यमुद्घुष्यमाणे
श्रवणनयनचित्ताह्लादवर्षिण्युदन्ते ।
सहजमदनरागावेगखिन्नान्तराणा-
मजनि विधुमुखीनां चित्तमुत्कण्ठमानम् ॥ ९० ॥

अनुरथ्यं रथ्यायां रथ्यायां, प्रतिमार्गमित्यर्थः । उदन्ते वृत्तान्ते ॥ ९० ॥

एवं सति ।

चन्द्रावल्या सह परिजने राधया स्वालिवृन्दैः
श्यामादेव्या सह सहचरीमण्डलैरात्मनीनैः ॥
श्रीवासन्तोत्सवरतिकलासंदिदृक्षाचिकीर्षा-
व्यग्रं जाग्रन्मधुपदहृतत्रीडमुद्यानमीये ॥ ६१ ॥

आत्मनीनैः आत्महितैः, संदिदृक्षाचिकीर्षाभ्यां व्यग्रं यथा स्यात् तथा ॥ ६१ ॥

ततश्च ।

वृन्दादिभिः सरभसं वनदेवताभिः
प्रीत्यादरेण महताभ्युपगम्यमानाः ।
कामं वसन्तमहमङ्गलवेषवासो-
भूषादिभिर्विदधिरे परिभूषितास्ताः ॥ ६२ ॥

वेषाः षोडशाकल्पाः, वासांस्यतिवैविध्यात् ततः पृथुगुक्तानि, भूषां द्वादशाभरणानि, आदिशब्दात् समयोचितकौसुमलकुटिकाकन्दुकादि ॥६२॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीय-ज्ञानविषयकशास्त्रावतारे ॥

॥ तृतीयाध्यायस्य नवमः परिच्छेदः ॥

८ ॥ औचित्यं पदानामर्थेषु संदेहस्य वारणोपायः सार्वत्रिको न भवति ॥—यद्यपि वस्तुनः सार्वजनीनो व्यवहारः (औचित्यनियमः) पदार्थव्यवस्थापनोपायत्वेनाच कल्प्यते तथापि कुत्र चिदेव स सार्वजनीनो व्यवहारो नामार्थव्यवस्थापनाय प्रभवति न पुनः सर्वत्र । लौकिकव्यवहारः शब्दानामर्थं नियमयतीति साधारणलौकिकसंभाषणे युज्यते एव, परं तु शब्दानां यथार्थार्थव्यवस्थापनशक्तेरभावात् कः किंविज्ञानतात्पर्येण शब्दं प्रयुङ्क्तेइत्यत्र विनिगमनाविरहाच्च सार्वजनीनः प्रयोगः शास्त्रीयसंवादे तान् योजयितुं न प्रभवति । लौकिकव्यवहारे भूयो भूयो यः शब्दो न

प्रयुज्यते, यश्च योग्यतानियमवशादत्यन्तविलक्षणविज्ञानस्य लिङ्गं न भवेद् एवंविधस्य कस्यापि मिश्रविज्ञानवाचकशब्दस्यैवानुपलम्भात्। किं च योग्यतानियमस्य स्वतः कुत्रापि व्यवस्थापितस्याभावादयं शब्दप्रयोगप्रकारो ऽपरो वा परिभाषणयोग्यो भवेदिति भूयश्च आशङ्क्यतेव। एतदुक्तं भवति। एवंविधातिविसंकुलविज्ञानवाचकानि नामानि संदिग्धानियतार्थकतया स्वभावत एवैतदपूर्णत्वदोषदूषितानि सन्ति। किं च परस्पराशयावधारणसमर्थयोरपि वक्तृश्रोत्रोरात्मनि न सर्वदा तत्तत्पदबोध्यविज्ञानानि समानाकाराणि भवन्ति। यद्यपि सर्वेषु देशेषु (यत्र संस्कृतभाषया भाष्यते) यशः कृतज्ञतेत्यादीनि पदानि सर्वैर्मनुष्यैरेकरूपार्थयैवोच्चार्यन्ते तथापि तैः स्वस्वज्ञानगोचरं तत्तत्पदबोध्यतया ऽध्यवसितं समुदितं मिश्रविज्ञानं समभावाभावपुरःसरस्वपि परस्परमत्यन्त भिन्नमेव प्रतीयते॥

९॥ एषां पदानामध्ययनरीतिस्तेषामर्थेषु संदेहं जनयति॥—मिश्रभावनाम्नामभ्यासस्य लोकव्यवहृता रीतिस्तेषामर्थेषु संदेहलेशमपि न जनयति। यतो यदि बालाः कथमभ्यस्यन्तीति वयं परीक्षयेम तर्हि द्रव्यवाचकानि शुद्धविज्ञानवाचकानि वा पदानि बालान् प्रति बोधयितुं प्रायशो जनास्तत्पदबोध्यस्यानुशीलितविज्ञानाकारं तान् प्रति प्रदर्श्यैवं पदमनुमर्थं बोधयतीत्याम्रेडन्ति। श्वेतं मधुरं पयः शर्करा मार्जारः कुक्कुर इति सुस्पष्टमुपलभ्येत। परं तु मिश्रभावविषये तेष्वपि विशेषतो भूयिष्ठानां द्रव्याणां विषये धर्माधर्मसंबन्धिशब्दविषये तु शब्दानेव प्रायः प्रथममभ्यस्यन्ति ततस्तद्वाच्यमिश्रविज्ञानबोधाय परेषां व्याख्यानानि परिगृह्णन्ते स्वीयाभ्यासपरीक्षाभ्यामेव वा तानि विज्ञानान्यवधार्यन्ते इति बहुशो लोके ऽनुभूयते। अनेन प्रकारेणापि यथार्थशब्दार्थज्ञापनस्यावश्यंभावाभावादिमे नीतिशब्दा भूयिष्ठैः पुरुषैः केवलमर्थशून्यं ध्वनिमात्रमिवोदीर्यन्ते। यत्किंचिदर्थतात्पर्येणोदीरिता अपि शब्दाः प्रायस्तदीयार्थानामनियतत्वेनैकदेशरूपतया च ते दुर्बोधा विप्लकुलाश्च भवन्ति। निपुणावधानेन तेषामर्थं व्यवस्थापयतामपि बुद्धिमदभ्यासशालिपुरुषान्तरकृतमिश्रविज्ञानविशेषवाचकत्वाद्विलक्षणमिश्रविज्ञानवाचकत्वसंपादनदैाष्कर्य-

मपरिहार्यमेव । यत्र तत्तत्पुरुषीयाणां भिन्नभिन्नविज्ञानानां परीक्षा दुष्करा, यथा प्रतिष्ठा, श्रद्धा, वरो, धर्मो, भक्तजनसमुदाय इत्यादिपदाभिलापे तत्रैवमादिभिः पदैः संलापो विवादो वा न संभावयितुं शक्यते । एतदुक्तं भवति । एषां शब्दानामर्थेषु लोकानामैकमत्याभावात्तत्तच्छब्दवाच्यमिश्रविज्ञानानां च तत्तत्पुरुषात्मस्वैकरूप्याणामभावाच्च तान्यधिकृत्य सर्वोऽपि विवादः केवलं शब्दार्थविषय एव । अत एव च दिव्यानां मानवानां वा विधीनां व्याख्यानानि नानाविधान्युपलभ्यन्ते । टीकाश्च टीकान्तराणि जनयन्ति, संक्षिप्तव्याख्यानानि च नवीनमेव व्याख्यातव्यं विषयं रचयन्ति । अमीषां सदाचारव्यवहृतानां शब्दानामर्थस्य परिच्छेदो विवेचनं परस्परभेदश्च तेषामानन्त्यान्न कर्तुं शक्यन्ते । मनुष्यकल्पितानीमानि विज्ञानानि तु मनुष्याणामविरतं तादृशपूर्वपूर्वविज्ञानरचनाशक्तेः सत्त्वादनन्तगुणानि भवितुमर्हन्ति । धर्मशास्त्रीयमूलग्रन्थानामाचारव्यवहारकाण्डयोरापाततोऽर्थस्य ज्ञानेन परितुष्यन्तः सर्वे प्रायो व्याख्यानानां पर्यालोचनेन पूर्वगृहीतमर्थं सर्वथा परित्यजन्ति । किं च ताभिर्व्याख्याभिस्तेष्वधिकसंदेहविवर्धनेन प्रस्तुतार्थविमूढा भवन्ति । नैतावता व्याख्या अनुपयुक्ता इति मम मतं वदामि, किं तु स्वस्वविमर्शानामाविष्कारो भाषया यावत्सुस्पष्टतया कर्तुं शक्यते तावत्सुस्पष्टतया भाषितुं समर्थैर्मया चिकीर्षुभिरप्युदीरितानि मिश्रभावनामानि कथं स्वभावत एवानियतार्थानि सन्तीति प्रदर्शयामि ॥

१० ॥ अत एव प्राचीनेषु ग्रन्थेष्वपरिहार्यं काठिन्यमुपलभ्यते ॥— प्राचीनानां परदेशीयानां ग्रन्थेषु कीदृशी दुर्बोधता ऽवश्यमनेन संपाद्यत इत्यस्य वर्णनमनावश्यकम् । प्राचीनग्रन्थानां यथार्थावगमायाभ्यासावधानेन्द्रियपाटवानि कियन्त्यपेक्ष्यन्ते इति प्रदर्शनाय भूयिष्ठानामनेन प्रकारेण स्वस्वविमर्शानाविष्कुर्वतां विदुषां ग्रन्थानां पर्याप्तप्रमाणभूतानां सत्त्वात् । परं तु विश्वसनीयतत्त्वैरनुसंरणीयैर्विधिभिर्वा घटितान् येषु भ्रमेण प्रमादेन वा बहुशो ऽनुपपत्तयः संभवन्ति तांश्च विहायान्येषामवश्यजिज्ञासनीयार्थकानामभावादन्येषां ग्रन्थानामर्थविषये ऽल्पसमुत्साहैरस्माभि-

र्भाव्यम् । स्वीयान्येव नवीनमतान्याविष्कुर्वतां ग्रन्थकाराणामस्मद्विज्ञानागममानावश्यकत्वमिव तेषामपि मतानां ज्ञानस्यास्माकमनावश्यकत्वात् । अस्माकं गुणदोषाणां तद्विज्ञानज्ञानतारतम्यानधीनतया तेषामज्ञाने सत्यपि नास्माकं कापि क्षतिः । अत एवायाथार्थ्येनानैाचित्येन च तैः शब्दाः प्रयुक्ताश्चेत्तेषां ग्रन्था न पठनीयास्तेषु दोषाननुद्भाव्यैव तैर्यथाऽस्माकं तदीयशब्दार्थज्ञानं मा भूदिति धिया शब्दा उच्चारितास्तदनुसारेणास्माभिरप्यनुष्ठेयम् । तदर्थज्ञानाय न प्रयतितव्यमिति यावत् ।

११ ॥ संदिग्धार्थानि द्रव्यवाचकानि नामानि ॥—यैर्विज्ञानानि निर्देष्टुं तुलयितुं वा शक्यन्ते तथाविधानां ज्ञाननिरपेक्षाणां स्वतः सिद्धानां प्रतिमानानां संसारेऽविद्यमानत्वाद्यदि मिश्रभावनाम्नामर्थोऽनियतः स्यात् तर्हि द्रव्यनामानि विरोधितर्कोद्भावनाय संदिग्धार्थकानि भवेयुः । तद्वाच्यविज्ञानानां सद्वस्तुसारूप्येणैव कल्पितत्वात् स्वभावसिद्धप्रतिमानानुरूप्यस्य सत्त्वाच्च । यथा मिश्रभावविषये तेन शब्देन बोधाय यज्जातौ प्रवेशाय वा यान् समुदायान् योग्य न् विचारयामस्तेषां विरचनइव द्रव्यविज्ञानविरचनेऽस्माकं स्वातन्त्र्यं नास्ति । अस्मिन् विषये तेषां बोधाय स्वप्रयुक्तशब्दानां तन्लिङ्गितासंपादनाय च वयं प्रकृतिमनुसृत्यैव स्वीयानि मिश्रविज्ञानानि स्वभावसिद्धवस्तुसरूपाण्येव रचयामस्तत्तद्वस्तुभिस्तेषां तेषां नाम्नामर्थांश्च नियमयामः । अस्माभिरनुसरणीयानि प्रतिमानानि सन्तीति तु सत्यं, परं तु स्ववाचकशब्दार्थरूपाणि प्रतिमानान्यत्यन्तमनियतानि । यतो यदि तत्तच्छब्दवाच्यविज्ञानानि सर्वथा दुर्बोधानामनियतेनापूर्णेनैव वा रूपेण ज्ञातुं शक्यानां बाह्यानां प्रतिमानानामनुरूपाणि स्युस्तर्हि पदान्यवश्यमत्यन्तमनियतविविधार्थकानि स्युः ॥

१२ ॥ प्रथमं तावद् द्रव्यनामानि दुर्बोधार्थस्वरूपैः संबध्यन्ते ॥—पूर्वोक्तप्रकारेण द्रव्यनामानि लौकिकव्यवहारे द्विधा प्रयुज्यन्ते । तत्र प्रथमं कदाचित् तानि निखिलगुणसमवायिकारणानां वस्तूनामाभ्यन्तरसंस्थितिबोधनाय परिकल्प्यन्तेऽत एव तेषामर्थोऽपि तादृशसंस्थित्यनुरूप एव कल्प्यते । परं

तु तस्या आभ्यन्तरसंस्थितेरार्थस्वरूपस्य वा ऽस्माकं सर्वथा ऽज्ञानात् तद्बोधाय प्रयुक्तः सर्वोऽपि शब्दो ऽवश्यमेवानियतार्थको भवेत् । किं चास्मदविज्ञातार्थबोधनाय यदा ऽश्वः श्वेतोऽञ्जनमित्यादयः शब्दाः प्रयुज्यन्ते तदा कानि वस्तूनि तैः पदैरभिधीयन्ते ऽभिधातुं योग्यानि वेति ज्ञानमसंभवि स्यात् । अत एव चास्यां कल्पनायां द्रव्यनाम्नामन्वयप्रतिमानसंबद्धतया तेषामर्था न कदाचिदपि तैः प्रतिमानैः सरूपा व्यवस्थापिताश्च भवितुमर्हन्ति ॥

१३ ॥ द्वितीयतः, तानि केवलमपूर्णतया ज्ञानात् समनियतान् धर्मान् बोधयन्ति ॥—द्वितीयतो द्रव्येषु सहोपलब्धानां गुणविज्ञानानां तत्तत्पदाव्यवहितबोध्यार्थरूपतया तानि नानाविधवस्तुजातिरूपेण मिश्रितानि भूत्वा स्ववाचकपदबोध्यार्थानां यथार्थानि प्रतिमानानि भवन्ति यैस्तत्तत्पदार्थाः साधु प्रमाणीकर्तुं शक्यन्ते । परं त्वेषां प्रतिमानानामेकतमोऽपि त्रिविधान् अनियतांश्चार्थानपरित्यज्य तानि नामानि परित्यक्तुं न प्रभवति । यत एकस्मिन्नाश्रये मिलितानां समनियतानामेषां गुणविज्ञानानां बहुत्वाद् विशेषनामबोध्यमिश्रविशेषविज्ञानरूपतायां सममेव तेषां सर्वेषां योग्यतायाः सत्त्वाच्चैकरूपस्य विषयस्य विचारे कृताध्यवसाया अपि मनुष्या अत्यन्तं विभिन्नान्येव तद्विषयविज्ञानानि रचयन्ति । अतश्च तद्बोधाय तैः प्रयुक्तस्य शब्दस्य भिन्नभिन्नपुरुषेषु भिन्नार्थकत्वं दुष्परिहरम् । मिश्रविज्ञानघटकानां गुणधर्माणां पदार्थान्तरपरिवर्तकतया तैः परिवर्तनीयत्वेन च ते ऽनन्ताः सन्ति । यः केवलं नानाविधाग्निसंयोगेनैव कस्य चित्सुदूरतरस्य धातोर्भूयिष्ठानि परिवर्तनानि रासायनिकपुरुषहस्तास्थिते धातुविशेषे द्रव्यान्तरसंयोगजानि नानाविधानि परिवर्तनानि च द्रक्ष्यति स नैतद्विलक्षणं प्रत्येष्यति यद् अहं कस्याश्चिद्द्रव्यजातेर्गुणान् अस्माभिः कर्तुं शक्यानां जिज्ञासानां द्वारा पूर्णतया ज्ञातुमनर्हान् असुलभपरिगणनीयान् गणयामीति । अत एव तेषां बाहुल्येन यथार्थो नियता संख्यापि न ज्ञातुं शक्यते । विभिन्नपुरुषैस्तानि स्वीयविविधकौशलावधाननिर्माणप्रकारानुसारेण विभिन्नान्येवाविष्क्रियन्ते । अत एवैकस्यत्र

द्रव्यस्य विभिन्नानि विज्ञानानि विहाय नान्यस्मिन्नपि वर्त्तितुं शक्नोतीति ज्ञात्वा तदीयसाधारणनाम्नो ऽर्थमत्यन्तं विविधमनियतं च कल्पयति । द्रव्यमिश्रविज्ञानानां स्वभावत एव सहचरितत्वेन कल्पितैः शुद्धविज्ञानैर्घटितत्वेन स्वस्वमिश्रविज्ञानेषु सहचरितत्वेनोपलभ्यमानधर्माणामन्तर्भावस्य सर्वेणापि कर्त्तुं शक्यत्वात् । यतो यद्यपि स्वर्णरूपे द्रव्ये रूपगुरुत्वाभ्यामेवैकः आत्मानं तोषयति, एवमपि परो विलायकरसविशेषसंयोगेन तस्मिन् विलीनभावं पश्यन् सुवर्णविज्ञाने रूपेण सह तस्यापि गुणस्य संयोजनमावश्यकं मनुते यथैव पुरुषान्तरं द्रवत्वविषये करोति । रसविशेषसंयोगेन विलीनभावस्य द्रुतत्वस्येवसदैवसुवर्णगतरूपगुरुत्वाभ्यां सहचरितत्वात् । अपरे च परीक्षया ऽनुभवेन वा तत्र स्थिरत्वं सूत्रीभावं वा पर्यालोच्य तयोरन्यतरमुभावपि वा तैः संयोजयति । एषां सर्वेषां मध्ये कः स्वर्णपदस्योचितमर्थं व्यवास्थापयत्? अथ वा को भविष्यति तत्पदार्थस्य नियमयिता? सर्वोपि स्वभावसिद्धमेव स्वस्वप्रतिमानमाश्रयते । सतर्कं चिन्तयति च परीक्षया सहचरितत्वेन ये उपलभ्यन्ते तान् सर्वान् गुणान् सुवर्णपदबोध्यमिश्रविज्ञानघटकतया सममेव व्यवस्थापयितुं शक्नोमीति । यः सम्यक् परीक्षां नाकरोत् तस्य तेषां परित्यागेपि तथैवाधिकारात् । तृतीयस्य च परीक्षां कुर्वाणस्यान्येषु धर्मान्तराणां व्यवस्थापनस्यापि तथैवाधिकारात् । यतस्तेषां धर्माणां स्वाभाविकस्य सहचारस्येव मिश्रविज्ञाने तेषां साहचर्यस्य वस्तुतो हेतुतया तेषामेकतमस्य परिग्रहे परित्यागे वा कश्चनान्यो ऽनुकूलो हेतुरस्तीति कः कथयेत्? । तदेतदुक्तं भवति । द्रव्यमिश्रविज्ञानबोधाय नाम्नां प्रयोक्तृषु मनुष्येषु तान्यत्यन्तं विलक्षणानि भवन्ति, अत एव तेषां नाम्नामर्था अत्यन्तानियता एवेति ॥

१४ ॥ अपि च कोऽपि वस्तुविशेषस्तथा नास्ति, यः केषु चित्स्वीयशुद्धविज्ञानेषु भूयिष्ठतत्तद्वस्तुव्यक्तिभिरपरेषु च तेषु न्यूनतत्तद्वस्तुव्यक्तिभिः संबध्नाति । अतः प्रकृते विशेषनामबोध्ययथार्थसमुदायरचकानि तानि नियमयिष्यन्ति? । अथ वा कस्य चिद्द्रव्यस्य नाम्नो ऽर्थे संग्रहयोग्या अति-

गूढा विशेषगुणाः के, के वा स्फुटाः साधारणा वा परित्यक्तव्याः सन्तीति केन यथार्थप्रमाणेन वक्तुं शक्यते? । यस्माद् द्रव्यनाम्नामेव विविधं संदिग्धमेव करोति तत्सर्वमपि तेषां पदानां शास्त्रीयप्रयोगे भ्रमान् विवादान् अनिश्चयांश्च जनयति ॥

१५ ॥ अनेनैवापूर्णत्वदोषेण तेषां व्यावहारिककार्यनिर्वाहकत्वे ऽपि शास्त्रीयकार्यनिर्वाहकता साधु न भवति ॥—येषां लौकिकार्थः केश्चित्स्फुटैर्धर्मैर्नियम्यते, यथैव ज्ञातवीर्याद्युपवस्तुष्वाकारेण अन्येषु च द्रव्येषु प्रायो रूपेण तत्सहचरितैः केश्चिदन्यथवाह्यैर्धर्मान्तरैस्तदर्थो नियम्यते, एवंभूतानि लौकिकसंभाषणीयद्रव्यसाधारणनामानि तदेव वस्तु साधु बोधयन्ति यन्मनुष्या विवक्षितार्थतया बोद्धुं शक्नुवन्ति । इत्थं च स्वर्णपदेनाम्रपदेन वा बुबोधयिषितद्रव्याणि परस्परेभ्यो विवेचनाय प्रायः साधु परिकल्पयन्ति । परं तु शास्त्रीयेषु वादेषु जिज्ञासासु च यत्र सा-धारणानि तत्त्वानि व्यवस्थापनीयानि भवन्ति प्रदर्शितस्थितिभ्यः तत्त्वा-न्तराणि च निष्कासनीयानि सन्ति तत्र द्रव्यनाम्नां तात्त्विकार्थः केवलं साधु न व्यवस्थापित इत्येव न किं तु तस्य तात्त्विकार्थतैव दुष्करा । तथा हि । यः स्थिरतायाः किमपि परिमाणविशेषमाघातवर्धनीयतां वा स्वीयसुवर्णमिश्रविज्ञानघटकत्वेन स्वीकरोति स यद्यपि सुवर्णसंब-न्धिवाक्यानि विरच्य तादृशार्थेन परिगृहीतानि याथार्थ्येन सुस्पष्टतया च सुवर्णानुगतानि फलानि तेभ्यो निष्कासयितुं शक्नोति तथापि येन तत्ता-त्पर्यगोचरतदुदीरितसुवर्णपदबोध्यमिश्रविज्ञानावयवत्वं तादृशस्थिरत्वस्य परिमाणस्याघातवर्धनीयताया वा न कृतं तादृशपुरुषान्तरं प्रति न कदा-चिदपि तयोः सुवर्णपदार्थत्वं स्वीकारयितुं शक्यते नापि तयोर्याथार्थ्ये पुरुषान्तरं कल्पयितुं प्रभवतीति ॥

१६ ॥ दृष्टद्रव्यस्योदाहरणम् ॥—मनुष्या आदौ संकीर्णविशकलि-तावयवज्ञानं संपाद्य यथार्थसूक्ष्मजिज्ञासाः कर्तुमारभन्ते इति प्रायः सर्वासु भाषासु सर्वेषु च द्रव्यनामसु स्वाभाविको दुष्परिहरो ऽपूर्णत्वदोषो

ऽस्ति । यतस्तदा ते लौकिकप्रयोगे नियतत्वेन विविक्तभावेन प्रतीयमानार्थका अपि शब्दाः कथं संदिग्धं गूढमर्थमुपस्थापयन्ति । पुरा ऽहमेकदा बुद्धिमतां पण्डितानां भिषजां समाजमन्वगच्छम् । तत्र च दैववशाद् "नाडीसूत्रेषु किमपि द्रवद्रव्यमनुस्यूतमस्ति न वेति मीमांसोपाक्रमत । चिरकालपर्यन्तं चोभयोः पक्षयोस्तर्कपरम्पराभिः प्रवर्तिते तस्मिन्विवादे ऽस्य भूयानंशो वस्तुप्रत्यक्षगतं वास्तविकभेदमपेक्ष्याधिकं शब्दानामर्थमेव विषयीकरोतीति संदिहानो ऽहमस्मिन्विवादे ऽधिकविमर्शात्पूर्वमस्माभिः प्रथमं तावद् द्रवद्रव्यपदवाच्यं किमस्तीति परीक्ष्य व्यवस्थापनीयमित्यवोचम् । अस्मिन्नुपन्यासे प्रथमं ते किंचिदेव विस्मिता अभवन् । यदि च ते मन्दमतयो ऽभविष्यंस्तर्हि मदीयमिममुपन्यासं क्षुद्रं निष्प्रयुक्तं वा ऽमंस्यन्त । यद्यपि तस्यां सभायां न कोऽपि द्रवद्रव्यपदाभिधेयं पूर्णतया न ज्ञातवानस्मीति स्वात्मानमचिन्तयत् । अहमपि मन्ये तन्नामातिविसंकुलद्रव्यनाम्नामेकतमं नासीदिति, तथापि मदीयोपन्यासमनुरुध्य परीक्षया तस्य पदस्यार्थः पुरा तैः सर्वैः प्रकल्पितश्च नियतो व्यवस्थापितो वा नासीदपि तु प्रतिपुरुषं भिन्नभिन्नमिश्रविज्ञानलिङ्गतया क्लृप्त आसीदिति ते सामाजिका उपलेभिरे । ततश्च ते सर्वे ऽजानन् यदस्माकं विवादस्य मुख्यांशस्तु तत्पदस्यार्थमधिकृत्यैवासीत् । किं च । यद्यपि तद्द्रव्यं द्रवद्रव्याभिलापमर्हति न वेत्यत्र सर्वेषामैकमत्यं दुष्करमेवासीद् विमर्शसमये च तद्वस्तुनो यथाकथं चिद् ज्ञानेन संतोषो नोचित इति चिन्तितमासीत् तथापि शिराद्वारा गच्छत्सूक्ष्मद्रव्यं किं चिद्द्रवद्रव्यं वाधिकृत्यास्माकं मतभेदो ऽल्पीयानेवासीत् ।

१७ ॥ अपरं चोदाहरणं सुवर्णस्य ॥—बहुत्र विवादेषु मनुष्याः शब्दार्थमधिकृत्यैव महता निर्भरेण विवदन्ते इत्यवसरविशेषं प्राप्य स्थानान्तरे वर्णयिष्यामि । अत्र तावत्पुरा वर्णितं सुवर्णोदाहरणं किं चिदधिकयाथार्थ्येन विमर्शाय प्रस्तूयते । एतस्य यथार्थार्थस्य नियमनं कथं दुष्करमस्तीति च ज्ञास्यते । भास्वरपीतवर्णविशेषवद्द्रव्यबोधकतायामेतस्य

पदस्य, मन्ये, सर्वे सन्त्येकमताः । तस्य च कलेः परिकल्पितसुवर्णपदाभिलप्यमानविज्ञानरूपतया मयूरपुच्छस्य भास्वरपीतरूपवान् भागोऽपि तेषां मते सुवर्णपदस्योचित एवार्थः । अन्ये च धातुखण्डविशेषे तत्पीतरूपसहचरितमग्निसंयोगजन्यविलीनभावं समुपलभ्य तादृशसंयोगेन मिश्रविज्ञानान्तरं रचयन्ति यत्र च द्रव्याणां जातिविशेषबोधाय ते सुवर्णपदं प्रयुञ्जते । इत्थं चाग्निसंयोगेन भस्मीभवन्ति भास्वरपीतरूपवन्ति सर्वाणि द्रव्याणि सुवर्णपदाभिधेयेष्वनन्तर्भाव्य यानि तादृशभास्वरपीतरूपवन्ति वह्निसंयोगेन द्रवन्ति न पुनर्भस्मीभवन्ति तान्येव केवलं सुवर्णपदबोध्यानि तज्ज्ञानावान्तर्भावमर्हन्तीति वदन्ति । अपरः पुनर्द्रवभावमिव गुरुत्वस्यापि तेनैव हेतुना तेन रूपेण सातत्यसहचरितत्वाविशेषात्तदपि संयोज्य तस्य सुवर्णविज्ञानेन सह संयोजनीयत्वं तत्पदबोध्यत्वं च कल्पयित्वा तादृशरूपद्रवयोग्यतामात्रविशिष्टं द्रव्यान्तरमयथार्थं सुवर्णं मनुते ते एवमन्येष्वपि सुवर्णगुणेषु स्वयमुह्यम् । तत्र कुतः स्वभावत एव नित्यसहचरितानां परस्पराविनाभूतानां धर्माणां मध्ये केचन शाब्दस्वरूपे परिग्राह्या अपरे च परित्याज्याः, कुतो वा सुवर्णपदं स्वाङ्गुलीयकोपादानद्रव्यजातिविशेषमभिदधत् तं जातिविशेषं रूपेण गुरुत्वेन द्रवयोग्यतयैव च नियमयति न पुनः स्वीयेन रूपगुरुत्वसहकृतेन रसविशेषसंयोगजन्यविलीनभावेनैवेत्यत्र न कोऽपि किमपि कारणं प्रदर्शयितुमीष्टे । यतस्तादृशद्रव्यजन्यस्तस्य विलीनभावोऽस्ति तथैवासाधारणो धर्मो यथैव वह्निसंयोगेन द्रुतत्वम् । तौ च द्वावपि धर्मौ केवलं तस्मिन्द्रव्ये विभिन्नज्ञानोपकार्योत्पादकशक्तिमत्त्वेतरद्रव्यद्वयसंयोग इव । सुवर्णपदबोध्यशब्दस्वरूपघटकं द्रुतत्वं भवति, रसविशेषसंयोगेनविलीनभावस्य केवलं तद्वृत्तिधर्ममात्रमिति, रूपं शाब्दस्वरूपघटकमाघातवर्धनीयता च न तथा किं तु तद्वृत्तिधर्ममात्रमिति वा वैषम्ये प्रमाणाभावात् । अयं भावः । सर्वेषामेषां तदीयाभ्यन्तरसंस्थित्याश्रितधर्ममात्रतया द्रव्यान्तरसंयोगजन्यसक्रियनिष्क्रियान्यतरशक्तिमात्रतया च सुवर्णपदार्थतायास्तद्द्रव्ये उपलभ्यमानानां विज्ञानानां समुदायविशेषे नियमने प्रमाणाभावात् तत्पदस्यार्थो ऽपरिहा-

र्यतया ऽवश्यमेवात्यन्तमनियतो भवेत् । यत उक्तप्रकारेण बहवो जना एकस्मिन्नेव द्रव्ये ऽनेकान् धर्मान् पश्यन्ति तथापि, मन्ये, न कोपि सर्वान् इति कथयितुं शक्नोति । इत्थं च वस्तूनामत्यन्तमपूर्णमेव विवरणमस्माभिः क्रियते, शब्दानामर्थाश्चात्यन्तमनियताः सन्तीति सिद्धम् ॥

१८ ॥ शुद्धविज्ञाननामानि कदा चिदेव संदिग्धार्थानि भवन्ति ॥—पूर्वोक्तवर्णनाच्छुद्धविज्ञाननामानि सर्वेभ्यो ऽन्येभ्यो न्यूनतरं भ्रमयोग्यानि सन्तीति सुस्पष्टं भवति तच्च वक्ष्यमाणकारणाभ्याम् । तत्र प्रथमं, यतस्तत्पदवाच्यविज्ञानानामेकमात्रप्रत्यक्षरूपतया ऽधिकमिश्रविज्ञानान्यपेक्ष्याधिकं सौकर्येण गृह्यन्ते ऽवधार्यन्ते च सुस्पष्टभावेन । यतश्च यत्र स्वघटकशुद्धविज्ञानानां यथार्था संख्या न तथैकरूपा नापि शीघ्रमात्मना ऽवधार्यते तेषां मिश्रभावानां द्रव्याणां च मिश्रविज्ञानेषु प्रायशोनुगतस्यानिश्चयस्य तेषु संभवो नास्ति । द्वितीयतश्च, यतस्तानि न कदापि स्वरूपान्तरेण संबध्यन्ते ऽपि तु स्वबोध्यप्रत्यक्षमात्रेण । स च स्वरूपान्तरेण विज्ञानान्तरेण सह संबन्धो द्रव्यनाम्नामर्थं स्वभावत एव तथा विसंकुलमुपकल्पयति जनयति च बहुशो विवादान् । ये शब्दान् विपरीतेष्वर्थेषु न प्रयुञ्जते बुद्धिपूर्वं मिथ्या भाषणाय वा न प्रवर्तन्ते ते स्वपरिचितायां कस्यामपि भाषायां शुद्धविज्ञाननाम्नामर्थप्रयोगयोर्नैव भ्रमन्ति । श्वेतं मधुरं पीतं कटु इत्यादिपदानामर्थो ऽस्ति स्फुटतमो यं सर्वे याथार्थ्येन जानन्ति तदज्ञानं वा ऽनुभूय ज्ञानाय यतन्ते च । एवमपि पुरुषान्तरप्रयुक्तेन विनयपदेन कार्पण्यपदेन वा बोध्यमानः शुद्धविज्ञानानां यथार्थः समुदायः क इति न तथा निश्चयेन ज्ञायते । यद्यपि च सुवर्णपदेन लोहपदेन वाभिधीयमानमर्थं साधु जानीम इति चिन्तयितुमर्हामस्तथापि पुरुषान्तरप्रयुक्ततत्पदाभिव्यङ्ग्ययथार्थमिश्रविज्ञानं नास्ति नियतम् । विश्वसिमि वाहं यद् वक्तृश्रोत्रोरात्मनोस्तत्पदबोध्यो सर्वथैकरूपावेव समुदायो विरलमेव स्यातां यदभावश्च साधारणवाक्यानां साधारणतत्त्वानां च व्यवस्थापनस्य तदनुगतफलानां विमर्शस्य चोद्देशेन संवदतोः पदप्रयोगे ऽवश्यं विवादान् भ्रमांश्च जनयति ॥

१९ ॥ शुद्धभावनामान्यपि तथैव ॥—तेनैव नियमेन शुद्धभावनानामान्यपि विरलमेव संदेहानिश्चययोग्यानि विशेषतश्च व्यक्तार्थकानि संख्याभेदनामानि । यः संख्याज्ञानशक्तिमान् पुरुषो न कोऽपि सप्तपदस्य त्रिकोणपदस्य वा लौकिकेऽर्थे संदेग्धि । किं च प्रायशो न्यूनमिश्रविज्ञानानां नामानि न्यूनसंदिग्धार्थानि भवन्ति ॥

२० ॥ प्रायशः संदिग्धार्थानि द्रव्यनामानि अतिमिश्रभावनामानि च सन्ति ॥—अत एव ये मिश्रभावाः स्फुटस्वल्पतमशुद्धविज्ञानघटिताः सन्ति तेषां नामानि प्रायो न संदिग्धार्थानि भवन्ति । परं तु भूयिष्ठशुद्धविज्ञानघटितमिश्रभावनामानि प्रायोऽत्यन्तं संदिग्धानियतार्थानि सन्तीति तूक्तमेव । द्रव्यनामवाच्यानां विज्ञानानां तु स्वसंबद्धप्रतिमसत्यपार्थसारूप्याभावाद् यार्थस्वरूपानात्मकत्वाच्चैतोऽप्यधिकतरं तद्वाचकानि पदानि शास्त्रीये संवादेऽपूर्णान्यनियतार्थानि सन्ति ॥

२१ ॥ कस्मादियमपूर्णता शब्देष्वारोप्यते ॥—पुरो वर्तमानद्रव्यनाम्नामर्थेषूपलभ्यमाना महतीयमव्यवस्था तेषां यथार्थाभ्यन्तरसंस्थितेर्ज्ञानासामर्थ्येन ज्ञानाभावेन वा भवतीति महच्चित्रं यदहमपूर्णतां शब्देषु व्यवस्थापयामि न पुनर्बुद्धौ । बुद्धेरपूर्णताया अभावो न्याय्यः प्रतीयते इत्येव मन्ये ममैतदुपायपरिग्रहस्य कारणम् । एवं सति सत्यं वदामि यदा मयायं बुद्धिविषयको वाद आरब्धस्तदा शब्दानां कोऽपि विचारः कथमप्यत्रावश्यक इति नैव विचारितमासीत् । परं तु अस्माकं विज्ञानानां मूलकारणं मिश्रणं च सुविचार्य ज्ञानस्य नैयत्यविस्तारयोः परीक्षा यदोपक्रान्ता तदा ज्ञानस्य शब्दैः सह तथा प्रत्यासन्नतरः संबन्धोऽस्ति येन शब्दार्थानां बलं प्रकारं च साधु प्रथममविचार्य ज्ञानविषये सुस्पष्टतयाऽत्यल्पमेव कथयितुं शक्यते । ज्ञानस्य तत्त्वविषयकतया सर्वदा वाक्याश्रितत्वात् । किं च तस्य वस्तुषु पर्यवसितत्वेऽपि प्रायः सर्वेषां शब्दानां मध्यस्थतयैव ते साधारणज्ञानादपृथग्भूता इव प्रतीयन्ते । यतस्तेषां बुद्धिपदार्थयोर्द्वयवस्तुगमागमाप्रतिबन्धकाकाशवद् मध्यवर्तितया तेषां गूढत्वाव्यक्तत्वेऽस्माकं नेत्रपटलयोः पुरतो न कथमप्यवरोधं जनयतो नापि

बुद्धिं भ्रामयतः । आत्मसु परेषु च मनुष्यैर्व्यवस्थापितेषु हेतुदोषेषु ज्ञानविश्वादयोः संभावितेषु भ्रमेषु च सर्वेषामेषां कियान् महान् भागः केवलं शब्दान् अनियतान् भ्रान्तांस्तदर्थांश्चाश्रयत इति विचारयेम तर्हि वयं ज्ञानपथे महानयमन्तराय इति तर्कयेम । अतो ऽस्माभिः सावधानतया ज्ञातव्यमिदमिति निगमयामि । यत एतस्य परिष्कारकाणि शास्त्राणि मनुष्याणामभ्यासाय रचितानि सूक्ष्मबुद्धेः पाण्डित्यस्य व्यापकानि च सन्तीत्येतस्य दौष्कर्यमस्मज्ज्ञानागम्यमिति वक्ष्यमाणपरिच्छेदे निरूपयिष्यते । परं तु ज्ञानसाधनभूताया भाषाया अपूर्णतां सूक्ष्मेक्षिकया विचारयेम तर्हि संसारे वर्धमाना भूयिष्ठा विवादाः स्वतएव विशीर्णा भवेयुः । शान्तिसमेतो ज्ञानमार्गश्चानवरुद्धो ऽधुना ऽपेक्षया ऽधिकतरः स्यात् ॥

२२ ॥ प्राचीनग्रन्थकाराणां स्वाभिप्रेतार्थे तात्पर्यकल्पनाया न्यूनीकरणमनेन ज्ञापनीयम् ॥—सत्यं चैतत् सर्वासु भाषासु शब्दानामर्थस्य वक्तृविज्ञानावबोधविमर्शाधीनतया तद्देशीयतद्भाषाभाषिपुरुषस्यापि तेषामनियतार्थकत्वं दुर्वारम् । प्रसिद्धं चैतद् यवनग्रन्थेषु । तेषां ग्रन्थानां पाठकाः प्रायः सर्वे एकविधानामपि शब्दानां भिन्नभाषायाश्चार्थान्तराण्युपलभन्ते । परं तु यदा प्रत्येकदेशगते ऽस्मिन्स्वाभाविके दोषे सत्यपि दूरदेशनिवासिपुरुषान्तरैः सह समागमो भवति यत्र वक्तृश्रोत्रोर्ज्ञानानां स्वभावानामाचाराणां भूषणानां भाषणप्रकाराणां चात्यन्तं परस्परं भेदो भवति सर्वेप्येते च यत्र तेषां शब्दानामर्थं विभेदयन्ति संप्रत्यस्माभिरज्ञातेप्यर्थे तात्पर्यं कल्पयन्ति च, तदा प्राचीनग्रन्थानां व्याख्यासु विपरीतबोधेषु च परस्परं छिद्रान्वेषणपरैरस्माभिर्न भवितव्यम् । तेषां ज्ञानस्य महोपयोगित्वेपि यत्र शुद्धविज्ञाननामानि कानि चित्स्फुटतराणि वस्तूनि च विहाय सर्वत्र पदानां विवरणमन्तरा श्रोतारो नियतमसंदिग्धं वक्तुस्तात्पर्यं नावधारयितुं शक्नुवन्ति तादृश्या भाषाया अपरिहार्यस्य दोषस्य दृढं संभवात् । किं च धर्मविषयके ऽनुशासनविषयके कर्तव्याकर्तव्यविषयके च संवादे तेषामुत्तमतमविषयसंबद्धतया महत्तमदोषो ऽयं संभाव्यते ॥

२३ ॥ नवीनमंगलसमाचारप्राचीनमङ्गलसमाचारयोर्भूयिष्ठानि व्याख्यानानि टीकाश्च स्फुटतमानि प्रमाणानि प्रकृतविषये । मूले कथितस्य सर्वस्यापि विषयस्याप्रामाण्यज्ञानानास्कन्दितयाथार्थ्ये ऽपि तदर्थबोधे ऽध्येतारो भ्रमन्त्येव । किं नेदमाश्चर्यमावहति, शब्दात्मपरिधानीयेनावृताज्ञाः परेशेच्छाया न तावत् तात्विकं निजमसंदिग्धं स्वरूपं केनापि शक्यते ज्ञातुमिति । साक्षादीश्वरपुत्रस्यापि मांसमयशरीराविष्टस्य पापातिरिक्तानां मनुष्यस्वभावसिद्धानां सर्वेषामसुखास्थिरत्वादिधर्माणां सो ऽधिष्ठानमभूत् । अस्माभिरवश्यं तस्य दया श्लाघनीया स सर्वस्यास्य जगतः पुरत एवं सुस्पष्टाक्षरान् स्वनिःश्वसितानि निगमांस्तान, ददौ च सर्वेभ्यो मनुष्येभ्यः पूर्णां सुतर्कशक्तिं येन यैर्लिखितो ऽयं समाम्नायो न दृष्टस्ते यदा यदा तत्त्वान्वेषणपरायणा भवन्ति तदा तदा न परेश्वरसत्तायां नापि तदुचिताज्ञापरिपालने संदेग्धुमर्हन्ति । यतस्तदानीं स्वाभाविकधर्मस्य प्रत्यक्षं स्फुटं जायते सर्वैर्मनुष्यैः सुग्राह्यं भवति कदाचिदेव च परिवर्तनीयं भवति । पुस्तकैर्भाषाभिश्च प्रकाशितानि परेण बोधितानि तत्त्वानि च शब्दव्युत्पत्तिशिष्टानां साधारणानां स्वाभाविकानां च गूढभावानां दोषाणां चाधिष्ठानानि भवन्ति । मन्ये ऽस्माभिराद्यस्यैव विमर्शे ऽधिकं सपरिश्रमैः सावधानैश्च भाव्यम् । अपरस्य द्वितीयस्य प्रकारस्य च व्याख्यासु स्वाभिप्रेतार्थकल्पनासु च न्यूनाग्रहशालिभिर्भाव्यम् न पुनस्तत्रापि स्वसामर्थ्यसूचनाय प्रयतितव्यमिति ॥

॥ इति नवमः परिच्छेदः ॥

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

THIRD ADHYÁYA.

(*Continued from page* 706.)

अथ याः पञ्च षोडश्यस्ताभिरवान्तरदिक्षु पादानुन्नयेत् । ३००

With the five sixteenth-bricks (which had been put aside) feet are to be lengthened out towards the four intermediate directions.

उद्धृतानां षोडशीनां चतसृभिरवान्तरदिक्षु पादानुन्नयेत् ।

पञ्चम्याꣳ शिरः पुरस्तात् । ३०८

With (the remaining) fifth brick, the head is to be lengthened out on the east-side.

उन्नयेदित्येव ।

तासां परिकर्षणं व्याख्यातम् । ३०९

The cutting of these bricks by the circle has been explained (see the second droṇachit ; in the same manner as there the five bricks are placed touching the large square before it has been turned into a circle ; then the circle being drawn cuts off a part from each brick ; this part is joined to the outward part of the brick).

तासां षोडशीनां परिकर्षणं सर्वतो लेखनं व्याख्यातम् । षो-डशीं पुरस्ताद्विषय उपधायेत्यादिनोक्तमित्यर्थः ।

प्रधीनाꣳ सप्तधा विभागः प्रधिमध्याः प्रक्रमव्यासा भवन्ति । ३१०

The (four) pradhis (the segments of the large circle lying round the largest possible square constructed in the circle) are divided into seven parts each; the bricks situated in the middle of the pradhis are one prakrama broad.

तदुत्तरेण द्रोणचिता व्याख्यातमित्यस्यैव प्रपञ्चम् ।

यदतिरिक्तꣳ संपद्यते तच्चतुरश्राणामध्यर्धाभिर्योयुज्यते । ३११

The excess (of bricks) which results (from this arrangement) is set right by the employment of bricks, the area of which is equal to one and a half square brick.—When we divide the agni into the parts mentioned in the preceding sútras and in the description of the second droṇachit, the result is 206 ; the

six bricks in excess are removed by employing twelve adhyardhás instead of eighteen chaturthís (see farther on).

मण्डलमध्यचतुरस्रे चतुश्चत्वारिंशच्छतमिष्टकाः शेरते । प्रधिमूलेषु चतुर्विंशतिश्चतुरस्राः । प्रधीष्टका अष्टाविंशतिः । प्रथमे प्रस्तारे शिरसो ऽवस्तात्प्रधिमध्यमस्थान एकविंशतिरिष्टकाः । शिरस्येका प्रधिमध्यमा । अष्टौ पादेषु । एवमुपहिते यदतिरिक्तं संपद्यते तच्चतुरस्राणामध्यर्धाभिर्योयुज्यते युज्यत इत्यर्थः । यत्तदिति सामान्यनिर्देशः । अध्यर्धेष्टकानामर्धांशस्याल्पायापच्छेदः नित्यमल्पायापच्छेदनम् ।

अपरस्मिन्प्रस्तारे । ३१२

In the second layer

विशेषो वक्ष्यत इति शेषः ।

पादानां शिरोवद्विभागः शिरसः पादवत् । ३१३

— the feet are to be divided as the head (was divided in the first layer) and the head as the feet (were in the first layer).— In the second layer the four corners of the large square in the middle of the chiti are turned towards the east, north, etc; consequently the pradhis towards the north-east, north-west, etc.; so that the feet lie adjoining the middle of the pradhis; then the middle brick from the pradhi is placed into the end of the foot and the void place—resulting from removing the brick—covered with two bricks. The head in the second layer is divided into two parts, corresponding to the division of the feet in the first layer.

द्रोणचितो द्वितीयप्रस्तारे प्रधिमध्यमामोष्ठ उपधायावस्तात्तद्द्वेधा विभजेदिति यदुक्तं तदिह मण्डलकूर्मचितो द्वितीयप्रस्तारे पादानां भवति । शिरसः पादवत् । द्वेधा विभाग इत्यर्थः । प्रथमे प्रस्तारे विपरीतमुपधानमित्युक्तं भवति । प्रधिमध्यमामोष्ठ

उपधायेत्यस्य प्रथमे प्रस्तारे विनियोगात् । मण्डलमध्यचतुरश्रस्य प्रस्तारद्वये ऽपि रथचक्रचिद्वत्सक्तयो भवन्ति । अयमत्र प्रकारः । अग्निमध्ये शङ्कुं निहत्य पञ्चदशाधिकशतषोडशीनां करण्या सपञ्चविंशतितिलैकविंशत्यधिकशतत्रयाङ्गुलया चतुरश्रं विहृत्य चतुरश्रं मण्डलं चिकीर्षन्निति न्यायेन सार्धैकाशीतिशताङ्गुलेन विष्कम्भार्धेन मण्डलं परिलिख्य मण्डलशङ्कोः पुरस्तात् त्रिंशदङ्गुलेन शङ्कुं निहत्य मण्डलपूर्वान्ते परिधेः पश्चादेकोनचत्वारिंशत्तिले विष्कम्भान्ते शङ्कुं निहत्य तं शिरसः पश्चान्मध्यशङ्कुं परिगृह्य प्रक्रमप्रमाणेन शिरसश्चतुरश्रं कुर्यात् । एवं मण्डलप्रकृतिभूतचतुरश्र उभयतो ऽक्ष्णया रज्जुं नियम्य चतुरश्रमध्यशङ्कुं परिगृह्य चतसृषु कोणदिक्षु प्रक्रमे प्रक्रमे ऽतीते शङ्कवः । परिधेरभ्यन्तरतः कोणदिक्ष्वेकोनचत्वारिंशत्तिले शिरोवच्छङ्कवः । ततः प्रभृति विदिक्षु पदार्थानि प्रक्रमप्रमाणानि चत्वारि चतुरश्राणि कृत्वा विष्कम्भार्धशङ्कोरन्तरशङ्कुषु प्रतिमुच्य शिरःपदार्थानां चतुरश्राणामेकमंसमारभ्येतरादंसादालिखेत् । मण्डलमध्य एकोनविंशतितिलसहितेन पञ्चपञ्चाशच्छतद्वयाङ्गुलेन विदिक्षु यथा सक्तयः प्रथमे प्रस्तारे तथा चतुरश्रं कृत्वा तस्य करण्या द्वादशेन त्रयोदशतिलसहितैकविंशत्यङ्गुलेनेष्टकाः कुर्यात् । प्रधीनां चत्वारि करणानि । त्रिकोणमाद्यम् । तस्य पश्चिमफलकं द्वाविंशदङ्गुलं सतिलत्रयम् । उत्तरं पार्श्वं पञ्चविंशत्यङ्गुलं साष्टादशतिलम् । एकचत्वारिंशदङ्गुलं तृतीयं कर्णरूपं धनुरिव नतेत् । यथा चत्वारिंशदङ्गुलं तिलाः[1] शरः । उपान्त्यस्य पूर्ववत्पश्चिमं फलकम् । प्रध्यन्तस्योत्तरवद्दक्षिणं फलकम् । एकचत्वारिंशदङ्गुलं सपञ्चतिलमु-

[1] ? A—C. त्तिलाः ।

त्तरं फलकम् साष्टविंशतितिलपञ्चविंशदङ्गुलं कर्णरूपं तद्धनुरिव
भवेत्। त्रिंशत्तिलाः शरः। तृतीयस्य पश्चिमं फलकं षट्तिलं नव-
चत्वारिंशदङ्गुलम्। दक्षिणं सतिलद्व्यर्धविंशत्यङ्गुलम्। सपञ्चतिलमे-
कत्रिंशदङ्गुलमुत्तरम्। सचतुर्दशतिलं पञ्चाशदङ्गुलं चतुर्थं कर्णरूपं
तद्धनुरिव भवेत्। यथाष्टपञ्चाशत्तिलाः शरः। प्रधिमध्यमायाः पूर्व-
पश्चिमे प्रक्रमप्रमाणे। दक्षिणोत्तरे सपञ्चतिले एकत्रिंशदङ्गुले। त-
द्धनुरिव भवेत्। त्रिंशत्तिलाः शरः। पादशिरसामुपधानार्थानि त्रीणि
करणानि। तेषां मण्डलसंधावुपधेयस्य सषट्तिले अष्टाङ्गुले दक्षि-
णोत्तरफलके। त्रिंशदङ्गुले पूर्वपश्चिमे। पश्चिमं मण्डलसंधिगत-
पार्श्वं धनुराकारं भवेत्। अन्तर्वक्रं भवति यथा नवत्रिंशत्तिलाः
शरः। तस्याः पुरस्तादुपधेयस्य षोडशतिलहीनैकविंशत्यङ्गुले दक्षि-
णोत्तरफलके। पूर्वपश्चिमे प्रक्रमप्रमाणे। पूर्वफलकं धनुरिव भवेत्।
नवत्रिंशत्तिलाः शरः। पादशिरसामग्र उपधेयाया उद्धृतायाः प्रधिम-
ध्यमायाः स्थान उपधेययोरेकं करणम्। त्रिंशदङ्गुले द्वे फलके।
इतरे पञ्चदशाङ्गुले पूर्वपश्चिमे। संख्यापूरणार्थे चतुरश्राध्यर्धेष्टके
पूर्वापरे समस्य तयोः पूर्वां प्रागुदक्सविशेषामक्ष्णयापच्छिन्द्यात्।
एवं नव करणानि। उपधाने प्रथमे प्रस्तारे चतुरश्रस्यावान्तरदिक्षु
स्रक्तयः। चतुरश्रमध्ये चतुश्चत्वारिंशच्छतमिष्टकाः। प्रधिमूलमध्येषु
चतुर्विंशतिश्चतुरश्राः। प्रधिष्वष्टाविंशतिः। पूर्वस्मिन्प्रधौ प्रधिमध्यमां
शिरस्युपधाय तस्या अवस्ताद् द्वे चतुर्थ्यौ उपदध्यात्। चतुर्षु
पादेषु मण्डलसंधावेकैकामन्तर्वक्रां ह्रस्वेष्टकाम्। पुरस्ताद्बहिर्वक्रां
बृहतीम्। एवं षडिष्टका अतिरिच्यन्ते। चतुरश्रस्रक्तिष्वग्निधर्मानुरो-
धेनाष्टादश चतुरश्रा उद्धृत्य द्वादशाध्यर्धेष्टका उपदध्यात्। एवं द्वि-
शतः प्रस्तारः। अपरस्मिन्प्रस्तारे मण्डलमध्यचतुरश्रस्य महादिक्षु

Digitized by Google

स्त्रक्तय: । पादेषु प्रधिमध्यमानामुपधानम् । तेषामभ्यन्तरश्चतुर्थ्यर्धा: । शिरसि ह्रस्वबृहत्योरुपधानम् । अत्रापि षडतिरिच्यन्ते । मध्यम-मध्यचतुरस्रे पूर्ववदष्टादश चतुरस्रेष्टका उद्धृत्याग्निधर्मानुरोधेन द्वादशाध्यर्धा उपदध्यात् । एवं द्विशत: प्रस्तार: ।

व्यात्यासं चिनुयाद्यावत: प्रस्तारांश्चिकीर्षेत् । ३१४

These two layers are to be employed by turns for as many layers as one intends to make.

सर्वशेषार्थमन्ते वचनम् ।

कूर्मस्यान्ते तनु पुरीषमुपदध्यात् । ३१५

A little loose earth is to be put on the edge of the tortoise construction.

अन्ते पर्यन्ते । तनु अल्पम् । पुरीषमुपदध्यात् ।

मध्ये बहुलम् । ३१६

A thick layer of loose earth is to be placed on the middle of the construction.

प्रभूतं मध्ये । उत्पृष्ठ इति कल्प उक्तमेतत् । पुरीषेणैव संपाद्यमिति भाव: ।

एतद्[1] द्रोणे विपरीतम् । ३१७

The reverse takes place in the drona construction.

This supplementary rule for the drona is given here for shortness' sake; a thick layer of earth has to be placed on the margin of the drona, a thin one on its middle.

मध्ये तनु पुरीषम् । अन्ते बहुलमिति । मध्ये निम्नमिव करोतीति द्रोणचित्युक्तम् । एवं संपाद्यमिति भाव: । अत्र कल्पोक्तो विशेषो ऽनुसंधेय: । तत्रैवमुक्तम् । अथ ह्येष द्रोणचिद् ब्राह्मणो

[1]. M. एतदेव

मध्य उत्पृष्ठः परितस्तनुः । तस्यैवं सतो ऽरत्निमात्रेण प्राक् शिर इव निह्नुहतीति । तस्यावान्तरदिशः पादानि वेष्टुका आयातयति । स एष कूर्मचिद् ब्राह्मणो मध्ये उत्पृष्ठः परिकृष्यत इति । अथ केचित्पठन्ति ।

अथ हैक एकविधप्रभृतीन्प्रउगादीन् ब्रुवते । ३१८

Some teachers maintain that the agnis beginning with the one-fold ought to be in the shape of triangles, etc.

This and the following sútras refer to the contested point about the agnis of smaller area than 7½ square-purushas, which had been discussed in II., 14-21. There it had been settled that no agni should be smaller than the seven-fold, although some teachers maintained the legitimacy of the agnis from 1½ square-purushas up to 6½ square-purushas. A modification of these teachers' doctrine is now introduced here; agnis of small size may be constructed, but then only in the form of praügas, rathachakras, etc, not in that of birds.

अथ हैकविधप्रभृतीनपक्षपुच्छांश्चिन्वत इत्यारभ्यैकविधादीनामकरणं प्रतिपाद्य तस्मात्सप्तविध एव प्रथमो ऽग्निरिति सप्तविधस्यैवाग्नेः प्रथमाग्नित्वं प्रतिज्ञातम् तत्सप्तविधप्रशंसापरमिति मन्वानाः केचिदाचार्याः प्रउगादीन्पक्षपुच्छरहितानग्नींश्चेतव्यान् ब्रुवते । तत्रैकविधाग्नौ पुरुषप्रमाणेन वेणुना समचतुरस्रं कृत्वा प्रउगादिकरणे द्विपुरुषविधाग्नौ पुरुषाङ्गुलोर्द्ध्वाभ्यां हत्वा तस्य मूलमानीय चतुरस्रं कृत्वा प्रउगादिकरणम् । एवं त्रिविधादिषु द्रष्टव्यम् । तत्रैकविधादिषु प्रउगादीनां पक्षपुच्छादिरहितानामाकृतिविकाराभावात्सप्तविधे यदुक्तमिष्टकाकरणं च तदेवात्र प्रत्येतव्यम् ।

समचतुरस्रानेक आचार्याः । ३१९

Some teachers teach that they (the agnis from the one-fold up to the six-fold) ought to be constructed in the form of squares only.

एक आचार्या एकविधप्रभृतीनग्नीन्समचतुरस्राकारांश्चेतव्यानिति ब्रुवते । न प्रउगादीन् गुणविकारानित्यर्थः । अस्मिन्पक्षे करणाद्याह ।

तस्य करण्या द्वादशेनेष्टकाः कारयेत्तासामर्ध्याः पाद्याश्च । ३२०

In this case bricks have to been made with the twelfth of the side of the square, besides half-bricks and quarter-bricks (the two latter classes are wanted for raising the number of the bricks to two hundred).

तस्याग्नेः करण्या द्वादशेनेष्टकाः कारयेत् ।

तासां द्वादशकरणीनामर्ध्यास्तिर्यग्भेदाः पाद्याश्च । अर्ध्यायास्तिर्यग्भेदे समचतुरस्राश्च कार्या इत्यर्थः । एवं त्रिप्रकाराभिरिष्टकाभिर्भेदपरिहारेणोपधानं कर्तव्यम् । अत्रापस्तम्बः । एकविधप्रभृतीनां करणीनां द्वादशेन त्रयोदशेनेतीष्टकाः कारयेत्पादेष्टकाश्च व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेदिति । तत्र द्वादशभिः सावयवाभिः प्रथमप्रस्तारः । इतराभिरितर इति व्यत्यासः ।

आश्वमेधिकस्याग्नेः पुरुषाभ्यासो नारत्निप्रादेशानाम् । ३२१

In the agni constructed during the aśvamedha, only the purushas are increased not the two aratnis and the prádeśa.

For the aśvamedha a śruti had been referred to in Adhy. II. 8-9: ekavinśo' gnir bhavaty aśvamedhasya; ekavinsa has been translated at that place as having the same meaning with: ekavinśavidha, vdc. the agni consisting of 21½ square-purushas. According to the rules about the increase of the agni given in the beginning of the second adhyáya, the agni of the aśvamedha would have to be constructed by giving a proportionate increase to all the parts of the construction;

this is managed by dividing the fourteen square-purushas by which the ekavinṣ́avidha is larger than the saptavidha into fifteen parts and adding one of these parts to each of the fifteen half square-purushas which compose the saptavidha ($7\frac{1}{2}=\frac{15}{2}$). But according to the above sútra and its commentary the áśvamedhika agni was of a different nature. It had to comprise twenty-one purushas not including the lengthening of the two wings by one aratni each and of the tail by one prádeśa, so that its átman consisted of twelve square-purushas, its wings and tail of three purushas each. A proportional increase of the two aratnis and the prádeśa would amount to $1\frac{1}{2}$ square-purushas and then the agni would no longer be "ekavinṣ́a" as the śruti demands. Therefore the wings were lengthened only by the regular aratni (of 24 angulis) and the tail by the regular prádeśa (12 angulis), so that the increase of the agni caused thereby remained less than one square-purusha and the agni preserved its character of ekavinṣ́a. This seems however to be the opinion of certain teachers only and I cannot see any reason why ekavinṣ́a "should not mean ekavinṣ́avidha, i. e. containing $21\frac{1}{2}$ purushas altogether. There seem to have been in the different śákhás many different doctrines about this knotty point, the increase of the agni; the followers of the white Yajus (according to Weber, Indische Studien XIII. p. 240) increased the agni each time not only by one square-purusha (the seventh part of the primitive agni without aratnis and prádeśa) but also by the fourteenth part of a purusha (this fourteenth part being the seventh part of the half purusha resulting from the lengthening of the wings and the tail); thus their ekavinṣ́avidha comprised really $22\frac{1}{2}$ purushas ($21\frac{1}{2}+\frac{14}{14}$), their ekaśatavidha $101+\frac{1}{2}+\frac{94}{14}=108\frac{3}{14}$ (Deva, in the passage marked as containing a mistake.—Indische Studien XIII. p. 241—is quite right, the ekaśatavidha consisting of $101+\frac{101}{14}$ square-purushas.)

अश्वमेध एकविंशोऽग्निर्भवतीत्याम्नातम् । तदभिप्रायेणेदमुच्यते । तथार्धाष्टमविधस्य प्रकृतिभूतस्याग्नेः सप्तानामेवाभ्यासः श्रुता-

वेकविंशतिसंख्यायोगात्। नारत्निप्रादेशाभ्यासः। एकविंशतिसंख्याभि-स्तुल्यजातीयस्य निवर्तिका यथाविधाभ्यासे। तत्र पुरुषविकरण्या पञ्चतिलोनयाष्टशतद्वयाङ्गुलया पक्षपुच्छानां मानं कृत्वा पक्षपुच्छेष्वरत्निप्रादेशानां प्रक्षेपः।

प्राकृतो वा त्रिगुणः। ३२२

Or it (the agni of the aśvamedha) has the same shape as the original agni, but is three times as large.

This agrees with the method employed in all cases by the priests of the white Yajus.

अश्वमेधे त्रिस्तावो[1] ऽग्निर्भवतीत्याम्नातम्। तदभिप्रायेणेद-मुच्यते। प्राकृत अर्धाष्टमविधो ऽग्निस्त्रिविधो भवति। तस्मात् त्रि-स्तावविधो विधाभ्यासवत्पुरुषविशेषश्रवणात्। एवं चार्धचयोर्विंशाः पुरुषा अग्निर्भवति। तत्र पुरुषविकरण्या मानम्। पक्षपुच्छानां तिर्यङ्मानीविकरणी तिर्यङ्मानी। पार्श्वमान्याश्च विकरणी पार्श्व-मानी। एवमाश्वमेधिकस्याग्नेरुभयरूपत्वमुक्तम्। अस्मिन्नर्थे ब्रा-ह्मणमुदाहरति।

त्रिस्तावो ऽग्निर्भवतीत्येकविंशो ऽग्निर्भवतीत्युभयं ब्राह्मण मुभयं ब्राह्मणम्। ३२३

"The agni is three times as large" and "the agni is twenty-one-fold," both is Bráhmana.

उभयं विधिवाक्यमेवेत्यर्थः। उभयस्यापि ब्राह्मणार्थत्वादुभ-यमनुष्ठेयमिति भावः। वीप्सा समाप्तिख्यापनार्था॥

टीकाभट्टात्मजेनेत्थं द्वारकानाथयज्वना।
तृतीयो व्याकृतो ऽध्याय उपपत्तिसमन्वितः॥

[1]. Cp. Paṇini V, 4. 84.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

UNIVERSITY OF CALIFORNIA LIBRARY
BERKELEY

Return to desk from which borrowed.
This book is DUE on the last date stamped below.

16May'51ED	REC. CIR. MAR 7 '78	
Jun16'51LU	REC. CIR. JUN 21 '76	
4May'61AE	Due end of FALL Quarter subject to recall after —	DEC 16 '70 94
REC'D LD OCT 16 1961	MAR 19 1976	AUG 18 1977 91
DEAD		REC. CIR. JUN 12 '77
30Jan'62DC	IN STACKS FEB 19 1976	APR 3 1978 64
REC'D LD JUN 3 1962	OCT 28 1976 77	REC. CIR. MAY 10 '78

LD 21-95m-11,'50(2877s16)476

Digitized by Google

U. C. BERKELEY LIBRARIES
C051288540

521602
UNIVERSITY OF CALIFORNIA LIBRARY

Digitized by Google

Digitized by Google